शब्दकल्पद्रुमः

206

शब्द कल्पद्रुम

शब्दकल्पद्रुम
२०८

पचम

शब्दकल्पद्रुमः

अर्थात्

एतद्देशस्थ समस्त कोषाशेषशास्त्र संकलिताकारा
दिवर्ण क्रमविन्यस्त शब्दतल्लिङ्ग नानार्थपर्य्याय प्रमा
ण प्रयोगधातु तदनुबन्धाभिधेय सहित तत्तच्छब्द प्र
णोत्पित्त वेद वेदांग पुराणेतिहास ज्योतिस्तन्त्रा
ख्यान काव्यालंकार छन्दः प्रभृति नाम ल
क्षणोदाहरणद्रव्यगुण रोगनिदानौ
षधस्वरूपक अवस्थादि संयुक्त
सर्वदर्शन मतानुसारि
संस्कृताभिधानग्र
न्थः ॥

तत्र

पंचम काण्डः

राजश्रीराधाकान्तबाहादुरेण विरचितः

७६६ षट्षष्ट्यधिक सप्तदशशतशकाब्दे ॥
कलिकाताख्यनगरे ॥
श्रीगणककमलनारेन मुद्रांकितः ॥

र रेफः यथा वर्णात् कारतकारो वा
रेफः इति कलाप संहिता सार
व्याकरणे ॥ रेफात् कारश्च ।
रकारः । इति प्रक्रियाकौमुदी ॥
सप्तसप्तविंशहलवर्णः तस्योच्चा
रणस्थानं मूर्द्धा । इति मुग्धबोधव्या
करणं ॥ तस्य स्वरूपं यथा । रेफं
चंचलापांगि कुण्डलीद्वय सं
युतं । रक्तविद्युल्लताकारं पंचदे
वात्मकं सदा ॥ पंचप्राणमयं वर्णं
त्रिविंदुसहितं सदा । इति कामधे
नुतंत्रे ६ पटलः ॥ तस्य लेखन
प्रकारो यथा । दक्षतः कुण्डली
रेखा वामाद्दक्षगतापि च । पुन
र्दक्षगता ह्येषा तेनाध्यो गतप्रचो
दितः ॥ भवानी शंकरो वह्नि ।
स्तासु तिष्ठति नित्यशः अर्द्धमात्रा
ब्रह्मरूपा महाशक्तिः प्रकीर्त्ति ।
ता ॥ इति वर्णोद्धारतंत्रं ॥
रः पुं पावकः ॥ तीक्ष्णः । इति
मेदिनी ॥ कामवह्निः । इति शब्द
रत्नावली ॥
रहः स्त्री वेगः । इत्यमरः ॥
रक क स्वादे ॥ आपने । इति क
विकल्पद्रुमः ॥ स्वादो रसोपादा
नं । क राकयति मोदकं बालकः
इति दुर्गादासः ॥
रक्तं क्ली कुंकुमं ॥ ताम्रं ॥ प्राचीना
मलकं । इति मेदिनी ॥ पद्मकं ॥
सिंदूरं ॥ हिंगुलं । इति राजनिर्घ
ण्टः ॥ शरीरस्थ सप्तधात्वन्तर्गत
धातुविशेषः । तत्पर्य्यायः रुधिर
२ असृक् ३ लोहित ४ अस्त्र ५ क्ष
तजं ६ शोणितं ७ । इत्यमरः ॥
पलंकारं ८ रोहितं ९ रंगकं १०
इति शब्दरत्नावली ॥ कीलालं ११
अंगजं १२ रोधिरं १३ स्वजं १४ ।
इति जटाधरः ॥ त्वग्जं १५ शोणं १६
लोहं १७ चर्म्मजं १८ । इति राज
निर्घण्टः ॥ अथ रक्तस्य स्वरूप
माह । यदा रसो यकृद्याति तत्र रज
क पित्ततः । रागं पाकं च संप्राप्य स
भवेद्रक्त संज्ञकः ॥ रक्तं सर्वश
रीरस्य जीवस्याधार उत्तमः ।
स्निग्धं गुरु चलं स्वादु विदग्धं पि
त्तवद्भवेत् ॥ जीवस्याधार उत्तम इ
ति यत आह । जीवो वसति सर्वस्मि
न् देहे तत्र विशेषतः वीर्य्ये रक्ते म
ले यस्मिन् क्षीणे याति क्षयं क्ष
णादिति ॥ वीर्य्ये रक्ते मले च श
रीरारंभके । वाग्भटोक्त पतिमाण
मिते स्तुहे जीवो वसति तत्र हे
अत्र हे रक्तस्य वर्णपदेशास्य वेपथ्या
प्रसंगात् । पित्तवद्भवेत् । साम्ले

भवेदित्यर्थः ॥ अथ रक्तस्य स्थानमाह । यकृत्प्लीहा च रक्तस्य मूलं स्यात्तेन तयोः स्थितं । अन्यत्रापि स्थितं तत्तद्रक्तानां पोषकं भवेत् ॥ इति भावप्रकाशः ॥

रक्तदोषनाशकौषधं यथा ॥ तुल्ययष्टिफले पिष्टे वारिणा तत्र लेपनः । तेन दुष्टे रक्तदोषः प्रणाश्यति न संशयः ॥ इति गारुडे १५२ अध्यायः ॥

रक्तः पुं लोहितवर्णः इत्यमरः ॥ कुसुम्भः हिज्जलः । इति राजनिर्घण्टः ॥

रक्तः त्रि अनुरक्तः । नील्यादिरञ्जितः ॥ लोहितः इति मेदिनी ॥ क्रीडारतः । इति धरणिः ॥

रक्तवर्णवस्तूनि यथा शोणानि भौमनीलेन्दुलाम्रकुंकुमतक्षकाः गुञ्जेन्द्रगोपदेवाग्नविद्युत् कुंकुमबिन्दवः ॥ हंसतालधरजिह्वास्तम्भसिन्दूरयावकः । हिङ्गुलं कुक्कुटशिखा नेत्रं च सारसमर्कटकमाणिक्यं हंसचञ्चुश्चापि कमर्कटयोः शिखे चकोरकोकिलपारावतनेत्रनखाशयाः कुसुम्भकिंशुककाशोककजवाबन्धूकपाटलाः । कमलं दाडिमीबिम्बफलं किम्पाकपल्लवौ ॥ ताम्बूलरागो मञ्जिष्ठालक्तकं रक्तचन्दनं । वेला नखदन्तदेवयर्म्म रौद्ररसादयः ॥ ॥

रक्तनीलवाचकानि यथा । लोहितनीलौ पुष्करहरिविद्रुमकमलकुसुम्भरत्नानि । सिन्दूरभूषणानलपत्ननयनाम्भोजिनीदलानि यथा । पुष्करं पद्मकाशयोः हरिः सूर्य्यकृष्णयोः विद्रुमः प्रवालविशिष्टवृक्षयोः । कमलं पद्मपानीयामलयोः । कुसुम्भरत्नं कौस्तुभेन्द्रनीलयोः । सिन्दूरभूषणं सिन्दूरालङ्कारगजयोः उत्पलमल्लिका सौमासेन्दीवरयोः पत्तनयोरग्निपार्थयोः अम्भोजिनीदलं पद्मपत्रपुटकिन्योः कमलाधिपपद्मेशौ नागाजिनकौ नत्सूर्य्यभूः रत्नाकरवरश्रीकः सदीधि कमलद्युतिः कमलाधिपपद्मेशौ सूर्य्यकृष्णौ । नागाजित् गरुडे नागस्पर्द्धी च । कान्तः कमनीयः कञ्जले नस्यानश्च । सूर्य्यभूः सूर्य्योद्भवो यमश्च ॥ सदा सिन्दूरमज्जेनाकलयन् कमलश्रियं । स्फुटशोभनतामश्रीर्वराहस्वामिदीधितिः पद्मसम्पत्त्व प्रभः विद्रुमणिदीधितिः प्रवालप्रबलच्छायः कलभानुमितच्छविः ॥ रक्तश्वेतवाचकानि

यथा । रक्तश्वेतौ हरिमरुवि पुष्करशतपत्रसूर्य्यकान्ताब्जाः । नवहंसमहापद्मार्कसोदराः कमलकीलाले ॥ हरि सुरेन्द्रसूर्य्ययोः । शुचिः श्वेतवैश्वानरयोः । पुष्करं जलपद्मयोः । शतपत्रं हंसपद्मयोः । सूर्य्यकान्तः स्फटिके सूर्य्यवत् कान्ते च । अब्जः शंखाम्बुजयोः । नवहंसः नवहंसे प्रत्यग्रसूर्य्ये च महापद्मः श्वेतनागे पद्मे च । अर्कः स्फटिकसूर्य्ययोः कमलं जलाम्बुजयोः । कीलालं जलरक्तयोः ॥ सुहृद्भ्रात्रादिभिर्भानो रत्नेनाग्रे रदाम्बुकैः । जलेऽम्भोजन्मशोभाभिः सरोजकुमुदादिभिः भानोः परस्मात् सुहृद्भ्रात्रादिभिः ॥

सितरक्तौ यथा । रविमित्त्रं चेन्द्रः रविकुलपश्च । भानुरत्नं सूर्य्यकान्तोऽग्निपद्मरागौ च । रदाम्बुकं दन्तवेष्ट अधरश्च । जलजशोभा जलजाचास्यैः शोभा चेति पद्मे पद्मकान्तिः । एवं सरोजादिशोभा सरोजस्पर्द्धिशोभादि पद्मे सरोजादि शब्दः । कुमुदादि शोभा कुमुदस्पर्द्धि ॥ शोभा पद्मे कुमुदादिशब्दः । इति क विकल्पलतायां २ श्लेषस्तबके उद्दिष्टवर्णनं नाम १ कुसुमं ॥

रक्तकः पुं अम्लानवृक्षः ॥ बन्धूकवृक्षः ॥ रक्तवस्त्रं ॥ अनुरागी । इति मेदिनी ॥ विनोदी । इति शब्दरत्नावली ॥ रक्तशिग्रुः ॥ रक्तैरण्डः । इति राजनिर्घण्टः ॥

रक्तकन्दः पुं विद्रुमः । इति हेमचन्द्रः ॥ राजपलाण्डुः ॥ रक्तालुः इति राजनिर्घण्टः ॥

रक्तकन्दलः पुं प्रवालः । इति त्रिकाण्डशेषः ॥

रक्तकमलं क्ली रक्तवर्णोत्पलं तत्पर्य्यायः । कोकनदं २ रक्ताम्भोजं ३ अरुणकमलं ४ शोणपद्मं ५ रक्तोत्पलं ६ तारविन्दं ७ रविप्रियं ८ रक्तवारिजं ९ । अस्य गुणाः । कटुत्वं । तिक्तत्वं । मधुरत्वं । शिशिरत्वं । रक्तदोषहरत्वं । पित्तकफवातशमनत्वं । सन्तर्पणकारकत्वं । वृष्यत्वञ्च । इति राजनिर्घण्टः ॥

रक्तकम्बलं क्ली रक्तोत्पलं । यथा चन्दनागुरुकर्पूरकुङ्कुमैश्च सगन्धिभिः । कमलैः कुमुदैः पुष्पैः कल्हारै रक्तकम्बलैः ॥ कलेधूपैर्द्दीपैश्च शोभने र्गीतमिश्र

नैः। अर्च्चयेद्दलिराजानं मंत्रेणाहि
जसत्तम॥ इति पाद्मोत्तरखण्डे
१६ अध्यायः॥
रक्तकरवीरकः पुं लोहितवर्णक
रवीरपुष्पवृक्षः। लालकनेल इ
ति हिंदीभाषा। तत्पर्य्यायः रक्त
प्रसवः २ गणेशकुसुमः चंडीकु
सुमः ४ क्रूरः ५ भूतद्रावी ६ रवि
प्रियः ७ अस्यगुणाः कटुत्वं तीक्ष्ण
त्वं विशोधनत्वं। त्वग्दोषव्रणकं
डूतिकुष्ठविषहरत्वंच इति राजनि
र्घंटः रक्तकांचनः पुं स्वनामख्या
तपुष्पवृक्षविशेषः। तत्पर्य्यायः
विदलः २ चमरिकः ३ इति शब्दर
त्नावली॥ कोचनालः ४ ताम्र
पुष्पः ५ कुद्दारः ६। इति जटाधरः
रक्तकाण्डा स्त्री रक्तपुनर्नवा इ
ति राजनिर्घंटः॥
रक्तकाष्ठं क्ली पत्तंगं। इति राज
निर्घंटः लोहितवर्णदारुच॥
रक्तकुमुदं क्ली रक्तकैरवं इति
जटाधरः॥
रक्तकुसुमः पुं पारिभद्रः धन्वन
वृक्षः। इति राजनिर्घंटः॥
रक्तकेशरः पुं पारिभद्रः इति रा
जनिर्घंटः पुन्नागवृक्षः। इति
रत्नमाला॥

रक्तकैरवं क्ली रक्तकुमुदं इ
ति जटाधरः॥
रक्तकोकनदं क्ली रक्तोत्पलं
इति जटाधरः॥
रक्तखदिरः पुं रक्तवर्णखदिर
वृक्षः। तत्पर्य्यायः रक्तसारः २
सुसारः ३ ताम्रसारकः ४ वक्रशा
ल्यः ५ यज्ञिकः ६ कुष्ठनोदनः ७
यूपद्रुमः ८ अस्त्रखदिरः ९ अरुः १०
अस्यगुणाः कटुत्वं उष्णत्वं कषा
यत्वं गुरुत्वं तिक्तत्वं आमवाता
स्रवातव्रणभूतज्वरनाशित्वं इ
ति राजनिर्घंटः॥
रक्तगंधकं क्ली बोलं इति रा
जनिर्घंटः॥
रक्तगुल्म पुं स्त्रीणां रक्तजगुल्म
रोगः। तस्य निदानादि गुल्मशब्दे
द्रष्टव्यं तस्यौषधं यथा द्विजय
ष्टीत्रिकटुकं चूर्णं पीतं हरेत्क्षिव
तिलक्वाथनसंयुक्तं रक्तगुल्म
स्त्रियाहर इति गारुडे १९६ अध्या
यः रक्तग्रः पुं रोहितकवृक्षः इ
ति जटाधरः॥
रक्तघ्नी स्त्री दूर्वाविशेषः गाँठि
या दूर्वा इति भाषा यथा महो
षधिश्च गोलोम्या रक्तघ्नी रक्तपि
त्तहा। इति शब्दचंद्रिका॥

रक्तचंदनं क्ली रक्तवर्णचंदनं तत्
पर्य्यायः। तिलपर्णी २ पत्रांगं ३
रंजनं ४ कुचंदनं ५। इत्यमरः॥
ताम्रसारं ६ ताम्रवृक्षः ७ चंदनं
८ इति रत्नमाला॥ लोहितं ९
शोणितचंदनं १० रक्तसारं ११
ताम्रसारकं १२ हरिचंदनं १३ अ
र्कचंदनं १४। इति राजनिर्घंटः
रक्तांगं १५ प्रवालफलं १६। इति
भावप्रकाशः॥ अस्यगुणाः। अ
तिशीतलत्वं। तिक्तत्वं। ईक्षणरो
गास्त्रदोषभूतपित्तकफकास
ज्वरभ्रांतिजंतुवमथुतृषानाशि
त्वंच। इति राजनिर्घंटः अपिच
रक्तं पीतं गुरुस्वादुच्छर्दितृष्णा
स्रपित्तहृत्। पित्तनेत्रहितं वृष्यं
ज्वरव्रणविषापहं॥ इति भाव
प्रकाशः। अन्यच्च रक्तपित्तहरं
बल्यं चक्षुष्यं रक्तचंदनं। इति
राजवल्लभः॥
रक्तचित्रकः पुं क्षुपविशेषः।
रागचिता इति भाषा। तत्पर्य्यायः
कालः २ अत्यालः ३ कालमूलः
४ अतिदीप्यः ५ मार्जारः ६ अग्निः
७ दाहकः ८ पावकः ९ चित्रांगः १०
महांगः ११ अस्यगुणाः। प्रत्य
कायकरत्वं। रुच्यत्वं। कुष्ठघ्नत्वं
लोहवेधकत्वं। रसनियामकत्वं
रसायनत्वंच। इति राजनिर्घंटः॥
रक्तचूर्णं क्ली सिंदूरं। इति हारा
वली॥ रक्तवर्णचूर्णमात्रंच॥
रक्तजंतुकः पुं भूनागः। इति राज
निर्घंटः॥ रक्तवर्णजंतुमात्रंच॥
रक्तजिह्वः पुं सिंहः। इति शब्द
माला॥ रक्तवर्णजिह्वायुक्तेत्रि॥
रक्तझिंटी स्त्री रक्तवर्णझिंटी
पुष्पवृक्षः तत्पर्य्यायः कुरुवकः २
इत्यमरः॥
रक्ततुंडः पुं शुकपक्षी। इति राज
निर्घंटः॥ लोहितमुखयुक्तेत्रि॥
रक्ततुंडकः पुं भूनागः। इति
राजनिर्घंटः॥
रक्ततृणा स्त्री गोमूत्रिका। इति
राजनिर्घंटः॥
रक्तत्रिवृत् स्त्री रक्तवर्णत्रिवृता ला
लनेउडी इति भाषा। तत्पर्य्यायः।
कालिंदी २ त्रिपुटा ३ ताम्रपुष्पि
का ४ कृष्णवर्णा ५ मसूरी ६ अरुणा ७
काकनासिका ८। अस्या गुणाः।
तिक्तत्वं। कटुत्वं। उष्णत्वं। रेचन
त्वं। ग्रहणी मलविष्टंभहारित्वं
हितकारित्वंच। इति राजनिर्घंटः
रक्तदंतिका स्त्री चंडिका। यथा
भद्रायस्याश्च नातुगान् वैप्रचिनान्

महास्वरान्। रक्तदन्ताभविष्यं
तिदाडिमी कुसुमोपमाः ततो
मां देवताः स्वर्गे मर्त्यलोके च मा
नवाः स्तवन्तो व्याहरिष्यन्ति सत
तं रक्तदन्तिकां॥ इति मार्कण्डेय
पुराणे देवीमाहात्म्ये ॥
रक्तदला स्त्री नलिका चिविल्लि
का इति राजनिर्घण्टः ॥
रक्तदृक् श् पुं स्त्री कपोतः इति के
चित् रक्तवर्णचक्षुर्विशिष्टे त्रि ॥
रक्तधातुः पुं गैरिके इति त्रिका
ण्डशेषः ताम्रे इति राजनिर्घ
ण्टः रक्तवर्णधातुमात्रे च ॥ र
क्तनालः पुं जीवशाकः इति
राजनिर्घण्टः ॥
रक्तनासिकः पुं पेचकः इति श
ब्दरत्नावली लोहितनासायुक्ते त्रि
रक्तपः पुं राक्षसः इति मेदिनी ॥
रक्तपानकर्त्तरि त्रि ॥
रक्तपत्रिका स्त्री नाकुली रक्तपुन
र्नवा इति राजनिर्घण्टः लोहित
पत्रे च ॥
रक्तपदी स्त्री लाजलताविशेषः य
था शमीपत्रा रक्तपदी समङ्गाञ्ज
लिकारिका इति जटाधरः ॥
रक्तपद्मः पुं क्ली रक्तवर्णकम
ले तत्पर्यायः रक्तसरोरुहं १ ।

रक्तोत्पलं २ कोकनदं ३। इ
त्यमरः॥ अस्य प्रमाणं यथा।
येषा ललितकान्ताख्या देवी म
ङ्गलचण्डिका। वरदाभयहस्ता च
द्विभुजा गौरदेहिका॥ रक्तप
द्मासनस्था च जटामुकुटमण्डिता
रक्तकौषेयवस्त्रा च स्मितवक्त्रा
शुभानना॥ नवयौवनसम्पन्ना
चार्वङ्गी ललितप्रभा इति ति
थ्यादितत्त्वं ॥
रक्तपल्लवः पुं अशोकवृक्षः।
इति राजनिर्घण्टः। लोहितपत्रे च
रक्तपक्षः पुं गरुडः इति केचित्
रक्तपा स्त्री जलौका॥ डाकिनी इ
ति मेदिनी शोणितपानकर्त्तरि
त्रि रक्तपाकी स्त्री वृहती इति
राजनिर्घण्टः ॥
रक्तपातकी स्त्री जलौका इति
शब्दरत्नावली ॥
रक्तपादः पुं शुकपक्षी इति हे
मचन्द्रः लोहितचरणयुक्ते त्रि
रक्तपादी स्त्री लज्जालुः हंसपदी
इति राजनिर्घण्टः ॥
रक्तपायिनी स्त्री जलौका। इति
राजनिर्घण्टः ॥
रक्तपायी न् पुं रक्तपानशीलः
इति व्याकरणं ॥

रक्तपारदं क्ली हिङ्गुलं। इति हारा
वली॥ जटाधरे पुं ॥
रक्तपिण्डं क्ली जवापुष्पं। इति
शब्दरत्नावली ॥
रक्तपिण्डकः पुं रक्तालुः। इति
राजनिर्घण्टः ॥
रक्तपित्तं क्ली रोगविशेषः तस्य
निदानं यथा। धन्वन्तरिरुवाच।
अथातो रक्तपित्तस्य निदानं प्रव
क्ष्यते। भृशोष्णतीक्ष्णकट्वम्ल
लवणादिविदाहिभिः। कोद्रवो
द्दालकैश्चान्नैस्तद्युक्तैरतिसेवि
तैः। कुपितं पित्तलैः पित्तं द्रवं र
क्तं च मूर्च्छयेत्॥ तेमिथस्तुल्य
रूपत्वमागम्य व्याप्नुवं ततं ।
पित्तं रक्तस्य विकृतेः संसर्गाद्दूष
णादपि॥ गन्धवर्णानुवृत्तेश्च रक्ते
न व्यपदिश्यते। प्रभवत्यसृजः स्
थानात् प्लीहतो यकृतश्च तत्॥
शिरोगुरुत्वमरुचिः शीतेच्छा धूम
कोऽम्लकः। छर्दिश्छर्दितबीभत्
सकाशः श्वासो भ्रमः क्लमः। लो
हितोऽलोहितो मत्स्यामगन्ध्यास्य
च विस्वरः। रक्तहारिद्रहरितवर्ण
ता नयनादिषु। नीललोहि
तपीतानां वर्णानामविवेचनं॥
स्वप्ने तद्वर्णदर्शित्वं भवत्यस्मिन् भ

विष्यति। ऊर्द्ध्वं नासादिकर्णास्यै
र्मेढ्रयोनिगुदैरधः। कुपितं रो
मकूपैश्च समस्तैस्तत् प्रवर्त्तते
ऊर्द्ध्वं साध्यं कफाद्यस्मात् तद्विरे
चनसाधितं॥ बह्वौषधं च पित्त
स्य विरेको हि वरौषधं। अनुबं
धी कफो यश्च तत्र तस्यापि शुद्धिकृ
त् कषायाः स्वादवो यस्य विशु
द्धेश्लेष्मलोहिताः कटुतिक्तक
षाया वायेनिसर्गात् कफावहाः।
अधोयाप्यं च तामुस्मात् तत्प्रवर्द्दे
न साधनं अल्पौषधं च पित्तस्य
वमनं तत्तु चौषधं। अनुबन्धी चलो
यस्य शान्तपित्तं तरस्य तत्त कषा
याश्च हितास्तस्य मधुरा एव केवलं
कफमारुतसंसृष्टमसाध्यमुभ
यायनं यतस्तत् प्रतिलोमत्वादसाध्या
दौषधस्य च॥ नहि संशोधनं किं
चिदस्य च प्रतिलोमनं शोधनं
प्रतिलोमं च रक्तपित्ते विनिर्जितं
एवमेवोपशमनं सर्वं शोधनं
मिष्यते। संसृष्टेषु हि दोषेषु स
र्वथा छर्दनं हितं॥ तत्र दोषानु
गमनं शिरा स्त्र इव लक्ष्यते उप
द्रवाश्च विक्रान्तफलतः स्युश्च
यिके॥ इति गारुडे १५० अध्या
यः तस्यौषधं यथा। विहनाविप

लाश्चामापिप्पलीशर्करामधु
मोरकः सन्निपातोत्थरक्तपित्तज्व
रापहः वासायांविद्यमानायामा
साश्चायांजीवितस्यच रक्तपित्ती
त्यथीकाशी किमर्थमवसीदति ॥
अटरूषकमृद्वीकापथ्याक्काथः
सशर्करः क्षौद्राढ्यः कासश्वा
सरक्तपित्तनिवर्हणः इति गारुडे
१७४ अध्यायः अपिच तत्ररक्तपित्त
स्यनिदानपूर्विकांसंप्राप्तिमाह ध
र्मव्यायामशोकाध्वव्यवायैरतिसेवि
तैः तीक्ष्णोष्णक्षारलवणैरम्लैः कटु
भिरेवच ॥ पित्तं विदग्धं स्वगुणैर्विद
हत्याशु शोणितं तीक्ष्णमरिचादि
रुष्णः शिग्रुसर्षपादिः क्षारो यवक्षा
रादिः । विदग्धं दूषितं । स्वगुणैः स्व
कारणैर्गुणैः तीक्ष्णादिभिः गुणो
तिनिबद्धत्वेन तीक्ष्णोष्णलवणाक
टुरसस्वगुणैरयोगनंने । विदहति
दूषयति रक्तपित्तस्यासामलक्ष
णमाह । ततः प्रवर्त्ततेरक्तमूर्द्ध्वं
चाधो द्विधापिवा । रक्तमित्युपल
क्षणं तत्संसर्गि पित्तंच ।
अतएव रक्तंच पित्तंच रक्तपित्त
मिति द्वन्द्व इति सश्रुतः रक्तंच
तत्पित्तंचेति रक्तपित्तं रागसा
म्यपित्तमिति कर्मधारय इति च

रक्तः मार्गानाह ऊर्द्ध्वंनासाक्षिक
र्णास्यैर्मेढ्रयोनि गुदैरधः । ऊ
पित्ते रोमकूपैश्च समस्तैस्तत् ।
प्रवर्त्तते ॥ ऊपित्त मतिऊपित्ते ॥
पूर्वरूपमाह सदनंशीत कामि
त्वंकंठधूमायनं वमिः । लोहगं
धिश्चनिश्वासो भवत्यस्मिन्भवि
ष्यति विशिष्टं रूप माह ॥
सान्द्रं सपाण्डु सस्नेहं पिच्छिलंच
कफान्वितं । श्यावारुणं सफेनंच
तनुरूक्षंच वातिकं ॥ रक्तपित्तंक
फान्वितं । श्यावारुणं सफेनंचत
नुरूक्षंच वातिकं रक्तपित्तं कषा
याभं कृष्णंगोमूत्र सन्निभं ।
मेचकागारधूमाभ मंजनाभंचपै
त्तिकं ॥ संसृष्ट लिंगं संसर्गात्रि
लिंगं सान्निपातिकं । सपाण्डु ई
षत् पाण्डु । पिच्छिलमस्रपिच्छ
छं विशुक्लं । कुसुंभजलाभं मेचकं
चिक्कणं कृष्णवर्णं । अंजनं श्रोतोंज
नेसदाभं ॥ संसर्गाद्विशेषेण मार्गा
भेदमाह ऊर्द्ध्वंगकफसंसृष्टमधो
गं मारुतानुगं । द्विमार्गं कफ वा
ताभ्यां उभाभ्यांतत् प्रवर्त्ततेउपद्र
वानाह दौर्बल्यश्वासकासज्वरवमथुमदाः
पांडुतादाहमूर्छाभुक्ते घोरो विदाहस्त्वधृति
रपिसदाहृद्यतुल्याचपीडा तृष्णाकोष्ठस्यभे
दः शिरसि च ॥

तपनं इति निष्ठीवनंच । हृषोमु
के विपाको विकृति रपि भवेद्रक्त
पित्तोपसर्गाः ॥ उपसर्गा उपद्रवाः
विकृतिर्मांस प्रक्षालनाभत्वादिः
साध्यत्वादिक माह । एक दोषा
नुगं साध्यं द्विदोषं याप्यमुच्यते
यत्त्रिदोष मसाध्यं स्यान्मंदाग्ने
रतिवेगतः ॥ ऊर्द्ध्वं साध्य मधो
याप्य मसाध्यं युगपद्गतं व्या
धिभिः क्षीणदेहस्य वृद्धस्यान
श्नतश्चयत् ॥ साध्यमाह । एक
मार्गंबलवतोनातिवेगंनवोत्थि
तं । रक्तपित्तंसुखेकाले साध्यं
स्यान्निरुपद्रवं ॥ सुखकालेहि
मशिशिरयोः ॥ असाध्यमाह
मांस प्रक्षालनाभंक्वथितमिव
चयत् कर्दमांभो निभंवा मेदःपू
याम्रकल्पं यकृदिव यदिवापक्व
जंबूकफाभं । यत्कृष्णंयच्चनीलं
भृशमपिकुणपं यत्रचोक्ता विका
रास्तद्वर्ज्यं रक्तपित्तं सुरपति धनु
षायच्चतत्स्यं विभाति ॥ उक्ताविका
दौर्बल्यादयः सुरपतिधनुषातत्स्यं
नानावर्णं ॥ येनचोपहतोरक्तं रक्त
पित्तेनमानवः । पश्येद्दृश्यंविय
च्चापि तच्चासाध्य मसंशयं ॥
येनरक्तपित्तेन उपहतो मनुष्यः

दृश्यं घटपटादिकं वियच्च रक्तं प
श्यति स न श्यति वियच्चापि घट
श्यमपीत्यर्थः ॥ अरिष्टमाह लो
हितंछर्दयेद्यस्तु बहुशो लोहि
तेक्षणः लोहितोद्गारदर्शी च म्रि
यते रक्तपित्तकः । लोहितोद्गार
दर्शीत्याधिमाहं लोहितोद्गारमपिलो
हितं पश्यति इत्यर्थः अथ रक्त
पित्तस्य चिकित्सा । पित्तास्रस्तंभ
येन्नादौ प्रवृद्धं बलिनोऽश्नतः ।
हन्ति पाण्डु ग्रहणी रोगप्लीहगु
ल्मज्वरादिकृत् शालि षष्टिक
नीवारकोरदूषप्रसाधिकाः ।
श्यामाकाश्च प्रियंगुश्च भोजने
रक्तपित्तिनां प्रियंगुः कंगुः मस
रः मुद्गचणकाः समकुष्ठाटकी
लाः प्रशस्ताः सूपयूषार्थे कल्पि
ताः रक्तपित्तिनां दाडिमामलकंवि
द्वान्नम्लार्थे चापि दापयेत् पटोलनिं
बवेत्राग्र प्लक्षवेतस पल्लवाः शा
कार्थे शाकसात्म्यानां तंडुलीयाद
यो हिताः पारावतान् कपोतांश्च ला
वान् रक्ताक्षवर्त्तकान् शशांश्च कपि
जलांश्चैणान् हरिणान्कालपुच्छ
कान् रक्तपित्तहरान्विद्यात्सात्म्ये
षां प्रयोजयेत् ईषदम्लाननम्लान्वा
हृतमस्थान् सर्वेधवान् कफानुगे

एष शाके द्रव्याह्वानानुगो रसः ॥
पथ्यं सतीनयूषेण ससिताला-
जशक्तुभिः । धान्याकधात्रीवासा-
नां द्राक्षापर्पटयोर्हिमः । रक्तपित्तं
ज्वरं दाहं तृष्णां शोषञ्च नाशयेत् ।
धान्याकादिर्हिमः ॥ ह्रीवेरमुत्-
पलं धान्यं चन्दनं यष्टिकामृता ।
उशीरञ्च वृषं क्षौद्रं क्वाथं समधु-
शर्करं पाययेत्तेन सद्यो हि रक्त-
पित्तं प्रशाम्यति । रक्तपित्तं जय-
त्युग्रं तृष्णां दाहं ज्वरं तथा ॥
कुशाद्यं पीनमानीयं कूष्माण्डस्य
फलं हरेत् । नहीजाधार बीजं ।
त्वक् शिरा सूत्रं समाचरेत् । त-
तस्तस्य तलं नीत्वा पचेज्जल-
तुलाकये नासितीरेद्धशिष्टेन
यत्नतः शीतलीकृते तानि कू-
ष्माण्डखण्डानि पीडयेद्दृढवाससा
यत्नतस्तज्जलेनैव पुनः पाक-
यधारयेत् कूष्माण्डशेषाय येद्धर्मे
नात्रपाचेत्ततः क्षिपेत् सितामत्र
हैतत्स्यं कूष्माण्डं तेन भर्जयेत् म-
धुवर्णं तदा लोकं तत्र जले तत्र
निःक्षिपेत् सितायाश्च तुलां तत्र
त्रिसा तालेन हत्वा न पचेत्तु रूप-
केपिप्पली शुण्ठीजीरकाणां द्वयं ले
पृथक् पृथक् पलार्द्धं धान्याकपत्रै-
लामरिचं त्वचं चूर्णमावां क्षिपेत्त-
त्रुतार्द्धे तोहमाचयेत् । पतत्
पलमितं खादेदथवाग्निबलं य-
था । खण्डकूष्माण्डलेह्योयं रक्त-
पित्तं विनाशयेत् । पित्तज्वरं त-
षोदाहं प्रदरं कृशतां वमिं स्व-
रभेदं सक्षयं शोकं कासं श्वासं स्त-
नत्वयं नाशयत्येव वृष्योयं
हृद्यो बलबर्द्धनः ॥ खण्डकूष्मा-
ण्डावलेहः ॥ शतावरीमूलक-
ल्कं कल्कात् क्षीरं चतुर्गुणं क्षी-
रतुल्यं घृतं तत्र सितया कल्कतु-
ल्यया घृतशेषं पचेत्तत्र पलार्द्धं
लेहयेत् सदा । रक्तपित्तं क्षयं त्वपि
ते दाहं श्वासञ्च नाशयेत् ॥ श-
तावरीपाकः इति रक्तपित्ताधि-
कारः इति भावप्रकाशः ॥
रक्तपित्तहा स्त्री रक्तघ्नी गोजिह्वाह-
दी इति भाषा । इति शब्दचन्द्रिका ॥
रक्तपुनर्नवा स्त्री रक्तवर्णपुनर्नवा
शाकः । तत्पर्य्यायः । क्रूरा २ मण्ड-
लपत्रिका ३ रक्तकाण्डा ४ वर्षकेतुः ५
लोहिता ६ रक्तपत्रिका ७ वैशा-
खी ८ रक्तवर्षाभूः ९ शोफघ्नी १०
रक्तपुष्पिका ११ विकस्वरा १२ विष-
घ्नी १३ प्रावृषेण्या १४ सारिणी १५
वर्षाभवः १६ शोणपत्रः १७ भौमः

१८ पुनर्भवः १९ नवः २० नवा २१ अ-
स्या गुणाः । तिक्तत्वं । सारकत्वं ।
शोफरक्तप्रदरदोषपाण्डुपित्त-
नाशित्वञ्च । इति राजनिर्घण्टः ॥
रक्तपुष्पः पुं करवीरः । इति जटा-
धरः ॥ रोहितवृक्षः । इति शब्द-
माला ॥ रक्तकाञ्चनवृक्षः ॥ दाडि-
मवृक्षः ॥ बकवृक्षः । इति रत्नमा-
ला । बन्धुकवृक्षः ॥ पुन्नागवृक्षः ।
इति राजनिर्घण्टः ॥
रक्तपुष्पकः पुं पलाशवृक्षः । रो-
हितकवृक्षः । इति जटाधरः ॥
पर्प्पटः ॥ शाल्मलिवृक्षः । इति
राजनिर्घण्टः ॥
रक्तपुष्पिका स्त्री लज्जालुः । इ-
ति शब्दचन्द्रिका ॥ रक्तपुनर्नवा
भूपाटलिः । इति राजनिर्घण्टः
रक्तपुष्पी स्त्री पाटलिवृक्षः । इति
जटाधरः ॥ जवा ॥ आवर्त्तकील-
ता नागदमनी ॥ करुणीवृक्षः ।
उष्ट्रकाण्डी । इति राजनिर्घण्टः ॥
रक्तपूरकं क्ली वृक्षाम्लं । इति रा-
जनिर्घण्टः ॥
रक्तप्रसवः पुं रक्तकरवीरः । र-
क्ताम्लानः । इति राजनिर्घण्टः ।
रक्तपुष्पा स्त्री शाल्मलिवृक्षः । इ-
ति जटाधरः ॥
रक्तफलः पुं वटवृक्षः । इति जटा-
धरः ॥
रक्तफला स्त्री बिम्बिका । इत्यमरः ।
स्वर्णवल्ली । इति राजनिर्घण्टः ॥
रक्तफेणजः पुं वामपार्श्वस्थक्लो-
मः तत्पर्य्यायः पुप्फुसः २ इति
हेमचन्द्रः ॥
रक्तवालुकं क्ली सिन्दूरं । इति हा-
रावली ॥
रक्तमञ्जरः पुं निचुलवृक्षः इति
त्रिकाण्डशेषः ॥
रक्तमस्तुः पुं रक्तवर्णमस्तुवि-
शेषः । यथा । यो रक्तोऽग्रो नातिदी-
र्घो न चाल्पो नातिस्थूलो रक्तमस्तु-
स्तुः सरक्तः । पीतोरुचश्च दुष्टि-
हरो यतोऽसौ नाशयन्ते किञ्च दो-
षत्रयस्य इति राजनिर्घण्टः ।
रक्तमूला स्त्री लज्जालुवृक्षः । इति
राजनिर्घण्टः ॥
रक्तमेहः पुं प्रमेहरोगविशेषः ।
तस्य लक्षणं यथा । विस्रमुष्णं स-
लवणं रक्ताभं रक्तमेहतः । मूत्रं
मूत्रयेदिति विज्ञेयं ॥ अस्यौष-
धं । रक्तमूलकः पुं देवसर्षपवृक्षः ।
इति राजनिर्घण्टः ॥
यथा । चन्द्रप्रभा वचा मुस्ता भू-
निम्ब सदादरुः । हरिद्रातिविषा

दार्वी पिप्पली मत्र चित्रकं ॥
धान्यकं त्रिफला चव्यं विडङ्गं गज
पिप्पली। सवर्णमाक्षिकं व्योषं
द्वौ क्षारौ लवणत्रयं ॥ एतानि टं
कमात्राणि संचूर्णयेत् पृथक्
पृथक् द्विकर्षं हतलोहं स्यात्तत
स्त्रयी सिता भवेत्॥ शिलाजतुष्ट
कर्षं स्याद्दष्टौ कर्षाश्च गुग्गुलोः
विधिना योजिते रेतैः कर्तव्या
गुटिका शुभा॥ चन्द्रप्रभेति वि
ख्याता सर्वरोगप्रणाशिनी ॥ नि
हन्ति विंशतिं मेहान् कृच्छ्र मष्ट
विधं तथा ॥ चतस्रश्चाश्मरीस्त
द्वत् मूत्राघातांस्त्रयोदश।पाण्डु
हृदिंपाण्डुरोगं कामलांच हली
मकं॥ कासं श्वासं तथा कुष्ठम
ग्निमान्द्य मरोचकं। वात पित्त क
फ व्याधीन् बल्या वृष्या रसायनी
समाराध्य शिवं तस्मात् प्रयत्नात्
गुटिकामिमां प्राप्तवांश्चन्द्रमा य
स्मात् तस्माच्चन्द्रप्रभा स्मृता॥
इति भावप्रकाशः ॥
रक्तमोक्षणं क्ली शोणितस्रावः य
था वेदनोपशमार्थाय तथापा
कशमायच अचिरेण पक्विते थो
थे शोणितस्रावणं चरेत्॥ चरेत्
कुर्यात्। एकदेशस्थिताः स्थी

रक्तमोक्षणमेकतः। रक्तं द्विवे
दनामूलं तस्त्वेन्नास्ति नचापि रुक्
विवर्णकठिने शूयावेवणेचान्यत्र
वेदने। सविशोषे विशेषेण ज
लौकाभिः पदैरपि ॥ शोणित
स्रावणं चरेदित्यनेनान्वयः। इति
भावप्रकाशः ॥
रक्तयष्टिः स्त्री मंजिष्ठा। इति ज
टाधरः ॥
रक्तयष्टिका स्त्री मंजिष्ठा। इति
राजनिर्घण्टः ॥
रक्तयावनालः पुं लवरयावना
लः। इति राजनिर्घण्टः ॥
रक्तरेणुः पुं सिन्दूरं ॥ पलाशक
लिका। इति मेदिनी ॥ पुन्नागः
इति राजनिर्घण्टः ॥
रक्तरेणुका स्त्री पलाशकलिका
तत्पर्यायः। कुंतारिका २ इति
शब्दमाला ॥
रक्तरैवतकं क्ली महापारेवतं।
इति राजनिर्घण्टः ॥
रक्तलशुनः पुं रक्तवर्णमूलवि
शेषः। तत्पर्यायः महाकंदः २
रंजनः ३ दीर्घपत्रकः ४ पृथुपत्रः ५
स्थूलकंदः ६ यवनेष्टः ७ अस्य गुणाः
रंजनस्य मधुरं कटुकंदं नालं म
धुपदिशन्ति कषायं। पत्र मंच ॥

3425

यमशन्ति स तिक्तं सरयो लवण
मस्थिवदंति ॥ इति राजनिर्घण्टः
रक्तला स्त्री काकतुण्डी। इति रा
जनिर्घण्टः ॥
रक्तलोचनः पुं कपोतः। इति
हेमचंद्रः लोहितलोचनयुक्ते त्रि
रक्तवटी स्त्री मसूरिका इति त्रि
काण्डशेषः ॥
रक्तवरटी स्त्री मसूरिका इति ज
टाधरः ॥
रक्तवर्गः पुं दाडिमः किंशुकं
लाक्षा॥ वंधूकं ॥ निशाद्वयं ॥
कुसुम्भपुष्पं॥ मंजिष्ठा। इति राज
निर्घण्टः ॥
रक्तवर्णः पुं इन्द्रगोपः। इति
राजनिर्घण्टः ॥
रक्तवर्द्धनः पुं वार्त्ताकुः। इति
शब्दचंद्रिका ॥
रक्तवर्षाभूः स्त्री रक्तपुनर्णवा
इति राजनिर्घण्टः ॥
रक्तवसनः पुं संन्यासी इति हे
मचंद्रः ॥
रक्तवातः पुं रोगविशेषः अ
स्यौषधं यथा नारिकेलस्यवै
मूलं क्षारक्षीरेण संयुतं। पि
वेच्च त्रिदिवसं तस्य रक्तवातो वि
नश्यति॥ इति गारुडे १९३

अध्यायः ॥
रक्तवालुका स्त्री सिंदूरं। इति शब्द
रत्नावली ॥
रक्तविंदुः पुं रक्तकणा। यथा र
क्तविंदुर्यदा भूमौ पतत्यस्य शरी
रतः समुत्पतति मेदिन्यास्तत्
प्रमाणस्तदासुरः इति मार्कण्डे
ये देवीमाहात्म्ये ॥
रक्तवीजः पुं दाडिमः। इति राज
निर्घण्टः असुरविशेषः। स च
शुम्भ निशुम्भ सेनापतिः। देव्या
हतः यथा पलायतन् परान् दृष्ट्वा
दैत्यान् मातृगणार्दितान् योद्धु
मभ्याययौ क्रुद्धो रक्तवीजो महा
सुरः रक्तविंदुर्यदा भूमौ पतत्य
स्य शरीरतः। समुत्पतति मेदि
न्यां स्तत् प्रमाणस्तदासुरः ॥
युयुधे स गदापाणिरिन्द्रशक्त्या म
हासुरः ततश्चैन्द्री स्ववज्रेण रक्त
वीजमताडयत् कुलिशेनाहत
स्याशु तस्य सुस्राव शोणितं ॥
समुत्तस्थुस्ततो योधा स्तद्रूपास्त
त् पराक्रमाः ॥ यावंतः पतिता
स्तस्य शरीराद्रक्तविंदवः। तावंतः
पुरुषा जातास्तद्वीर्य बल विक्रमाः
तस्माद्धतस्य वक्त्रात्तु शोणितं मूलादि
भिर्भुवि॥ यथानयोर्वै रक्तोद्य

लेनासंछन्नशोःसुराः॥ ते श्चासुरासृक् संभूते रसुरैः सकलंजगत्। व्याप्तमासीत्ततो देवा भयमाजग्मु रुत्तमं॥ तान् विषण्णान् सुरान् दृष्ट्वा चंडिका प्राहसत्वरा। उवाचकालीं चामुण्डे विस्तरं वदनं कुरु॥ मच्छस्त्र पातसंभूतान् रक्त बिंदून् महासुरान्। रक्तबिंदोःप्रतीच्छ त्वं वक्त्रेणानेन वेगिना। भक्षयंती चर रणे तदुत्पन्नान् महासुरान्। एवमेव क्षयं दैत्यः क्षीणरक्तो गमिष्यति॥ भक्ष्यमाणास्त्वया चोग्रा नचोत्पत्स्यंति चापरे। इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तं। मुखेन काली जगृहे रक्तबीजस्य शोणितं। ततोऽसावाजघानाथ गदया तत्र चंडिकां। न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि। तस्याहतस्य देहात्तु बहु सुस्राव शोणितं॥ यतस्ततस्तद्वक्त्रेण चामुण्डा संप्रतीच्छति। मुखे समुद्गता येऽस्या रक्तपातान्महासुराः। तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितं॥ देवी शूलेन वज्रेण बाणैरसिभिरृष्टिभिः। जघान रक्तबीजं तं चामुण्डापीतशोणितं॥ स पपात महीपृष्ठे शस्त्रसंघसमाहतः। नीरक्तश्च महीपाल रक्तबीजो महासुरः॥ ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप। तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः॥ इति देवीमाहात्म्यं॥

रक्तबीजका स्त्री नरदीहत्त(?)॥ इति राजनिर्घण्टः॥

रक्तवृंता स्त्री सेफालिका। इति शब्दचंद्रिका॥

रक्तवृष्टिः स्त्री रुधिरवर्षणं। तत्तु उत्पातविशेषः तत्फलं यथा। कृतिचिंतामणौ। रक्ते शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः। धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षितैर्भयं विद्यात्॥ इति ज्योतिस्तत्वं॥

रक्तशालिः पुं रक्तवर्णधान्यविशेषः तत्पर्य्यायः ताम्रशालिः २ शोणशालिः ३ लोहितः ४ अस्य गुणाः मधुरत्वं। लघुत्वं। स्निग्धत्वं। बलावहत्वं। रुचिकारित्वं। दीपनत्वं। पथ्यत्वं। पित्तदाहानिलास्रनाशित्वंच। इति राजनिर्घण्टः॥

रक्तशासनं क्ली सिंदूरं। इति हारावली॥

रक्तशिग्रुः पुं रक्तशोभांजनवृक्षः तत्पर्य्यायः॥ रक्तके १ मधुकं २ बकुलच्छदः ३ सुगंधः ४ केशरी ६

3827

सिंहः ७ मणाविः ८। अस्य गुणाः महावीर्य्यत्वं। मधुरत्वं। रसायनत्वं। शोफाध्मान समीरार्त्तिपित्तश्लेष्म नाशित्वं। सारकत्वंच। इति राजनिर्घण्टः॥

रक्तशीर्षकः पुं सरलद्रवः। इति रत्नमाला॥

रक्तशृंगिकं क्ली विषं इति राजनिर्घण्टः॥

रक्तसंज्ञं क्ली कुंकुमं। इति त्रिकाण्डशेषः॥

रक्तसंदंशिका स्त्री जलौका इति राजनिर्घण्टः॥

रक्तसंध्यकं क्ली रक्तकल्हारं तत्पर्य्यायः हल्लकं २ इत्यमरः॥

रक्तसरोरुहं क्ली रक्तपद्मं इत्यमरः॥

रक्तसर्षपः पुं राजिका। इति राजनिर्घण्टः॥

रक्तसहा स्त्री रक्तम्लानः इति राजनिर्घण्टः॥

रक्तसारं क्ली रक्तचंदनं॥ पतंगं इति राजनिर्घण्टः॥

रक्तसारः पुं अम्लवेतसः। रक्तखदिरः। इति राजनिर्घण्टः॥

रक्तसौगंधिकं क्ली रक्तकल्हारं इति जटाधरः॥

रक्तस्रावः पुं वेतसाम्लः। इति जटाधरः॥ रक्तपतनंच॥

रक्तहंसा स्त्री रागिणीविशेषः इति हलायुधः॥

रक्ता स्त्री गुञ्जा॥ लाक्षा॥ मंजिष्ठा उष्ट्रकाण्डी। इति राजनिर्घण्टः

रक्तकारः पुं प्रवालः। इति राजनिर्घण्टः॥

रक्ताक्तं क्ली रक्तचंदनं। इति जटाधरः॥ शोणितमिश्रिते त्रि॥

रक्तांगं क्ली विद्रुमः कुंकुमं। इति मेदिनी॥

रक्तांगः पुं मंगलग्रहः॥ कंपिल्लः इति मेदिनी प्रवालः मत्कुणः। इति राजनिर्घण्टः मण्डलं इति शब्दरत्नावली॥

रक्तांगी स्त्री जीवंती। इति मेदिनी मंजिष्ठा इति भावप्रकाशः॥

रक्तातिसारः पुं रोगविशेषः। तस्य संप्राप्ति माह। पित्तकृत यदान्यर्थद्रव्यमश्नाति पैत्तिके। तदोपजायते शीघ्रं रक्तातीसारः +बत सक तरु त्वगार्द्री दाडिम फलसंभवा त्वक्। त्वग्युगलं पलमानं विपचेदष्टांग सलिलेतोये॥ अष्टमभागे शेषं क्वाथं मधुना उक्तः॥ तस्यचिकित्सा। +४

पिबेत् पुरुषः । रक्तातिसारं मु
ल्वण मतिशयितं नाशयेन्नियतं
कुटजत्वग्दाडिमक्वाथः गोजपयन
नवनीतं त्र मधुनासितया सह ।
लीढं रक्तातिसारे तु ग्राहकं पर
मं मतम् नवनीतावलेहः ॥
पीतं मधुसिता युक्तं चन्दनं तण्डु
लाम्बुना रक्तातिसारजिद्रक्तपित्त
तृड्दाहमेहनुत् । चन्दन मत्र
श्वेतं । चन्दनकल्कः । इति भा
वप्रकाशः ॥
रक्ताधारः पुं चर्म इति राजनि
र्घण्टः ॥
रक्तापहं क्ली बोलं । इतिराज
निर्घण्टः ॥
रक्तापामार्गः पुं रक्तवर्णापामा
र्गक्षुपः रांगाआपाङ् इतिभाषा
लालचिरचिरी इति हिंदीभाषा
तत्पर्य्यायः । लघ्वपामार्गः २
व्याघ्रहकः ३ कुब्जिनिका ४ र
क्तविदु ५ कल्पपत्रिका ६ अस्य गु
णाः शीतत्वं कटुत्वं कफवातव्र
णकण्डुविषनाशित्वं संग्राहित्वं
वान्तिकारित्वंच इतिराजनिर्घण्टः
रक्ताम्बरं क्ली काषायवस्त्रं यथा
शाक्योपरिसमासीनां रक्ताम्बर प
रिच्छदां रक्तालंकारसंयुक्तां पं
जाहारविभूषितां । इति तंत्रसार
धृतमुच्छिष्टचाण्डालिनीध्याने ॥
तद्युक्ते त्रि ॥
रक्ताम्रः पुं कोशाम्रः इति राज
निर्घण्टः ॥
रक्ताम्लानः पुं रक्तवर्णपुष्पविशेषः
तत्पर्य्यायः रक्तसहा १ अपरिम्ला
नः २ रक्ताम्लानकः ३ रागप्रसवः
४ रक्तप्रसवः ५ कुरुवकः ६ रामा
लिंगनकामः ७ वधूत्सवप्रसवः ८
सुभगः ९ भ्रमरानंदः १० । अस्य
गुणाः । कटुत्वं उष्णत्वं वातामय
शोफज्वरध्मानशूलकासश्वा
सार्त्तिप्रशमनत्वं । वर्णप्रदत्वंच इ
ति राजनिर्घण्टः ॥
रक्तार्म्म न क्ली नेत्ररोगभेदः तस्य
लक्षणं यथा । यत्सममृदुरक्तार्म
यन्मांसं चीयते सिते इति माध
वकरः ॥
रक्तार्बुदः पुं रोगविशेषः यथा
शातातपीयकर्मविपाके जलो
दरयकृत्प्लीहशूलरोगव्रणानि
श्वासाजीर्णज्वरच्छर्दि भ्रम मोहग
लग्रहाः रक्तार्बुदविसर्पाद्या उ
पपापोद्भवा गदाः । इतिमलमास
तत्त्वं ॥ रक्तार्बुदमाह ॥
दोषप्रदुष्टं रुधिरं शिरास्तु ।

संकोच्य संपीड्य ततस्त्वपाकं । स
स्रावमुन्नह्यति मांसपिण्डं मांसां
कुरै राचितमाशु वृद्धिं ॥ स्रवत्य
जस्रं रुधिरं प्रदुष्टमसाध्यमेतत्
रुधिरात्मकं तु । रक्तक्षयोपद्रव
पीडितत्वात् पाण्डुर्भवेदर्बुदपी
डितस्तु ॥ दोषात्र पित्तं रुधिरं सि
रास्तु संकोच्य संपीड्य संहतीकृ
त्य मांसास्रजोः सर्वेष्वर्बुदेषु
दुष्टत्वेऽपि रक्तेन विशेषतो रक्त
दुष्टिः एवं मांसार्बुदे विशेषतो
मांसदुष्टि र्बोद्धव्या । ततो मां
सपिण्डमुन्नह्यति उद्गतं करो
ति । अपाकं ईषत् पाकं यथा
स्यादेव मिति क्रिया विशेषणं
ईषत् पाकश्चैकदेश पाकेन ।
रक्तक्षयोपद्रव पीडितत्वात् र
क्तक्षयोपद्रवाः शुक्लतेनोक्ताः
तैः पीडितत्वात् अर्बुद पीडितः ॥
अथार्बुदस्य चिकित्सा अश्म
वदान्नेनयतो विशेषः प्रदेश
हेत्वाकृति दोष दूष्यैः । अतश्चि
कित्सेत्सिरागर्बुदानि विधान
विद्ग्रंथि चिकित्सितेन हरि
द्रालोध्र पत्तंग गृहधूममनःशि
लाः मधुप्रगाढोलेपोयमेदोर्बु
दहरः परः मूलकस्य कृतः क्षारो
हरिद्राया स्तथैव च । शंखचूर्णेन
संयुक्तो लेपः सिद्धोऽर्बुदापहः
वटदुग्ध कुष्ठ रोमक लिप्तं बद्धं
वटस्य पत्रेण । अचिरेण सतरा
त्रान्महदप्युपशांति मर्बुदं गच्छे
त् शिग्रुमूलकयो बीजं रक्तोग्रं
सुरसायवं । तक्रेणाम्बरि पु पि
ष्टा लिंपेदर्बुद शांतये ॥
रक्तोग्रं सर्षपं । सुरसा तुलसी ।
यवं इन्द्रयवं । अश्मारिपिं करवीरं ।
इति भावप्रकाशः ॥
रक्तार्शः क्ली अर्शोरोगविशेषः
तस्य लक्षणमाह । रक्तोल्वणा गु
देकीलाः पित्ताकृति समन्विताः
वटप्ररोह सदृशा गुंजा विद्रुम
सन्निभाः । तेऽत्यर्थं दुष्ट मुंसश्च
गाढ विड्भिः प्रपीडिताः स्रवंति
सहसा रक्तं तस्य चातिप्रवृत्तितः
भेकाभः पीड्यते दुःखैः शोणि
त क्षय संभवैः । हीनवर्ण बलो
त्साहो हतौजाः कलुषेंद्रियः
विट्श्यावं कठिनं रूक्ष मधो
वायु र्न वर्त्तते ॥ तनु चारुणव
र्णंच फेणिलं चासृगर्शसां कट्यु
रुगुदशूलंच दौर्बल्यं यदि वाधि
कं तत्रानुबंधो वातस्य हेतुर्यदिच
रूक्षणं । शिथिलं श्वेत पीतंच ।

विट् स्निग्धं गुरु शीतलं यद्यर्श
सां घनं चासृक् तन्तुमत् पाण्डु पि
च्छिलं। गुदं सपिच्छं स्तिमितं गु
रु स्निग्धं च कारणं श्लेष्मानुबन्धो
विज्ञेयस्तत्र रक्तार्शसो बुधैः गुदे
कीलाः प्रदर्शिताः पित्ताकृतिसमन्वि
ताः पित्तार्शोलक्षणयुक्ताः आ
कारेण च वटप्ररोहादि सदृशाः
उःखेरोगेः त्वक्पारुष्याद्युष्णी
न स्पर्शनादिभिः कलयेंद्रियः
व्याकुलसर्वेन्द्रियः रक्तजस्यापि वा
तोल्बणस्य लक्षणमाह तत्र रक्ता
र्शीसि अनुबंधः उल्बणत्वं तृष्णा
तृष्णयतीति तृष्णानां तृष्णदृढं पित्तो
ल्बणस्य लक्षणं रक्तो स्वर्णगुदे
कीलाः पित्ताकृतिसमन्विता इ
त्यादिनैवोक्तं रक्तपित्तयोः समान
लिंगत्वात् कफोल्बणस्य लक्षण
माह सपिच्छं पिच्छिलं इति स्तिमि
तमार्द्रं चर्मावगुण्ठितमिव तस्य
चिकित्सा रक्तार्शसां मयोक्तेन र
मार्गे स्वघ्न भिषक् उष्णाग्रेण
गृहीतेषु: सूत्राना हस्तगामया
चेदनकिराततिक्तकथनं यवासाः
सतागराः कथिताः रक्तार्शसां प्रश
मनार्थं वीत्वगुशीरनिंबाला चंदनमथ
रक्तचंदनं चंदनादि क्वाथः॥ नव

नीततिलाभ्यासात् केशरनवनी
तशर्कराभ्यासात् दधिसर मथि
ताभ्यासेन गुदजा शाम्यति रक्त
वहाः दग्धस्तूपरि यो भागो घनः
स्नेहयुतः सरः मथितं सररहि
तं निर्जलं वस्त्रपूतं दधि। सपद्म
केशरं दोह्नं नवनीतेन वलिह्यन्
सितां केशरसंयुक्तं रक्तार्शः सुख
खीभवेत् पयसा स्नेहेन पूर्वैः स
तीलमुद्रकी मसूराणां ओदन
मद्यादम्लैर्मधुरैरीषत् स्कंधेषु
समंगोत्पल मोचाक्त तिरीट ति
लचंदनैः। सिद्धं च्छागी पयो दद्या
त्कुदजे शोणितात्मके समंगाल
ज्जालुः। मोचाख्यो मोचरसः।
तिरीटो लोध्रः। चंदनमत्र रक्तचं
दनं। समंगादि दुग्धं॥ भाविजर
जनी चूर्णेनाक्तौ हीरैः पुनः पुनः
वेष्टनात् सुदृढे सूत्रं छिनत्त्यर्शो
भगंदरं क्षारसूत्रं॥ नासानाभि
सगुह्येषु तथाग्रेषु कृतादिजेष्वपि।
क्रियामर्शः सदृशीं वीनन्द नत्रय
योदितां चर्मकीलतसं छिदरे
तत्क्षारेणाग्निना। वेगावरोधस्त्री
पृष्ठयानात्कटकासनं यथास्वं
दोषलं चान्न मर्शसः परिवर्जयेत्
इति भावप्रकाशः॥

रक्तालुः पुं रक्तवर्णालुविशे
षः शाकरक्तकंदआलु इति भाषा
तत्पर्य्यायः रक्तपिंडालुः १ रक्त
पिण्डकः २ लोहितः ४ रक्तकं
दः ५ लोहितालुः ६। अस्य गुणाः
शीतत्वं मधुरत्वं श्रमपित्त
दाहापहत्वं। वृष्यत्वं बलपु
ष्टिकारित्वं गुरुत्वंच इति राज
निर्घण्टः॥
रक्ताक्षः पुं महिषः पारावतः
चकोरः क्रूरः इति मेदिनी।
सारसः। इति राजनिर्घण्टः
रक्तवर्णचक्षुष्के त्रि॥
रक्तिका स्त्री गुंजा राजिका इ
ति राजनिर्घण्टः रक्तिकापरि
माणंच रक्तेक्षुः पुं रक्तवर्णेक्षुः
लालआक् इति भाषा तत्पर्या
यः सूक्ष्मपत्रः २ शोणः ३ लोहि
तः ४ उत्कटः ५ मधुरः ६ रक्तमू
लः ७ लोहितेक्षुः ८ अस्य गुणाः
मधुरत्वं पाके शीतलत्वं सरत्वं
पित्तदाहहरत्वं वृष्यत्वं तेजो
बल विवर्द्धनत्वंच इति राज
निर्घण्टः॥
रक्तैरण्डः पुं वृक्षविशेषः ला
लभेरेंडा इति भाषा तत्पर्य्यायः।
व्याघ्रः २ हस्तिकर्णः ३ रुबुः ४

उरुबुकः ५ नागकर्णः ६ चंचुः ७
उत्तानपत्रकः ८ करपर्णः ९ पा
चनः १० स्निग्धः ११ व्याघ्रतलः १२
रक्तकः १३ चित्रबीजः १४ रूक्ष
रण्डः १५ अस्य गुणाः श्वयथु
पवन शांति रक्तार्ति पांडु भ्रांति
श्वासज्वरारोचकनाशित्वं ल
घुत्वंच इति राजनिर्घण्टः॥
रक्तैर्वारुः पुं इंद्रावारुणी इति
राजनिर्घण्टः॥
रक्तोत्पलं क्ली रक्तपद्मं तत्
पर्य्यायः। रक्तसारोरुहः २ के
नदं ३ इत्यमरः॥
रक्तोत्पलः पुं शाल्मलिवृक्षः
इति राजनिर्घण्टः॥
रक्तोत्पलाभः पुं शोणाम्बुजः
इति जटाधरः तद्युक्ते त्रि॥
रक्तोपलं क्ली गैरिकं इति रत्ना
वली॥
रख इ सर्पणे इति कविकल्पद्रुमः
रंखते इति दुर्गादासः॥
रख सर्पणे इति कविकल्पद्रुमः
रखति। इति दुर्गादासः॥
रग म प शंके इति कविकल्पद्रुमः
मरगयति। अररागीत् शंकः।
शंका रगति रोगी अपथ्योपयः।
इति दुर्गादासः॥

रग क स्वादग्रापने। इति कविकल्पद्रुमः क रागयति। इति दुर्गादासः॥
रग इ गतौ इति कविकल्पद्रुमः इ रंगयते। इति दुर्गादासः॥
रच इ क भाषि। इति कविकल्पद्रुमः इ क रंचयति भाषिदीप्तौ। इति दुर्गादासः॥
रघ इ ङ गमने इति कविकल्पद्रुमः इ रंघयते ङ रंघते इति दुर्गादासः॥
रघुः पुं सूर्य्यवंशीयदिलीपराजपुत्रः। स तु अयोध्याधिपतिः श्रीरामचन्द्रस्य प्रपितामहः यथा, सजातकर्म्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते। दिलीपसूनुर्म्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ॥ तन्नाम व्युत्पत्ति यथा, श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः। अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसम्भवं इति रघुवंशे महाकाव्ये ३ सर्गः॥
रघुकारः पुं कालिदासः इति त्रिकाण्डशेषः॥
रघुनन्दनः पुं श्रीरामः इति शब्दरत्नावली॥
रघुनाथः पुं श्रीरामः इति शब्दरत्नावली॥
रघुपतिः पुं श्रीरामः यथा, यदुपतेः क्व गता मथुरापुरी रघुपतेः क्व गतोत्तरकोशला इति विचिन्त्य कुरुष्व मनः स्थिरं न सदिदं जगदित्यवधारय। इति रूपगोस्वामी॥
रघुवंशः पुं कालिदासकृततज्जान्वयवर्णनमहाकाव्यग्रन्थविशेषः यथा, रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्। तद्गुणैः कर्णमागत्य चापलाय प्रलारितः। इति रघुवंशे महाकाव्ये १ सर्गः॥
रघुवंशतिलकः पुं श्रीरामः यथा, जयति रघुवंशतिलकः कौशल्यानन्दिवर्द्धनो रामः। दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः इति रामायणं॥
रघुवरः पुं श्रीरामः यथा, रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं धार्म्मिकं इत्यादि रामायणं॥
रघुद्वहः पुं श्रीरामः इति शब्दरत्नावली॥

रंकः पुं कृपणः। मन्दः। इति मेदिनी॥
रङ्कुः पुं मृगविशेषः इत्यमरः सन्तशबलपृष्ठहरिणः इति राजनिर्घण्टः॥
रंगं क्ली पुं धातुविशेषः रांग इति भाषा। तत्पर्य्यायः। त्रपु २ त्रपुषं ३ आपृषं ४ वंगं ५ मधुरं ६ हिमं ७ कुरूप्यं ८ पिच्चटं ९ पूतिगन्धं १० अस्य गुणाः। कटुत्वं तिक्तत्वं। हिमत्वं। कषायत्वं। लवणरसत्वं मेहघ्नत्वं कृमिपाण्डुदाहशमनत्वं कान्तिकरत्वं। रसायनत्वंच॥ तद्विशेषो यथा, श्वेतं मृदुलघु स्वच्छं स्निग्धमुष्णं सहं हिमं खुरपत्रकं इति त्रपु श्रेष्ठमुदाहृतं॥ खुरकं मिश्रकं चापि द्विविधं वंगमुच्यते उत्तमं खुरकं तत्र मिश्रकं त्वहितं मतं॥ इति राजनिर्घण्टः॥ तस्याशुद्धस्य दोषमाह, वंगो विधत्ते खलु पाण्डुदिहीनः श्लथास्यपक्वक्षकिलासगुल्मौ कुष्ठानि शूलं लिलवातशोथं पाण्डुप्रमेहंच भगन्दरंच॥ विषोपमं रक्तविकारहृद्ध्यं दद्रुत्रयंच कृच्छ्राणि कफज्वरंच। मेहाश्मरी विद्रधि मुख्यरोगाना गोपि कुर्य्यात् कठिनान् विकारान्॥ तस्य शोधनमभिधीयते वंगनागौ प्रतप्तौ च गलितौ तौ निषेचयेत्। त्रिधा त्रिधा विशुद्धिः स्याद्रविदुग्धेऽपि च त्रिधा तैल तक्र काञ्जिक गोमूत्र कुलत्थक्वाथेषु प्रत्येकं त्रिधा त्रिधा। ततोऽर्कदुग्धे त्रिधा॥ अथ वंगस्य मारणविधिः। मृत्पात्रे द्राविते वंगे चिंचाश्वत्थत्वचो रजः क्षिप्त्वा वंगचतुर्थांशमयो दर्व्या प्रचालयेत्॥ चिंचा अमिली॥ रजश्चूर्णं। अयोदर्वी करछुली। ततो द्वियाममात्रेण वंगं भस्म प्रजायते। अथ भस्मसमं तालं क्षिप्त्वाम्लेन विमर्द्दयेत्। ततो गजपुटे पक्त्वा पुनरम्लेन मर्द्दयेत्। तालेन दशमांशेन याममेकं ततः पुटेत्। एवं दशपुटैः पक्वं वंगं भवति मारितं॥ एवं मारितस्य वंगस्य गुणाः। वंगं लघु सरं रूक्षं कुष्ठमेहकफकृमीन् निहन्ति पाण्डुं सश्वासं नेत्र्यमीषत्पित्तलं॥ सिंहो गजौघं तु यथा निहन्ति तथैव वंगोऽखिलमेहवर्गं। देहस्य सौख्यं प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति।

न्रूतं ॥ इति भावप्रकाशः ॥
रंगः पुं रागः नृत्तं । रणभूमिः
इति मेदिनी । नाट्यस्थाने । इति
हेमचंद्रः टंकणः । खादिरसारः
इति राजनिर्घण्टः ॥
रंगकाष्ठं क्ली पतंगं इति राज
निर्घण्टः ॥
रंगजं क्ली सिंदूरं इति रत्नमाला
रंगजीवकः पुं चित्रकारः इति
शब्दरत्नावली ॥ नाट्यकारश्च ।
रंगदः पुं टंकणः खादिरसारः
इति राजनिर्घण्टः ॥
रंगदा स्त्री स्फटी इति राजनिर्घण्टः
रंगदायकं क्ली कंकुष्ठं इति राज
निर्घण्टः ॥
रंगदृढा स्त्री स्फटी । इति रा
जनिर्घण्टः ॥
रंगपत्री स्त्री नीलीवृक्षः इति रा
जनिर्घण्टः ॥
रंगपुष्पी स्त्री नीलीवृक्षः इतिरा
जनिर्घण्टः ॥
रंगभूतिः स्त्री कोजागरपूर्णिमा
इति शब्दरत्नावली ॥
रंगभूमिः स्त्री मल्लभूमिः इति
शब्दरत्नावली नाट्यभूमिश्च ॥
रंगमल्ली स्त्री वीणा इति शब्द
रत्नावली ॥

रंगमाणिक्यं क्ली माणिक्यरत्ने इ
ति राजनिर्घण्टः ॥
रंगमाता स्त्री कुट्टनी । लाक्षा ।
इति मेदिनी ॥
रंगमातृका स्त्री लाक्षा इति त्रि
काण्डशेषः ॥
रंगलासिनी स्त्री सेफालिका इ
ति शब्दचंद्रिका ॥
रंगबीजं क्ली रूप्यं इति शब्दर
त्नावली ॥
रंगशाला स्त्री नाट्यगृहं नाचघ
र इति भाषा इति शब्दरत्नावली
रंगांगा स्त्री स्फटी इति राज
निर्घण्टः ॥
रंगाजीवः पुं चित्रकरः रूपकारः
नटः । इति हेमचंद्रः ॥
रंगावतारकः पुं रंगावतारी ।
तत्पर्यायः शैलूषः २ भरतः ३
सर्ववेशी ४ भरतपुत्रकः ५ धा
त्रीपुत्रः ६ रंगजीवः ७ जायाजीवः ८
नटः ९ कृशाश्वी १० शैलाली ११
इति हेमचंद्रः ॥ नृत्यगीतस्थाने
गीतवाद्यादिना तदनुगुणतया
प्रवेशः इति प्रायश्चित्तविवेकः ॥
नटगायनवर्जितेषु रंगावतरण
जीवी इति कुल्लूकभट्टः ॥ तस्या
न्नभक्षणे प्रायश्चित्तं यथामत्र

कथान्तरांचि न भुंजीत कदाचन
केशकीटावपन्नं च पदा स्पृष्टं च
कामतः इत्युपक्रम्य कर्मारस्य
निषादस्य रंगा . . . कस्य च ।
सुवर्णकर्त्तुर्वेणस्य शस्त्रविक्रयि
णस्तथा इत्याद्युक्त्वा य एतेभ्यन्न
भोज्यान्नाः क्रमशः परिकीर्त्तिताः
तेषांत्वगस्थि रोमाणि वदन्त्यन्नम
नीषिणः भुक्त्वातोऽन्यतमस्यान्न
ममत्या क्षपणं त्र्यहं । मत्या भुक्त्वा
चरेत् कृच्छ्रं रेतो विण्मूत्रमेव
च । इति मानवे ४ अध्यायः ॥
रंगावतारी न पुं नटः इति ज
टाधरः ॥
रंगारिः पुं करवीरः इति रत्न
माला ॥
रंगिणी स्त्री धानमूली । इति ज
टाधरः कैवर्त्तिका । इति राज
निर्घण्टः रंगविशिष्टे त्रि ॥
रंहः न क्ली रंहः वेगः इति भर
तद्विरूपकोषः ॥
रच न क कृत्या इति कविकल्प
द्रुमः रचयति इति दुर्गादासः
रचनं क्ली निर्माणं ग्रथनं यथा
वाचः पल्लवयत्युमापतिधरः सं
दर्भशुद्धिं गिरां जानीते जयदेव ए
व शरणः श्लाघ्योदुरूहद्रुते श्रृंगा

रोत्तरसत्प्रमेयरचनैराचार्य
गोवर्द्धनः स्पर्द्धी कोऽपि न विश्रुतः
श्रुतिधरो धोयी कविः क्ष्मापतिः
इति जयदेवः ॥
रचना स्त्री कुसुमप्रकारादेः यत्ना
वल्यादेश्च रचनं । तत्पर्य्यायः ।
परिस्पंदः । इत्यमरः परिस्पंद ः
२ इति भरतः ॥ यथा क्रमेण
स्थापने । तत्पर्य्यायः ॥
निवेशः २ स्थितिः ३ इति हेम
चंद्रः । निर्मितिः । कृतिः । यथा
असाधारणचमत्कारकारिणी
रचना हि निर्मितिः इत्यलंकार
कौस्तुभे । किरणः तत्पर्य्यायः
संदर्भः १ गुम्फः २ ग्रन्थनं ३ श्र
न्थनं ४ इति हेमचंद्रः ॥
रचितः त्रि कृतः रचधातोः क
र्मणि क्त प्रत्ययेन निष्पन्नः य
था शिरः पद्मश्रेणीरचितचरणां
भोरुहयुगे स्थिराधाम्नो कौमो
पुरहरविस्फूर्जितमिदं । इति पु
ष्पदंतकृतस्तुतिः ॥
रजतं क्ली स्त्री कुसुमं इति शब्दर
त्नावली ॥
रजः पुं परागः रेणुः ॥ गुण
भेदः ॥ आर्त्तवं । इति ज्ञानवती
शब्दरत्नावली ॥

रजः[स] स्त्री स्त्रीणां मासि मासि योनिनिःसृतरक्तं । तत्पर्य्यायः पुष्पं २ आर्त्तवं ३ । इत्यमरः ऋतुः ४ कुसुमं ५ रजः ६ इति शब्दरत्नावली प्रकृतेर्गुणविशेषः तत्तु रागद्वेषात्मकं दुःखहेतुः रजोऽदन्तः पुंलिङ्गोऽपि । यथा रजोयं रजसात्त्वाहं स्त्रीपुरुषगुणप्रलिप्त । इत्यमररत्नः इति भरतः महाभारतमतेऽस्य जनकगुणाः ॥ तस्य धर्म्मः कामः क्रोधः लोभः मानः दर्पश्च इति मोक्षधर्म्मः तस्मात् क्रोधोऽभिसंरम्भो राजसास्ते गुणाः स्मृताः अभिसंरम्भो द्वेषाभिनिवेशः । इत्याश्वमेधिकपर्व्व अपि च काम एष क्रोध एष रजोगुणसमुद्भवः ॥ महाशनो महापाप्मा विद्ध्येनमिह वैरिणं रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवं । तन्निबध्नाति कौन्तेय कर्म्मसङ्गेन देहिनं इति श्रीभगवद्गीतायां १४ अध्यायः सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः कालसंचोदिताः सोऽपि परिवर्त्तन्त आत्मनि प्रभूतं तु यदा सत्त्वं मनो बुद्धीन्द्रियाणि च तदा कृतयुगं विद्याज्ज्ञाने
ने

पसिपद्यतिः यदा कर्म्मसु काम्येषु भक्तिर्यशसि देहिनां तदा त्रेता रजोवृत्तिरिति जानीहि शौनक यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः । कर्म्मणां चापि काम्यानां द्वापरं तद्रजस्तमः यदा सदानृतं तन्द्री निद्रा हिंसादिसाधनं । शोकमोहभयं दैन्यं स कलिस्तामसः स्मृतः इति गारुडे २२७ अध्यायः ॥ परागः इति मेदिनी रेणुः । अस्य पर्य्यायः धूलिशब्दे द्रष्टव्यः ॥ निषिद्धानिषिद्धरजो यथा आयुःकामो न सेवेत तथा सम्मार्ज्जनीरजः तथा खरोष्ट्राजाश्वानां गवां चैव रजः शुभं अशुभं च विजानीयात् खरोष्ट्राजाविकेषु च गवां रजो धान्यरजः पुत्रस्यापि भवेद्रजः एतद्रजो महाशस्तं महापातकनाशनं । अजारजः खररजो यच्च सम्मार्ज्जनीरजः एतद्रजो महापापं महाकिल्विषकारणं इति गारुडे ११४ अध्यायः ॥

रजःशयः पुं कुक्कुरः इति शब्दमाला ॥

रजःसारथिः पुं वायुः इति शब्दरत्नावली ॥

रजकः पुं वर्णसङ्करजातिविशेषः धोबा इति भाषा स च तीवरपत्न्यां धीवराज्जातः इति ब्रह्मवैवर्त्तपुराणं तत्पर्य्यायः निर्णेजकः २ इत्यमरः शौचेयः ३ कर्म्मकीलकः ४ इति शब्दरत्नावली धावकः ५ इति हेमचन्द्रः रजकस्य वस्त्रनिर्णेजनप्रकारो यथा वासांसि फलकैः श्लक्ष्णैर्निर्णिज्याद्रजकः शनैः अथान्यथा हि जवीनदण्ड्यः स्याद्रजकस्मा षकं इति मात्स्ये २९१ अध्यायः शुकः इति विश्वः ॥

रजकी स्त्री रजकपत्नी रजधातोः षक प्रत्ययान्तात् दीप् क्रियते सिद्धा । इति मुग्धबोधव्याकरणं

रजतं क्ली रूप्यं इत्यमरः हस्तिदन्तः धवलः शोणितं हारः स्फुटः शैलः स्वर्णं इति हेमचन्द्रः शुक्लवर्णविशिष्टे त्रि इत्यमरटीकायां भरतः पितृकार्य्ये रजतपात्रादीनां माहात्म्यादि यथा सौवर्णै राजतैस्ताम्रैः पितॄणां पात्रमुच्यते । रजतस्य कथा वापि दर्शनं दानमेव वा राजतैर्भाजनैरेषां अथवा रजतान्वितैः वार्य्यपि श्रद्धया । दत्तमक्षयायोपकल्पते यथार्घ्ये पिण्डभोज्यादौ पितॄणां राजतं मतं शिवनेत्रोद्भवं तस्मात्तत्पितृवल्लभं अमङ्गलं तद्यत्नेषु देवकार्य्येषु वर्ज्जितं । इति मात्स्ये ७ अध्यायः ॥

रजतद्युतिः पुं हनुमान् इति शब्दरत्नावली ॥

रजतप्रस्थः पुं कैलाशपर्व्वतः इति त्रिकाण्डशेषः ॥

रजताचलः पुं रौप्यपर्व्वतः ॥ तस्य परिमाणदानविधिश्च यथा राजतो नवमस्तद्वत् शान्तः शाक्त्रोराचलः वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः । अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमं । यत्प्रसादान्नरो याति सोमलोकं द्विजोत्तम दशभिः पलसाहस्रैरुत्तमो रजताचलः । पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः अशक्तो विंशतेरूर्द्ध्वं कारयेत् शक्तितः सदा । विष्कम्भपर्व्वतांस्तद्वत् तुरीयांशेन कल्पयेत् पूर्व्ववद्राजतान् कुर्य्यान्मन्दारादीन् विधानतः पूर्व्ववत् रत्नावलवत् कलधौतमयांस्तद्वल्लोकेशान् रचयेद्बुधः ॥ ब्रह्मविष्ण्वर्कवन्ना

र्य्या नितंबोऽत्र हिरण्मयः । रा
जतंस्याद्यदन्येषां समंतादिह्नकां
चनं श्रोषंच पूर्ववत् अर्घ्यात्
हेम्न जागरणादिकं । प्रस्थान
प्रभातेतद्गुरवेरौप्य पर्वतं ॥
विष्कंभ शैलान्दत्वित्थ्यःश्रूयत
स्त्वविभूषणैः इमंमंत्रंपठन्दद्या
द्धर्मवाणि विमत्सरः पितृणां
वल्लभंयस्मात् विष्णोर्वीशंकर
स्यच रजतं पाहितस्मात्नःशोक
संसारसागरात् इत्थं निवेद्ययो
दद्यात् रजताचल मुत्तमं ।
गवामयुतदानस्य फलंप्राप्नोति
मानवः सोमलोके सगंधर्वैः
किन्नराप्सरसांगणैः पूज्यमानो
वसेद्विद्वान् यावदाहूत संप्लवं
इतिमात्स्ये ७७ अध्यायः ॥
रजताद्रिः पुं कैलासपर्वतः इति
हेमचंद्रः ॥
रजनं क्ली रागः इतिसिद्धांत
कौमुद्यामुणादिवृत्तिः ॥
रजनिः स्त्री रात्रिः इत्यमरटीका
रजनी स्त्री रात्रिः । हरिद्रा जतु
का इत्यमरः नीलिनी । इति ।
मेदिनी ॥
रजनीकरः पुं चंद्रः इति श
ब्दरत्नावली ॥

रजनीगंधा स्त्री स्वनामख्यात
वर्णाः पुष्पविशेषः इतिलोकप्र
सिद्धः रजनीचरः पुं रा - - इति
शब्दरत्नावली चौरः यामिकभट
श्च रजनीजलं क्ली नीहारः इतिहा
रावली ॥
रजनीपुष्पः पुं पूतिकरंजः इति
राजनिर्घंटः ॥
रजनीमुखं क्ली प्रदोषः इत्यमरः
रजनीहासा स्त्री शेफालिकापुष्पं
इति शब्दरत्नावली ॥
रजःसानुः पुं मेघः चित्तं इत्यु
णादिकोषः ॥
रजस्वलः पुं महिषः इतिमेदि
नी रजस्वला स्त्री रजोयुक्ता तत्
पर्य्यायः । स्त्रीधर्म्मिणी २ अवी ३
आत्रेयी ४ मलिनी ५ पुष्पवती ६
ऋतुमती ७ उदक्या ८ इत्यमरः
इतिः ९ पुष्पहासा १० इतिशब्द
रत्नावली पुष्पिता ११ अवीरा १२
विफली १३ निष्फली १४ इतिज
टाधरः म्लाना १५ पांशुः १६ इति
राजनिर्घंटः ॥ अथ रजस्व
स्पर्शप्रायश्चित्तं काश्यपः रज
स्वला तु संस्पृष्टा ब्राह्मण्या ब्रा
ह्मणी यदि एकरात्रं निराहारा पंच
गव्येन शुध्यति रजस्वला तु संस्पृष्टा

राजन्य ब्राह्मणी तथा त्रिरात्रे
णविशुद्धिः स्यात्व्यासस्य वचनं
यथा रजस्वला तु संस्पृष्टा वैश्य
या ब्राह्मणी च या पंचरात्रं निराहा
रा पंचगव्येन शुध्यति रजस्वला तु
संस्पृष्टा शूद्रया ब्राह्मणी यदि
यडात्रेण विशुध्येत ब्राह्मणी का
मचारतः अकामतश्चरेदर्द्धं ब्राह्म
णी सर्वजातिषु एतेन रजस्वला ।
या ब्राह्मण्याः सवर्णरजस्वलास्प
र्शे एकरात्रोपवासः पंचगव्यपानं
कामतः । अकामतस्तदर्द्धं नक्तव्रतं
असवर्णरजस्वलास्पर्शे त्रिरात्रपं
चरात्रषड्रात्रोपवासाः अकाम
तस्तदर्द्धं एतत्स्वतर्थ्योहानतेरे
कर्त्तव्यं चांडालेन श्वपाकेन संस्
पृष्टा चेद्रजस्वला अतिकृच्छ्रतान्य
हानि प्रायश्चित्तं समाचरेत् त्रिरा
त्रमुपवासः स्यात् पंचगव्येन शु
ध्यति तानि शांत अतिकृच्छ्रस्यजास
त्कृतं कारयेत् इतिवचनोत्तरदर्श
नात् एतत्कामतः अत्र दिनभेदोऽ
पिनास्ति अज्ञाने बृहस्पतिः पति
तांत्यश्वपाकेश्च संस्पृष्टा स्त्री रजस्व
ला तान्यहानि अतिकृच्छ्रं प्रायश्चि
त्तं समाचरेत् प्रथमेऽह्नि त्रिरात्रं
तु द्वितीयेद्व्यह माचरेत् अहो ।

रात्रंतृतीयेऽह्नि चतुर्थे नक्तमाच
रेत् चतुर्थेऽह्नीति शुद्धि स्नानात्
पूर्वं व्यासः रजस्वला यदा स्पृष्टा
श्वजंबुक खरैः क्वचित् निराहा
रा भवेत्तावत् यावत् स्नानेन शु
ध्यति अत्रापि बृहस्पत्युक्त दिन
भेदव्यवस्था । दृढशातातपः रज
स्वलेत्वयेनार्घ्यावन्योन्यस्पृशतो
यदि सवर्णे पंचगव्येन ब्रह्मकूर्चं
मतः परं पंचगव्यपानं व्रतरूपं
तेनोपवासः ब्रह्मकूर्चं माहजाबा
लः अहोरात्रोषितो भूत्वा पौर्ण
मास्यां विशेषतः । पंचगव्यं पिबे
त् प्रातर्ब्रह्मकूर्चं विधिः स्मृतः ॥
तदशक्तौ सुवर्णैकं दानतव्यं । इति
प्रायश्चित्ततत्वं । अन्यच्च । शुद्धा भ
र्त्तुश्चतुर्थेऽह्नि अशुद्धा दैव पैत्र
योः दैवकर्मणि पैत्रेच पंचमेऽह्न
नि शुध्यति इतिशुद्धितत्वं ॥
तस्यागमने पापं यथा । प्रथमे
दिवसे कांता यो हि गच्छेद्रजस्व
लां ब्रह्महत्यावर्त्तांशं लभते ना
त्रसंशयः सप्तमासमहिकर्माही
दैवे पैत्रे च कर्मणि । अधमः स
सर्वेषां निंदितः काश्यपस्करः द्वि
तीये दिवसे नारीं यो व्रजेच्च रज
स्वलां । कामतः परिपूर्णां च ब्रह्म

हत्यां लभेद्ध्रुवं ॥ आजीवनं ना
धिकारी पितृविप्रसुरार्च्चने ॥
अमनुष्याः यशस्यः स्याद्दिव्या
तिरस्य भाषिते ॥ तृतीय दिवसे
जायां योऽहि गच्छेद्रजस्वलां स
सूर्फ्यो ब्रह्महत्यां च लभेते नात्र सं
शयः पूर्ववत् पतितः सोऽपि न
चार्हः सर्वकर्मसु अप्रशस्त प्रजा च
तुर्थ्यां हि न गच्छेत्तां विचक्षणः इ
ति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे
८९ अध्यायः अपिच अपूर्ण्णे ऋत
कालेन योऽभिगच्छेद्रजस्वलां ।
तेनपाः पितरस्तस्य एव मेनन्न
संशयः एकस्तु पुरुषो याति द्वि
तीयां काममोहितः । तृतीयां
वा चतुर्थीं च नरास पुरुषाध
मः । ऋतकाले नु सर्वासामपि
तुर्थ्यां भोगरक्ष्यते ऋतकालाभि
गामी यो ब्रह्मचार्थ्येव सत्तमः न
गच्छति च यः क्रोधान् मोहाद्वा
पुरुषाधमः ऋतौ ऋतौ भ्रूण
हत्यां प्राप्नोति पुरुषस्तुरन् इति
वाराहे गुह्यकर्मव्रतीनेनामाध्या
यः रजिः पुं चन्द्रवंशीयराजविशे
षः । यथा । मूत्वराय सोजेत पुत्रश्चा
युर्नाम महाबलः इति रजपुयोम
नस्यां पंचपुत्रानजु पाद्यामा

सन्नहुष हात्र वृद्ध रंभरजिसं
ज्ञाः । रजेः पंचपुत्रशतान्यतु
लवीर्य्यसाराण्यासन इति वि
ष्णुपुराणे ४ अंशे ८।९ अध्यायो
रजोबलं क्ली अंधकारः इति त्रि
काण्डशेषः ॥
रजोरसं क्ली अंधकारः इति
शब्दरत्नावली ॥
रजोहरः पुं रजकः इति शब्द
माला ॥
रज्जुः स्त्री वेणी । इति मेदिनी ।
बंधनसाधनवस्तु दडी इति भाषा
तत्पर्य्यायः शुल्वं २ वराटकः ३
वटी ४ गुणः ५ इत्यमरः । शुल्वा ६
इति भरतधृत रत्नकोषः शुल्व
७ शूल्वः ८ शूल्वा ९ शूल्वी १० स्न
सं ११ वराटः १२ वराकः १३ वटीगु
णः १४ इति टीकान्तरं ॥
रंजकं क्ली हिंगुलं इति राज
निर्घण्टः ॥
रंजकः पुं कंपिल्लकः इति राज
निर्घण्टः प्रीतिजनकः वस्त्रादि
रागकर्त्तरि च ॥
रंजनं क्ली रक्तचंदनं इति मेदिनी
हिंगुलं । इति राजनिर्घण्टः ॥
रंजनः पुं रागजनने । इति मेदिनी
मुंजतृणं । इति राजनिर्घण्टः ॥

रंजनकः पुं कट्फलः । इति राज
निर्घण्टः ॥
रंजनद्रुः पुं स्वल्पकवृक्षः । आच
गाछ इति भाषा ॥
रंजनी स्त्री गुण्डारोचनिका नीली
मंजिष्ठा । इति मेदिनी ॥ शेफालि
का । इति शब्दचंद्रिका ॥
हरिद्रा पर्प्पटी । इति राजनि
र्घण्टः ॥
रट वाचि । इति कविकल्पद्रुमः
रटति । इति दुर्गादासः ॥
रटितं त्रि कथितं रटधातोः
कर्म्मणि क्तप्रत्ययेन निष्पन्नं क
थनमात्रे क्ली ॥
रठ भाषणे । इति कविकल्पद्रुमः
भाषणं कथनं । पठति इति दुर्गा
दासः ॥
रण म गतौ इति कविकल्पद्रुमः
म रणयति इति दुर्गादासः ॥
रण रुति । इति कविकल्पद्रुमः
रणति । रुतिः शब्दे । इति दुर्गा
दासः ॥
रणं क्ली पुं युद्धं । इत्यमरः ॥
रणः पुं शब्दः ॥ क्वणः इति मे
दिनी गतिः इति शब्दरत्नावली ।
रणतूर्य्यं क्ली युद्धवाद्यं तत्पर्य्यायः
संग्रामपटहः २ अभयडिण्डिमः ३

इति त्रिकाण्डशेषः ॥
रणप्रियं क्ली उशीरं । इति राज
निर्घण्टः ॥
रणप्रियः पुं श्येनपक्षी इति
राजनिर्घण्टः ॥
रणमत्तः पुं हस्ती इति शब्दमा
ला रणमुष्टिः पुं विषमुष्टिक्षुपः
इति राजनिर्घण्टः ॥
रणरंकः पुं रणकान्तरहस्तीन
त पर्य्यायः । मतिमः २ इति हा
रावली ॥
रणरणं क्ली उद्वाहनं इति त्रिका
ण्डशेषः ॥
रणरणः पुं मशकः इति त्रि
काण्डशेषः ॥
रणरणकः पुं उत्कंठा इति हे
मचंद्रः ॥
रणसंकुलं क्ली तुमुलं इत्यमरः
रणालंकरणः पुं कंकपक्षी इ
ति राजनिर्घण्टः ॥
रंडः त्रि अर्द्धचर्म्मावच्छिन्नावयवः
धूर्त्तः । इति संक्षिप्तसारोणादि
वृत्तिः ॥
रण्डकः पुं अफलवृक्षः इति श
ब्दचंद्रिका ॥
रंडा स्त्री मूषिकपर्णी । इत्यमरः
विधवा । राँड इति भाषा । यथा ।

तिष्ठते रेत विकर्मस्थेभ्यः स्वहृ
दयं धनक्षीत्यर्थः इति संक्षिप्त
सारे तिङन्तपादः ॥
रेतश्च्युती न् पुं अष्टचत्वारिंश
द्वत्सरोपरिभार्य्याविहीनः य
था भविष्यपुराणे चत्वारिंशद्व
त्सराणां सार्द्धानां च परे यदि
स्त्रिया वियुज्यते कश्चित् स तु रेत
श्च्युतीमतः इत्युद्वाहतत्त्वं ॥
रतं क्ली मैथुनं। इत्यमरः। गु
ह्यं इति मेदिनी अनुरक्ते त्रि ॥
रतकीलः पुं कुक्कुरः इति हे
मचन्द्रः। स रतकण्टकश्च ॥
रतकूजितं क्ली मैथुनकाली
नवाक् तत्पर्य्यायः मणितं इ
ति हेमचन्द्रः ॥
रतगुरुः पुं पतिः। इति त्रिका
ण्डशेषः ॥
रतज्वरः पुं काकः इति त्रिका
ण्डशेषः ॥
रतताली न् पुं विड्गः इति
शब्दमाला ॥
रतताली स्त्री कुट्टनी इति त्रि
काण्डशेषः ॥
रतनारीचः पुं नारीणां प्रीतिका
रः। कुक्कुरः स्मरः। इति मेदिनी
विड्गः। इति शब्दमाला ॥

रतनिधिः पुं खञ्जनः इति शब्द
रत्नावली ॥
रतर्हिकं क्ली दिवसः मुखस्नानं
अष्टमङ्गलं इति मेदिनी ॥
रतव्रणः पुं कुक्कुरः। इति हेम
चन्द्रः ॥
रतशायी न् पुं कुक्कुरः इति हेम
चन्द्रः ॥
रतहिण्डकः पुं स्त्रीचौरः इति
त्रिकाण्डशेषः लम्पटः लोच्चा इ
ति भाषा तत्पर्य्यायः विड्गः २
व्यलीकः ३ पल्लवः ४ द्रावकः ५
भुजङ्गः ६ चुम्बकः ७ लङ्गः ८ षिङ्गः
९ नारीतरङ्गकः १० स्वस्तिकः ११
रतनारीचः १२ वन्धकः १३ रतता
लिः १४ कठारः १५ कामी १६ खेटी १७
नागरः १८ दासीप्रियः १९ कण्डकी
टः २० इति शब्दमाला ॥
रतांडुकः पुं कुक्कुरः इति हेम।
चन्द्रः
रतान्धी स्त्री कुक्कुटिः। इति त्रि
काण्डशेषः ॥
रतामर्द्दः पुं कुक्कुरः इति शब्द।
माला ॥
रतायनी स्त्री वेश्या। इति शब्द
माला ॥
रतार्थिनी स्त्री मैथुनाभिलाषिणी

इति हलायुधः
रतिः स्त्री कामदेवपत्नी ॥ रागः
रतं ॥ गुह्यं ॥ इति मेदिनी ॥ तस्या
उत्पत्तिः नामकारणं कामपत्नी
त्वं च यथा। दक्ष उवाच। मद्देहजे
यं कन्दर्पमद्रूपगुणशालिनी प
त्नीत्वेषु भार्य्यार्थे भवतः सदृशी
गुणैः ॥ यथा तव महातेजाः स
र्व्वदा सहचारिणी। भविष्यति य
था कामं धर्म्मतो वशवर्त्तिनी। मार्क
ण्डेय उवाच। इत्युक्त्वा प्रददौ दक्षो
देहस्वेदजलोद्भवां ॥ कन्दर्पा
याग्रतः कृत्वा नाम कृत्वा रतीति
तां ॥ तां वीक्ष्य मदनो रामां रत्या
ख्यां सुमनोहरां। आत्माशुगे
न विद्धोऽसौ मुमोह रतिरञ्जि
तः ॥ इति कालिकापुराणे २
अध्यायः ॥ रतिवन्धा यथा।
न भवति यदा नार्य्याः तुष्टा वा
शुरते मनाः। नानाविधैस्तथा वे
धैरेतव्याः कामिभिः स्त्रियः ॥
पद्मासनो नागपाशो लतावेष्टो
ऽर्द्धसंपुटं। कुलिशं सुन्दरश्चैव
तथा केशर एव च ॥ हिल्लोलो
नरसिंहोऽपि विपरीतस्तथाऽप
रः। क्षुब्धो वैधेनुकश्चैव उत्कं
ठस्तस्ततः परं ॥ सिंहासनो र

तिनागो विद्याधरस्तु षोडश ॥
इति रतिमञ्जरी ॥ एतेषां लक्ष
णानि तत्तच्छब्दे द्रष्टव्यानि ॥
रतिगह्वरं क्ली योनिः। इति त्रि
काण्डशेषः ॥
रतिक्रिया स्त्री मैथुनं तत्पर्य्यायः
संवेशनं २। इति त्रिकाण्डशेषः ॥
रतिगृहं क्ली योनिः। इति त्रिका
ण्डशेषः ॥ रमणमन्दिरं च ॥
रतिनागः पुं षोडशवन्धान्तर्गत
पञ्चदशवन्धः। तस्य लक्षणं य
था पीडयेदूरुयुग्मेन कामुकः का
मिनीं यदि। रतिनागः समाख्यातः
कामिनीनां मनोरमः ॥ इति र
तिमञ्जरी ॥
रतिपतिः पुं कामदेवः। इत्य
मरः। देशविशेषस्थस्त्रीणां स्था
नविशेषे तस्याविर्भावो यथा।
वाचि श्रीमाथुरीणां जनकजनप
दस्थायिनीनां कटाक्षे दन्ते गौडां
गनानां सुललितजघने चोत्क
लेप्यसेना। तैलङ्गीनां नितम्बे
सजलघनकुचौ केरली केशपा
शे कार्णाटीनां कटौ च स्फुरति
रतिपतिर्गूर्ज्जरीणां स्तनेषु ॥ इ
ति साहित्यदर्पणं ॥
रतिपाशकः पुं रतिवन्धविशेषः।

यथा। पीडयेद्दृढमुष्टेन कामुका
यदि सुंदरी। रतिपाशः स तथा।
ख्यातः कामिनीनां सुखावहः।
इति स्मरदीपिका॥
रतिप्रियः पुं कामदेवः। इति श
ब्दरत्नावली॥ स्मरतप्रियश्च॥
रतिमदा स्त्री अप्सरसः यथा
स्पर्शानेदारतिमदाप्सरसः सम
दात्मजा इति त्रिकाण्डशेषः॥
रतिमंदिरं क्ली योनिः इति जटा
धरः मैथुनगृहं। यथा। संचारो
रतिमंदिरावधि सखी कर्णावधि
व्याहृतेचेतः कांत समीहितावधि
पदन्यासावधिप्रेक्षिते। हा
संचाधरपल्लवावधि महामानो
ऽपि मौनावधिः सर्वसावधितां
वधिः कुलभवोप्रेम्नः परं केवलं
इतिरसमंजरी॥
रतिमित्रः पुं रतिबंधविशेषः।
तस्य लक्षणं यथा। पात्येदृढ
मुष्टेन कामुकं यदि कामुकी।
रतिमित्र स तदा ख्यातः कामिनी
नां सुखावहः॥ इति रतिमंजरी॥
रतिरमणः पुं कामदेवः इति
त्रिकाण्डशेषः॥
रतिलक्षं क्ली निधुवनं। इति
हारावली॥

रतिसत्वरा स्त्री चिरंजीवा। चिडिं
गशाक इति भाषा। इति शब्दचं
द्रिका॥
रतिसुंदरः पुं रतिबंधविशेषः।
तस्य लक्षणं यथा। नारीपदद्वयं
कामीधारयेद्धृदये यदि स्तनकेतो
रमेत्कामी बंधः स्याद्रतिसुंदरः
इति रतिमंजरी स्मरदीपिकाच॥
रतुः स्त्री देवनदी। सत्यावाक्।
इति सिद्धांतकौमुद्यामुणादिवृत्तिः
रतोद्वहः पुं कोकिलः। इति
शब्दमाला॥
रत्नं क्ली श्रेष्ठजातिः॥ मुक्तादि॥
तत्पर्यायः। मणिः २। इत्यमरः
स्वजातिश्रेष्ठः। इति मेदिनी॥
माणिक्यं। वज्रं। इति राजनिर्घ
ण्टः॥ अथ रत्नोत्पत्ति कार
णं। यथा। सूत उवाच। बलिर्नाम
दैत्यानां बलोनामासुरोऽभव
त्। इंद्राद्यानिर्जिता स्तेन निर्जि
तैस्तैर्न शक्यते॥ वरव्याजेनपशु
तां याचितः स सुरैर्मखे। बलो
ददौ स्वपशुतामतिसत्वो महावि
क्रमः॥ पशुवत् स विशेषात् स्तम्भेन
वाक्यान्यायन्त्रितः। बलोलोको
पकाराय देवानां हितकाम्यया॥
तस्य सत्वविशुद्धस्य सुविशु

द्धेन कर्मणा। कायस्यावयवाः
सर्वे रत्नबीजत्वमाययुः देवा
नामथयक्षाणां सिद्धानां पवना
शिनां रत्नबीजमयं ग्राहः सुमहा
नभवत्तदा॥ अथ तस्याकरस्था
नानि यथा तेषांतु पततां वेगा
द्विमानेन विहायसा। यत्र यत्र प
पात रत्नानां बीजं क्वचन किंचन
महोदधौ सरितिवा पर्वते का
ननेऽपिवा। तत्तदाकरतां यातं
स्थानमाधेय गौरवात्॥ तेषु।
रक्षो विषव्याल व्याधिघ्नान्यघह
निच। प्रादुर्भवंति रत्नानि तथैव
विगुणानिच॥ वज्रमुक्ताफलमण
यः सपद्मरागाः समरकताः प्रोक्ताः
अपि चेंद्रनीलमणि वर वैदूर्याश्च
पुष्परागाश्च॥ कर्केतनं सपुल
कं रुधिराक्षसमन्वितं तथा स्फ
टिकं। विद्रुममणिश्च यत्नाद् उद्दि
ष्टं संग्रहे तत्त्वैः॥ आकारवर्णौ
प्रथमं गुणदोषौ तत्फलं प
रीक्षाच। मूल्यंच रत्नकुशले।
र्विज्ञेयं सर्वशास्त्राणां॥ कुल
ग्रेषुपजायंते यानि चोपहतेऽ
हनि। दोषैस्तान्युपयुज्यंते हीयं
ते गुणसंपदा॥ परीक्षा प
रिशुद्धानां रत्नानां पृथिवीभु

जा। धारणं संग्रहो वापि कार्य्यः
श्रियमभीप्सता शास्त्रज्ञाः कुश
लाश्चापि रत्नभाजः परीक्षकाः।
तएव मूल्य मात्राया वेत्तारः परि
कीर्त्तिताः। इति गारुडे ६८ अ
ध्यायः॥ विशेषरत्नपरीक्षा त
त्तत् शब्दे द्रष्टव्या॥ चतुर्दश महा
रत्नानि यथा। रूपाको मित्रर
घः तन्तनयः पाशविंदु स्तनदे
शामहारत्नाश्चक्रवर्त्तिभवेत्ताव
त्तर्दशमहांति रत्नानि यस्यसः।
रत्नानितु स्वजातिश्रेष्ठानि धर्मसं
हितोक्तानि। चक्रं रथो मणिः खड्ग
श्चर्म रत्नंच पंचमं। केतु र्निधिश्च
सप्तैव मप्राणानि प्रचक्षते भार्या
पुरोहितश्चैव सेनानी रथकृच्चयः
पत्त्यश्वौ कलभश्चेति प्राणिनः स
म कीर्त्तिताः॥ चतुर्दशेतानि रत्ना
नि सर्वेषां चक्रवर्त्तिनामिति। इ
ति विष्णुपुराणे ४ अंशे १२ अ
ध्यायः तट्टीकाच॥
रत्नकंदलः पुं प्रवालं। इति शब्द
रत्नावली॥
रत्नकूटः पुं पर्वतविशेषः। इति
शब्दरत्नावली॥
रत्नगर्भः पुं कुबेरः इति त्रिका
ण्डशेषः। समुद्रः। इति राजनिर्घण्टः

रत्नगर्भा स्त्री पृथिवी। इति हेम
चन्द्रः॥ उपचारात् गुणवत् पुत्र
वती च॥

रत्नद्वीपं क्ली रत्ननिर्म्मितस्थानं
यथा। सिंहस्कन्धाधिरूढां नाना
लङ्कारभूषितां। चतुर्भुजां महादे
वीं नागयज्ञोपवीतिनीं॥ रक्तव
स्त्रपरीधानां बालार्क सदृशी
तनुं नारदाद्यैर्मुनिगणैः से
वितां भवसुन्दरीं॥ त्रिवलीवल
योपेतनाभिनालमृणालिनीं।
रत्नद्वीपे महाद्वीपे सिंहासनसम
न्विते॥ प्रफुल्लकमलारूढां ध्या
येत्तां भवगेहिनीं। इति तन्त्रसारः॥

रत्नधेनुः स्त्री महादानविशेषः
यथा। मत्स्य उवाच। अथातः स
म्प्रवक्ष्यामि महादानमनुत्तमं।
रत्नधेन्विति विख्यातं गोलोकफल
दं नृणां पुण्यं दिनमथासाद्य त
लापुरुषदानवत्। लोकेशावा
हनं कृत्वा ततो होमं समाचरेत्।
धेनुं रत्नमयीं कुर्य्यात् सङ्क
ल्प्य विधिपूर्वकं॥ स्थापयेत् प
द्मरागाणामेकाशीतिं।
मुखे बुधः॥ पुष्परागशतं
तद्वत् घोणायां परिक
ल्पयेत्॥ ललाटे हेम
तिलकं मुक्ताफलशतं दृशोः
भ्रुयुगे विद्रुमशतं शुक्ती कर्णद्व
ये स्मृते॥ काञ्चनानि च शृङ्गाणि
शिरो वज्रशतात्मकं। ग्रीवायां नेत्र
पट्टं स्याद्गोमेदकसमन्वितं॥ इन्द्रनी
लशतं पृष्ठे वैदूर्य्यशतपार्श्वके।
स्फाटिकै रुदरं कार्य्यं सौगन्धिक
शतात्कटि॥ खुरा हेममयाः
कार्य्याः पुच्छं मुक्तावलीमयं।
सूर्य्यकान्तेन्दुकान्तौ च घ्राणे क
र्पूरचन्दनैः॥ कुङ्कुमानि च रोमा
णि रौप्यनाभिं च कारयेत्। गारुत्म
तशतं तद्वदपानानि परिकल्पयेत्।
तथान्यानि च रत्नानि स्थापयेत्
सर्वसन्धिषु। कुर्य्याच्छर्करया जिह्वां
गोमयं च गुडात्मकं। गोमूत्रमाज्य
चन्दनं दधिदुग्धं स्वरूपतः। पुच्छा
ग्रे चामरं दद्यात् समीपे ताम्रदोह
नं॥ कुण्डलानि च हैमानि भूषणा
नि च शक्तितः। कारयेदेवमेवं त
चतुर्थांशेन वत्सकं॥ तथान्यानि
च सर्वाणि पादाश्चेक्षुमया स्तथा।
नानाफलानि सर्वाणि पञ्चवर्ण
वितानकं॥ एवं विरचनं कृत्वा
तद्वद्धोमाधिवासनं। ऋत्विग्भ्यो द
क्षिणां दत्त्वा धेनुमामन्त्रयेत्ततः। गु
डधेनुवदावाहनादिकं वोदाहरेत्ततः।

त्वं सर्वदेवगणधाम यतः पठन्ति रु
द्रेन्द्रविष्णुकमलासनवासुदेवाः।
तस्मात् समस्तभुवनत्रयदेहयुक्
मां पाहि देवि भवसागरपीड्यमा
नं॥ आमन्त्र्य धेनुमभितः परिवृ
त्य भक्त्या दद्याद्द्विजाय गुरवे जल
पूर्वकं तां। यः पुण्यमाप्य दिन
मत्र कृतोपवासः पापैर्विमुक्तः
तनुरेति पदं मुरारेः॥
इति सकलविधिज्ञो रत्नधेनुप्र
दाने वितरति च विमाने प्राप्यदे
दीप्यमाने। कलिकलुषविमुक्तो
बन्धुभिः पुत्रपौत्रैः सहि मदनस्व
रूपः स्थानमभ्येति शम्भोः॥
इति मत्स्यपुराणे महादानानु
कीर्त्तने रत्नधेनुप्रदानिको नाम
२८२ अध्यायः॥

रत्ननिधिः पुं खञ्जनपक्षी। इति
त्रिकाण्डशेषः॥

रत्नपारायणं क्ली सर्वरत्नस्थानं
यथा। समुद्रोपत्तिका हेमी पर्वता
धित्यका पुरी रत्नपारायणं नाम्ना
लङ्केति मम मैथिलि॥ इति
भट्टिः॥

रत्नप्रभा स्त्री जिनानां नरकविशे
षः यथा। रत्नशर्करा बालुका पं
कधूमतमःप्रभाः महातमःप्रभा वे
त्यधोधो नरकभूमयः। इति हे
मचन्द्रः॥

रत्नमुख्यं क्ली हीरकं। इति हे
मचन्द्रः॥

रत्नराट् क्ली माणिक्यं। इति रा
जनिर्घण्टः॥ रत्नश्रेष्ठञ्च॥

रत्नवती स्त्री पृथिवी। इति शब्द
माला॥ रत्नयुक्ता च॥

रत्नवर्षुकं क्ली पुष्पकरथः।
इति शब्दरत्नावली रत्नवर्षणशी
ले त्रि॥ रत्नसानुः पुं सुमेरुपर्व्व
तः। इत्यमरः॥

रत्नसूः स्त्री पृथिवी। इति हेमचन्द्रः
रत्नाकरः पुं समुद्रः। इत्यमरः॥
रत्नोत्पत्तिस्थानञ्च॥

रत्नाङ्कः पुं विष्णुरथः। इति श
ब्दरत्नावली रत्नचिह्नञ्च॥

रत्नाचलः पुं दानार्थमणिमय
पर्वतः। यथा। अतः परं प्रवक्ष्या
मि रत्नाचलमनुत्तमं। मुक्ताफल
सहस्रेण पर्वतः स्यादनुत्तमः। म
ध्यमः पञ्चशतिकस्त्रिशतेनावरः
स्मृतः। चतुर्थांशेन विष्कम्भाः पर्व
ताः स्युः समन्ततः। पूर्वेण वज्रगो
मेदैर्दक्षिणेनेन्द्रनीलकैः। पुष्परा
गयुतैः कार्य्यो विद्वद्भिर्गन्धमादनः।
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो।

3547

विपुलोऽचलः। पद्मरागा समो
र्वोर्ण्णरूतरेणनु विस्रसेत् पान्थ
पर्वतवत्सर्वमद्यापि परिकल्पये
त् तदद्दावाहनं कृत्वा ह्रदा तद्देवी
श्चक्रोचनात् पूजयेत् पुष्पधा
नीयैः प्रभाते चाथ पूर्ववत्।
पूर्ववद्गुरुश्चत्विगभ्यः फलमं
त्रान्दीरयेत् यथा देवगणाः सर्वे
सर्वरत्नेष्ववस्थिताः। त्वं च रत्नम
यो नित्यमतः पाहि महाबल॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते
हरिः सदानेदप्रदानेन तस्मात्त्वं
पाहि पर्वत। अनेन विधिना यस्तु
दद्याद्रत्नमहागिरिं। सयाति वै
ष्णवं लोकममरेश्वरपूजितः
यावत्कल्पशतं साग्रं वसेच्चेह
नराधिप। रूपारोग्यगुणोपेतः
सप्तद्वीपाधिपो भवेत् ब्रह्महत्या
दिकं किंचिद्यदत्रामुत्रवा कृतं
तत्सर्वं नाशमायाति गिरिर्वज्र
हतो यथा। इति मात्स्ये ७७ अ
ध्यायः रत्नाभरणं क्ली मणि
मयालंकरणं जडाऊगहना इ
ति भाषा तस्य धारणगुणाः यथा
यशास्यमायुष्यं श्रीमद्व्यसनसूदनं
हर्षणं काम्यमोजस्यं रत्नाभर
णधारणं इति राजवल्लभः॥

रत्निः पुं बद्धमुष्टिहस्तः मुट्ठबन्धा
त् इति भाषा। इत्यमरः स्त्री पुं स
या रत्नरत्नी इत्यन्ये। इति भ
रतः॥
रन्ध्रं क्ली योनिः। इति शब्दर
त्नावली॥
रथः पुं कायः॥ चरणः॥ वेतसवृ
क्षः। इति विश्वः। तिनसवृक्षः॥
इति राजनिर्घण्टः॥ चक्रविशिष्टं
युद्धार्थयानं। तत्पर्य्यायः। शताङ्गः २
स्यन्दनः ३ इत्यमरः॥
स्यन्दनमात्रे इत्यजयः। तद्धारोहण
गुणाः। हस्त्यश्वरथदोलाद्यैर्भ्र
मणं वातकोपनं। स्थिरीकरणं
संगानां वल्यं वह्निविवर्द्धनं इति
राजवल्लभः॥ रथविशेषाणां
नामानि यथा। युद्धार्थचक्रवद्याने
शताङ्गः स्यन्दनो रथः। सक्रीडा
र्थः पुष्परथो देवार्थस्तु मरुद्रथः
योग्यार्थो वैनयिकः पुरथः
परिहासकः। कर्णीरथः प्रवह
णं डयनं रथगर्भकः कर्णीरथः
स्त्रीवस्त्रादिकं शस्याद्रुस्त्रीकंब
लिवाह्यकं यथकां वस्त्रावृताद्यास्तैः
परिवृतेरथे॥ सांपौड्रकंबली यः
स्यात् संवीतः पाण्डुकंबलैः सत्
हैयो वैयाघ्रद्वैपोवृतो द्वैपि॥

3849

चर्म्मणा॥ इति हेमचंद्रः॥ गोलो
कस्य रथो यथा। प्रदत्तं विप्रप
त्नीभिर्दिव्यमन्नं सुधोपमं। वाल
कान् भोजयित्वा तत्स्वयं च बुभुजे
विभुः॥ एतस्मिन्नन्तरे तत्र शातकुं
भरथं वरं। ददर्श विप्रपत्नीस्तूप
तं तं गगनाद्द्धो॥ रत्नदर्पणसं
युक्तं रत्नसारपरिच्छदं रत्नस्त
म्भैर्निवद्धं च सद्रत्नकलसोज्वलं शु
भ्रचामरसंयुक्तं वह्निशुद्धांशुका
न्वितं। पारिजातप्रसूनानां माला
जालविराजितं॥ शातचक्रसमायु
क्तं मनोयायि मनोहरं। वेष्टितं
पार्षदैर्दिव्यैर्वनमालाविभूषि
तैः॥ पीतवस्त्रपरीधाने रत्ना
लंकारभूषितैः। नवयौवनसं
पन्नैः श्यामलैः सुमनोहरैः॥
द्विभुजैर्मुरलीहस्तैर्गोपवेशधरै
र्वरैः। शिखिपुच्छगुंजमालाव
द्धवंकिमचूडकैः। अवरुह्य रथात्
तूर्णं प्रणम्य हरेः पदं। रथमारो
हणं कर्त्तुमूचुर्विप्रकामिनीः॥
विप्रभार्य्या हरिं नत्वा जग्मुर्गोलो
कमीप्सितं। बभूवुर्गोपिकाः सद्य
स्त्यक्त्वा मानुषविग्रहान्॥ इति ब्रह्म
वैवर्त्ते श्रीकृष्णजन्मखण्डे १९ अध्या
यः॥ देव्या रथयात्रा यथा।

ब्रह्मोवाच। भूयस्ते संप्रवक्ष्यामि
देव्याराधनमुत्तमं। यत्कृत्वा स
र्वकामानां प्राप्तिस्तस्य भविष्यति
इति देवमयेद्दिष्टे हैमवद्धैः सु
शोभनैः। विचित्रपद्मरागाद्यैर्म
णिभिः सुपशोभितैः। रथस्तैः
कारयेद्देव्याः सप्तभौमं मनोरमं
दुकूलवस्त्रसंछन्नं मर्द्दचंद्रोपशो
भितं॥ घंटा किंकिणिशंखाद्यैश्
चामरैः कलकान्वितं॥ पताकाध्व
जशोभाढ्यं दर्पणैरुपशोभितं
तैरथस्तजयेच्छक्तं माली कुसुमम
ल्लिकैः॥ पारिजातकपुष्पैश्च यत्न
कर्द्दमचंदनैः। सुगन्धधूपितैः कृ
त्वा देवीं तत्र निवेशयेत्॥ प्रति
मां शोभनां वत्स महासरत्नेयक
रीं पूजयेद्द्युविम्बस्त्रा सर्वमंग
लमंगलां॥ दुर्गा कात्यायनी देवी
वरदा विन्ध्यवासिनी निशुम्भशुम्भ
मथनी महिषासुरघातिनी प्रसी
दत्व सदामेऽस्तु यच्चनोवाञ्छितं
हृदि। अनेन वलिपूर्वेण नमस्का
रपुनेनवा पूजयित्वा ततो नेयाश
मस्तापरर्गीतकैः। पंचमी सप्त
मीपूर्णानवम्येकादशीषु च त्रती
याशिवविधेप्रदिवसेषु तस्थवेषु च।
महानदीनदंसंतपर्वतेस्ववनेषु च।

तत्रमंडपविन्यासंमहदाविष्टनिर्मि
तं ॥ शालेवा सरण्यं वापि कृत्वा
वास्तुविचारितं सर्वलक्षणसंप
र्णं सर्वशोभासमन्वितं । पूर्वेव ।
कारयेच्छत्र यस्मिन्यात्रां प्रचक्रिरे ।
महाजनपदोपेतां महास्त्रीभिः स
संकुलां । सर्वान्नपात्रनैवेद्यैः स
मस्तैरपिपूजयेत् । दद्याद्बलिंश
क्रसर्वं सर्वदिक्षुसमंततः भूयो
वेताल संघस्य मंत्रेणानेन संव
त । रक्षसा निज भूतेभ्यो बलिंगृ
ह्णन्तु सदाप्रियं । मातरीत वैरे दे
वि सर्वकामार्थसाधनि । अनेन
बलिदानेन सर्वकामान् प्रयच्छ
मे एवं दत्वा बलिं शक्र तथा दे
वावतारयेत् । विन्यसेद्रुद्रपीठे त
मंडले रुपशोभितां । तत्रस्थां
पूजयेद्देवीं हेमरूपे स्थितां ध्वजैः
कलसैस्तु सहस्रेण गंधोदकस
पूरितैः । समस्तफलसंपूर्णैर्यत्ति
वैरणपल्लवैः । स्नापयेद्देवकन्येन
रत्नगर्भैर्नवैर्दृढैः । वेद मंगल
पाठेन शंखवादित्रनिस्वनैः वे
णुवीणास्वदंगैश्च घंटाकिंकिणि
रावितैः । स्नापयित्वा ततो देवीं नि
र्मञ्छेनकैः शुभैः । गोमयादिक
नैः पद्मैर्दीपवर्णविशोधितैः ।

स्वस्तिकैर्नंदिकावर्तैः शंखैर्नीलो
त्पलोत्पलैः ॥ यवशाल्यंकुरो
द्भिन्नैर्यवाचारैर्निमजयेत् । प्रत्ये
कंच दद्देद्धूपं प्रत्येकं कलसैः
स्नापयेत् ॥ तथा कर्पूरचंदनेन चंद
नैः कुंकुमेन च । गोरोचना समैः
तेन देवीं मालिप्य पूजयेत् ॥ हे
मजेजातिजैः सौस्ये रत्नमाल्यैरलं
कृता । वासोभिः सुमनैश्चित्रैः
पुनर्धूपंसमुत्क्षिपेत् भक्षयेत्
तथा कन्या द्विजातीनथ दुःखितान्
भक्ष्य भोज्यान्नपानेन तत्र सर्वां
स्त्रीणयेत् भोजयित्वा तमाये
त देवी मे प्रीयतामिति । रथे
कृत्वा तथा देवी पुनरेव गृहं न
येत् ॥ महता जनसंघेन समस्त
विभवान्वितैः । पताकारणपर्यं सर्व
पुष्पदूर्वाक्षतैर्जलैः ॥ प्रविष्य मा
र्गैः कन्याभिः स्त्रीभिर्मंगलवादि
त्रिभिः । सलिलेन यथा पांसुं कृ
त्वा पंकं प्रचक्रिरे हरषाभांपथे
षणां हारशोभां गृहे गृहे । का
रयीत तथा शक्र सर्ववाधां
निवारयेत् । शक्रेयास्तु रवस्ता
स्मिन् प्राणिहिंसां विवर्जयेत् ॥
बंधनस्या दिमोक्तव्या वध्याः क्रो
धादि पातकः अकालकौमुदीं ।

शक्र रथयात्रां च कारयेत् सर्वदा
सर्वदेवैस्तु शंकराद्यैः प्रतिष्ठिता
रथयात्रा नदा शक्र सुरैः स्वर्गेस
दा कृता तथा किन्नरगंधर्वैर्भूपा
तालनिवासिभिः । रथयात्रा प्र
भावेन मोदंते दिवि देवताः ॥
आदित्या रथयात्राकृद्रथेन नभसः
क्रमेत् । देवो दिव्य विमानस्था
रथयात्रा प्रभावतः क्रीडंते विवि
धैर्भोगैः सर्वातंक विवर्जिताः ।
तथा त्वमपि देवेंद्र रथयात्राकरो
भव ॥ शिवायाः शिवदायास्तु य
स्मेरणा समापिता । अगस्त्य उवाच
रथयात्रा कृता तेन पुरंदरेण वा ।
सर्वस्य तु । पूर्वं यत् कथितं तात
तत्ते सर्वं मयाखिलं ॥ श्रापितेन ता
त्रसे देहो देवीमाहात्म्य मुत्तमं ।
यः पठेत् शृणुयाद्वापि भक्ति
मान्प्रसन्नम ॥ स सर्व यशः सौ
भाग्यं पुत्रप्राप्ति मवाप्नुयात् ॥
लभते नात्र संदेह इत्येवं ब्रह्म
णोब्रवीत् स्वबलेन कृतं राज्य
पुराशक्रस्य कीर्तिता यतदस्य
परीक्षाभिर्वरुणस्य चर्वाणुना
हते स्थाने कृता तेन तथा कृता
चानिर्दतैः भुंजते यया हृष्टा प
रीर्भोगवतीः शुभाः इति देवीपुरा

णे रथयात्राविधिमाहात्म्यं २९ अ
ध्यायः ॥ नवग्रहाणां रथा यथा
योजनानां सहस्राणि भास्करस्य
रथो नव । ईशादंडस्तथैवास्य
द्विगुणो द्विजसत्तमाः ॥ सार्द्धकोटि
स्तथा सप्त नियुतान्यधिकानि तु
योजनानां तु तस्यात्तत्र चक्रं प्रति
ष्ठितं ॥ त्रिनाभिमति पंचारे षण्णे
मिन्यक्षयात्मके । संवत्सरमयं
कृत्स्नं कालचक्रं प्रतिष्ठितं चत्वारिं
शत्सहस्राणि द्वितीयोक्षो विव
स्वतः पंचान्यानि तु सार्द्धानि स्यं
दनस्य द्विजोत्तमाः । अक्षप्रमाण
मुभयोः प्रमाणं तत्र युगार्द्धयोः
ह्रस्वोक्षस्तद्युगार्द्धं च ध्रुवाधारं रथ
स्य वै । द्वितीयेक्षे तु तच्चक्रं संस्थितं
मानसाचले । हयाश्च सप्त छंदां
सि तन्नामानि निबोधत ॥ गायत्री
च बृहत्युष्णिक् जगती पंक्तिरेव च
अनुष्टुप् त्रिष्टुबित्युक्ता छंदांसि
हरयो रवेः ॥ ५ ॥ इति कौर्मे २८
अध्यायः । रथस्त्रिचक्रः सोम
स्य कुंदाभास्तस्य वाजिनः । वाम
दक्षिणतो युक्ता दश तेन निशा
करः वीथ्याश्रयाणि चरति नक्ष
त्राणि रविर्यथा २ सोमपुत्रस्य
चाष्टाभिर्वाजिभिर्वायुवेगिभिः ॥

वाजिभिः स्यन्दनोऽयुक्त स्तेनासौ या
तिसर्वतः ।३। अयुक्तस्य भूमिजे
रथ्यैः स्यन्दनो दशभिर्हतः ॥ ४
अष्टाभिश्चाथ भौमस्य रथो हैमः
सुशोभनः ।५। बृहस्पते रथाष्टा
श्वः स्यन्दनो हेमनिर्मितः ६ रथ
स्तु सोमपुत्रस्याष्टाभिः स्यायसनि
र्मितः ।७ स्वर्भानोर्भास्करारेश्च
तथाश्वैश्चित्रैर्वृतः ॥८।९। एते
महाग्रहाणां वै समाख्याता रथा
नव । सर्वे ध्रुवे महाभागा निब
द्धा वातरश्मिभिः ॥ ग्रहर्क्षताराधि
ष्ण्यानि ध्रुवे बद्धान्यशेषतः । भ्रमन्ति
भ्रामयन्त्येते सर्वाण्यनिलरश्मि
भिः इति कौर्म्मे ४१ अध्यायः ॥ श्री
जगन्नाथदेवस्य रथः यात्राशब्दे
द्रष्टव्यः ॥ अथ ज्योतिर्विदाभरणोक्त
रथकर्माह ॥ लोलभे चलधुक्षिप्र
कभेषु स्यन्दनादिविलविधानमथा
रुः । सेनसपुष्पवर्गां वुत्र पस्थः
साधुराशिवतिरसोधुभिर्वदो ॥ अ
थ रथचक्रमाह उत्सहासिकरकी
र्णपुरन्ती ह यमस्तवलयेवलय
स्य सवभागानिचितं अमसयारा
विमथ्यमतसोनवभागं अग्रेभमव
तिसंकलितः कृत्वोडुनिजयोगयोर
योगे । संधिभेऽर्यहनिरंतरसंयोगीतिविहम
नसौ

नव गर्भे ॥ अथ मुहूर्त्तगणपतौ
रथकृत्यं । पुष्ये पुनर्वसु ज्येष्ठा
नुराधा रेवती हयोः । श्रवणादि
त्रिभे हस्तत्रितये रोहिणी मृगे ॥
सार्के सौम्यदिने सौम्य विलग्ने
रथकर्म सत् । अथ ज्योतिःसा
गरे रथचक्रं । रथाकारं लिखेच्च
क्रं भानुभादौ विलोकयेत् । रथा
ग्रे त्रीणि ऋक्षाणि सृष्टिमार्गे प्र
दापयेत् ॥ त्र्यंशे सम्मुखे जयं चक्रे
सन्धिद्वये महद्भयं । रथाग्रे च म
ध्ये तथा नमध्ये चैव सुखप्रदं ॥
इत्यार्थेषु ज्योतिर्विदिलभराम
णोक्तनाड्युभादिष्टाः ॥ अथार्थः
अथ अनंतरं धीराः स्यन्दनानां रथा
नां ऋतिलं संयुक्तं विधानं काष्ठ
माकुः कथयन्ति । केषु लोलभे
षु नि स्वाती पुनर्वसु श्रवण ध
निष्ठा शतभिषा चलानि । भेषु स
त्तानि स्वकृत्तिका रेवती चित्रा अनु
राधा एतानि लघुसंज्ञानि हस्ताश्वि
न्यश्विनी पुष्या अभिजित् एतानि ।
क्षिप्रसंज्ञकानि तेषु का बलानतं
रोहिणी पवेषु नक्षत्रेषु । पुनः
केषु सेन सपुष्पु इनः सूर्य्यः तेन
सहवर्त्तमानेषु । सतांश्च भग्रहाणां
शुभवारेषु । पुनः कस्मिन् साधुराशि

वतिशुभग्रहराशियुक्ते अंगे लग्ने
सति । पुनः कैः वशास्त्री सप्तमं
स्थाने अंत्रुचतर्थेतपः नवमे पत
द्रवनस्थैः साधुभिः शुभग्रहै रिति
अथ रथचक्रे नक्षत्र स्थापनं ।
उत्सेति । उत्स्रहासिः सूर्य्यस्तस्य क
रैः किरणैः कीर्णव्याप्तपुरं कत्वा
मंडलीय स्वभाग प्रदेशाय स्यत
च्चुलदद्वंचेति तस्मात् अर्थात् स
र्य्याक्रांतनक्षत्रात् अनसः शाकट
स्य वलयश्चक्रे नक्षत्रात् अग्रभा
गमारभ्य अविमध्यमध्यभागपर्य्य
न्तं सधिया रूद्रवलयं भचक्रं देयं
न्यासीकर्त्तव्यं किंभूतं रूद्रवलयं
नवभागं नवभिर्भागैः स्थितमिति
यावत् । पुनः किंभूतं भमभाग
निचितं अभववामभागेन वामभ्र
मणमिति ॥ अथास्य फलं । अनसः
शाकटस्य अग्रमे अग्रगत वर्त्तमा
ने चेद्र नक्षत्रे संकलितः युद्धं भव
ति । कृत्वोडु निगुणांधरगतवर्त्तमा
न नक्षत्रे अमोस्मतिः मरणं भवति ।
रथांगे चक्रयुगे जयो भवति संधि
भे संधिगत नक्षत्रे अर्थहृतिः द्र
व्यहरणं भवति । अंतरसंधौ मध्य
संधान गत नक्षत्रे भीतिर्भयो भव
ति । गर्भे मध्यभागगत नक्षत्रे ।

इष्टं शुभं भवति । नन्तु निश्चित मि
ति अन्यत् सुगमं ॥
रथकड्या स्त्री रथसमूहः तत्प
र्य्यायः । रथव्रजः २। इत्यमरः ॥
रथकरः पुं रथकारः इति श
ब्दरत्नावली ॥
रथकारः पुं रथनिर्माणकर्त्ता ।
छुतार इति भाषा । सत्त्वकरणीग
र्भेमाहिष्याज्जातः । तत्पर्य्यायः
तक्षा २ वर्द्धकिः ३ त्वष्टा ४ काष्ठतट्
५ इत्यमरः सूत्रधारः ६ वर्द्धकी
७ रथकरः ८ काष्ठतक्षकः ९ इ
ति शब्दरत्नावली रथकुटुम्बीपुं सारथिः इत्यमरः
रथगर्भकः पुं स्कंधावाह्ययानं त
द्रथः । तत्पर्य्यायः । कर्णीरथः २
प्रवहणं ३ डयनं ४। इति हेम
चन्द्रः ॥
रथगुप्तिः स्त्री परप्रहरणा
भिघात रक्षार्थं रथस्य सन्नाह
वदावरणकादिद्रव्यं ॥ र
थस्य गुप्तिः काष्ठादिभ्यो रक्षा
र्थमावरणं । तत्पर्य्यायः ।
वरूथः २ इत्यमरः भरतश्च ॥
रथगोपनं क्ली रथगुप्तिः ३ इ
ति हलायुधः ॥
रथचरणः पुं चक्रवाकपक्षी इति
शब्दरत्नावली ॥ रथचक्रं । यथा ।

रथः। द्रोणीयंत्राणानश्रुतिरथोंऽङ्गो
पत्ररथो रथांगेचंद्राकौं रथचर
णपाणिः शर इति। इति महिम्नः
स्तोत्रे ॥
रथद्रुः पुं तिनिशवृक्षः इत्यमरः
रथंतरः त्रि रथेनतरतियः इ
तिमुग्धबोधव्याकरणं ॥
रथपर्य्यायः पुं वेतसवृक्षः इ
ति शब्दचंद्रिका ॥
रथपादः पुं चक्रं। इति हेम
चंद्रः ॥
रथस्पा स्त्री नदीविशेषः इति
शब्दरत्नावली ॥
रथांगं क्ली चक्रं इत्यमरः।
रथांगः पुं चक्रवाकपक्षी इ
त्यमरः ॥
रथांगपाणिः पुं विष्णुः। इति
हलायुधः ॥
रथांगी स्त्री ऋद्धिः। इति रा
जनिर्घण्टः ॥
रथांतरः पुं कल्पभेदः। इत्य
ग्नि पुराणं ॥
रथाभ्रः पुं वेतसवृक्षः। इति
शब्दरत्नावली ॥
रथाभ्रपुष्पः पुं वेतसः इत्यम
रः टीकायां भरतः ॥
रथारोही न् पुं रथस्यपृष्ठकर्त्ता
इति हेमचंद्रः ॥
रथिकः पुं रथी इत्यमरः ॥ ति
निशवृक्षः इतिराजनिर्घण्टः ॥
रथिनः पुं रथी। इत्यमरः ॥
रथिरः पुं रथी। इतिशब्दरत्ना
वली ॥
रथी न् पुं रथस्वामीराजादिः तत्
पर्य्यायः। रथिकः २ रथिनः ३।
इत्यमरः॥ रथारोही ४ रथीः ५
रथिरः ६। इति हेमचंद्रः। रथ
स्वामी ७ सरथः ८। इति शब्द
रत्नावली॥ स्पंदनारोहः ९। इ
ति जटाधरः ॥
रथ्यः पुं रथस्यवोढाघोटकः।
इत्यमरः। रथासः। इति हेम
चंद्रः॥ चक्रे क्ली ॥
रथ्या स्त्री रथसमूहः। तत्पर्य्या
यः रथकड्या २ रथव्रजः ३ प्रशंत
रमार्गः। नाह्ल इति भाषा। तत्
पर्य्यायः। प्रतोली २ विशिखा ३
इत्यमरः॥ आवर्त्तिनी। इति मे
दिनी। पंथाः। चत्वरं। इति हे
मचंद्रः ॥
रद उ न लेखने। इतिकविकल्पद्रुमः
रेफादिः। उ रत्वोत मूलत्वेन न
मितिरणोविंदमहः ॥ रदति भूमिं
शूकरः। इति दुर्गादासः ॥

रदः पुं दंतः॥ विलेखनं। इति
मेदिनी॥ पुरुषदंतलक्षणं यथा
विवर्णाधनहीनाश्च दंताः स्निग्धा
घनाः शुभाः। तीक्ष्णा दंष्ट्राः समाः
श्रेष्ठा जिह्वा रक्ता समा शुभा ॥
स्त्रीदंतलक्षणं यथा। कुंदपुष्प
समा दंता भाषितं कोकिलासमं
दाक्षिण्ययुक्तमशठं हंसशब्द
सुखावहं॥ नासा समा समपुटा
स्त्रीणां तरु विरा शुभा। कराल
विषमा दंताः क्लेशायच भयाय
च चौर्य्याय कृष्णमांसाश्चदीर्घा
भर्तृश्च मृत्यवे इतिगारुडे ६५ अ
ध्यायः॥ दंतलग्नस्य शुचित्व य
था दंतवद्दंतलग्नेषु जिह्वास्पर्शे
शुचिर्भवेत्। इतिकौर्मे उपविभागे
१२ अध्यायः॥ दंतलग्नमसंहार्य्यं
लेपं मन्येत दंतवत्। न तत्र बा
हुशः कुर्य्यायत्नमुद्धरणे पुनः ।
भवेदशौच मत्यर्थं तृणावेधाद्व्रणे
ऽणकृते। इति प्रायश्चित्ततत्त्वधृत
वचनं ॥
रदच्छदः पुं ओष्ठः। इति हेमचंद्रः
रदनः पुं दंतः। इत्यमरः उत्।
खनने क्ली॥
रदनच्छदः पुं ओष्ठः। अधरः इत्य
मरः। तस्य शुभाशुभलक्षणं यथा
मांसलेश्च घनोपेता अवक्रैरथ
रैर्नृपाः। बिंबोपमैश्च स्फुटितै
रोष्ठैरूक्षैश्च खण्डितैः॥ वि
वर्णैर्धनहीनाश्च दंताः स्निग्धा घ
नाः शुभाः। इतिगारुडे ६५ अध्या
यः रदनी न् पुं हस्ती। इतिराजनि
र्घंटः रदी न् पुं हस्ती। इतिहलायु
धः रध य ऊ ल् हिंसने पाके। इ
तिकविकल्पद्रुमः। य रध्यति।
ऊ रधिष्यति रत्स्यति। ल् अरधत्
इतिदुर्गादासः ॥
रंज म ऊ ञ (रागे। इति कवि
रंज य म ऊ ञ) कल्पद्रुमः॥ यञ
रज्यति रज्यते। म रंजयति मृगान्
मृगारमणाद्दन्यत्र रंजयति पुत्रं पिता
ऊ रङ्क्त्वा। ञ रजति रजते। रागो
वर्णांतरेण पादन मासक्तिश्च।
इति दुर्गादासः ॥
रंतिदेवः पुं विष्णुः। चंद्रवंशीय
नृपतिभेदः। स तु सांकृतिपुत्रः
इतिमेदिनी॥ कुक्कुरः। इति श
ब्दरत्नावली ॥
रंतुः स्त्री वर्त्म॥ नदी॥ इतिमेदिनी
रंधनं क्ली पाकः। रधधातोर्भावे
ऽनट्प्रत्ययेन निष्पन्नं। यथा रंध
नायस्थाली। इति संक्षिप्तसार
व्याकरणं ॥

रंध्रं क्ली हृषणं ॥ छिद्रं । इति
मेदिनी ॥
रंध्रकंटः पुं जालवर्बुरकः इ
तिराजनिर्घण्टः ॥
रंध्रवभ्रुः पुं उन्दुरुः । इतित्रि
काण्डशेषः ॥
रंध्रवंशः पुं छिद्रयुक्तवंशः फो
कवांश इति भाषा तत्पर्य्यायः
त्वक्सारः २ कीचकाख्यः ३
मस्करः ४ वादनीयः ५ सुविरा
स्यः ६ अस्य गुणाः । वंशोत्वेलो
कषायोच किंचित्तिक्तोच शीतलो
मूत्रकृच्छ्रप्रमेहार्शःपित्तदाहास्र
नाशनो ॥ विशेषो रंध्रवंशस्तदी
पनो जीर्णनाशकः । रुचिकृत्
पाचनो हृद्यः शूलघ्नो गुल्मनाश
नः इति राजनिर्घण्टः ॥
रपव्दे । इति कविकल्पद्रुमः
रपति । वदकथनं । इति दु
र्गादासः ॥
रफ इ गत्यां ॥ वधे । इति कवि
कल्पद्रुमः इ रंफते । इति दु
र्गादासः
रफ गत्यां ॥ वधे । इति कविकल्प
द्रुमः रफति । इति दुर्गादासः ॥
रब इ गत्यां । इति कविकल्पद्रुमः
इ रंबते इति दुर्गादासः ॥

रव इ उ. शब्दे । इति कविकल्पद्रु
मः रवः पुं शब्दः । रवधातोर्भावे
ऽल्प्रत्ययेन निष्पन्नः ॥
रभ ओ ङ. राभस्ये । इति कविकल्प
द्रुमः ॥ राभस्यमुत्सुकीभावः ।
निर्विचारा प्रवृत्तिरिति गोविंद
भट्टः ॥ ओरब्धा । ङ. रभते साधुः
पुण्ये । आङ् पूर्वोऽयमारंभे ।
शास्त्रं पठितुमारभते शिष्यः ।
इति दुर्गादासः ॥
रभसः पुं वेगः ॥ हर्षः इति मे
दिनी ॥ पौर्वापर्य्यविचारः ।
इत्यरुणः ॥ ओतस्य कामिनिक
लिंगः ॥ क्रियामारभसा च दृ
ष्टपते इति क्रमस्तः ॥ यदा तु रभस
गुणयोगात् अर्शआदित्वा
त् अप्रत्यये तद्वति वर्त्तते
तदा वाच्यलिंगतास्यात् । इति
लिंगादिसंग्रहे भरतः ॥ अभि
धानविशेषश्च ॥
रम उ ङ. ज ओ क्रीडे । इति
कविकद्रुमः ॥ रेफादिः ।
उ रमित्वा रान्त्वा । ङ. रमते । ज राम
रामः । ओ रंता । इति दुर्गादासः
रभ इ ङ. शब्दे । इति कविकल्पद्रुमः
इ रंभते । ङ. रंभते इति दुर्गादासः ॥
रमः पुं कांतः । रक्ताशोकवृक्षः ।

कामदेवः । इति मेदिनी ॥ रमणं
च । रमधातोर्भावे नट् प्रत्यय
निष्पन्नं ॥
रमकः पुं कांतः । इत्युणादिकोषः
रमठं क्ली हिंगु । इत्युणादिकोषः
रमठध्वनिः पुं हिंगु । इति शब्द
चंद्रिका ॥
रमणं क्ली पटोलमूलं । इति
मेदिनी । जघनं । इति हेमचंद्रः
जंभनं । तत्पर्य्यायः । ग्रवल्लच
र्मकं २ ग्राम्यधर्मः ३ सुरतं ४ रतं
५ संप्रयोगः ६ निधुवनं ७ मैथुनं
८ रतिः ९ उपस्थं १० पर्षितं ॥
क्रीडारत्नं ११ महासुखं १२ त्रिभद्रं
१४ योगामिथुनं १५ अभिमानितं
१६ इति शब्दरत्नावली । क्रीडनं ।
इति रमधातोर्ल्युट्प्रत्ययात् ॥
रमणः पुं पतिः ॥ कामदेवः इति
मेदिनी ॥ गर्दभः । इति हेमचंद्रः
वृषणः । इति शब्दचंद्रिका ॥ म
हारिष्टः । इति राजनिर्घण्टः ॥
रमणकं क्ली जंबुद्वीपान्तर्गतव
र्षविशेषः । स तु रम्यकवर्षः यथा
एवमेवोत्तरे त्रीणि वर्षाणि च त
पोधन । कुरुवर्षं सिंधुकूलान्तं शृं
गवान्नवधिः स्मृतः । हिरण्मयं त
तो वर्षं श्वेतावधि निगद्यते ।

रम्यकंच ततो वर्षं नीलस्तस्या
वधिः स्मृतः ॥ अपिच । शेषश्वा
च दक्षिणेनतु श्वेतस्य निषध
स्यान्तरेण तु । वर्षं रमणकं नाम
जायते तत्र मानवाः । शुक्लाभि
जनसंपन्नाः सर्वे सुप्रियदर्शनाः
दशवर्षसहस्राणि शतानि दश
पंचच ॥ जीवंति ते महाभागा नित्य
मुदितमानसाः । इति पाद्मे भूमिख
ण्डे १२८ । १२९ अध्यायौ ॥
रमणा स्त्री रमणी इत्यमरटीका
रमणी स्त्री नारी । इति मेदिनी
उत्कृष्टस्त्रीविशेषः । या वपु
र्गुणोपचारेण सौभाग्येन कान्तं
रमयति सा । इत्यमरभरतौ ॥ बा
लाल्यवृत्तः । यथा । बाला च रम
णी रामा वंध्या कामकला पि च ।
इति शब्दचंद्रिका ॥
रमणीयं त्रि सुंदरं । इत्यमरटीका
रमण्यं त्रि रमणीयं । इति सिद्धान्त
कौमुद्यामुणादिवृत्तिः ॥
रमतिः पुं नायकः । स्वर्गः । इति
मेदिनी ॥ काकः । इति शब्दरत्ना
वली ॥ कालः ॥ कामदेवः । इ
ति सिद्धान्तकौमुद्यामुणादिवृत्तिः ।
रमा स्त्री लक्ष्मीः । इति मेदिनी ॥
शाश्वतराजकन्या । शाकल्लिदेवेन

विवाहिता । यथा । ततः शशिध्वजो
राजा पुत्रादाहूय पुत्रकान् । स
शोभनायामनिरुद्धा रमां प्रादात् स
कल्कये ॥ इति कल्किपुराणे २५
अध्यायः ॥ शोभा । इति राज
निर्घण्टः ॥
रमाधवः पुं श्रीकृष्णः यथा ।
रमाधवः प्रसन्नो माधवतात् । इ
ति वयग्रन्थे जगदीशः ॥
रमानाथः पुं श्रीकृष्णः रमाल
क्ष्म्या नाथः स्वामी इति षष्ठीत
त्पुरुषसमास निष्पन्नः ॥
रमापतिः पुं श्रीकृष्णः । यथा
मुकुन्दस्यासितमिदमिदं यातं
रमापतेः । अक्रमेतदनन्तस्येव
चतुर्भुजो दिरक्षवः ॥ इति मु
ग्धबोधव्याकरणं ॥
रमाप्रियं क्ली पद्मं । इति शब्द
चन्द्रिका ॥
रमावेष्टः पुं श्रीवासः । इति रा
जनिर्घण्टः ॥
रमिता त्रि रतिप्रापिता । यथा
त्वरितगति ईजगुरुणितरणिस
ताविविनगता । स्मरविगुरुणारति
गुरुणा परिरमिता प्रमद मिता ।
इति छन्दोमञ्जरी । अनया त्वरितो
पयुः स्मरविपणा श्रीकृष्णेन

परिरमिता सती प्रमदं हर्षं इता
गता । किंभूता । त्वरितगतिः त्वरि
तगतिः त्वरिताशीघ्रा गतिर्यस्याः सा
तथा पुनः किंभूता नरणिसुताविपिनगता यमुनासंबन्धि वनमुपागता
किंभूतेन रतिगुरुणा रते शृङ्गारे ।
गुरुणा उपाध्यायेन । अयमभि
प्रायः । स्वयं रमि उपालो नापि
कांच रति मध्यापयति । इति
तट्टीका ॥
रमेश्वरः पुं विष्णुः यथा श्रीराम
राघव रमेश्वर रावणारे भूतेश
मन्मथरिपो प्रमथाधिनाथ । चाणूर
मर्दन हृषीकपते मुरारे त्वामज
भवाय इति सन्ततमामनन्ति ॥
इति काशीखण्डे हरिहरस्तोत्रे ॥
रेभः पुं वेणुः वानरविशेषः । इ
ति मेदिनी महिषासुरपिता ।
यथा श्रीदेव्युवाच आराधितो
महादेवो रम्भेण सुरवैरिणा चि
रेण सच तुष्टोऽभूत्तपसा तस्य शं
करः । प्रसन्नोऽस्मि महादेवः प्रत्य
क्षं रम्भमब्रवीत् । प्रीतोऽस्मि ते व
रं भद्र वरयस्व यथेप्सितं ॥ एवमु
क्तः प्रत्युवाच रम्भस्तं चन्द्रशेखरं ।
यदि प्रसन्नो महादेव यदि ते मय्यनु
ग्रहः ॥ मम जन्मत्रये पुत्रो ।

भवान् भवतु शंकर । एवमुक्तस्त
दैतेन प्रत्युवाच वृषध्वजः ॥ भव
तो तद्वाञ्छितं ते भविष्यामि सुत
स्तव । इत्युक्त्वा स महादेवस्तत्रैवा
न्तरधीयत ॥ रम्भोऽपि यातः स्वस्था
नं हर्षात्फुल्लविलोचनः । प
थि गच्छन् स रम्भोऽपश्यद्देशे महि
षीं शुभां । त्रिहायणीं चित्रवर्णां
सुन्दरीं स्तनशालिनीं । स तां दृष्ट्वा
थ महिषीं रम्भः कामेन मोहि
तः ॥ दोर्भ्यां गृहीत्वा च तदा च
कार स्मरतोत्सवं । तयोः प्रवृत्ते
सुरते सा तदा तस्य तेजसा । द
धार महिषी गर्भं तदा भून्म
हिषासुरः ॥ इति कालिकापुरा
णे ५९ अध्यायः ॥
रम्भा स्त्री कदली ॥ अप्सरोविशेषः
इति मेदिनी ॥ गौरी । इति शब्द
रत्नावली ॥ गोध्वनिः । इति हेम
चन्द्रः । वेश्या । इति धरणिः । रम्भा
तृतीया स्त्री व्रतविशेषकालः ।
यथा । ब्रह्मोवाच । रम्भातृतीयां
वक्ष्ये च सौभाग्य श्रीसुतादिदां
मार्गशीर्षसिते पक्षे तृतीयायामुपोषितः । गौरीं यजेद्बिल्वपत्रैः कु
शोदकः करभदः । कुन्दवाटी
रि स तां पोषमरुवके ॥

यजेत् ॥ कर्णरादः कृशरदो मल्लि
काद् दन्तकाष्ठकृत् । माघे सुभद्रा
कह्लारैर्हृतांशो मण्डकप्रदः । गी
तीमधं दन्तकाष्ठं फाल्गुने गोमती
यजेत् । कुन्दैः कृत्वा दन्तकाष्ठं जी
वाशः सष्कुलीप्रदः विशालाक्षीं
दमनकैश्चैत्रे कासारसंप्रदः ।
दधिप्राशो दन्तकाष्ठं नगरे श्रीमु
खीं यजेत् । वैशाखे कर्णिकारैश्च
घृतप्राशो वटप्रदः ज्येष्ठे नारा
यणीं मल्लिकाशतपत्रैश्च खण्डदः
लवङ्गाशाश्च तत्राद आषाढे मा
धवीं जयेत् । तिलाशो बिल्वपत्रैश्च
क्षीरान्नवटकप्रदः । औदुम्बरं द
न्तकाष्ठं तथा श्रावणे श्रियं ।
दन्तकाष्ठं स्वर्णकाशः क्षीरदा सुत
मायजेत् ॥ पद्मैर्यजेत् भाद्रप
दे प्राङ्गोदाशो गुडादिदः । राज
पुत्रीं चाश्वयुजे जवापुष्पैश्च जी
वकं प्राशयेन्निधि नैवेद्यैः कृश
रैः कार्त्तिके यजेत् ॥ जातिपुष्पैः
पद्मजां च पञ्चगव्याशनो यजेत् ॥
वर्षान्ते च वर्षीते सपत्नीकान्
द्विजान् यजेत् । उमा महेश्वरं स्वर्णौ
ल्वरणं गुरवे स्थिते ॥ वस्त्रच्छत्र
सुवर्णाद्यैः शय्यां च दीपं तु गवां
गीतवाद्यैर्देवेत प्रातः गवाद्यं ।

सर्व्वमाप्नुयात् ॥ इति गारुडे १२०
अध्यायः ॥ अपिच । अथ तृती
या । सा च तथीयुता रंभाव्रते
तरदैवकर्मसुग्राह्या । रंभाख्यं
वर्ज्जयित्वा तत्तृतीयामनिसत्तम
अन्येषु सर्व्वकार्य्येषु गणयुक्ता
प्रशस्यते ॥ इति ब्रह्मवैवर्त्तोक्त ॥
ततस्तु गुरुमवाक्य रंभाव्रतपरं ।
भविष्योत्तरे । ऊरुष्टु भद्रेयत्वेन
रंभाख्यं व्रतमुत्तमं । ज्येष्ठे शुक्ल
तृतीयायां स्नात्वा नियम तत्पर
रा । रंभाख्यमिति रंभया कृतमि
ति रंभाव्रतं । इति तिथ्यादितत्त्व
रंभोरूः स्त्री रंभेइव ऊरू यस्याः
सा । इति व्याकरणं ॥
रम्पं क्ली पटोलमूलं । इति मे
दिनी । माधानयाल्डः । इति ज
टाधरः ॥
रम्पः पुं चम्पकवृक्षः इति मे
दिनी ॥ वकवृक्षः । इति शब्द
चंद्रिका ॥ रम्पः त्रि मनोज्ञः ।
इति मेदिनी । वल्लकरः । इति ज
टाधरः ॥ रम्पकं क्ली वर्षविशेषः
इति जटाधरः । एतस्य विवरणं य
था दक्षिणेन तु मेरोस्तु श्वेतस्योत्त
रेणच । वायव्यं रम्पकं नाम जा
यंते तत्र मानवाः । मतिप्रधाना

विमला जराद्दुर्गंधविवर्जिताः । तत्रा
पि सुमहान् वृक्षोन्यग्रोधो रोहि
तः स्मृतः । तत्फलप्राशनादेव जी
वंति वर्षवासरं । इति वाराहपुरा
णे रुद्रगीता नामाध्यायः ॥ प
टोलमूलं । इति त्रिकाण्डशेषः ॥
रम्पपुष्पः पुं शाल्मलिवृक्षः इ
ति राजनिर्घण्टः ॥
रम्पफलः पुं कारस्करवृक्षः इ
ति राजनिर्घण्टः ॥
रम्पा स्त्री रात्रिः । इति मेदिनी ॥
स्थलपद्मिनी । इति राजनिर्घण्टः ।
रम्रः पुं अरुणवर्णः ॥ शोभा ।
इत्युणादिकोषः ॥
रय उ गतौ । इति कविकल्पद्रुमः
उ रयते । इति दुर्गादासः ॥
रयः पुं वेगः । इत्यमरः ॥ प्रवाहः
यथा । प्रवाहः स्तनरोच्चः स्या है
णी धारा रयश्च सः । इति हेम
चंद्रः ॥
रवाटी स्त्री ललाटः । इति पुराणं
रल्लकः पुं कंबलः । इत्यमरः ।
पद्म । इति सुभूतिः ॥ मृगविशे
षः इति मुकुटः ॥
रव इ अजे । इति कविकल्पद्रुमः ।
इ रवावते । इति दुर्गादासः ॥
रवः पुं शब्दः । इत्यमरः ॥

रवणं क्ली कांस्यं । इति हेमचं
द्रः ॥ रवश्च ॥
रवणः पुं उष्ट्रः । इति हेमचं
द्रः कोकिलः । इति सिद्धान्तकौमु
द्यामुणादिवृत्तिः ॥
रवणः त्रि शब्दनः ॥ तीक्ष्णः ।
भंडकः । चंचलः । इति शब्दरत्ना
वली रवथः पुं कोकिलः इत्यु
णादिकोषः ॥
रविः पुं सूर्य्यः ॥ अर्कवृक्षः इ
त्यमरः ॥ तस्य भोग्य दिने वारद्व
यं । यथा । रवौ वर्ज्यं चतुः पंच
सोमे सप्त द्वयं तथा । इत्यादि
वारवेला कथने समयप्रदीपः
तत्र निषिद्धानि यथा । माष मा
मिष मांसंच मसूरं निंबपत्रकं
भक्षयेद्यो रवेर्वारे सप्त जन्म
न पुत्रकः । आर्द्रकं मधुमत्स्यं
च भक्षयेद्यो रवेर्दिने । सप्तज
न्म भवेद्रोगी जन्मजन्म दरिद्रता
निंबं मांसं मसूरंच विल्वकांजि
कमार्द्रकं । भक्षयेद्यो रवेर्वारे
सप्तजन्मन्यपुत्रकः । इति कर्म्मलो
चने ॥ रविग्रहस्य रक्तपद्मासमभि
ष्वितवर्णः । आयपूर्व्वादिक्कुरु
क्षत्रियजाति सत्वगुणकटुरस
सिंहराशि हस्तानक्षत्र सप्तमीतिथि

नाम्न कलिंगदेशानामधिपतिः ।
काश्यपगोत्रः । द्वादशांगुलशरी
रः । पद्महस्तद्वयः । पूर्व्वाननः ।
सप्ताश्ववाहनः । शिवाधिदेवतः
वह्निप्रत्यधिदेवतश्च । इति ग्रहय
ज्ञतत्त्वादयः ॥ अस्य ब्युत् पत्तिः
यथा । भुवनीमांसयोर्लोकास्तस्मा
त्सूर्य्यः परिभ्रमन् अविरतप्र
काशेन श्रवनात् स रविः स्मृतः ॥
इति मात्स्ये १२१ अध्यायः ॥
अस्य भार्य्यापत्यानि यथा । मरीचेः
कश्यपो जज्ञे तस्माज्जज्ञे विभा
वसुः । तस्य भार्य्या भवत् संज्ञा
पुत्री त्वष्टुः प्रजापतेः । श्रीणपत्या
निराजेन्द्र संज्ञायां महसांनिधिः ।
आदित्यो जनयामास कन्यांचैकां
सुलोचनां ॥ वैवस्वतं मनुश्रेष्ठं ।
यमंच यमुनां ततः । नाति तेजो
मयं रूपं सोढुं साले विवस्वतः ॥
मायामयीं ततश्छायां सवर्णां नि
र्म्ममे स्वतः । संज्ञोवाच ततश्छायां
सवर्णां मृणुएवं मे वचः । अहं यास्या
मि सदनं पितुस्त्वमुनरत्र मे ।
भवनेवस कल्याणि निर्विशंकं
ममाज्ञया ॥ मनुरेष यमश्चैवैतौ यमु
नायमसंततौ । स्वापत्यदृष्ट्या दृष्टव्या
मे ततोलयं ततया ॥ तरक्यमिदं

त्वत्ते तयापमेकदाचन। इत्याकर्ण्याथ सा त्वाष्ट्री देवी छाया जगाद तं॥ आकचग्रहणाद्ब्रह्मन्नापाद्य कदाचन। आख्यास्यामि चरित्रं ते यद्धि देवि यथा सखे॥ इति छायायां गृहस्याथ संज्ञागात् पितुरालये। उवाच पितरं देवी जामातस्तव नन्दना। तेजः सोढुमहं तात काश्यपस्य महात्मनः। तत्त्रिशाभ्यं च कोपात्सौ तर्जयामास कन्यकां मन्सञ्श्रेयः कथं वास्यादिति सा परिचिन्त्य च आरुह्य वडवा भूत्वा चरन्ती चोत्तरान् कुरून् तपस्तेपे च सा ती व्रपतिमाधाय चेतसि। मन्यमानोऽथ तां संज्ञां सवर्णायां तथा रविः॥ सावर्णिं जनयामास मनुश्रेष्ठं महीपते। शनैश्चरं द्वितीयं च सुतां भद्रां तृतीयिकां॥ सवर्णा स्वेष्वपत्येषु सापत्न्यात् स्त्रीस्वभावतः। चकाराभ्यधिके स्नेहं न तथा पूर्वजेषु हे॥ चिरमालोक्य तां भार्यां उवाच सवितावचः। अयि भाविनि बालेषु समेष्वपि कृतं त्वया॥ विधीयतेऽधिकं स्नेहः सावर्णादि सुतान् प्रति। नाचचक्षे तदा साथ भास्वते पतिरूपेण ततः संश्रयेते शाभ

छायासर्वं शशंस ह। यथाहन्तेन तथा तच्छ्रुत्वा ततोऽथ भगवान् हरिः तिरामसेन शापाप जगाम त्वष्टुरन्तिकं। त्वष्टापि च यथान्यायं सान्त्वयित्वाथ काश्यपं। निर्दग्धुकामं कोपेन प्राणम्यैव सुदान्तदा त्वष्टोवाच। तवातितेजसो भीता प्राप्यातिरुक्तत्कुरून् वने॥ उवाच रूपमास्थाय सत्ताचरति शाड्वले दृष्टा हि तां भवान् यस्य भार्यां तातमारूढः। लब्धान्तेतोऽथ सविमानात्मो मरुत्कुरूनथ सहरिहरिचरूपेणामुत्वे न समन्ताद्यत् त्वरमाणोऽथ सवितः परपुरुषशङ्कया सा तन्निरवमत्शुक्रं नासिकाभ्यां विवस्वतः। देवौ तस्मादजायेतामश्विनौ भिषजावरौ। इति पाद्मे सृष्टिखण्डे ॥ अध्यायः

रविकान्तः पु सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥

रविचक्रं क्ली नराकारसूर्य्यचक्रविशेषः यथा। लिखेत रविचक्रं तु भास्करे नरसन्निभः। यस्मिन्न देऽभवेत सूर्य्यस्तत्रादौ त्रीणि मस्तके। त्रयं वक्रे प्रदातव्य मेकैकं स्कन्धयोर्न्यसेत्। एकैकं बाहुयुग्मेन एकैकं हस्तयो द्वयोः॥

हृदये पंच ऋक्षाणि एकं नाभौ प्रदापयेत्। ऋक्षमेकं देद्गुह्ये एकैकं जानुके न्यसेत्॥ नक्षत्राणि च षोडाणि रविपादे नियोजयेत् चरणस्थेन ऋक्षेण अल्पायुर्जायते नरः॥ विदेशगमने जानो गुह्यस्थे परदाररवान्। नाभिस्थे नाल्पसन्तुष्टो हृतस्थेन स्यान्महेश्वरः॥ पाणिस्थेन भवेच्चौरः स्थानभ्रष्टो भवेद्भुजे। स्कंधस्थितेथन पतिर्मुखे मिष्टान्नमाप्नुयात् ॥ मस्तके पट्टवस्त्रं नक्षत्रसाद्यदि स्थितं। इति मार्कण्डेयः अध्यायः

रविजः पु शनैश्चरः। यथा उदग शानभिषार्द्रीस्वातिमूला त्रिपूर्वा रवि रविज कुजाहे भूतषष्ठी नवम्यां। इत्यादि ज्योतिषतत्त्वं ॥

रवितनयः पु सावर्णिकमनुः। यथा। स बभूव महाभागः सावर्णिस्तनयो रवेः। इति देवीमाहात्म्यं वैवस्वतमनुः। शनिः यमश्च॥

रविनन्दनः पु सुग्रीवः। इति त्रिकाण्डशेषः॥ सावर्णिमनुः। वैवस्वतमनुः। शनिः। यमश्च॥

रविनाथं क्ली पद्मं। बंधूके पु इति शब्दचन्द्रिका॥

रवीन्द्रं क्ली पद्मं। इति धरणिः।

रविपत्रः पु आदित्यपत्रक्षुपः। इति राजनिर्घण्टः॥

रविप्रियं क्ली रक्तकमलं॥ ताम्रं। इति राजनिर्घण्टः॥

रविप्रियः पु आदित्यपत्रः॥ रक्तकरवीरः। इति राजनिर्घण्टः॥ लकुचः। इति शब्दमाला॥

रविरत्नकं क्ली माणिक्यं। इति राजनिर्घण्टः॥

रविलोहं क्ली ताम्रं। इति राजनिर्घण्टः॥

रविलोचनः पु विष्णुः। यथा। रविर्विरोचनः सूर्य्यः सविता रविलोचनः। इति तस्य सहस्रनामस्तोत्रं॥

रविसंज्ञकं क्ली ताम्रं। इति शब्दचन्द्रिका॥

रविसूनुः पु शनैश्चरः। यथा। नीलाञ्जनचयप्रख्यं रविसूनुं महाग्रहं। छायाया गर्भसम्भूतं वन्दे भक्त्या शनैश्चरं॥ इति नवग्रहस्तोत्रं॥

रश ध्वने। इति कविकल्पद्रुमः। रेफादि स्तालव्यान्तः। रशना। इति दुर्गादासः। सोत्रधातुरयं॥

रशना स्त्री जिह्वा। इति शब्दरत्नावली॥ काञ्ची। इत्यमरादिकोषः

रश्मिः पु किरणः॥ पक्ष्म॥ प्रग

रज्जुः । इति मेदिनी ॥ सूर्य्यस्य
रश्मिना जलदानदाने यथा ।
तेजोभिः सर्व्वलोकेभ्य आदत्ते
रश्मिभिर्जलं । समुद्राद्वायुसं
योगाद्वहन्त्यापो गभस्तयः । त
तस्तु पयसा काले परिवर्त्ते दिवा
करः । नियच्छत्यपो मेघेभ्यः शुक्ला
शुक्लैस्तु रश्मिभिः । इति मात्स्ये
१०२ अध्यायः ॥ अपि च । एव मे
ष महादेवो देवदेवः पितामहः ।
हः । करोति नियतं कालं का
लात्मा ह्यैश्वरी तनुः । तस्य ये र
श्मयो विप्राः सर्व्वलोकप्रदीपकाः
तेषां श्रेष्ठाः पुनः सप्त रश्मयो
ग्रहयोनयः ॥ सुषुम्नो हरिके
शश्च विश्वकर्म्मा तथैव च । विश्व
व्यचाः पुनश्चान्यः संपद्वसुरतः
परः ॥ अर्व्वावसुरिति ख्यातः स्वरा
डन्यः प्रकीर्त्तितः ॥ सुषुम्नः सूर्य्य
रश्मिस्तु पुष्णाति शिशिरद्युतिं ।
तिर्य्यगूर्द्ध्वप्रचारोऽसौ सुषुम्नः प
रिपठ्यते । हरिकेशस्तु यः प्रोक्तो
रश्मिर्नक्षत्रपोषकः ॥ विश्वक
र्म्मा तथा रश्मिर्बुधं पुष्णाति सर्व्व
दा । विश्वव्यचास्तु यो रश्मिः शुक्रं पु
ष्णाति नित्यदा । संपद्वसुरिति ख्यातः
स पुष्णाति च लोहितं ॥ वृहस्प
तिं प्रपुष्णाति रश्मिरर्व्वावसुः प्र
भोः । शनैश्चरं प्रपुष्णाति
सप्तमस्तु सुराट् तथा । एवं सूर्य्य
प्रभावेन सर्व्वा नक्षत्रतारकाः । व
र्द्धन्ते वर्द्धिता नित्यं नित्यमाप्याय
यन्ति च । दिव्यानां पार्थिवानाञ्च
नैशानाञ्चैव सर्व्वशः । आदानान्नि
त्यमादित्यस्तेजसां तमसां प्रभुः ।
आदत्ते स तु नाडीनां सहस्रेण
समन्ततः । नादेयांश्चैव सामुद्रान्
कूप्यांश्चैव सहस्रकं स्थावरान्
जङ्गमांश्चैव यच्च कुल्यादिकं प
यः । तस्य रश्मिसहस्रन्तु शीतव
र्षोष्णनिस्रवं । तासां चतुःशतं ना
ड्यो वर्षन्ते चित्रमूर्त्तयः । वन्दनाश्च
वन्याश्चैव केतना भूतनास्त
था । अमृता नामतः सर्व्वा रश्मयो
वृष्टिसर्ज्जनाः । हिमोद्वहाश्च नाम
स्ता रश्मयस्त्रिशतं पुनः । रेश्या
मेध्याश्च पैष्याश्च ह्रादिन्यो हिमस
र्ज्जनाः । चन्द्रास्ता नामतः सर्व्वाः
पीताभाः स्युर्गभस्तयः । शुक्लाश्च
ककुभश्चैव गावो विश्वभृतस्तथा ।
शुक्लास्ता नामतः सर्व्वास्त्रिविधा घ
र्म्मसर्ज्जनाः ॥ समं बिभर्त्ति ताभिः
स मनुष्यपितृदेवताः । मनुष्या
नौषधेनेह स्वधया च पितॄनपि ॥

3865

अमृतेन सुरान् सर्व्वान् तिसृभिस्त्री
स्तर्पयत्यसौ । वसन्ते ग्रीष्मके चैव
शतैः संतपति त्रिभिः । शरद्यपि
च वर्षासु चतुर्भिः संप्रवर्षति । हेम
न्ते शिशिरे चैव हिममुत्सृजति त्रि
भिः ॥ वरुणो माघमासे तु सूर्य्यः
पूषा तु फाल्गुने । चैत्रे मासि भ
वेदीशो धाता वैशाखतापनः ॥
ज्यैष्ठमूले भवेदिन्द्र आषाढे स
विता रविः । विवस्वान् श्रावणे मा
सि प्रोष्ठपद्यां भगः स्मृतः । पर्ज्ज
न्योऽश्वयुजि त्वष्टा कार्त्तिके मासि
भास्करः । मार्गशीर्षे भवेन्मित्रः पौ
षे विष्णुः सनातनः । पञ्च रश्मिस
हस्राणि वरुणस्यार्ककर्म्मणि । ष
ड्भिः सहस्रैः पूषा तु देवेशः सप्त
भिस्तथा । धाताष्टभिः सहस्रैस्तु
नवभिस्तु शतक्रतुः । विवस्वान् द
शभिः पाति पात्येकादशभिर्भगः ।
सप्तभिस्तपते मित्रस्त्वष्टा चैवाष्ट
भिस्तपेत् । अर्य्यमा दशभिः पाति
पर्ज्जन्यो नवभिस्तपेत् । षड्भी र
श्मिसहस्रैस्तु विष्णुस्तपति विश्व
धृक् । वसन्ते कपिलः सूर्य्यो ग्रीष्मे
काञ्चनसप्रभः । श्वेतो वर्षासु वर्णेन
पाण्डुरः शरदि प्रभुः । हेमन्ते ताम्र
वर्णः स्यात् शिशिरे लोहितो रविः ।
ओषधीषु बलं धत्ते स्वधामपि पि
तृष्वथ । सूर्य्योऽमरत्वममृतं त्रय
त्रिषु नियच्छति ॥ अन्ये चाष्टौ ग्रहाः
ज्ञेयाः सूर्य्येणाधिष्ठिता द्विजाः ।
चन्द्रमाः सोमपुत्रश्च शुक्रश्चैव बृ
हस्पतिः ॥ भौमो मन्दस्तथा
राहुः केतुमानपि चाष्टमः । सर्व्वे
ध्रुवे निबद्धा ग्रहास्ते वातरश्मि
भिः । भ्राम्यमाणा यथा योगं भ्रमन्त्य
नुदिवाकरं । इति कौर्म्मे ४१
अध्यायः ॥

रश्मिपतिः, पुं आदिपत्रवृक्षः ।
इति राजनिर्घण्टः ॥

रस शब्दे । इति कविकल्पद्रुमः ।
रसति । इति दुर्गादासः ॥

रस न क आस्वादे । स्नेहे । इति
कविकल्पद्रुमः । दन्त्योपधः । रस
यति मधु द्विरेफः । इति दुर्गादासः ॥

रसं, क्ली, बोलं । इति राजनिर्घण्टः ॥

रसः, पुं, रसनेन्द्रियग्राह्यवस्तु । स
च कालस्वभावभूमिविषदनिला
नलसंसर्गात्परिणामान्तरः षड्
षट्प्रकारो भवति । तत्र पृथिव्यम्बु
गुणबाहुल्यान्मधुरः १ तोयाग्निगु
णबाहुल्यादम्लः २ पृथिव्यग्निगुण
बाहुल्याल्लवणः ३ वाय्वग्निगुणबा
हुल्यात् कटुकः ४ वाय्वाकाशगुण

वाकफात् तिक्तः ५ पृथिव्यनिलगु
ण बाहुल्यात् कषायः ६। आपो र
सानामाधारकारणं अत आप्या
नाम। अपां पृथिव्यामनुप्रवेशात्
पृथिव्यप्याधारकारणमेव। तेन
जल क्षिती अपि तदाधारतया र
सानामभिव्यक्तौ कारणे। अभि
व्यक्तेषु मधुरादिरूप संनरेणासं
भवात् मधुरादि विशेषेपि जल
क्षितीकरणं। अग्न्यादयस्तु त्रयः
नीरसतया मधुरादि विशेष प्राधा
न्येन निमित्तकारणं। तद्व्यतिरेके
णाम्लादि रसाभावात्। रसाभि
व्यक्तेषु अग्न्यादि भूत त्रयस्त्रि
तं विनानुपलब्धे रभिव्यक्तावपि
अग्न्यादीनां कारणत्वं। तदुक्तं चर
के। रसनार्थो रसस्तस्य द्रव्यमापः
क्षितिस्तथा। निर्वृत्तौ च विशेषे च
प्रत्ययाः खादयस्त्रयः एते च रसाः
परस्परसंयोगात् सप्त पंचाशद्
भेदाः। इति चक्रपाणिदत्तकृतद्र
व्यगुणसंग्रहशिवदासीयटीका।
न्यायमते तु। रसस्तु रसनाग्राह्यो
मधुरादिरनेकधा सहकारी रस
ज्ञायाम् नित्यत्वादि च पूर्ववत्। इति
भाषापरिच्छेदः। रसस्त्विति सह
कारीति रसनत्वेन रसकारणमि

त्यर्थः। पूर्ववदिति जलपरमाणो
रसो नित्यः अन्यः सर्वोपि रसोऽ
नित्य इत्यर्थः। इति सिद्धान्तमु
क्तावली॥ शारीरस्य धातुविशे
षः। तत्पर्यायः। रसिका २ स्वे
दमाता ३ वपुःस्रवः ४ चर्मासः ५
चर्मसारः ६ रक्तसारः ७ प्रस्तमा
त्रिका ८ इति राजनिर्घण्टः। आहार
संभवः ९ तेजःसंभवः १० अग्निसंभ
वः ११ षड्रसासवः १२ आप्येयः १३ अ
सक्करः १४ धातवनः १५ मूलमहाप
रः इति हेमचन्द्रः। तस्य निरुक्तिः
यत्पाथो रसधातुर्यस्ततोऽभव
दयं रसः। सदैव सकले देहे रस
नीति रसः स्मृतः। तस्य स्वरूपमा
ह। सम्यक्पक्वस्य भुक्तस्य सारो
निगदितो रसः। स तु द्रवः सितः
शीतः स्वादुः स्निग्धश्चलो भवेत्
सारः। यथा गुड मधुक पुष्प कर्क
ल्लव वदरीमूलादिभवः सासोम
दिरा। तस्य स्थानमाह। सर्वदेह
चरस्यापि रसस्य हृदयं स्थलं।
समानमरुता सर्वं यदयं हृदये धृतः
तस्य कर्माण्याह। आरुह्य धमनी
र्गत्वा धातून् सर्वान्नयेद्रसः। तुष्टि
ति नदनुहीयं प्रीतिं च तत्तु गुणैः
गुणैः प्रीतिं स्निग्धं पोषकत्वे मेद

वन्हि विदग्धस्तु कटुर्वीलोमवेद्ग
सः। सकुर्याद्धकल्मान्रोगान् विष
कृत्वं करोत्यपि॥ इति भावप्रकाशः
शृङ्गारादिदशविधस्थायीभावः
शृङ्गारादयोऽष्टौ रसशब्द वाच्याः
रस्यन्ते आस्वाद्यन्ते रसाः रसत्
कवास्वादे चुरा। तथाहि। वि
भावैरनुभावैश्च व्यक्तो वा व्य
भिचारिभिः। आस्वाद्यत्वात् प्रधा
नत्वात् स्थायीभावो रसोभवेदि।
ति। रत्युत्साह शोक विस्मय
हासभय जुगुप्सा क्रोधाः क्रमा
देते स्युः स्थायिनः। यदुक्तं रतिर्हास
श्च शोकश्च क्रोधोत्साहौ भयं तथा
जुगुप्सा विस्मयश्चेति स्थायिभावाः
क्रमादमी। समयेषु समुद्भूतः
स्थानेयश्चावतिष्ठते। भावः स्थायी
स विज्ञेयो व्यभिचारी ततोऽन्यथा।
निर्वेद ग्लानि शंकाद्या व्यभिचारि
णईरिताः। इति। स्थायिनः कार
ण विभावः स चालंबनोद्दीपनत्वेन
द्विविधः। यथा रते रवलंबनका
रणं पुंसोयुवतीयुवत्याश्च पुमान्
उद्दीपनकारणं स्रक्चन्दनादि।
एवं सर्वत्रोह्यं। रतिप्रेमात्मको
भावः स च युवभिरुत्पादितः शृ
गारः। यदाह। पुंसः स्त्रियां स्त्रियाः

पुंसि संयोगं प्रति या स्पृहा।
स शृङ्गार इति ख्यातो रतिक्रीडा
दिकारणमिति। दानधर्मयुद्धे
षु जीवानपेक्षोत्साहकारी रसो
वीरः। शोकस्थायिभावः करुणः।
असंभावितमर्त्यान्तरीक्षगमनादि
जोऽद्भुतः कौतुकोद्भवो हासः।
क्रुध्यद्दान्तसादि भयजन्यो भया
नकः। घृणाकर पूयरसादिजो
वीभत्सः। सर्वाभिभाविता रौद्रः
यथा रावणचरितादि। शान्तोऽपि
रसोऽस्ति। शृङ्गारवीरवीभत्साद्भुत
रौद्रहास्यभयानकाः करुण
शान्तौ नाम्ना नव नाट्यरसाः स्मृताः
इति रत्नकोषः॥ एवं वत्सलो
ऽपि रसोऽस्ति। शृङ्गार वीर क
रुणाद्भुत हास्य भयानकाः। वीभ
त्स रौद्रौ वात्सल्य शान्तश्चेति
रसा दश॥ इति नामनिधानं। व
त्सलः पुत्रादि स्नेहात् स्वारनिमे
दएव। शान्तस्त्वलौकिकत्वान्नो
क्तः इति मुकुटः। दशत्वात् शान्तवत्
सलावपि संगृहीताविति केचित्।
इत्यमरटीकायां भरतः। अपि च नव
शृङ्गारादि सर्व रसकं स्वमूर्त्तिभिर्भगवा
न् नवदभिप्रायानुसारेण वभोनसा
कल्पेन सर्वेषामित्याह मल्लानामिति

महादीनां दर्शनोद्भूतं प्रशान्ता
दिरूपेण दर्शिता विदितः सन्नसाध
जोऽरोगं गत इत्यन्वयः। महादिषु
अभिव्यक्ता रसाः क्रमेण श्लोकेन
निबध्यन्ते। रौद्रोऽद्भुतश्च शृङ्गारो
हास्यवीरौ दया तथा। भयानक
श्च बीभत्सः शान्तः स प्रेमभक्ति
कः। अविदुषां विराट् विकलः
अपर्य्याप्तोऽजड इति यावत्। अन्ये
नवीभत्स उक्तः। विकलत्वञ्च
क्षवच्च सार सर्वाङ्गविन्यादिना व
दाति। इति श्रीमद्भागवते १० स्क
न्धे ४३ अध्याय १७ श्लोकटीकायां
श्रीधरस्वामी ॥ विषं ॥ वी
र्य्यं ॥ गुणः ॥ रागः ॥ द्रवः।
इत्यमरः। गन्धरसः ॥ जलं ॥ पा
रदः। इति मेदिनी ॥

रसकः पुं निश्वाथमांसः। इति
हेमचन्द्रः ॥

रसकर्पूरं क्ली कर्पूररसः। रस
कापूर इति भाषा। यथा। तत्रपा
रदस्य संक्षिप्तं शोधनं कर्त्तव्य
मुद्रसत समं कुर्य्यात् प्रत्येकं गै
रिकं सुधीः। इष्टिकां [illegible]
कां तद्वत् स्फटिकां सिन्धुजन्म च
वल्मीकक्षारलवणं भाण्डरञ्ज
कमृत्तिकां। सर्वाण्येतानि संचूर्ण्य
वाससा चापि शोधयेत् ॥ खटि
का खड़ी। स्फटिका फिटकरी सिं
धुजन्म सैन्धवं। वल्मीकं तन्नाम
तू। वल्मीक बरउर। क्षारलवणं
खारीलवण। भाण्डरञ्जकमृत्तिका
काविस माटी। यन्मि स्थाल्यां पुन
स्तत् यावद्याम विमर्द्दितं। तच्चूर्णं
सहितं सूतं स्थालीमध्ये परिक्षिपे
त् ॥ तस्याः स्थाल्या मुखे स्थाली
मपरां धारयेत् समां। सवस्त्र कटि
त मृदा मुद्रयेदुभयो र्मुखं ॥
संशोष्य मुद्रयेद्भूयो भूयः संशो
ष्य मुद्रयेत्। सम्यग्विशोष्य मुद्रां
तां स्थालीं चुल्ल्यां विधारयेत् ॥ अग्निं
निरन्तरं दद्याद्दिन चतुष्टयं। अ
गाधोपरि तद्यन्त्रं रक्षेद्यत्नादहर्निशं
शान्ते रुद्धा रयेद्यन्त्रमूर्द्धस्थालीगतं
रसं। कर्पूरं वत्सविमलं शु
भ्रीयाद्गुणादनं ॥ तदेव कु
ङ्कुम चन्दन कस्तूरी कुङ्कुमे युक्तं।
खादन्नहरति फिरङ्गं व्याधिं सोप
द्रवं सपदि ॥ छिदति वक्र दीप्तिं
पुष्टिं वीर्य्यं बलं विपुलं। इमम
ति रमणीशतकं रसकर्पूरस्य से
वकः सततं। इति भावप्रकाशः
अपि च। गेरिक तवरी खटिका
सैन्धव मडमे रजं ऊडवं ॥

3869

प्रत्येकं टङ्कद्वयमात्रं धायायस्योपरि
शान्ते स्थाप्यः ॥ कुरव सितोपलन
दुई देया हणौ तदास्य पातं भ
खी। अथ तत् संधेर्मुद्रां कृत्वा
तदयोकृतासनो ज्वालः अग्नि
णाषट्कमितैर्हीरुभिरतु ना
तिदृढलस्थूलैः। अग्निंक्रमेणाद
द्यान्न दर्पितवर्त्तिनाद्दिनिशं ॥
तदनु ततो यन्त्रवराद्गुह्याकर्पूर
सन्निभं सूतं। आदाय काचकुम्भे नि
धायनवसादरं दद्यात् समर्थे चा
काष्ठैः कर्म्मणि संमितैः पचेतद्व
स्त्र चुल्लीऽश्मकल्कमध्ये वितस्ति च
तरांगुलावकाशान्तु। कल्कं क्रम
दहनं तदधः प्रज्वालयेन्मध्ये शा
खिथवलमुपरि लग्नं गुल्मासंसु
ध्यारक्षेद्यत्नात् वलवत् ह्वेवाश
ऽनजीर्णेनरोगिणे दद्यात्। इत्यधार
नेनु पथ्यं देयं तस्मै चनाबुलं। हर
ति मम स्त्ररोगं कर्पूराख्यो रसोऽन्द्र
णां फिरङ्गकरिकेशरी सकलकु
ष्ठदावानलोः श्लिष्टव्रणविनाशक
त्व्रणजगार्त्त पूर्णिमदः। सर्वेणास
मवर्णकृतवलकृत्तापनेमस्करः स
मस्तगदतस्करो रसपतिः सकर्पूर
कः। ग्रंथान्तरे। टंकणं मधुलाक्षाच
ऊर्णागुंजाद्युतो रसः। मर्द्दयेत्प्रभं
जड्डैव दिनैकं ध्मापयेत् पुनः ॥
ध्मातो भस्मत्वमाप्नोति शुद्धकर्पू
र सन्निभः ॥ नवसादरं पारदाच्च
तुर्थांशमिति संकेतः। गउज स्था
म्भरिलोन भाषा। शेषं स्पष्टं।
इत्यायुर्वेदप्रकाशः ॥

रसकेशरं क्ली कर्पूरं। इतिहा
रावली ॥

रसगन्धं क्ली बोलं। इति राज
निर्घण्टः ॥

रसगन्धः पुं गन्धरसः यथा रस
गन्धो गन्धरसो गन्धारं मस्तिवर्द्ध
नं। इति त्रिकाण्डशेषः ॥

रसगन्धकः पुं गन्धरसः। इति
शब्दचन्द्रिका ॥ गन्धकः। इति रा
जनिर्घण्टः ॥

रसगर्भं क्ली रसाञ्जनं। इत्यमरः
हिङ्गुलं। इति राजनिर्घण्टः ॥

रसघ्नः पुं टंकणः। इति राज
निर्घण्टः ॥

रसजं क्ली रक्तं। इति शब्दचन्द्रिका

रसजः पुं गुडः। इति राजनिर्घण्टः
मद्यकीटः। इति हेमचन्द्रः ॥

रसज्ञा स्त्री जिह्वा। इत्यमरः ॥
[illegible] ॥

रसज्येष्ठः पुं मधुरसः। इति
हेमचन्द्रः ॥ शृङ्गाररसश्च ॥

रसतेजः क्ली रक्तं। इति हेमचंद्रः॥

रसदालिका स्त्री पुंड्रकेक्षुः इति राजनिर्घण्टः॥

रसद्रावी न पुं मधुरजंबीरः इति राजनिर्घण्टः॥

रसधातुः पुं पारदः। इति राजनिर्घण्टः॥

रसधेनुः स्त्री दानार्थंकल्पितरसनिर्मितधेनुः। यथा। होतोवाच। रसधेनुं महाराज कथयामि समासतः। अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तरे। रसस्य तु घटं राजन् संपूर्णमैक्षवस्य च। तद्वत् संकल्पयेत् प्राज्ञस्तथाप्येन वत्सकं इक्षुदण्डमयाः पादा रजतस्य खुराः। सुवर्णशृङ्गाभरणां वस्त्रपुच्छां कृतस्तनीं॥ शुक्लकंबलसंयुक्तां शर्करामुखजिह्विकां। दंताः फलमयास्तस्याः पृष्ठं ताम्रमयी शुभा। पुष्पलोमां तु राजेंद्र मुक्ताफलकृतेक्षणां। सप्तव्रीहि समायुक्तां चतुर्दिक्षु च दीपिकां॥ सर्वोपस्कर संयुक्तां सर्वगंधादि वासितां। चत्वारि तिलपात्राणि चतुर्दिक्षु निवेशयेत्॥ ब्राह्मणे वेदविदुषे श्रोत्रियायाहिताग्नये॥ पुराणोक्ते विशेषेण साधुव्रताय धीमते॥ तादृशाय प्रदातव्या रसधेनुः कुटुम्बिने सर्वलक्षणयुक्ताय श्रोत्रियाय कुटुम्बिने॥ रसधेनुः प्रदातव्या सर्वकामेन नित्यदा। दाता स्वर्गमवाप्नोति सर्वपातकवर्जितः दाता च यादृको वाप्युपकल्पमभोजनः सोमपानफलं तस्य सर्वक्रतुफलं लभेत्। दीयमानां तु पश्यंति ते यांति परमां गतिं धेनुं च पूजयित्वाग्रे गंधपुष्पाक्षतादिभिः पूर्वोक्तेनैव मंत्रेण तस्याः प्रार्थयेत् सुधीः। प्रार्थना पूर्वकं भक्त्या द्विजाग्र्याय निवेदयेत्। एषा पूर्वा न परा श्च ब्राह्मणानैकविंशकं। प्राप्नोति परमं स्थानं स्वर्गात्रावर्तते पुनः एषा ते कथिता राजन् रसधेनुरनुत्तमा। इदं च महाराज परं स्थानमवाप्नुहि॥ य इदं पठते नित्यं शृणुयाद्वा भक्तितः सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥ इत्यादि वाराहपुराणे श्वेतोपाख्याने रसधेनुमाहात्म्यं समाप्तं॥

रसनं क्ली स्वादनं॥ ध्वनिः। इति मेदिनी॥

रसनं क्ली स्त्री जिह्वा। इति मेदिनी साच जलेंद्रियं। यथा। नित्यतादि प्रथमवत् किंतु देहमयोनिजं। इंद्रियं रसनं सिंधुहिमादिर्विषयो मतः॥ इति भाषापरिच्छेदः। प्रथमवदिति पृथिव्या इवेत्यर्थः तथाहि जलं द्विविधं नित्यमनित्यं च। परमाणुरूपं नित्यं द्व्यणुकादिकं सर्वमनित्यं। अवयवसमवेतं चानित्यं जलमपि त्रिविधं। शरीरेंद्रियविषयभेदात्। किंतु पृथिवीतोययोः शरीरे विशेषस्तमाह किंत्विति। अयोनिजमेवेत्यर्थः। जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्धमिति इंद्रियं रसनं जलीयं। तथाहि रसनं जलीयं गंधाद्यव्यंजकत्वे सति रसव्यंजकत्वात्। शक्तुरसाभिव्यंजकोदकवत्। रसनासन्निकर्षव्यभिचारवारणाय द्रव्यत्वहेतौ देयं विषयं दर्शयति सिंधुर्हिमादि रिति। सिंधुः समुद्रः हिमं तुषारः। आदिना सरित्तडाग करकादिः सर्वो ग्राह्यः। इति सिद्धांतमुक्तावली॥

रसना स्त्री जिह्वा। इत्यमरः तस्याः शुभलक्षणं यथा। तीक्ष्णादष्टा समाश्लक्ष्णा जिह्वा रक्ता समा शुभा स्वल्पा दीर्घा च विज्ञेया तालुः श्वेतो धनक्षये॥ इति गारुडे ६६ अध्यायः॥ न्यायमते रसनेंद्रियग्राह्यो रसो रसत्वादि सहितः। यथा। रसस्तु रसनाग्राह्यो मधुरादिरनेकधा। सहकारी रसज्ञाया नित्यतादि च पूर्ववत्॥ घ्राणग्राह्यो भवेद्गंधो गंधत्वादिरपि स्मृतः तथा रसो रसज्ञाया स्तथा शब्दोपि च श्रुतेः॥ इति भाषापरिच्छेदः॥ तथा रस इति रसत्वादिसहित इत्यर्थः। इति सिद्धांतमुक्तावली॥ रास्ना। इति मेदिनी॥ गंधभद्रा। इति शब्दचंद्रिका॥ कांची। इति हेमचंद्रः॥ रज्जुः। इति संक्षिप्तसारोणादिवृत्तिः॥

रसनाथः पुं पारदः। इति राजनिर्घण्टः॥

रसनायकः पुं शिवः। इति शब्दरत्नावली॥

रसनालिट् पुं कुक्कुरः। इति हेमचंद्रः। रसनया लेहनकर्मेति त्रि॥

रसनेत्रिका स्त्री मनःशिला। इति हेमचंद्रः॥

रसपाकजः पुं गुडः। इति राजनिर्घण्टः॥

रसफलः पुं नारिकेलवृक्षः । इ
ति शब्दरत्नावली ॥
रसभवं क्ली रक्तं । इति राजनिर्घ
ण्टः ॥ रसमञ्जरी स्त्री नायकनायिका
भेदकग्रन्थविशेषः । यथा । विश्व
जनमनोभृंग रसव्यासंगहेतवे
एषा प्रकाश्यते श्रीमद्भानुना रस
मंजरी । इति तस्य द्वितीयश्लोकः ॥
रसमर्द्दनं क्ली पारदचूर्णीकरणं
यथा । इष्टिकाचूर्णचूर्णाभ्यां मा
दौ मर्द्यो रसस्ततः । दध्ना गुडेन
सिंधूत्थराजिका गृहधूमकैः
अन्यच्च । कुमारिका चित्रक रक्त
सर्षपैः कृतैः कषायैर्बृहती वि
मिश्रितैः । फलत्रिकेणापि विमर्दि
तो रसो दिनत्रयं सर्वमलैर्विमु
च्यते ॥ इति भावप्रकाशः ॥
रसमारणं क्ली पारदस्य मारणं ।
यथा । धूमसारं रसं तोरिं गंधकं
नवसादरं । यामैकं मर्दयेदम्लै
र्भागं कृत्वा समंसमं ॥ काचकू
प्यां विनिःक्षिप्य तां च मृद्वस्त्रमृद्
या विलिप्य परितो वक्त्रे मुद्रां दत्वा
विशोषयेत् ॥ अधः सच्छिद्रपि
ठरी मध्ये कूपीं निवेशयेत् । पि
ठरी वालुकापूरैर्भृत्वा वा कूपिका
गलं निवेश्य चुल्यां तदधो

वह्निं कुर्याच्छनैः शनैः । तस्माद
प्यधिकं किंचित् पावकं ज्वालयेत्
क्रमात् । एवं द्वादशभिर्यामैर्म्रियं
ते रसउत्तमः । स्फोटयेत् स्वांगशी
ते तमूर्द्धगं गंधकं त्यजेत् ॥ अध
स्थं च मृतं सूतं गृह्णीयात् तं त
मात्रया यथोचितानुपानेन स
र्वकर्मसु योजयेत् ॥ इति भाव
प्रकाशः ॥
रसमूर्च्छनं क्ली पारदस्य मूर्च्छीक
रणं । यथा । ऊषणं त्रिफलावंध्या
कंदैः लड्डयान्वितैः चित्रकोर्णि
निकाताः कन्याकनकद्रवैः । ह
तं कृतेन यूषेण वासरान् समाभिम
र्द्दयेत् । इत्थं संमूर्च्छितः सूतस्त्यजे
त् सप्तापि कंचुकान् ॥ इति भा
वप्रकाशः ॥
रसराजः पुं पारदः । रसांजनं ।
इति राजनिर्घण्टः ॥
रसवती स्त्री महानसं । इत्यमरः
रसविशिष्टे त्रि ॥
रसमयः त्रि रसस्वरूपः । रसात्म
कः । रसशब्दात् मयट् प्रत्ययेन
निष्पन्नः । रसलेहः पुं पारदः । इ
ति राजनिर्घण्टः ॥
रसशोधनं क्ली टंकणः । इति हे
मचन्द्रः ॥ पारदस्य शुद्धिः । यथा । कुमा

रिका चित्रक रक्तसर्षपैः कृतैः
कषायैर्बृहती विमिश्रितैः । फल
त्रिकेणापि विमर्दितो रसो दिन
त्रयं सर्वमलैर्विमुच्यते ॥ एवंक
दर्थितः सूतः षंढो भवति निश्चि
तं । वह्न्योषधी कषायेण स्वेदि
तः सबली भवेत् ॥ सर्पाक्षीचि
ञ्चिकावंध्या भृंगारैः स्वेदितो व
ली । ततः सपावककद्रावैः स्वि
न्नः स्याद्दीप्तिमान् ॥ इति भाव
प्रकाशः ॥
रससिंदूरं क्ली औषधविशेषः
तस्य नामान्तरं सिंदूररसः । यथा
शुद्धसूतस्य गृह्णीयाद्विषभाग
चतुष्टयं । शुद्धगंधस्य भागैकं ता
वत् कृत्रिमगंधकं ॥ अथवा पा
रदस्यार्द्धं शुद्धगंधकमेव हि ।
तयोः कज्जलिकां कुर्याद्दिनमेकं
विवर्जयेत् ॥ मृत्तिकां वाससा सा
र्द्धं कुट्टयेदतियत्नतः । तया वा
रत्रयं सम्यक् काचकूपीं प्रले
पयेत् । मृत्तिकां शोषयित्वा तु ।
कूप्यां कज्जलिकां क्षिपेत् । तां
कूपीं वालुकायन्त्रे स्थापयित्वा व
ह्निं पचेत् । अग्निं निरंतरं दद्या
द्यावद्दिनचतुष्टयं । गृह्णीयादू
र्द्धसंलग्नं सिंदूरसदृशं रसं ॥

इति भावप्रकाशः ॥
रसस्थानं क्ली हिंगुलं । इति शब्द
चन्द्रिका ॥ शरीरस्य रसस्थलं च ।
तस्य प्रमाणं रसशब्दे द्रष्टव्यं ॥ रसा
स्त्री पृथिवी । इत्यमरः ॥ रसना ॥
पाठा ॥ शल्लकी ॥ कंगुः । इति
मेदिनी ॥ द्राक्षा ॥ काकोली । इति
शब्दरत्नावली ॥
रसाखनः पुं कुक्कुटः । इति श
ब्दचन्द्रिका ॥
रसाग्रजं क्ली रसांजनं । इति रा
जनिर्घण्टः ॥
रसांजनं क्ली रसजातांजनविशे
षः । रसवत् इति भाषा । तत्पर्य्यायः
रसगर्भं २ तार्क्ष्यशैलं ३ । इत्यम
रः ॥ रसोद्भूतं ४ रसाग्रजं ५ कृत
कं ६ बालभैषज्यं ७ दार्व्वीक्वाथो
द्भवं ८ रसराजः ९ वर्ष्याञ्जनं
१० रसनाभं ११ अग्निसारं १२ । अ
स्य गुणाः । हिमत्वं । तिक्तत्वं । च
क्षुष्यत्वं । मधुरत्वं । कटुत्वं । रक्त
पित्तविषच्छर्द्दिहिक्कापस्मारना
शित्वं च । रीत्यां तु ध्मायमानायां त
त् किट्टं तु रसांजनं । तदभावे तु क
र्षं च दार्व्वीक्वाथसमुद्भवं ॥ इति
राजनिर्घण्टः ॥ अपि च । दार्व्वीक्वा
थसमं क्षीरं पादं पक्त्वा यदा घनं ।

तदा रसाञ्जनाद्धे तेजेजयोः परमं
हितं ॥ रसाञ्जनं तार्क्ष्यशैलं रस
गर्भञ्च तार्क्ष्यजं । रसाञ्जनं कटु
श्लेष्म विष नेत्र विकारनुत् ॥
उष्णं रसायनं तिक्तं छेदनं व्र
णदोषहृत् । इति भावप्रकाशः
रसाढ्यः पुं आम्रातकः । इति
राजनिर्घण्टः ॥
रसातलं क्ली पातालं इत्यम
रः पातालभेदः । यथा । अतलं
वितलञ्चैव नितलञ्च तलातलं
महातलञ्च सुतलं सप्तमञ्च रसा
तलं । पातालभेदाः सप्तैव ना
मतः कीर्त्तिता अमी । तत्र पाता
लमेकैकं दशसाहस्र योजनं
इति शब्दमाला ॥
रसादानं क्ली शोषणं । इति हे
मचन्द्रः भूमिदानञ्च ॥
रसाधारः पुं सूर्य्यः । इति शब्द
रत्नावली ॥ रसस्याधारश्च ॥
रसाधिकः पुं टङ्कणः इति राज
निर्घण्टः । अधिकरसश्च ॥
रसाधिका स्त्री काकोलीद्राक्षा
इति राजनिर्घण्टः ॥
रसाभासः पुं अन्यौचित्यविशिष्ट
रसः । तस्य लक्षणं यथा । अनौ
चित्यप्रवृत्तत्वे आभासो रसभा

वयोः । अनौचित्यञ्चात्र रसानां भ
रतादिप्रणीतलक्षणानां सामग्री
रहितत्वे सत्येकदेशयोगित्वोप
लक्षणं परं बोध्यं । तच्च बालव्युत्
पत्तये एकदेशतो दर्शते । उपना
यकसंस्थायां मुनिगुरुपत्नीग
तायाञ्च । बहुनायकविषयायां रतौ
तथानुभयनिष्ठायां प्रतिनायकनि
ष्ठत्वे तद्वदधमपात्रतिर्य्यगादिगते
शृङ्गारे अनौचित्यं । रौद्रे गुर्वादिगत
कोपे । शान्ते च हीननिष्ठे गुर्वाद्यालं
बने हास्ये । ब्रह्मवधाद्युत्साहे ।
अधमपात्रगते तथा वीरे । उत्तम
पात्रगतत्वे भयानके ज्ञेयमेवम
न्यत्र । तत्र रतेरुपनायकनिष्ठत्वे
यथा मम । स्वामी मुग्धतरो वनञ्च
घनमिदं बालाहमेकाकिनी क्षोणी
मावृणुते तमालमलिनच्छाया तमः
संततिः । तन्मे सुन्दर मुञ्च कृष्ण सह
सा वर्त्मेति गोप्या गिरः श्रुत्वा तां परि
रभ्य मन्मथकलासक्तो हरिः पातु
वः । बहुनायकनिष्ठत्वे यथा । कान्ता
स्त एव भुवनत्रितयेपि मन्ये येषां
कृतेस्ति तनु पाण्डुरयं कपोलः ।
अनुभयनिष्ठत्वे यथा मालतीमा
धवे नन्दनस्य मालत्यां । पश्चादुभ
यनिष्ठत्वेपि प्रथममेकनिष्ठत्वे रते

राभासत्वमिति श्रीमल्लोचनकाराः
तत्रोदाहरणं यथा रत्नावल्यां ।
सागरिकाया अन्योन्य दर्शना
त् प्राक् वत्सराजे रतिः । प्रतिनाय
कनिष्ठत्वे यथा हयग्रीववधे ह
यग्रीवस्य जलक्रीडा वर्णने । अ
धमपात्रगतत्वे यथा । जघन ।
स्थलनद्धपत्रवल्ली गिरिमल्लीकु
सुमानि कापि भिल्ली । अवचित्य गि
रौ पुरो निषण्णा स्वकचानुत्कचयां
चकार भल्ली । तिर्य्यग्गतत्वे यथा । म
ल्लीमतल्लीषु वनान्तरेषु वल्ल्यन्तरे
वल्लभमाह्वयन्ती । पञ्चद्विपञ्ची
कलनादभङ्गी संगीतसंगीकृतने
स्मसंगी । आदिशब्दाद्गोपसादयः
रौद्राभासो यथा । रक्तोत्फुल्ल
विशाललोलनयनः कम्पोत्तरा
ङ्गो मुहुर्म्मुक्त्वा कर्णमपेतभीर्द्धृत
धनुर्वाणो हरेः पश्यतः । आध्मा
तः कटुकोक्तिभिः स्वमसकृद्दो
र्विक्रमं कीर्त्तयन्नास्फोटप्रटुद्युपि
स्थिरमसौ हन्तुं प्रविष्टोर्ज्जुनः ॥
भयानकाभासो यथा । अशक्नु
वन्सोढुमधीरलोचनः सहस्र
रश्मेरिव यस्य दर्शनं । प्रविश्य हे
मादिगुहागृहान्तरं निनाय बिभ्य
द्दिवसानि कौशिकः । स्त्रीनीच

विषयमेव हि भयं रस प्रकृतिः ।
एवमन्यत्र । इति साहित्यदर्पणे ३
परिच्छेदः ॥
रसाम्लं क्ली वृक्षाम्लं । इति राज
निर्घण्टः ॥ चुक्रं इति भावप्रकाशः रसाम्लः पुं अम्लवेतसः इति राजनिर्घण्टः
रसायकः पुं तृणविशेषः । इति
शब्दचन्द्रिका ॥
रसायनं क्ली कटिः । इति राज
निर्घण्टः । तक्रं । इति हेमचन्द्रः ॥
विषं । जराव्याधिनाशकौषधं ।
इति मेदिनी । तीक्ष्णेन विना कान्तं
न कान्तेन विना रसः । सूतकान्तस
मायोगात् रसायनमुदीरितं । इ
ति राजनिर्घण्टः । अथ रसायना
धिकारः । तत्र रसायनस्य लक्ष
णमाह । यज्जराव्याधिविध्वंसिव
यःस्तम्भकं तथा । चक्षुष्यं बृंहणं
वृष्यं भेषजं तद्रसायनं ॥ रसाय
नस्य फलमाह । दीर्घमायुः
स्मृतिं मेधामारोग्यं तरुणं व
यः । देहेन्द्रियबलं कान्तिं ।
नरो विन्देद्रसायनात् ॥ त
द्विधिमाह । पूर्व्वे वयसि म
ध्ये वा मनुष्यस्य रसायनं । प्र
युञ्जीत भिषक् प्राज्ञः स्नि
ग्धशुद्धतनोः सदा ॥ ना
विशुद्धशरीरस्य युक्तो रसा

यनो विधिः। न भाति वाससि
श्लिष्टे रंगयोग इवाहितः। अथ
तदुदाहरणानि। शीतोदकं प
यः क्षौद्रं घृतमेककशो द्विशः
त्रिशः समस्तमथवा प्राक् पी
तं स्थापयेद्वयः। मंडूकपर्ण्याः
स्वरसः प्रयोज्यः यष्टीमधु
कस्य चूर्णं। रसो गुडूच्यास्तु सम
लपुष्प्याः कल्कः प्रयोज्यः खल
शंखपुष्प्याः आयुःप्रदान्यामय
नाशनानि बलाग्नि वर्णस्वरव
र्द्धनानि मेध्यानि चैतानि रसाय
नानि मेध्या विशेषेण च शंखपुष्पी
मंडूकपर्णी ब्राह्मी। वरभी इति
लोके। तदलाभे मंजिष्ठापि ग्रा
ह्या। तस्या अपि रसायनत्वात्
मार्त्तिकेण तु गाढी घर्मापि प्प
ल्पा लवणेन च। त्रिफलासित
यावापि युक्ता सिद्धं रसायनं। सिं
धूत्थ शर्करा शुंठी कणा मधु गु
डैः क्रमात्। वर्षादिषु भया प्रा
श्या रसायनगुणैषिणा। पुन
र्नवस्यार्द्धपलं नवस्य पिष्टं पिबे
द्यः पयसार्द्धमासं मासद्वयं तत्त्रिगु
णं समां वा जीर्णोपि भूयः स पुन
र्नवः स्यात्। यमासमेकं स्वरसं पिबंति
दिने दिने भृंगरजः समुत्थं क्षीराशिन

स्तेबलवीर्य्ययुक्ताः समाः शतं जीवन
माप्नुवंति। शतावरी मुंडितिका गु
डूची सहस्तिकर्णा सहितालमूली
पलानि कृत्वा सम भाग युक्तान्या
ज्येन किंवा मधुनावलिह्यात् ज
राकृता मृत्युविमुक्तदेहो भवन्न
रो वीर्यबलादियुक्तः। विभाति दे
वप्रतिमः स नित्यं प्रभामयो भूरि
विशिष्टबुद्धिः। पीत्वाश्वगंधां पयसा
र्द्धमासं घृतेन तैलेन सुखांबुना वा
वीर्य्यस्य पुष्टिं वपुषो विधत्ते बाल
स्य शस्यस्य यथांबुवृष्टिः। अयःप
लं गुग्गुलुरत्र योज्यः पलत्रयं त्र्यो
षपलानि पंच। पलानि चाष्टौ त्रि
फलारजस्तु कर्षं लिहन्यात्यमर
त्वमेव॥ लोहगुग्गुलुः। न केवलं
दीर्घमिहायुरश्नुते रसायनं यो
विधिवन्निषेवते। गतिं स देव
र्षिनिषेवितां शुभां प्रपद्यते ब्रह्म
तथैव चाक्षयं। इति रसायनाधिका
रः। इति भावप्रकाशः॥

रसायनः पुं गरुडः॥ विडंगः।
इति मेदिनी॥

रसायनफला स्त्री हरीतकी। इ
ति काण्डशेषः॥

रसायनश्रेष्ठः पुं पारदः। इति
राजनिर्घण्टः॥

रसायनी स्त्री गुडूची॥ काकमाची।
महाकरंजः॥ गोरक्षदुग्धा॥ मां
सच्छदा। इति राजनिर्घण्टः॥

रसालं क्ली सिल्हकं॥ बोलं। इ
ति मेदिनी॥

रसालः पुं इक्षुः॥ आम्रः इत्य
मरः॥ पनसः। इति शब्दरत्ना
वली। कुंदुरुष्कं। गोधूमः। पौ
ण्ड्रकनामेक्षुः। इति राजनिर्घण्टः

रसालसा स्त्री नाडी। इति शब्द
चंद्रिका॥

रसाला स्त्री रसना॥ दूर्वा। वि
दारी। इति मेदिनी॥ द्राक्षा। इति
शब्दरत्नावली॥ शिखरिणी। त
त्पर्य्यायः। मार्जिता २ इत्यमरः
तस्याः करणप्रकारो यथा। आर्द्रो
माहिषमंबुरहितं दध्याढकं
शर्कराप्रस्थयुगान्वितां
चिपटे किंचिच्च किंचित् दिपे
त्। शुभ्रेनार्द्र घनेन मसृणमथ न
वस्यात् स्पा हिंगु सावधेलावी
जलवंगचंद्रमरिचैर्योगेष्वन
योजयेत्। भीमेन प्रियभोजने
न रचिता नाम्ना रसाला स्वयं।
श्रीकृष्णेन पुरा पुनः सुविधिया
ता समास्वादिता। यस्या येन वसं
तवर्जित दिने सेवा परं नित्यशः

स्तस्य स्यादतिवीर्य्यवृद्धिरनिशं
सर्वेंद्रियाणां बलं॥ ग्रीष्मे तथा
शारदि ये रविशोषितांगा ये च
प्रमत्तवनिता सुरतातिखिन्नाः।
ये चापि मार्गपरिसर्पणशीर्ण
गात्रास्तेषामियं वपुषि पोषण
माशु कुर्य्यात्॥ रसाला शुक्रला
बल्या रोचनी वातपित्तजित्।
दीपनी बृंहणी स्निग्धा मधुरा
शिशिरा सरा। रक्तपित्तक्षयोदा
हं प्रतिश्यायं विनाशयेत्। इति
राजनिर्घण्टः। अपि च। दध्नोर्द्धा
ढकमीषदम्लमधुरं खंडस्य चं
द्रद्युतेः प्रस्थं क्षौद्रपलेन पंचह
विषः शुंठ्याः शुक्लमाषकान्। प
लाभ्यां च चतुष्टयं मरिचतः कर्ष
लवंगं तथा शुभ्रांशुक्ले परेशनैः
करतलेनोन्मथ्य विस्रावयेत्।
मृद्भांडे मृगनाभिचंदनरसस्पृष्टे
गुरुधूपिते कर्पूरेण सुवासिते नत्र
खिलं संलोड्य संस्थापयेत्। स्व
स्वार्थे मधुरेश्वरेण रचिता ह्येषा
रसाला स्वयं भोक्तुर्मन्मथदीपनी
सुखकरी कांतेव नित्यं प्रिया॥
इति भावप्रकाशः॥

रसालिहा स्त्री शोणिनाला। चाक
लिया इति भाषा इति शब्दचंद्रिका॥

रसाली स्त्री गुडूकेक्षुः। इति
राजनिर्घण्टः॥
रसाभ्यासा स्त्री पलाशीलता
इति राजनिर्घण्टः॥
रसास्वादी न पुं भ्रमरः। इति श
ब्दमाला। रसास्वादविशिष्टे त्रि
रसाह्वः पुं सरलद्रवः इति
रत्नमाला॥
रसिकः पुं सारसपक्षी। इति
राजनिर्घण्टः। तुरंगः। हस्ती
इति सारस्वतः। सरसे त्रि। इ
ति मेदिनी॥
रसिका स्त्री रसाला॥ इक्षुरसः
इति मेदिनी॥ कांची॥ रसना।
इति विश्वः॥
रसिकेश्वरः पुं श्रीकृष्णः। यथा
वृन्दावने नित्यरसे रासोल्लासवस
श्रीकं। रासमंडलमध्यस्थं
नमामि रसिकेश्वरं। इति ब्रह्मवैव
र्त्ते गणपतिखंडे ४४ अध्यायः॥
रसितं क्ली मेघनिर्घोषः। इत्य
मरः। कृतं। स्वर्णादिलिप्ते त्रि।
इति मेदिनी॥
रसोनः पुं लशुनः। इति शब्द
चन्द्रिका॥
रसेन्द्रः पुं पारदः। इति राज
निर्घण्टः॥

रसोत्तमः पुं मुद्गः। इति राजनि
र्घण्टः। श्रेष्ठरसश्च॥
रसोद्भवं क्ली हिंगुलं। इति राज
निर्घण्टः॥ रसजाते त्रि॥
रसोनः पुं रसुनः। इति राज
निर्घण्टः॥
रसोनकः पुं रसुनः तत्पर्य्यायः
लशुनस्तु रसोनः स्यादुग्रगंधो
महौषधं। अरिष्टो म्लेच्छकन्दश्च
यवनेष्टो रसोनकः। तस्योत्प
त्तिर्यथा। यदामृतं वैनतेयो जा
हार सुरसत्तमात्। तदा ततो
ऽपतद्बिन्दुः स रसोनो ऽभवद्भु
वि। पंचभिश्च रसैर्युक्तो रस
नाम्लेन वर्ज्जितः। तस्माद्रसो
न इत्युक्तो द्रव्याणां गुणवेदिभिः
अस्यावयवगुणाः। कटुकश्चापि
मूलेषु तिक्तः पत्रेषु संस्थितः।
नाले कषाय उद्दिष्टो नालाग्रे ल
वणः स्मृतः बीजे तु मधुरः प्रोक्तो
रसस्तद्गुणवेदिभिः अस्य अन्य
गुणाः। रसोनो बृंहणो वृष्यः
स्निग्धोष्णः पाचनः सरः। रसे पा
के च कटुकस्तीक्ष्णो मधुरको मतः
भग्नसंधानकृत् कण्ठो गुरुः पि
त्तास्रवृद्धिदः। बल वर्ण करो
मेधाहितो नेत्र्यो रसायनः॥

हृद्रोग जीर्णज्वर कुक्षिशूल विबं
धगुल्मारुचि कास शोफान् दुर्णा
मकुष्ठानलसादजंतु समीरणा
श्वासकफांश्च हन्ति॥ मद्यं मांसंत
थाम्लंच हितं लशुन सेविनां व्या
यामातपं रोषमतिनीर पयो
गुडं॥ रसोनमश्नन् पुरुषस्त्य
जेदेतन्निरंतरं। इति भावप्र
काशः॥
रसोपलं क्ली मौक्तिकं। इति
त्रिकाण्डशेषः॥
रस्तं क्ली द्रव्यं। इति सिद्धान्तकौ
मुद्यामुणादिवृत्तिः॥
रस्यं क्ली रक्तं। इति शब्दचन्द्रिका
रस्या स्त्री रास्ना॥ पाठा। इति
राजनिर्घण्टः॥
रह न क गतौ। इति कविकल्प
द्रुमः॥ रहयति रहापयति।
इति दुर्गादासः॥
रंहः स क्ली वेगः। तत्पर्य्यायः
तरः २ रयः ३ स्यदः ४ जवः ५ इत्य
मरः। रंहः ६ जवनः ७। इति तट्टी
का। रहि इ ङ गत्यां। इति कविक
ल्पद्रुमः। इ रंहते। इति दुर्गादासः
रह त्यजि। इति कविकल्पद्रुमः
रहति सर्वं दीनः। इति दुर्गा
दासः॥

रह न क त्यागे। इति कविकल्प
द्रुमः॥ रहयति शोकं धीरः।
इति दुर्गादासः॥
रहः स क्ली निर्जनं। तत्पर्य्यायः
विविक्तः २ विजनः ३ छन्नः ४ नि
ःशलाकः ५ रहः ६ उपांशु ७।
इत्यमरः॥ तत्त्वे॥ रते॥ गुह्ये।
इति मेदिनी॥
रहः स अ विजने। इत्यमरः। र
हो निधुवने ऽपि स्याद्रहो गुह्येन
पुंसकं॥ इति रभसश्च॥
रहस्यं त्रि गोपनीयं। रहसि भ
वं। इति मेदिनी अमरश्च॥ रह
स्यरोमस्पर्शो निषेधो यथा। न
संस्पृशेत्। रोमाणि च रहस्यानि
नाशिष्टेन सहाव्रजेत्॥ इति कौ
र्मे १५ अध्यायः॥
रहस्या स्त्री नदीभेदः। इति मेदि
नी॥ रास्ना॥ पाठा। इति राजनिर्घण्टः
रहितं त्रि वर्ज्जितं। यथा। जातसू
तकमाशौचं प्रेतेषवस्तनसूतकं। गु
रोस्तद्दिनं कृत्वा तपःकर्म समा
चरेत्॥ इति तत्त्वसार॥ अमित्रा
दित्रयोऽर्कः स्थिरदिनेजन्मतो
ऽस्तोभयोषिताः। न भवेद्रह वेधो
३ च योगेष्वेवं विचिन्तयेत्॥

इति जातकपद्धतिः ॥
रक्ष त्रि पालने। इति कविकल्प
द्रुमः। त्रि रक्षितोऽस्ति। इति उ
णादासः ॥
रक्षः स्त्री क्ली राक्षसः। इत्यमरः
तद्विशेषो यथा। दृष्ट्वाततं विकला
नवं यातनाथानुरोदितस्तथा।
द्रयानजायतेयस्मरसाइतिमम
तिः इत्याग्नेये यमप्रार्थितोपाख्या
ननामाध्यायः॥ रक्षञ्च आषधं
यथा मत्स्य उवाच रक्षोघ्नानिविष
घ्नानियानियार्थानिभूभुजा आग
दानिसमावद्धवानिधर्मभूतांव
र मत्स्य उवाच। पत्रिका रोहिणी
चैव रक्तमाला महौषधी तथाम
लकवेदारं याच चित्रपटोलिका
काकोली क्षीरकाकोली पीलुप
र्णीतथैव च केशिनी वृश्चिकाली
च महानागा शतावरी॥ तथा ग
रुडवेगा च स्थाले जम्बुदिनी तथा
स्थलेचोत्पलिनी या च महाभूमि
लतथा। उन्मादिनी सोमराजी
सर्वरत्नानि पार्थिव। विशेषान्मार
कतात्यत्रकीटपत्राविशेषतः जीव
जातञ्च मणयः सर्वे धार्या विशेष
तः रक्षोघ्ना विषघ्नाः कृत्यावेता
लनाशनाः॥ इति मात्स्ये १९२

अध्यायः ॥
रक्षःसभं क्ली रक्षःसमूहः इ
त्यमरः॥
रक्षकः त्रि रक्षाकर्त्ता। यथा।
गोरक्षा सहदेवश्च नकुलो हय
रक्षकः वैराटेऽकरुदायादो नरा
णां मातलः क्रमः॥ इति पुराणं।
रक्षणं क्ली रक्षा यथा। इति प्रण
यवद्धाभि गोपीभिः कृतरक्षणं
मायया निःस्तनेमाता संन्यवेषा
यदात्मजं। इति श्रीभागवते १०
स्कंदे ६ अध्यायः॥
रक्षणारकः पुं मूत्रकृच्छ्ररोगः
इति शब्दरत्नावली। क्वचित्पुस्त
के रक्षणीरकोपि पाठः॥
रक्षणिः स्त्री त्रायमाणालता इति
राजनिर्घण्टः॥
रक्षा स्त्री जतु॥ रक्षणं। इति मे
दिनी॥ भस्म। इति शब्दरत्नाव
ली। यशोदा कृतारक्षा यथा।
रक्षांविदध्यिरे सम्यक् गोपकुल भ्र
मणादिभिः। गोमूत्रेणस्नापयि
त्वा पुनर्गोरजसार्भकं। रक्षांचच
क्रुः शकृता द्वादशाङ्गेषु नामभिः।
गोपाः संस्पृष्टसलिलाअङ्गेषु कर
योः पृथक्। न्यस्यात्मन्यथ बाल
स्य बीजन्यासमकुर्वत। अथादेवो

३ त्रिमणिमांस्तवजान्वथोरू
त्तोऽच्युतः कटितटं जठरं हयास्यः
हृत्केशवस्त्वदुर ईश इनस्तु क
ण्ठं विष्णुर्भुजं मुखमुरुक्रम ईश्व
रः कं चक्र्यग्रतः सहगदो हरिर
स्तु पश्चात् तत्पार्श्वयोर्धनुरसी
मधुहाजनश्च कोणेषु शङ्ख उरु
गाय उपर्युपेन्द्रस्तार्क्ष्यः क्षितौ
हलधरः पुरुषः समस्तात्।
इन्द्रियाणि हृषीकेशः प्राणान्
नारायणोऽवतु। श्वेतद्वीपपति
श्चित्तं मनो योगेश्वरोऽवतु। पृश्नि
गर्भस्तु ते बुद्धिमात्मानं भगवान्
परः। क्रीडन्तं पातु गोविन्दः शयानं
पातु माधवः। व्रजन्तमव्याद्वैकुण्ठ
आसीनं त्वां श्रियः पतिः। भुञ्जानं य
ज्ञभुक् पातु सर्वग्रहभयङ्करः॥
डाकिन्यो यातुधान्यश्च कुष्माण्डा
येऽर्भकग्रहाः। भूतप्रेतपिशा
चाश्च यक्षरक्षोविनायकाः कोट
रा रेवती ज्येष्ठा पूतना मातृकादयः
उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रिय
द्रुहः। स्वप्नदृष्टा महोत्पाता वृद्धबा
लग्रहाश्च ये सर्वे नश्यन्तु ते विष्णो
र्नामग्रहणभीरवः। इति श्रीभाग
वते १०स्कंधे ६ अध्यायः। अथ पौर्ण
मास्यां रक्षाबन्धनं। राखी इति भा

षा। पौर्णमास्यां दिने रक्षाबन्धनं
विधिपूर्वकं। ब्रजराजकुमारस्तान्
केऽदितिस्थेति माधवः। तत्र भद्रा
दिसंभावेनामतिक्रम्य वकृर्ध्यात्
तथाच स्मृत्यन्तरे। भद्रायां द्वे न क
र्त्तव्ये श्रावणी फाल्गुनी तथा श्रा
वणी नृपतिं हन्ति ग्रामान् दहति
फाल्गुनीति। विधिश्च भविष्योत्तरे
उपाकर्मदिने प्राप्ते ऋषीणाञ्चैव
तर्पणे। ततोऽपराह्णसमये रक्षापो
टलिकां शुभां॥ कारयेदक्षतैः शा
लैः सिद्धार्थैर्हेमभूषितां। वस्त्रै
र्विचित्रैः कार्पासैः क्षौमैर्वा मल
वर्जितैः। विचित्रां ग्रथितां स्थाप
येद्भाजनोपरि। उपलिप्ते गृह
मध्ये दत्वा चतुष्कं ससुभं शुभं
तत्रोपविशेद्राजामात्यैः सुपु
रोहितैः समन्वितः॥ ततश्च पुरोधा
नृपते रक्षां बध्नीत मन्त्रेण। येन
बद्धो बली राजा दानवेन्द्रो महा
बलः। तेन त्वां प्रतिबध्नामि रक्षे
माचल माचल॥ वैदिकश्च य
द्वावभद्रास्तपणाद्विजनयः शला
नीक मनसा मानान्नन्यया व भा
क्षि पात्रे गवादायास्य मत्सकादि
क्षिपेद्याम। ब्राह्मणैः कनिये वैश्यैः
शूद्रैश्चान्यैश्च मानवैः। कर्त्तव्यो रक्षा

वारोऽविप्रान् संपूज्य शक्तितः। अ
नेन विधिना यस्तु रक्तिकां बधमाच
रेत्। स सर्वदोषरहितः सुखं संव
त्सरं वसेदिति ॥ अथ तद्दिननिर्ण
यार्थमुपाकर्मदिननिर्णयः क्रिय
ते। यदाह स्मृत्यन्तरे। उपाकर्म तु
कुर्वीत ते साम ऋग् यजुर्विदः।
ग्रहसंक्रान्तियुक्तेषु हस्तश्र
वणपर्वसु ॥ तथा च। सामवेदि
नां भाद्रस्य हस्तनक्षत्रे ऋग्वेदि
नां श्रावणस्य श्रवणनक्षत्रे यज
र्वेदिनां श्रावणीपूर्णिमोपाकर्म
कालः। उपक्रमः कण्डिकाकीर्त
नरूपं कर्म उपाकर्म अत्र करणा
भावे भाद्रे श्रावणेऽपि विधेयं। अ
र्द्धोषधयस्तु यस्मिन्मासे न दि
श्यन्ति चेत्। तदा भाद्रपदमा
सि श्रावणेऽपि तद्दिष्यते ॥ इति
वृद्धवसिष्ठवचनात् श्राव
णपंचम्यनुकल्पः तदाहार्थः।
यदि स्यात् श्रावणं पर्वग्रहसंक्रा
न्तिदूषितं। स्यादुपाकरणं शुक्ल
पंचम्यां श्रावणस्य तु इति गृह्यभू
मिरोदयमिताच विशिष्ट्वा। तथा च का
लिकापुराणे चतुर्दशी पूर्णा समुन्न
पमारसोमपूके रसो देवाज्ञमीक
र्णनपायो देवेनक्रमः क्रतीः रक्ताम
सरो देव पातालतलवासिनो ॥

आलस्यता: क्रती स मे ददौ लोक
गुरुः स्वयं। संप्राप्तवान् क्रती ब्र
ह्मा पर्वण्यपोदयिके पुनः ॥ अनो
भूतयुते तस्मिन्नोपाकरणमिष्य
ते। आस्तरं वर्जयेत् काले वेदा
दरणं प्रकीर्तयेति ॥ व्यासोऽपि श्र
वणेन तु यत् कर्म उत्तराषाढसं
युतं। संवत्सर कृतेः स्यापस्त
त्फलदेवतमुपति ॥ धनिष्ठासं
युतं कुर्याच्छ्रावणं कर्म यद्भवेत्।
तत्कर्म सफलं विद्यादुपाकरण
संज्ञकमिति। इति श्रीहरिभक्ति
विलासे ५ विलासः ॥
रक्तापत्रः पुं भूर्जवृक्षः इति राज
निर्घण्टः। भूर्जत्वचि स्त्री ॥
रक्तिका स्त्री रक्ता। यथा। अनेन
विधिना यस्तु रक्तिकां बधमाचरेत्।
स सर्वदोषरहितः सुखं संवत्स
रं वसेत्। इति हरिभक्तिविलासे ५।
विलासः ॥
रक्तिनं त्रि रक्ताकृतं। तत्पर्यायः।
शोतं रञ्जितं अवितं च रोषायितं५
गुप्त ६। इत्यमरः ॥
रक्तिमा ऋ पुं रक्ताकर्मी यथा।
आयुष्मान् योऽलोकयो दृशान्
पतिवित्पारदः। कतकातरो भुरा
नो मेयः स्मरेय रक्तिमा ॥

इति मात्स्ये १८९ अध्यायः ॥
रक्तवर्गः पुं राजांगरत्नकगणः
तत्पर्यायः। अनीकस्थः २ इत्य
मरः॥
रक्तोघ्नं क्ली कांजिकं। इति हेम
चन्द्रः। हिंगु। इति राजनिर्घण्टः।
रक्तोघ्नः पुं भल्लातकवृक्षः इ
ति त्रिकाण्डशेषः। श्वेतसर्षपः
इति रत्नमाला। रक्तोघ्नमन्त्रो य
था। स्थाने हृषीकेश तव प्रकी
र्त्या जगत् प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति स
र्वे नमस्यन्ति च सिद्धसंघाः। इति
भगवद्गीतायां ११ अध्यायः स्था
ने इत्यव्ययं युक्तमित्यर्थे। हे हृषी
केश सर्वेन्द्रियप्रवर्त्तक यत्त्व
मेवात्यन्ताद्भुतप्रभावो भक्तवत्स
लश्च तत तव प्रकीर्त्या प्रकृष्ट
या कीर्त्या नितुतिपाय माहात्म्य
कीर्तनेन श्रवणेन च न केवलमह
मेव प्रहृष्यामि किन्तु सर्वमेव जग
च्चेतनमात्रं रक्षोविरोधि प्रहृष्य
ति प्रकृष्टं हर्षमाप्नोति इति यात्
उत स्थाने युक्तमित्यर्थः। तथा
सर्वं जगत् अनुरज्यते च तद्विष
यमनुरागमुपैति इति च यत्तद
पि युक्तमेव। तथा रक्षांसि भीता

नि सन्ति दिशो द्रवन्ति सर्वासु दिक्षु
पलायन्त इति यत्तदपि युक्तमेव।
तथा सर्वेषां सिद्धानां कपिला
दीनां संघा नमस्यन्ति चेति यत्त
दपि युक्तमेव। सर्वत्र तव प्रकी
र्त्या इत्यस्यान्वयः स्थाने इत्यस्य
च अयं श्लोको रक्षोघ्नमन्त्रः प्रा
सप्रसिद्धः। इति तट्टीकायां मधु
सूदनसरस्वती ॥
रक्तोघ्नी स्त्री वचा। इति रत्नमाला
रक्तोजननी स्त्री रात्रिः। इति त्रिका
ण्डशेषः॥ राक्षसमाता च॥
रक्तोहा न पुं गुग्गुलुः। इति रा
जनिर्घण्टः॥
रक्षः पुं लाक्षा। इत्यमरः ॥
रा ल दाने॥ ग्रहणे। इति कवि
कल्पद्रुमः॥ रराति। इति दुर्गादा
सः॥ रा स्त्री विभ्रमः॥ दानं। इ
त्येकाक्षरकोषः॥ कांचनं। इ
ति शब्दरत्नावली ॥
राः पुं धनं॥ स्वर्णं। इत्यमरः
पाठः। इति शब्दरत्नावली ॥
राका स्त्री नदीविशेषः। वक्रोगः
नवजाभरजः स्त्री। संपूर्णेन्दुतिथिः
इति मेदिनी ॥
राख ऋ शोषालमर्थयोः। इति
कविकल्पद्रुमः। शोषः स्नेहरहि

तीभावः। अलमर्थोऽभूषणं तं सामर्थ्यं निवारणं च। इत्यमरशासनम्। इति दुर्गादासः॥

रागः, पुं, मात्सर्य्यम्॥ लोहितादिः। क्लेशादिः। अनुरागः। गान्धारादिः। नृपः। इति मेदिनी॥ चन्द्रः। सूर्य्यः। इति शब्दरत्नावली॥ लाक्षादिः। रक्तिमत्विट्॥ रञ्जनम्। इति नानार्थरत्नमाला॥ प्रीतिः यथा। वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते। इति भगवद्गीता॥ श्रीकृष्णीकाव्यमीपरस्वामी न स्खलतां यथा। स्वत्वमप्यधिकं चित्ते स्वत्वेनैव रज्यते। यतस्तु प्रणयोत्कर्षात् स राग इति कीर्त्यते॥ इत्युज्ज्वलनीलमणिः॥ गानशास्त्रोक्तरागा यथा। भरतमते हनुमन्मते च रागाः षड्विधाः। तेषां नामानि यथा। भैरवः १ कौशिकः २ हिन्दोलः ३ दीपकः ४ श्रीरागः ५ मेघः ६। हनुमद्भरतयोर्मते प्रत्येकमेषां पञ्च रागिण्यः। सोमेश्वरकल्लिनाथयोर्मते प्रत्येकमेषां षड्रागिण्यः। एतेषां प्रत्येकमष्टौ पुत्राः प्रत्येकं पुत्रभार्य्याश्च॥ कल्लिनाथसोमेश्वरमते षड्रागा यथा। श्रीरागः १ वसन्तः २ पञ्चमः ३ भैरवः ४ मेघः ५ नटनारायणः ६। इति नानासङ्गीतशास्त्रम्॥ अथ रागस्य उत्पत्तिसंख्या स्थानानि। येस्तु चेतांसि रज्यन्ते जगत्त्रितयवर्त्तिनाम्। ते रागा इति कथ्यन्ते मुनिभिर्भरतादिभिः॥ गोपीभिर्गीतमारब्धमेकैकं कृष्णसन्निधौ। तेन जातानि रागाणां सहस्राणि तु षोडश॥ रागेष्वेतेषु षट्त्रिंशद्रागा जगति विश्रुताः। कालक्रमेण तत्रापि किञ्चित्सप्रवर्त्तते। हृष्यन्ते केचिदन्दन्ति ते रागाः सर्वे सन्तीति निश्चितम्। भैरोहतरतः पूर्वपश्चिमदक्षिणेन तथा। समुद्रकच्छदेशस्थानामीषां प्रचारणं तथा च। अङ्गवङ्गकलिङ्गतैलङ्गभूलिङ्गद्राविडसौराष्ट्रगुर्ज्जरलाटसौवीरकीरकाश्मीरनाभीरनाहीरसिंधुजालंधरमगधमगधनिषधमलयहीरपगजाहयमालवजालवमरुमरुत्चोलउत्कलकुन्तलसिंहलहरिकेलकलकोङ्कणमलिवालमल्लभल्लसौविरसुवानकिंजातगुर्ज्जरमगजरकालिजगौडविदर्भउत्कलदिकांचीपाचालसौराष्ट्रशावरलाटवरा

कीकपावकरूपकामरूपहरिगर्भविदर्भकुर्मटवाटकीकटदेवेंगनटगनवाटभोटकुवाटकरहाटकर्णाटिकेतिकावलिककनकपत्रकान्यकुब्जभोजकोवोजनेपालचोरविहारवलीहारवाजगोहविदेहवाल्हीकचचरीकत्रिगर्त्तानर्मादिदेशेषु रागाः प्रचरन्तीति। यस्य श्रवणमात्रेण रज्यन्ते सकलाः प्रजाः सर्वाच्च रञ्जनाद्धेतोस्तेन राग इति स्मृतः॥ अथ रागाः। आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः। श्रीरागश्च ततः पश्चाद्वसन्तस्तदनन्तरम्। हिन्दोलश्चाथ कर्णाट एते रागाः षडेव तु ६ षट्त्रिंशद्रागिणीस्तत्र क्रमशः कथितामया। धानसी मालसी चैव रामकीरी च सिंधुडा। आशावरी भैरवी च मालवस्य प्रिया इमाः ६ वेलावली च पूरवी कानडा माधवी तथा कोडा केदारिका चापि मल्लारस्य प्रिया इमाः ६। गान्धारी सुभगा चैव गौरी कौमारिका तथा। वेलोयारी च वैरागी श्रीरागस्य प्रिया इमाः ६ तूडी च पञ्चमी चैव ललिता पटमञ्जरी गुर्ज्जरी च विभाषा च वसन्तस्य प्रिया इमाः ६। मायूरी दीपिका चैव देशकारी च पाहिडा। वराडी मोरहाकी च हिन्दोलस्य प्रिया इमाः ६। नाटिका चाथ भूपाली रामकेली गडा तथा। कामोदा चापि कल्याणी कर्णाटस्य प्रिया इमाः ६॥ ३६॥ अथ कालनियमः। विभाषा ललिता चैव कामोदा पटमञ्जरी। रामकीरी रामकेली वेलोयारी च गुर्ज्जरी देशकारी च सुभगा पञ्चमी च गडालडी। भैरवी चाथ कौमारी रागिण्यः षोडश पञ्च च॥ एताः पूर्वाह्णकाले तु गीयन्ते गायनोत्तमैः वराडी मायूरी कोडा वैरागी चाधानसी॥ वेलावली मोरहारी समेता रागयोषितः। गेयाः मध्याह्नकाले तु यथा भरतभाषितम्। गान्धारी दीपिका चैव कल्याणी पूरवी तथा। कानडा धारवी चैव गौरी केदार पाहिडा। मायूरी मालसी नाटी भूपाली सिंधुडा तथा। सायाह्ने ताश्च रागिण्यः प्रगायन्ति चतुर्दश। पुरुषा वस्तुभूता च रागास्ते मालवादयः प्रदोषे चापराह्णे च रजन्यां गानगोचराः। दशदण्डात्परं रात्रौ सर्वेषां गानमीरितम्। मेघमल्लाररागस्य गाने

वर्षास्वसर्वदा॥ श्रीपंचम्याः समारभ्य
यावत्तजन्मोत्सवं हरेः। तावद्वसं
तरागस्य गानमुक्तं मनीषिभिः॥
प्रोक्तोत्थानसमारभ्य यावद्भर्गाम
होत्सवं। गीयते नहुषैर्नित्यं मा
लश्रीसा मनोहरा। सर्वेषामि
ह रागाणां रागिणीनां च सर्वशः
रंगभूमौ नृपाज्ञायां कालदोषो
न विद्यते रागं चालापयेदादौ
न रागान्तरसंदने स्वयं। नीत्यपत्नी
प्रगानेऽस्याः नृपाज्ञायां न दूषणं।
रागाः षट्स्त्रिंशद्रागिण्यः षट्त्रिंश
च्चारुविग्रहाः। आगमानाल्लसद
नानल्वत्ताणां समस्त्यास्ते प्रथ
ध्याने निजे निजे विनीचुविलवरूपश्चः
प्रभृतिः कमलवान्समनः।
रंगीन प्रालीप्रविशन्मदोष
मालापरो मालवरागराजः १
नीलोत्पलं कर्णयुगे वहंती प्रप
मास्तकेशी वरमध्यभागा। १
पन्नसहसांबुजरत्नवक्त्रा साथा
नुषीपमं सचारुनेत्रा १ कोरेष
नाचांबुजं गुरुतरस्थाइलकृष्णा
रुविलोकयंती। कंवुकुरुन्मोविक्रि
करन्नरारासामालसीसकथिता
विचित्रा २ पनमयांगीकरवाहवद्ध्वा
कर्णावतंसे कमलं वहन्ती। गुप्तं
पतः षष्ठपदी रेंधाना वेदाननंना

रामकिरीप्रदिष्टा ३ महेंद्रनीलद्यु
तिरंबुजाक्षी प्रवादयंती कपिला
प्राप्यत्रं। विचित्ररत्नाभरणा सुके
शी सा सिंधुराकांत समीपसं।
स्था ४ जवा प्रसूनद्युति विस्ववक्त्रा
सकंचुपमं करयोर्दधाना। देवो
मोम्प्रकाङ्क्षा दिन गात्रयष्टिर्गा
धावरी रंगकिलाविदग्धा॥५ स
रोवरस्या स्फटिकस्य मंदिरे सरो
रुहैः शंकरमर्चयंती। तालप्रयोग
प्रतिरंग गीते गौरीतनुर्भैरविका
सनीयं॥६॥ अथ मल्लारः।
विहारशीलोऽति सकांतदेहः कांता
प्रियो धार्मिकः शीलयुक्तः। कामा
तुरः पिंगलनेत्रयुग्मो मल्लार रा
गः प्रियकृत्सवेषः १ संकेति
तोत्कृत्तललनानिकुंजे कृतस्थितिः
कांत समागमाय। वेलावलीचप
कमेखलिनी सा बाला विचित्राभर
णाविकृता। १। रहः सकांत प्रियमा
लापयंत्रं संवदंती कचकं मयुग्मे।
हर्षादलक्ष्मामननुः सकामा पुरा
नतेः सा पुर्वी निरुक्ता २ अशोक
हुंहस्त मनोनिष्पन्ना वियोगिनी
वामपकरेण चिंतापी विभूषितांगा
कांतिस्तरमाला काननं रहेमल
नेननन्ना ३ संपृष्ठ संपृष्ठ।

गले दधाना प्रसून मालादयि
तेनबाला। गौरी स्वकांताननचुंवि
तास्यासा सुंदरी माधविकानिकुंजे
४ सकच्छपी वादयति स्वभर्तुर्गा
नार्थमभ्यस्यति सम्मुखेन। स्वदेव
तालाविहिता च माला कोशक
लाता नवनीमनासा। ५ स्नातो स
मूर्ध्नीणवनी स्वदेहाके प्रार्पणस्य
दिनवारि विंदुः। निष्ठीउद्यंतीति
मिरामुकांते केदारिकारक्तपयो
धरश्रीः ६ अथ श्रीरागः। ली
लावतारेणवनांतराणि विन्वन्
प्रसूनानि वधूसहायः। विलास
वेशो हसितादिकमूर्त्तिः श्रीरागप
षयाथितः रष्टिवर्णा॥ १॥ संध्यास
काले गृहमध्यरेखा प्रवादयंतीह
पिनाकयंत्रं। आयायवाधानविचि
त्रितांगी गांधारिकागंधवत्सेनेति
यते॥। ॥ रसनया सविचारकांत
कं विदधतीकविकोविदकोनकं।
सकवितासुतभावननंतपराभरा
वतीसुभगासमदाकुला॥ २ पुष्पा
याने साईमालीकयालैः कीडते
वं कोकिला काकलीषु। रामाघपा
मास्तद्गुणानाचसीमा गौरीगौरी
गौरवालोकदिष्टा॥ ३॥ प्रातालि
कायां स्फुटकोमलीभिः प्रकाशिता

यो रजनी विहारं। अक्लायकांतेन
समं वसंती कौमारिकाकामकला
वहेलीं ४ गौरीपादाञ्ज मभ्यर्च
यंती गेयोद्धुतं गेयमालं दधाना।
नानारत्नोपायनैर्भक्तिभावैर्वेला
वारी कथ्यते बालिकेयं॥५॥ उल्ला
सयंती च मिहोरहः स्याम्प्राणे
वे धुना। मालती कुसुम स्रग्भिर्वै
राजीरागिणीरुक्ता॥६॥ अथ वं
संतः। चूतांकुरैणव कृतावतंसो
विघूर्णमानारुणनेत्रपद्मः। पी
तांबरः कांचनचारुदेहो वसंतरा
गो युवतीप्रियश्च १ स्वन्नमानाति
स्वपीलसुकासुकालनाकल्पित
हारयष्टिः। चूतांकुरैः पाणियुगे व
हंती जवाह्रणांगी नटिकेति नेयं १
संगीतगोष्ठीषु गरिष्ठभावं समा
श्रिता गायन संप्रदाये। खर्वेति
नीलपूरपादपम्या सा पंचमी पंच
म वेद वेशी॥ २॥ उत्सिके शाचपस्य
मस्मारे विदधती प्रायनोस्थित चा
रुवेणी। विलुलितालकवलिह्व
णांगी भास्वरा ललिता कथिता
बुधैः॥ ३॥ सखी कलापैः परि
हास्यमाना वियोगिनी कांतवि
योगदेहा। पीनस्तनी चैव परा
ममाशुपानामासकेषी पटमंजरीयं ४।

कर्णाटघलालंवि मधु व्रताली म्ह
ण्णाति सामंगलकूजितानि कां
तान्तिकं गतमनाः प्रदोषे सा गुज्ज
रीवेशकलोचितांगी ५ अथा
पर्यनी लिज शिष्यहंदं समीत
प्रशस्ताणि विवेचनाभिः । मनो
हरा हारलताभिरामा समस्तभा
षा कुशला विशेषा । ६ अथहिन्दो
लः । हासाभिलासेन पतनुदश्य
वाः उत्थापितस्तनलत्तणमालिहं
दे । उल्लोलसंगीतरसैर्विदग्धो
हिन्दोलरागः कथितो रसज्ञैः । १
मधूरकेकाश्रवणोत्सुकनी मयू
रिकान्त्यनतेन किरन्ती । मयूरको
णीवसितिं दधाना मायूरिका सक
थिता गुणज्ञैः । प्रदोषकाले गृह
संप्रविष्टा प्रदीपहस्ताफुलगा मात्र
वस्त्रा । सीमन्तसिन्दूरविराजमाना
नासूरकत्पाल्पाविदेल्लदीपिकेयं
मार्गे सखीभिर्विजने वसन्ती वि
चित्रवेशोज्ज्वलितदसंगा लिनीव
मातनन्दपर्णाया सा देशका
री कथिता गुणज्ञैः २ अन्तेदृधा
नाचरणारविन्दं निधयन्तीप रेषणा
यानेककामदयन्स्मरन्तिं निमग्नासा
पाहिंडामकथिता कवीन्द्रैः ४ । क
र्णेदधाना स्मरपुष्पगुम्फस्तवक

दोज्ज मनोहरांगी । सागन्तनाचा
रु विलोलनेत्रा वरांगनेयं कथि
ता वराटी ५ उत्पन्नमात्रे प्रथमा
पराधे मानं पुनः कर्तुं मनाग्घिरे
ण । जन्त्रत्स्वभावान्वियत्नहृदंती
सा मारहाटीइव केलिरुष्टा ॥ ६
अथ कर्णाटः ॥ कृपाणपाणिर्ग्ल
रागाधिरूढोमधूरकंठाल्तिसकं
वकान्तिः स्फुरनसितस्मितप्रसः
प्रशान्तः कर्णाटरागो हरिताल
वर्णः । चिरेतटेतीष्टुभ्रंशगमध्ये
संप्रार्थयन्ती नरदिने वसन्तं । संगीत
तालेषुकृतावधानानदीपुनारी
परिधानदेहा । स्वनायकंपुष्प
लता धिरूढा हसन्ती सर्वम
हं वहन्ती । स्वनानिशापवहितनो
लिमुग्धाभूपालिका सा स्ववलं
दनतीया ॥ २ ॥ अथापयन्तीष्टु
कसारसारीः श्रीरामरामेतिसु
वेषपालदृष्टिः रामललनाईसव
लितांगुके श्रीः श्रीरामकेलीक
थिता कवीन्द्रैः ३ विशेषवेदग्ध
वतीसमस्तानकलाविलासनविश्री
हृदयंती वृहन्तिनवापरिपुरदेहावकल्पल
वलनभाभ्रवा ४ मेतः समपाद्यति सं
नवनीपयोविहारेणसरोरुहास्तिविचिन
लीसाव्रमोदमानाकामोदरागिगिणप्रदि
ता गुणज्ञैः ॥

५ ॥ आधुना नटनृत्यपरिश्रमेण
वाला लीलाभिः सदनीकृतादरा
नटीनां कस्याणी कलयति मनह
सीपणप्रस्थानमुखविता किंकि
णीकलापं ६ ॥ अथ रागरागि ।
णीनां भावनिरूपणं । मालवः
श्रीश्च हिन्दोलो मल्लारस्त्वनन्तरं
गायति गायकाधीरसानन्देन चेत
सूर्ये वसन्तो रागः कर्णाटो द्वावी
भवतः क्रमात् । धानसी मालसी चै
व भैरवी माधवी तथा सुभगा पंच
मी नाटी वेलावली च गुर्जरी ।
कामोदा चापि कल्याणी कोडाके
दारिकान्तडी ॥ कौमारी माधूरी चै
व देशकारी च सिंधुडा रामकेली
च भूपाली रागिण्यो विंशति
भानेदोषा इति प्रोक्ता गीयते गा
नकोविदैः । पुरवीकानडा गौ
री रामकीरी च दीपिका आशाव
री विभाषा च वराटी च गडी तथा
पताश्च नव रागिण्यो वीरा शोगा
नमुत्तमं । वेलावली चा धारी
ललिता पठमंजरी । वैराविभाविं
णी चापि मारहाटी च पाहिडा । क
रुणपूर्वविनानीयातसंप्रेत्ता रा
गस्योचितः । रागेण सभा गोनष्ट
हस्तिप्रद्रागिणीषु च । करुणानेश्वी

रेषु तापनार्थमतत्रयं ॥ इतिसं
गीतदामोदरे शिवनारदसंवा
दे ५ । ६ अध्यायौ ॥
रागचूर्णः पुं कामदेवः खदि
रवृक्षः । इति मेदिनी । फलाचू
र्णे इति शब्दरत्नावली । लाक्षार
सः इति राजनिर्घण्टः ॥
रागछन्नः पुं कामदेवः । इति
शब्दरत्नावली । रागेणाछन्नेति ॥
रागदः पुं नेरणीलपः । इति
राजनिर्घण्टः । रागदातरिति ॥
रागदालिः पुं मसूरः । इति रा
जनिर्घण्टः ॥
रागपुष्पः पुं वंधूकः रक्तम्लानः
इति राजनिर्घण्टः ॥
रागपुष्पी स्त्री जवा । इति राज
निर्घण्टः ॥
रागप्रसवः पुं वंधूकः रक्तम्ला
नः । इति राजनिर्घण्टः ॥
रागयुक् पुं माणिक्यं । इति रा
जनिर्घण्टः । कस्मिंश्चिन्नपुस्तके
रागदृक् इति पाठोपि विद्यते ॥
रागरज्जुः पुं कामदेवः । इति श
ब्दरत्नावली ॥
रागलता स्त्री कामदेवपत्नी
इति जटाधरः ॥
रागवृन्तः पुं कामदेवः । इति

शङ्कमाला ॥

रागखाडवः पुं दाडिमद्राक्षायुक्तमुद्गयूषः अस्य गुणाः रुचिकारित्वं लघुपाकित्वं। वातपित्तकफाविरोधित्वञ्च। इति राजवल्लभः रागसूत्रं क्ली तुलासूत्रं पट्टसूत्रं इति मेदिनी ॥

रागाङ्गी स्त्री मञ्जिष्ठा। इति राजनिर्घण्टः ॥

रागान्धः त्रि आवेगात् त्वादान विमुखः। यथा। आशावल्लवलीहत्वाघोहन्तिपिशुनो जनः स जीवस्तोः पिशाना रुद्रेणोदास्तुल्लतान्वरि इति शाङ्कमाला ॥

रागाशनिः पुं बुद्धः इति त्रिकाण्डशेषः ॥

रागिणी स्त्री विदग्धानारी। इति जटाधरः। मेनकायाज्येष्ठकन्या। यथा रागिणीनामसंजाता ज्येष्ठा मेनासुतासुने। सुभांगी पद्मपत्राक्षी नीलकुञ्चितमूर्द्धजा इति वामनपुराणे ५४ अध्यायः जयश्री नाम्नी लक्ष्मीः। इति पुराणं षड्रागाणां पत्नी इति हलायुधः सा तु हस्तमस्ते भरतमतेच त्रिंशत् प्रकारा। सोमेश्वरमतेकल्लिनाथमतेच षट्त्रिंशत् प्रकारा

आसां विवरणं रागशब्दे द्रष्टव्यं। रागी त्रि अनुरक्तः कामुकः। इति विश्वः। रञ्जकः इति मेदिनी। त्रणधान्यविशेषः। तत्पर्यायः। लोहितः २ बहुलकणिशः ३ गुच्छकणिशः ४ अस्य गुणाः। तिक्तत्वं मधुरत्वं। कषायत्वं। शीतलत्वं। पित्तास्रनाशित्वं। बल्यत्वञ्च। इति राजनिर्घण्टः ॥

राघ ऋ ङ. शक्तौ। इति कविकल्पद्रुमः ऋ अरराघत्। ङ. राघते। शक्तिः सामर्थ्यं। इति दुर्गादासः ॥

राघवः पुं रामचन्द्रः। महामत्स्यविशेषः। समुद्रः। इति मेदिनी।

राघवायणः पुं रामायणः यथा सेतिहास पुराणानि राघवायणभारतं। समाप्तिः द्विजातिभ्योवसन्तिनानिफलानिते इत्याग्निपुराणेवामन माहात्म्यनामाध्यायः ॥

राङ्कलः पुं वृक्षकण्टकः। इति हारावली ॥

राङ्कवं त्रि मृगलोमजातवस्त्रादि। तत्पर्यायः। मृगरोमजं। इत्यमरः ॥ रङ्कुर्मृगभेदः ततो जातार्थेऽण्। पशावोपि मृगा इति रूपात् मेषादिलोमजमपि कम्बलादिरांकवं। इति नदीकाया।

भरतः ॥

राजक्षरणं क्ली पुष्पविशेषः रेणु इति भाषा। अस्य गुणाः रक्तपित्तनाशित्वं इति द्रव्यगुणः ॥

राजऋ ज्वण दीप्तौ। इति कविकल्पद्रुमः ॥ ऋ अरराजत्। नराजति राजते। णरेजतुः रराजतुः। इति दुर्गादासः ॥

राजकं क्ली नृपसमूहः इत्यमरः राजनि ३। दीप्तिकारके त्रि

राजकदंवः पुं कदम्बविशेषः यथा कादम्बर्यः स्वादुपाकेन लीधूली कदम्बकः। कदम्बमिश्रकोराजकदम्बेः कृष्णरेणिकः। इति जटाधरः ॥

राजकन्या स्त्री केतकिपुष्प इति राजनिर्घण्टः। नृपसुताच

राजकर्कटी स्त्री चीनाकर्कटी। इति राजनिर्घण्टः ॥

राजकशेरुः पुं भद्रमुस्ता। इति राजनिर्घण्टः ॥

राजकीयः त्रि राजसंबन्धी राजकस्यायं इत्यर्थे छीय प्रत्ययेन सिद्धः ॥

राजकुमारः पुं राजपुत्रः। तत्र वर्णनीयानि यथा। कुमारे शस्त्रशास्त्रश्रीकलावल्लयगुणोत्कृष्टयाः

वाह्याली खुरली राजभक्तिः सभयानाद्रयः ॥ इति कविकल्पलतायां १ स्तवकः ॥

राजकूष्माण्डः पुं वार्त्ताकी। इति जटाधरः ॥

राजकोषातकी स्त्री किंशाकविशेषः। घियातोरई इति हिन्दीभाषा तत्पर्यायः। हस्तिघोषिका २ पीतपुष्पिका ३ धामार्गवः ४ केशफला ५ महाजाली ६ सपीतकः ७ अस्या गुणाः। शीतलत्वं ज्वरघ्नत्वं। कफवातलत्वञ्च। इति मदनविनोदः राजखर्जूरी स्त्री श्रेष्ठखर्जूरी पिण्डखर्जूरिका। तत्पर्यायः राजपिण्डा २ नृपप्रिया ३। अस्या गुणाः गौल्यत्वं। स्वादे हिमत्वं। गुरुत्वं। पित्तदाहार्त्तिश्वासभ्रमनाशित्वं वीर्यवृद्धिदत्वञ्च। इति राजनिर्घण्टः ॥

राजगामि त्रि राजसंबन्धि। यथा। प्रदत्तञ्च समुत्कर्षे राजगामिच पैशुनं। गुरुश्चालीक निर्बन्धः समानि ब्रह्महत्यया ॥ इति मानवे ११ अध्यायः। राजनि वास्तेनादीनां तेषाम मरणफल्ले तेषामभिधानं। इति कुल्लूकभट्टः। अपिच। अपुत्रस्याथ पत्न्यभिगामिन रभा

वे मातृगामि तदभावे भ्रातृ
गामि तदभावे भ्रातृपुत्रगामि
तदभावे सकुल्यगामि तदभावे बं
धुगामि तदभावे शिष्यगामि त
दभावे सब्रह्मचारिगामि तदभा
वे ब्राह्मणधनवर्ज्जं राजगामि
इति दायभागग्रन्थधृतविष्णुवच
नं॥ राजगिरिः पुं शाकभेदः त
त्पर्य्यायः। राजाद्रिः २ राजशाकि
नी ३ राजशाकिनिका ४। अस्य गुणाः
रुच्यत्वं। पित्तनाशित्वं। शीतलत्वं।
स्थलस्य तु अतिशीतलत्वं
वातिकृत्त्वञ्च इति राजनिर्घण्टः॥
राजग्रीवः पुं मत्स्यविशेषः फ
लुइ इति भाषा। यथा फलकीसा
चित्रफली राजग्रीवो मद्गुभेदः।
इति त्रिकाण्डशेषः॥
राजघः त्रि तीक्ष्णः। इति त्रिका
ण्डशेषः। राजहन्ता। यथा। राज
घ्नदर्पादिपुरा नलो ज्वलैर्निजप्र
तापैर्ज्वलयन्नलङ्घ्यः। प्रदक्षिणी
कृत्य जयाय सृष्टया राजनी राज
नयास राजघः। इति नैषधप्रथम
सर्गः॥ राजचिह्नकं क्ली उपस्थः।
इति शब्दचन्द्रिका। चिह्नानां स्त्रीपुंवि
भाजकानां राजा इति व्युत्पत्त्या
सिद्धं॥

राजजम्बुः स्त्री पिण्डखर्ज्जूरं। इति मे
दिनी। महाजम्बुः। इति राजनि
र्घण्टः॥
राजयक्ष्मन् पुं क्षयरोगः। यस्मा
त्पूर्वं रोगराजत्वात् यक्ष्मा य
क्ष्मकः। यदि सोमस्यादिरासीत्तस्मि
न्निति नक्षत्रवर्गास्तस्य यादि रि
के नोराजवद्भवत्त्वस्मिन् योगि
स्य तत्पराजयक्ष्मशब्दोऽप्यत्र। इत्य
मरटीकायां भरतः॥
राजतं त्रि रजतनिर्म्मितं। यथा।
सौवर्णे राजते ताम्रे पितॄणां पा
त्रमुच्यते। रजतस्य कथा वापि द
र्शनं दानमेव वा॥ इति मात्स्ये
१७ अध्यायः॥ रजते क्ली॥
राजतरुः पुं कर्णिकारवृक्षः।
आरग्वधः। इति राजनिर्घण्टः॥
राजतरुणी स्त्री पुष्पविशेषः।
तत्पर्य्यायः। महासहा २ वर्णपु
ष्पः ३ अम्लानः ४ अम्लानकः ५
सुपुष्पः ६ सवर्णपुष्पः ७ अस्या
गुणाः। कषायत्वं। कफकारित्वं
चक्षुष्यत्वं। हर्षदत्वं। ग्राह्यत्वं स्वा
दित्वं। सुखबलप्रदत्वञ्च। इति राज
निर्घण्टः॥ राजता स्त्री राजत्वं राज्ञो
भाव इत्यर्थे राजनशब्दात् तल
प्रत्ययेन सिद्धा॥

राजतालः पुं गुवाकवृक्षः इति
शब्दरत्नावली॥
राजतिनिशः पुं सत्वाशः। इति
हारावली॥
राजत्वं क्ली राजता। राज्ञोभाव।
इत्यर्थे राजनशब्दात् त्वप्रत्ययेन
निष्पन्नं॥
राजदण्डः पुं राजशासनं। यथा।
कुलैकादशवर्षस्य पञ्चवर्षाधिक
स्य च। चरेद्गुरुः सुहृद्वापि प्रायश्चि
त्तं विशुद्धये। ततोऽन्यूनतरस्यास्य।
नापराधो न पातकं। न चास्य रा
जदण्डोऽपि प्रायश्चित्तं न विद्यते। इ
ति प्रायश्चित्ततत्त्वधृताङ्गिरो व
चनं॥
राजदन्तः पुं दन्तानां राजा। उप
रिश्रेण्योर्मध्यवर्त्तिदन्तद्वयं।
यथा। राजदन्तौ न मध्यस्थावुपरिश्रे
णिकौ क्वचित्। इति हेमचन्द्रः॥
राजदेशीयः पुं राजदेश्यः। रा
जकल्पः। ईषदूनो राजा इत्यर्थे
राजनशब्दाद्देशीयप्रत्ययेन नि
ष्पन्नः॥
राजधत्तूरकः पुं वृहद्धुस्तूरः इ
ति कश्चित् राजनिर्घण्टः। तत्पर्य्या
यः राजधुस्तूरशब्दे द्रष्टव्यः॥
राजधर्म्मः पुं राज्ञां कर्त्तव्यकर्म्म।

यथा। राजधर्म्मान् प्रवक्ष्यामि य
थावृत्तो भवेन्नृपः। सम्भवश्च यथा
तस्य सिद्धिश्च परमा यथा। ब्राह्म
प्राप्तेन संस्कारं क्षत्त्रियेण यथा
विधि सर्व्वस्यास्य यथान्यायं क
र्त्तव्यं परिरक्षणं। अराजके हि लो
केऽस्मिन् सर्व्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्व्वस्य राजानम
सृजत् प्रभुः। इन्द्रानिलयमार्का
णामग्नेश्च वरुणस्य च। चन्द्रवित्ते
शयोश्चैव मात्रा निर्हृत्य शाश्वतीः॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो
निर्म्मितो नृपः। तस्मादभिभव
त्येष सर्व्वभूतानि तेजसा॥ तप
त्यादित्यवच्चैव चक्षूंषि च मनांसि
च। न चैनं भुवि शक्नोति कश्चि
दप्यभिवीक्षितुं॥ सोऽग्निर्भवति
वायुश्च सोऽर्कः सोमः स धर्म्मरा
ट् स कुवेरः स वरुणः स महेन्द्रः
प्रभावतः। बालोऽपि नावमन्तव्यो
मनुष्य इति भूमिपः। महती देव
ता ह्येषा नररूपेण तिष्ठति॥ एक
मेव दहत्यग्निर्नरं दुरुपसर्पिणं।
कुलं दहति राजाग्निः सपशुद्र
व्यसञ्चयं॥ कार्य्यं सोऽवेक्ष्य
शक्तिञ्च देशकालौ च तत्त्वतः। कु
रुते धर्म्मसिद्ध्यर्थं विश्वरूपं पुनः

पुनः। यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे। मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः॥ तं यस्तु द्वेष्टि संमोहात्स विनश्यत्यसंशयं। तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः॥ तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः। अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत्॥ तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजं। ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः॥ तस्य सर्वाणि भूतानि स्थावराणि च। राणि च भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च॥ तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः। यथार्हतः सम्प्रणयेन्नरेष्वन्यायवर्त्तिषु॥ स राजा पुरुषो दण्डः स नेता शासिता च सः। चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः॥ दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति। दण्डः सुप्तेषु जागर्त्ति दण्डं धर्मं विदुर्बुधाः॥ समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः। असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः॥ यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः। शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः॥ अद्यात्काकः पुरोडाशं श्वा च लिह्याद्धविस्तथा। स्वाम्यं च न स्यात्कस्मिंश्चित्प्रवर्त्तेताधरोत्तरं॥ सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः। दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते॥ देवदानवगन्धर्वा रक्षांसि पतगोरगाः। तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः॥ दुष्येयुः सर्ववर्णाश्च भिद्येरन् सर्वसेतवः। सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात्॥ यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा। प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति॥ तस्याहुः सम्प्रणेतारं राजानं सत्यवादिनं। समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदं॥ तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्द्धते। कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते॥ दण्डो हि सुमहत्तेजो दुर्धरश्चाकृतात्मभिः। धर्माद्विचलितं हन्ति नृपमेव सबान्धवं॥ ततो दुर्गं च राष्ट्रं च लोकं च सचराचरं। अन्तरीक्षगतांश्चैव मुनीन् देवांश्च पीडयेत्॥ सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना। न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च॥ शुचिना सत्य-

संधेन यथाशास्त्रानुसारिणा। प्रणेतुं शक्यते दण्डः सुसहायेन धीमता॥ स्वराष्ट्रे न्यायवृत्तः स्याद्भृशदण्डश्च शत्रुषु। सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः॥ एवंवृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः। विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि॥ अतस्तु विपरीतस्य नृपतेरजितात्मनः। संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि॥ स्वे स्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः। वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता॥ तेन यद्यत्सभृत्येन कर्त्तव्यं रक्षता प्रजाः। तत्तद्वोऽहं प्रवक्ष्यामि यथावदनुपूर्वशः॥ ब्राह्मणान्पर्युपासीत प्रातरुत्थाय पार्थिवः। त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषाञ्च शासने॥ वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन्। वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते॥ तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः। विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित्॥ बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः॥ वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे॥ वेणो विनष्टो

ऽविनयान्नहुषश्चैव पार्थिवः। सुदाः पैजवनश्चैव सुमुखो निमिरेव च। पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च। कुवेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः॥ त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीं। आन्वीक्षिकीं चात्मविद्यां वार्त्तारम्भांश्च लोकतः॥ इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशं। जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः॥ दश कामसमुत्थानि तथाष्टौ क्रोधजानि च। व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्॥ कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः। वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु॥ मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः। तौर्यत्रिकं वृथाट्या च कामजो दशको गणः॥ पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणं। वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥ द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः। तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ॥ पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमं। एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे। दण्डस्य पा

तेनैव वाक्पारुष्यार्थदूषणे को
पजैः पितृभिर्विद्यात्कष्टमेतत्त्रि
कं सदा ॥ सप्तकस्यास्य वर्गस्य स
र्वत्रैवानुषङ्गिणः। पूर्वं पूर्वं गु
रुतरं विद्याद्व्यसनमात्मवान् ॥
व्यसनस्य च मृत्योश्च व्यसनं कष्ट
मुच्यते। व्यसन्यधोऽधो व्रजति स्व
र्यात्यव्यसनी मृतः। मौलान् शा
स्त्रविदः शूरान् लब्धलक्षान् कुलो
द्गतान्। सचिवान् सप्त चाष्टौ वा प्र
कुर्वीत परीक्षितान्। अपि यत्सु
करं कर्म तदप्येकेन दुष्करं। वि
शेषतोऽसहायेन किन्तु राज्यं महो
दयं ॥ तैः सार्द्धं चिन्तयेन्नित्यं सामा
न्यं सन्धिविग्रहं। स्थानं समुदयं गु
प्तिं लब्धप्रशमनानि च। तेषां स्वं
स्वमभिप्रायमुपलभ्य पृथक्
पृथक्। समस्तानाञ्च कार्येषु
विदध्याद्धितमात्मनः। सर्वेषान्तु
विशिष्टेन ब्राह्मणेन विपश्चिता
मन्त्रयेत्परमं मन्त्रं राजा षाड्गुण्यसं
युतं नित्यं तस्मिन् समाश्वस्तः सर्वका
र्याणि निःक्षिपेत् तेन सार्द्धं वि
निश्चित्य ततः कर्म समारभेत् अन्या
नपि प्रकुर्वीत शुचीन् प्राज्ञानवस्थिता
न् सम्यगर्थसमाहर्त्तॄनमात्यान् सुपरी
क्षितान् ॥

निर्वर्त्ततास्य यावद्भिरितिकर्त्त
व्यता नृभिः। तावतोऽतन्द्रितान्
दक्षान् प्रकुर्वीत विचक्षणान्। ते
षामर्थे नियुञ्जीत शूरान् दक्षान् कु
लोद्गतान्। शुचीनाकरकर्मान्ते
भीरूनन्तर्निवेशने। दूतञ्चैव प्रकुर्वी
त सर्वशास्त्रविशारदं इङ्गिताका
रचेष्टज्ञं शुचिं दक्षं कुलोद्गतं ॥ अ
नुरक्तः शुचिर्दक्षः स्मृतिमान् देश
कालवित्। वपुष्मान् वीतभीर्वाग्मी
दूतो राज्ञः प्रशस्यते। अमात्ये दण्ड आ
यत्तो दण्डे वैनयिकी क्रिया। नृपतौ कोषरा
ष्ट्रे च दूते सन्धिविपर्ययौ ॥ दूत ए
व हि सन्धत्ते भिनत्त्येव च संहतान्
दूतस्तत्कुरुते कर्म भिद्यन्ते येन
मानवाः ॥ स विद्यादस्य कृत्येषु नि
गूढेङ्गितचेष्टितैः। आकारमिं
गितं चेष्टां भृत्येषु च चिकीर्षितं।
तथा प्रयत्नमातिष्ठेद्यथात्मानं
न पीडयेत्। जाङ्गलं सस्यसम्पन्न
मार्य्यप्रायमनाविलं रम्यमानत
सामन्तं स्वाजीव्यं देशमावसेत्
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमे
व वा। नृदुर्गं गिरिदुर्गं वा समा
श्रित्य वसेत् पुरं। सर्वेण तु
प्रयत्नेन गिरिदुर्गं समाश्र

येत्। एषां हि बाहुगुण्येन गिरिदु
र्गं विशिष्यते ॥ त्रीण्याद्यान्याश्रि
तास्त्वेषां मृगगर्त्ताश्रयाप्चराः।
त्रीण्युत्तराणि क्रमशः प्लवङ्गमन
रामराः ॥ यथा दुर्गाश्रितानेतान्नोप
हिंसन्ति शत्रवः। तथारयो न हिं
सन्ति नृपं दुर्गसमाश्रितं ॥ एकः
शतं योधयति प्राकारस्थो धनुर्ध
रः। शतं दश सहस्राणि तस्माद्दु
र्गं विधीयते। तत्स्यादायुधसम्पन्नं
धनधान्येन वाहनैः। ब्राह्मणैः
शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च
तस्य मध्ये सुपर्य्याप्तं कारयेद्गृह
मात्मनः। गुप्तं सर्वर्त्तुकं शुभ्रं ज
लवृक्षसमन्वितं ॥ तदध्यास्यो
द्वहेद्भार्य्यां सवर्णां लक्षणान्वि
तां। कुले महति सम्भूतां हृद्यां रू
पगुणान्वितां। पुरोहितञ्च कुर्वी
त वृणुयादेव चर्त्विजं। तेऽस्य
गृह्याणि कर्म्माणि कुर्य्युर्वैतानि
कानि च। यजेत राजा क्रतुभिर्वि
विधैराप्तदक्षिणैः। धर्मार्थञ्चैव
विप्रेभ्यो दद्याद्भोगान् धनानि च।
सांवत्सरिकमाप्तैश्च राष्ट्रादाहा
रयेद्बलिं स्याच्चाम्नायपरो लोके वर्त्तेत पि
तृवन्नृषु अध्यक्षान् विविधान् कुर्य्यात्तत्र
तत्र।

विपश्चितः। तेऽस्य सर्वाण्यवेक्षेर
न्नृणां कार्य्याणि कुर्वतां ॥ आवृत्ता
नां गुरुकुलाद्विप्राणां पूजको भ
वेत्। नृपाणामक्षयो ह्येष निधि
र्ब्राह्मोऽभिधीयते ॥ न तं स्तेना न
चामित्रा हरन्ति न च नश्यति। तस्मा
द्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो
निधिः। न स्कन्दते न व्यथते न विन
श्यति कर्हिचित्। वरिष्ठमग्निहोत्रे
भ्यो ब्राह्मणस्य मुखे हुतं। सम म
ब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
प्राधीते शतसाहस्रमनन्तं वेदपा
रगे। पात्रस्य हि विशेषेण श्रद्द
धानतयैव च। अल्पं वा बहु वा प्रे
त्य दानस्यावाप्यते फलं ॥ समोत्त
माधमै राजा त्वाहूतः पालयन् प्र
जाः। न निवर्त्तेत संग्रामात् क्षात्रं
धर्म्ममनुस्मरन्। संग्रामेष्वनिव
र्त्तित्वं प्रजानाञ्चैव पालनं। शुश्रू
षा ब्राह्मणानाञ्च राज्ञां श्रेयस्करं
परं। आहवेषु मिथोऽन्योन्यं जिघां
सन्तो महीक्षितः। युध्यमानाः प
रं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः।
न कूटैरायुधैर्हन्याद्युध्यमानो र
णे रिपून्। न कर्णिभिर्नापि दिग्धैर्नाग्नि
ज्वलिततेजनैः। न च हन्यात् स्थलारू
ढं न क्लीवं न कृताञ्जलिं। न मु

क्तकेशं नासीनं न तवास्मीति वादिनं। न सुप्तं न विसन्नाहं न नग्नं न निरायुधं। नायुध्यमानं पश्यन्तं न परेण समागतं॥ नायुधव्यसनं प्राप्तं नार्त्तं नातिपरीक्षतं। न भीतं न परावृत्तं सतां धर्ममनुस्मरन्॥ यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः। भर्त्तुर्यद्दुष्कृतं किञ्चित् तत्सर्वं प्रतिपद्यते॥ यच्चास्य सुकृतं किञ्चिदमुत्रार्थमुपार्जितं। भर्त्ता तत्सर्वमादत्ते परावृत्तहतस्य तु॥ रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः। सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत्॥ राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः। राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितं॥ एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः। अस्माद्धर्मान्न च्यवेत क्षत्रियो घ्नन् रणे रिपून्॥ अलब्धं चैव लिप्सेत लब्धं रक्षेत् प्रयत्नतः। रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निःक्षिपेत्॥ एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनं। अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रितः॥ अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया। रक्षितं वर्द्धयेद्वृद्ध्या वृद्धं दा-

नेन निःक्षिपेत्॥ नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः। नित्यं संवृतसंवार्य्यो नित्यं छिद्रानुसार्य्यरेः॥ नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत्। तस्मात् सर्वाणि भूतानि दण्डेनैव प्रसाधयेत्। अमाययैव वर्त्तेत न कथञ्चन मायया। बुद्ध्येतारिप्रयुक्ताञ्च मायां नित्यं स्वसंवृतः॥ नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु। गूहेत् कूर्म्म इवाङ्गानि रक्षेद्विवरमात्मनः॥ बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्। वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्। एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः। तानानयेद्वशं सर्वान् सामादिभिरुपक्रमैः। यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः। दण्डेनैव प्रसह्यैतान् शनकैर्वशमानयेत्॥ सामादीनामुपायानां चतुर्णामपि पण्डिताः। सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये॥ यथोद्धरति निर्द्दाता कक्षं धान्यञ्च रक्षति। तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः। मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया। सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः॥ ॥

शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा। तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्॥ राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत्। सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते। द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितं। तथा ग्रामशतानाञ्च कुर्य्याद्राष्ट्रस्य संग्रहं। ग्रामस्याधिपतिं कुर्य्याद्दशग्रामपतिं तथा। विंशतीशं शतेशञ्च सहस्रपतिमेव च॥ ग्रामदोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयं शंसेद्ग्रामदशेशाय दशेशो विंशतीशिने। विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत्। शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयं। यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः। अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्। दशी कुलन्तु भुञ्जीत विंशी पञ्च कुलानि च। ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरं॥ तेषां ग्राम्याणि कार्य्याणि पृथक्कार्य्याणि चैव हि। राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः। नगरे नगरे चैकं कुर्य्यात् सर्वार्थचिन्तकं। उच्चैःस्थानं घोररूपं नक्षत्राणामिव ग्रहं। स ताननुपरि-

क्रामेत् सर्वानेव सदा स्वयं। तेषां वृत्तं परिणयेत् सम्यग्राष्ट्रेषु तच्चरैः। राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः। भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः॥ ये कार्य्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः। तेषां सर्वस्वमादाय राजा कुर्य्यात् प्रवासनं। राजकर्म्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च। प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्म्मानुरूपतः। पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनं। षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः। क्रयविक्रयमध्वानं भक्तं च सपरिव्ययं। योगक्षेमञ्च संप्रेक्ष्य वणिजो दापयेत् करान्॥ यथा फलेन युज्येत राजा कर्त्ता च कर्म्मणां तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान्। यथाल्पाल्पमदन्त्याद्यं वार्य्योकोवत्सषट्पदाः। तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः। पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः। धान्यानामष्टमो भागः षष्ठो द्वादश एव वा। आददीताथ षड्भागं द्रुमांसमधुसर्पिषां। गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च। पत्रशाकतृणा-

नोचवैदलस्यच चर्मणां मृन्मया
नांचभाण्डानांसर्वस्याश्ममयस्य
च म्रियमाणोप्याददीतन राजा
श्रोत्रियात्करं। नचक्षुधास्यसंसी
देच्छ्रोत्रियोविषयेवसन्॥ यस्य
राज्ञस्तु विषये श्रोत्रियः सीदति
क्षुधा तस्यापितत्क्षुधा राष्ट्रम
चिरेणैव सीदति। श्रुतवृत्तेवि
दित्वास्यवृत्तिंधर्म्यांप्रकल्पयेत्।
संरक्षेत् सर्वतश्चैनंपिता पुत्रमि
वौरसं॥ संरक्ष्यमाणो राज्ञायंकु
रुतेधर्ममन्वहं। तेनायुर्वर्द्धते रा
ज्ञोद्रविणं राष्ट्रमेवच। यत्किं
चिदपिवर्षस्यदापयेत् करसं
ज्ञितं। व्यवहारेण जीवंतं राजा
राष्ट्रे पृथग्जनं॥ कारुकान् शि
ल्पिनश्चैव शूद्रांश्चात्मोपजीवि
नः। एकैकंकारयेत्कर्म मासि मासि
महीपतिः। नोच्छिंद्यादात्मनोमू
लंपरेषांचातितृष्णया। उच्छिंदन्
ह्यात्मनोमूलमात्मानंतांश्चपीड
येत्। तीक्ष्णश्चैवमृदुश्च स्यात्का
र्यंवीक्ष्यमहीपतिः। तीक्ष्णश्चैवमृ
दुश्चैवराजाभवति संमतः। अ
मात्यमुख्यंधर्मज्ञंप्राज्ञंदान्तं कु
लोद्गतं। स्थापयेदासने तस्मिन्
खिन्नः कार्येक्षणे नृणां॥ एवं सर्वं

विधायेदमितिकर्तव्यमात्मनः। यु
क्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः
प्रजाः॥ विक्रोशन्त्योयस्य राष्ट्रा
द्ध्रियंते दस्युभिः। संपश्यतः
सभृत्यस्य मृतः स नतुजीवति॥
क्षत्रियस्यपरोधर्मः प्रजानामेव
पालनं। निर्दिष्टफलभोक्ता हि
राजाधर्मेणयुज्यते। उत्थायप
श्चिमेयामे कृतशौचः समाहितः
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्
सशुभांसभां॥ तत्रस्थितः प्रजाः
सर्वाः प्रतिनंद्य विसर्जयेत्। वि
सृज्यचप्रजाः सर्वा मंत्रयेत् सह
मंत्रिभिः॥ गिरिपृष्ठंसमारुह्यप्रा
सादंवारहोगतः। अरण्ये निःश
लाकेवामंत्रयेदविभावितः॥ य
स्यमंत्रंनजानंतिसमागम्यपृथ
ग्जनाः। सकृत्स्नां पृथिवीं भुंक्ते
कोशहीनोपिपार्थिवः॥ जडमू
कांधबधिरांस्तिर्यग्योनान्वयो
ऽतिगान्। स्त्रीम्लेच्छव्याधितव्यंगान्
मंत्रकालेऽपसारयेत्॥ भिंदंत्यव
मतामंत्रंतैर्यग्योनास्तथैवच।
स्त्रियश्चैवविशेषेण तस्मात्तत्राद
तोभवेत्। मध्यंदिनेऽर्द्धरात्रे वा
विश्रान्तो विगतक्लमः। चिंतयेद्
धर्मकामार्थान्सार्द्धंतैरेकएववा॥

परस्परविरुद्धानांतेषांचसमुपा
र्जनं। कन्यानांसंप्रदानंच कुमा
राणांच रक्षणं। दूतसंप्रेषणं
चैवकार्यशेषं तथैवच। अंतः
पुरप्रचारंच प्रणिधीनांचचेष्टि
तं। कृत्स्नंचाष्टविधंकर्म पंचवर्गं
चतत्त्वतः। अनुरागापरागौचप्रचा
रंमंडलस्यच॥ मध्यमस्यप्रचारं
चविजिगीषोश्च चेष्टितं। उदासी
नप्रचारंचशत्रोश्चैवप्रयत्नतः॥
एताः प्रकृतयोमूलंमंडलस्य
समासतः। अष्टौचान्याः समा
ख्याताद्वादशैवतुताः स्मृताः॥
अमात्यराष्ट्रदुर्गार्थदंडाख्याः प
ञ्चचापराः। प्रत्येकंकथिताह्येताः
संक्षेपेण द्विसप्ततिः॥ अनंतरम
रिंविद्यादरिसेविनमेवच। अरेरन
न्तरंमित्रमुदासीनंतयोः परं॥
तान्सर्वानभिसंदध्यात्सामादि
भिरुपक्रमैः। व्यस्तैश्चैवसमस्तैश्च
पौरुषेण नयेनच॥ संधिंचवि
ग्रहंचैवयानमासनमेवच। द्वैधी
भावंसंश्रयंच षड्गुणांश्चिंतयेत्
सदा॥ आसनंचैव यानंच संधिं
विग्रहमेवच। कार्यंवीक्ष्यप्रयुंजी
त द्वैधं संश्रयमेवच॥ संधिंतु
द्विविधंविद्याद्राजा विग्रहं।

मेवच। उभेयानासनेचैवद्विविधः
संश्रयः स्मृतः॥ समानयानक
र्माचविपरीतस्तथैवच। तदात्वा
यतिसंयुक्तः संधिर्ज्ञेयोद्विलक्षणः
स्वयंकृतश्चकार्यार्थमकालेका
लएववा। मित्रस्यचैवापकृते द्वि
विधोविग्रहः स्मृतः। एकाकिन
श्चात्ययिकेकार्येप्राप्तेयदृच्छया।
संहतस्यचमित्रेण द्विविधंयान
मुच्यते॥ क्षीणस्यचैवक्रमशोदै
वात्पूर्वकृतेनवा। मित्रस्यचानु
रोधेनद्विविधंस्मृतमासनं। ब
लस्यस्वामिनश्चैवस्थितिः का
र्यार्थसिद्धये। द्विविधंकीर्त्यतेद्वैधं
षाड्गुण्यगुणवेदिभिः॥ अर्थसं
पादनार्थंच पीड्यमानस्यशत्रुभिः
साधुषुव्यपदेशार्थं द्विविधः संश्र
यः स्मृतः॥ यदावगच्छेदायत्यामा
धिक्यंध्रुवमात्मनः। तदात्वेचा
ल्पिकांपीडांतदासंधिंसमाश्रयेत्
नमाने नतकाले॥ यदाप्रहृष्टा
मन्येतसर्वास्तुप्रकृतीर्भृशं। अत्यु
च्छ्रितंतथात्मानंतदाकुर्वीतविग्र
हं॥ यदामन्येतभावेन हृष्टंपुष्टं
बलंस्वकं। परस्यविपरीतंच त
दायायाद्रिपुंप्रति॥ यदातु
स्यात्परिक्षीणोवाहनेनबले

नच। तदासीत प्रयत्नेन शत्रुकैः
संतापयन्नरीन्॥ मनसा तरेद्यदारा
ज्ञः सर्वथा बलवत्तरं। तदा द्विधा
बलं कृत्वा साधयेत् कार्यमात्म
नः। यदा परबलानां तु गमनीय
तमो भवेत्। तदा तु संश्रयेत् क्षिप्रं
धार्मिकं बलिनं नृपं॥ निग्रहं प्र
कृतीनां च कुर्याद्यो ऽखिलस्य च
उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं य
था। यदि तत्रापि संपश्येत् दोषं
संश्रयकारितं। सुयुद्धमेव त
त्रापि निर्विशंकः समाचरेत्॥
सर्वोपायैस्तथा कुर्यान्नीतिज्ञः
पृथिवीपतिः। यथास्याभ्यधिका
न स्युर्मित्रोदासीनशत्रवः॥ आय
तिं सर्वकार्याणां तदात्वं च विचार
येत्। अतीतानां च सर्वेषां गुणदो
षौ च तत्त्वतः। आयत्यां गुणदोषज्ञ
स्तदात्वे क्षिप्रनिश्चयः। अतीते का
र्यशेषज्ञः शत्रुभिर्नाभिभूयते॥
यथैनं नाभिसंदध्युर्मित्रोदासीन
शत्रवः। तथा सर्वं संविदध्या
देष सामासिको नयः॥ यदा तु
यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः
तदानेन विधानेन यायादरिपु
रं शनैः। मार्गशीर्षे शुभे मासि
यायाद्यात्रां महीपतिः। फाल्गुनं

वाथ चैत्रं वा मासौ प्रति यथाबलं
अन्येष्वपि तु कालेषु यदा पश्ये
ज्जयं ध्रुवं। तदा यायाद्विगृह्यैव
व्यसने चोत्थिते रिपोः॥ कृत्वा
विधानं मूले तु यात्रिकं च यथा
विधि। उपगृह्यास्पदं चैव चारान्
सम्यग्विधाय च। संशोध्य त्रिवि
धं मार्गं षड्विधं च बलं स्वकं। सांप
रायिककल्पेन यायादरिपुरं शनैः
शत्रुसेविनि मित्रे च गूढे युक्ततरो
भवेत्। गतप्रत्यागते चैव स हि क
ष्टतरो रिपुः॥ दण्डव्यूहेन तन्मार्गं
यायात्तु शकटेन वा। वराहमक
राभ्यां वा सूच्या वा गरुडेन वा॥
यतश्च भयमाशंकेत्ततो विस्तार
येद्बलं। पद्मेन चैव व्यूहेन निविशे
त सदा स्वयं॥ सेनापतिबलाध्यक्षौ
सर्वदिक्षु निवेशयेत्। यतश्च भय
माशंकेत् प्राचीं तां कल्पयेद्दिशं॥
गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञा
न् समंततः। स्थाने युद्धे च कुशला
नभीरूनविकारिणः॥ संहतान्
योधयेदल्पान् कामं विस्तारयेद्बहू
न्। सूच्या वज्रेण चैवैतान् व्यूहेन
व्यूह्य योधयेत्। स्यंदनाश्वैः समे
युध्येदनूपे नौद्विपैस्तथा। वृक्ष
गुल्मावृते चापैरसि चर्मा॥

3903

युधैः स्थले॥ कुरुक्षेत्रांश्च मत्स्यां
श्च पंचालान् शूरसेनजान्। दीर्घा
न्लघूंश्चैव नरानग्रानीकेषु योध
येत्॥ प्रहर्षयेद्बलं व्यूह्य तांश्च स
म्यक् परीक्षयेत्। चेष्टाश्चैव वि
जानीयादरीन् योधयतामपि॥
उपरुध्यारिमासीत राष्ट्रं चास्योप
पीडयेत्। दूषयेच्चास्य सततं यव
सान्नोदकेंधनं। भिंद्याच्चैव तडागा
नि प्राकारपरिखास्तथा॥ उपज
प्यानुपजपेद्बुध्येतैव च तत्कृतं
युक्ते च दैवे युध्येत जयप्रेप्सुर
पेतभीः॥ साम्ना दानेन भेदेन
समस्तैरथवा पृथक्। विजेतुं
प्रयतेतारीन्न युध्येन कदाचन॥
अनित्यो विजयो यस्माद्दृश्यते यु
ध्यमानयोः। पराजयश्च संग्रामे
तस्माद्युद्धं विवर्जयेत्। त्रयाणाम
प्युपायानां पूर्वोक्तानामसंभवे।
तथा युध्येत संपन्नो विजयेत रिपू
न्यथा॥ जित्वा संपूजयेद्देवान्
ब्राह्मणांश्चैव धार्मिकान्। प्रदद्या
त्परिहारांश्च ख्यापयेदभयानि च
सर्वेषां तु विदित्वैषां समासेन चि
कीर्षितं। स्थापयेत्तत्र तद्वंश्यं कु
र्याच्च समयक्रियां प्रमाणानि च

समवस्कंदयेच्चैनं रात्रौ वित्रासयेत्तथा॥ ६

कुर्वीत तेषां धर्म्यान् यथोदितान्
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः
सह॥ आदानमप्रियकरं दानं
च प्रियकारकं। अभीप्सितानाम
र्थानां काले युक्तं प्रशस्यते॥ सर्वं
कर्मेदमायत्तं विधाने दैवमानुषे।
तयोर्दैवमचिंत्यं तु मानुषे विद्यते
क्रिया॥ सह वापि व्रजेद्युक्तः संधिं
कृत्वा प्रयत्नतः। मित्रं हिरण्यं भू
मिं वा संपश्यंस्त्रिविधं फलं। पा
र्ष्णिग्राहं च संप्रेक्ष्य तथाक्रंदं च मं
डले। मित्राद्धथाप्यमित्राद्वा या
त्राफलमवाप्नुयात्॥ आक्रंदं पा
र्ष्णिग्राहस्य नियामको राजा॥ हि
रण्यभूमिसंप्राप्त्या पार्थिवो न त
थैधते। यथा मित्रं ध्रुवं लब्ध्वा
कृशमप्यायतिक्षमं॥ धर्मज्ञं च
कृतज्ञं च तुष्टप्रकृतिमेव च। अ
नुरक्तं स्थिरारंभं लघुमित्रं प्रश
स्यते। प्राज्ञं कुलीनं शूरं च दक्षं दा
तारमेव च। कृतज्ञं धृतिमंतं च क
ष्टमाहुररिं बुधाः। आर्यता पुरु
षज्ञानं शौर्यं करुणवेदिता। स्थौ
ललक्ष्यं च सततमुदासीनगुणो
दयः स्थौललक्ष्यं च कुमदंतं। क्षे
म्यां सस्यप्रदां नित्यं पशुवृद्धिकरी
मपि। परित्यजेन्नृपो भूमिमात्मार्थं

मविचारयन्। आपदर्थं धनं र
क्षेद्दारान् रक्षेद्धनैरपि। आत्मानं
सततं रक्षेद्दारैरपि धनैरपि॥
सह सर्व्वाः समुत्पन्नाः प्रसमीक्ष्या
पदो भृशं। संयुक्तांश्च वियुक्तांश्च
सर्व्वोपायान् सृजेद्बुधः॥ उपे
तारमुपेयञ्च सर्व्वोपायांश्च कृत्
स्नशः। एतत्त्रयं समाश्रित्य प्रय
तेतार्थसिद्धये। उपेतारमात्मानं
उपेयं प्राप्तव्यं॥ एवं सर्व्वमिदं रा
जा सह संमन्त्र्य मन्त्रिभिः। व्या
याम्याप्लुत्य मध्याह्ने भोक्तुमन्तः
पुरं विशेत्॥ तत्रात्मभूतैः का
लज्ञैरहार्य्यैः परिचारकैः। सुप
रीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषा
पहैः। विषघ्नैरगदैश्चास्य सर्व्वद्र
व्याणि योजयेत्। विषघ्नानि च
रत्नानि नियतो धारयेत् सदा। प
रीक्षिताः स्त्रियश्चैनं व्यजनोदक
धूपनैः। वेशाभरणसंशुद्धाः स्पृ
शेयुः सुसमाहिताः। एवं प्रय
त्नं कुर्व्वीत यानशय्यासनाशने।
स्नाने प्रसाधने चैव सर्व्वालङ्कारकेषु
च॥ भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपु
रे सह। विहृत्य तु यथाकालं पुनः
कार्य्याणि चिन्तयेत्॥ अलङ्कृतश्च सम्प
श्येदायुधीयं पुनर्जनं। वाहनानि च
सर्व्वाणि शस्त्राण्याभरणानि च॥
सन्ध्यां चोपास्य शृणुयादन्तर्वेश्म
नि शस्त्रभृत्। रहस्याख्यायिनाञ्चैव
प्रणिधीनाञ्च चेष्टितं॥ गत्वा कक्षान्त
रं त्वन्यत् समनुज्ञाप्य तं जनं। प्रवि
शेद्भोजनार्थञ्च स्त्रीवृतोऽन्तःपुरं पु
नः। तत्र भुक्त्वा पुनः किञ्चित्तूर्य्यघोषैः
प्रहर्षितः। संविशेत्तु यथाकाल
मुत्तिष्ठेच्च गतक्लमः॥ एतद्वि
धानमातिष्ठेदरोगः पृथिवीपतिः।
अस्वस्थः सर्व्वमेतत्तु भृत्येषु विनि
योजयेत्॥ इति मानवे ७ अध्या
यः॥ कालीपुराणोक्तराजध
र्म्मः ८५।८६ अध्याययोर्द्रष्टव्यः।
महाभारतोक्तराजधर्म्मः शान्ति
पर्व्वणि द्रष्टव्यः॥ पद्मपुराणो
क्तराजधर्म्मः स्वर्गखण्डे ३८ अ
ध्याये द्रष्टव्यः॥
राजधानकं क्ली राजपुरं। इति
शब्दरत्नावली॥
राजधानी स्त्री राजधानिका। तत्
पर्य्यायः। कोटः २ राजधानकं ३
इति शब्दरत्नावली॥ स्कन्धावारः ४
इति हेमचन्द्रः॥
राजधान्यं क्ली श्यामाकः। इति
राजनिर्घण्टः॥
राजधुस्तूरकः पुं वृहद्धुस्तूरः। तत्

पर्य्यायः राजधूर्त्तः २ महाशठः
३ निःशेषपुष्पकः ४ श्यामलः ५ राजस
र्णः ६ इति राजनिर्घण्टः अस्य गुणाः
धुस्तूरशब्दे द्रष्टव्याः
राजनामा पुं पटोलः। इति रा
जनिर्घण्टः॥
राजनीतिः स्त्री राज्ञां नयः। यथा
नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिस
मुच्चयं। सर्व्वबीजमिदं शास्त्रं चा
णक्यं सारसंग्रहं॥ इति चाणक्य
पण्डितकृतप्रथमः श्लोकः॥
सा यथा। गदितं वल्लभकाभ्यां
श्रुत्वा भागवतोत्तमः। आह ध
र्म्मसंयुक्तं प्रह्लादो वाक्यमुत्तमं
यदाधर्म्मात्तमं राजन् यदितं भुव
साह। अविरोधेन धर्म्मस्यार्थस्यो
पार्ज्जनं च यत्॥ सर्व्वसत्त्वानुगाम
नं कामवर्गफलं च यत्। परत्रेह
च यच्छ्रेयः पुत्र तत्कर्म्म आचर
यथा श्लाघां प्रयास्यसि यथा कीर्त्ति
र्भवेत्तव। यथा नापयशोयोग
स्तथा कुरु महामते॥ एतदर्थं श्रि
यं प्रकाङ्क्षन्ते पुरुषोत्तमाः येनेति
हि गृहे स्माकं निवसन्ति सुनिर्वृ
ताः॥ वृद्धो याति गुणैर्व्विमः
कीर्त्तिश्च यशसा सह। तस्मा
द् यथा तं निवसन्ति सद्राज्य।
स्थितस्य ह कुलोत्तमायाः। तथाय
तस्यामल सत्त्वेष्वयायथायथास्त्री
भवितासि लोके भूम्या सदाब्रा
ह्मण भूषितायां देवान्वितायां
दृष्ट्वाथ पितायां प्रजानुषणास्तक
समुद्भवायोक्तर्हि प्रयान्तीह नरा
धिपेन्द्राः तस्माद्द्विजाग्र्याः श्रुतिः
शास्त्रयुक्तानराधिपांस्ते प्रतियाज
यन्ते॥ द्विजैर्यजन्तस्तु तेभिर्द्विजेन्द्रा
यज्ञाग्निधूमोत्थनपस्य शान्तिः॥
तपोऽध्ययन सम्पन्ना याजनाध्या
पनेरताः। सन्तु विप्रा बले यज्यास्त्व
मोऽनुत्तमवाप्यहि॥ स्वाध्यायय
ज्ञनिरता दातारः शस्त्रजीविनः।
क्षत्रियाः सन्तु दैत्येन्द्र प्रजापालन
धर्म्मिणः॥ यज्ञाध्ययनसम्पन्ना दा
तारः कृषिकारिणः। पाशुपाल्य
प्रकुर्व्वन्तु वैश्या विपणिजीविनः ब्रा
ह्मणक्षत्रियविशां सदा शुश्रूषणे
रताः शूद्राः सन्तु सुरश्रेष्ठ तवाज्ञा
कारिणः सदा॥ यदा वर्णाः स्वधर्म्म
स्था भवन्ति दितिजेश्वर। धर्म्मवृद्धिस्त
दा स्याद्वै धर्म्मवृद्धौ नृपोदयः तस्मा
द्वर्णाः स्वधर्म्मस्थास्त्वया कार्य्याः स
दा बले। तद्वृद्धौ भवतो वृद्धिस्तद्धा
नौ हानिरुच्यते॥ इत्येवं वाक्यमाक
र्ण्य प्रह्लादोक्तं बलिर्महात्मा सवभव

तस्मी। ततोयदाज्ञापयसेकरिष्येर
स्यैवलिः प्राहवचोमहर्षे॥ इतिवा
मने ७१ अध्यायः॥
अपिच। एवंदत्वाततोराज्यम् ।
द्विजाज्ञायधर्मवित् उवाचमधुरं
वाक्यंपुत्रंपुत्रवतांवरः॥ राज्य
स्यैनापितेपुत्रकर्तव्यंरक्षणंतन्म
म॥ यदीच्छेतपरमंधर्मपिरक्षणं
तारणेनथा। दानवोःर्मिनेकर्म
ण्याहेनथा परदारिकाः वाल।
वालाम्रहेनत्याहेनत्यास्त्रीविधान
मालोभपरद्रव्येषुअन्यायोपार्जि
तेषुच नविरेनिष्टनेक्वापिसर्वे
मान्याः कदाचन रक्षणीयश्चते
देशः कुलन्यायवशार्जितः नि
त्याधुकेनस्यातव्यमसमान्यवचनं
कुरु। अमान्यायहवोबुध्यातपुत्र
कार्यविमर्शनं॥ अवश्यमेवकर्त
व्यश्रीरथरिरक्षणं। धर्मोयेनध
र्मोदतियेनतुष्येतिब्राह्मणाः॥
एवंतेपुत्रकर्तव्यमसप्रियाद्दिनेषि
णा समव्यसनेवर्ज्येनदोषोराज्ञस्त
तन्मदन् येषुरामाविनश्यपेतसं
पन्नोपिमहाद्युतिः। वर्ज्येयेनसदापा
नंस्रगयावर्ज्येयेनसदा वाक्यंरुक्ष
नवकर्तव्यंतथायावत् कदाचन।
राजपुत्रंनवर्क्तव्यं ॥ ॥

हतमेदंविवर्जयेत्॥ वर्जयेदतिपा
रुष्यंअस्त्रिस्रसमागमं। अर्थदू
षणंकचैवनकर्तव्यंकदाचन॥
आमान्यनाप्रियंब्रुयादीच्छेद्राज
कर्मणि। नाहंनिवारणीयस्तेगम
नायपथेस्थितः॥ एतन्मेक्रियतां
प्रीत्यैयदीच्छसिममप्रियं ततःपि
तुर्वचःश्रुत्वाराजपुत्रोयशस्विनि
उभौतपादौसंगृह्यकारुण्यप्रस्वा
चेत। इत्यादिश्रीवराहपुराणेभग
वच्छास्त्रेशोकरवेत्तीर्थमाहात्म्ये
आदित्यवरप्रदानस्यगतेवुकोपा
ख्याननामाध्यायः॥ अन्यच्च॥
मनुरुवाच राज्ञोभिषिक्तमात्रस्य
किंनुकृत्यतमंभवेत् एतन्मेसर्वं
समाचक्ष्वसम्यग्वेत्तियतोभवान्
मत्स्यउवाच अभिषेकार्द्रशिरसा
राज्ञाराजीवलोचन। सहायावर
णंकार्यंतत्रराज्यंप्रतिष्ठितं यद
प्याल्पतरंकर्मतदप्येकेनदुष्करं
पुरुषेणासहायेनकिंनुराज्यंम
हत्पदे॥ तस्मात्सहायान्वर
येत् कुलीनान्नृपतिःस्वयं। शूरा
न्कुलीनजातीयान्बलयुक्ता
न्श्रियान्वितान्॥ रूपसत्वगुणोपे
तान्सज्जनान्क्षमयायुतान्। क्लेश
क्षमान्महोत्साहान्धर्मज्ञांश्चप्रिय

वदान्॥ हितोपदेशे कालज्ञान्
स्वामिभक्तान्यशोऽर्थिनः। एवं
विधान्सहायांश्चशुभकर्मसु
योजयेत् गुणहीनानपिसदावि
ज्ञायनृपतिःस्वयं। कर्मस्वेवनियु
जीतयथायोग्येषुभारत कुलीनः
शीलसंपन्नोधनुर्वेदविशारदः।
हस्तिशिक्षाश्वशिक्षासुकुशलः
श्लक्ष्णभाषणः॥ निमित्तेकुशल
ज्ञानेवेत्ताचैवचिकित्सिते कृत
ज्ञःकर्मणांशूरस्तथाक्लेशसहो
ऋजुः व्यूहतत्वविधानज्ञःफल्गु
सारविशेषवित् राज्ञासेनापतिः
कार्योब्राह्मणःक्षत्रियोथवा प्रां
शुःसुरूपोदक्षश्चप्रियवादीनचोद्ध
तः चित्तग्राहश्चसर्वेषांप्रतीहारो
विधीयते यथोक्तवादीदूतस्याद्दे
शभाषाविशारदः। शक्तःक्लेश
सहोवाग्मीदेशकालविभागवित्
विज्ञातदेशकालश्चदूतःस्यात्
समहीक्षितः। वक्ताप्रियस्ययः
कालेसदूतोभूपतेर्भवेत् प्रांशा
वोव्यायताःशूराहृढभक्तानिरा
कुलाः राज्ञातुरक्षिणःकार्याः
सदाक्लेशसहाहिताः अनाहा
र्योन्यपांसश्चदृढभक्तिश्चपार्थि
वे तांबूलधारीभवतिनारीवाथ

यतद्गुणा षाड्गुण्यविधितत्वज्ञो
देशभाषाविशारदः॥ संधिविग्रहि
कःकार्योराज्ञानयविशारदः आ
यव्ययज्ञोलोकज्ञोदेशोत्पत्तिवि
शारदः॥ कृताकृतज्ञोभृत्यानांज्ञे
यःस्याद्देशरक्षिता। सुरूपस्तरुणः
प्रांशुर्दृढभक्तिःकुलोचितः शू
रःक्लेशसहश्चैवखड्गधारीप्रकी
र्तितः शूरश्चबलयुक्तश्चगजाश्व
रथकोविदः धनुर्धारीभवेद्राज्ञः
सर्वक्लेशसहःशुचिः। निमित्तश
कुनज्ञानहयशिक्षाविशारदः ह
यायुर्वेदतत्वज्ञोभुविभागविशे
षवित्। स्वामिभक्तोमहोत्साहः
सर्वेषांचप्रियंवदः॥ बलाबलज्ञो
रथिकःस्थिरदृष्टिःप्रियंवदः शू
रश्चकृतविद्यश्चसारथिःपरिकी
र्तितः अनाहार्यःशुचिर्दक्षश्चि
कित्सितविदांवरः। सूदशास्त्रवि
शेषज्ञः सूदाध्यक्षःप्रशस्यते॥ सूद
शास्त्रविधानज्ञाःपराभेद्याःकुला
गताः। सर्वेमहानसेधार्यालूम
केशनखाकुलाः॥ समःशत्रौचमि
त्रेचधर्मशास्त्रविशारदः विप्रमुख्यः
कुलीनश्चधर्माधिकरणोभवेत्
कार्यास्तथाविधास्तत्रद्विजमुख्याः
सभासदः। सर्वदेशाक्षराभिज्ञः सर्व

शास्त्रविशारदः ॥ लेखकः क
थितो राज्ञः सर्व्वाधिकरणेषु वै । शी
र्षोपेतान् सुसम्पूर्णान् समश्रेणिग
तान् समान् । अन्तरान् वै लिखेद्य
स्तु लेखकः स वरः स्मृतः ॥ उपाय
वाक्यकुशलः सर्व्वशास्त्रविशार
दः । बह्वर्थवक्ता चाल्पेन लेखकः
स्यान्नृपोत्तम । वाक्याभिप्रायतत्त्व
ज्ञो देशकालविभागवित् । अनाहा
र्य्यो नृपे भक्तो लेखकः स्यान्नृपोत्त
म ॥ पुरुषान्तरतत्त्वज्ञाः प्रांशवश्चा
प्यलोलुपाः । धर्म्माधिकरणे का ।
र्य्या जना दानकरा नराः । एवंवि
धास्तथा कार्य्या राज्ञा दौवारिका
जनाः । लोहवस्त्राजिनादीनां रत्ना
नाञ्च विधानवित् । विज्ञाता फल्गुसा
राणामनाहार्य्यः शुचिः सदा । निपु
णश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्ति
तः । आयद्वारेषु सर्व्वेषु धनाध्यक्ष
समा नराः ॥ व्ययद्वारेषु च तथा क
र्त्तव्याः पृथिवीक्षिता । परम्परागतो यः
स्यादष्टाङ्गेषु चिकित्सिते । अनाहा
र्य्यः स वैद्यः स्याद्धर्म्मात्मा च कुलो
द्गतः । प्राणाचार्य्यः स विज्ञेयो
वचनं तस्य भूभुजः । राजन् राज्ञा सदा
कार्य्यं यथा कार्य्यं पृथग्जनैः । हस्ति
शिक्षाविधानज्ञो वनजातिविशारदः

क्लेशक्षमस्तथा राज्ञो गजाध्यक्षः
प्रशस्यते । एतैरेव गुणैर्युक्तः स्था
सनश्च विशेषतः । गजारोही न
रेन्द्रस्य सर्व्वकर्म्मसु शस्यते ॥ हय
शिक्षाविधानज्ञश्चिकित्सित
पारगः । अश्वाध्यक्षो महीभर्त्तुः स्वा
सनश्च प्रशस्यते । अनाहार्य्यश्च
शूरश्च तथा प्राज्ञः कुलोद्गतः । दु
र्गाध्यक्षः स्मृतो राज्ञः उद्युक्तः सर्व्व
कर्म्मसु । वास्तुविद्याविधानज्ञो लघु
हस्तो जितश्रमः । दीर्घदर्शी च शूर
श्च स्थपतिः परिकीर्त्तितः । यन्त्रमुक्ते
पाणिमुक्ते अमुक्ते मुक्तधारिणि । अ
स्त्राचार्य्यो नियुद्धे च कुशलश्च वि
शिष्यते । हृष्टः क्लेशक्षमः शक्तः पि
तृपैतामहः शुचिः । राज्ञामतः पुरा
ध्यक्षो विनीतश्च प्रशस्यते ॥ एवं स
प्ताधिकारेषु पुरुषाः सप्त ते परं ॥
एवं सप्ताधिकारेषु पुरुषाः सप्त ते
परे । पञ्चशताधिकरणाः पुरुषाः
सप्त ते परं । यन्तः पुरवराः कार्य्या
राज्ञा सर्व्वेषु कर्म्मसु । स्थापना जा
तितत्त्वज्ञः सततं प्रतिजागृता ॥
राज्ञः स्यादायुधागारे दक्षः कर्म्म
चोदनः । कर्म्मणामपरिमेयानि
राज्ञामुक्तानि तत्र वै उत्तमाधममध्या
नि बुद्ध्वा कर्म्माणि पार्थिवः । उत्तमा
धममध्येषु पुरुषेषु नियोज

जयेत् । नरकर्म्मविपर्य्यासाद्राज्ञा ना
शमवाप्नुयात् । नियोगं पौरुषं भ
क्तिं श्रुतं शौर्य्यं कुलं नयं ॥ ज्ञात्वा
वृत्तिं विधातव्या पुरुषाणां मही
क्षिता । पुरुषान्तरविज्ञानतत्त्व
सारनिबन्धनात् ॥ बहुभिर्म्मन्त्रये
त्कामं राजा मन्त्रं पृथक् पृथक्
मन्त्रिणामपि नो कुर्य्यान्मन्त्री मन्त्र
प्रकाशनं । क्वचित्कस्यापि विश्वा
सो भवतीह सदा नृणां । निश्चयश्च
सदा मन्त्रे कार्य्य एकेन सूरिणा ॥
भवेद्वा निश्चयावाप्तिः परबुद्ध्युप
जीवनात् । एकस्यैव महीभर्त्तुर्भूयः
कार्य्यो विनिश्चयः । ब्राह्मणान् पर्य्यु
पासीत त्रयीनामसुनिश्चिता ॥
नासच्छास्त्रवतो मूढांस्ते हि लोक
स्य कण्टकाः । वृद्धांश्च नित्यं सेवेत
विप्रान् वेदविदः शुचीन् । तेभ्यो
हि शिक्षेद्विनयं विनीतात्मा हि
नित्यशः । समग्रां वशगां कुर्य्यात्
पृथिवीं नात्र संशयः । बहवो वि
नयाद्भ्रष्टा राजानः सपरिच्छदाः ।
वनस्था अपि राज्यानि विनयात् प्रति
पेदिरे । त्रैविद्येभ्यस्त्रयीं विद्यां द
ण्डनीतिञ्च शाश्वतीं ॥ आन्वीक्षि
कीं चात्मविद्यां वार्त्तारम्भांश्च लो
कतः । इन्द्रियाणां जये योगं समा

तिष्ठेद्दिवानिशं ॥ जितेन्द्रियो हि श
क्नोति वशे स्थापयितुं प्रजाः ।
यजेत राजा क्रतुभिर्व्विविधैराप्त
दक्षिणैः ॥ धर्म्मार्थञ्चैव विप्रे
भ्यो दद्याद्भोगान् धनानि च ।
सांवत्सरिकमाप्तैश्च राष्ट्रादाहा
रयेद्बलिं ॥ स्याच्चाम्नायपरो लो
के वर्त्तेत पितृवन्नृषु । आह्नानां
कुरुकुलान् द्विजानां पूजको भवे
त् ॥ नृपाणामक्षयो ह्येष विधि
र्ब्राह्मो विधीयते । न तं स्तेना न चा
मित्रा हरन्ति न च नश्यति ॥ तस्मा
द्राज्ञा विधातव्यो ब्राह्मणेष्वक्षयो
निधिः । समोत्तमाधमै राजा त्वा
हूतः पालयेत् प्रजाः ॥ न निवर्त्ते
त संग्रामात् क्षात्रव्रतमनुस्मरन् ।
संग्रामेष्वनिवर्त्तित्वं प्रजानां परि
पालनं ॥ शुश्रूषा ब्राह्मणानाञ्च रा
ज्ञां निःश्रेयसं परं । कृपणानाथवृद्धा
नां मानवानाञ्च रोगिणां ॥ योगक्षे
मञ्च वृत्तिञ्च तथैव परिकल्पयेत् ।
वर्णाश्रमव्यवस्थाने तथा कार्य्यो
विशेषतः ॥ स्वधर्म्मप्रच्युतान् रा
जा स्वधर्म्मे स्थापयेत्तथा । आश्रमेषु
यथाकार्य्यं तैलं भाजनभोजनं ।
स्वयमेवानयेद्राजा सत्कृतान्नावमा
नयेत् । तापसे सर्व्वकार्य्याणि

राजामात्मानमेवच निवेदयेत्
प्रयत्नेन देववच्चिरमर्च्चयेत्।
देवशेषेदिनशेषे च जीवकाच
मानवैः॥ एकोकात्मानसेवेत
प्रतिवाधार्थमागतो। नास्याश्चि
द्द्रपरोविद्यात्विद्याच्छिद्रं परस्यत
गूहेत्कूर्मइवांगानि रक्षेद्विवर
मात्मनः नविश्वसेदविश्वस्ते
विश्वस्तेनातिविश्वसेत् विश्वा
साद्भयमुत्पन्नंमूलान्यपिनि
कृन्तति। विश्वासयेच्चाप्यपरं त
त्वभूतेन हेतुना वकवच्चिन्तयेदर्था
न्सिंहवच्चपराक्रमेत् वृकवच्चाव
लुंपेत शशवच्चविनिक्षिपेत् द्द
ढप्रहारीचभवेत्तथाशूकरवेद्र
पः चित्राकारश्च शिखिवद्दृढभक्त
स्तथाश्ववत् भवेच्चमधुराभाषीत
थाकोकिलवन्नृपः काकशंकीभ
वेच्चित्यमाज्ञातानवसतिंवसेत् नापरी
क्षितपूर्वंचभोजनेशयनंस्पृशेत्।
वस्त्रंपुष्पमलंकारंयच्चान्यन्मनु
जोत्तम नगाहेज्जलंसंवाधंनेयाज्ञा
तंजलाशयं अपरीक्षितपूर्वंतुपु
रुषैराप्तकारिभिः नारोहेत्कुंज
रंव्यालंनादान्तंतुरगंतथा। ना
विज्ञातांस्त्रियंगच्छेत् नैवदेवो
त्सवेवसेत् नरेंद्र लक्ष्म्या

धर्मज्ञानाशयेयोभवेन्नृपः सहृ
ताम्रकनकाद्दृता सततंमतिमा
निताः॥ राज्ञः सहायाः कर्त्तव्याः
पृथिवीजेतुमिच्छता यथार्हंवा
प्यसमतान् राजा कर्मसु योजयेत्
धर्मिष्ठान्धर्मकार्येषुशूरान्स
ग्रामकर्मसु निपुणानर्थकृत्येषु
सर्वत्रचतथाशुचीन् स्त्रीषुषण्ढान्
नियुंजीततीक्ष्णान्दारुणकर्मसु ध
र्मेचार्थेचकामेचभयेचवरविनेद न रा
जायथार्हंचकुर्य्याद्उपधाभिः परीक्ष
णं समतीत्योपधानूभृत्यान्कुर्य्या
द्धस्तिवनेचरान् तत्पादान्वेषणेयु
क्तान्स्तद्ध्यक्षांश्चकारयेत् एवमा
दीनिकर्माणिनृपैः कार्य्याणिभा
गव सर्वथानेष्यतेराज्ञस्तीक्ष्णोप
करणक्रियः पापस्याप्यानिकर्माणि
यानिराज्ञोन्यपोत्तम संतस्तानिन
कुर्वीत तस्मात्तान् विवर्ज्जयेन्नृपः।
नेष्यते पृथिवीशानां तीक्ष्णोपक
रणक्रिया यस्मिन्कर्म्मणियस्यस्या
त् विशेषेणचकौशले तस्मिन्क
र्मणितेराज्ञापरीक्ष्यविनियोजयेत्
पितृपैतामहान्भृत्यान्सर्वक
र्मसुयोजयेत् विनादायादकृत्ये
षुपरीक्ष्यकृतान्नरान् नियुंजीत
महाभागतस्मात्तेहितकारिणः॥

परराजगृहात्प्राप्त जनसंग्रहका
म्यया। दुष्टान्वाप्यथवादुष्टानाश्र
यीतप्रयत्नतः॥ दुष्टंविज्ञायविश्वा
सं नकुर्य्यात्तत्रभूमिपः। वृत्तिंतस्या
पिवर्त्तेतजनसंग्रहकाम्यया॥
राजादेशान्तरप्राप्तं पुरुषंपूजये
त्प्रभुः। ममायंदेशसम्भाव
कुमानेनचिंतितः॥ तेषांचारणं
चारित्रंराजा विज्ञाय नित्यदा।
गुणिनांपूजनं कुर्य्यान्निर्गुणानां
चशासनं। कथिताः सततंराज
न् राज्ञांनश्चारचक्षुषः। स्वकेदेशे
परेदेशेज्ञानशीलान् विचक्षणा
न्॥ अनाहार्य्यान् क्लेशसहान्
नियुंजीत सदाचरान्। जनस्यावि
दितान्सौम्यांस्तथाज्ञातान्परस्
परं॥ वणिजोमंत्रकुशलान्सां
वत्सरचिकित्सकान्। तथाप्र
व्रजिताकारांश्चारान्राजानि
योजयेत् नैकस्यराज्ञाश्रद्दध्यात्
चारस्यापिचभाषितं द्वयोःसं
वदमाज्ञायश्रद्दध्यान्नृपतिस्ततः
परस्परस्याविदितौयदिस्या
तांचतावुभौ। तस्माद्राजाप्रयत्ने
नगूढाश्चारान्नियोजयेत्
राज्यस्यमूलमेतावत् याराज
श्चारदृष्टिता चाराणामपिय
त्नेन राज्ञा कार्य्यं॥

परीक्षणं॥ विरज्यतेतथाकेनवि
ज्ञेयंतन्महीक्षिता। अनुरागात्
कथंलोकेकर्मकार्य्यंमहीक्षिता
लोकरागापरागौचभृत्यानांच
गुणागुणान्। सर्वंराज्ञाचराय
त्तेष्वयत्नपरोभवेत्॥ कर्मणाके
नमेलोकेजनः सर्वोनुरज्यते वि
रज्यतेकेनतथाविज्ञेयंतन्मही
क्षिता विरागजनकंलोकेवर्ज्ज
नीयंविशेषतः जनानुरागप्रभ
वा हि लक्ष्मी राज्ञां मता भार्गव
शाचेद्र। तस्मात्प्रयत्नेननरेंद्र
मुख्यैः कार्य्योनुरागोभुविमानवे
षु इतिमात्स्ये १८९ अध्यायः॥
अपरंच। राजोवाच। वदत्वो भूपते
धर्मांस्त्वान्वक्तुंनहिशक्यते। त
स्मात् समासतोब्रूहिमहाभाग
निशामय॥ पृथिवीवेसर्वगुणा
सहामिथुनमाहरेः। नारायणा
द्दृतेनान्यावसुमन्याः पतिर्भवेत्
नारायणांशजोराजामनुष्येषु
कस्यचन अतस्तद्दुर्नयंत्यक्त्वा
सर्वांनीतिं समाचरेत्॥ नीति
शास्त्रीन्नृपोयस्तु विपत्तिर्नीतिः
तस्यैव त्रिभुवनक्षितिपृथिवीकं
टकैः परिवर्जितः॥ यस्मिनरो
चते नीतिर्भूपालायदुरात्म
ने। अष्टश्रीराचिरेणैव स

भवेद्राज्यसंक्षयः ॥ आत्मवर्गेऽलंघ्य
ग्रे विश्वे विजयेत्सर्वमिच्छता ।
मंत्रित्वे पंडितो राजा नियोज्यः
सर्वदैव हि ॥ अवज्ञया महीभ
र्त्तुस्त्यजन्ति सहसैव बुधाः । सभा
यां बुधहीनायां नीतिर्बलवती
न हि ॥ ततो नीतौ विपन्नायां स
हसा धरणीपतेः । राजश्रियो
विनश्यन्ति सकोषबलवाहनाः
ज्ञानिनां गणकानाञ्चैव वैद्यानाञ्च
बोधवाक्यया । नृपाः कल्याणमि
च्छन्तो न हि वेत्ति कदाचन गतश्री
र्गणकद्वेषी वैद्यद्वेषी च वर्जितः ।
ज्ञानिद्वेषी निष्कुलः स्यान्नद्विज
द्वेषी विलासिभाक् राजानः स्थिर
रः प्रोक्ताः पुत्रा जनपदास्तथा । अ
तो भूपाः पालयन्ति प्रजाः पुत्रानि
वौरसान् । पौरलोकवधूं राजा प
श्येन्नतु वधूमिव । पौरलोके
न धनाकर्षयेन्न यथा स्नेहान्निजा
त्मजे । प्रजापीडाकरा ये च भूपाला
श्चतिपापिनः । चिरस्थायि पदस्ते
षां विनेयादीर्घदर्शिनः ॥ विवे
किनो महीपालाः पालयन्
ति यथा प्रजाः । तथा तानपि
देवेशः पालयत्यनिशं हरिः
प्रजानां पालनं दानं देविपरा
क्रमप्रभावतः ॥ ॥

द्वाभ्यां येवर्जिता भूपास्ते विज्ञेया
नृपाधमाः ॥ दुष्टानां शासनेनैव
शिष्टानां प्रतिपालनेः । प्रकुर्वन्तो म
हीपालाश्चिरं नन्दन्ति भूतले ॥ नृपा
येनोपार्जितं वित्तं यत्नादेतन्मही
पतिः । निर्वित्तो हि महीपालो
विपन्नो न हि निस्तरेत् ॥ नृपाः क
ल्याणमिच्छन्तो निजराज्यस्य भाग्य
ये । पश्यन्ति नित्यं विप्रेन्द्रसत्वरा
शास्त्रवचनः ॥ परचक्रभयं यत्ना
वन्नता नित्यं चिन्तयेद्धृदि । आ
गतेन भये भूपश्चाचरेन्निर्भयो यथा
ज्ञातो वापि च मित्रे वा पुत्रे वापि च
मन्त्रिणि । कुर्यान्नु खेन गाम्भीर्य
मनसा प्रेमकेवलं ॥ मन्त्रिणो
ज्ञानयुः पुत्राः प्रजाश्चाथ नरस्त
था । गाम्भीर्यहीनं भूपालं मन्
तेन हि भूपवत् । तिष्ठन्ति प्रथमं हृ
दैव सन्ति पुरतस्तदा । लोकाः श्रि
यं च दिक्षु निष्कगाम्भीर्यभूप
तेः ॥ एकस्मै मन्त्रिणे राज्ञा चिर
राजत्वमिच्छता । कर्तव्यां सक
लेनाज्ञे हृदयेनैव भूवरः ॥ अन्यत
लवहहीनां भृत्यानां सम्पदेह
वेत । तस्मात्सर्वदा हि भूपालो भ
ना मन्त्रं नियोजयेत् ॥ सू
रिः स्त्री विजितो राजा गीत
वाद्यरतः सदा । ॥

चतुरंगबलैर्हीनः सहसा विपदं
व्रजेत् ॥ स्वाचार ग्रहणं सत्वे स्व
वाक्यप्रतिपालनं । गाम्भीर्यञ्चे
ति भूपानां लक्षणानि द्विजो
त्तम ॥ सकृद्य नृपति र्यस्तु प्रा
(विवर्जितः कथंन्तप) तियेनन जिता परमेदिनी ॥
जिता या परमेदिन्या यावत्तया
देवेजेन्नृपः । प्रतिपादेऽश्वमेध
स्य फलं प्राप्नोति चाक्षयं परभू
मि जयाकांक्षी हतोवाष्पतिर्यु
धि । तदा गच्छेत् परं धाम विमु
क्तः सर्वपातकैः ॥ युधिप्राप्त
जयो राजा प्राप्नोति परमं पदं ।
समाहृतः प्राप्नमत्त्रिदिवीं द्रस
पदं लभेत् ॥ त्यक्त्वा सत्वं स्वक्ष
शस्त्र पलायनपरायणं । योद्धा
रं युधि योहन्यात्स भूपो याल्य
धोगति ॥ पलायनपरो युद्धे न
हन्ता चद्विजोत्तम । तावुभावपि
तिष्ठेतां नरके त्वन्तरः समे ॥
युधि साहसवान्योद्धा न हन्ताव
महीश्वर । तिष्ठेतां तावपि स्वर्गे
यावच्चन्द्रदिवाकरौ वक्तनाशक्ति
मुक्तेन संक्षेपाद्दुच्यते मया । प्र
जापालनकृद्राजा कदाचिन्नाव
सीदति इति पाद्मे क्रियायोगसारे
२० ॥

ऽध्यायः ॥
राजनीलं क्ली मरकतमणिः । इ
ति शब्दरत्नावली ॥
राजन्यः पुं क्षत्रियः इत्यमरः ।
राजपुत्रः ॥ अग्निः । इत्युणादिको
षः ॥ दीपिकावृक्षः । इति जटा
धरः ॥
राजन्यकं क्ली क्षत्रियसमूहः
इत्यमरः ॥
राजन्वान् त्रि सुराजयुक्तदेशः
इत्यमरः ॥ प्रजापालनादिस्वध
र्मपरायणराजयुक्तदेशे राजन्वान्
राजा विद्यतेऽस्येति मतुप् पादि
निपसेपायावत्तः । यदुक्तं तन्त्रा
न्तरे । भूम्निनिन्दाप्रशंसासु नित्य
योगेऽतिशायने । संसर्गेऽस्तिवि
वक्षायां भवन्ति मतुबादय इति ।
सुमतेरत्र स्पष्टं भूमादयोऽपि अ
र्थान्तरलभ्यन्त एव । निपा
तनात्वलोपाभावः । नत्वेराज्ञरा
ज्ञोनस्यलोपमतांतिपरे स्वरा
शिस्वधर्मपरत्वात् शोभना रा
जानोऽत्रेति नाञ्ज्यायस्य वेति
शनिषेधः । देशो लोकोऽपल
वार्णश्च त्रिलोके स्यादर्थः ।
इति टीकायाम्भरतः ॥
राजपटोलः पुं पटोलः । इति

रत्नमाला ॥
राजपटोली स्त्री मधुरपटोली ।
इति राजनिर्घण्टः ॥
राजपट्टः पुं मणिविशेषः तत्
पर्य्यायः । विराटजः २ । इति त्रि
काण्डशेषः ॥
राजपट्टिका स्त्री चातकपक्षी इति
हारावली ॥
राजपथः पुं राजमार्गः । तस्य
लक्षणं यथा । धनूंसि दश विस्ती
र्णः श्रीमान् राजपथः कृतः नृवा
जिरथनागानामसंबाधः सुसंच
रः इति देवीपुराणे ॥
राजपर्णी स्त्री प्रसारिणीलता ।
इति राजनिर्घण्टः ॥
राजपलाण्डुः पुं रक्तवर्णपला
ण्डुः लालप्याज इति भाषा तत्प
र्य्यायः । यवनेष्टः २ नृपाह्वयः
३ राजप्रियः ४ महामूलः ५ दीर्घ
पत्रः ६ रोचकः ७ नृपेष्टः ८ नृपकन्दः
९ महाकन्दः १० नृपप्रियः ११ रक्त
कन्दः १२ राजेष्टः १३ अस्य गुणाः
शिशिरत्वं । पित्तकफनाशित्वं ।
दीपनत्वं । बलनिद्राकरत्वं च ।
इति राजनिर्घण्टः ॥
राजपीलुः पुं महापीलुवृक्षः
इति राजनिर्घण्टः ॥

राजपुत्रः पुं बुधग्रहः । इति श
ब्दरत्नावली ॥ महाराजचूतः । इ
ति राजनिर्घण्टः ॥ वर्णसंकरजा
तिविशेषः । रजपुत इति भाषा ।
यथा । वैश्यादम्बष्ठकन्यायां राज
पुत्रस्य संभवः । इति पराशरप
द्धतिः ॥ करणकन्यायां क्षत्रिया
ज्जातश्च । इति पुराणं ॥ राजनन्द
नः । तत्पर्य्यायः । युवराजः १
कुमारः २ भर्त्तृदारकः ३ इत्य
मरः ॥ तस्य रक्षणं यथा । राज
पुत्रस्य रक्षा च कर्त्तव्या पृथिवी
क्षिता । आचार्य्यश्चास्य कर्त्तव्यो
नित्यमुक्तः स्वरक्षणे धर्म्मकामा
र्थशास्त्राणि धनुर्वेदं च शिक्षयेत्
रथे च कुञ्जरे चैनं व्यायामं कार
येत् सदा ॥ शिल्पानि शिक्षयेच्चै
वं नाप्तैर्मिथ्याप्रियं वदेत् । गुणा
धानमशक्यं तु यस्य कर्त्तुं स्वभा
वतः बन्धनं तस्य कर्त्तव्यं गुप्तदे
शे सुखान्वितं । अविनीतकुमारं हि
कुलमाशु विशीर्य्यते अधिकारे
षु सर्व्वेषु विनीतं विनियोजयेत् ।
आदौ स्वल्पे ततः पश्चात् क्रमेण
थ महत्स्वपि मृगयां पानम
क्षांश्च वर्ज्जयेत् पृथिवीपतिः प
तान्यासेवमानास्तु विनष्टाः पृथिवी

क्षितः बहवोऽन्यपथा ह्येता ये
षां संख्या न विद्यते । मृगयाटनदि
वास्वप्नं विशेषेण विवर्ज्जयेत्
वाक्पारुष्यं न कर्त्तव्यं दण्डपारु
ष्यमेव च परोक्षनिन्दा च तथा
वर्ज्जनीया महीक्षिता अर्थस्य
दूषणं राजा द्विःप्रकारं विवर्ज्जये
त् अर्थानां दूषणं चैव तथा चा
र्थेषु दूषणं प्राकाराणां समुच्छे
दं दुर्गादीनामसंक्रिया अर्था
नां दूषणं प्रोक्तं विप्रकीर्णत्वमेव
च अर्थस्य दूषणं प्रोक्तमसत्
कर्म्मप्रवर्त्तनं कामं क्रोधं मदं मानं
लोभं दर्पं तथैव च । जेतव्यमरि
षड्वर्गमादौ पृथिवीक्षिता प
तेषां विजयं कृत्वा कार्य्यो भृत्यज
यस्ततः । कृत्वा भृत्यजयं राजा
जनपदं जयेत् कृत्वा तु विजयं
तेषां शत्रून् बाह्यांस्ततो जयेत्
बाह्याश्च त्रिविधा ज्ञेयास्तुल्या
ऽनन्तरकृत्रिमाः गुरवस्तेषु ।
पूर्व्वं वै तेषु यत्नपरो भवेत् ॥
पितृपैतामहं मित्रं सामन्तं च
तथा रिपोः ॥ कृत्रिमं च महा
भाग मित्रं त्रिविधमुच्यते । त
थापि च गुरुः पूर्व्वं भवेत्तत्रापि चा
हतः ॥

स्वाम्यमात्यो जनपदो दुर्गं सैन्यं त
थैव च कोषो मित्रं च धर्म्मज्ञ सप्ता
ङ्गं राज्यमुच्यते सप्ताङ्गस्यापि राज्य
स्य मूलं स्वामी प्रकीर्त्तितः तन्मू
लत्वात्तथाङ्गानां राजा रक्ष्यः प्र
यत्नतः षडङ्गरक्षा कर्त्तव्या त
था तेन प्रयत्नतः । अङ्गेभ्योऽयस्तु
थैकस्य द्रोहमाचरतेऽल्पधीः व
धस्तस्य तु कर्त्तव्यः शीघ्रमेव मही
क्षिता न राज्ञा मृदुना भाव्यं मृदु
र्हि परिभूयते न भाव्यं दारुणेना
पि तीक्ष्णादुद्विजते जनः । काले
मृदुर्यो भवति काले भवति दारु
णः ॥ राजा लोकद्वयापेक्षी तस्य
लोकद्वयं भवेत् । भृत्यैः सह मही
पालः परिहासं विवर्ज्जयेत् भृ
त्याः परिभवन्तीह नृपं हर्षवशं ग
तं । व्यसनानि च सर्व्वाणि भूपतिः
परिवर्ज्जयेत् ॥ लोकसंग्रहणा
र्थाय कृतकव्यसनो भवेत् । शौ
ण्डीर्यस्य नरेन्द्रस्य नित्यमुद्रिक्तचे
तसः ॥ जना विरागमायान्ति स
दा दुःसेव्यभावतः । स्मितपूर्व्वाभि
भाषी स्यात् सर्व्वस्यैव महीपतिः
वध्येष्वपि महाभाग भ्रुकुटीं न स
माचरेत् भाव्यं धर्म्मभृतां श्रेष्ठ स्थू
ललक्षेण भूभुजा । स्थूललक्षस्य व

शाखास्सर्वा भवति मेदिनी। अदीर्घ
सूत्रश्च भवेत् सर्वकर्मसु पार्थिवः
दीर्घसूत्रस्य नृपतेः कर्महानिर्ध्रुवं
भवेत्। रागे द्वेषे च कामे च द्रोहे पा
पे च कर्मणि अप्रिये चैव कर्त्तव्ये
दीर्घसूत्रः प्रशस्यते राज्ञा संभृत
मंत्रेण सदा भाव्यं द्विजोत्तम त
स्मात्संभृतमंत्रस्य तेषाः सर्वाप
दोद्भवाः कृत्यान्येव तु कर्माणि
जायंते यस्य भूपतेः नाश्वाणि
महाभाग तस्य स्याद्वसुधा वशे
मंत्रमूलं सदा राज्यं तस्मान्मंत्रम
रक्षितं कर्त्तव्यं पृथिवीपालैर्मं
त्रभेदभयात् सदा। मंत्रवित् सा
धितो मंत्रः संपत्तीनां प्रदो वरः
मंत्रच्छलेन बहवो विनष्टाः पृ।
थिवीक्षितः आकारैरिंगितैर्गत्या
चेष्टया भाषितेन च॥ नेत्रवक्त्र
विकारैश्च गृह्यतेऽन्तर्गतं मनः
नयस्य कुशलैस्तस्य वशाः सर्वा व
सुंधरा भवतीह महीभर्त्तुः सदा
पार्थिवनंदन नैकस्तु मंत्रयेन्मं
त्रं न राजा बहुभिः सह नारोहे
द्विषमां नावं नापरीक्षितनावि
कां। ये चास्य भूमिं जयतो भवेयुः
परिपंथिनः॥ तानानयेद्वशे स
र्वान् सामादिभिरुपक्रमैः यथा

न स्यात् कर्षीभावः प्रजानामनपे
क्षया तथा राज्ञा प्रकर्त्तव्यं स्वरा
ष्ट्रपरिरक्षणं मोहाद्राजा स्वरा
ष्ट्रं यः कर्षयत्यनपेक्षया सोऽ
चिराद्भ्रश्यते राज्यात् जीविताच्च
सबांधवः। भृतो वत्सो जातबलः
कर्मयोग्यो यथा भवेत् तथा रा
ष्ट्रं महाभाग भृतं कर्मसमं भवेत्
यो राष्ट्रमनुगृह्णाति राजा संपरि
रक्षति। संजातमुपजीवेत्स विं
दते सुमहत्फलं। राष्ट्राद्धिरण्यं धा
न्यं च महीं राज्ञा सुरक्षिता नितं
स्वेभ्यः परेभ्यश्च यथा माता य
था पिता नित्यं राजा स्वराष्ट्रयः
कर्षकान्यस्य चैवेच्छया गोपिता
नि सदा कुर्यात् संविभागी प्रि
याणि च अजस्रमुपयोक्तव्यं फ
लं तेभ्यस्तथैव च धर्मकर्मरता
यज्ञविधानेष्वमानुषे नयो दैवम
चिंत्यं हि यो रूपं विद्यते क्रिया एवं
महीं पालयतो स्वभर्त्तुर्लोकानु
रागः परमो भवेच्च। लोकानुराग
प्रभवा च लक्ष्मीर्लक्ष्मीवतश्चैव
परा च कीर्त्तिः इति मात्स्ये २१४
अध्यायः॥
राजपुत्रिका स्त्री शरारिपक्षी।
शारालीइति भाषा यथा शरारि

3917

रारिराडिश्च हापुत्री राजपुत्रिका
इति जटाधरः राजकन्या च॥ रा
जपुत्री स्त्री कटुतुम्बी॥ रेणुका
जाती॥ राजरीतिः॥ छुछुंदरी।
इति राजनिर्घण्टः मालती यथा
अतिमुक्तकश्चाथ जातिर्मालतीसु
मनाअपि। राजपुत्री मनोज्ञेति
जटाधरः॥ राजकन्या च॥
राजपुष्पः पुं नागकेशरपुष्पवृ
क्षः यथा चाम्पेयः केशरो नाग
केशरः कनकाह्वयः महौषधं
राजपुष्पः फलकः खरद्यान
नः इति शब्दचंद्रिका॥
राजपुष्पी स्त्री करुणीवृक्षः इ
ति राजनिर्घण्टः॥
राजप्रिया स्त्री करुणीवृक्षः इति
राजनिर्घण्टः
राजफणिज्झकः पुं नागरंगवृ
क्षः इति शब्दमाला॥
राजफलं क्ली पटोलं। इति त्रि
काण्डशेषः॥
राजफला स्त्री जंबुः। इति राज
निर्घण्टः॥
राजवदरं क्ली स्नकमलकं लव
ण इति मेदिनी॥
राजवदरः पुं उत्तमकोलिः तत्
पर्य्यायः। नृपश्रेष्ठः २ नृपवदरः
३

राजवल्लभः ४ पृथुकोलः ५ त
नुबीजः ६ मधुरफलः ७ राजकोलः ८
अस्य गुणाः। सुमधुरत्वं। शिशि
रत्वं दाहार्त्तिपित्तवातहरत्वं वृ
ष्यत्वं। वीर्यवृद्धिकरत्वं। शोष
श्रमनाशित्वं च। इति राजनिर्घ
ण्टः॥ राजमल्लिका स्त्री हापुत्री
पक्षी। यथा गोभण्डीरः पंककी
रोहापुत्री राजमल्लिका इति जटाधरः
राजभद्रकः पुं कृष्णनिंबः। इति
राजनिर्घण्टः॥ पारिभद्रक इति
साधुपाठः॥
राजभूयं क्ली राजत्वं यथा स्या
द्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमि
त्यपि। देवभूयादिकं तद्वदित्यमर
कोषदर्शनात्॥
राजभोग्यं क्ली जातीकोषं।
प्रियालवृक्षः पुं। इति शब्द
चंद्रिका॥
राजमण्डूकः पुं वृहद्भेकः वड
बेंग इति भाषा। तत्पर्य्यायः।
महामण्डूकः २ पीताङ्गः ३ पी
तमण्डूकः ४ वर्षाघोषः ५ म
हारवः ६ इति राजनिर्घण्टः॥
राजमल्लः पुं राजामलः राजार
माल इति भाषा। तत्पर्य्यायः।
उत्तेजकः २ उद्धतः ३। इतिनि

काण्डशेषः ॥
राजमार्गः, पुं, राजपथः । तद्विवरणं यथा, राजमार्गसोपानकं यः करोति परिक्रिते वर्षाणामयुतं सोऽपि शक्रलोके महीयते ॥ इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः ॥ अपि च त्रिंशद्धनुर्विविस्तीर्णो देशमार्गस्तैः कृतः । विंशद्धनुर्ग्राममार्गः सीमामार्गो दशैव तु । धनुर्विंशत्प्रविस्तीर्णः श्रीमान् राजपथः कृतः । नृवाजिरथनागानामसम्बाधः सुसञ्चरः । धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः । त्रिकरा चोपरथ्या स्याद्द्विकराप्युपरथ्यका । जङ्घापथश्चतुष्पादस्त्रिपादश्च गृहान्तरः । वृतीपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः ॥ अवकरः परीवारः पादमात्रः समन्ततः । इति देवीपुराणे गोपुरद्वारलक्षणनामाध्यायः ॥
राजमाषः, पुं, वर्व्वटः । वरवटी कडाइ इति भाषा । तत्पर्य्यायः । नीलमाषः २ स्वल्पमाषः ३ नृपमाषः ४ । अस्य गुणाः ॥ कफपित्तहरत्वं । रुच्यत्वं । वातकारित्वं । बलदायकत्वञ्च । इति राजनिर्घण्टः ॥ सारकत्वं स्तुत्यत्वं पित्तहरत्वं । स्वादुत्वं । रूक्षत्वं । कषायत्वं । विषदत्वं । लघुत्वञ्च । इति राजवल्लभः ॥ अन्यच्च । राजमाषो महामाषश्चपलश्चबलः स्मृतः । राजमाषो गुरुः स्वादुस्तुवरस्तर्पणः सरः । रूक्षो वातकरो रुच्यः स्तन्यो भूरिमलप्रदः । इति भावप्रकाशः ॥ कालविशेषेऽस्याभक्ष्यत्वं यथा, नारदीये । निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने । योऽश्नाति पतिराजेन्द्र चाण्डालादधिको हि सः ॥ कार्त्तिके तु विशेषेण राजमाषांश्च वर्ज्जयेत् । निष्पावान् मुनिशार्द्दूल यावदाकृतनारकी ॥ इति तिथ्यादितत्त्वं ॥
राजमुद्गः, पुं, मकुष्टकः । इति हेमचन्द्रः ॥
राजयक्ष्मा, [न्] पुं, क्षयरोगः । इति हेमचन्द्रः ॥ अस्य पर्य्याय निदानौषधादयो यक्ष्मशब्दे द्रष्टव्याः ॥ महापातकजत्वमप्यस्य यथा, विष्णुः । अथ नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुषेषु लक्षणानि भवन्ति । कुष्ठी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः स्वर्णहारी कुनखी गुरुतल्पगो दुश्चर्म्मा । इत्यादिकमेव राणां कि-

क्रियाहीनस्य मूर्खस्य महारोगिण एव च । यथेष्टाचरणस्याहुर्मरणान्तमशौचकं ॥ महारोगिणः पापरोगाख्यकास्तानमरोगवतः । ते च उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽश्मरी इत्यष्टौ पापरोगा नारदोक्ताः । इति शुद्धितत्त्वं ॥ तस्योत्पत्तिरूपस्थानानि यथा, अथ कोपवतस्तस्य दक्षस्य सुमहात्मनः । निश्चक्राम तदा यक्ष्मा नासिकाग्राद्विभीषणः । दंष्ट्राकरालवदनः कृष्णाङ्गारसमप्रभः । अतिदीर्घः स्वल्पकेशः कृशो धमनिसन्ततः ॥ अधोमुखोदरो ह्रस्वः कासविभ्रमसन्ततं ऊर्व्वीणा निम्ननेत्रश्च योषासम्भोगलोलुपः ॥ स चोवाच तदा दक्षं क्व यास्याम्यहं मुने । किं वा चाहं करिष्यामि तन्मे वद महामुने ॥ ततो दक्षस्तं प्राह सोमं याहि द्रुतं भवान् । सोममत्तं भवान्नित्यं सोमं तु निष्ठसेच्छया ॥ मार्कण्डेय उवाच । इति तस्य वचः श्रुत्वा दक्षस्याथ महात्मनः । शनैः शनैस्ततः सोममासाद स चद्रुतं आसाद्य सन्तदा सोमं वल्मीकं पन्नगो यथा । प्रविवेशोऽस्य हृदये छिद्रं प्राप्य महागदः ॥

तस्मिन् प्रविष्टे हृदये दारुणे राजयक्ष्मणि । मुमोच चन्द्रस्तन्द्रीं च विषमाश्रमवांस्ततः ॥ उमाप्रथमे यस्मालीनो राजन्यसौ गदः । राजयक्ष्मेति लोकेऽस्मिंस्तस्य ख्यातिरभूत् द्विजाः ॥ ततस्तेनाभिभूतश्च यक्ष्मणा रोहिणीपतिः । क्षयं जगाम नु दिने ग्रीष्मे शुष्का नदी यथा । तथा चेन्दौ क्षीयमाणे सर्वौषध्यः क्षयं गताः । क्षयं जाताश्चौषधीषु न यज्ञः सम्प्रवर्त्तते । यज्ञाभावान्नु देवानामन्नं सर्वं क्षयं गतं । पर्ज्जन्याश्च ततो नष्टास्ततो वृष्टिर्न चाभवत् ॥ वृष्ट्यभावेन लोकानामाहारोदीर्णतां गतः । दुर्भिक्षत्वसमापन्ने सर्वलोके द्विजोत्तमाः । दानधर्म्मादिकं किञ्चिन्न लोकेषु प्रवर्त्तते । सत्त्वहीनाः प्रजाः सर्व्वा लोभेनोपहता द्विजाः ॥ पापमेव तदा चक्रुर्न धर्म्मे रुचयस्तथा । एतद्दृष्ट्वा तदाभावं दिक्पालाः सपुरन्दराः ॥ जग्मुः क्षोभं परं देवाः सागराश्च ग्रहास्तथा । ततो दृष्ट्वा जगत् सर्वं व्याकुलं दक्षशापितं ब्रह्माणमगमन् देवाः सवैशाकपुरोगमाः । उपसंगम्य लोकेशं संस्पशारं जगतोपतिं ॥ स

एम्याघयथायोग्यमयविष्टास्त
तःसुराः तान्दृष्ट्वानवदनान्वी
क्ष्यब्रह्मालोकपितामहः अभिभू
तान्परैर्गैवस्तत्स्वविषयानिव
यमद्यसमवीक्ष्यत्यरुमिदंकृ
शानं॥ब्रह्मोवाच।स्वागतंभोःसु
रगणाःकिमर्थंयूयमागताः।
दुःखोपहतदेहाश्चयुष्मान्दृष्ट्वा
नोऽस्मलक्षये।निराधारान्निरातं
कान्सुरान्सर्वान्स्तकामकान्
दृष्ट्वास्वविषयेन्यस्तान्कथंप
प्राभिदुःखितान् यद्वभ्रुदेहःख
वीजंयुष्मानवायस्त्वबाधते तत्
कथ्यतामशेषेणसिद्धिंचाप्यवधा
र्यतां।मार्कंडेयउवाच।ततोवृह
स्पतिजीवः कृत्स्नवर्मावल्लोककृ
त् उवाचाभ्यवेतस्मैसुराणां
दुःखकारणं॥स्पष्टसर्वजगा
त्कर्तृलोकेनवयमागताः।
यदस्माकंदुःखवीजंयतोस्मान
भ्रियावयं॥नकचित्संप्रवर्ते
तेयज्ञालोकपितामह॥देवाकुचः
निराधारानिरातंकाःप्रजाःसर्वाःस्व
यंगताः।नचदानादिधर्मांश्चनतपो
सितितैःकचित नैवदर्शतिपर्ययः
क्षीणतोयाभवन्नदिनिः क्षीणाःसर्वा
स्त्वौषधयःप्रास्यालोकाःसमाकुलाः॥
दुःस्वभि:

पीडितावित्रावेदवादान्नकुर्वते।अ
त्रैवैकल्पमासाद्यमियंनेवह्रवः।
प्रजाःक्षीणाश्चयज्ञभागेषुभोगार्हौ
नास्तथावयं।दुर्बलाश्चश्रियाहीना
नानैवशांतिंलभामहे॥रोहिण्या
मंदिरेचंद्रोवक्रगत्याचिरंस्थितः द्व
ययाशेषामुचक्षीणाज्योत्स्नाहीनश्च
वर्तते यदेवास्विषयेतेदेवैश्चंद्रोनैवा
पुरःसरः।कदाचिदपिदेवानांसमा
जेदाभवद्धिये॥कदाचिद्रोहिणींत्य
क्त्वानैवक्वचनगच्छति।यद्यन्यःको
पिनभवेत्तदाचंद्रोवहिर्भवेत् दृश्य
तेसकलाहीनःकलामात्रावशेषि
तः। इतिसर्वत्रलोकेप्रावृत्तःक
ष्टविपर्ययः नेदृष्टाकान्तिश्रीका
लवर्यंतोपारणंगताः।पातालात्
यावद्रत्याय कालकंजादयोऽसुराः
नास्माल्लोकेषुवाध्यंते तावन्तःपा
हिमाश्रयात् स्वयंप्रवर्ततेकस्मा
जगतांवाप्यतिक्रमः॥ नमालीम
स्तनत्सर्वविस्तवेचापिकारणं
मार्कंडेय उवाच एतत् सुराणां
वचनं दिव्यदर्शीपितामहः।श्रु
त्वा तदा समभिध्याय निजगाद
सवोतमान्॥ब्रह्मोवाच॥ ए
एतन्न देवताःसर्वायदर्थं लोक
विप्लवः॥

3921

विप्लवः प्रवर्त्तते पुना येन शा ता
तस्सभविष्यति सोमो दक्षाय
तीकन्या सप्तविंशतिः संख्याया
अश्विन्याद्या वस्त्रस्य भार्यार्थे प
रेणीतवान् परिणीय सताः स
र्वारोहिण्यां सततं विधुः प्रवर्त्ते
तानुरागेण न सर्वासु प्रवर्त्तते
अश्विन्याद्या स्ततःसर्वादौर्भाग्यज्व
रपीडिताः षड्विंशतिर्वरारोहाः
पितरं प्रस्थिताः स्वकं प्रवर्त्तते
निशानाथो रोहिण्यां रागतोऽय
था तथा न तासु भजते तद
तायन्यवेदयन् श्रुतो दक्षोमहा
बुद्धिमांश्च संस्तूय विटपतिं क
न्यकुलतमाभाष्य पुत्र्यर्थेऽनुरोधतः
अनुकृतो यथाकामं दक्षेणास्व
महात्मना समं प्रवर्त्तितं तासु
समयंकृतवान्विधुः सम प्रवर्ति
तं तासु समयंकृतवान्विधुः स
मं नं गीकृते भावं तासु कर्त्तुं हिमां
शुना स्वंजगामततःस्थानंद।
तोपि मुनिसत्तमः गते दक्षे मुनिश्रे
ष्ठे रोषमंततास्तुचंद्रमाः नैव नभावं
ताः प्राप्तकुपिताः पितरंगताः ततो
दक्षः पुनश्चंद्र मनुरुध्य सुतांतरे
समहतिं प्रतिश्राव्य वचनैर्चेद म
व्रवीत् नसमं वर्त्तते चंद्र सर्वासु
समभार्यादि तदा शप्स्यत्वं रुरुषा।

तस्मात्कुरु समंजसं ततो गते
पुनर्दक्षे न समं वर्त्तते यदा तासु
चंद्र स्तदा दक्षं पुनर्गत्वाब्रुवन्क
था नतेवचः सत्कृतं नैवास्मासु प्र
वर्त्तते वयं तपः करिष्यामः स्था
स्यामश्च त्वदंतिके तासा मिति
वचः श्रुत्वा कुपितस्य तदा मुनेः
दयाय चंद्रस्य मनःशापायोत्सुक
तांगते शापायोद्युक्तमनसः कु
पितस्य महात्मनः । तयो
नाम महारोगो नासिकाग्राद्विनिर्ग
तः प्रेषितः सचचंद्राय दक्षेण
मुनिना ततः प्रविष्टो स्तस्य दे
हे स्थित स्तेन चंद्रमाः क्षीणो चं
द्रत्वं याता ज्योत्स्नातस्यमहात्म
नः क्षीणास्तु सर्वज्योत्स्नास्तु सर्वौ
षध्यः क्षयं गताः ओषध्यभावा
लोके ऽस्मिन्यज्ञाः संप्रवर्त्तते ।
यज्ञाभावादनावृष्टि स्ततः सर्वप्रजा
क्षयः यज्ञभागोपभोगेन हीना
ताभवतां तथा दुर्बलत्वं समुत्प
न्नं विकाश्च वनेचरे इतिवः
कथितं सर्वं यथा भूलोकविप्ल
वः येनोपायेन तन्नाशि स्तः
श्रृणुध्वं सुरोत्तमाः ॥
इति कालिकापुराणे २० अ
ध्यायः ॥ ब्रह्मोवाच
गच्छंत भोः सुरगणा दक्षस्य सं

प्रति तं प्रसादय चंद्रार्थे सव
श्रोतो भवेयथा श्रोतो वदे जग
त्सर्वे प्रकृतिस्थं भविष्यति पुष्पा
कंच भवेत्शोभाति रोषधीनांच सं
भवः मार्कंडेयउवाच इति ब्रह्मव
चः श्रुत्वा देवाः शक्रपुरोगमाः।
प्रययुः हृष्टमनसस्तदा दक्ष निवे
शनं यथान्याय मुपस्थाय सर्वे
मुनिवरेश्वराः प्रोचुःप्रजापतिं द
क्षं प्रणम्य श्लक्ष्णया गिरा देवा
ऊचुः प्रसीद सीदतां ब्रह्मन्नस्माकं
वरदाव्ययिनां उद्धरस्व महाबुद्धेऽस्मा
न्हि नः शोकसागरात् यद्रूपं ब्रह्म
संज्ञं तु सृष्टिकृत्परमात्मनः तदंश
स्त्वं परंज्योति विश्वरूपं नतोस्मि ते
दक्षगात्सर्वजगतां प्रजापालनका
रणात् दक्षप्रजापति ख्यातियो
गेशस्त्वन्नमो वयं दक्षाय सर्वज
गतां दक्षाय कुशलात्मने दक्षा
यात्महितायात्तु नमस्तुभ्यं महा
त्मने सततं चिन्त्यमानस्य योगि
भिर्नियतात्मभिः सारस्वताय भूत
स्त्वं दक्षाय परमात्मने योगवि
द्भिर्नताय तु पावनानां परायणः
आयन्नमतः सहसा तस्मै निर्त
नमो नमः ॥ इति
तेषां वचः श्रुत्वा दक्षो यज्ञ
भुक् तदा । प्रादप्रसन्नवदनः

शक्रमाभाष्य सत्वतः दक्षउ
वाच उतःशक्रमहाभाग भवतां
दुःखमागतं दुःखहेतुं वदविभो
श्रोतुमिच्छामहस्तते ममापि य
दिकर्तव्यं भवतां दुःखहानये त
दहं यदि शक्नोमि करिष्यामिहि
तं समं मार्कंडेयउवाच तच्छ्रुत्वा
वचनं तस्य ब्रह्मसूनो महर्षिणः ज
गाद गोपतिः शक्रो वीतिहोत्रोः
शान्तमूर्तिं क्षयं यातो निशानाथ
स्त्वसिंतीणोस्त्वयं गताः सर्वौष
ध्योहि द्विजश्रेष्ठ तद्धानिर्यत्र हानि
कृत यत्ने विनष्टे सकलाःप्रजाः
तद्भयकातराः तृष्णभावान्मह
द्दुःखंप्राप्य नशशाक्याश्च न त्वयो
ऽयं राजिनाथस्य यत्नकोपात्म्य
र्तते समस्त जगतो ब्रह्मन्नभवार्थ
मुपस्थिताः नाधुना तत्रिभुवने
यज्ञस्त्वयंनकिंचन विलयंयाति
विप्रेन्द्र सागराःस्थावराश्चराः न
यज्ञाः संप्रवर्तन्ते न तपस्येति ताप
साः आहार दुःखान्निलीकाःप्र
जातीणा भयातुराः एवं प्रवर्तमाने
विप्रेंद्र विश्वे ऽस्मात्रमाननात्
देत्या नपावकस्याय वाधन्ते ता
न्सुरान् ॥ प्रसीदद
क्षमन्तनंतेवरदं तपोबलात् ।
शोभो चंद्रेसमस्तं वै प्रकृतिस्थं भ

विष्यति मार्कंडेयउवाच इतिते
षांवचःश्रुत्वा प्रजापतिस्ततस्तदा
उवाचतांसुरगणान् हृदयोद्धृत्य
दुर्हरं दक्षउवाच यन्मे वचो
निशानाथे मद्वतं शापकारणं
नकेनापि निदानेन मिथ्याकर्तुं
तदुत्सहे किंतु मद्ववनं यस्मान्न
कोनेन मृषा भवेत् चंद्रोपि च
र्द्धते यस्मात्तमुपाय मपेक्षते त
माख्य उपायोस्ति मासार्द्धेपात
चंद्रमाः क्षयं वृद्धिंच मासार्द्धं
स्वयं भार्यास वर्द्धतां तस्य तद्व
चनं श्रुत्वा तं प्रसाद्य प्रजाप
तिं सर्वे सर्वेस्तत्र गता यत्रास्ति
चंद्रमाः एवमुक्ते त्व वचने दक्षे
णामुनिना द्विजाः यय चन्द्रसमा
गाय भार्याभिःसहितं तदा जग्मु
स्तेब्रह्म सदनं मुदिताःसुरस
त्तमाः तत्र गत्वा महाभागा यथा
दक्षेणाभाषितं तत्सर्वं कथयामा।
सर्वज्ञाणो परमात्मने ब्रह्मास्त
चः श्रुत्वा देवानां सदनं तदा चंद्र
भाग महाशैलं जगाम सहितः
सुरैः तत्र गत्वा सर्वश्रेष्ठः प्रजानां
हितकाम्यया स्नापयामास शुभ्रां
शुं श्वेतलोहितपुष्करे भूत भव्य
भवन्नाथः सर्वमेव पितामहः ।

एतदर्थं चकारात्र सवःपूर्णोजगत्
प्रभुः तत्रस्नातस्य लोकस्य नीरोः
गत्वं प्रजापते चिरायुस्त्वंच सततं
श्वेतलोहितसंज्ञके । तत्र स्ना
तस्य चंद्रस्य शरीरान्तर्गतः गदः ।
राजयक्ष्मा निःससार सर्वरूपो यथो
दितः निःसृतराजयक्ष्मात ब्रह्मा
णांच जगत्पतिं प्रणम्याह किं
करिष्ये क्व गच्छामीत्युवाच स्थानं
पत्नीच लोकेश कल्पमम सदा
तत्र निदेशयानुरूपं मे स्रष्टा त्वं
जगतां यतः मार्कंडेयउवाच
ततो ब्रह्मा पितं पुष्टं निरीक्ष्य तु
शरीरगैः श्रमैः सेनातिभूभैः
तीर्णाचापि निशापतिं दोर्भिःस्वयं
तं गृहीत्वा गिरौ निक्षिप्य दे
वडः श्रमतं गालयामास शरी
राद्राजयक्ष्मनः श्रमतानिच गात्या
शु तदप्तं तदाजले । तीरो
दस्यच विक्षेप मध्ये रहसि लो
कभृत् तस्माद्यमतादिन्दोः क
लाःतीर्णाः पुत्रप्रियाः तासांजन
गाहस्त्वशाश्रूणोन्तीरोद सागरात्
कलामात्रावशेषस्य संसर्गाद्राजय
क्ष्मणः तीर्णाःकलापंचदशा याः
पूर्वं सप्ततामिकाः ताराजयक्ष्म
गर्भास्था श्रूणी भूतास्त्वपीडया

तेजोभ्योत्स्ना कलाभिस्तनिवहंयत्क
लापतेः शरीरं तविथा भूतं
गर्भस्थं राजयक्ष्मणः ज्योतिश्च
णीमभूतज्योत्स्ना सीनाक्षजादि य
क्ष्मणि इवीक्षताःक्षयाःसर्वा गर्भे रमा
स्यच स्थिताः यदानिर्गतयामासक्ष
यंजज्ञा गदान्नवात तदाज्यो
त्स्नायथाज्योतिः सर्वं तस्माद्बहिर्ग
तं क्षीरोदसागरे क्षिप्तं तत्सर्वं ।
विधिना तदा देवाम्बिगिरौ परित्य
ज्यत्वयं गत्वा कृतं ततः तदो
ऽमृतानि प्रक्षाल्य कलाचूर्णानिवा
रिधेः ज्योत्स्नो वाप्यानगामासुरद
हीत्वा तत्रयं गिरिं क्षीरोदा
द्रिरि मागम्य चंद्रभागं तदाविधिः
देव मध्ये कलाचूर्णं सुधांज्योत्स्नां
मवीविशत संस्थाप्य तत्रायंत्र
ह्मादेवानां मध्यतस्ततः तमाह
राजयक्ष्माणं तस्यानादि निदेशयं
ब्रह्मोवाच सर्वदा यो दिवा रात्रौ
संध्यायां वनितारतः सेवते स
रंतं तस्मिन्राजयक्ष्मन्वक्ष्यसि ।
प्रतिपणायक्ष्मासकाल पुष्कोगोमेषु
ते चरेत सतप्रवेशपःसततंस्मि
क्ष्माणस्य तथाविधः कृशाख्यास्ट
स्तपुत्रीया भवतःसहस्रीगुणैःसा
ह्रेऽस्तु भार्या सततं भवन्न मनुया

सति क्षीणत्वं भवतः कृतं तत
स्त्वं विषये कुरु द्रुतंगच्छ यथा
कामंचंद्रे त्वं विमुखो भव मा
र्कंडेयउवाच एवंविसृष्टो विधिना
राजयक्ष्मा महागदः पश्यतां सर्वदे
वानां मन्त्रहीनं जगाम स अंतर्हिते
महारोगे ब्रह्मा लोकपितामहः
चंद्रं समग्रयामास कपापंचरशै
पिते तेनक्षीरोदधौतेन सुधा
प्रहेन चाम भूः सम्पात्त्वेत्तुक
लाशैर्णा पूर्ववद्याकरोद्विधुं सेपा
हृपाकला पूर्णाः पूर्ववद्विभो यदा
चंद्र स्तदा सर्वदेवा मुमुदुस्तस्य
दर्शनात अथचंद्र स्तदा पूर्णः
प्रणिपत्यपितामहं उवाचेदंसरस
रोमश्च्युगो नातिहर्षितः सोमउवा
च तस्यानं पूर्ववद्वस्मन्शरीरेमम
वर्तते नवीर्य्यवातथोत्साहो वि
सीदन्यदः संशयः । नोत्स
हे पूर्ववच्चेष्टां विधातं सततमहं
चेष्टाहीन स्त्वनुदिनं वर्तेयं केन
लोकभृत ब्रह्मोवाच प्रक्षस्य य
क्ष्मणासोम यदभूदेग संशयः प
र्वे विशीर्णा भवतस्तत्पूर्णा मभवन
हि शुष्का भवतो देह चूर्णानिः
साविर्तमया शरीरात्सम्हतज्योत्स्ना
शंजसा राजयक्ष्मणः तेषामता

त्वन विधौ तवशो यत्स्थितं जले।
ज्योत्स्नायाश्च सुधायाश्च तेन ही
नो भवान्यतः ततोऽभ्युपायो।
पायं विधास्यामि यथा नात्तिनं
रानेस्तव सीदन्ति सांप्रतं अत्रो
भेद्रवान प्राजापत्यः पुरोडा।
शो हवनीयःपुरोऽध्वरे येन्द्रस्त
तोऽत्र वाग्नेयःभदेयःसर्वतःक्रतो
ततोऽभवताभागः पुरोडाशो म
याकृतः । तेन भागेनभुक्तेन
नित्यपरक्रतेन हि पूर्ववत्ते।
समुत्साहः स्यान वीर्य्यं भविष्य।
ति याश्चामृतकणा स्त्वोयेक्षीरो
दस्थस्थितास्तव शरीर चूर्णाश्च
यत्नेज्योत्स्नायाश्चापि ये कणाः द्र
ष्टुं शक्यन्ति सततं क्षीरसागर मध्य
गाः क्षारोविषेऽन्तरे याते क्षिती
येशंकरांशजः दुर्वासा भविता
विप्रः प्रचंडश्चंड भास्वरः ॥ सम
हेन्द्रस्याविनयोत्थापं दत्वाशदा
रुणं करिष्यति त्रिभुवनं निःश्री
कंसकृद्वासवं श्रिया हीने तदा
लोके भविता लोकविप्लवः य
था भवत्यात्सोम यहूलोलोकवि
प्लवः तन्मात्रेव प्रमादेन त्वमीये
तत्कृतेयुगे भविष्यतिश्चापति
वयावद्युगवतश्च्यं तत्प्रक्षोरेषुसंयोमे

सह देवैः कृतेयुगे क्षीरोदे निर्मयि
ष्यामः शंभु विसृ दत्ते तथा
मप्यानेमन्दरं कृत्वा सर्पराजं तथो
भुक्तं यत्नभागेषु हीनेषु दे
वात्रार्थी वयं ततः मथिष्यामः
समं देवैःक्षीरोदंसहदानवैः ।
तत्क्षीरामृत मिदं यत्स्थितंक्षी
रसागरे तत्समथ्य ग्रहीष्यामो
राशीभूतं तथात्तयं सर्वौ षध्य
स्तरे कृत्वा त्वत्पारीरं तदा वयं
तेष्यामः सागरजले शरीरार्थं।
विधोतव निर्मथ्य सागरंपश्चात्स
मुद्धार्य यदामृतं तदा तवव
पुःतस्मिन्नपूर्वं संभविष्यति ओजो
वीर्य्यामृकं कान्त मत्तयंवसुधाम्
के इदाकृ संधिकं वाहू भविष्य
तिवधु स्तव मार्कंडेयउवाच स
यं स्तुमेव मामाष्य ब्रह्मा लोक
पितामहः विधोःस्त्वयाय मासा
द्वैकृद्धये यत्नवान्भूत यथा द
त्तेणागदितं मासार्द्धं यात्वेंद्रमाः
क्षयं वृद्धिंच मासार्द्धं यत्ने तदा
करोद्विधिः यतःषोडशधा वत्स
तस्योभी विभक्तवान विभज्य
सुरान्सर्वान्समुवाचेद महत्तं ॥
कलाःषोडशचंद्रस्य तत्रैका शंभु
मूर्द्धनि तिष्ठत्यावधि यदाःत्वयं

यांतत्वयं विना स्पर्येण यदि गो
गेण मासार्द्धं दत्तवान्पतः सपाय
पीड्यते चन्द्रो नोपशान्तिः सदा
भवेत् किंत्वस्य या कला शंभो
ज्योत्स्नामयंक्षतंमप्रतिचंतेदश स्याः
कलास्तं स्याः प्रतिमासंक्षयोत्तमाः ।
चतुर्दशकलासंस्थान्यमृतानि पि।
वंतवै प्रतिपत्तिथि मारभ्यभवं।
तस्त्वाचतुर्दशी तेजोभागाः
सूर्य्यविंबं चतुर्दशतिथिक्रमात्
प्रविशंत्त त्क्षयं त्वेवंकृष्णपक्षेवि
धोर्भवेत् यात्तशेषा कलादर्श
द्रविन्वेपलायिता तिष्ठत्तु प्रथ
मे भागेतियोत्तस्यां निशापतेः
द्वितीयेदर्शभागे सूरोद्रिण्याया
तमंदिरं तृतीयेत्त परस्वत्यास्त्वा
त्वा संभुक्तितो विधुः चतुर्थे वत
मंडलेयात्त चंद्रोयेत्तबिंब रथ यो
रकः यावत्कालेन दि कला प्रथ
मास्त्वयमाप्नुयात् एवमेवंकृष्णप
क्षेतावत्स्याप्रतिपत्भवेत् द्विती
याद्रोकृष्णपक्षे वृद्धिर्भासत्वया
विधुः तिथीनांवृद्धि हेतश्च ग्र
के क्रमेतथा भवेत् ततःपुनः
शुक्लपक्षेयावत् सर्वा कलोदिता
वृद्धिमेति भवेत्तावत्प्रतिपत्तिथिग

दितः ततो द्वितीय भागस्यग्रा
ज्योत्स्ना स्वरूदेति स्थितायांवै
कलायांतु गता साधनरेष्यति ॥
पुष्पाभंस्तत्भवेत्पयममृतं यद्दिने
दिने तद्वितीयादितिथिभिः पूर्णा
त्ताभिः सदैव दि स्वयपुष्पत्ततेचं
द्रो ज्योत्स्ना योगात्त्वरोत्तमाः
यथादिवे दिने भागाः त्वयं ।
यांति तथा विधोः । वृद्धिं
गच्छंत्यनुदिनं शुक्लपक्षे ऽन्वहंस्त
राः तेजोभागाः सूर्य्यविंबात्तन्देव
समेष्यति प्रयास्यति कृष्णपक्षे
यथा भागक्रमेतथा ज्योत्स्नाद
रश्मिरश्चान्त्यहं पुन रेष्य
ति तेजोभागः सूर्य्यबिंबादस्तं
वस्यते त्वयं एवंवृद्धिःशुक्लप
क्षेस्यांशोसंभविष्यति पक्षयोः
शुक्लकृष्णत्वचेन्द्रवृद्धि त्क्षयाद्भवेत्
यावत्कालेन योभागः त्वयं वृ
द्धिंच यास्यति तावत्कालमपि
ख्याप्य तिथिःस्यास्यति साधुनः
स्थिरेण वृद्धि यदि वात्तयो वा तु
तेनवृद्धि यदि वात्तयोवा कुत्ता
तिथीनां त सदा त्वयःस्याद्वि
सदृद्धिस्थितिष्ठ मेवेशे त्वयंक
यंच चंद्रेण विना नसंभविष्यति
तस्माद्वयोःपक्षार्थे चंद्रे रक्तदेव

ताः आस्वादनीयः शुभांशुः कला
शेषोन्नमासतः अमावास्यापराह्ने
नुपितृभी योदिती स्वदे ॥
तस्यैवास्वादनात्कयं वृद्धिं या।
स्यति चान्वरं तेन कथेन पि।
तरस्तृप्तिं यास्यंति वैपरां श्री
मार्कंडेयउवाच ततःस्वरग
णाःसर्वे यथोक्तं विधिना तथा च
कृत्लोकहितार्थाय चंद्रस्य त्क्षयहे
तवे महादेवोपि चंद्रार्द्धं स्वरूपं य
स्मात्मनः । जग्राह देवे विधिना
शिरसाभ्युदितोभ्यशं यत्तेमःपरमं
नित्यमजमव्ययमक्षयं ॥ त।
त्वद्रूपा श्चंद्रकलाः शापत्तु त्क्षयेण
ताः प्रविशान्ति यस्य ज्योति रान।
त्स्मनरंपरं योगिनांत तदातेषां
चित्तं तदीव मेष्यति ॥ म
हादेव शिरःसंस्थेलीनेचित्तेसुधानि
धौ चंद्रहासाभवेन्मुक्ति विश्वेदेवैरि
कीकृतिः यत्तज्ञात्वा महादेवः स
यद्दृष्ट्याविनाकृते । द्वितीय
सर्वलोकानांजग्राह शिरसाविधुं ॥
चंद्रज्योत्स्नासमायोगादोषध्यायांति
वृद्धये सर्वैषधीश्च वृद्धास्वया
वर्द्धंते ततो ऽश्वराः ॥ अभ्रे
पुष्करेषु स्वान्स्वान्भागांस्तदेवताः ।
परिरक्षन्ति पितर स्तथा कव्यानि

भूमिव अमृतं ब्रह्मणा स्पृष्टं यदे
वेभ्यः पुरातनं तेन तृप्यन्तिहो
ता ये हव्यभागेन देवताः ॥
यज्ञेनाप्यायिते तद्व ज्योत्स्नाभि
र्वृद्धि मेति वै । यत्तज्योत्स्नावि
ना भूतं तद्वस्यात्तीणममथा
यत्नो ऽस्तस्य यत्तस्य चंद्रमाकार
णोस्त्वयं यत्नो ऽस्य दत्तशापात्त।
रत्नाये तद्विकीर्षितं अथापिकृ
ष्णपक्षेपि सुधा संपीयते सुरैः
तेनःसूर्ये याति शंभो ऽङ्गार्द्ध।
ज्योत्स्निका तथा पुनश्च शुक्ल
पक्षे त शेषादेति कला ततः
ज्योत्स्ना द्वितीयो भागस्तु तेजो
भागो द्वितीयकः अन्यस्तु प्रति
रश्मिदात्सूर्यबिंबाद्यथा क्रमं क
लाःषोडशचन्द्रस्य तत्रैका यांभु
शेखरे सितासितावुभौ पक्षौ ।
शेषाणा शुद्ध्यत्तयो रतिवाःस
र्वमाख्यानं विभक्तश्चन्द्रमा यथा
ब्रह्मणापर्वतमेघे तथात्मस्वन्द्रभा
गतः यत्तभागे स्थिते यस्माद्देवा
र्थमकरोद्विधुं कथ्येस्थितेपि पि
र्यं तिथि वृद्धि त्वयो यथा द्वे
पुराण तमाख्यानं यःशृणोति शा
श्वतः राजमत्सा तस्य कुले नक
दाचिदुविष्यति यस्सणा परिभूतो यः

शृणोति वचनं विप्रैः नचिरा-
त्तस्मात् मुक्तः सर्व्वविघ्नैर्नृसत्तम
इदंस्वस्त्ययनं पुण्यं गृह्यात्प्रयत-
म्परं यःशृणोत्येकचित्तः सम्य-
ङ्महापुण्यभाग्भवेत् इतिकालि-
कापुराणे ४९ अध्यायः

राजयोग्यः त्रि राजार्हः नृपो-
चितः यथा त्रिकोणकेन्द्रके सौ-
म्ये पापे चोपचयस्थिते राज-
योग्या भवेन्नारी सुन्दरी कुल-
ह्लादिनी इतिजातकामृतं ॥

राजरङ्गं क्ली रजतं इतिशब्द-
रत्नावली ॥

राजराजः पुं कुबेरः इत्यमरः
सार्व्वभौमः सुधाकरः इति
मेदिनी ॥

राजरीतिः स्त्री पित्तलविशेषः
तत्पर्य्यायः पाकतुण्डी २ राज-
पुत्री ३ महेश्वरी ४ ब्रह्माणी ५
ब्रह्मरीतिः ६ कपिला ७ पिङ्गला
८ अस्यगुणाः तिक्तत्वं शीतल-
त्वं लवणत्वं शोधनत्वं पाण्डुवा-
त क्रिमि प्लीह पित्त नाशित्वं
च इतिराजनिर्घण्टः

राजर्षि पुं ऋतुपर्णादिराजः इति
त्रिकाण्डशेषः तस्यस्मरणंकलि-
नाशनं यथा कर्कोटकस्यनागस्य
दमयन्त्या नलस्यच ऋतुपर्णस्यरा-
जर्षेः कीर्त्तनंकलिनाशनं इति
महाभारते

राजयक्ष्मा [न्] पुं युधिष्ठिरः इति
धनञ्जयकोषः

राजलक्ष्मीः स्त्री राजश्री यथा
मेषप्रभावनिपुणः प्रमदाविला-
सः श्वेतातपत्रस्य पूजितदेशा-
लाभः हस्त्यश्वलाभ धनधान्यमनोर-
थाःस्यात्तेषां कीदृशा भवति निश्च-
ल राजलक्ष्मीः इतिज्योतिषतत्त्वं

राजवंश्य त्रि राजवंशोद्भवः ।
तत्पर्य्यायः ।
राजबीजी २ ॥ इत्य-
मरः ॥

राजवर्त्म [न्] क्ली राजपथः तत्प-
र्य्यायः घंटापथः संसरणं ३ श्री-
पथः ४ उपनिष्क्रमणं ५ उपनिष्क-
रं ६ महापथः ७ इतिहेमचन्द्रः

राजवला स्त्री भद्रबला गंधभारा-
लिया इति भाषा इत्यमरः

राजवल्लभः पुं राजादनी राजा-
म्रः राजवदरः इतिराजनिर्घ-
ण्टः नारायणदासकविराजकृत-
द्रव्यगुणग्रन्थविशेषः यथा
श्रीनारायणदासेन कविराजेन
धीमता प्रतिसंक्रियते द्रव्यगुणे

ऽथराजवल्लभः इति तस्य द्वि-
तीयश्लोकः नृपप्रिये त्रि ॥

राजवल्ली स्त्री भोयवल्ली उच्छा
इति भाषा इतिरत्नमाला ॥

राजवान् [त्] त्रि राजमात्रयुक्तदेशः ।
यथा सुराज्ञिदेशे राजन्वान्स्यात्ततो-
ऽन्यत्रराजवान् । इत्यमरः

राजवाहः पुं घोटकः इतिशब्द-
चन्द्रिका ॥

राजवाह्यः पुं राजवाहकहस्ती ।
तत्पर्य्यायः उपवाह्यः २ इतिहे-
मचन्द्रः विजयकुञ्जरः ३ इति
त्रिकाण्डशेषः राजवहनीये त्रि

राजवीजी [न्] त्रि राजवंश्यः इत्य-
मरः

राजवृक्षः पुं आरग्वधवृक्षः इत्य-
मरः प्रियालवृक्षः इति मेदिनी ।
लंकाख्यवृक्षः लंकासिज् इ-
ति भाषा ॥ इतिशब्दचन्द्रि-
का

राजशणः पुं पट्टः पाट इ-
ति भाषा इतिशब्दमाला ॥

राजशफरः पुं इल्लिशमत्स्यः ।
इतिहारावली

राजशय्या स्त्री राज्ञः शयनीयं
तत्पर्य्यायः महाशय्या २ इति
हेमचन्द्रः ॥

राजशाकः पुं वास्तूक इतिराज-
निर्घण्टः

राजशुकः पुं पक्षिविशेषः रा-
जसूगा इति हिन्दीभाषा तत्प-
र्य्यायः प्राज्ञः २ शतपत्रः ३ नृप-
प्रियः ४ इतिराजनिर्घण्टः

राजशृङ्गं क्ली राजच्छत्रं तत्पर्य्या-
यः कनकदण्डकं २ इति त्रि-
काण्डशेषः ॥

राजशृङ्गः पुं मद्गुरमत्स्यः इति
हेमचन्द्रः ॥

राजसः त्रि रजोगुणोद्भवः त-
ल्लक्षणं यथा आरम्भरुचिताऽधै-
र्य्यमसत्कार्य्यपरिग्रहः विषयोप-
सेवाचाजस्रं राजसंगुणलक्षणं
आरम्भरुचिता फलार्थं कर्मानुष्ठा-
नशीलता ॥ संक्षेपतस्तु
लक्षणं यथा येनास्मिन्कर्म्मणा
लोके ख्यातिमिच्छति पुष्कलां
नच शोचत्यसंपत्तौ तद्विज्ञेयं तुरा-
जसं ॥ तस्यागति यथा
देवत्वं सात्त्विका यान्ति मनुष्य-
त्वंच राजसाः तिर्य्यक्त्वं तामसा
नित्यमित्येषा त्रिविधा गतिः
तद्गतिप्रकारा यथा झल्ला म-
ल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः
द्यूतपानप्रसक्ताश्च जघन्या राज-
सी गतिः राजानः क्षत्रियाश्चैव १

राज्ञश्चैव पुरोहिताः वादयुद्ध
प्रधानाश्च मध्यमा राजसीगतिः
गंधर्वा गुह्यका यक्षा विबुधानुच
राश्चये तथैवाप्सरसः सर्वा राज
सीषूत्तमा गतिः इति मानवे १२
ध्यायः राजसाहारा यथा क
ट्वम्ललवणात्युष्ण तीक्ष्णरूक्षवि
दाहिनः आहारा राजसस्येष्टा दुःख
शोकामयप्रदाः राजसयज्ञो ।
यथा अभिसंधाय तुफलं दं
भार्थमपिचैव यत् इज्यते भरत
श्रेष्ठ तं यज्ञं विद्धि राजसं राज
सतपो यथा सत्कार मान पूजा
र्थं तपो दंभेनचैव यत् क्रिय
ते तदिह प्रोक्तं राजसं चलम
ध्रुवं राजसदानं यथा यत्तु
प्रत्युपकारार्थं फलमुद्दिश्यवा
पुनः दीयतेच परिक्लिष्टं तद्दानं
राजसं स्मृतं ॥ इति श्रीभग
वद्गीतायां १७ अध्यायः राज
सत्यागो यथा दुःखमित्येव
यत्कर्मकायक्लेशभयात्त्यजेत् स
कृत्वाराजसंत्यागंनैवत्यागफलंल
भेत् राजसज्ञानं यथा ।
पृथक्त्वेन तुयज्ज्ञानं नाना भा
वान्पृथग्विधान् वेत्ति सर्वेषु
भूतेषु तज्ज्ञानंविद्धिराजसं ॥
राजसकर्म यथा यत्तु कामेप्सुना
कर्म साहंकारेण वापुनः क्रियते
बहुलायासं तद्राजसमुदाहृतं ॥
राजसकर्त्ता यथा रागी कर्मफ
लप्रेप्सु र्लुब्धो हिंसात्मकोऽशुचि
। हर्षशोकान्वितः कर्त्ताराजसः
परिकीर्त्तितः ॥ राजसीबु
द्धि र्यथा यया धर्म मधर्मञ्च
कार्य्यञ्चाकार्य्य मेवच अयथावत्प्र
जानाति बुद्धिसा पार्थ राजसी
॥ राजसीधृति र्यथा यया
तुधर्मकामार्थान्धृत्या धारयतेऽर्जु
न प्रसंगेन फलाकांक्षी धृतिः
सा पार्थ राजसी राजससु
खं यथा विषयेंद्रियसंयोगाद्य
त्तदग्रेऽमृतोपमं । प
रिणामे विषमिवतत्सुखं राज
संस्मृतं इतिश्रीभगवद्गीतायां १८
अध्यायः ॥ राजसपुराणा
नि यथा ब्रह्मांडंब्रह्मवैवर्त्तमा
र्कंडेयंतथैवच । भविष्यंवामनं
ब्राह्मं राजसानि निबोधमे ॥
राजसस्मृतयो यथा । आत्र
यं याज्ञवल्क्यंच आत्रेयंसात्तमेव
च कात्यायनं वैसवंच राजसाः
स्वर्गदाःस्मृताः ॥ इति
पाद्मोत्तरखंडे ४३ अध्यायः

राजसदनं क्ली राजगृहं तत्प
र्य्यायः सौधः २ इत्यमरः ॥
भूपालभवनं ३ सभामयं ४ इति
शब्दरत्नावली तद्भेदा यथा
सौधोऽस्त्री राजसदनमुपकार्य्योप
कारिका स्वस्तिकः सर्वतोभद्रोन
न्द्यावर्त्तादयोऽपिच ॥ विच्छंद
कः प्रभेदा हि भवंतीश्वरसद्म
नां इत्यमरः
राजसभा स्त्री राज्ञःसभा नृपा
ति समाजः इत्यमरः
राजसर्पः पुं सर्पविशेषः तत्प
र्य्यायः भुजंगभोजी २ । इति
हेमचंद्रः ॥
राजसर्षपः पुं सर्षपविशेषः ।
राजसर्षा इति भाषा राइ इति
केचित् तत्पर्य्यायः क्षुभिका २
राजिका ३ क्षवी ४ क्षुतकः ५ क्षु
तक इत्यत्र श्रष्टक इतिवापाठः इ
तिरत्नमाला क्षवः ६ क्षुताभिज
ननः ७ क्षुताभिजनन इत्यत्र क्ष
थाभिजनन इति वा पाठः इति
हेमचंद्रः कृष्णा ८ तीक्ष्णफ
ला ९ राजी १० कृष्णसर्षपाख्या ११
अस्यगुणाः तिक्तत्वं कटुत्वं उष्णत्वं
वातश्लेष्म गुल्म कंडु कुष्ठव्रणना
शित्वं पित्त दाह प्रदत्वंच इति
राजनिर्घण्टः
राजसायुज्यं क्ली राजत्वे साद्र
ह्मभूयं ब्रह्मत्वंब्रह्मसायुज्य मित्यपि
देवभूयादिकं तद्वदित्यमर दर्श
नात्
राजसारसः पुं मयूरः इतिशब्द
माला ॥
राजसी स्त्री दुर्गा । इतिशब्द
रत्नावली रजोगुणसम्बंधिनीच
राजसूयः पुं राजकर्त्तव्ययज्ञविशे
षः तत्पर्य्यायः नृपाध्वरः २
क्रतुराजः ३ क्रतूत्तमः ४ इति
शब्दरत्नावली
राजस्कंधः पुं घोटकः इतित्रि
कांडशेषः ॥
राजस्वं पुं क्ली राजधनं रा
जकरः इतिलोकप्रसिद्धं
राजस्वर्णः पुं राजधुस्तूरकः इति
राजनिर्घण्टः
राजहंसः पुं चंचुचरणलोहित
श्वेतवर्णहंसः इत्यमरः कदम्बः
कलहंसः नृपोत्तमः इतिमेदि
नी ॥
राजहर्षणं क्ली तगरपुष्पं इ
ति राजनिर्घण्टः
राजहस्ती पुं राजगजः तत्प
र्य्यायः मारीचः २ राजकगजः ३

मदोत्कटः ४ इतिहारावली ॥
राजराजकः पुं मत्स्यविशेषः ।
तत्पर्य्यायः कातरः २ कातलः
३ राजीवः इतिशब्दरत्नावली ।
राजसर्षपकः पुं सर्षपः इतिरा
जनिर्घण्टः
राजा पुं प्रभुः नृपतिः क्षत्रि
यः चन्द्रः यक्षः इन्द्रः इतिमेदिनी
अमरपदे चेत्प्रश्नार्थवाचकः
अथनृपतेः पर्य्यायः
राट् २ पार्थिवः ३ क्ष्माभृत् ४
नृपः ५ भूपः ६ महीक्षित्
इत्यमरः नरपतिः ८ पार्थः ९
नृपतिः १० भूपालः ११ भूभृत् १२
महीपतिः १३ नाभिः १४ नाराट
१५ भूमीन्द्रः १६ नरेन्द्रः १७ ना
यकाधिपः १८ इतिशब्दरत्नावली
प्रजेश्वरः १९ भूमिपः २० इनः
२१ इन्द्रः २२ अवनीपतिः २३
स्कन्दः २४ स्वैयः २५ भूभुक् २६
अर्थपतिः २७ इतिजटाधरः
अस्यव्युत्पत्तिर्यथा । य
स्मात् राजराजेन पृथु वैन्यः
प्रतापवान् सोऽभिषिक्तो मह
तेजा विधिवद्धर्मकोविदैः पि
त्रापरञ्जिता स्तस्य प्रजा स्तेनानु
रञ्जिता अनुरागात्तत स्तस्य

नाम राजेत्यभाषत इति विष्णु
पुराणे १ अंशे १३ अध्यायः ॥
अपिच रागी राजसिकं स्वर्गं
कुरुते कर्मरागतः रागोपाश्रय
नशिका स्तेन राजा प्रकीर्त्तितः
इति ब्रह्मवैवर्त्ते गणपतिखण्डे
३५ अध्यायः तस्य सर्वपितृत्वं
यथा शम्भुरुवाच शृणु वत्स
महाराज हे तात भयभंजन भ
वज्ञानां च राज्ञां च सर्वेषां पालकः
पिता श्रेष्ठश्च महेन्द्रो ऽथ
त्वं च सर्वो नृपोऽधुना योगाभ्यास
पिता पाता प्रजानामेव निश्चयः
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे
५९ अध्यायः । पृथोरेवादौ रा
जा इति संज्ञासीत् यथा
देवैर्विप्रैः स्तथा सर्वै रभिषिक्तो
महामनाः राज्ञाञ्चैवाधिकारे वै
एष वैन्यः प्रतापवान् तदाविश्र
प्रजाः सर्वाः कृता स्तेनानुरञ्जिताः ।
तेनानुरञ्जिताः सर्वाः स्तेन पृथुरिति
तदा अनुरागात्तस्य वीरस्यनाम
राजेत्यभाषत इतिपाद्मे भूमिख
ण्डे २९ अध्यायः । अथ
राजलक्षणं तोऽपकुर्वे पदेषां
तं हस्तशीर्षविषं पीडिते नरेन्द्र
तत्प्रापेत्नं किंनाप नरेश्वरः

तस्यासं चद विम्बाभंस्फुरस्तं
समुन्नतं नीलाः केशाः कुंचिता
श्च समा दीर्घा स्तरंगिताः राजी
वनेत्रयुगलो विम्बोष्ठदन्तसंहतः
वक्त्रंदृष्ट्वा नचिकुं दीर्घासो दीर्घ
वाहुलः चतलेखाकरोमासयव
वृद्धैकपर्वकः शिरालपादोगम्भी
रः स्तनवल्लिवलीयरः ॥ इ
तिमार्कण्डेयपुराणे हरिश्चन्द्रोपाख्याना
ध्यायः ॥ अन्यच्च अ
स्वेदिनौ मृदुतलौ कमलोदरसन्नि
भौ श्लिष्टाङ्गुलीताम्रनखौ पादौ
कूर्मौ शिरोन्नितौ ॥ कूर्मोन्न
तौगूढगुल्फौ सुपार्ष्णी नृपतेःस्मृ
तौ मृदुलोमा समाजङ्घा तथा क
रिकरप्रभा ऊरवो जानव स्तुल्यास्त
समोपचितास्मृताः कोषगूढे नृपा
दीर्घे भूमेश्च धनवर्जितः ।
समाभ्यां क्षितिपः प्रोक्तः प्रलम्बेन
शताधवान् नशङ्कु निःशङ्कुः
नाःस्युर्दरिद्रा श्च मानवाः एकहि
त्रि चतःपंचषड्धारादिभिरेव
च दक्षिणावर्त्तवलितं शुभाभिश्च
नृपाःस्मृताः नृपाःकुक्षयःपिशु
का मधुगन्धे धने वक्र मांसल
स्फिक्च्छवी स्याच्च सिंहस्फिक्भूपतिः
स्मृतःभवेत्सिंहकटी राजा निम्बःकु

पिकटि र्नरः नृपा श्चोन्नतकक्षाः
स्युः जिह्वा विषम कक्षकाः व
लिमध्यगता नाभि शूलधारा क
रोतिहि अधो गवाक्ष कर्य्याश्च
नृपत्वं पद्मकर्णिका मध्यदेशे श्च
त्रुकेश्च भवन्ति शुभगर्भराः नि
र्द्धना विषमैर्दीर्घैः पीतोपचितकैर्नृ
पाः समोन्नतंच हृदय मकम्पंमांस
लंदृढं नृपानामधमानांच खरलो
मशिरालकं कम्बुग्रीवश्च नृपति
र्लम्बकर्णाःशतितताः । आजानु
लम्बिनो बाहू वृत्तौपीनौ नृपेश्वरे
मणिबन्धे निगूढश्च सुश्लिष्ट शुभ
सन्धिभिः नृपाहीनैःकरच्छेद मश
द्वैर्धनवर्जिताः निस्वा श्चक्रनयेस्तुः
द्वंद्वैश्च पवनकैः काः नाम्रे भूपा
धनाढ्याश्च अंगुष्ठैःस्यर्वे स्तथा
अंगुलिश्च सधन स्निग्धा रेखा
अयसवे नृपतेःकरतला मनि
बन्धे समुत्थिताः शंखातपत्र शि
विका गजपद्मोपमा नृपे अ
म्भोकुश पताकाभा मृणालाभा
निरीश्वरे हामाभाश्च गवाक्षानां
स्वस्तिकाभा नृपेश्वरे वज्राभि
तोमर धनुःकुंताभा नृपतेःकरे
मांसलेश्च धनोपेता अंगुलेर
धेरे नृपाः विम्बोपमैश्च स्फुटितैः

रोहे चूतैश्च खदिरैः विवर्ज्जयेन
हीनाश्च दन्ताः स्निग्धा घनाः शुभाः
तीक्ष्णाः दंष्ट्राः समाः श्रेष्ठा जिह्वा
रक्ता समा शुभा श्लक्ष्णा दीर्घा च
विज्ञेया तालुस्तं धनेश्वरे ह्र
स्वा वपरुषा वक्त्रसमं सौम्यं वसंवृ
तं भूपाला समस्तं स्वल्पं विप
रीतं च दुःखिनां शंखकर्णाश्च
राजानो रोमकर्णाः शतायुषः क
र्णाः स्निग्धा घनरोमैश्च व्यालम्बैर्मांस
लैर्नृपाः हीमत्वं क्षिपिटनासः स
मी भाग्यवतां भवेत् अल्पच्छिद्रा सु
पुटा च अवक्रा च नृपेश्वरे संहते
म्बे ललाटे स्थूलकपोलो उन्नते नृपाः
ललाटेपहृता स्त्रियो रेखाः स्युः श
तवर्षिणां नृपत्वं स्यात्तत्रस्ति दा
युः पंच नवस्थ छत्राकारैः शिरो
भिश्च नृपा निम्नशिरा धनी मूर्द्ध
तखर्तकेशो रक्तः समक्षो नृप
इति गारुडे नरस्त्री लक्षणं नाम
६८ अध्यायः । अपि च पार्थिव
स्यात् वक्ष्यामि स्थानांश्चैव लक्षणं
सर्वाणि यो महीपालः सम्यगेवं
परीक्षयेत् राज्यं प्राप्यते नि
त्यं सत्यधर्म्मपरायणः निर्जि
त्य परसैन्यानि क्षितिं धर्म्मेण पा
लयेत् पुष्पं पुष्पं विचिन्वीयान्मूल
च्छे

दं न कारयेत् मालाकार इवारण्ये
न यथाङ्गारकारकः दुग्धी ती
दन्ना भुंजीत विक्रेतारो न भुंजते
परराष्ट्रं महीपालो कालव्यालोऽस्य
दूषयेत् दूषयेत् नोपच्छिन्द्याद्यो
धेन्वाः क्षीरार्थी लभते पयः एवं
राष्ट्रं प्रयोगेन पीड्यमानं न वर्द्धते
तस्मात्सर्वप्रयत्नेन पृथिवी मनुपा
लयेत् पालकस्य भवेद्भूमिः की
र्त्तिरायुर्यशो बलं अभ्यर्च्य विष्णुं
धर्म्मात्मा गोब्राह्मणहितेरतः ॥
प्रजाः पालयितुं शक्तः पार्थिवो यो
जितेन्द्रियः ऐश्वर्य्यमध्रुवं प्राप्य राजा
धर्म्मे मतिं चरेत् ॥ इति
गारुडे ११९ अध्यायः अभि
षिक्तराजानो यथा श्रीपराशर
उवाच यदाभिषिक्तः स पृथुः पूर्वं
राज्ये महर्षिभिः । ततः क्रमे
ण राज्यानि ददौ लोकपितामहः
नक्षत्र ग्रह विप्राणां वीरुधां चाप्य
शेषतः सोमं राज्ये दधाद्ब्रह्मा
यज्ञानां तपसामपि राज्ञां वैश्रव
णं राज्ये जलानां वरुणं त
था आदित्यानां पतिं विष्णुं
वसूनामथ पावकं प्रजापती
नां दक्षं तु वासवं मरुतामपि दै
त्यानां दानवानां च प्रह्लादमधिपं

ददौ पितॄणां धर्म्मराजानं यमं
राज्ये ऽभ्यषेचयत् । ऐरावतं
गजेन्द्राणामशेषाणां पतिं ददौ
पतत्रिणां च गरुडं देवानामपि
वासवं उच्चैःश्रवसमश्वानां वृष
भं तु गवामपि शेषन्तु नागराजा
नं मृगाणां सिंहमीश्वरं वनस्प
तीनां राजानं प्लक्षमेवाभ्यषेचयत् ।
यत् एवं विभज्य राज्यानि दिशां
पालाननन्तरं प्रजापतिपतिर्ब्रह्मा
स्थापयामास सर्वतः पूर्वस्यां दि
शि राजानं वैराजस्य प्रजापतेः ।
दिशापालं सुधन्वानं पुत्रं वै सो
ऽभ्यषेचयत् दक्षिणस्यां दिशि
तथा कर्दमस्य प्रजापतेः पुत्रं
शङ्खपदं नाम राजानं सोऽभ्यषेचय
त् ॥ पश्चिमायां दिशि त
थारजसः पुत्रमच्युतं केतुमन्तं म
हात्मानं राजानमभिषिक्तवान् त
था हिरण्यरोमाणं पर्जन्यस्य प्र
जापतेः उदीच्यां दिशि दुर्द्धर्षं रा
जानमभिषिक्तवान् तैरियं पृथि
वी सर्वा सप्तद्वीपा सपत्तना यथा
प्रदेशमद्यापि धर्मतः प्रतिपाल्य
ते एते सर्वे प्रवृत्तस्य स्थितौ वि
ष्णोर्महात्मनः विभूतिभूता राजानो
ये चान्ये मुनिसत्तम येऽभविष्यन्ति

ये ऽतीताः सर्वभूतेश्वरा द्विज ते
सर्वे भूतस्य विष्णो रंशा द्वि
जोत्तम इति श्रीविष्णुपुराणे प्रथमे
ऽंशे २२ अध्यायः सूत उवाच
एवं सृष्टास्तु सर्वास्तु स्थावरास्तु चरा
स्व ब्रह्मा क्रमेण राज्यानि व्या
देशाभ्यपक्रमे द्विजानां वीरुधां चै
वनक्षत्राणां ग्रहैः सह यज्ञानां
तपसां चैव सोमं राज्ये ऽभ्यषे
चयत् बृहस्पतिं च सर्वेषां ददा
वङ्गिरसामपि भृगूणामाधिपत्येन
काव्यं राज्ये ऽभ्यषेचयत् आ
दित्यानां पुनर्विष्णुं वसूनामथ पा
वकं प्रजापतीनां दक्षं च मरुता
मथ वासवं दैत्यानामथ राजानं
प्रह्लादं दितिनन्दनं नारायणं तु
साध्यानां रुद्राणां वृषभध्वजं य
क्षाणामथ शार्दूलं गरुडं पत
त्रिणां गन्धर्वाणां चित्ररथं ना
गानामथ वासुकिं गंधानामृ
तं चैव भूतानां च शरीरिणां सर्वे
षां दंष्ट्रिणां शेषं सर्पाणां चैव तक्षकं
सागराणां नदीनां च मेघानां वर्षि
तस्य च आदित्यानामन्यतमं प
र्जन्यमभिषिक्तवान् सर्वाप्सरो
गणानां च कामदेवं तथा प्रभुं स
तनामधिमासानां दिवसानां तथैव

च पत्ताणां चत्तपाणानां च मुहूर्त्त
तिथि पर्व्वणां कला काष्ठाप्र
माणानां गते रयनयो स्तथा यामि
तस्याश्चयोगस्य वक्रे संवत्सरं प्रभुं
प्रजापते र्विरजसः पूर्व्वस्यां दिशि
षेचयत् पुत्रं नाम्ना सुधामानं
राजानेचाभ्यषेचयत् यथाप्रदे
शे राजानं दक्षिणस्यां प्रजाप
तेः कर्द्दमस्य पौत्रपदं पुत्रं राज्ये
ऽभिषिक्तवान् पश्चिमस्यां दि
शि तथा रजसः पुत्र मुत्तमं ।
केतुमन्तं महात्मानं राजानं ह्य
भ्यषेचयत् तथा हिरण्यरोमाणं
पर्ज्जन्यस्य प्रजापतेः । दिगुत्त
रायां पुत्रन्तु राजान मभ्यषेचयत्
मानुषाणामधिपतिं चक्रे वैवस्वतं
मनुं तेनैव पृथिवी सर्व्वा सप्त
द्वीपा सपत्तना यथा प्रदेशम
द्यापि धर्म्मेण परिरक्ष्यते स्वायंभु
वेंतरे पूर्व्वं ब्रह्मणा तेभिषेचिताः
इंद्रादि लोकपालास्तु पुनर्देव
स्वतेऽन्तरे राजसूये ऽभिषिक्तस्तु
पृथुः पूर्व्वं महर्षिभि र्विधिना त
हत्तो ऽधिराजः प्रजापवान्
इत्याद्ये वह्निपुराणे वराह।
शाद्ङ्भावना नामाध्यायः राज
कर्त्तव्यकर्म्माणि यथा महाभारते

वत्स राज्ञाभिषिक्तेन प्रजा रं
जनमादितः कर्त्तव्य मविरोधेन
स्वधर्म्मेव महीभुजा अविरोधेन
धर्म्मशास्त्राविरोधेन व्यसनानि
परित्यज्य सप्तमूल हराणि वै आ
त्मा रिपुभ्यः संरक्ष्यो बहि र्म्मंत्र
विनिर्गमात् अष्टधा नाश माप्नो
ति वक्रसन्नाद्यथा तथा राज्ञ
प्यसंरक्ष्यं बहि र्म्मंत्र विनिर्गमात्
दुष्टाद्दुष्टं प्रजानीयादमात्यानरितो
बतः चैरश्चरास्तथा शत्रो रन्वे
ष्टव्याः प्रयत्नतः विश्वासो नतु क
र्त्तव्यो राज्ञा मित्राप्तबान्धवे कार्य्य
योगाद्रमित्रेषु विश्वसीत नराधिपः
स्थानवृद्धिक्षयज्ञेन षाड्गुण्यविदि
तात्मना भवितव्यं नरेन्द्रेण
न कामवशवर्त्तिना प्रागात्मानं
विजित्यैव ततो भृत्या मही
भुजा तेया ञ्चानंतरं पौरा विह
न्यते ततो ऽरिभिः यस्त्वेतानविजि
त्यैव वैरिणो विजिगीषते सोऽ
जितात्मा जितामात्यः शत्रुवर्गेण
बाध्यते तस्मात्कामादयः पूर्व्वं
जेयाः पुत्र महीभृता तज्जये
हि जयो राज्ञो राजा नश्यति
तै र्ज्जितः कामः क्रोधश्च लोभ
श्च मदो मान स्तथैवच हर्षश्च

शत्रवो ह्येते नाशाय कुमहीभृतां
कामप्रसक्तमात्मानं स्मृत्वा पाण्डुं।
निपातितं निवर्त्तयेत्तथा क्रोधाद
नुह्रादं हतात्मजं हतमेवं तथा
लोभान्मदाद्वेनं हिमे हतं माना
दनायुषः पुत्रं हतं हर्षात् पुरंज
यं एभि र्जिते र्जितं सर्व्वमरुते।
नमहात्मना स्मृत्वा विवर्ज्जयेदेतां
षड्दोषांश्च महीपतिः काकको
किल भृंगाणां वक बाल शि
खंडिनां हंसानां लोहडहीनां
पितेन चरितं नृपः काकात्
वेषांकिता कोकिलान्माधुर्य्यं।
भृंगात्मपीड्या अर्थादाने वका
नात्रग्रहणे एकाग्रतां व्याः
लात्करुपसर्पित्वं शिखंडिनश्च
त्रतोसर्पग्रहणाय मुक्तो राजा
वात्मगोपनं च हंसस्य सारग्राहि
त्वं लोहजडात्संधानं कौशिक
स्य क्रियां ऊर्णहितेत्ते मनुजे
श्वरः चेष्टां पिपीलिकानांच का
ले भूपः प्रदर्शयेत कौशिकस्यउ
लूकस्य शत्रो काकावस्कन्दनं
पिपीलिकानां सेना बहुत्वं सर्वभ
क्षणंच ज्ञेयाग्निविस्फुलिंगानांवी
जचेष्टा च शाल्मलेः चंद्र सूर्य्यत
नयश्च नीत्यर्थे पृथिवी क्षिता अ

ग्निविस्फुलिंगाद्धराद्धादः बीजा
त्सदर्थनिष्पादनं उष्णकालेचंद्रः
सुखदायी शीतकाले न एवं सूर्य्यः
शीते सुखदायी उष्णकाले न एवं
कालानुसारेण सुख दुःखदात
त्वं बधकामस्य सरभक्ष्यतिन्या गु
णितीक्ष्णनात् प्रजा नृपेण वा
देया तथा चंडालयोषितः वधका
नि शूलानं पश्चात्कंटगोपनं स्मितम्
खनाच सरभाद्धत्वापि शत्रोर्द्दे
कः यथा सरभाष्टापदः पर्व्व
नतं नसहते भूलिन्या आर्त्ति
ज्ञापनं गर्व्विण्याः स्तनात्कालेऽर्थो
हानं चंडालयोषितश्चोपकीश्चागशि
रो दर्शयित्वा अन्यद्विक्रीणा
ति शक्रार्क यम सोमानां त
द्वद्वायो र्महीपतिः रूपाणि पंच
कुर्व्वीत महीपालनकर्म्मणि यथें
द्र श्चतुरो मासान्वार्य्यौघैरावभू
तलं आप्याययेत्तथा लोकान्प
रिचारै र्महीपतिः ॥ प
रिचारै र्यथासाधनादिभिः । मासा
नष्टौ यथा सूर्य्य स्तोयं हरति
रश्मिभिः सूक्ष्मेणा वाभ्युपायेन त
था शुल्कादिना नृपः यथा यमः
प्रियद्वेष्यौ प्राप्ते काले नियच्छ
ति तथाप्रियाप्रियौ राजा दुष्टाद

षे समोभवेत् पूर्णेंदु मालोक्य
यथाप्रीतिमानुजायतेनरः एवंयत्र
प्रजाःसर्वा निर्वृता स्तच्छशिव्रतं
मारुतः सर्व भूतेषु निगूढश्चर
ते यथा एवं चरेत्स चारैः यो
रामात्याविषयेषु नलोभार्थैर्न
कामार्थैर्नार्थार्थैर्यसमानसं प
रार्थैः क्रियते धर्मात्स राजा स्व
र्गमृच्छति लोभादिप्रयोजनैः ।
उत्पथग्राहिणो मूढान्स्वधर्माच्चलि
तान्नरान् यःकरोति निजेधर्मे स
राजा स्वर्गमृच्छति उत्पथग्राहिणः
पापिनः वर्णधर्मा न सीदन्ति य
स्य राष्ट्रे तथाश्रमाः राजन्तस्य
गः पाप्मा ज्वरो व्याधि र्विकारो
दुष्ट मामयः यक्ष्मातंकगदाबाधाः
शब्दाः पर्य्यायवाचिनः निदानं
पूर्वरूपाणि रूपाण्युपशय स्तथा
संप्राप्ति श्चेति विज्ञानं रोगाणां ।
पंचधा स्मृतं निमित्तहेतु
यतन प्रत्ययोत्थानकारणैः नि
दान माहुः पर्य्यायैः प्राग्रूपं येन
लक्ष्यते उत्पित्सु रामयोदोष
विशेषेणानधिष्ठितः । लिङ्ग
मव्यक्त मल्पत्वात्व्याधीनां तद्यथा
तथं तदेव व्यक्ततां · यातं
रूप मित्यभिधीयते संस्थानं
व्यंजनं लिङ्गं लक्षणं चिह्नमाकृतिः

देन व्याधि विपर्य्यस्तं विपर्य्य
स्तार्थकारिणां औषधान्नविहारा।
णां उपयोगं सुखावहं विद्या
दुपशमं व्याधेः सात्म्यमिति
स्मृतः विपरीतोऽनुपशयो व्याधि।
सात्म्याभिसंज्ञितः यथा दुष्टतदो
षेण तथा वात्तविसर्पता निवृत्ति
रामयस्यासौ संप्राप्तिर्जातिरागतिः
संख्याविकल्प प्राधान्यबल काल
विशेषतः स भिद्यते यथात्रैव
संख्यन्त्वष्टौ ज्वरा इति दोषाणां
समवेतानां विकल्पांशांशकल्प।
ना स्वातंत्र्य पारतंत्र्याभ्यां व्याधेः
प्राधान्यमादिशेत् हेत्वादि का
त्स्न्यावयवैर्बलाबल विशेषणं
नक्तं दिनर्तु भुक्तांशैर्व्याधिका
लो यथा मलं इति प्रोक्तो निदा
नार्थःसव्यासेनोपदेक्ष्यते सर्वेषा
मेव रोगाणां निदानं कुपिताम
लाः तत्प्रकोपस्य तु प्रोक्तं वि
विधाहितसेवनं अहित त्रि
विधो योगस्त्रयाणामाश्वरास
नः तिक्तोषण कषायाल्परूक्षप्र
मितभोजनैः धावनोदीरणा नि
शाजागरात्युच्चभाषणैः क्रियाति
योगभी शोक चिन्ता व्यायाम मै
थुनैः ग्रीष्माहोरात्र भुक्तान्तप्रकुप्य

तिसमीरणाः पित्तं कट्वम्लतीक्ष्णो
ष्णपटु क्रोध विदाहिभिः शरत्म
ध्याह्नरात्र्यर्द्ध विदाहसमयेषु च
स्वाद्वम्ललवण स्निग्ध गुर्वभिष्यंदि
शीतलैः आस्यास्वप्न सुखाजीव दि
वास्वप्नादिबृंहणैः प्रच्छर्दनाद्ययोगै
न भुक्तमात्र वसन्तयोः पूर्वाह्णे
पूर्वरात्रेव श्लेष्मा वक्ष्यामि संक
रान् मिश्रीभावात्समस्तानां सन्नि
पातस्तथा पुनः संकीर्णाजीर्णा
विषम विरुद्धाध्यशनादिभिः व्या
पन्न मद्यपानीय शुष्क शाकाम्म
लकैः पिण्याक मत्स्यवसरा पूतिशु
ष्क कृशामिषैः दोषत्रयकरैः स्तैस्तै
स्तथान्नपरिवर्त्ततः ऋतो र्दुष्टात्
रोवातात्विग्रहावेशाद्विहरात्
दृष्टामात्यर्थेनस्रेहपाद्युरे लंघते
पीडनात् मिथ्यायोगाच्च विवि
धात्पापानांच निषेवनात् स्त्रीणां
प्रसवैर्वैषम्यात्तथा मिथ्योपचा
रतः प्रतिरोग मिति क्रुद्धा
रोगाविध्यानगामिनः रसायनी
प्रपद्यास्तु दोषा देहे विकुर्वते
इतिगारुडे सर्वरोगनिदानं १०१
अध्यायः रोगविशेषाणां औष
धानि गारुडे १०१ १०० १०२ १०२
१०३ १०४ १०५ १०६ १०७

१९४ १९९ अध्यायेषु इष्टव्यानि
सर्वरोगहरवैसवकवचंच तत्रैव
२० अध्याये द्रष्टव्यं अपिच
ननकःसर्वरोगाणांईश्वरो दारु
णोज्वरः शिवभक्तश्च योगीचस
एव विकृताकृतिः भीम स्त्रि
पादस्त्रिशिरा षड्भुजो नवलोच
नः तस्यप्रहरणो रोद्रः काला
तकयमोपमः मंदाग्नि स्तस्यजन
कोमंदाग्ने र्जनको ह्ययः पित्त
श्लेष्मसमीराश्च प्राणिनां दुःखदा
यकाः वातजः पित्तजश्चैव श्लेष्म
जश्च तथैवच ज्वरभेदाश्च त्रि
विधा अतश्चैव त्रिदोषजः पांडु
कःकामलःकुष्ठः शोषः सीहाच
शूलकः ज्वरातिसार ग्रहणीका
श व्रण स्तैमिकाः मूत्रकृच्छ्रश्च
गुल्मश्च रक्तदोष विकारकः श्वा
सो मेहजः ऊक्रोगोदश्च गलगंड
कः भ्रमरी सन्निपातश्च विस
र्पी दारुणीसति यथाभेदप्रभेदेन
चतःषष्टि रुजःस्मृताः अतसकल्पा
स्त्वाश्रेते जरातस्याश्च कन्यका
जराच भ्रातृभिःसार्द्धं अश्वत्थमति
भूतले पतेद्योपायवेत्तारं नगच्छ
तिचसंयतं पलायन्तेच तंदृष्ट्वा वैनते
यमिवोरगाः चक्षुर्गेलेन या

यामः पादाधस्तैलसेवनं कर्णे
तैलं मूर्द्धि तैलं जराव्याधिवि
नाशकं वसन्ते भ्रमणं वह्निसे
वासमं करोतियः बालाच सेव
तेकाले जरा तंनोपगच्छति खा
तशीतोदकस्नायी सेवते चंदन
द्रवं नोपयाति जरा तंच निदाघे
ऽनिलसेवितं प्रावृड्ष्णोदकस्ना
यी घनतोये नसेवते समयेचस
माहारी जरा तं नोपगच्छति शा
रदीयं न गृह्णाति भ्रमणं तत्रव
र्जयेत् खातस्नायी समाहारी जरा
तेनोपतिष्ठते खातस्नायी चहेमंते
काले वह्निं निषेवते भुंक्ते न
वान्नं भुक्तंच जरा तंनोपगच्छति
शिशिरेऽभुक्त वह्निंच नवोष्मा
न्नचसेवते यपतोऽस्कस्नायी
जरातं नोपगच्छति सद्योमांसंन
वान्नंच बालाह्रीं स्त्रीभोजनं
घृतंच सेवते याहि जरा तंनो
पगच्छति भुंक्ते मदनं चन्का
लेस्नायी पीयते जलं निसि
भुंक्ते च ताम्बूलं जरा तंनोप
गच्छति दधि हैयंगवीनंच नव
नीतं तथाशुभं निशि भुंक्ते संय
मी योजरा तंनेवगच्छति शुष्क
मांसंस्त्रियो वृद्धा बालार्कं भक्षणं

संसेवन्ते नरा याति ब्रह्महत्या
स्त्रभिःसह रात्रौ ये दूषितेव
न्ते पुंश्चलीव रजस्वला तमुपैति
जरा हृष्टा भ्रातृभिः सह संदरि
रजस्वला च ऊलटा चावीराजात
सूतिका शूद्रयाजकपत्नीयाऽस्त्र
हीनाच या सति योहितासाम
न्नभोजीब्रह्महत्यां लभेत्सः तेन
पापेन सार्द्धं सा नरा तमुपगा।
च्छतिपापानांव्याधिभिः सार्द्धमि
त्वतासन्नते भुवं पापे व्याधि ज
रावीजं विघ्नबीजंच निश्चितं पापे
नजायते व्याधिः पापेनजायतेज
रा पापेनजायते दैन्यं दुःखं
शोकं भयं कलिः तस्मात्पापं
महावैरं दोषबीजं ममंगलं।
भारते सन्तं सन्तो नाचरंति
भयातुराः स्वधर्माचारयुक्तंचहरी
त्तिंतं हरिसेवकं गुरु देवाति
थीनांच भक्तं सक्तं तपः स्वच व्र
तोपवासयुक्तंच महातीर्थनिषे
विनं पापाइवन्ति तं दृष्ट्वा वै
नतेय मिवोरगाः पतंज्वरानम
वेन व्याधि संचयाः दुर्जयाः सर्वेवो
षा समसमये काले सर्वग्रहीष्य
ति ज्वरश्च सर्वरोगाणांजनकःक
थितं श्रतिपित्त श्लेष्मजस्सपजन
का

क्षयः पते यथा संचरंति स्वयं
यांति च देहिषु तमेव विवि
योपायं साधि मतो निशामय
दूषितान्नात्मल्पमानाया मादाराभाव
एवच प्राणिनां जायते पित्तं च
क्षेच माणिश्रकें तालं बिल्वफ
लंम्लकान्नलपानंच तन्तुणां तदे
व तथदेत्पित्तं सद्यःप्राणहरं परं
तप्तोदकंच शरदि भाद्रे तिक्तंवि
शेषतः देवग्रस्तस्य यो भुंक्ते
पित्तं तस्य प्रजायते सशार्करंच
धन्याकं पिष्टं शीतोदकान्वितं
वाताकं सर्वगव्यंच दधि तक्र
विवर्जितं बिल्व तालफलंप
क्वं सर्वमत्तारसेवच आर्द्रकंगुड
युक्तंच तिलपिष्टं सशार्करं अतार
स्याने पेत्तवमितिचपाठः पित्त
नयकरं सद्योवलपुष्टिप्रदं परं
पित्तनाशंचतहीन मुक्तमस्यं निवो
धमे भोजनानन्तरं स्नानं जलपानं
विनाक्षुधा तिलतैलं स्निग्धतैलंलि
ग्धमामलकीद्रवं पर्युषितान्नं
तक्रंच पक्वरंभाफलं दधि च्छा
याम्लशार्करातोये स्निग्धपयस्तल
सेवनं नारिकेलोदकं चूर्णस्नानं
पर्युषितंजलं तरुमंगा पक्वफ
लंस्तपक्व कर्कटीफलं स्वातस्नानंच

4069

वर्षासु मूलकं श्लेष्मकारणं व
प्रारंभे तज्जन्म महाहीर्यविनाश
नंवक्लिस्विदं भ्रष्टिभंगं पक्वतैलं
शोषकं भ्रमणं शुष्कभक्तंच शु
ष्कपक्व हरीतकी पिंशरकमप
क्वंचरंभाफलं मपक्वकं वेशवा
र सिंधुवार मनाहार मपानकं
सघृतंरोचनाचूर्णं सघृतं शुष्क।
शर्करं मरीचं पिप्पली शुष्कमा
र्द्रकंजीरकं मधु द्रव्याएयेतानि
गंभविसयः श्लेष्मस्थाणिव बल
पुष्टिकराणयेव ताम्बुलीजं निशा
मय भोजनानन्तरं सद्यो गमनं
धारणं तथा छेदनं वर्जितापञ्च
शास्त्रक्रमण मैथुनं वृद्धस्त्रीग
मनंचैवमनःसंताप एवच भ्राति
नृतमनाहारं युद्धं कलहमेवच
कटुवाक्यं भयं शोकः केवलंवा
युकारणं भ्राताल्प्यवक्रे तज्ज
न्मनिशामय तदौषधं पक्वरंभा।
फलंचैव सवीजं शर्करोदकं ना
रिकेलोदकंचैव सद्यस्तक्रं सुमिष्ट
कं माहिषं दधिमिष्टंच केवल वा
सशार्करं सद्यः पर्युषितान्नंच
सौवीरं शीतलोदकं पक्वतैल
विशेषश्च तिलतैलंच केवलं।
लांगलीतालखर्जूर मुस्तमामलकी

द्रवं शीतलोष्णोदकस्नानंस्व
स्तिपचन्दनद्रवं स्निग्धपघ्यपञ्चतलं
स्निग्धयवृन्तनानिलः एततेकथि
तंवत्से सद्यो वातप्रणाशनं
वायवस्त्रिविधाः पुंसांक्लेश संता
पकामजाः व्याधि संचयश्च क
थितस्तत्राणि विविधानिच ता
नि व्याधिप्रणाशाय हेतानि स
द्धिरेव च तेजस्विनानि सर्वाणि
व्याधिक्षयकराणिच रसायनार
यो येषु चोपायश्च सुदुर्लभः
नशक्तः कथितं साधि याथार्थ्यं व
त्सवेदाच मेधांच सर्वं तेजाणोक्त
ताथानां विचक्षणे इति ब्रह्मवै
वर्त्ते ब्रह्म खंडे १८ अध्यायः
अथव्याधिलक्षणं तत्र वाग्भटः रो
गस्तु दोषवैषम्यं दोषसाम्य मरो
गता रोगा दुःखस्य दातारो ज्वर
प्रभृतयो हि ते तेच स्वाभावि
काः केचित्केचिदागन्तवः स्मृताः
मानसाः केचिदाख्याताः कथिताः
केपि कायिकाः तत्रस्वाभाविकाः
शारीरस्वभावादेवजाताः क्षुत्पिपा
सा सज्वरा जागरा मरणप्रभृतयः
अथवा स्वस्य भावाद्भवन्जाताः
स्वाभाविकाः मरुजा इतियावत
तेच जन्मांहादयः आगन्तवो १

ऽभिघातादि जनिताः अथवा
जन्मोत्तर भाविनः मानसाः का
मक्रोध लोभ मोह भयाभिमान
दैन्य पैशुन्य विषादेर्ष्याऽसूयामात्स
य्यामात्सर्य्य प्रभृतयः अथवा उन्मा
दापस्मार मूर्च्छा भ्रम तमःसन्न्या
सप्रभृतयः कायिकाः पाण्डुरोगा
प्रभृतयः कर्मजाः कथिताः केचि
द्दोषजाः सन्ति चापरे कर्मदोषो
द्भवाख्यास्ते व्याधयस्त्रिविधाः स्मृ
ताः तत्र कर्मजा व्याधयः यस्मात्क
नं दुष्कर्मप्रबलं व्याधिरूपं केव
लं भोग नाश्यं प्रायश्चित्तनाश्यं
वा ततो जाताः न तु दुष्टवाता
दिदोषेण जनिताः तथा यथा
शास्त्रेण निर्णीता यथाव्याधि
चिकित्सिताः न शमं यान्ति येरो
गास्तेत्तेयाःकर्मजा बुधैः दोष
जाः मिथ्याहार विहार प्रकुपित
वातपित्त कफजाः ननु मिथ्या
हारविहारेण अपि प्राक्तनस्य
कृतेनेनरूपं दृश्यत एव ततो
दोषजेष्वपि प्राक्तनकर्मैव कारणं
तत्कथं दोषजा इति उच्यते दो
षजेष्वपि वस्तुत आदिकारणं दु
ष्कर्मैवतत एव किन्तु तत्र मिथ्या
हारविहार भूषिता दोषास्तेनोद्रूप
न

इति दोषजा इत्युच्यत इति समाधिः
कर्मदोषोद्भवाः । स्वल्पदोषा
गरीयांसस्ते ज्ञेयाः कर्मदोषजाः
अत्र कारणं दुष्कर्मप्रबलं यतोदो
षाल्पत्वेऽपि आधि गरीयस्त्वं तत्क
र्मक्षयादेव क्षीणं भवति दोषास्तु
स्वल्पा अपि निदानत्वेनोक्ता दृश्य
तएवेति दोषाणां कारणास्तु
सम्मत इति कर्मदोषोद्भवाः कर्म
त्तयात्कर्मकृता दोषजाः स्वस्वभेष
जैः कर्मदोषोद्भवा यान्ति कर्म
दोषक्षयात्क्षयं दोषजाः स्वस्व
भेषजे रिति दोषजेष्वादिकार
णं दुष्कर्म तद्वैपक्वार्य्य दृश्यतया
दिजनित दुःखभोगेन कटुतिक्त
कषायाद्यस्वाद्य भक्षणादिजनि
त दुःखभोगेन च क्षयं याति शे
षाहृष्टेतरो दोषा स्ते स्वस्वभे
षजैःक्षयं यान्तीत्यर्थः साध्यासा
ध्याश्चसाध्याश्च व्याधयस्त्रिविधाः
स्मृताः सुखसाध्यः कष्टसाध्योहि
विधःसाध्य उच्यते याप्यलक्षण
माह याप्यनीयस्तु तं विद्यात्क्रियां
धारयते चिरं क्रियायान्तु निवृ
त्तायां सद्यो यस्तु विनश्यति प्रा
प्तो क्रिया धारयति स्वस्थिर्वं प्रा
प्य मात्रं अपतिष्ण दिवागारस्तम्भो

यत्नेन योजितः साध्या याप्य
त्वमायान्ति याप्या ह्यसाध्यतांतथा
घ्नन्ति प्राणानसाध्यास्तु नराणाम
क्रियावतां अक्रियावतां चिकित्
सारहितानां अथोपद्रव लक्ष
णं रोगारम्भक दोषस्य प्रको
पादुपजायते यो ऽन्यो विकारः
सतुपे रूपद्रव इहोदितः ।
अथारिष्ट लक्षण माह रोगि
णो मरणं यस्मादवश्यम्भावि
लक्ष्यते तल्लक्षण मरिष्टं स्यादि
ष्टंचापि तदुच्यते अथ रोगस्य
चिकित्सा लक्षण माह याक्रि
याव्याधिहरणी साचिकित्सा नि
गद्यते दोष धातु मलानां या
साम्यकृत्सैव रोगहृत् क्रियात्र
कर्मव्यापि क्रियते ऽनयेति व्याधि
हरणी करणापि करणयोक्ता तिस्
नेणात्र करणार्थेल्युट् तथाच
याभिः क्रियाभि र्जायन्ते शरीरे
धातवःसमाः साचिकित्सा वि
काराणांकर्म तद्भिषजां मतं ।
याश्चुदीर्णं शमयति नान्यंव्याधिं ।
करोति च साक्रिया नतुयाया ।
पिं हत्वान्यमुदीरयेत् क्रियात्र
चिकित्सा तथाचामरसिंहः आरोग्या
निकृतिःशिता पूजनं संप्रधारणं
उ

पायः कर्म चेष्टा च चिकित्साच न
वक्रिया इति अथ चिकित्सावि
ध्युपदेशः नात तत्त्वश्चिकित्सः
साज्ञोपेत्यो ऽन्यतया गदः वक्ति
शत्रु विषे स्वल्पःस्वल्पो ऽपि विक
रोत्यसौ तस्मादौ परीक्षेत न
तोऽनन्तरमौषधं ततः कर्मभि
षक्पश्चाज्ज्ञानपूर्वं समाचरेत्
अयमर्थः भिषक् आदौ रोगं
परीक्षेत विचारयेत् ततोऽनन्तरं
औषधं* विचारानन्तरं ज्ञानपूर्वंसा
वधानो न तु अवज्ञया कर्म चि
कित्सा मौषध दानादिरूपं समा
चरेदित्यर्थः रोगाज्ञानेचि
कित्साकरणे दोषमाह यस्तु
रोग मविज्ञाय कर्माण्यारभेत
भिषक् अपौषध विधानज्ञस्तस्य
सिद्धि र्यदृच्छया यदृच्छया से
दित्यपि सिद्धि र्भवति नापि भवती
त्यर्थः अयञ्च भेषजं केवलं क
र्त्तुं योजानाति नचामयं वैद्यकर्म
सचेत्कुर्य्याद्वध मर्हति राजतः
रोगज्ञाने भेषजा ज्ञाने दोषमाह ।
यस्तु केवल रोगज्ञो भेषजेष्व
विचक्षणः । तं वैद्यं
प्राप्य रोगी स्याद्यथा नौ।
नाविकं विना ॥ नाविकं

*विचारयेत् ततःपश्चा
त्तरोगौषधम्॥

कार्य्याधारं विद्या यथा नौःसंक
टे पतति तथा रोगीलर्थ्यः ग्रन्थ
ज्ञ यस्तु केवलशास्त्रतःक्रिया
स्त्वकुशलो भिषक् समुद्यत्यातुरं
प्राप्य भीरुः शास्त्रीव वाहवे ।
दोभौ षधयोर्ज्ञाने गुणमाह यस्तु
रोगविशेषज्ञः सर्वभैषज्यकोवि
दः देशकालविभागज्ञस्तस्य ।
सिद्धिर्न संशयः व्यादावन्तेरुज्ञो।
ज्ञाने प्रयतेत चिकित्सकः भे
षजानां विधानेऽथ ततः कुर्य्या
च्चिकित्सितं चिकित्सित मित्यत्र
भावेक्तः इति भावप्रकाशेपूर्व
खंडः अथ येन रोगाणां
ज्ञानंस्यात्तदाह हेतु स्तद्रु
संप्राप्तिःपूर्वरूपंचलक्षणं तथै
वोपशमः पंच रोगविज्ञानहेत
वः तत्र हेतो र्लक्षणमाह य
स्मात्स्याद्विना येन तस्य तद्हेतुरुच्य
ते शास्त्रे संव्यवहाराय तत्पर्य्याया
स्त्ववल्लहे निदानं कारणं हेतुर्नि
मित्तंच निबंधनं मूल मायत
नं तत्र प्रत्ययोपि निगद्यते त
त्रहेतु र्व्याधीनां ज्ञानाय हेतुर्यं
यथावर्षा ऋतु श्रम हिमानशाना।
ति मैथुन शोकचिन्ताभयादयोवा
तप्रकोपहेतवो वातजान्व्याधीन्

बोधयन्ति शरत्कट्वम्लोष्ण तीक्ष्ण
क्रोध तृषा क्षुधाभिघातादयःपि
त्तप्रकोपहेतवः पित्तजान्व्याधीन्बो
धयन्ति वसन्त मधुर स्निग्धशी
तादयः कफप्रकोप हेतवःकफ
जान्व्याधीन् बोधयन्ति अथ
संप्राप्ते र्लक्षणमाह यथा दुष्टेन
दोषेण यथा चानुविसर्पता उत्प
ति र्यामयस्यासौ संप्राप्तिर्जाति
रागतिः यथा दुष्टेन दोषेण यथा
कारणभेदेन दोषेण यथा
चानुविसर्पता अनेकधा दोषाणां
विसर्पणं मूर्द्धोप स्तिर्य्यगादिग
तिभेदन तथाच विसर्पताआ
मयस्याउत्पत्तिः असौ संप्राप्तिः
शास्त्रव्यवहाराय संप्राप्तेः पर्य्याया
वाहजाति रागति रिति संप्राप्ते
रौपाधिक भेदानाह संख्याविक
ल्पप्राधान्य बल काल विशेषतः
साभिद्यते यथा त्रैव वक्ष्यन्ते
ष्टौज्वरा इति संख्यादिरूपाभ्ये वि
शेषाल्लिभ्यः सा संप्राप्ति र्भिद्य
ते भेदवती क्रियते इत्यर्थः त
त्र संख्याविवृणोति यथाज्वरा
ऽष्टधा अतीसारः षड्विध इत्या
दि विकल्पं विवृणोति दोषाणां सम
वेतानांविकल्पोंऽशांशकल्पना समवे

4073

तानां समवेतानां दोषाणां अं
शांश कल्पना हीन मध्याधिक
भेदैर्भाग कल्पना विकल्पः प्राधा
न्यंविवृणोति स्वातंत्र्य पारतंत्र्या।
भ्यांव्याधेः प्राधान्यमादिशेत् व्याधेः
स्वातन्त्र्येण प्राधान्यंपारतंत्र्येणा[illegible]
प्राधान्यंच[illegible]वेदे दित्यर्थः।
यथा स्वतंत्रस्य ज्वरस्य प्राधान्यंज्वरा
धीनानांश्वासादीना मप्राधान्यं ।
बलंविवृणोति हेत्वादि कार्त्स्न
स्न्यावयवै र्बलावल विशेषणं अ
थापि व्याधे रिमनुवर्त्तते हे
त्वादेः हेतुरूपाणां कार्त्स्न्येन सा
कल्येन अवयवैः एकदेशेन।
व्याधे र्बलाबलयो विशेषणं वि
शेषबोधः । कालंविवृणोति
ति नक्तं दिनर्तु भुक्तांशै व्या·
धिकालो यथा बलं नक्तमेवा
वयंशाविवाचकं यतेनेतदुक्तं यस्मि
न्नक्तादे रंशे यस्य दोषस्य प्रको
प उक्तोस्ति सोंश स्तद्दोषजस्य व्या
धेःकाल इत्यर्थः नक्तादे रंशे
श्रुवातादि प्रकोप उक्तो वाग्भटे
न तेव्यापिनोपि हृन्नाभ्या रधोम
ध्योर्द्ध संश्रयाः वयोऽहो रात्रि
भुक्तानां मन्त मध्यादिगाःक्रमादि
ति ते वात पित्त कफाःऋतुषुवा

तादिकोपो यथा वर्षासु शिशि
रेवायुःपित्तं शरदि उष्णके वसंते
तु कफः कुप्यत्येषा प्रकृति रार्तवी
संप्राप्ति र्व्याधीनां ज्ञानायहेतुर्य
था । मिथ्याहार विहार कु·
पित वातश्यामाशय गमन रसह
यणकोष्ठाग्नि र्बहिर्निरसनरूपंज्व
रोत्पत्तिप्रकारं बोधयति तथाव्या
धीनां संख्या दोषांशांश कल्पना
प्राधान्य बलकालांश्च बोधयति
तेषु ज्ञानेषु चिकित्साविशेषः
स्यात् अथपूर्वरूपस्य लक्षणमाह
पूर्वरूपन्तु तद्येन विद्याद्भाविन
मामयं सामान्यंच विशिष्टंचद्वि
विधं तदुदाहृतं सामान्यं तद्दो
षाणां विशेषैरनधिष्ठितं ।
विशिष्ट मौषधज्ञं स्यात् विशेषैश्च
समन्वितं दोषाणां विशेषाः जं
भातिशोष नेत्रदाहाग्नि मान्द्यादयः
तत्र पूर्वरूपं व्याधीनां ज्ञानायहे
तुर्यथा श्रमादयो भाविनं ज्वरं।
बोधयन्ति अथच तएव श्रमा
दयोऽतिशयित जृंभायुक्ता भावि
नं वातज्वरं नेत्र दाहयुक्ता भाविनं
पित्तज्वरं वह्निमान्द्य युक्ता भावि
नंश्लेष्मज्वरं बोधयन्ति अथ
लक्षणस्य लक्षण माह पूर्वरूपं

विशिष्टं यथोक्तं तल्लक्षणंस्मृतं
संस्थानं लिंग चिह्ने चव्यंजनंरू
पमाकृतिः विशिष्टं पूर्व्वरूपंईष
द्व्यक्तं रूपं तदेव सम्यग्व्यक्तं ल
क्षणं स्मृतं तत्र शास्त्रे व्यवहाराय
पर्य्यायानाह संस्थान मित्यादि
लक्षणंव्याधेः ज्ञानाय हेतुर्य्यथा
स्वरावरोधः सन्तापःसर्व्वांगग्रह
णंच युगपदेतल्लक्षणं ज्वररोध
बोधयति अथोपशयस्तल्लक्षण
माह औषधान्न विहाराणा मुपयो
गंसुखावहं तच्चोपशयं विद्यात्स
द्धि सात्म्यमिति स्मृतः तत्र
वातस्योपशय माह मधुरलवण
साम्लस्निग्धनस्यास निद्रागुरुहवि
कर वस्ति स्वेद संमर्द्दनानि दहन
जल शोषाभ्यंग सन्तर्पनानि प्रकुपि
तपवमाणं शान्तमेतानि कुर्व्वुः ।
अथ पित्तस्योपशय माह तिक्त
स्वादु कषाय शीत पवन च्छाया
निशावीजन ज्योत्स्नो भूगृह यंत्र
वारिजल द स्त्रीगात्रसंस्पर्शने स
र्पिः क्षीर विरेक सेकरुधिरस्राव
प्रदेहपिकं पानाहार विहारभे
षजमिदं पित्तं प्रशान्तिं नयेत्
अथकफस्योपशय माह रूक्षता
र कषाय तिक्त कटुक व्यायाम

निष्ठीवनं धूमात्रसशिरोविरेक
वमनं स्वेदोपवासादिकं तद्वाता
ध निरूह जागर जलक्रीडाङ्गना
सेवनं पानाहार विहार भेषज
मिदं श्लेष्मान मुग्रं हरेत् ।
जलक्रीडा कथं कफं हरति त
दाह जलक्रीडा जनित शैत्येनाव
रुद्धदेहोष्मा पंकलिप्त पाकाग्नि वि
वोग्रो भूत्वा कफं शोषयति इति
समाधि उपशयो व्याधेस्तेनाय
हेतु यदुक्तं चरकेण । गूढ
लिंगं संकीर्ण लक्षणंच व्याधि
मुपशयानुपशयाभ्यां परीक्षेतेति
तथाच सुश्रुते अत्यंत स्वेदन
स्नेहैर्व्विकारो वातिकोनयःशा
म्येत्तत्र न विज्ञेयं रक्तमात्राति
दूषितं सर्व्वेषामेवैषामेव रोगा
णां निदानं कुपिता मलाः त
त्प्रकोपस्य तूपोक्तं विविधाहित
सेवनं सर्व्वेषां रोगाणां निदानं
सन्निकृष्टं कारणं कुपिताःस्व
हेतुदृष्टाः मलाः वात पित्तक
फा एवेत्यन्वयः तथाच वाग्भ
टः दोषा एव हि सर्व्वेषां रोगाणा
मेककारणमिति नत्वागन्तुजव्या
धिषु व्यभिचारःस्यात् तत्रजन्यु
तीत्यन्तरं दोष प्रकोपस्यावश्यभावि

त्वात् उक्तञ्च द्रव्येषु गुणयो
गस्येव इति भावप्रकाशः ॥
पापजरोगा यथा शातातपीय
कर्म्मविपाके कुष्ठंच राजयक्ष्माच
प्रमेहो ग्रहणी तथा मूत्रकृच्छ्रा
श्मरी कासा अतिसारभगन्दरौ ।
दुष्टव्रणं गंडमाला पक्षाघातोऽ ।
क्षिनाशनं इत्येव मादयोरोगाम
हापापोद्भवाःस्मृताः ॥ जलो
दरयकृत्प्लीह शूलरोग व्रणानि
च श्वासाजीर्णज्वर छर्द्दि भ्रममो
ह गलग्रह रक्तार्व्वुद विसर्पाद्या
उपपापोद्भवा गदाः दंडापतानक
श्चित्र वपुः कंप विचर्च्चिकाः व
ल्मीक पुंडरीकाद्या रोगाः पाप
समुद्भवाः तथा अर्शआद्यान्
णांरोगा अतिपापाद्भवन्ति हि
अन्येच बहवोरोगा जायन्ते रोग
संकराः उच्यंते हि निदानानिप्रा
यश्चित्तानि च क्रमात् सर्व्वरो
गनाशक दानं यथा हेमाद्रि
धृतदानखंडे भगवद्वाक्यं स्वर्ण
दानं सर्व्वेषां रोगाणां नाशकारणं
तस्मात्सर्व्वं प्रयत्नेन कर्त्तव्यकम ।
नोद्भव इति मलमासतत्त्वे ।
अथारोगस्नानदिनं । तत्र
तिथयो रिक्ताः प्रशस्ताः दशमी

प्रतिपद्द्वितीया त्रयोदशी पंचमी
भिन्ना मध्यमा तत्रनक्षत्राणि ।
स्वाती श्रवणा धनिष्ठा शतभि
षाज्येष्ठा हस्ता पुष्य पूर्व्वाषाढापूर्व्व
फल्गुणी पूर्व्वभाद्रपत् मघा भरणी
मृगशिरांसि नक्षत्राः क्रूराः ।
तत्रयोगो व्यतीपातः अशोभन
संज्ञः लग्नापेक्षा केंद्रेषु पापग्रहः
। इति ज्योतिस्तत्वे
अपिच । चंद्रसूर्य्यौ व्यतीपा
ते भौमार्कशनि वासरे व्रण
मुक्तो व्याधि मुक्तः कृशः स्नानंस
माचरेत् पूर्व्वात्रय मघाश्लेषा भर
णी कृत्तिका तथा आर्द्रायांच ति
थौ रिक्ते चारोग्यस्नान माचरेत्
इति ज्योतिःसारसंग्रहः ।
रोगघ्नं क्ली औषधं इति वैद्यकं
रोगनाशके त्रि
रोगभूः स्त्री शरीरं इति शब्द
चंद्रिका ॥
रोगराजः पुं राजयक्ष्मा । इति
राजनिर्घण्टः
रोगलक्षणं क्ली निदानं इति
राजनिर्घण्टः ॥
रोगशान्तकः पुं वैद्यः इति श
ब्दचंद्रिका ।
रोगशिला स्त्री मनःशिला

इतिराजनिर्घण्टः
रोगशिल्पी पुं वृक्षविशेषः श
ताल इति भाषा इतिजटाधरः
रोगश्रेष्ठः पुं ज्वरः इति राज
निर्घण्टः
रोगहं क्ली औषधं इतिशब्द
चंद्रिका
रोगहरद्रव्यं क्ली रोगनाशक
वस्तु यथा धन्वन्तरि रुवाच द्रव्या
णिमधुरादीनि वक्ष्ये रोगहराणि
हि शालिषष्टिक गोधूमव्रीहयेचवन
यामधु मज्जा श्रृंगाटक यवकशे
रुक गोक्षुरं गंभारी पौष्क
रं बीजं द्राक्षा खर्जूरकं बला
नारिकेलत्वालमगुप्ता विदारी च
पियालकं मधुकं ताल कूष्मांडं
मुखोऽयंमधुरोगणः । मूर्च्छा
दाह प्रशमनः षडिंद्रिय प्रसादनः
क्रमिकृत्कफकृत्पथ्य पक्को
त्यर्थनिषेवितः श्वास कासास्यमा
धुर्य स्वरवासादिरा निच गल
गंड श्लीपदानि गलेलेपादि कारये
त् दाडिमामलकाश्चैव कपित्थ
करमर्दकौ । मातुलुंगाम्रा
तकंच बदरं तिंतिरीफलं द
दधि तक्रं कांजिकंच लकुचंचाम्ल
वेतसं अम्लो दंतशठश्चैको जा

रणः पाचनो रसः क्लेदनो वा
तकृत्तृष्णो विदाही वातलोमनः
श्लेष्मात्पयर्यसेव्यमानः कुप्यादि रक्त
हर्षकं शरीरस्यच शैथिल्य स्वर
कंठतनकुर्वेत् छिन्न भिन्न व्रणा
दीनि पाचयत्यग्नि भावतः लवणा
दि यवक्षारः सर्जकादिश्च लावणाः
शोधनः पाचनः क्लेदी विश्लेष म
र्दनादिकृत् मार्गशोधी मार्दवकृत्
पकः परिषेवितः गात्रकंडू को
ठशोफ वैवर्ण्य जनयेद्रसः रक्त
वाते रक्तपित्ते पुंस्त्वेंद्रिय रुजा
दिकं व्योष शिग्रु मूलकंच दे
वदारु च कुष्ठकं लवणां जम्बुज
फलं मुस्ता गुग्गुलु लांगली कटु
को दीपनः शोधी कुष्ठ कंडूकफा
न्तहृत् स्थौल्यालस्य क्रमिहरः शुक्र
मेदोविरोधनः पक्को ऽत्यर्थं सेव्य
मानो भ्रम दाहादिकृद्भवेत्
कृतमालः करीराणि हरिद्रेन्द्र
वारुण्या लाहु कंटक वेत्राणि
बृहतीद्वय शंखिनी गुडूची चद्रव
न्ती चविकुम्भंकपर्णपि काश्वेत
वार्ताकु करवीरक वासकाः रो
हितिकाशव पृथ्वी च कर्कोटोवेज
यंतिका माती वरुणाक निम्बोऽजा
तिष्मती पुनर्नवा तिक्तो रस

4077

स्वेदनः स्वाद्रोचनो दीपनस्तु ।
था शोधनो ज्वर तृष्णाश्रमूर्छा
कंडूतिकादिजित् क्लिन्न क्लेदस्व
शोषेप्यत्यर्थ स्वच सेवितः मन्या
स्तंभस्तेपकार्ति शिरःशूलव्रणा
दिकृत् त्रिफला शाल्मकी जम्बु
आम्राम्रातवटादिकं तिन्दुकं वकु
लं शाकं निष्पावं मुद्गचिल्लिका नि
ष्पावस्थानेपालंका इति क्वचित्पा
ठः कषायो ग्राहको रोपी स्तंभनः
क्लेद शोषणः पक्कोऽत्यर्थसेव्य
मानो हृदपादश्च पीडकृत् मुख
शोष ज्वराध्मान मन्यास्तंभादिका
रकः हरिद्रा कुष्ठ लवणा मेषशृं
गी बलाकुयं कच्छपी शाल्मली
त्री पुनर्नवा शतावरी अग्निमं
थो ब्रह्मदंडी स्वदंष्ट्रैरंडके तथा
यवकोल कुलत्थादिकर्षासीर
समूलकं पृथक्स्नेहस्वोवातान्तो
वडुपित्तहरस्तथा शतावरी विदा
री च वालकापी चंदनं हर्वी
वरः पिप्पलीच वदरीशाल्मकी
तथा कदली चोत्पलपद्म मुद्गर
पटोलकं श्लेष्मघ्नहरो वर्गो हरि
द्रा गुडूकुष्ठकं शतपुष्पीच जाती
च व्योषमरवधनाकुली सर्पिस्तैलव
सा मज्जास्नेहेषु प्रवरं घृतं तथापी
स्मृति

मेधाग्नि कांतिराणां शास्त्रेजुतं
केवलंपैत्तिके सर्पिर्वातिकेलव
णान्वितं देयं बहुकफे वापि
व्योषक्षार समन्वितं ग्रन्थीनाडी
क्रमि श्लेष्ममेद मारुतरोगिषु
तैलंलाघव दार्ढ्याय क्रूरकोष्ठेषु
देहिषु वाताताप सहावातव्या
याम क्षीणाः स्त्रियु स्नेहेकेशव्य
याम्यिवालवृद्ध पश्चेषुव तथा
दग्धा हतभ्रष्टायोनिकर्मा शिरो
रुजि उत्तममध्यपलं मात्रा त्रिविधा
तेष्ठ मध्यमे जघन्यस्य पलार्द्धेन
स्नेह कायौषधेषुच जनत्रसं
हृते देयं प्रथकैले नशास्यते
स्नेहे स्नेहे पीते तत्क्षणे पिब
दुष्णोदकं नरः वातानुलोम दी
प्तानि वर्ग्गा स्निग्ध समंमतेरूतस्य
स्नेहनं कार्य्यं मति स्निग्धरूतस्य
प्यामाक कोरदूषान्न तक्र पिण्या
क षष्टिभिः वातश्लेष्मणि वाते
वा कफे वा स्वेद इष्यते नस्वेदये
दतिस्थूल रक्तदुर्बल मूर्च्छितान् इ
त्यादि महापुराणे गारुडेयोगसारे ९०
अध्यायः धन्वन्तरिरुवाच घृततैला
दिक्साम्यमिमगरु सम्भूत रोगनु
त् लिंगवृष्यौ वचा सोमा ब्राह्मीस्त्र
ह्मसुवर्चला अभया गुडूचीचैव अ

दन्तपक्वबाकुची पले रक्तसमैर्भा
गेद्घृतप्रस्थं विपाचयेत् कण्टका।
र्य्यारसप्रस्थःक्षीरप्रस्थसमन्वितः
पलद्वाभ्यां घृतेनाम क्रतिमेधा
करंपरं त्रिफला चित्रक वलानि
र्गुडूचीनिम्ब वासकाः पुनर्णवाय
दुःखीच बृहतीच शतावरी पले
घृते यथालाभे सर्वरोगविषम
दनं वला शतकषायेन तैलस्या
ढ़ोटकंपचेत् कल्के मधुक मंजि
ष्ठा चंदनोत्पल पद्मकैः सूक्ष्मैला
पिप्पली कुष्ठ त्वगेलागुरुकेशरैः
गंधाश्च जीवनीयैश्च चोरटकस
माश्रितं पलकर्षद्वमिना पक्वं
स्यापयेत्तनते शुभे सर्ववात वि
कारांस्तसर्वैषाल्वनराश्रयान् ते
लमेतत् प्रशमयेत्हलाव्यराजव।
तुभं शतावरी रसप्रस्थंक्षीरश।
स्य तथैवच शतपुष्पा देवदारु
मांसीशैलेयकं वला चंदनं भग
वंकुष्ठं माला चांशुमती तथा प
तैः कर्षसमैः कल्के तैलप्रस्थं
विपाचयेत् कुब्ज वामन पंगलो
वधिरश्चैव कुष्ठिनो वायुनाभग्न·
गात्राणां येच सीदन्ति मैथुने ज
राजर्जरगात्राणां वाध्मानमपशो
षिणां त्वगतश्चापि येवाताःशि
रास्था

पुगतश्च ये स्रवन्ति नाशयन्त्या
शुतैश्चैव स्याद्दशांगकः नारायण
मिदं तैलं विस्नोक्तं रुगर्दनं
। पृथक्तैलं घृतं कर्ष्यात्समस्ते
रोचेषैः पृथक् शतावर्य्यागुडू
च्या वा विचके रोचनाप्लुतः
निर्गुंड्या वा प्रसारण्या कंटका
र्य्यारसादिभिः वैर्या वान्नतया
वापिवासकेन फलत्रिकैः ब्राह्म्या
चैरंडकेनापि भृंगराजेनमुंडिना मु
सल्या दशमूलेन खदिरेण वराद
भिः वटिका मोदको वापि चूर्णं
स्यात्सर्वरोगनुत् घृतेन मधुना
वापि युक्तं खंड गुडादिभिः लव
णैः कटुके युक्तं यथा भार्गव रो
गनुत् चित्र कर्कोरु त्रिवृता म
लब्ध हयमारकं तथा च वाताग
णिका सप्तपर्णी सुवर्चिका ज्योति
ष्मतीसंसंभज्य तैलं क्षीरे विपा
चयेत् एतन्निष्पन्दनं तैलंस्पर्श
दद्यात्भगन्दरे शोधनं रोचनं।
चैव सर्ववर्णकरं परं त्रिवृताद्य
महातैलं सर्वरोगप्रभंजनं ।
अजमोदः ससिन्दूरो हरितालनि
शाद्वयं क्षारद्वयं फेनयुतमार्क्कं
सरलोद्भवं इंद्रवारुणपर्णार्क
कटलैः कल्कैः समैः कंटलैः

स्थाने मन्दने इतिच पाठः प
भिः शार्षपजं तैल मज्जामूत्रैश्च
योजितं मृद्वग्निना पचेद् तत्
अर्कक्षीरेण संयुतं अजमोदा
दिकं तैलं गंडमालां व्यपोह
ति विद्रधस्य पचेत्पक्वे पक्वे च
व विशोधयेत् रोपणं मृदुभा
वंच तैलेनानेन कारयेत् अ
जमोदादिकं तैलं महावीर्य्यंव
रोगहृत् इति गारुडे १७८ ।
अध्यायः ।
रोगहारी न् पुं वैद्यः इत्यमरः
रोगनाशके त्रि ।
रोगिलकः पुं अशोकवृक्षः
इतिराजनिर्घण्टः ॥
रोगिवल्लभं क्ली औषधं इति
शब्दचंद्रिका रोगिप्रिये त्रि ।
रोगी न् त्रि रोगयुक्तः तत्पर्य्या
यः व्याधितः २ विकृतः ३ ग्ला
नः ४ म्लानः ५ मंदः ६ आतुरः ७
अभ्यान्तः ८ अभ्यमितः ९ रुग्णः १०
आमयः ११ अपटुः १२ इतिराज
निर्घण्टः आमयावी १३ ग्लास्नुः
१४ इत्यमरः अथचिकित्सार्थं रो
गिणः परीक्षा तत्र वाग्भटः ।
दर्शन स्पर्शन प्रश्नैः परीक्षेत
च रोगिणं आयुरादि हक्षासपर्श

ख्तीलादे प्रश्नतोऽपरं आयु।
रादि आदि शब्दात्साध्यत्वासाध्य
त्वादि दृष्या दर्शनेन अत्रस
प्तदादिभ्यश्चति भावे क्विपःस्प
र्शात्शीतादेः शीलोम मृदु क
ठिनत्वादिना परीक्षणंच प्रश्नतः
उदर लाघव गौरव तृषा क्षु
त्तावलावलादिना मिथ्यादृष्टा
विकारादिङराख्याता स्तथैवच त
था दुष्परिदृष्टाश्च मोहयेयुश्चि
कित्सकान् तत्र दर्शनं नेत्र जि
ह्वा मूत्रादेःकर्त्तव्यं तत्र नेत्रपरी
क्षा यथा नेत्रंस्यात्पवनाद्रुक्षं धू
म्रवर्णं तथारुणं कोटरान्तःप्रवि
ष्टंच तथास्रंच विलोकनं हरिद्रा
खंडवर्णंच रक्तंवा हरितं तथा
दीपद्वेषि सरा दृच नेत्रं स्यात्पि
त्तकोपतः चक्षुर्वलाश वजस्यात्
स्निग्धं स्यात्सलिलप्लुतं तथा ध
वलवर्णंच ज्योतिर्हीनं वलान्वि
तं नेत्रं द्विदोष वाऊस्मात्स्याद्दो
षद्वय लक्षणं त्रिदोष लिंगं सेवेत
तद्धारयति रोगिणं त्रिदोष दृषि
तं नेत्र मन्तर्मग्नं भृशं भवेत् त्रि
लिंगं सलिलस्राविप्रान्तेनोन्मील
तमपि अथ जिह्वा परीक्षा
शाकपत्रप्रभा रुक्षा स्फुटिता

रसनानिल रक्ताश्यामाभवे·
त्पित्ताल्लिमाइ धवला कफात्
परिदग्धाखरस्पर्शा क्रुमादोष
"ग्रेषन्पिके सै व देषहृपाधि क्ष रोपः" द्वितयलक्षणा अथ मूत्रपरी
क्षा वातेन पांडुरं मूत्रं रक्तंनीलं·
च पित्ततः रक्तमेव भवेद्रक्ताद्धव
लंफेनिलंकफात् अथशरी।
रस्य उस्तत्वादिज्ञानार्थस्पर्शानं
कार्य्यं तत्रनाडीपरीक्षा मार
पुंसो दक्षिणे हस्तस्य स्त्रियोवा
मकरस्य तु अंगुष्ठ मूलगानाडी
परीक्षेत भिषग्वरैः अंगुलीभि·
स्तुतिस्त्रभि र्नाडी मवहितःस्व
प्रोत् तच्चेष्टया सर्वंडःखंजानी
यात्कुशालोःखिलं सद्यःस्नात
स्यसुप्तस्य क्षुत्क्षातपशीलिनः
व्यायामश्रान्त देहस्य सम्यक्नाडी
नबुध्यते वातःपिके भवेन्नाडीप्र
व्यक्ता तर्ज्जनीतले पित्ते व्यक्ता
मध्यमायां तृतीयांगुलिगा कफे
तर्जनी मध्यमा मध्ये वातपित्ते
ःधिकेस्फुटा अनामिकायांतर्ज
न्यां व्यक्ता वात कफे भवेत्
मध्यमानामिका मध्ये स्फुटा
पित्तकफेःधिके ।
अंगुलि त्रितये पिस्यात्व्यक्ता।
व्यक्ता सन्निपातिनः ॥ वा

तान्वक्रगति र्नाडीपित्ताडत्प्लुत
गामिनी कफान्मदगति र्ज्ञेया
सन्निपातादतिद्रुता व्रकमुत्प्लु
त्य चलति धमनी वातपित्ततः
वहेद्वक्रंच मन्दंच वात श्लेष्माधि
केततः उत्प्लुत्य मन्दं चलति
नाडी पित्त कफेःधिके का
मात्क्रोधात्वेगवहा क्षीणाचि
न्ता भयाप्लुता स्थित्वा स्थित्वा
चलेद्यासा हन्ति स्थानच्युता त
था अतिक्षीणाच सीताच प्रा·
णान्हन्ति नसंशयः ज्वरकोपे
न धमनी सोष्मा वेगवतीभवेत्
मन्दाग्नेः क्षीणधातोश्च सैव म
न्दतरा मता चपला क्षुधित
स्यात्तृप्तस्य भवति स्थिरा सु
खिनोपि स्थिरा ज्ञेया तथा
बलवती मता इतिभावप्रका
शः रोगंप त्रि अपथ्यं अहिते
इति शब्दचंद्रिका रोगसंव
धिनिच ॥
रोचकः पुं क्षुधा तत्पर्य्यायः
बुभुक्षा २ अशना ३ जिघत्सा ४
रुचिः ५ इतिहेमचंद्रः कदली
इतिशब्दरत्नावली राजपला
डुः अवटंघः इति राजनिर्घंटः
ग्रन्थिपर्णीभेदः भेडिउर इति

नेपालदेशेख्यातः तत्पर्य्यायः
निशाचरः २ धनहरः ३ कित
वः ४ गणहासकः ५ अस्यगुणाः
मरत्वं तिक्तत्वं कटुत्वं पाके।
कटुत्वं लघुत्वं तीक्ष्णत्वं हृद्यत्वं
स्निग्धत्वं कुष्ठ कंडू कफानिलर
क्षोःश्री स्वेद मेदो ज्वर गन्ध वि
षव्रण नाशित्वंच इतिभावप्र
काशः रुचिकारके त्रि
रोचनः पुं कूटशाल्मलिः इत्य
मरः श्वेताशिग्रुः ॥ पलाडुः
आरग्वधः करंजः अंकोटः।
दाडिमः इतिराजनिर्घंटः रो
चके त्रि इतिमेदिनी ॥
रोचनकः पुं जंवीरः इतिराज
निर्घंटः ॥
रोचनफलः पुं बीजपूरकः
इतिराजनिर्घंटः ॥
रोचनफला स्त्री चिर्भिटा इति
राजनिर्घंटः
रोचना स्त्री रक्तकल्हारं
गोपित्तं गोरोचना इतिख्यातं
वरयोषित् इतिमेदिनी ।
रोचनिका स्त्री वंश रोचना इ
तिराजनिर्घंटः अंडारोचनी इ
तिरत्नमाला ॥
रोचनी स्त्री आमलकी गोरा

चना इति राजनिर्घंटः मनः
शिला इति हेमचन्द्रः श्वेत
त्रिवृता गुंडारोचनीतिख्यात व
णिक्द्रव्यं तत्पर्य्यायः काम्पि
ल्लः १ कर्कशः २ चन्द्रः ४ रक्तांगः ५
इत्यमरः कम्पिल्लः ५ कंपीलः
६ काम्पिलः ७ काम्पिल्यः ८ रो
चनी ९ इति भरतः पर्य्यायान्त
रंगुणाश्च कंपिल्लक शब्दे द्रष्याः
रोचमानः पुं अश्वग्रीवास्थरोमा
वर्त्तः यथा अश्वस्य हृदयावर्त्तो
रोचमानो गलोद्भवः इतिको
डेशाषः ॥
रोचिः स स्त्री प्रभा इत्यमरः
रोचिस्नुः त्रि अलंकारादिनादी
प्तिशीलः तत्पर्य्यायः विभ्रा
ट् २ भ्राजिष्णुः ३ इत्यमरः ।
रोची स्त्री हिलमोचिका इति
शब्दरत्नावली ॥
रोची न त्रि रोचिस्नुः इतिहे
मचंद्रः
रोच्यं त्रि प्रकाश्यं प्रीति
विषयः रुचधातोः कर्मणिय
प्रत्ययेन निष्पन्नो ऽयं
रोट् ष त्रि हिंस्रः बधकः रो
षतीति विवि गुणः इतिमुग्ध
बोधटीकायां दुर्गादासः

रोटिका स्त्री पिष्टकविशेषः रोटी इतिरुटी इतिचभाषा तत्करणप्रकारमाह शुक्लगोधूमचूर्णेन किंचित्स्थूलंच पोलिकान्तमवकेखेदयेत्कृत्वा भूयोंगारेपि तांपचेत् सिद्धैषा रोटिका प्रोक्ता गुणानस्याः प्रचक्ष्महे रोटिका बलकृद्रुच्या बृंहणी धातुवर्द्धनी वातघ्नी कफकृद्गुर्वी दीप्ताग्नीनां प्रपूजिता अथ लेटी शुक्लगोधूमचूर्णेन साम्बुगाढं विमर्द्दयेत् विधाय वटकाकारं निर्धूमेऽग्नौ शनैः पचेत् अंगारकर्कटी ह्येषा बृंहणी शुक्रला लघुः दीपनी कफकृद्बल्या पीनसश्वासकासजित् अथ यवरोटिका यवजा रोटिका रुच्या मधुरा विशदा लघुः मलमूत्रानिलकरी बल्याहन्ति कफामयान् पीनसश्वासकासांश्च मेदो मेदगलामयान् अथमाषरोटिका चूर्णीयत्कृतमाषाणां चमसीत्यभिधीयते चमसी रचिता रोटीकथ्यते बलभद्रिका रुक्षोष्णावातला बल्यादीप्ताग्नीनां प्रपूजिता माषाणां राजय स्तोये स्थापिता स्तुषीकृताः आतपे शोषिता यंत्रे पिष्टा सा धूमसीख्याता धूमसी रचितास्मैव प्रोक्ता झर्झरिका बुधैः झर्झरिका स्थाने भर्झरिका इति गर्गरिका इतिवा पाठः झर्झरी कफपित्तघ्नी किंचिद्वातकरीस्मृता अथ चणकरोटिका चणकारोटिका रूक्षा श्लेष्म पित्तास्रजिद्गुरुः विष्टम्भिनी चक्षुष्या तद्गुणा तिलशष्कुली इतिभावप्रकाशः

रोड ऋ अनादरे इतिकविकल्पद्रुमः ऋ अरुरोडत् इति दुर्गादासः ॥

रोदः स क्ली स्वर्गः भूमिः इति मेदिनी ॥

रोदनं क्ली क्रन्दनं अस्रु इति मेदिनी तस्य शुभाशुभं यथा अनश्रु स्निग्ध रुदितं सदीनं शुभदं न्दणां मधुराश्रुदीनं रुतच रुदितं न स्यात् वावरं इतिगारुडे ८८ अध्यायः कपिलाधेनुनंनेत्राम्बुना रत्नसमूहोजातः यथा पुत्रे शनिं मृतं दृष्ट्वा रुरोद कपिला मुहुः इत्युपक्रम्य तदश्रु बिन्दुनामस्मैरत्नसंबभूवह रोदनाश्रुपतनेन मृतानां नरकं यथा ज्ञानिनो मारुदन्त्येवसा रोदीः पुत्र साम्प्रतं रोदनाश्रुपतनात्सुतानां नरकं ध्रुवं। इतिब्रह्मवैवर्त्ते गणपतिखंडे २१ अध्यायः मृत शुद्धिप रोदन निषेधो यथा श्लेष्माश्रु बान्धवै र्मुक्तं प्रेतो भुंक्ते यतोऽवशः अतो न रोदितव्यं हि। क्रियाकार्य्या विधानतः इति शुद्धितत्त्वं

4083

रोदनिका स्त्री यवासः इति राजनिर्घण्टः

रोदनी स्त्री दुरालभा इत्यमरः

रोदसी स्त्री स्वर्गः भूमिः इत्यमरः ॥

रोदसी व्य स्वर्गः भूमिः यथा द्यावापृथिव्यो रोदस्यौ रोदसी रोदसीति च इति भरत धृतकोषः ॥

रोदस्यौ स्त्री भूमिस्वर्गौ यथा सहस्रयापि भूद्यावो रोदस्यौ। रोदसी चेते इत्यमरः भूर्भूमिः द्यौराकाशंप्रते सहिते विग्रहीते च रोदसी रोदः शब्दो वीप्सते इति भूद्यावौ परास्पध्येते पतेन ईवन्त सान्त शब्द द्वयेन एक वचनान्तेनापि भूद्यावोः समदिते उच्येते रोदस् रोदसीवापि दिवि भूमौ पृथक् पृथक् सहप्रयोगेऽप्यनयो रोदः स्याद्पि रोदसीति विश्वः रोदसी रोदसा माद्रे पृथ्वीस्वर्ग दिविस्तितौ इत्यजयः ॥ रोदसीमव्यय मप्यस्ति यथा द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीतिचेति इतिभट्टीकायांभरतः

रोधः पुं नदीतीरे इत्यमर बोधः स भरतौ ॥

रोधनः त्रि रोधकर्त्ता रोधेक्ली इतिव्याकरणं

रोधवक्रा स्त्री नदी यथा निम्नगारोधवक्रा वस्रवन्ती स्त्रिपुरापगेतिनदीपर्य्याये माधुरिः इति भरतः ॥

रोधोवक्रा स्त्री नदी इति त्रिकाण्डशेषः

रोधोवती स्त्री नदी इतिराजनिर्घण्टः ।

रोध्रं क्ली अपराधः पापं। इतिमेदिनी ॥

रोध्रः पुं लोध्रः इति मेदिनी राजनिर्घण्टश्च॥

रोध्रपुष्पः पुं मधूकवृक्षः इति राजनिर्घण्टः रोध्रपुष्पिणी स्त्री धातकृक्षः इतिराजनिर्घण्टः

रोपः पुं बाणः इत्यमरः
रोपणं इतिमेदिनी छिद्रेक्ली·
इतिहेमचंद्रः रोपणं क्ली विमो
हनं रुपधातो र्भावे· ल्युट्प्रत्यये
ननिष्पन्नं जननं प्रादुर्भावः
न्यस्त रुहधातोः पञ्ञादेश अन
ट् प्रत्ययेननिष्पन्नं इतिव्याकर
णे अंजनविशेषः यथा रोपणं
रसकं पिष्ट्वा सम्यक्सास्यवारि
णा रक्तीपात्रजले सर्वे त्यजेच्चू
र्णमथोगतं शुष्कंच तज्जलं।
सर्वं पर्पटीसन्निभं भवेत् वि
चूर्णितावयेत्सम्यक् त्रिवेलं त्रि
फला रसैः कर्पूरस्य रसन्तत्र
दशमांशेननिक्षिपेत् अंजये·
न्नयने तेन नेत्राखिलगंदृशि
दः इतिभावप्रकाशः ।
रोपणाचूर्णं क्ली नयनांजनवि
शेषः यथा अथरोपणचूर्णं शि
लायांरसकंपिष्ट्वा सम्यगास्याव
वारिणा रक्तीपात्रजलं सर्वत्य·
जेच्चूर्णमथो गतं शुष्कं तत्रजलं
सर्वंपर्पटी सन्निभं भवेत् विचू
र्णभावयेत्सम्यक्त्रिवेले त्रिफला
रसैः कर्पूरस्यरजस्तत्र दशामां
शेन निक्षिपेत् अंजयेन्नयनं
तेन सर्वदोषोपशांतये समस्त
नेत्र रोगघ्नं चूर्णं मेतन्नसंशयः
इतिभावप्रकाशः रोपणीवर्त्तिः
स्त्री नेत्रांजनभेदः यथा अथरो
पणीवर्त्तिः अशीतिस्तिलपुष्पा
णि षष्टिः पिप्पलि तण्डुलाः जाती
पुष्पाणि पंचाशन्मरिचानिचषो
डश सूक्ष्मं पिष्ट्वाम्बुनावर्त्तिःकृता
कुसुमिकाभिधा तिमिरार्जुनशु
क्रानांनाशिनी मांसवृद्धिनुत
पतस्या अंजने शोफकामासाहर
रोहुका कुसुमिकावर्त्तीरोपणी इ
तिभावप्रकाशः ॥
रोप्यातिरोप्यः पुं धान्यविशेषः
अस्यगुणाः रोप्यातिरोप्यालववःशी
घ्रपाकागुणोत्तराः अदाहिनो दो
षहरावल्यामूत्रविवर्द्धनाः इतिराज
वल्लभः रोमं क्ली जलं इतिशब्द
चंद्रिका ॥
रोमन् क्ली शरीरजातांकुरः रो
आ इति भाषा तत्पर्यायः ।
लोम २ अंगजं ३ त्वग्जं ४ चर्म
जं ५ तनूरुहं ६ इतिराजनिर्घंटः
स्थानविशेषे तस्यशुभाशुभं य
था अल्परोमयुता श्रेष्ठा जंघाह
स्तिकरोपमा रोम्णैकैकंकूपकेस्या·

त्पानाल्प महात्मनां द्वे द्वे
रोमे पंडितानां श्रोत्रियाणांत
थैवच रोमत्रयं दरिद्राणां रोगी
निर्मांसजानुकः ॥ इतिगारु
डे ६३ अध्यायः रहस्यरोम्णो
ऽस्पृश्यत्वं यथा नस्पर्शं शस्त्रैः
क्रीडेत स्थानि स्वानिनसंस्पृशे
त् रोमाणिच रहस्यानिनाशि
ष्टेनसदा व्रजेत् इतिकौर्मे उपरि
भागे १५ अध्यायः ।
रोमकं क्ली पांशुलवणं अय
स्कान्तभेदः इतिराजनिर्घंटः ।
रोमकंदः पुं पिंडालुः इति
राजनिर्घंटः ॥
रोमकपत्तनं क्ली देशविशेषः
रुम् इतिपारस्य भाषा यथा लं
का कुमध्ये यमकोटि रस्याःप्रा
क्पश्चिमे रोमकपत्तनंच अथ
स्ततः सिद्धपुरं सुमेरुः सौम्ये।
ऽथ याम्ये वडवानलश्च कुंडेन·
पादान्तरितानि तानि स्थानानि
षड्गोलविदो वदन्ति इतिसिद्धा
न्तशिरोमणौ गोलाध्यायः ।
रोमकूपः पुं लोमविवर-यथा
प्रजापतिख्यातमालो हरो ब्र
ह्मा कमण्डलं समस्त रोमकूपे
षुनिज वशमीलित्वाकरः इतिमार्क
ण्डेय पुराणे देवीमाहात्म्यं ॥
रोमकेशरं क्ली चामर इति
त्रिकांडशेषः ॥
रोमगुच्छं क्ली चामरं इतिहेम
रोमगुच्छकं चंद्रजटाधरौ ।
रोमन्थः पुं उद्गीर्यचर्वणं जा
डोवकारा इति भाषा इत्यमरः
रोमभूमिः स्त्री चर्म इति राज
निर्घंटः ॥
रोमलता स्त्री लोमावलिः इति
हेमचंद्रः ॥
रोमवान् त्रि लोमविशिष्टः रोम
शब्दादस्यर्थेवतुप्रत्ययेननिष्पन्नः
रोमविकारः पुं रोमांचः इति
हलायुधः ॥
रोमशः पुं मेषः इति हेम
चंद्रः पिंडालुः कुंभी शूकरः
इतिराजनिर्घंटः अतिशयलोम
विशिष्टे त्रि ॥
रोमशफलः पुं विंडिशवृक्षः
इतिराजनिर्घंटः
रोमशा स्त्री दुग्धाह्वः इति
राजनिर्घंटः लोमशाच ॥
रोमशुकं क्ली स्थौणेयकं इ
तिभावप्रकाशः
रोमहर्षः पुं रोमांचः इतिह
लायुधः ॥

रोमहर्षणं क्ली रोमांचाः इ-
त्यमरः ॥
रोमहर्षणः पुं सूतः विभी-
तकवृक्षः इतिमेदिनी अस्य
व्युत्पत्तिर्यथा श्रसते सर्वरोमा-
णि वचसा हर्षितानियत् द्वै-
पायनस्य भगवंस्ततो वै रोम-
हर्षणः भवन्तमेव भगवान्व्या-
जहार स्वयंप्रभुः इतिकौर्मे १
अध्यायः ॥
रोमांचः पुं रोमहर्षणं इत्यम-
रः पुलक कंटक रोमवि-
क्रिया रोमोद्गम रोमहर्षाश्चात्र
इतिभरतः ॥
रोमांचिका स्त्री रुदन्तीवृक्षः
इतिराजनिर्घंटः ॥
रोमांचितः त्रि जातपुलकः रो-
मांचविशिष्टः तत्पर्यायः हृ-
ष्टरोमा २ इतित्रिकांडशेषः
रोमाली स्त्री वयःसंधिः इ-
तिशब्दमाला रोमावलीच ।
रोमालुः पुं पिंडालुः इति
राजनिर्घंटः ।
रोमशविटपी न् पुं कुंभीवृक्षः
इतिराजनिर्घंटः ।
रोमावली स्त्री नाभेरूर्द्ध्वलोम-
श्रेणी तत्पर्यायः रोमलता २

इतिहेमचन्द्रः रोमाली ३
इतिशब्दमाला लोमराजी ४
यथा तस्याः प्रविष्टा नतना-
भिरंध्रं रराज तन्वीनवलोमरा-
जीनीवी मतिक्रम्य सितेतरस्य
तन्मेखलामध्यमणेरिवार्चिः
इतिकुमारसंभवः साच यौवना-
रम्भे भवति अज्ञातयौवना यथा
नीराजीर मुपागता श्रवणयोः
सीम्नि स्फुरन्नेत्रयो श्रोत्रे लग्न-
मिदं किमुत्पलमितिस्नातं करं
न्यस्यति सेवालांकुरशंकयाश-
शिशुरवी रोमावलीं प्रोंछति श्रा-
न्तास्मीति मुहुः सखी मविदिते
श्रोणीभरा शंकति इतिरसमंज-
री रोमाश्रयफला स्त्री किंकिरि-
क्षुपः इतिराजनिर्घंटः
रोमोद्गमः पुं रोमांचः इति
हलायुधः ।
रोमोद्भेदः पुं रोमांचः इति
त्रिकांडशेषः ॥
रोलः पुं पानीयामलकः इति
शब्दचन्द्रिका ॥
रोलम्बः पुं भ्रमरः इतित्रिकां-
डशेषः
रोषः पुं क्रोधः इत्यमरः ।
रोषणः पुं पारदः हेमवर्ष-

णोपलः इति मेदिनी कषस्थ-
निः । क्रोधने त्रि इतिहेम-
चन्द्रः ॥
रोहः पुं अंकुरः इतिहेम-
चन्द्रः ॥
रोहकः पुं प्रेतभेदः रोढ-
रित्रि इतिमेदिनी ।
रोहणं क्ली शुक्रं इतिराज-
निर्घंटः जन्म प्रादुर्भावः इति
रुहधातोः भावे नट प्रत्ययेन
निष्पन्नं ।
रोहणः पुं पर्वतविशेषः त-
त्पर्यायः विदूराद्रिः २ इतिजटा-
धरः ॥
रोहन्तः पुं वृक्षभेदः इत्युणादि-
कोषः वृक्षमात्रं इति संक्षि-
प्तसारोणादिवृत्तिः ॥
रोहन्ती स्त्री लताभेदः इत्युणा-
दिकोषः लतामात्रं इतिसंक्षि-
प्तसारोणादिवृत्तिः ।
रोहिः पुं बीजं वृक्षः इत्यु-
णादिकोषः धार्मिकः इतिसि-
द्धान्तकौमुद्यामुणादिवृत्तिः ।
रोहिणं क्ली कालभेदः इत्यु-
णादिकोषः सप्त दिवसीयनव-
ममुहूर्तः पूर्वाह्णश्राद्धस्य गौणका-
लत्वेनान्तरावधिः अपराह्णश्राद्ध-

स्य पूर्वावधिः एकोद्दिष्टश्राद्धस्य
समापनकालः रौहिणंचास्य
नामान्तरं यथा अत्र पूर्वाह्णे
श्राद्धमभिधाय रौहिणान्तं न
लंघयेदित्यभिधानेन पूर्वाह्णश्रा-
द्धस्य संगवान्तरो रौहिणपर्य्य-
न्त गौणपूर्वाह्णकालः प्रतीयते
तेन रौहिणं पूर्वाह्ण श्राद्धस्य गौण-
कालत्वेनान्तरावधिः अपराह्णश्रा-
द्धस्य पूर्वावधि रित्यवगम्यते ।
रौहिणन्तु दिवसस्य नवम मुहूर्त्तः
तस्य ज्योतिषोक्त रोहिणी दैवत-
त्वात् रौहिणत्व मिति व्यासः
आरभ्य कुतपे श्राद्धं कुर्यादारौ-
हिणं बुधः विधिज्ञो विधिमास्था-
य रौहिणान्तु न लंघयेत् इति
श्राद्धतत्वं ॥
रोहिणः पुं भूस्तृणः वटवृक्षः
रोहितकवृक्षः इतिराजनिर्घंटः
रोहिणिः स्त्री रोहिणीनक्षत्रं
इतिशब्दरत्नावली ॥
रोहिणिका स्त्री कोपादिना रक्त-
वर्णा स्त्री इतिजटाधरः
रोहिणी स्त्री स्त्रीगवी इत्यमरः
तडित् कटुम्भरा सोमवल्कः
लोहिता इतिमेदिनी जिनानां
विद्यादेवीविशेषः । इति

हेमचंद्रः काश्मरी स्त्रीतकी
मंजिष्ठा इतिराजनिर्घंटः कपि
लवर्णा वर्णलाकारा विरेचनेश
शस्ताहरीतकी इतिराजवल्लभः
वलदेवमाता सा वसुदेव
भार्य्या कश्यपपत्नी सुरभ्यंशा
जाता यथा देवकी रोहिणीचेम
वसुदेवस्यधीमतः रोहिणी सुरभि
र्देवी अदितिर्देवकीह्यभूत् इ।
तिमहाभारते हरिवंशः सुर
भिकन्या यथा श्रीमार्कंडेयश्चैवा
च दक्षस्य तनया याभूत्सुरभि
नामनामतः गवां माता महाभागा
सर्वलोकोपकारिणी तस्यास्तु त
नया जज्ञे कश्यपात्त प्रजापतेः
नाम्नासा रोहिणी शुभ्रा सर्वकाम
दुघान्दणां तस्या जज्ञे शूरसेनाद्य
लोहितिति तयो ज्वलात् कामधेनु
रिति ख्याता सर्वलक्षणसंयुता
इतिकालिकापुराणे शेषाध्या
यः नववर्षीयाकन्या यथाश
ष्टवर्षा भवेद्गौरीनववर्षातुरोहि
णी दशमे कन्यकाप्रोक्ताअतऊ
र्द्धरजस्वला इत्युद्वाहतत्वे ।
अश्विन्यादि सप्तविंशति नक्षत्रा
न्तर्गत चतुर्थ नक्षत्रं तत्पर्य्यायः
रोहिणीः २ इतिशब्दरत्नावली
ब्राह्मी ३ इतिहेमचंद्रः तत्र·
शकलाकृति पंचतारात्मकं त
स्याधिष्ठात्री देवता ब्रह्मा गगणम
ध्ये उदिते सति सिंहलग्नस्य अ
ष्टत्रिंशत्पलाधिकदंडत्रितयं गतं
भवति यथा कस्तकेंढि शक
लाकृतौ नभोमध्यमागतवति प्र
जापतौ पंचभे गज ऊ पत्तलिप्ति
कानिःस्रताः स्युरपि सिंहलग्नतः
इतिकालिदासकृतरात्रिलग्ननि
रूपणं तज्जातफलं यथा
स्याद्धर्मकार्य्ये कुशलः कुलीनः
सुचारुदेहो विलसत्कलेवरः सु
रागिनाकुलितातिलाशया रो
हिणीजः सधनी समानी इतिको
ष्ठीप्रदीपः गलरोगविशेषः ।
यथा रोहिणीनामक गलरोगाणां
नामानि संख्यांचाह रोहिणी पं
चधा प्रोक्ता कंठशालूकमेव च अ
धिजिह्वश्च वलयो ऽलासनामकस्तु
न्दकः ततो वृन्दःशतघ्नी च गि
लायुः कंठविद्रधिः गलौघःस्वर
घ्नश्च मांसतान स्तथैवच विदाही
कंठदेशे तु रोगा अष्टादशाऽस्मृताः
तत्र पंचानामपि रोहिणीनांसामा
न्यसंप्राप्तिमाह । गलेऽनि
लः पित्त कफौ च मूर्छितौ प्रदूष्य

मांसंच तथैव शोणितं गलोप
संरोधकरैस्तथांकुरैः निहन्त्यसू
न्व्याधि रियं हि रोहिणी अनिलः
मूर्छितः प्रवृद्धः कफ पित्ते च
मूर्छितोपित्तं वा मूर्छितं कफो
वा मूर्छितः नन्वयोपिमूर्छिता
पृथग्दोषजाया अविवक्षमाणत्वा
त् तस्या वातजाया लक्षणमाह
जिह्वासमन्ताद्भृश वेदनास्तु मां
सांकुराःकंठ विरोधनास्तुः सा रो
हिणीवातकृता प्रदिष्टा वातात्म
कोपद्रवगाढ युक्ता जिह्वासमंताज्जि
ह्वायाः सर्वतः वातात्मकोपद्रवगा
ढयुक्ता स्तंभादिभिः रतिशयेनयु
क्ता पित्तजा माह क्षिप्रोद्गमाक्षिप्रवि
दाह पाका तीव्रज्वरापित्तनिमित्तजा
ता श्लेष्मजामाह स्रोतो निरोधिन्यपिम
न्दपाकागुर्वी स्थिरा साकफसंभवास्या
हीनोऽत्र कंठस्रोतः सन्निपातजा
माह गंभीर पाकित्यनिवार्य्यवी
र्या त्रिदोष लिंगा त्रिभवाभ
वेत्सा रक्तजामाह स्फोटैः
श्चिता पित्त समान लिंगा साध्या
प्रदिष्टा रुधिरात्मिकाऽत रक्त
जेत्तरासंहारकत्वावधिमाह सद्य
स्त्रिदोषजा हन्ति [illegible] ककफस
मु
द्भवा पंचाहात्पित्तसंभूतासप्ताहा
त्पवनोत्थिता ॥ कंठ·
शालूकमाह कोलास्थिमात्रः क
फसंभवो यो ग्रंथि र्गले कंट
क शुकभूतः खरःस्थिरःशस्त्र
निपातसाध्यस्तंकंठशालूकमिति
ब्रुवंति कंटकशूक भूतः कंट
कवच्छूकवच्चवेदनाजनकः अधिजि
ह्वमाह जिह्वाग्ररूपःश्वयथुक
फात्तु जिह्वोपरिष्टादसृजैवमिश्रात्
ज्ञेयोऽधिजिह्वःखलु रोग एषवि
वर्जयेदागतपाकमेनं अस्तजा मि
श्रादेवेत्यन्वयः वलमाह वलाश
एवायतमुन्नतंचशोथं करोत्यन्न
गतिं निवार्य्य तं सर्वथैवाप्रतिवार्य्य
वीर्य्यं विवर्जनीयंवलयं वदन्ति
अलासमाह गले तु शोथं कुरुतःप्र
वृद्धौ श्लेष्मानिलौ श्वासरुजोपपन्नं
मर्मच्छिदं ह्यसरमेनमाहुः वलासस
ंज्ञं भिषजो विकारं मर्मच्छिदंहृदय
मर्मणि छेदेनेव वेदनाजनकं
एकवृन्दमाह वृत्तोन्नतोन्तः सश्वथुः
सदाहः सकंडुरोःपाक्यमृदुर्गुरुश्च
नाम्नैकवृन्दः परिकीर्तितेऽसोव्या
धिर्वलासः क्षतजप्रसूतः अंतः
गलमध्ये अपाकी ईषत्पाकी ।

अध्रुषः ईषत्स्तब्धः । वृन्दमाह
समुन्नतं वृत्तममन्ददाहं तीव्रज्व
रं वृन्दमुदाहरन्ति तच्चापि पित्त
ज्ञं प्रकोपाद्दिघातुतोदं य
वनात्मकन्तु शतघ्नीमाह
वर्त्तिर्घना कंठनिरोधिनीत्वं वि
तातिमांसोपचितप्ररोहैः अनेक
रुक्प्राणहरी त्रिदोषा ज्ञेयाश
तघ्नी सदृशी शतघ्न्या चनाक्तदि
ना अनेकरुक्वात पित्त कफज
तोदाद कंठादि युक्ता शतघ्नी
सदृशी लोहकंटक संच्छन्ना शत
घ्नी महती शिला तत्तुल्या यतः प्राण
हरी गिलायुमाह । ग्रन्थिर्गले
त्वामलकास्थिमात्रः स्थिरोऽल्परु
क्स्यात्कफ रक्तमूर्त्तिः संलक्ष्यते
शल्यमिवार्पितंच स शस्त्रसाध्य
स्तु गिलायुसंज्ञः गलविद्रधिमाह
सर्वं गलं व्याप्य समुत्थितो यः
शोफो रुजः सन्ति च यत्र सर्वाः
स सर्व दोषैर्गलविद्रधिस्तु तस्यै
व तुल्यः खलु सर्वजस्य गलौघ
माह शोफो महानन्नजलावरो
धी तीव्रज्वरो वायुगतेर्निह
न्ता कफेन जातो रुधिरान्वितेन
गलेगलौघः परिकीर्त्यतेऽसौ वायु
गतेर्निहन्ता उदानवायु गतिरो

धकः स्वरघ्नमाह । य स्ताम्य
मानः श्वसिति प्रसक्तं भिन्नस्वरः
शुष्कविमुक्त कंठः कफोपदिग्धेष्व
निलायनेषु ज्ञेयः सरोगः स्वरघ्न
नात्स्वरघ्नः ताम्यमानः तमः प्रवि
नु शुष्कविमुक्तकंठः शुष्को विमु
क्तोऽस्वाधीनः कंठो यस्य सः अस्वा
धीनता भुक्तपीतत्वे अशक्य
त्वात् अनिलायनेषु वायुवर्त्मसु
श्वसनाद्यातात् मांसतानमाह प्र
तानवान्यः श्वयथुः सकष्टो गलो
परोधं कुरुते क्रमेण समांसतानः
कथितोवलम्बी प्राणप्रणुत्सर्व
कृतो विकारः प्रतानमवान्विस्ता
रवान् सकष्टः अतिशायितं कष्टं
यत्रसः विदारीमाह सदाहतोदं श्व
यथुं सताम्र मन्तर्गले पूति विशीर्ण
मांसं पित्तेन विद्याद्वदने विदारीं पा
र्श्वे विशेषात्सतु येन शेते ।
पार्श्वे विशेषात्सतु येन शेते स
पुरुषो येन पार्श्वेन विशेषाद्दाहा
द्येन शेते तस्मिन्पार्श्वे सा विदा
री भवति इत्यर्थः । अथ गल
रोगाणांचिकित्सा रोहिणीनान्तु
साध्यानां हितं शोणित मोक्षणं ।
वमनं धूमपानंच गंडूषो नस्यक
र्मच वातजान्तु हृते रक्ते लवणैः

प्रतिसारयेत् सक्षौमान्तेर
गंडूषान्धारयेच्चाप्यभीक्ष्णशः ।
विस्राव्य पित्तसंभूतां सिताक्षौ
द्र प्रियंगुभिः घर्षयेत्कवला
द्राक्षा परूषैः क्वथिता हिताः
आगारधूम कटुकैः कफजां प्र
तिसारयेत् आगारधूमः इति
लोके कटुकानि शुंठीपिप्प
लीमरिचानि श्वेता विडंगदन्ती
युक्तैलं सिद्धं ससैन्धवं नस्यक
र्मणि दातव्यं कवलेच कफा
त्मके श्वेता अपराजिता पित्तव
त्साधयेद्वैद्यो रोहिणीं रक्तसंभ
वां विस्राव्य कण्ठशालूकं सा
धयेत्तुंडिकेरिवत् एककालं य
वान्नंच भुंजीत स्निग्धमल्पशः
उपजिह्वक वच्चापि साधयेदधि
जिह्वकं एकवृन्दन्तु विस्राव्य
विधिं शोधन माचरेत् एकवृन्द
मिवष्यायो वृन्दंच समुपाचरेत्
गिलायुश्चापि यो व्याधिस्तंच
शस्त्रेण साधयेत् अमर्मस्थं सु
पक्वं भेदयेद्गलविद्रधिं इति भा
वप्रकाशः ॥
रोहिणीपतिः पुं चंद्रः इति
हेमचंद्रः ॥
रोहिणीरमणः पुं वृषभः इति

राजनिर्घंटः वसुदेवश्च ॥
रोहिणीवल्लभः पुं चंद्रः इति
हलायुधः वसुदेवश्च ॥
रोहिणीशः पुं चंद्रः इति हे
मचन्द्रः वसुदेवश्च ॥
रोहिण्यष्टमी स्त्री रोहिणीनक्ष
त्रयुक्तभाद्रकृष्णाष्टमी यथा कृष्णा
ष्टम्यांच रोहिण्या मर्द्धरात्रेऽर्चनं
हरेः कार्या विद्धापि सप्तम्या
हन्ति पापं त्रिजन्मजं उपोषि
तोऽर्चयेत्मंत्रैस्तिथि भान्ते च
पारणं योगाय योगपतये योगे
श्वराय योगसंभवाय गोविंदा
य नमो नमः स्नानमंत्रः यज्ञाय
यज्ञेश्वराय यज्ञपतये यज्ञसंभ
वाय गोविंदाय नमो नमः ।
अर्चनस्य विश्वाय विश्वेश्वराय वि
श्वपतये विश्वसंभवाय गोविंदाय
नमो नमः शयनस्य सर्वाय सर्वे
श्वराय सर्वपतये सर्वसम्भवाय
गोविंदाय नमो नमः पारणस्य
स्थंडिले पूजयेद्देवं सचंद्रां रो
हिणीं तथा शंखतोयं समादा
य सपुष्प फल चन्दनं जानुभ्या
मवनीं गत्वा चंद्रायार्घ्यं निवेदये
त् क्षीरोदार्णव संभूत अत्रिने
त्रसमुद्भव गृहाणार्घ्यं शशांकेदं

रोहिण्या सहितो मम प्रिये
वसुदेवाय बलदेवाय नन्दाय
शौरये अनघं वामनं शौरिं
वैकुण्ठं पुरुषोत्तमं वासुदेवं हृ
षीकेशं नृसिंहं दैत्यसूदनं ।
वराहं पुण्डरीकाक्षं श्रीकान्तं मन
मथयं दामोदरं पद्मनाभं के
शवं गरुडध्वजं गोविन्दं अच्युतं
देवमनन्तमपराजितं अधोक्षजं
जगद्बीजं सर्गस्थित्यन्तकारकं अ
नादिनिधनं विष्णुं त्रिलोकेशं त्रि
विक्रमं नारायणं चतुर्बाहुं शङ्ख
चक्रगदाधरं पीताम्बरधरं दिव्यं व
नमालाविभूषितं श्रीवत्साङ्कं जग
द्धाम श्रीपतिं श्रीधरं हरिं यं
देवं देवकी देवी वसुदेवादजीज
नत् भौमस्य ब्रह्मणो गुप्त्यै तस्मै
ब्रह्मात्मने नमः नामान्येतानि सं
कीर्त्य गायत्र्यं प्रार्थयेत्पुनः ।
जाह्निमां सर्वपापघ्न इत्थं शोका
र्णवात्प्रभो देवकीनन्दन श्रीश
हरे संसारसागरात् उद्धृता ।
त्तारयेन्त्र ये स्मरन्ति सकृ
त् सोऽहं देवातिदुर्वृत्त स्त्राहि मां
शोकसागरात् पुष्कराक्ष नि
मग्नोऽहं महत्यज्ञानसागरे त्रा
हि मां देवदेवेश त्वा मतेऽन्यो
न रक्षिता स्वजन्म वासुदेवा
य गोब्राह्मणहिताय च जगद्धि
ताय कृष्णाय गोविन्दाय नमो नमः
शान्तिरस्तु शिवं चास्तु धनाढ्यः
ख्याति राज्यभाक् इति गारुडे
१९२ अध्यायः ॥
रोहित पुं सूर्य्यः इति मेदि
नी वर्णभेदः मत्स्यभेदः इति
संक्षिप्तसारोणादिवृत्तिः
रोहित स्त्री मृगी लताभेदः
इति मेदिनी ॥
रोहितं क्ली कुङ्कुमे रक्ते ।
ऋजुशक्रशरासने इति मेदिनी
रोहितः पुं मीनविशेषः मृग
भेदः रोहितकवृक्षः इति
मेदिनी रक्तवर्णः रक्तवर्णवि
शिष्टे त्रि इत्यमरः रोहि ।
तमत्स्यस्य तत्तद्गुणाश्च यथा
कृष्णः शल्की खीतकृत्तिस्तु मत्स्या
यः श्रेष्ठोऽसौ लोहितो वृत्त
वक्त्रः कोलं वत्स रोहितस्या
पि मांसं वातघ्नं स्निग्ध स्वभा
ति वीर्य्यं इति राजनिर्घण्टः अपि
च रक्ताङ्गो रक्तपुच्छो रक्ता
क्षो रक्तपत्ति कृष्णपक्षो कृ
सश्रेष्ठो रोहितः कथितो बुधैः
रोहितः सर्वमत्स्यानां वरो

वृष्योऽदितो निजित कषायानु
रसः स्वादुर्वातघ्नो नातिपित्तकृत्
ऊर्द्ध्वजत्रुगतान् रोगान् हन्यादेरोहितप्र
रुकं । इति भा
वप्रकाशः ॥ ।
रोहितकः पुं वृक्षविशेषः ।
रोहड़ा इति भाषा तत्पर्य्या
यः रोही १ हीरकशङ्कुः २ दाडि ।
मपुष्पकः ४ इत्यमरः रो
हीतकः ५ रोहितः ६ रोहि
णः ७ कूटशाल्मलिः ८ दाडिमपु
ष्पः ९ सदाप्रसूनः १० कूटशाल्म
लिः ११ विरोचनः १२ शाल्मलिकः
१३ अस्य गुणाः कटुत्वं स्निग्धत्वं
कषायत्वं सुशीतलत्वं कृमि ।
दोषव्रणप्लीहरक्तनेत्रामयाप
हत्वञ्च इति राजनिर्घण्टः अपि च
रोहितो लोहितो रोही लो
ही दाडिमपुष्पकः रोहीतकः ।
प्लीहघाती रुच्यो रक्तप्रसादनः
इति भावप्रकाशः अन्यच्च रो
हीतको यकृत्प्लीहगुल्मोदरहरः
स्मृतः इति राजवल्लभः ॥
रोहिता स्त्री रोगादिना रक्तव
र्णा यथा रोहिणी रोहिता र
क्ता लोहिनी लोहिता च सा इ
ति जटाधरः ॥
रोहिताश्वः पुं अग्निः इत्यमरः
हरिश्चन्द्रराजपुत्रः इति मेदिनी ।
रोहितिका स्त्री रागादिना रक्तव
र्णा इति जटाधरः ॥
रोहितेयः पुं रोहितवृक्षः ।
यथा प्लीहारी रोहितेयः स्या
दक्तपुष्पश्च रोहितः इति भर
तधृत रत्नकोषः
रोही न पुं रोहितकवृक्षः ।
अश्वत्थवृक्षः वटवृक्षः इति
मेदिनी ॥
रोहीतकः पुं रोहितकवृक्षः ।
इति राजनिर्घण्टः ॥
रौच्यः पुं मनुविशेषः यथा
रौच्यादय स्तथान्येऽपि मनवः
संप्रकीर्त्तिताः रुचेः प्रजापतेः
पुत्रो रौच्यो नाम भविष्यति ।
इति मात्स्ये ९ अध्यायः तन्म
न्वन्तरे देवादयो यथा त्रयोदश
मपर्य्याये ये रौच्यस्य मनोः सुराः
सप्तर्षींश्च नृपांश्चैव वदतो मे
निशामय सुपर्व्वाणः सुरा स्तत्र
सुकर्म्माणः तथा परे सुशर्म्माण
स्तथा ह्येते समुक्ता मुनिसत्तम म
हाबलो महावीर्य्य स्तेषामिन्द्रो दिव
स्पतिः भविष्यच्च सप्तर्षीन्वदतो
मे निशामय । इतिमान

यपश्चैव तत्वदर्शी निरुत्सुकः
निर्मोहः सतपा श्चास्या निष्प्रकंप
सुसमम: विष्वसेनो विविव
श्च नयकृत्रिर्भषो दृढः स्तनेत्रःत्व
मवुद्धिश्च स्तवतश्चैव तत्सताः ।
इति मार्कंडेयपुराणे अन्यद्धि
वशांरु विशाद्देद्रष्टव्यं विल
काष्टदेउः तत्पर्य्यायः वैल्वः२
इतिहेमचंद्रः ॥
रौद्र त्र नारदे इतिकविक
ल्पविदुमः चतुर्दशाक्षरी त्र प्र
रुरौद्रत नारदो३नारदः रौद्रलि
खलंतोकः इतिदुर्गादासः ।
रौद्र त्र अनारद्ये इतिकविक५
ल्पद्रुमः त्र अरुरौद्रत् इतिद्रु।
र्गादासः ॥
रौद्रं क्ली शृंगाराद्यष्टरसान्तर्गा
तशेषरसः तत्पर्य्यायः उग्रं २
इत्यमरः हेत्क्रोधस्याश्रये रुद्रो
देवता यस्य रौद्रं । यदाह
भरतः शृंगारो विष्णुदेवः स्या।
द्धास्यः प्रमथदैवतः करुणोयम
देवः स्याद्रौद्रो रुद्राधिदेवतः ।
इति हेत्क्रोधस्याश्रये उग्रतिक्रु
धा समवेति उग्रः उर्विर्यसम
वाधने नाम्नीत्तिरक निपातना
त्सुसग: सर्वाभिभाविता रौद्रःय
था

रावणादविलादि पशुवीभत्सरौद्रे
क्लीवे रूपभेदात् अन्येपुंसि वीभत्स
रौद्रो चेति पुंलिंग पाठश्च
युक्तः इतिभरतः ॥ अपिच
अथरौद्रः रौद्रःक्रोधस्थायिभावो
रक्तोरुद्राधिदेवतः आलम्ब ।
नेरिपुस्तत्रउद्देष्टाद्दीपनं मतं ।
मुष्टिप्रहार पातन विकृत छेदा
वदारणाश्चैव संग्राम संभ्रमाद्येरस्या
दीप्तिर्भवेत्प्रौढा ॥ भ्रुवि
भंगोष्ठ निर्दंशबाहुस्फोटन तर्जनाः
आत्मावदानकथन मायुधोत्क्षे
पणानिच अनुभावास्तथात्तेपक्रू
र सन्दर्शनादयः उग्रता वेग रो
मांच स्वेद वेपथवो मदः मोह
हर्षोदयश्चात्र भावाःस्युर्व्यभिचा
रिणः यथा कृत मनुमतंदृष्टंवा
ये रिदः गुरुपातकंमनुजपशुभि
र्निर्मर्यादैर्भवद्भिरुदायुधैः नरक
रिपुणा सार्द्धं तेषां सभीम कि
रीटिनाम्यय मरमसृङ्मेदो मांसैः
करो मिदिशां वलिं अयमुद्र
रीराजेदमाह रक्तास्य नेत्रताचा
त्र मेदिनी युद्धवीरतः इति
साहित्यदर्पणे ३ परिच्छेदः ।
रौद्रः पुं सूर्य्यतेजः तत्पर्य्यायः
घर्मः २ इतिमेदिनी प्रकाशः ३

द्योतः ४ आतपः ५ इत्यमरः
तस्यगुणाः आतपः कटुकोरू
क्षः स्वेदमूर्च्छात्रिषावहः दाहवै
वर्ण्यजननो नेत्ररोगप्रकोपनः
इतिराजवल्लभः सप्तरौद्रा यथा
ज्वरः पिङ्गलो रौद्रो घोरा
ख्यःकालसंज्ञितः अग्निनामा
कृतोरौद्रः सप्तरौद्राः प्रकीर्त्तिताः
ग्रन्थान्तरे सप्तमो रौद्रः प्राणदा
हः तेषांफलानि यथा पिंग।
लोरौद्रनामाच कालरूपःप्रनात
यैस्पर्शने वज्ररोगः स्यात्सर्वतो
वसमुद्भवः ज्वरो रौद्रनामाच
घोरश्च्चैव कारयेत् व्राणादिपि
त्तरोगंच नानाक्लेशकरो व्रणा
अग्नि नाम्ना यदा वर्षे रौद्रोभ
वतिनान्यथा उत्तापेन दिवितिष्ठ
त्यत्तराणां रोगदो भवेत् रौद्र
नामा महारौद्रो यत्राद्दे च भवे
द्ध्रुवं विनाहेगवाणां ऊर्यानां
नारोग समन्वितं घोरनामाम
हारौद्रो घोरश्चैव कारयेत् उ
त्तापेन सदा दग्धे नानारोगस
मन्वितं कालनामा महारौद्रउ
त्तापे पीडनं सदा नाना रोग
समायुक्तं व्रणादि कंडुकंभवेत्
इतिज्योतिषे ॥ रक्षविशे

षः इति मेदिनी तद्विवरणं
क्लीवलिंग रौद्रशब्दे द्रष्टव्यं हे
मन्तस्तत्व: इतिहेमचंद्रः यमः
इति धरणिः ॥
रौद्रः त्रि तीव्रः भीषणः इति
मेदिनी रुद्रसम्बन्धिनिच ।
रौद्री स्त्री चेउी इतिमेदिनी।
रुद्रजटा इतिराजनिर्घंटः रु
रुदैत्यहननमहारौद्रीमाया महा
रौद्रीनाम्नीचामुंडा च यथा प
कत्रव महादेवो रुरु त्लिप्याम
हाम्रधे स च मायां महारौद्री
रौद्रंथी विससर्जह सा माया
वहृथे भीमा सर्वदेव प्रमोहिनी
तया त मोहिता देवाः सघो
निद्रां त भेजिरे देवीच त्रि
शिखिनाजो तं दैत्यं समता
उयत् तया तु ताडितं तस्यदेत्य
स्य शुभलोचने चर्ममुंडेउभे
सम्यकृथक् भूते वभूवतुः
रुरोस्तु दानवेन्द्रस्य चर्ममुंडे ।
क्षणाद्धतः अपहृत्य हरेद्देवी
चामुंडा तेन साभवत् सर्वभूत
महारौद्री यादेवी परमेश्वरी ।
संहारिणी तु या चै कालरात्रिः
प्रकीर्त्तिता इति वाराहे त्रिश
क्ति माहात्म्ये ॥

रौप्यं क्ली रूप्यं इतिराज
निर्घंटः तत्करणं यथा मधा
न्धंगउ ताम्रंचकरेणामाक्तिकं र।
संपमनाव भवेद्रौप्यंसुवर्णकर
णंम्मृणउ इतिगारूडे १९८ अध्यायः
रौमंक्ली शाम्भलिवणं इत्यम
रटीकायांरामाश्रमः ॥
रौमकं क्ली सांभरिलवणं त
त्पर्य्यायः वसुकं इत्यमरः
रुमानामनदीलवणाकरःतत्र
भवंरोमकं ट वेकादितिसःरौमं
ततःस्वार्थे कःरौमकं इति त
ट्टीकायांभरतः ॥
रौमलवणं क्ली शांभरिलवणं
इतिरत्नमाला ॥
रौरवः पुं नरकविशेषः घो
रः इतिमेदिनी तस्यविवरणं
यथा रौरवे कूटसाक्षी तु याति
यश्चान्तचौरः तस्य स्वरूपंवद
तो रौरवस्य निशामयं योजनानां
सहस्रे द्वे रौरवो हि प्र
माणतः जानुमात्र प्रमाणन्तत
श्वभ्रं सुदुस्तरं तत्राङ्गारचयो
येन कृतं तद्धरणी समं जाज्व
ल्यमानतितीव्रेण तापितास्वरभू
मिना तन्मध्ये पापकर्माणं वि
मुंचंतियमानुगाः सदह्यमानस्तीव्रे
णाव
क्तिना तेन धावति पदे पदेच
पादोस्य शीर्य्यते जायते पुनः
अहोरात्रेणोद्धरणं पादन्यासेष
गच्छति एवंसहस्रं विस्तीर्णयो
योजनानां विमुच्यते इतिमार्कंडे
यपुराणे पितापुत्रसम्वादनामा
ध्यायः ॥
रौरवः त्रि चंचलः धूर्तः घोरः
इतिशब्दरत्नावली ॥
रौहिट् पुं रौहिषमृगः यथा
पष रौहिषांमध्ये चरतीति भ
वभूतिः इत्यमरटीकायांभरतः
रौहिणं क्ली दिवसनवममुहूर्त्तः
यथा अत्र पूर्वाह्णे श्राद्ध मभि
धाय रौहिणन्तु न लंघयेदित्य
भिधानेन पूर्वाह्णश्राद्धस संगवा
न्ते रौहिण पर्य्यन्त गौण पू
र्वाह्णकालः प्रतीयते तेन रौ
हिणं पूर्वाह्ण श्राद्धस्य गौणका
लत्वेनोत्तरावधिः अपराह्णश्राद्ध
स पूर्वावधि रित्यवगम्यते तत
श्च पूर्वदिने संगवात्परं रौहि
णपर्य्यन्तं तिथे लाभे परदिने
मुहूर्त्तत्रयमात्रे तत्तिथिलाभे पू
र्वदिनेश्राद्धं रौहिणान्तरूप गौ
ण पूर्वाह्णलाभात परदिने त
स्यालाभावात उभयदिनसंगवलाभे

परदिने शुक्लपक्षे तिथिर्ग्राह्या
इतिवचनात् रौहिणन्तु दिवस
स्य नवममुहूर्त्तं तस्य ज्योतिषा।
त्ररोहिणीदेवतत्वाद्रौहिणत्व
मिति इतिश्राद्धतत्वं ॥ ।
रौहिणः पुं चंदनवृक्षः इति
त्रिकांडशेषः ॥
रौहिणेयं क्ली मरकतमणिः इ
तिराजनिर्घंटः ॥
रौहिणेयः पुं वलदेवः बुध
ग्रहः इत्यमरः ॥
रौहिणेयः त्रि गोवत्सः इति
मेदिनी ॥
रौहिषं क्ली कत्तृणं इतिमे
दिनी रौहिषः पुं मृगविशेषः
इत्यमरः रोहितमत्स्यः इत्यजय
पालः ।
रौहिषी स्त्री मृगी दूर्वा इ
तिसंक्षिप्तसारोणादिवृत्तिः ।
रौल्यं क्ली रुक्षता रूक्षस्यभाव
इत्यर्थेष्यप्रत्ययेननिष्पन्नं त
थाहि तैलं यज्ञोत्य दोषघ्नं
तैलं पद्मादिकस्थितं तेनत्वां।
स्नापयाम्यघ जगन्मातरम्बिके।
का इतिदुर्गोत्सवेपांमहाष्टमीम
हानवम्यामहास्नान प्रकरणे दे
वीपुराणं ।
ल लकारः सत् यवर्गस्य तृती
योवर्णो व्यंजनस्याष्टाविंश वर्णश्च
अस्योच्चारणं स्थानं दन्तः इति
व्याकरणं तस्य स्वरूपं यथा
लकारं चंचलापांगि कुंडलीत्रय
संयुतं पीत विद्युल्लताकारंसर्व
रत्नप्रदायकं ॥ पंचदेवमयं
वर्णं पंचप्राणमयं स त्रिशक्ति
सहितं वर्णं त्रिविंदु सहितं सदा
आत्मादि तत्व सहितं हृदि भा
वय पार्वति इतिकामधेनुतंत्रं
अस्यलेखनप्रकारो यथा
कुंडलीत्रय संयुक्ता वामाद्दक्ष
गता त्वधः पुनरूर्ध्वं गतारेखा
तासु नारायणः शिवः ब्रह्मेश
क्तिश्च सन्निवेशान मस्य प्रवत्स
ते इतिवर्णोद्धारतंत्रं ॥
तत्पर्य्यायाः यथा ल इन्द्रः पू
तनाः पृथ्वी माधवः शक्रवाचकः
वलानुजः पिनाकीशः व्यापको
मांससंज्ञकः पृथ्वी नारोऽमृतं दे
वीलवर्णं वारुणीपतिः शिखा
वाणीक्रिया माता भामिनी का
मिनीप्रिया ज्वालिनी वेमिनीना
दः प्रद्युम्नः पोषणा हरिः विद्या
त्म मेरुरावली चेता मेरु गिरिः
कलारसः इतितंत्रे अस्यध्याने

यथा चतर्भुजोपीतवस्त्रारक्त ।
पंकजलोचनां सर्वदा वरदां
तीमां सर्वालंकारभूषितां यो॰
गीन्द्रसेवितां नित्यां योगिनीं
योगरूपिणीं चतर्वर्गप्रदां हे
वीनागहारोपशोभितां । एवं
ध्यात्वा लकारन्तु तन्मन्त्रं दशधा
जपेत् इति वर्णोद्धारतंत्रं ।
लं क्ली पृथ्वीवीजं इति तंत्रं।
लः पुं इंद्रः । इतिमेदिनी
लक क स्वादप्रापने इतिक
विकल्पद्रुमः स्वादो रसोपादाने
क लाकयति मोदकं वालकः
इतिदुर्गादासः ॥
लकचः पुं लकुचवृक्षः इतिश
ब्दरत्नावली ॥
लकुचः पुं वृक्षविशेषः डेउया
इतिमान्दार इतिच भाषा तम
र्यायः लिकुचः २ शालः ३ क
शायी ४ दृढवल्कलः ५ डुडः ६
कार्ष्य ७ शूरः ८ स्थूलस्कंधः ९
अस्य गुणाः तिक्तरसत्वं कषाय
त्वं उष्णत्वं लघुत्वं कंठदोषहर
त्वं शाहित्वं मलसंग्रहदायकत्वं
च इतिराजनिर्घंटः अपिच ल
कुचः स्याद्पनसो लिकुचोऽकुरित्य
पि आमं लकुच मुक्तंच गुरुविष्टं
भ

कृत्तया मधुरं च तथाम्लं चदोष
त्रितयरक्तकृत् शुक्राग्निनाशनं चा॰
पिनेत्रायाराहितंस्मृतं सुपक्वं तत्
मधु मम्लं वानिल पित्तकृत्
कफवन्हिकरं रुच्यं वृष्यं विष्टंभकं
चतत् इतिभावप्रकाशः ।
अन्यच्च लकुचं गुरुविष्टंभिस्वा
दम्लं रक्तपित्तकं श्लेष्मकारिसमी
रघ्नं शुक्र शुक्राग्निनाशनं इति
वैद्यकं ।
लक्तकः पुं अलक्तकः इतिश
ब्दरत्नावली जीर्णवस्त्रखंडं नेक
डा इति भाषा तत्पर्यायः कर्पटः
२ इत्यमरः । नक्तकः ३ इति
भरतः हे मलिनत्वादिदुष्टजी
र्णवस्त्रखंडे नेकडा इतिख्याते।
लक्तकाद्यष्टकं वस्त्रमात्रे इतिके
चित् पटोऽस्त्री कर्पटः शाटः
सिचय प्रोत लक्तकाः इतिरभ
सः लक्यते हीने राल्लायतेश्रुत
भूयते लक्तः रक लक कला
दस्त्रापने चुर्भ्यानिर्वेति विभाषि
तत्वान्न निः कर्मणि क्तः ततः
स्वार्थेकः लक्तको॰ न्तस्यादिः अ
न्यतेस्स श्लके व्यकं अज्जोःक्त
न अक्तं कंमुखं यस्मादितिनि
परवकुचीतो मनीषादित्वातश्चलक्तस

4099

पूर्वालोपे नक्तक स्तवर्गपंचमा
दिरपि इतितट्टीकायां भरतः।
लक्तकर्मा न पुं रक्तवर्णलोध
इतिशब्दचंद्रिका ।
लख स्तपि इति कविकल्पद्रुमः
लखति स्तपि गतौ इतिदुर्गादा
सः ॥
लख इ स्तपि इतिकविक।
ल्पद्रुमः इ लंख्यते स्तपि गतौ
इतिदुर्गादासः ॥
लग इ खंजे गतौ इतिकवि
कल्पद्रुमः इ लंग्यते । खंजो
गतिवैकल्पं इतिदुर्गादासः ।
लग म प संगे । इतिकविक॰।
द्रुमः मतगयति प अलगीत्।
लगति अपरज्ञाष्ठे इतिदुर्गा।
दासः ॥
लगक रके इतिकविकल्पद्रुमः
कलागयति रके स्वादाम्यः ।
रके इति रकस्वादप्रापने ।
इत्यस्मन्नेरनित्यत्वे भावे प्रति
रूपं इतिदुर्गादासः ॥
लगडं त्रि चारु इति[illegible]
त्रिकांडशेषः
लगितं त्रि संगयुक्तं लागा इ
तिभाषा इतिलगधातोः कर्मणि
क्तप्रत्यये ननिष्पन्नं ॥

लगुडः पुं दंडः लाठी इति
भाषा इत्यमरः लगुडा वंशा
दिमयो दंडः लोहमयोऽस्य
भेदः इति सुभूतिः लगुडो
लोहमयी यष्टि रस्त्रोपचारा
दित्यन्ये इतिभट्टीकायांभरतः
लग्नं क्ली राशीनामुदयः इत्यम
रः राति फलं राशि स्तत्र
वशाकारः अहोरात्रमध्ये द्वादश
राशय उदयन्ति उदयः पूर्वाचल
संयोगः तेषां क्रमेण उदयाचल
संयोगो लग्नं उक्तञ्ची भीडे ग
दित्वान्निपातनात्तस्य गः इतित
ट्टायां भरतः तेषां शून्याय
नांशपरिमाणं यथा रामोगवे
दे ३ । ४० जेलधिस्तमैते ४ । ४
बाणो रसैः ५ ६ पंच ख साभ्य
रेष्ठ ५ । ४० । वाणःकृवेदे ५ । ४८ वि
षयोंकयुग्मैः ५ । २९ क्रमोत्क्रमा
न्मेष तुलादि माने तथाहि ।
१ । ३ ४० ॥ ७ । ५ । २९ ॥
२ । ४ । २४ ॥ ८ । ५ । ४८ ॥
३ । ५ । ६ ॥ ९ । ५ । ४० ॥
४ । ५ । ४ ॥ १० । ५ । ६ ॥
५ । ५ । ४८ ॥ ११ । ४ । २४
६ । ५ । २९ ॥ १२ । ३ । ४० ॥
इतिदीपिका । दशांगुलाधिक

पंचांगलग्नमे कलिकाताख्यदेशे
वर्त्तमानोनविंशाषष्ठांशेप्रमाणा
ककारिका यथा वेदांगैः ४।८
सोन्नवेदै ४।४८ दिग्भिरसानवमैः ५।
२२ सोऽन्तरीत्तास्तुनाथैः ५।४० पा
रावाराभ्रयासैः ५।३४ गगनना
नयनैः ५।२९ षट्त्रिभि ५।२६ भ्र
दृवेदै ५।४१। भ्रंकत्नाभिः ५।१९
सप्तद्रोऽस्त्वत्त्वविभि ४।३५ दनलो
ष्टेष्ठुभिः ३।५८ सोग वेदैः ३।४० मे
षादेकोनविंशे गणित परिगतं
मान मन्नायनांशे । उदयलग्ना
त्तलग्नयो दिनं प्रति रविभोग्यप
या लभ्न दंड पलं च्छिन्नंतत्संख्ये
क्रमतः पलं विपलंच रवेर्भ्रो
म मेवं कल्पन मस्तेभ ॥ इति
ज्योतिषे पलयो र्विवरणं यथा ।
तत्रप्रवीनलग्नमानं । ।
लग्नाः दिनभूक्तं ।मासभुक्तं।
यथा पलं। विपलं। दंडः।पलं
१ मेषः । ७। ३४॥ ३।४०॥
२ वृषः । ८। ३८॥ ३।४०॥
३ मिथुनं । ९।१२॥५।६॥
४ कर्कटः । ११।२०॥ ५।४०॥
५ सिंहः । ११।२२॥५।४१॥
६ कन्या । १०। ५४॥ ५।२९
७ तुला । १०।५८॥ ५।२९
८ वृश्चिकः । १०।२२॥ ५।४१॥
९ धनुः । १०।२०॥ ५।४० ॥
१० मकरः । १०।१२॥ ५ । ६ ॥
११ कुंभ । ८। ३४॥ ४।१७॥
१२ मीनः । ७। ३४॥ ३।४७॥
तत्रस्वदेशाधुनिकलग्नमानं ।
लग्नाः दिनभुक्तं । मासभु
क्तं यथा पलं।विपलं।दंडः।पलं
१ मेषः । ७। १२॥ ४। ६ ॥
२ वृषः । ९। ३६॥ ४। ४८॥
३ मिथुनं । १०। ५४॥ ५। २२॥
४ कर्कटः । ११। २०॥ ५। ४०॥
५ सिंहः । ११। ८॥ ५। ३४॥
६ कन्या । १०। ५८॥ ५। २९॥
७ तुला । ११। १२॥ ५। ३६॥
८ वृश्चिकः । ११। २२॥ ५। ४१॥
९ धनुः । १०। ३४॥ ५। १९॥
१० मकरः । ९। १०॥ ४। ३५॥
११ कुंभः । ७। ५६॥ ३। ५८॥
१२ मीनः । ७। ३४॥ ३। ४७॥
अथ जन्मकालीन लग्नस्थग्रहस्थि
तिफलं लग्नेसूर्य्ये ऽतिरोगीशा
शिनि बलयुक्तो रूपवान्वित्तयुक्तोभौ
मेऽंगः स्ववाग्मी शशधरतनयेसर्व
शास्त्रार्थवेत्ता जीवे दातापवित्रःस्व
कवि रथ यते भार्गवे मंडलेशः
सौरे कंडूतिगात्रस्तमसिचनियतं।

वंचितो धर्म्महीनः इतिज्योति स्तत्वे
॥ अपिच । हरिरूपा
व उदयन्त समारभ्य राशौ भानुः
स्थितो हर स्वराश्यपासे व्रजेदक्कि
षड्भिः षड्भिस्तथा निशा मीने मेषे
व पंचस्त स्वतस्रो वृष कुंभयोः ।
मकरे मिथुने तिस्रः पंच चापे च
कर्कटे सिंहे चवृश्चिके षट्च सप्त
कन्यातले तथा एता लग्नप्रमा
णानघटिकाः परिकीर्त्तिताः शरसर्वा
वशानेषु रसाब्धीषुधिसागराः ल
ग्नोदया द्वि रे वल्ल लग्ना मेषाद्।
योऽथवा मेषलग्ने भवेद्वन्ध्या वृषे
भवति कामिनी मिथुने सुभगा
कन्या वेश्या भवति कर्कटे सिंहे
चैवाल्पपुत्राच कन्यायां रूपसे।
युता तुलायां रूपमैश्वर्य्य वृश्चिके
कर्कशा भवेत् सौभाग्यं धनूषि।
स्यात्व मकरे नीचगामिनी । कुं।
भे चैवाल्पपुत्रास्यान्मीने वैराग्यसं
युता तुला कर्कटको मेषो
मकरश्चैव गुशयः चरकार्थ्या।
णिकर्य्याच्च स्थिरकार्याणि चैवहि
पंचाननो वृषः कुंभो वृश्चिकःस्मृः
स्थिराणि हि कन्या धनुश्चमीन
श्चमिथुनं द्विस्वभावतः द्विस्वभा।
वानि कर्माणि कुर्य्यादेषु विचक्षणः

यात्रा चैरणा कर्त्तव्याप्रवेष्टव्यं
स्थिरेणतु देवस्थापन वैवाहं
द्विस्वभावेन कारयेत् इतिगा
रुडे ६२ अध्यायः
लग्नं पुं स्तुतिपाठकः तत्पर्य्या
यः प्रातर्गायः २ स्तुतिव्रतः ३
इतित्रिकांडशेषः स्मृतः ।
इतिजटाधरः ॥
लग्नः त्रि सक्तः लज्जितः इति
मेदिनी ॥
लग्नकः पुं प्रतिभूः इत्यमरः ।
हेलागा इति जामिन इतिवा ख्या
ते तत्कार्य्ये लग्नकः ग्रलस्नी
डीडेकःस्वार्थेकः प्रतिनिधिर्भव
ति प्रतिभूः क्षिप इति महेी
कार्या भरतः ।
लग्निका स्त्री नग्निका इत्यम
रटीकायां
लघ इ उ अभुग्गात्योः इति
कविकल्पद्रुमः इलंघ्यते उ ल
घते शुभकोजननाभावः तथाच
ये गुणा लंघने प्रोक्ता स्ते गुणा
लघुभोजने इतिवैद्यकं लंघ
ने उपवासे इत्यर्थः इतिदुर्गा
दासः ॥
लघ इ शोषे इतिकविकल्पद्रु
मः इ लंघ्यते शोष इत्यस्मी

करणं । यं याति इतिदीपो
गंकदाचित्न लंघति इतिरत्ना
पुधः गतावप्यन्ये अन्येचालंघि
पुः शैलान् इतिदुर्गादासः ।
लघ इक त्विषि इतिकविकल्प
द्रुमः इकलंघयति त्विषिदीप्तौ इ
तिदुर्गादासः ॥
लघट् पुं वायुः इत्युणादिकोषः
लघटिः पुं वायुः इत्युणादि
कोषः लघिमा[न्] पुं लघुत्वं त
त्शिवस्याष्टैश्वर्यान्तर्गतैश्व
र्यविशेषः यथा लघिमा वशि।
त्वेशित्वं प्राकाम्यं महिमाणिमा य
त्र कामावसायित्वं प्राप्तिरैश्वर्यम
ष्टधा इति हेमचंद्रः ॥
लघिष्ठः त्रि अयमनयोरेषामत्य
तिशयेन लघुः इत्यर्थे इष्ठप्रत्य
ययेन निष्पन्नः इतिव्याकरणं
लघीयान् [स्] त्रि अयमनयो रेषा
मत्यतिशयेन लघुःइत्यर्थेईयस्
प्रत्ययेन निष्पन्नः इतिव्याकरणं
लघु क्ली शीघ्रं इत्यमरः ह्रस्व
गुरु इतिमेदिनी नामन्तकं ।
इतिराजनिर्घंटः ॥ ।
लघुःस्त्री पृक्कानामौषधिः इ
मेदिनी ॥
लघुः त्रि अगुरुः मनोज्ञः ॥

निःसारः इतिमेदिनी ॥ ह्रस्वः
इतिहेमचंद्रः । व्याकरणोक्त ल
घुसंज्ञा यथा ह्रस्वो लघुः
दीर्घो गुरु रित्युच्चारणवशाद्ध्रस्वेत
तथा संयोगे सति ह्रस्वोपिगुरुर्गु
रुमतोऽन्त्यत्इति वर्ननाद ।
इति दुर्गसिंहकृतकलापवृत्तिः ।
छंदः शास्त्रोक्तं लघुलक्ष
णं यथा म स्त्रिगुरु स्त्रिलघुश्च
नकारो भादिगुरुः पुन रादिलघु
र्यः जो गुरुमध्यो रो लघुमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ।
गुरु रेकोगकारस्तु लकारो लघु
रेककः इतिछन्दोमंजरी ॥
लघुकायः पुं छागः इति त्रिकां
डशेषः तद्दशरीरश्च ॥
लघुकाश्मर्यः पुं कट्फलवृक्षः ।
इतिराजनिर्घंटः ॥
लघुखट्विका स्त्री क्षुद्रखट्वा तत्प
र्यायः आसन्दी २ इति हारा
वली ।
लघुगणः पुं अश्विनी अथ हस्त
नक्षत्राणि यथा उग्रः पूर्वमघान्त
काध्रुवगण स्त्रीण्युत्तराणि स्वभूर्वा
नादित्य हरित्रयं चरगणः पुष्या
श्विहस्ताःलघुः इतिदीपिका ॥
लघुगर्गः पुं त्रिकंटकमत्स्यः ।

इतिहारावली ।
लघुबिर्भिटा स्त्री मृगेर्वारु इ
तिराजनिर्घंटः ॥
लघुजंगलः पुं लावकपक्षी इति
त्रिकांडशेषः ॥
लघुदन्ती स्त्री क्षुद्रदन्तीवृक्षः य
था लघ्वी दन्ती विशल्या चस्या
दुडुम्बरपर्ण्यपि तथैरंडफलाशी
घ्रा श्येनघंटा घुनप्रिया वराहांगी
चकथिता निकुंभश्च मकूलकः।
अस्यागुणाः दंती द्वयं सरंपा
केरसे च कटु दीपनं गुदांकुरा
श्मशूलास्र कंडू कुष्ठ विदाहनु
त् तीक्ष्णोष्णं हन्ति पित्तास्रक।
फशोथोदर क्रिमीन् इतिभावप्रका
शः तत्फलगुणाः । लघुदंती
फलन्तुस्यान्मधुरं रसपाकयोः।
शीतलं सृष्टविण्मूत्रं गलशोथक
फापहं इतिभावप्रकाशः ।
लघुदुंदुभिः पुं हुडुक्वाद्यं इति
शब्दरत्नावली ॥
लघुद्राक्षा स्त्री काकली द्राक्षा
इति राजनिर्घंटः ॥
लघुनामन् क्ली अगुरु इतिश
ब्दचंद्रिका ॥
लघुपंचमूलं क्ली लघुपंचमूलग
णं तत्र शालपर्णी पृश्निपर्णी

बृहती कंटकारी गोक्षुरसंयुक्त
यथा शालपर्णी पृश्निपर्णीवा
र्ताकी कंटकारिका गोक्षुरःपं
चभि श्चैतैः कनिष्ठं पंचमूलकं
अस्य गुणाः पंचमूलं लघु स्वा
द्वल्पं पित्तानिलापहं नात्युष्ण
बृंहणं ग्राहि ज्वर श्वासाश्मरी प्र
णुत् इतिभावप्रकाशः
लघुपत्रकः पुं रोचनी मुंडा
रोचनी इतिख्यातः इति शब्द
चंद्रिका ।
लघुपत्री स्त्री अश्वत्थीवृक्षः इ
तिराजनिर्घंटः
लघुपिच्छिलः पुं भूकर्बुदारकः
इति राजनिर्घंटः ॥
लघुपुष्पः पुं भूमिकदम्बः इति
राजनिर्घंटः ।
लघुबदरः पुं क्षुद्रकोलिः तत्प
र्यायः सूक्ष्मफलः २ बहुकरः ३
सूक्ष्मपत्रः ४ दुस्पर्शः मधुरः ६
दरहारः ७ शिविप्रियः ८ अस्य
पक्वफल गुणाः मधुराम्लत्वं
कफवातनाशित्वं रुच्यत्वं स्नि
ग्धत्वं जन्तकारकत्वं ईषत्पित्ता
र्त्ति दाहशोषघ्नत्वंच इतिराजनि
र्घंटः लघुबदरी स्त्री भूबदरी इति
राजनिर्घंटः ॥

लघुब्राह्मी स्त्री क्षुद्रब्राह्मी तत्प
र्य्यायः जलोद्भवा २ सूक्ष्मपत्रा
३ इति राजनिर्घण्टः ॥
लघुमत्स्यः पुं क्षुद्रमत्स्यः इति
राजनिर्घण्टः ॥
लघुमांसः पुं तित्तिरिपक्षी इति त्रि
काण्डशेषः ॥
लघुमांसी स्त्री गन्धमांसी इति
राजनिर्घण्टः
लघुलयं क्ली वीरणमूलं इत्य
मरः ॥
लघुसदाफला स्त्री लघूडुम्बरि
का इति राजनिर्घण्टः ॥
लघुहस्तः पुं शीघ्रवेधी इति
हेमचन्द्रः
लघुहेमदुग्धा स्त्री लघूडुम्बरिका
इति राजनिर्घण्टः ॥
लघूडुम्बरिका स्त्री क्षुद्रोडुम्ब
रिका छोटोडुम्बर इति भाषा त
त्पर्य्यायः लघुपत्रफला २ लघु
हेमदुग्धा ३ लघुसदाफला ४ ल
घ्वोडुम्बरिका ५ रसवीर्य्यवि
पाकेषूडुम्बरात्किंचिन्न्यून गुणो
यं इति राजनिर्घण्टः ।
लघ्वी स्त्री लाघवयुक्ता स्यन्दन
प्रभेदः इति मेदिनी पृक्का
इति राजनिर्घण्टः

लंका स्त्री रक्षःपुरी अधुना सैल
न् इति नाम्ना ख्याता । ज्योतिः
शास्त्रमते सा च पृथिव्या मध्यभा
गे तिष्ठति लंकोदयाद्यवखंडेभ्यः
स्वदेशे लग्नप्रमाणं भवति ।
यथा लंका कुमध्ये यमकोटि
रस्याः प्राक् पश्चिमे रोमकपत्तनं च
अधस्ततः सिद्धपुरं सुमेरुः सौम्ये
थ याम्ये वडवानलश्च ॥
कुवृत्तपादान्तरितानि तानि स्था
नानि षड्गोलविदो वदंति अपि च
यल्लंकोज्जयनी पुरोपरि कुरुक्षेत्रादि
देशान् स्पृशन्सूत्रं मेरुगतं बुधै
र्निगदिता सा मध्यरेखा भुवः
आदौ प्रागुदयो परत्र विषये
पश्चाद्धि रेखोदयात्स्यात्तस्मात्क्रि
यते तदन्तरभवं खेटेष्वृणं स्वं
फलं इति सिद्धान्तशिरोमणिः
॥ अथ लंकापुरीवर्णनं
त्वष्टोवाच । त्रिंशद्योजनवि
स्तीर्णां स्वर्णप्राकारतोरणां
दक्षिणस्योदधेस्तीरे त्रिकूटोनाम
पर्वतः शिखरे तस्य शैलस्य मध्य
मम्बुधि सन्निधौ पतत्रिभिश्च दु
ष्प्रापां टंकच्छिन्नां चतुर्दिशं ॥
शक्राज्ञया मत्कृता पूर्वं यत्नात्
ऊवसंवैः वसन्त तत्रदुर्द्धर्षाः

सुखं राक्षसपुंगवाः अमराव
तीं समासाद्य सेन्द्रा इव दिवौकसः
लंकादुर्गं समासाद्य शत्रूणां
शक्रसूदनाः दुराधर्षा भविष्य
तिराक्षसैर्बहुभिर्वृताः इति च ।
लिङ्गपुराणे कपिलदर्शननामाध्या
यः शाखा शाकिनी कुलटा ।
इति मेदिनी धान्यविशेषः तत्प
र्य्यायः करालत्रिपुटा २ कांडि
का ३ कृष्णात्मिका ४ अस्या
गुणा रुच्यत्वं हिमत्वं गौल्य
त्वं पित्तनाशित्वं वातकारित्वं
गुरुत्वं च इति राजनिर्घण्टः ।
लंकारारी न पुं हनूमान् इति
शब्दरत्नावली ॥
लंकाधिपतिः | पुं रावणः इति
लंकापतिः | लोधरभूरिप्रयोगो
लंकापिका स्त्री पृक्का पिडिशाक
लंकायिका } इति भाषा इति
लंकारिका } शब्दरत्नावली ।
लंकास्थायी न पुं वृक्षविशेषः
लंकासिज इति भाषा यथा लंका
स्थायी राजवृक्षो भद्रवृक्षो विशा
यकः इति शब्दचंद्रिका लंकावा
सिनि त्रिलोकेशः पुं रावणः इति
त्रिकाण्डशेषः ।
लंकोपिका स्त्री पृक्का इति शब्द

रत्नावली ॥
लंकोपिका स्त्री पृक्का इति
शब्दरत्नावली ॥
लंगः पुं संगः खिङ्गः नो इति
भाषा इति मेदिनी ।
लंगलं क्ली लांगलं इत्यमरादि
कोषः ॥
लंघनं क्ली उपवासः क्रमणं
प्लवनं इति मेदिनी अथास्तीय
गतिः यथा स तन्तु लंघनं प
तिस्यागमनुसारकं इति हेम
चंद्रः अग्निलंघननिषेधो यथा
नवाग्निं लंघयेद्धीमान्नोपदध्याद
धः क्वचित् न चैनं पादतः कुर्यात्
मुखेन न धमेद्बुधः इति कौर्मे
उपरिभाग १५ अध्यायः
लच्छे लक्ष्मणि इति कविकल्प
द्रुमः लच्छ निहृषं चक्रेण गोपः
इति दुर्गादासः ॥
लज उ॰ व्रीडे इति कविकल्प
द्रुमः उ॰ लजते विष्ठायोलभश्च
न्ये इति दुर्गादासः ॥
लज इ भर्त्से इति कविकल्पद्रु
मः लजति इ लंजयते इति
दुर्गादासः ॥
लज क अंतर्द्धौ इति कविकल्प
द्रुमः अंतर्द्धि राच्छादनं क

लाज्जयति वंशं मेघः इतिदु।
र्गादासः
लज्ज इक भावक्षार्थे इतिक
विकल्पद्रुमः इकल्लज्जयति।
भादीप्तिः षड्हार्थो निकेतन हिंसा
वलदानानि इतिदुर्गादासः॥
लज्ज लक भासने इतिकवि
कल्पद्रुमः कलज्जयति भास
नेदीप्तिः इतिदुर्गादासः।
लज्जकारिका स्त्री लज्जालुल
ता। इतिशब्दमाला।
लज्जा स्त्री अन्तःकरणवृत्तिवि
शेषः इतिनागोजीभट्टः अक
र्तव्येकर्माणि परज्ञानभयं ला
ज इतिभाषा तत्पर्य्यायः नेरा
हं २ ह्रीः ३ त्रपा ४ व्रीडा ५ मा
अन्यतश्चेतअपत्रपा ६ इत्यमरः
मन्दास्यं ७ लज्या ८ व्रीडः ९ व्री
डनं १० इतिशब्दरत्नावली लज्जा
लुः इतिराजनिर्घण्टः॥
लज्जालुः स्त्री लुपविशेषः
तत्पर्य्यायः रक्तपादी २ शमी
पत्रा ३ स्पृक्का ४ खदिरपत्रि
का ५ संकोचिनी ६ समंगी
७ नमस्कारी ८ प्रसारिणी ९ सप्त
पर्णी १० खदिरी ११ गण्डमालि
का १२ लज्जा १३ लज्जिरी १४ स्पर्श
लज्जा १५ अस्रगोपिनी १६
रक्तमूला १७ स्वगुप्ता १८
अंजलिकारिका १९ । इति
राजनिर्घण्टः महाभीता २१ व
शिनी २२ महौषधिः २३ इति
शब्दचंद्रिका अस्या गुणाः क
टुत्वं शीतत्वं पित्तातिसारशोफ
दाह श्रम श्वास व्रण कुष्ठक
फास्रनाशित्वंच॥ तद्भेदो
यथा लज्जालु विपरीतान्याअ
स्तत्प वृद्दला वैपरीत्याच
लज्जालु ह्रीभिधाने प्रयोजयेत
लज्जालुर्वैपरीत्याऽः कटु रुमः
कफापहत् रसे नियामकश्चै
वनाना विज्ञानकारकः इतिरा
जनिर्घण्टः अन्या हंसपादीशब्दे
द्रष्टव्या अपिच लज्जालुःस्या
त्सामीपत्रासमंगाञ्जलिकारिका
रक्तपादीनमस्कारी नाम्ना ख
दिरकेत्यपि॰ लज्जालुःशीतला॰
तिक्ता कषाया कफपित्तजित र
क्तपित्त मतीसारं योनिरोगान्
विनाशयेत अथ लज्जालुभे
दः अलम्बुषा खरत्वक्च तथा
मेदोगला स्मृता अलम्बुषाल
घुःस्वादुःकृमि पित्त कफापहा इति
भावप्रकाशः अन्यादृग्धिकाशब्दे
द्रष्टव्या।

लज्जाशीलः त्रि लज्जाविशिष्टः
तत्पर्य्यायः अपत्रपिष्णुः २
इत्यमरः लज्जितः ३ इति
शब्दरत्नावली॥
लज्जितः त्रि लज्जायुक्तः तत्प
र्य्यायः ह्रीणः २ ह्रीतः ३ इत्
इत्यमरः॥
लज्जिरी स्त्री लज्जालुः इतिरा
जनिर्घण्टः।
लज्या स्त्री लज्जा इतिशब्दर
त्नावली
लंज लक भासने इतिकवि
कल्पद्रुमः क लंजयतिलंजाप
यति भासनं दीप्तिः इतिदुर्गादा
सः लंजः पुं पदः कच्छः इति
हेमचंद्रः पुच्छः इतिजटाधरः।
लंजिका स्त्री वेश्या इतिहेम।
चंद्रः॥
लट बाल्योक्त्योः इतिकवि।
कल्पद्रुमः बालोऽज्ञः तस्य भा।
वो बाल्यव्यामोह इतियावत्
लटतिलोकः शिशुःस्यात् किं
विहदतिवेत्यर्थः इतिदुर्गादासः
लटः पुं प्रमादवचने दोषः।
इति विश्वः॥
लटकः पुं दुर्जनः इत्युणादि
कोषः
लटपर्णं क्ली त्वचं इतिरा
जनिराजनिर्घण्टः॥
लट्टः पुं दुर्जनः इतिशब्दरत्ना
वली॥
लड्डः पुं जातिविशेषः नेट्टुया
इतिभाषा रागभेदः तुरंगमः
इत्युणादिकोषः
लड्डा स्त्री करंजभेदः नाटाकरं
जा इति भाषा वाद्यभेदः पक्षि
विशेषः ग्रामचटक इतिख्यातः
इतिमेदिनी कुसुंभं। इतिहे
मचंद्रः भ्रमरकः। भोउरी
इतिख्यातः इत्यमरभरतौ।
लड विलासे इतिकविकल्प
द्रुमः लडति बाला इतिदुर्गादासः
लडति म उन्मथनजिह्वयोः इति
कविकल्पद्रुमः उन्मथनं पीडितो
भावः उत्तिमीभावश्च लडति
लता वायुना पीडिता उत्तिमा
वा स्यादित्यर्थः जिह्वा तद्विष
यक्रिया लडति जिह्वास्पन्दन
वतीस्यादित्यर्थः स लडयति ल
डयति त्वच खलतयन्मूर्निति।
श्रीहर्षः पीडयतीत्यर्थः कवाटघ्नी
भिन्दुः किरणा लहरी महलय
तीतिकृपादिः उत्क्षिपतीत्यर्थः उभ
यत्रडलयो रेकत्वात्तत्वं केचित्तु

कोन्मथने इति परिस्वामिका
या उन्मथने उत्क्षेपन मितिया
ख्यायलडति जिह्वां सर्प इत्येवो
दाहरन्ति इतिदुर्गादासः ॥
लडक उपसेवे इतिकविक
ल्पद्रुमः उपसेव इह अस्मन्नपा
लनं कलालयेत्यंवर्षाणिपुत्र
मिति अत्र डलयो रेकत्वाल्लत्वं ।
कल्पनीया मम मनीषा इति
रमानाथः लाडयति ललनाम्पः
इतिदुर्गादासः
लड क उ॰ दीप्ते इतिकविक
ल्पद्रुमः क उ॰ लाडयते लाभप
वइत्यन्ये विशेषेण आत्मानि ।
त्वाद्दीप्ता इतिदुर्गादासः ।
लड इ कि भाषणे इतिकवि
कल्पद्रुमः इ लंडयते किलंडय
ति लंडति भाषणं कथनं अयं
केचिन्न मन्यते इतिदुर्गादासः
लड अ इ कि उत्क्षेपणे इति
कविकल्पद्रुमः अ लंडिना अनु
बन्ध बलादिम्यवधानेपिनिष्ठा
तस्यनत्वं अस्मान्निष्ठाया मिन्नस्या
दिल्येके लड्ड इति इ लंडयते ।
किलंडयति लंडति लंडुलं लो
कः इतिदुर्गादासः ॥
लड त क क्षेपे इतिकविकल
द्रुमः लडयति अललाडत इति
दुर्गादासः ।
लडहः त्रि मनोज्ञः इति त्रि
काण्डशेषः
लड्डु त्रि दुर्जनः इतिशब्दरत्ना
वली
लड्डुकः पुं पिष्टविशेषः लाड्डु
इतिभाषा यथा लड्डुको डु॰
जेरो गुरुः इतिराजवल्लभः
अपिच तैलेन हविषा पक्कम
वेत चूर्णंच लड्डुकः इतिशब्द
चन्द्रिका ।
लंडं क्ली विष्ठा लाड इति
भाषा इतिकेचित्
लंडजः त्रि लंडदेशजातः यथा
पूर्वाम्नाये नवशतं षडशीतिः
प्रकीर्त्तिताः फिरंगभाषया तं
त्रास्तेषां संसाधनात्कुवि अपि
पा मंडलानांच संग्रामेष्वपरा
जिताः इंरेजा नव षट् पंचलंड
जा श्चापि भाविनः इति मे
रुतंत्रे २३ प्रकाशः लंडस्तु
अधुना लंडन् इतिख्यातः इंरे
जानां राजधानीच ॥
लत याते सौत्रधातुरयं इति
कविकल्पद्रुमः लता इतिदुर्गा
दासः ॥

लता स्त्री लतति वेष्टयतेया ।
साशाखादिरहिता गुडूच्यादिः
तत्पर्यायः वल्ली २ व्रतति ३
इत्यमरः वल्लिः ४ वेल्लिः ५ प्र
ततिः ६ साशाखापत्रसमायुक्ताचे
त्प्रतानिनी इतिशब्दरत्नावली ।
तत्पर्यायः वीरुत् २ गुल्मिनी
३ उलपः ४ इत्यमरः आमायां ।
वीरुधां छेदकर्त्तु र्निन्दा यथा
अप्सु तस्मिन्नहोरात्रे पूर्वंविश
ति चंद्रमाः ततो वीरुत्स्ववस
ति प्रयात्यर्के ततः क्रमात् ।
छिनत्ति वीरुधो यस्तु वीरुत्सं
स्थे निशाकरे पत्रं वा पातय
त्येकं ब्रह्महत्या स विन्दति ।
इतिविष्णुपुराणे २ अंशे १२ ।
अध्यायः आश्रमे शोभनीया
शुभदा लतादि र्यथा आला
बुश्चापि कुष्मांडे मायाम्बुअस्तु
कामुकः खर्ज्जुरी कर्कटीचापि
शिविरे मंगलप्रदा वास्तूकःका
रवेलश्च वार्त्ताकुश्च शुभप्रदा ल
ताफलंच शुभदं सर्वं सर्वत्र नि
श्चितं इति ब्रह्मवैवर्त्ते श्रीकृष्ण
जन्मखंडे ९२ अध्यायः ॥
शाखा प्रियंगुः स्पृक्का अशन
पर्णी इत्यमरः ज्योतिष्मती ।
लताकस्तूरिका माधवी दूर्वा
इति मेदिनी कैवर्त्तिका । सा
त्रिवा इतिराजनिर्घण्टः ।
लताकरंजः पुं करंजविशेषः ।
कंटककरंज इति हिन्दीभाषा ।
तत्पर्यायः दुष्पर्शः २ वीराख्यः ३
वज्रवीजकः ४ धनदाक्षी ५ कंटफ
लः ६ कुवेराक्षी ७ अस्यपत्रगुणाः
कटुत्वं उष्णत्वं कफ वात ना
शित्वंच तद्वीज गुणाः दीपन
त्वं पथ्यत्वं शूल गुल्म विषह
त्वंच इतिराजनिर्घण्टः
लताकस्तूरिका स्त्री लताकस्तूरी
तत्पर्यायः कटुः २ दक्षिणदेश
जा ३ अस्या गुणाः तिक्तत्वं ।
स्वादुत्वं वृष्यत्वं हिमत्वं लघुत्वं
चक्षुष्यत्वं छेदनीत्वं श्लेष्म ।
तृष्णा वस्त्यास्यरोग नाशित्वं
च इतिपथ्यापथ्यविवेकः अपिच
लताकस्तूरिका तिक्ता स्वाद्वी
तीस्यरोगनुत् इतिराजवल्लभः ।
लताजिह्वः पुं सर्पः इति शब्द
माला ॥
लतातरुः पुं नारंगवृक्षः ताल
वृक्षः इति शब्दमाला शाल
वृक्षः इतित्रिकाण्डशेषः
लताद्रुमः पुं लताशालः तत्

पर्य्यायः भार्त्तः २ अस्थकर्णः
३ ऊशिकः ४ वत्सः ५ दीर्घः ६ इ
तिरत्नमाला ।
लतापनसः पुं फललताविशेषः
तरमुज इतिख्यातः तत्पर्य्यायः ।
चेलालः २ चित्रफलः ३ सखाश
४ रानेतमिषः ५ नाटाम्रः ६ सेतुः
७ इति त्रिकाण्डशेषः ।
लताएक्का स्त्री सप्तइम्ला पिटि
ङ्ग शाकइति भाषा इतिशब्द
रत्नावली ॥
लताप्रतानिनी स्त्री शाखाप्रच
यवल्लीलता तत्पर्य्यायः वीरुत् २
गुल्मिनी ३ उलपः ४ इत्यमरभ
रतौ वीरुधा ५ वरुत् ६ इतिश
ब्दरत्नावली ॥
लताफलं क्ली पटोलः यथा
वास्तुकः काववेल्लश्च वार्त्ताकश्च
शुभप्रदा लताफलञ्च शुभदं सर्वं
सर्वत्र निश्चितं इतिब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखण्डे ९२ अध्यायः
लताभद्रा स्त्री भद्रालीवृत्तः इति
शब्दमाला ॥
लतामणिः पुं प्रवालः इति
त्रिकाण्डशेषः राजनिर्घण्टश्च ।
लतामरुत् स्त्री शृक्का इतिश
ब्दरत्नावली ।

लतामाधवी स्त्री माधवीलता
इतिशब्दरत्नावली
लतायष्टिः स्त्री मञ्जिष्ठा इति
शब्दमाला ॥
लतायावकं स्त्री प्रवाले इति
हारावली ॥
लतारसनः पुं सर्पः इतिहारा
वली ॥
लतार्कः पुं हरित्पलाण्डुः तत्प
र्य्यायः दुद्रुमः २ इत्यमरः
लतालकः पुं हस्ती इतित्रिका
ण्डशेषः ॥
लतावेष्टः पुं षोडशरतिबन्धा
न्तर्गतरतीयबन्धः यथा बाहुभ्यां
पादयुग्माभ्यां वेष्टयित्वा स्त्रियं
रमेत् लकुलिंग ताडनं योनौ
लतावेष्टाय सुच्यते इतिरति
मञ्जरी देशविशेषः यथा
अश्लेषेण निरुद्धसञ्चरान्यादिशु
बाल्लदा अभ्यन्तरेव मार्गश्च
द्युतश्च समन्ततः शैलमतन
तावेष्टं तथा रैवतकं गिरिं अ
खवन्ते गिरिंचैव मार्गश्च त्वरिता
हयैः इतिहरिवंशे बाणयुद्धे ।
लतावेष्टितकं क्ली आलिङ्गनभेदः
यथा। उद्धृष्टकपीडितकंलता
वेष्टितकं तथा इतिशब्दमाला

लताशंखः पुं शालवृत्तः इति
शब्दरत्नावली ॥
लतिका स्त्री लता इतिलता
शब्दात्स्वार्थे कप्रत्ययेन स्तिक
प्रत्ययेन वा निष्पन्नं ॥
लतिका स्त्री गोधा इतिसिद्धान्त
कौमुद्याम्उनादिवृत्तिः ॥
लप्य अर भाषे इतिकविकल्पद्रु
मः अर अलीलपत् अललापत्
भाषः कथनं इतिदुर्गादासः ।
लपनं क्ली मुखं इत्यमरः ।
भाषणे इतिलपधात्वर्थदर्शना
ल्लपितं क्ली वचनं कथिते त्रि
इत्यमरः ॥
लप्सिका स्त्री खाद्यविशेषः ल
प्सी इतिख्याता यथा समितां
सर्पिषा भ्रष्टां शार्करां पयसिवि
पेत् तस्मिन्द्रवीकृते न्यसेत् ।
लवंग मरिचादिकं सिद्धेषाल
प्सिकाख्याता गुणानस्या वदाम
हे लप्सिका बृंहणी वृष्याब
लापित्तानिलापहा स्निग्धा श्ले
ष्म करी गुर्वी रोचनी तर्पणी
परं इतिभावप्रकाशः लव ।
१ उ. स्रंसने पाठे । इति
कविकल्पद्रुमः इलप्यते उ.ल
प्यते स्रंसन मित्रावलम्बनमिति

गोविन्दभट्टः ननाद चरणाक्षुब्ध
पल्लवपिधान मालम्बसे इतिदुर्गा
दासः ।
लभ्यः त्रि प्राप्तः इत्यमरः ।
लब्धवर्णः पुं पण्डितः इत्यमरः
लब्धा स्त्री नायिकाभेदः यथा
खण्डितोत्कण्ठिता लब्धा तथा
प्रोषितभर्तृका कलहान्तरिता
वासकसज्जा स्वाधीनभर्तृका इतिज
टाधरः ॥
लभ १ उ. शब्दे इति कविक
ल्पद्रुमः इ लम्भते उ. लभते ।
इतिदुर्गादासः ॥
लभ दु ओ ङ. ष प्राप्तौ इति
कविकल्पद्रुमः दु लब्धिम ओ
लब्धा ङ. लभते ष लभा लभ
न्ति अनद्यतन मिति गणकृता
नित्यत्वादिति रमानाथः वस्तुत
स्तु लभते लभः पचादित्वादच्ततो
लभ इवाचरतीति क्लो साध्यं
इतिदुर्गादासः
लभसः पुं वाजिबन्धनरज्जुः इ
त्युणादिकोषः धनं याचकः
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः
लभ्यं त्रि न्याय्यं इत्यमरः ।
लभ्यं इतिमेदिनी ।
लमकः पुं षिङ्गः इति सिद्धान्त

कोऽप्याद्युणादिवृत्तिः ।

लंपटः पुं षिङ्गः इति लेपा। कृशाद्यार्थे मेदिनी आसक्तः । यथा यथैरिकाश्रमिककामल स्पटःसूतेषु दारेषु धनेषु विंतयन् शोकेन विहाङ्ककलेवरान्यथा घ स्तस्य यत्नःश्रम एव केवलं इति श्रीभागवते ५ स्कंधे १९ अध्यायः ॥

लम्पाकः पुं लंपटः देशभेदः इतिमेदिनी ॥

लंपाटहः पुं परहवाद्यं इति हारावली ॥

लम्फः पुं ह्वनगतिः लाफइति भाषा इतिलोकप्रसिद्धः उल्लम्फनं अवलम्फनंचात्र ॥

लम्बः पुं नर्त्तकः अंगं कान्तः इतिसंक्षिप्तसारोणादिवृत्तिः ॥ उत्कोचः यथा प्राभृतं ढौकनं लंबोत्कोचः कौशलिकामिषे उपाह्वारःप्रदानेरा हारोऽप्यासायने अपि इति हेमचंद्रः ॥ अस्तभेदः यथा चर लम्बगमाभेदाः पाटकोऽन्तादिचालने इतिशब्दमाला दोलादौ लम्ब। मानेदत्वा सूत्रे वा यथा त्रिभुजे भुजयो योग स्तदनन्तरगतो भुवाहतो लब्ध्या हिश्या भूतून युता दलितावाधे उभाः स्यातास्त्वावाधा भूजकृत्यो रन्तर मूलं प्रजायते लम्बः लम्बगुणां भूम्यंसमं त्रिभुजे फलं भवति उदग्गुणो लेखे महो मनुमिता त्रिभुजे भुजौ तु यत्र नयोदशातिथि प्रमितो हि यस्य तत्रावलम्बकमथो कथयावधाध्ये लिप्रं तथा च समकोष्ठ मितिं फलाख्या। न्यासः भूः १४ भुजौ १३ । १५ लब्धे आबाधे ५। ९ लब्धोलम्बश्च १२ क्षेत्रफलंच ८४ इतिलीलावती दीर्घे लम्बा इतिभाषा यथा हरतः शोभते सूर्य्योलम्बशाट पटावृतः तावच्च शोभते मूर्खो यावत्किंचिन्न भाषते इतिचाणक्यः ॥

लम्बकर्णः पुं अंकोठवृक्षः छागः इति मेदिनी राक्षसः हस्ती इतिशब्दरत्नावली श्येनपक्षीइति राजनिर्घण्टः ॥ दीर्घश्रोत्रे। तद्युक्ते त्रि ॥

लम्बकेशः पुं विष्टरः स अविवाहकाले वरोपवेशनार्थसाधिष्ठितपवामावर्त्तवलितापोमुखाग्रसंख्यातदर्भाः यथा उर्द्ध केशा भवेत् ब्रह्मा लम्बकेशस्तु विष्टरः दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः इतिसंस्कारतत्त्वे केशोऽग्राधं इतिप्रायश्चित्ततत्त्वे गंगा। माहात्म्ये प्रतिविहितद्रवद्रुत्तान प्रकरणे लिखितं ॥ दीर्घकेशयुक्ते त्रि ॥

लम्बदन्ता स्त्री सैंहलीपिप्पली इतिराजनिर्घण्टः वृहद्दशनविशिष्टे त्रि

लम्बनं क्ली नाभिलम्बितकंठिकादिः तत्पर्य्यायः ललन्तिका २ इत्यमरः लम्बते लम्बनं मेघादित्वादनः इतितट्टीकायां भरतः। लम्बशब्दार्थोऽप्यत्र ।

लम्बनः पुं कफः इतिशब्दचंद्रिका ।

लम्बमानं त्रि लंवायमानवस्तु लवधातोःकर्त्तरि शान प्रत्ययेन निष्पन्नं ।

लम्बबीजा स्त्री सैंहलीपिप्पली। इतिराजनिर्घण्टः

लम्बा स्त्री लक्ष्मीः गौरी तिक्ततुम्बी इति मेदिनी ॥ दक्षकन्याविशेषः यथा अरुन्धती वसुं यामी लम्बा भानु मरुत्वती । संकल्पाच मुहूर्त्ताच साध्याविश्वाच भारत मनवे दत्तवाय दत्तपताःदशो प्रभुः इति हरिवंशे० अधिपतिस्थापनं हिमालयकन्याविशेषः यथा तत स्तद्वचः श्रुत्वा देवी लम्बा मथाब्रवीत् गच्छस्वत्वं शीघ्रं त्वं वाणसंरक्षणं कुरु ततोयोगं समास्थायभ्रष्ट प्रपाहिमवत्सुता कुलस्यैकस्य तद्रूपं दर्शयन्त्यात्मसमागता । सान्तर्द्धान मुपागम्य सत्का सावासमी पुनः परित्राणाय वाणस्य विजयाधिष्ठिता ततः प्रमुखे वासुदेवस्यदिग्वासाःकोटवीस्थिता इति महाभारते हरिवंशे वाणयुद्धे।

लम्बिका स्त्री तालूर्द्धस्थलम्जिका तत्पर्य्यायः घंटिका २ इतिराजनिर्घण्टः सुधास्रवा ३ गलशुंडिका ४ इति हेमचंद्रः अलिजिका ५ अलिजिह्विका ६ इतिशब्दरत्नावली

लम्बितः त्रि स्रंसितः शब्दितः इतिलव धातोःकर्म्मणिक्तप्रत्ययेननिष्पन्नं लम्बमानमात्सादिश्च

लम्बोदरः पुं गणेशः इत्यमरः औदरिके त्रि इतिहेमचंद्रः ।

लंबोष्ठः पुं उष्ट्रः इति राज। निर्घण्टः लम्बमानोष्ठयुक्ते त्रि

लम्बोष्ठः पुं उष्ट्रः इति त्रिकांड

शेषः दीर्घोष्ठविशिष्टेति ॥
लम्भनं क्ली प्रतिलम्भः इतिहे
मचंद्रः ध्वनिः लभि उ॰ प्राद्गेश्म
स्मात्भावे॰नट् प्रत्ययेन निष्पन्न
मिति ॥
लंभा स्त्री वाद्यंस्वरला इतिहा
रावली लय उ॰ गत्यां इतिकविक
ल्पद्रुमः उ॰ लयते इतिदुर्गादा
सः लयः पुं विनाशः संश्लेषः।
तौर्य्यत्रिकस्यसाम्यं इति मे
दिनी प्रलयः इतिशब्दरत्नाव
ली गीतवाद्यपादन्यासानांक्रिया
कालयोःपरस्परंसमतालयः ली
यन्ते श्लिष्यन्तेऽनेन तिलयति
अनेनेति साम्यंगीतादयोऽत्रेतिवा
लयः । लीङ्॰ य आश्लि
पिलयगत्या वा अल् इत्यमरटी।
कायां भरतः ॥ लयस्थान।
विवर्ज्जनं गायकस्य चतदेशादो
षान्तर्गतदोषविशेषो यथा ल
ज्जितं भीतमुत्रेष्ठ प्रव्यक्तमनु
नासिके काकस्वरः शिरःकंपोत
स्स्थानविवर्जिते विस्वरं विरस
चैव विश्लिष्टं विषमाहते आकुले
तालहीनंच गातुदोषा अतदेशा
प्रयलयाः हादिस्थितिः कंठस्थि
तिः कपालस्थिति रितिलयत्रयं

अपरे त द्विपदीसाङ्गलतिका॰
कलिका छिन्नखंडिका वासभु
वकत छिन्ना खंडयावा फडक्का
कः जंभहिका कलतिकः खुडक
क्षुरिकस्तथा कथितस्त्वनरेखा
हे सुतरस्तोप नतेकः प्रस्तुतः
इम्नात्वनावकुप्त मन्दचद्रीलपि
कादम्बमर्वरी चहा मिश्राईवति
तालनः प्रतिविद्वः समयश्च वनि
लोर्हल्लेखया आविद्धस्तटकवक
स्तन छिद्र विविद्देको आन्वी वि
कृतयावावमूजलोय विलोलकः
रमाणीय स्तनश्चैव करकंटकसंज्ञ
कः चत्वारिंशादिमे प्रोक्ता लयाल
यविशारदैः लयेन वपुषा भगवा
न्लये लीनो जनार्दनः इतिसंगी
तदामोदरः ॥
लयपुत्री स्त्री नर्त्तकी इतिशब्द
रत्नावली ॥
लयारंभः पुं नटः इतित्रिकांड
शेषः ॥
लयालम्बः पुं नटः इतिशब्दर॰
त्नावली ॥
लर्व गतौ लर्वति इति सिद्धान्त
कौमुदी ॥
लल उ॰ क ईप्सायां इतिक
विकल्पद्रुमः कउ॰ लालयते ईप्सा

ग्राममिच्छा इतिदुर्गादासः।
लल त क ईप्से इतिकविक।
ल्पद्रुमः ईप्सा इति आपधातोः
सन्नन्तस्य रूपं शेषात् इत्व।
कारेण सदूपोऽपि अलक्षणे।
न वाध्यते इति चेन्न स्त्रीवि।
हितप्रत्ययैःकचित्सद्रूपोपिनवा
ध्यते इत्यस्य वाच्यत्वात् अस्य।
धाकारणाकारण मित्यादयो
पि नस्तः एवंवस्तमाणेषु ञीड।
लज्जे इत्यादिष्वपि बोध्यं ललय
ति धनेलोकः इतिदुर्गादासः
ललज्जिक पुं उष्ट्रः जकुरः
हिंस्रेति इति मेदिनी ॥
ललन त्रि विलासयुक्तः उत्स
ग्यनविशिष्टः जिह्वाक्रियावि
शिष्टः लेपविशिष्टः दीप्सावि
शिष्टः उपमेवाविशिष्टः भा॰
षणविशिष्टः अल्पविशिष्टः
इतिलड्धातोःकर्त्तरिशानप्रत्य
येनडस्यलकारादेशेन च निष्प
न्नं ललदस्युः पुं लिम्पाकः इ
तिजटाधरः
ललनं क्ली केलिः इतिहेमचं
द्रः चालनं इतिनागोजीभट्टः
यथा कालीकरालवदना वि
निष्क्रान्तासिपाशिनी विचित्रख
ट्वाङ्ग

धरा नरमालाविभूषणा द्वीपिच
र्मपरीधाना शुष्कमांसातिभैरवा
अतिविस्तारवदना जिह्वाललन
भीषणा इतिदेवीमाहात्म्ये ॥
ललनः पुं वालः सालः प्रि
यालः इतिराजनिर्घण्टः
ललना स्त्री कामिनी नारीभेदः
जिह्वा इतिमेदिनी
ललनाप्रियं क्ली ह्रीवेरं इति
राजनिर्घण्टः ॥
ललनाप्रियः पुं कदम्बः इति
राजनिर्घण्टः कामिनीवल्लभश्च
ललन्तिका स्त्री नाभिलम्बकंठ
कादिः तत्पर्य्यायः लम्बनं २ इ
त्यमरः गोधा इतिशब्दमाला
ललाकः पुं मेहनं इतिशब्द
चंद्रिका ॥
ललाटं क्ली अवयवविशेषः
कपालं इतिख्याते तत्पर्य्यायः
अलिकं २ गोधिः ३ इत्यमरः
महाशंखः ५ भालः ६ कपा
लकः ७ अलीकं ८ इतिशब्दर
त्नावली ललाटकं ९ इतिधनंज
यः तस्यशुभाशुभ लक्षणं यथा
उन्नते विपुलैः शंखे ललाटे वि
षमे तथा निर्द्धना धनवन्तश्च
अर्द्धेन्दुसदृशे नराः आचार्याः

शुक्तिविशाले शिरावैः पापका
रिणः उन्नताभिः शिराभिस्त
स्वस्तिकाभिर्धनेश्वराः निम्नैर्लला
टै र्वधार्हाः क्रूरकर्मरता स्तथा
संवृतैश्च ललाटैश्च कृपणाउन्न
तैर्नृपाः ललाटोपस्तृता स्ति
स्रो रेखास्तः शतवर्षिणां नृपत्वं
स्याच्चतस्त्रभिरायुः पंचनवतमथ
अरेखेणायुर्नवति विच्छिन्नाभि
श्च पुंश्चलाः केशान्तोपगताभिश्च
अशीत्यायुर्नरो भवेत् ।
पंचभिः सप्तभिः षड्भिः पंचाश
द्रूभि स्तथा चत्वारिंशाच्च वक्रा
भिस्त्रिंशद्भुलमगामिभिः विंश।
तिर्वामवक्राभि रायुः क्षुद्राभिर।
ल्पकं न श्रृणु बालेन्दुनिभभ्रुवोचा
प्यललाटकं शुभमर्द्धेन्दु संस्थान
मतंगं स्यात्लोमशं इतिगारुडे
६५ अध्यायः

ललाटकं क्ली प्रशस्तललाटे
इतिशब्दरत्नावली ललाटमात्रे।
इतिधनंजयः

ललाटन्तपः पुं सूर्यः इतिसि
द्धान्तकौमुदी ॥

ललाटिका स्त्री स्वर्णादिरचित·
ललाटाभरणे टिका इतिख्याता
तत्पर्यायः पत्रपाश्या २ इत्य।
मरः ललाटस्यचंदने । तत्प
र्यायः शंखचर्ची २ इतिशब्द
रत्नावली ॥

ललाम[न] क्ली ललामं यथा
प्रधानध्वजश्रृंगेषु पुंड्रवालधिस्व
श्वभूषावाजिप्रभावेषु ललामं
स्याल्ललामच इतिरुद्रः ॥

ललामं क्ली चिह्नं ध्वजः श्रृंगं
प्रधानं भूषा रम्यं बालधिः
पुंड्रं तुरंगः प्रभावः इति
मेदिनी ॥ अश्वललाटे प्रम
र्वर्णाचिह्नं गवादीनां ललाटचि
ह्ने अश्वस्यभूषा इत्यमरटीका
यां भरतः ॥

ललामकं क्ली पुरोन्यस्तमाल्यं
इत्यमरः तदेवमाल्यं पुरः
संमुखभागे न्यस्तं ललाट पर्यन्त
मागतं ललामकं ललामं तिल
कमिव इति द्रव्यार्थकः इति
भरतः

ललामी स्त्री कर्णभूषणविशे
षः तत्पर्यायः उत्तिम्भिका २
इतिशब्दमाला ॥

ललितं क्ली श्रृंगारभावजक्रि
याविशेषः इत्यमरः सुकुमार
विधानेन भुनेत्रादि क्रियास
विवकर चरणांगविन्यासाल्ललितं

4117

तथाच सुकुमारांग विन्यासे म
सृणं ललितं भवेत् यथा सभ्रु
भंगं करकिशलयावर्त्तं नैवागत
न्ती मालिम्पन्ती ललित ललिता
लोचनस्यांजनेन विन्यस्यन्तीचरण
कमले लीलया स्वैरपाते निशं।
कांचग्रथमवयसा नर्त्तिता पंकजा
ही भुनेत्रादि क्रियाशालि सुकुमा
रविधानतः हस्त पादांगविन्यास
स्तरुन्याललितं विदु रित्यन्येपि।
अनाचार्योपदिष्टस्याल्ललितंरति।
चेष्टितं इत्यन्ये । ललत्के
प्सेभावेक्तः लडविलासे इत्यस्य
मनीषादित्वात्डस्य लत्वं वा
इति भरतः अपिच विन्यास।
भंगि रंगानां भ्रुविलासमनोहरा
सुकुमारा भवेद्यत्र ललितंतद्
दीरितं इत्युज्वलनीलमणिः ।
ललितः पु रागविशेषः तस्य
स्वरूपं यथा प्रफुल्लसप्तच्छदमा।
ल्यधारी युवातिगौरः ललोच
नश्रीः विनिःसरन् बासगृहात्प्र।
भाते विलासिवेशो ललितःप्र
दिष्टः तस्यगानसमयो यथा
प्रातर्गेयास्तु देशाखो ललितः
पाठमंजरी विभाषा भैरवीचैव
कामोदा गौडकीर्य्यपि ॥ इति

संगीतदामोदरः । ७
ललितः त्रि सुंदरः ईप्सितः
इति मेदिनी चलितः इति
विश्व शब्दरत्नावल्यौ ॥

ललितकान्ता स्त्री मंगलचण्डि·
का तस्याध्यानं यथा ये सल
लितकांताख्या देवी मंगलचण्डि
कावरदा भयहस्ता च द्विभुजा
गौरदेहिका रक्तकौषेयवस्त्राच
स्मितवक्त्रा शुभानना नवयौव
नसंपन्ना चार्वंगी ललितप्रभा इति
तिथ्यादितत्त्वं ॥

ललिता स्त्री कस्तूरी नारी इ
तिराजनिर्घण्टः नदीविशेषः य
थानिमिनाम्नस्तु राजर्षेः शापा
द्रुत्सवनः पुरा वशिष्ठो ह्यशरी
रो भूत्वापाद्य निमिन स्तथा
ततो ब्रह्मोपदेशेन निर्जने का
मरूपके संध्याचले तपस्तेपे त
स्य विश्वरभूत्तदा प्रमत्त स्तस्य
देवस्य वरदानान्महामुनिः अ
स्ताम्यवतार्यास्मुजंदृक्त्वा गिरे
स्तटे तत्र स्नात्वा च पीत्वाचश
रीरं माप पूरितं तस्मादस्तत
उत्ताल संध्या नाम नदी वरा निः
सृता तत्र चास्नात विराग्य रग
होतवेत तस्मात्सर्वत उत्ताल

ललिताख्या सरिद्वरा सागरा
हस्तिनान्तरे महादेवावतारि·
ता वैशाखशुक्लपक्षस्य तृतीया
यांनरस्तत्र यः कुर्याद्धि ललितास्ना
नं स शंभुसदनं व्रजेत् ललि·
तायाः पूर्वतीरे भगवान्वामपर्व
तः स्वयं विष्णु र्लिंगरूपी तत्रास्ति
भगवान्हरिः ललितायां नरः
स्नात्वा द्वादश्यां शुक्लपक्षके भ
गवंतं समारुह्य यो यजेत्परम
सरं स याति विष्णु भवनं शरी
रेण विराजता इति कालि·
कापुराणे ८९ अध्यायः गो
पीविशेषः यथा श्राविलरसा
मृत मूर्तिः प्रमर रुचि रुद्धता
रकापालिः कलित श्यामाल
लितो राधाप्रेयान्विधुर्जयति ।
इति भक्तिरसामृतसिन्धुः ललि
ताश्यामला शैब्या पद्माभद्राश्च
प्रयन्ते इतितट्टीकायां जीव
गोस्वामी तस्याः स्वरूपं यथा ।
या दुर्गा सैव ललिता ललिता
सैव राधिका यतास्या मन्तरं·
नास्ति सत्यं सत्यं हि नारद ।
इति पाद्मे पातालखंडे रामली
लायां नारदं प्रति श्रीकृष्ण
वाक्यं ॥

ललितासप्तमी स्त्री भाद्रशुक्लस
प्तमी तत्र कुक्कुटीव्रतं कार्यं यथा
भविष्ये भाद्रे मासि सिते पक्षे
सप्तम्यां नियमेन या स्नात्वा शिवं
लेखयित्वा मंडले च महाम्बिके
पूजयेच्च तदा तस्या दुष्प्रापं नैव
विद्यते इदं कुक्कुटी व्रतत्वेन ख्या
तं इतिमिथ्यादितत्वे ॥ त
द्विधिर्यथा तत्रादौ स्वस्तिवाचन पूर्व
कं संकल्पं कुर्यात् ॐ अद्येत्यादि भा
द्रेमासि शुक्ले पक्षे सप्तम्यान्तिथौ
यावज्जीवनपर्यन्तं अमुक गोत्रा
श्रीमद्भक्ती शिवदुर्गाप्रीतिकामा
प्रतिवर्षीय भाद्रशुक्ल सप्तम्यां
गणेशादिदेवता पूजा पूर्वकं शि
वपार्वती पूजा यावज्जीवन डोर
धारण भविष्यपुराणोक्त व्रतक
थाश्रवणरूप ललितासप्तमी व्रतम
हं करिष्ये ततः संकल्पसूक्तं पठित्वा
सामान्यार्घ्यं विधाय गणेशादीन्सं
पूज्य भूतशुद्ध्यादिकं विधाय
मंडलादिषु पूजा मारभेत ततो
ध्यात्वा स्वशिरसि पुष्पं दत्वा मा
नसोपचारैः संपूज्य अर्घ्यं संस्था
प्य पुनर्ध्यात्वा आवाहयेत ।
शिवपूजाविधिना शिवं दुर्गापू
जाविधिना दुर्गां च यथा शक्त्युपचारैः

संपूज्य आवरणदेवान्पूजयेत् ।
ततः सप्तग्रन्थियुक्तडोरकं दुग्धे
न सिक्तं शिवदुर्गाभ्यां समर्पयित्वा
तत् डोरकं वामकरे बद्ध्वा भोज्य
मुत्सृज्य कथां शृणुयात् अष्टफ
लानि दद्यात् ततो दक्षिणां द
द्यात् अथ कथा श्रीकृष्ण उवाच ।
लोमशो नाम देवर्षिर्मथुरा मागतः
पुरा सोऽर्चितो वसुदेवेन देव
क्या च सुपूजितः उपविष्टः कथाः
श्राव्याः कथयामास वै तदा ततः
कथयितं भूयः कथा मेता:प्रव
क्षेमे कंसेन निहताः पुत्रा जाता
जाताः पुनः पुनः मृतवत्सा देव
कि त्वं पुत्र दुःखेन दुःखिता यथा
चंद्रमुखी दीना बभूव नहुषप्रि
या तथा त्वं देवकी भद्रे पुत्र दुःखे
न दुःखिता पश्चाच्चीर्णव्रता सा त
द्व्रतात् पुत्रिका त्वमेव देवकी
देवि भविष्यसि न संशयः देव
क्युवाच कासा चंद्रमुखी दीना बभू
व नहुषप्रिया कथं चीर्णं व्रतं सम्य
क् तस्याः सन्ततिकारणं सपत्नी
दर्पदलनं सौभाग्यारोग्यवर्द्धनं ।
लोमश उवाच अयोध्यायां पुरा·
राजा नहुषो नाम विश्रुतः तस्य
राज्ञो महादेवी नाम्ना चंद्रमुखी

प्रिया पुरोहितस्य तस्यैव पत्नी
माला च नामिका तयो र्दासी
दृढप्रीतिः स्पृहणीया परस्परं अ
न्यतेपि च मिलिते स्नानार्थं स
रयूजले मासे माघमासे तत्रैव
बहु शोनगरांगनाः स्नाता स्ताम
ण्डलं च कृत्वा मध्ये व्रतरूपिणं ले
खयित्वा शिवं शान्तं उमया स
ह पाकैर्गंधपुष्पाद्यैस्तैर्भक्त्या पू
जयित्वा यथाविधि प्रणम्य शि
रसा भक्त्या हस्ताभ्यां ववस्ति
यः किमिदं क्रियते साध्व्यः कथ्य
तां यदि रोचते केशवा क्रिय
ते किं वा फलं सम्यक् कथ्यतां
स्त्रियरूचुः पूजितोऽस्माभिरत्र शि
वः पार्वत्या सह शंकरः बद्ध्वा सूत्र मिदं
शुभ्रं शिवस्यात्मा निवेदिताः या
वत्प्राणा मिदं तावद्धारयेम प्राणस
धारणं तासां तु तद्वचः श्रुत्वा
ते कृत्वा मानसं तया कृत्वा व
सम्मतिं तत्र बद्ध्वा रोभ्यां सडोरकं
ततस्ताः स्वगृहं जग्मुः सर्वा श्रिया प
रिवारिताः कालेन महता तत्रवि
स्मृतं तद्व्रतं प्रमत्तया चन्द्रमु
ख्या विसृष्टं तेन स डोरकं मृता केषि
दहो राज्ञः सा बभूव प्लवंगमी मा
ला च कुक्कुटी जाता व्रतसम्भ्रान्ता

पालमात् तथैवतेव मिथिएपो
जाते जातिस्मरे कुले संभूयन्त
चैव मामस्य समयः पुनः तद्दि
ने तद्दिनेप्राप्ते पुनःकालेच तेम्र
ते तदेवमात्के देशे जायते गो
कुलसंकुले यस्तो जाया बभूवा
यपृथ्वीनाथस्य सा पुनः ईश्वरी
नामविख्याता सा तु राज्ञोऽभि
वल्लभा यग्निमीलद्विजस्यासीद्रा
याभूषणनामिका पुरोहितस्य
कालेन कुक्कुटी वरूपुत्रिणी
जातिस्मरा चाष्ट पुत्रा तथैवचा
स्तमजा पुन र्निवन्तरा प्रीतिर्व
भूवाथ तयोर्द्विज तेश्वरी पुत्र
मेकंप्रसूताते च रोगिणं नवव
र्षेत पंचत्वमगमत्तत्पुत्रिक्षिर त
त्ता भूषणाइष्ट माजगमातिडः
खिता सखिभावादतिस्नेहाद
ष्टपुत्र समन्विता प्रयुक्ताभरणा
नित्यं स्वभावेनैवभूषिता तांदृष्ट्वा
पुत्रिणीभव्यां प्रजन्याते सरीकषा
ततोप्यदंष्ट्रेयपित्वा तां सर्वीतीव्र
मत्सरा चिन्तयामास सा राज्ञी त
स्याः पुत्रवधंप्रति हता हताप्ये
पुत्राः पुनर्जीवन्त्यनाभ्याः वरुपुत्रा
जीववत्साप्रयुक्ता भरणा कृष्ये
प्राभ्यसेशपिकं मदे तदिन्ते।

दामिनी यथा भूषणोवाच भाद्रे
मासि सितेपक्षे सप्तम्यां ललिता
लये सात्वाशिवं लेखयित्वा मंड
लेच सहात्मिकं संपूज्य विधिवत्ता
म त्रैलोक्ये यत्न विद्यते । त
देवंद्विजतं पूर्वं त्वया सह मयाकृतं
तन्मयावरितं भक्त्या तेनाहंस्वाभि
रा सखि तया नाचरितं सम्यक्
र्यस्मात् शरीरया तेन तेष
न्नति छिन्ना राज्येऽपि सति दुः
खिता प्रभाव पथःकथितो व्रत
स्यास्य मया सखि प्रद्दे तथ्य
प्रदास्यामि तस्य धर्मस्य सन्नते ।
सखिभावान्मतीच्छत्वं नात्र कार्या
विचारणा संपूज्य शंकरं भक्त्या
करे बद्धा सडोरकं यावज्जीव
मया तावत्शिवस्यात्मा निवेदितः
इत्येवं समयं कृत्वा ततः प्रभृ
ति डोरकं स्वर्णाज्जन्यमयं वापिक
रधारणा धारणां शंकरेवामपाश्र्व
र्द्धे सौवर्णं राजतं तथा ताम्रपा
त्रे प्रतिष्ठाप्य ब्राह्मणायोपपादये त
पायसं पिष्टकंचैव भक्ष्यभो
ज्यं प्रयत्नतः सपोत्राम्भोज यित्वा
त स्वयं भुंजीत तत्पर ॥
मंडले सोमसंख्यां शिवस्यात्म नि
वेदितं इत्येव प्रतिज्ञयाह व्रत

दान फलं ततः बभूव सप्त।
जासाध्वी ईश्वरी भुवनेश्वरी व्रत
स्यास्य प्रभावेन सपुत्रा त्वंचदेव
कि भविष्यसि त्रिलोकेशं पुत्रेव
जनयिष्यसि इत्येवं श्रावयित्वाच
विरराम मुनिस्तदा जगामस्वपुरं
पार्थ मयाप्येवं तवोदितं याः
स्त्रियः साचरिष्यन्ति व्रतमेतच्च।
यिष्ठिर कुक्कुटाख्यं सवंगाख्यदे
वस्याचरितं शुभं तासां संतति
विच्छेदो न कदा विद्धविष्यति । स्त्रि
यश्चैवाचरिष्यन्ति व्रतमेतत्स्वरूपदे
अस्मिंल्लोके सदैव श्रन्कायास
न्ति शिवमंदिरे । याकुक्कु
टीव्रत मिदं सवगी समेतं देवं
विभाव्य हृदयेव गुरुं निधाय।
भक्त्या करोति कलशोघ विधात
दत्तं साध्वी सदा भवति शोभन
जीववत्सा इति भविष्यपुराणोक्त
कुक्कुटीव्रतकथा समाप्ता ॥
मेघरोगस्वरागिणी यथा ल
लिता मालसी गौडी नाटी देव
किरी तथा मेघरागस्य रागिणी।
णा भवंतीमाः समध्यमाः इति
सैगीतदामोदरः
लवं स्त्री जातीफले इतिशा।
हचंद्रिका लवंग लामज्जके.

ईषत् इतिराजनिर्घण्टः ॥
लवः पुं लेशः विनाशः ।
छेदनं रामपुत्रः इति मेदिनी
अत्र विनाशस्थाने विलासः
इतिविश्वःहेमचंद्रश्च कालभेदः
यथा अष्टादशनिमेषास्तु काष्ठा
काष्ठाद्वयंलवः इतिहेमचंद्रः
लावानामाप्ती इतिराजनिर्घण्टः
लवंग स्त्री स्वनामख्यातवनिक
दृष्टभेदः तत्पर्यायः देवकुसुम
श्रीसंज्ञं २ इत्यमरः । श्रीप्रसू
नं ४ इति भावप्रकाशः लवः
कं ५ इतिशब्दरत्नावली ल
वंगकलिका ६ दिव्यं ७ शाख
रं ८ लवं ९ श्रीपुष्पं १० रुचिरं
वारिसंभवं १२ तीक्ष्णपुष्पं १३ भृ
ङ्गारं १४ गीर्वाणकुसुमं १५ चंदन
पुष्पं १६ अस्य गुणाः शीतलत्व
तिक्तत्वं चक्षुष्यत्वं भुक्तरोचनत्वं
वात पित्त कफनाशित्वं ।
तीक्ष्णत्वं मूर्छाहृन्मापरत्वंच इति
राजनिर्घण्टः आध्मानानाहस्यातं
घ्नत्वं दीपनत्वं लघुत्वंच इति
राजवल्लभः अपिच लवंगं कटु
कं तिक्तं लघु नेत्रहितं हिमं
दीपनं पाचनं रुच्यं कफ पित्तास्त्र
नाशकृत् तृष्णांछर्दिं तथाध्मानं

शूलमाशु विनाशयेत् कामं-
श्वासंच हिक्कांच लयंतपपतिश्य-
वं इति भावप्रकाशः ॥
लवंगकं क्ली लवंगं इतिशब्द-
रत्नावली
लवंगकलिका स्त्री लवंगं इ-
ति राजनिर्घण्टः ॥
लवंगलता स्त्री पुष्पविशेषः य-
थाललितलवंगलतापरिशीलन
कोमल मलयसमीरे मधुकरनि-
करकरम्बित कोकिलकूजित कुं-
जकुटीरे विहरति हरि रिह सर-
सवसन्ते नृत्यति युवतिजनेन
समंसखि विरहिजनस्य दुरन्ते
इतिजयदेवः गाथायाःसावीवि-
शेषश्चलवणं क्ली क्षाररसयुक्त-
द्रव्यं तत्पञ्चविधं यथा सौवर्चलं
१ सैन्धवं २ विडं ३ औद्भिदं ४ सा-
मुद्रं ५ तथापि सामुद्रं पञ्चलव-
णामतीवप्रसिद्धंच तत्र सैन्धवो-
ऽस्त्रीशीतशिवं माणिमन्थंच सिं-
धुजे रौमकं वसुकं पाक्यं विडं-
च कृतके द्वयं सौवर्चले ऽक्ष-
रुचके इत्यमरः छेदने ऽप्यथा
लवो ऽभिलावो लवणं इतिचा-
मरः
लवणः पुं सिन्धुभेदः राक्षस-
विशेषः रसविशेषः इतिमे-
दिनी पृथिव्यग्निगुणबाहुल्याल्ल-
वणः इति चक्रपाणिदत्तकृतद्र-
व्यगुणोपरि शिवदासीयटीका ॥
तत्पर्यायः पटुः २ तस्यगुणाः
लवणो रुचिकृत्सोऽग्निदायी प-
चनः स्वादुकरश्च सारकश्च रसि-
तो नितरां जरयंच पित्तं शिति-
मानंच ददाति कुष्ठकारी इति
राजनिर्घण्टः अपिच लवणः क्ले-
दन स्तीक्ष्णः पाचनो दीपनः सरः
स्निग्धो रुचिकरः स्यन्दी दृष्टिघ्न-
कृत्स्नो लघुः अपरश्च लवणः
शोधनो रूक्षः पाचनः कफपित्त-
दः पुंस्त्व वातहरःकायशैथिल्य-
मृदुताकरः सोऽतियुक्तो ऽति
पाकास्र पित्त कोष्ठ तथाप्रकृत्
इतिराजवल्लभः । लवणासुरस्य
विवरणं यथा पूर्वं कृतयुगेरा-
मन्दैतेयः समहामति लोलापुत्रो
ऽभवज्ज्येष्ठो मधुर्नाममहासुरः स-
मधु वीर्य्यसंपन्नो धर्मेचसुसमाहितः
बहुमानाच्च रुद्रेण दत्त स्तस्याद्भुतो
वरः ॥ शूलंशूलात्
द्विनिष्कृष्य महावीर्य्यं महाप्रभं
मं ददौ महात्मा सुप्रीतो वाक्य-
चैतदुवाचह यावत्सुरैश्च वि-

प्रैश्चन विरुध्येमहासुरः भाव
त्तूलं भवेदं स्यादस्त्रमथा नाशमे।
ष्यति यश्च त्वा मभियुंजीतयुद्धा
यविगतज्वरः तं शूलो भस्मसात्
कृत्वा पुन रेष्यति ते करं एवंरु-
द्राद्वरं लब्धा भूयएव महासुरः
प्रणिपत्यमहादेवं वाक्यमेतदुवाच
ह भगवन्मम वंशस्य शूल मेतद
नुत्तमं भवेत्तु सततंदेव सुराणा
मीश्वरो ह्यसि तं ब्रुवाणं मधुं।
देवः सर्वभूतपतिः शि मस्तु ।
वाच महादेवो नैतदेवं भविष्य।
ति माभूत्ते विफला वाणीमत्प्र-
साद कृता शुभा भवतः पुत्र मे-
कैकं शूल मेतद्भविष्यति याव-
त्करस्थः शूलोऽयं भविष्यति सुत-
स्य ते अवध्यः सर्वभूतानां शूल-
हस्तो भविष्यति एवं मधुर्वरं
लब्धा देवात्सुमहदद्भुतं भवनं
सोऽसुरश्रेष्ठः कारयामास सुप्र-
भं तस्यपत्नीमहाभागाप्रियाकुं-
भीनसीतिया विश्वावसो रपत्यंसा
प्यनलाया महाप्रभा ॥ तस्याः
पुत्रो महावीर्यो लवणोनामदारु-
णः बाल्यात्प्रभृति दुष्टात्मा पा-
पान्येव समाचरेत् तं पुत्रं दु-
र्विनीतन्तु दृष्ट्वा क्रोधसमन्वितः
मशोक माप्येदं नचैनं किंचिद
ब्रवीत् सविहाय इमं लोकं
प्रविष्टो वरुणालयं शूलं निवे-
श्यलवणे वरं तस्मै न्यवेदयत्
सप्रभावेण शूलस्य दौरात्म्येनात्म-
नस्तथा सन्तापयति लोकांस्त्री-
न्विशेषेण च तापसान् आहारः
सर्वसत्त्वानि विशेषेण च तापसाः
आचारो रौद्रता नित्यं वासो म-
धुवने तथा हत्वा बहुसहस्रा-
सिंह व्याघ्रमृगांद्विजान् मानुषां-
श्चैव कुरुते नित्य माहार माह्नि-
कं तच्छ्रुत्वा राघवो वाक्यमुवाच
स महामुनीन् ज्ञानयिष्यामितद्द
तो व्यपगच्छतु वो भयं प्रतिज्ञा
यतदातेषांमुनीनामुग्रतेजसां स्वभ्रा
तृन्सहितान्सर्वानुवाच रघुनन्दनः
कोहन्ता लवणं वीरः कस्यांशः
सविधीयतां भरतस्यमहाबाहो
शत्रुघ्नस्यचधीमतः राघवेनैवमु-
क्तस्तु भरतो वाक्य मब्रवीत् अह-
मेनं वधिष्यामि ममांशः सवि-
धीयतां भरतस्यवचः श्रुत्वा धैर्य-
शौर्य्य समन्वितं लक्ष्मणावरजस्त-
स्थौ हित्वा सौवर्णमासनं शत्रुघ्न-
स्त्वब्रवीद्वाक्यं प्रणिपत्य नराधिप
कृतकर्मा महाबाहु र्मध्यमोरघुनन्द-

न आर्य्येण हि पुरा शून्या त्वयोध्या परिपालिता तत्सन्तापं हृदये कृत्वा आर्य्यस्यागमनं प्रति प्रेष्ये मयि स्थिते राजन् भूयः क्लेशमाप्नुयात् । तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत् एवं भवतु काकुत्स्थ क्रियतां मम शासनं सत्वं हत्वा मधुसुतं लवणं पापनिश्चयं राज्यं प्रशाधि धर्म्मेण वाक्यं मे यद्यवेक्षसे यदा तु युद्धमाकांक्षन् यदि कश्चित्समाह्वयेत् तदा शूलं गृहीत्वा तु भस्म रक्षः करोति हि सत्वं पुरुषशार्दूल तमायुधविनाकृतं अप्रविष्टं पुरं पूर्वं द्वारि तिष्ठ धृतायुधः अन्यथा क्रियमाणे तु अवध्यः स भविष्यति ततः प्रभाते विमले तस्मिन्काले स राक्षसः निर्गतस्तु पुराद्वीरो भक्ष्याहारप्रचोदितः एतस्मिन्नन्तरे वीर उत्तीर्य्य यमुनां नदीं तीर्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत ततोऽर्द्धदिवसे प्राप्ते । क्रूरकर्मा स राक्षसः आगच्छद्बहुसाहस्रं प्राणिनां भारमुद्वहन् ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधं तमुवाच ततो रक्षः किमनेन करिष्यसि तस्यैवं भाषमाणस्य

हसतश्च मुहुर्मुहुः शत्रुघ्नो वीर्य्यसम्पन्नो रोषादश्रूण्यवासृजत् उवाच च सुसंक्रुद्धः शत्रुघ्नः स निशाचरं योद्धुमिच्छामि दुर्बुद्धे द्वन्द्वयुद्धं त्वया सह तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् आहूतस्तु पुनस्तेन शत्रुघ्नेन महात्मना लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः आकर्णात्स विकृष्याथ तद्धनुर्धन्विनां वरः समुमोच महावाणं लवणस्य महोरसि उरस्तस्य विदार्य्याशु प्रविवेश रसातलं पुनरेवागमत्तूर्णं इक्ष्वाकुकुलनन्दनं। शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः पपात सहसा भूमौ वज्राहत इवाचलः तच्च शूलं महद्दिव्यं हते लवणराक्षसे पश्यतां सर्वदेवानां रुद्रस्य वशमन्वगात् हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनं वरदास्तु महाबाहो सर्व एव समागताः विजयाकांक्षिणस्तुभ्यममोघं दर्शनं हि नः देवानां भाषितं श्रुत्वा शूरो मूर्द्ध्नि कृताञ्जलिः प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान् इयं मधुपुरी

4125

रम्या मधुरा देवनिर्म्मिता निवेशं प्राप्नुयाच्छीघ्रमेष मेऽस्तु वरः परः तं देवाः प्रीतमनसो वाढमित्येव राघवं भविष्यति पुरी रम्या शूरसेना न संशयः ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयत् सा सेना शीघ्रमागच्छत् श्रुत्वा शत्रुघ्नशासनं निवेशनं च शत्रुघ्नः श्रावणेन समारभत् सा पुरी दिव्यसंकाशा नानापण्योपशोभिता निरीक्ष्य परमप्रीतः परं हर्षमुपागमत् तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीं रामपादौ निरीक्षेऽहं वर्षे द्वादश आगते इति श्रीरामायणे उत्तरकाण्डे एकषष्ट्यादिसप्तत्यन्ताध्यायेभ्यः संकलितं लवणसमुद्रस्योत्पत्तिर्यथा विरजा सम्रजो गुणाधन्या वीर्य्यममोघकं सद्यो बभूव तस्यै वधन्या गर्भवती सती तस्याश्च सप्तवासीना सार्द्धं पुत्रैश्च सप्तभिः एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्जने विजहार पुनः साध्वी रागासक्तमानसा एतस्मिन्नन्तरे तत्र मातुः क्रीडनगामह कनिष्ठस्तस्याश्च भ्रातृभिः पीडितोऽभिया भीतं स्वतनयं दृष्ट्वा तत्माजननी कृपानिधिः क्रोडे चकार वालं सा कृत्वा राधागृहं ययौ प्रवोधवाले सा साध्वी न ददर्शाम्बिके प्रियं विललाप भृशं तत्र शृङ्गारे त्रस्ममानाक्षा शशाप स्वसुतं कोपात् लवणोदो भविष्यति कोऽपि ते जलं के चित्त्वा दास्यन्ति जीविनः शशाप सर्वान्बालांश्च यान्तस्ता महीतलं गच्छध्वं च महीं मूढा जम्बुद्वीपं मनोहरं स्थितिर्न वस्तुष्माकं भविष्यति पृथक्पृथक् द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठन्तु सलिलः सुताः द्वीपस्थाभिर्वधूभिश्च सह क्रीडन्तु निर्जने कनिष्ठो मातृशापाच्च लवणोदो बभूव ह कनिष्ठः कथयामास मातृशाप वालकान् आजग्मुर्दुःखिताः सर्वे मातृस्थानं च बालकाः श्रुत्वा विवरणं सर्वे प्रजग्मुः धरणीतले ब्राह्म मातृश्चरणाभक्तिनम्रात्मकंधराः सप्तद्वीपे समुद्राश्च सप्त तस्यु विभागशः कनिष्ठाद्दुपर्यन्तं द्विगुणं द्विगुणमनेन लवणेक्षुरा सर्पिर्दधि दुग्ध जलार्णवाः एतेषां च जले यथाग्र स्तार्थं च भविष्यति ।

व्यामाः समुद्राः समैवसमद्वीपांच
मुंधरां इतिब्रह्मवैवर्त्तेश्रीकृष्णजन्म
खंडे ९ अध्यायः लवणः त्रि लव
णरसयुक्तः इतिमेदिनी लावण्य
युक्तश्च लवणकिंशुका स्त्री मह
ज्योतिष्मती इतिराजनिर्घंटः ।
लवणाख्यानिः स्त्री सांभरिलवणो
त्पत्तिस्थानं तत्पर्यायः रुमा २
इतिहेमचंद्रः लवणाकरमात्रंच·
लवणत्वणं क्ली त्वणविशेषः त
त्पर्यायः लोणत्वणं २ त्वणाम्लं ३
पटुत्वणकं ४ अम्लकांडं ५ अस्य
गुणाः सतीक्ष्णत्वं अम्लत्वं क
षायत्वं अस्तम्भत्वं अग्निवृद्धिक।
रत्वंच इति राजनिर्घंटः ।
लवणत्रयं क्ली सैंधवं विडं रुच
कंच इतिराजनिर्घंटः ॥
लवणधेनुः स्त्री दानार्थलवणा
दिनिर्मितधेनुः तद्विवरणं यथा
होतोवाच लवणधेनुं वक्ष्यामि
तन्निबोध महीपते अनुलिप्ते म
हीपृष्ठे कृष्णाजिन कुशोत्तरे ॥
धेनुंलवणमयींकृत्वा षोडशाम·
ष्टकसंयुतां वत्सं चतुर्भी राजेंद्र
कल्पयांश्च कारयेत् सौवर्णा
नि शृंगाणि खुरा रौप्यमयास्त
था मुखं गुडमयं तस्यादंताफ
ल

मया स्तथ जिह्वा शर्करयाशुभं
घ्राणं गंधमयंतथा नेत्रे रत्नमयेऊ
र्णोत्कीर्णे पत्रमये तथा ।
श्रीखंड शृंगकोटौ च नवनीत
मयाः स्तनाः सूत्रपुच्छं ताम्रपृष्ठं
दर्भरोमा पयस्विनी । कांस्यो·
पदोहा राजेंद्र घंटाभरण भूषि
ता सवत्सपुष्प धूपैश्च पूजयित्वा
विधानतः आच्छाद्यवस्त्रयुग्मेन
ब्राह्मणाय निवेदयेत् ग्रहणेवा
थसंक्रान्तौ व्यतीपाते तथानये
नत्वत्र ग्रहपीडासु सर्वकालेप्रदा
पयेत् द्विजाय साधुवृत्ताय कु
लीनाय च धीमते वेद वेदांगवि
दुषे श्रोत्रियायाहिताग्नये रुद्र
शाय प्रदातव्या तथ्यामन्त्ररिणं
स्तुय जमध्यमेव मन्त्रेण पुच्छदे
शोपविष्य च छत्रकोपानहौ देया
शक्तिका कांस्यपात्रके आच्छाद्यवस्त्र
युग्मेन दक्षिणा कनकं ददेत् ।
शैवोक्तेन विधानेन सशक्त्या कन
केन तु इमां रुद्राणी भो विप्र
रुद्ररूपे नमोस्तु ते रसत्वासर्वभू
तानां सर्वदेवनमस्कृता कामं·
कामदुघे कामा त्वारधेना नमो
ऽस्तुते दत्त्वा धेनुं लवणेन पक्वा
ह्नैव तिष्ठति स्वयं त्रिरात्र ९

विशेण तथैव लवणाशिना स
हस्रेणशतेनाथ सशक्त्या कन
केनतु रत्नेमांस्वर्गमाप्नोति यत्रदे
वोवृषध्वजः य इदं शृणुयाद्भक्त्या
श्रावयेद्वापि मानवः मुच्यते
सर्वपापेभ्यो रुद्रलोकंच गच्छति
इत्यादि वाराहपुराणे श्वेतो
पाख्याने लवणधेनुमाहात्म्यं ।
लवणमदः पुं लोणरक्तावः इति
राजनिर्घंटः
लवणक्षारः पुं लोणरक्तारः
राजनिर्घंटः
लवणा स्त्री नदीभेदः दीप्ति
इतिमेदिनीशब्दरत्नावल्यो महा।
ज्योतिष्मती इतिराजनिर्घंटः ।
लवणाचलः पुं दानार्थलवणा
दिनिर्मितपर्वतः यथा अथातः
संप्रवक्ष्यामि लवणाचल मुत्तमं
यत्प्रदाता नरो लोकं प्राप्नोति ।
शिवसंयुतं उत्तमः षोडश द्रो
णः कर्त्तव्यो लवणाचलः मध्यमः
स्यात्तदर्द्धेन चतुर्भि रधमः स्मृतः
वित्तहीनो यथा शक्त्याद्रोण
दूर्द्धन्तुकारयेत् चतुर्थांशेनवि
ष्कंभान्पर्वतान्कारयेत्पृथक् ।
विधानं पूर्ववत्कुर्यात्ब्रह्मादी।
नांच सर्वदा तद्वद्धेमतरून्सर्वा ।

न् लोकपालान्निवेशयेत् सरो
सि कामदेवादीन्तद्वत्र निवे
शयेत् कुर्याज्जागरं मत्रापि·
दान मंत्र निबोधत । सौभाग्य र
ससंभूतो यतोऽयं लवणो·
रसः तदात्मकत्वेनच मांपाहिपा
पान्नगोत्तम यस्मादन्नरसाः स
र्वे नोत्कटा लवणं विना प्रिय
श्च शिवयो र्नित्यं तस्मात्शांतिप्र
दो भव विष्णुदेह समुद्भूतं
यस्मादारोग्य वर्द्धनं तस्मात्पर्वत
रूपेण पाहि संसारसागरा त् ।
अनेन विधिना यस्तु दद्या·
ल्लवणपर्वतं उमालोके वसेत्
कल्पं ततो याति परां गतिं ।
इतिमात्स्ये ७१ अध्यायः ॥
लवणखनिः स्त्री सामुद्रलवणं
इतिराजनिर्घंटः ॥
लवणरसं क्ली लोणरक्तारः
इतिराजनिर्घंटः ॥
लवणोत्तमं क्ली सैन्धवं इति
रत्नमाला ॥
लवणोत्थं क्ली लोणक्षारः इति
राजनिर्घंटः
लवणोदः पुं लवणसमुद्रः इत्य
मरः ॥
लवनं क्ली छेदनं इत्यमरः ।

लवली स्त्री फलवृक्षविशेषः लो
ना इतिभाषा तत्पर्य्यायः ग्रीष्म
जा १ धामिला २ इतिशब्दचन्द्रि
का लवली स्त्री फलवृक्षविशेषः
नोयाडि इति भाषा तत्पर्य्यायः
सुगन्धमूला २ शडुः ३ कोमलव
ल्कला ४ इतिराजनिर्घण्टः तस्याः फ
लगुणाः रुच्यत्वं सुगन्धित्वं क
फवातनाशित्वञ्च इति राजवल्ल
भः लवलीफलं मस्त्रोष्णं वातपि
त्तहरं लघु इतिकेचित् ॥

लवाकः पुं छेदनद्रव्यं इत्युणा
दिकोषः छेदने इतिसंक्षिप्तसा
रोणादिवृत्तिः ॥

लवाणकः पुं दात्रादिः इत्युणा
दिकोषः ॥

लविः त्रि छिद्रः इत्युणादि
कोषः ॥

लवित्रं क्ली दात्रं इत्यमरः ।

लश क शिल्पयोगे इति कविक
ल्पद्रुमः क लाशयति उपालो
न्तः शिल्पं पुनरुक्तीत्यर्थः इति
दुर्गादासः ॥

लशुनं क्ली रसुनः तत्पर्य्यायः
महौषधं २ गृञ्जनः ३ अरिष्टः ४
महाकन्दः ५ रसोनकः ६ इत्य
मरः रसोनः ७ म्लेच्छकन्दः ८
भूतघ्नः ९ उग्रगन्धः १० अस्य गुणाः
अम्लरसैकऊनत्वं गुरुत्वं उष्णत्वं
कफ वात नाशित्वं अरुचित्वं
क्रिमि हृद्रोग शोफघ्नत्वं रसा
यनत्वञ्च इति राजनिर्घण्टः
अपिच लशुनस्तु रसोनः स्यादु
ग्रगन्धो महौषधं अरिष्टो म्ले
च्छकन्दश्च यवनेष्टो रसोनकः य
दामृतं वैनतेयो जहार सुरस
त्तमात् तदा ततोऽपतद्बिन्दुः
स रसोनोऽभवद्भुवि पंचभिश्च
रसैर्युक्तो रसेनाम्लेन वर्जितः
तस्माद्रसोन इत्युक्तो द्रव्याणां गु
णवेदिभिः कटुकश्चापि मूलेषु
तिक्तः पत्रेषु संस्थितः नाले क
षाय उद्दिष्टो नालाग्रे लवणः स्मृ
बीजे तु मधुरः प्रोक्तो रसस्तद्गु
णवेदिभिः रसोनो बृंहणो वृष्यः
स्निग्धोष्णः पाचनः सरः
रसे पाके च कटुकस्तीक्ष्णो म
धुरको मतः भग्नसंधानकृत्कण्ठ्यो गु
रुः पित्तास्रवृद्धिदः बलवर्ण
करो मेधाहितो नेत्र्यो रसायनः
हृद्रोग जीर्णज्वर कुक्षिशूल वि
बन्धगुल्मारुचि कास शोफान् दु
र्नामकुष्ठानलसाद जन्तु समीरण
श्वासकफांश्च हन्ति मद्यं मांसं

5129

तथाम्लञ्च हितं लशुनसेवि।
नां व्यायाममातपं रोषमतिनीरं
पयो गुडं रसोन मश्न न्पुरु।
षस्त्यजेदेतन्निरन्तरं इति भा
वप्रकाशः अन्यच्च लशुनः
तारसमधुरः कंठ्यो वृष्यो गुरुः
सरः भग्नसंधानकृद्बल्यो रक्तपित्त
प्रदूषणः इति राजवल्लभः ॥

लशूनः पुं लशुनः इतिशब्दर
त्नावली ॥

लष क शिल्पयोगे इतिकवि
कल्पद्रुमः कलाषयति उपालोन्ते
शिल्पं पुनरुक्तीत्यर्थः इतिदुर्गादा
सः ॥

लष य ञ स्पृहि इतिकविक
ल्पद्रुमः य ञ लष्यति लष्यते
इतिदुर्गादासः ॥

लष ञ स्पृहि इति कविकल्प
द्रुमः ञ लषति लषते इति
दुर्गादासः ।

लषः पुं नर्त्तकः इत्युणादिको
षः लस क शिल्पयोगे इतिक
विकल्पद्रुमः क लासयति उपधा
लोन्त्ये शिल्पं पुनरुक्तीत्यर्थः इ
तिदुर्गादासः ॥

लस श्लिषि क्रीडे इतिकविक
ल्पद्रुमः लसति इतिदुर्गादासः ।

लसा स्त्री हरिद्रा इतिहारावली

लसिका स्त्री लाला यथा लाला
यां पिच्छिला ख्याता लसिकाला
सिका तथा इतिशब्दचन्द्रिका ।

लसीका स्त्री इक्षुरसः त्वङ्मांस
मध्यगरसः इतिकेचित् ॥

लस्ज ई ओ उ. व्रीडे इति
कविकल्पद्रुमः ॥ क्षिपि संयोगा
दिलोपे लक्क ई ओ लग्नः उ. लज्ज
ते इतिदुर्गादासः

लसितः त्रि श्लिष्टः क्रीडितः शिल
उक्तः लसधातोः क्त प्रत्ययेन
निष्पन्नः इति लस्तकशब्दमुत्प
न्नो भरतश्च

लस्तकः पुं धनुषोमध्यभागः ।
इत्यमरः ॥

लस्तकी पुं धनुः इतिशब्दमा
ला

लहरिः स्त्री
लहरी स्त्री
महातरङ्गः तत्पर्य्यायः उल्लोलः २
कल्लोलः ३ इतिहेमचन्द्रः शब्द
रत्नावली च ।

लक्ष क उ. दर्शने अङ्के इति
कविकल्पद्रुमः क उ. लक्षयति
लक्ष्मकं करोतीत्यर्थो वा ।
यत्ते ददं लोकः पश्यति चिह्नयुक्तं
करोतीत्यर्थो वा इतिदुर्गादासः

लक्षं क्ली व्याजः शरव्यं इति

मेदिनी ॥
लक्तं क्ली स्त्री रक्ताक्तसंख्या।
लाक इति भाषा इति मेदिनी ॥
लक्षकं क्ली लक्षयति यत् य
था लक्षकं नाम लक्षयति यादृ
शार्थस्य सम्बन्धवति शक्तन्तु य
द्भवेत् तत्र तल्लक्षकंनाम तद्वृत्ति
विधुरं यदि यादृशार्थसम्बन्धव
ति यन्नाम शंकेतितं तदेव तादृ
शार्थे लक्षकं यदि तदृशार्थे शा
क्यत्वं भवेत् सम्बन्धवादयस्त्वश
ह्यात्वयादि सम्बन्धिनि लक्षणादा
विवक्षर गादावपि शक्ता एव गंगा
दयस्तु तीरादावसंकेतिताः तत
स्तेऽपि तीरादिशक्तत्वेन गृहीता
एव तीराद्यन्वय बोधयंति तत्र
लक्षका एव अपिच तदेवं विवि
धं लक्षणावत्त्वाल्लक्षकं नाम
पि जहत्स्वार्थादिभेदादनेकविध
मित्यर्थः स्यादेतद्यदि तीरादिलक्ष
कतया गंगादिपदस्य ज्ञानेनौ
शाद्यभवे भवेद्धेतुस्तदोक्तक्रमेणा
लक्षकानां विभागो नत्वेतद
स्ति तीराद्यन्वय बोधं प्रति
तीरादिशक्तत्वेनैव पदज्ञानस्य
त्वावधेन हेतुतया लक्षकानाम
ननुभावकत्वात् रुणा मयो शेसं
स्पर्शोदिसादौ शाकेन दहना
दिनेव गंगायां घोष इत्यादौत
त्तितेन तीरादिना सार्द्धमगृहीता
संसर्गकस्यैव समभ्यर्थाधेयत्वान्व
यबोध प्रविष्टत्वादिति चेन्न प्र
कृत्यर्थाविच्छिन्नस्यैव प्रत्ययार्थस्य
धर्मन्तरेऽन्वयवद्दे कुलन्नतया ती
राद्य विशेषितस्य स्वर्थ्याधेयता
दे चौपाताद्यन्वय रोधायोगात्
नव शक्तस्यैव पदस्य स्वस्थाकांत
पदान्तरो पस्थाप्यार्थान्वित स्वार्थ
धर्मिकान्वय बोधं प्रति हेतुत्वात्
न्वयछेदो लक्षार्थस्य प्रवेशः कुन्ताः
प्रविशन्तीत्यादौ लक्ष्यस्य कुन्तध
रादे रन्वय विशेषत्वान्नुपपत्तेः
कुमतिः पश्चुरित्यदौ लक्षार्थयो
र्मिथोऽन्वयबोधस्याप्यनुभविकत्वा
च्च तस्माल्लक्षके विव भक्तेरपि
ज्ञान मनुभावकं भवत्येव कार्या
तावच्छेदकस्य संकोचाच्च नव्यभि
चारः इति शब्दशक्तिप्रकाशिका ॥
लक्षणं क्ली चिह्नं नाम इति मे
दिनी दर्शनं इति लक्षणाव
र्थदर्शनात् लक्ष्यते ज्ञायतेऽने
नेति लक्षणं । तद्द्विविधं ।
इतरभेदानुमापकं व्यवहारप्रयो
जकंच इति न्यायमतं ॥

4131

व्याकरणमते तु कृत्तद्धितस
मासाना मभिधानं नियामकं ल
क्षणान्त्वनभिज्ञानां तदभिज्ञानस्य च
कं इति बोपदेवः ।
लक्षणः पुं सौमित्रिः सारस
पक्षी इति शब्दरत्नावली ॥
लक्षणा स्त्री सारसी इति मेदि।
नीहंसी इति सिद्धान्तकौमुदी।
शृणादिवृत्तिः शक्यसंबन्धः य
था लक्षणा शक्यसंबन्ध स्तात्पर्या
नुपपत्तितः इति भाषापरिच्छेदः ।
गंगायां घोष इत्यादौ गंगाप
दस्य शक्यार्थे प्रवाहरूपे घो
षस्यान्वयानुपपत्तिस्तात्पर्यानुप
पत्ति र्वा यत्र प्रतिसंधीयतेतत्र
लक्षणया तीरस्य बोधः सा च श
क्यसंबन्धरूपा तथाहि प्रवाहरू
पशक्यार्थसंबन्धस्य तीरे वर्त्तीन
त्वात्तीरस्य स्मरणं ततः शाब्दबोधः
इति सिद्धान्तमुक्तावली । अ
पिच अजहत्स्वार्थाजहत्स्वार्था नि
रूढाधुनिकादिकाः लक्षणावि
विधा स्ताभि र्लक्षकं स्यादनेकधा
काचिल्लक्षणा शक्यावृत्तिरूपेण
बोधकतया अजहत्स्वार्थेत्युच्यते ।
य तीरत्वादिना गंगादिपदस्य ।
काचिल्लक्षणा लक्ष्योभयवृत्तिना श
क्यवृत्तिनैव वा रूपेणानुभावक
त्वादजहत्स्वार्था यथा इष्टत्वादि
ना नीलघटत्वादिना च घटादिप
दस्य काचिल्लक्षतावच्छेदकीभूत
तत्तद्रूपेण एवं एवं प्रत्यायकत्वा
न्निरूढा यथा आरण्यादिप्रका
रेणानवच्छिन्न इष्टानुभावकत्वाद
रुणादिपदस्य काचित्तु एवं एवं
तादृग्रूपेणाप्रत्यायकत्वादाधुनिकी
यथाश्वरत्वादिना परादिपदस्य आ
दिना शक्यसदृशत्व प्रकारेण बो
धकतया गौणीत्युपगम्यते यथा
अग्नि र्माणवक इत्यादावग्निसदृ
शत्वादिना अग्न्यादिपदस्य इति श
ब्दशक्तिप्रकाशिका अन्यच्च ।
मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः
प्रतीयते रूढेः प्रयोजनाद्वासौ ल
क्षणाशक्तिरर्पिता ॥ कलिङ्गः
साहसिक इत्यादौ कलिंगादिशब्दो
देशविशेषादिरूपे स्वार्थे ऽसंभ
वन्यया शब्दस्य शब्दस्य संयुक्तान्
रुषादीन्प्रत्याययति यथा च ग
गायां घोष इत्यादौ गंगादिश
ब्दो जलमयाद्यर्थवाचकत्वात्प्रकृते
ऽसंभवन्स्वस्य सामीप्यादि सम्बन्ध
संबंधिनं तटादिं बोधयति सा
शब्दस्यार्पिता स्वाभाविकेतरा ईश्व

शब्दाविनावा शक्ति र्लक्षणा॰ नाम पूर्वत्र हेतु रूढि प्रसिद्धिरेव उत्तरत्र गंगातटे घोष इतिप्रतिपादनादलभ्यस्य शीतत्व पावनत्वातिशयस्य बोधनरूपं प्रयोजनं हेतुं विनापि यस्य कस्यचित्सम्बन्धिनो लक्षणाऽतिप्रसंगः स्यात् तदुक्तं रूढेः प्रयोजनाद्वेति ॥ तद्भेदास्तत्र मुख्यार्थस्येतराक्षेपो॰ वाक्यार्थेऽन्वय सिद्धये स्यादात्मनो प्युपादानादेषोपादानलक्षणा २ श्वेतो धावति प्रयोजने यथा कुन्ताः प्रविश॰न्ति अनयो र्हि श्वेतादिभिः कुन्तादिभिश्च अचेतनतया केवलै र्धावनप्रवेशन क्रिययो कर्तृतयाऽन्वयमलभमाने रेतत्सिद्धये आत्मसम्बन्धिनोऽश्वादयः पुरुषादयश्च॰ आक्षिप्यन्ते एवंच प्रयोजनाभावाद्रूढेः उत्तरत्र कुंतादीनामतिगहनत्वं प्रयोजनं अत्रच मुख्यार्थस्यात्मनोऽप्युपादानं । लक्षणालक्षणायांतु परस्यैवोपलक्षणमित्यनयो र्भेदः इय मेवाजहत्स्वार्थेत्युच्यते । अर्पनं स्वस्यवाक्यार्थे परस्यान्वय सिद्धये उपलक्षणा हेतुत्वादेषा लक्षणालक्षणा

३ इति प्रयोजनयो र्लक्षणा लक्षणा यथा कलिंगः साहसिकः गंगायांघोष इति च अनयो र्हि पुरुषतटयो र्वाक्यार्थेऽन्वयसिद्धये कलिंग गंगा शब्दावात्मान मर्पयतः यथा वा उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परं विदधदीदृश मेव सदा सखे सुखित मास्स्व ततः शरदां शतं अत्रापकारादीनां वाक्यार्थेऽन्वय सिद्धये उपकृतादयः शब्दाः आत्मानमर्पयंति अत्रापकारिणं प्रति उपकारादि प्रतिपादनान्मुख्यार्थबाधः वैपरीत्यलक्षणाः सम्बन्धः फलमपकाराद्यतिशयः इय मेव जहत्स्वार्थेत्युच्यते आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा ताः पूर्वोक्ता चतुर्भेदा लक्षणाः विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत् सारोपास्याद्निगीर्णस्य मता साध्यवसानिका ॥

४ रूढावुपादानलक्षणा सारो॰पा यथा अश्वः श्वेतो धावति अत्र हि श्वेतगुणवान् अश्वोऽनिगीर्णः स्वरूपः स्वसमवेत श्वेतगुणतादात्म्येन प्रतीयते प्रयोजने यथा एते कुंताः प्रविशंति अत्र सर्वनाम्नाऽकुन्तधारि

पुरुषनिर्देशात्सारोपात्वं रूढो लक्षणलक्षणा यथा कलिंगः पुरुषो युध्यति अत्र पुरुषकलिंगयोराधाराधारता संबंधः प्रयोजने यथा आयुर्घृतं अत्रायुष्कारणस्यापि घृतं कार्य्य कारणभाव सम्बन्धसम्बंध्यायुस्तादात्म्येन प्रतीयते अन्यवैलक्षण्येनाव्यभिचारित्वायुष्करणं प्रयोजनं यथा वा राजकीये पुरुषे गच्छति राजासौ गच्छति इत्यत्र स्वस्वामिभावलक्षणः संबंधः यथा वा अग्र॰मात्रेऽवयवे हस्तोयं अत्रावयवावयविभावलक्षणः संबंधः । इंद्रार्थासु स्थूणास्व अमी इन्द्राः अत्र भादर्थ्यरूपः एव मन्यत्रापि निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिकृत्साध्यवसाना अस्याश्चतुर्षु भेदेषु पूर्वोदाहरणान्येव सादृश्येतर संबन्धाः शुद्धास्ताः सकला अपि सादृश्यात्तु मता गौण्य स्तेन षोडश भेदिताः

५ ताः पूर्वोक्ता अष्ट भेदा लक्षणाः सादृश्येतर संबंधाः । कार्यकारण भावादयः अत्रशुद्धाना पूर्वोदाहरणान्येव रूढावपादानलक्षणा सारोपा गौणी यथा ए

तानि तैलानि हेमन्ते सुखानि अत्रैतेन शब्द स्थित भव सेतद्रूपं मुख्यार्थ मुपादायैव सार्षपादिस्थेहेषु वर्त्तते प्रयोजने यथा राजकुमारेषु तत्सदृशेषु च गच्छत्सु एते राजकुमारा गच्छंति रूढावुपादानलक्षणा साध्यवसाना गौणी यथा तैलानि हेमन्ते सुखानि प्रयोजने यथा राजकुमारा गच्छंति रूढौ लक्षणलक्षणा सारोपा गौणी यथा राजा गौडेन्द्रः कण्टकं शोधयति प्रयोजने गौर्वाहीकः रूढौ लक्षणलक्षणा साध्यवसाना गौणी यथा राजा कंटकं शोधयति प्रयोजने यथा गौर्जल्पति अंगस्य गूढागूढत्वाद्द्विधाष्टः फललक्षणाः ८ प्रयोजने या अष्टभेदा लक्षणा दर्शिता स्ताः प्रयोजनरूप व्यंग्यस्य गूढागूढतया प्रत्येकं द्विधा भूत्वा षोडशभेदाः तत्र गूढः वाक्यार्थभावनापरिपक्वबुद्धि विभव मात्र वेद्यः यथा उपकृतं बहुतत्रेत्यादि अगूढोऽतिस्फुटतया सर्वजन वेद्यः यथा उपदिशति कामिनीनां यौवन मदएव ललितानि अत्रोपदिशतीत्यनेनाविष्करोतीति लक्ष्यते आविष्कारातिशयश्चाभिधेयवत्स्फु

दुपतीयते धर्मि धर्मगतत्वेन फ
लस्यैतत् अपि द्विधा ७ एता अ
नन्तरोक्ताः षोडश भेदा लक्षणाः
फलस्य धर्मगतत्वेन धर्मिगतत्वेन
च प्रत्येकं द्विधा भूत्वा द्वात्रिंश-
द्भेदाः क्रमेणोदाहरति स्निग्धश्या
मलकान्ति लिप्तवियतो वेल्लद्ब
लाका घना वाताः शीकरिणः प
योद सुहृदा मानंदकेकाः कलाः
कामं सन्तु दृढं कठोरहृदयो रा
मोऽस्मि सर्वंसहे वैदेही तु
कथं भविष्यति ह हा हा देवि
धीरा भव अत्यन्त दुःखस
हिष्णुरूपे रामे धर्मिणि लक्षितस्य
वातिशयः फले गंगायां घोषः
अत्र तटादिषु लक्ष्येषु शीतत्व
पावनत्वादिरूप धर्मस्यातिशयः
फले तदेवं लक्षणा भे
दाश्चत्वारिंशन्मता बुधैः रूढाव
ष्टौ फले द्वात्रिंशदिति चत्वारिंशत्तु
लक्षणाभेदाः किंच - । पद
वाक्यगतत्वेन प्रत्येकं ता अपि
द्विधा ८ ता अनन्तरोक्ताः अत्र
पदगतत्वेन यथा गंगायां घोषः
वाक्यगतत्वेन यथा उपकृतं बहु त
त्रेति परे अशीति प्रकारा लक्षणा
इति साहित्यदर्पणः ॥

लक्ष्मन् क्ली लक्ष्म दशापुत्रस
ख्या इति मेदिनी
लक्षितः त्रि आलोचितः दृष्टः
अङ्कितः इति लक्षधातोः ।
कर्मणि क्त प्रत्ययेन निष्पन्नं
लक्षणाअयञ्च ॥
लक्षितलक्षणा स्त्री लक्षितेन
लक्षणा यथा द्विरेफ पदेन रू
ढिरिति लक्षणयोपस्थापितद्वेफ
द्वययुक्त भ्रमरपदादथियथैव भ्र
मरोपस्थितिः अत्र रूढि शक्ति श
क्तौ तु रूढिप्रयोजनाभावान्नेया
र्थत्वं इयमेव लक्षितलक्षणेत्युच्य
ते न च लक्षणाद्वयाभावात्कथ
मियं लक्षितलक्षणेति वाच्यं य
त्र लक्षिताद्वार्थाभिधाने तत्रैव
लक्षितलक्षणायाः परिभाषितत्वा
त् इति साहित्यदर्पणटीकाकृ
त्श्रीरामचरणतर्कवागीशः ॥
लक्षिता स्त्री परकीयान्तर्गतना
यिकाभेदः अस्या लक्षणं अन्य
लीभावनिपुणा उदाहरणं यथा
यद्भूतं तद्भूतं यद्भूयात्तदपि वा
भूयात् यद्भवतु तद्भवतु वावि
फलं स्वव गोपनोपायः इति
रसमञ्जरी ॥
लक्ष्म क्ली चिह्नं प्रधाने इत्यमरः

4135

लक्ष्मणं क्ली चिह्नं इति शब्दरत्ना
वली नाम इत्यमरटीकायां भर
तः श्रीविशिष्टे त्रि इति।
मेदिनी ॥
लक्ष्मणः पुं सारसः इति हेमचं
द्रः श्रीरामभ्राता इति मे
दिनी स च त्रेतायुगे अयो
ध्यायां सुमित्रागर्भे दशरथाज्जा
तः इन्द्रजिद्वधार्थं तस्य चतुर्दश
वर्षपर्यंतं आहार निद्रादि रहि
तत्वं यथा एकदा रघुनाथस्वामी
तया लक्ष्मणेन च स्नातः सरसि
तत्रैष्या रम्ये पंचवटी तटे ।
उवाच सीता हेमन्ते जलं सुस्ना
तु निर्मलं तथान्नव्यंजनं रम्यं सर्वं
वस्तु सुशीतलं फलंचयनंचक्रे।
सीतायै प्रददौ पूज्यः ततो ददौ।
लक्ष्मणाय पश्चाद्भुक्ते स्वयं प्रभुः
लक्ष्मणस्तु गृहीत्वा च नैव भुंक्ते
फलं जलं सेवना यथार्थेव सौ
तोद्धारणकारणात् निद्रां न
याति न भुंक्ते वर्षाणां च चत
र्दश य एव पुरुषो योगी तद्वधो
रावणात्मजः इति ब्रह्मवैवर्ते
श्रीकृष्णजन्मखंडे ११५ अध्यायः
लक्ष्मणप्रसूः स्त्री सुमित्रा इति
शब्दरत्नावली

लक्ष्मणा स्त्री श्वेतकंटकारी इति
राजनिर्घंटः सारसी ओषधिभे
दः इति मेदिनी शेषस्तु लक्ष्म
णाकंद इति नाम्ना ख्यातः तस्याः
पर्य्यायः पुत्रकंदा २ पुत्रदा ३
नागिनी ४ नागाह्वा ५ नागपत्री ६
नलिनी ७ मंजिका ८ अश्वविंद
च्छदा ९ पुत्रदा १० अस्या गुणाः
मधुरत्वं शीतत्वं स्त्रीवंध्यत्वनाशि
त्वं रसायनकरत्वं बल्यत्वं ।
त्रिदोषशमनत्वंच इति राज
निर्घंटः अपिच पुत्रकाकारर
क्तास्य विन्दुभिर्लांछिता सदा
लक्ष्मणा पुत्रजननी वस्तगंधाकृ
तिर्भवेत् इति भावप्रकाशः ।
दुर्योधनकन्या सा तु श्रीकृष्णपुत्रे
ण सांबेन विवाहिता इति म
हाभारते ॥
लक्ष्मीः स्त्री विष्णुपत्नी तत्पर्यायः
पद्मालया २ पद्मा ३ कमला ४
श्रीः ५ हरिप्रिया ६ इंदिरा ७
लोकमाता ८ मा ९ क्षीराब्धितन
या १० रमा ११ इत्यमरः जल-
धिजा १२ भार्गवी १३ इति शब्द
रत्नावली हरिवल्लभा १४ दुग्धा
ब्धितनया १५ क्षीरसागरसुता १६
इति कविकल्पलता । अथ लक्ष्मी

मेशाः वान्ते वह्नि समारूढंबा
मनेन्द्रेंदु संयुतं बीज मेतत्प्रियः
प्रोक्तं सर्वकाम फलप्रदं ।
अस्यपूजाप्रयोगः प्रातः कृत्वा॰
दि पीठन्यासान्तं कर्म विधायस्व
समस्य पूर्वादि केशरेषु मध्येच
पीठशक्तीः पीठमन्त्रंच न्यसेत् ओं
विभूत्यैनमः एवं उन्नत्यै कांत्यै॰
स्पृष्ट्यै कीर्त्यै सन्नत्यै पुष्ट्यै उत्कृ
ष्ट्यै ऋद्ध्यै ततः श्रीकमलासना
यनमः इत्यासनं विन्यस्यर्ष्या
दिन्यासं कुर्यात् शिरसि भृगुऋ
षयेनमः मुखे निवृच्छन्दसे नमःहृ
श्रियेदेवतायै नमः ततः करांग
न्यासौ कुर्यात् श्रां अंगुष्ठाभ्यां।
नमः श्रीं तर्जनीभ्यां स्वाहा श्रूं
मध्यमाभ्यां वषट् इत्यादि एवं
श्रांहृदयाय नमः इत्यादिनाच न्य
सेत् तथा च निबन्धे अंगानिदी
र्घयुक्तेन रमाबीजेन कल्पयेत्।
ततो ध्यानं कांत्या कांचनसन्निभां
हिमगिरिप्रख्यै श्चतुर्भि र्ग
जै र्हस्तोत्क्षिप्त हिरण्मयामृतघ
टैरासिच्यमानां श्रियं बिभ्राणांवर
मब्जयुग्म मभयं हस्तैः किरीटोज्ज्व
लां क्षौमाबद्धनितम्बबिम्बललितां
वन्देऽरविन्दस्थितां एवं ध्यात्वा॰

समानैः संपूज्य शंख स्थापनं कु
र्यात् ततःपीठ पूजां विधाय॰
केशरेषु मध्ये च विभूत्यादि पीठ
मन्त्रान्त पूजांविधाय पुनर्ध्यात्वा वा
हनादि पंच पुष्पांजलि दान पर्य्य
न्तेविधाय आवरण पूजा मारभेत्
अग्न्यादि केशरेषु मध्ये दिक्षुचश्रां
हृदयाय नमः इत्यादिना संपूज्य
दिग्दलेषु पूर्वादि ओंवासुदेवाय
नमः एवं संकर्षणाय प्रद्युम्नाय अ
निरुद्धाय- विदिग्दलेषु ओं दमका
य ओं सलिलाय ओं गुग्गुलवे ओं
कुरुण्टकाय ततो देव्या दक्षिणे
ओं शंखनिधयेनमः एवं वसुधारा
यै वामे ओंपद्मनिधये वसुमत्यैय
ग्राग्रेषु पूर्वादि ओं बलाकेनमः
एवं विमलायै कमलायै वनमा
लिकायै विभीषिकायै शांकर्यैव
सुमालिकायै तद्बहि रिन्द्रादीन्वज्रा
दींश्च पूजयेत् ततो धूपादि विस
र्जनांतंकर्म समापयेत् अस्यपुरश्च
रणंद्वादशलक्षजपः तथाचभाउ
लतं जपेन्मंत्रं दीक्षितो विजिते
न्द्रियः तत्सहस्रंच जुहुयात्कम
ले र्मधु रान्वितैः जपान्ते जुहुया
न्मंत्री त्रिंते वीमधुरान्वितैः बिल्वैः
फलै र्वा जुहुयात्त्रिभि र्वा साधको

नमः वाग्भवंवनिता विष्णो
र्माया मकरकेतनः चतुर्बीजात्म
को मंत्र श्चतुर्वर्गफलप्रदः वाग्भ
वं ऐं विष्णुवनिता श्रीं अस्यपूजा
दिकं पूर्ववद्बोध्यं तथा च रमा।
याःकल्पिते पीठे तद्विधानेनपूज
येत् कुर्यात्प्रयोगान्तद्वस्या नेनेन॰
साधकोत्तमः निधिभिः सेव्यते
नित्यं मूर्तिमद्भिस्वयास्थितैः ध्या।
नेत विशेषः माणिक्य प्रतिमप्र
भां हिमनिभै स्तुंगै श्चतुर्भि र्गजै
र्हस्तग्राहित रत्नकुम्भसलिलैरासि
च्यमानां सदा हस्ताब्जै र्वरदानम
म्बुजयुगाभीतीर्दधानां हरेःकान्तां
कांक्षित पारिजात लतिकां वन्दे
सरोजासनां अस्य पुरश्चरणं
द्वादश लक्षजपः तथाच भानु॰
लक्षं हविष्याशी जपेदन्ते सरो
रुहैः जुहुयाद्दशांशः पुष्पैस्तत्सह
स्रंनिशेऽद्विपः मंत्रान्तरं ।
नमःकमलान्न वासिन्यै ठद्वयमि
ति प्रोक्तो दशाक्षरः तथाच
निबन्धे दीर्घा यादि विसर्गान्तो
ब्रह्मा भानु र्वसुन्धरा वान्तेसिन्यै
प्रिया वह्नि र्मनुःप्रोक्तो दशाक्षरः
दीर्घा नकारः यादि र्मःब्रह्मा

कः भानु र्मः वसंधरालः वा
न्तेसिन्यै वासिन्यै वह्निप्रिया स्वाहा
अस्यपूजाप्रयोगः पूर्ववत्पी॰
ठमन्वन्ते विन्यस्य ऋष्यादिन्यासं
कुर्यात् शिरसि दक्ष ऋषये नमः
मुखे विराट्छन्दसे नमः हृदि
श्रियै देवतायै नमः तथा च
शारदायां ऋषि र्दक्षो विराट्छ
न्दो देवता श्रीःप्रकीर्तिता ततः
करांगन्यासौ ओं देव्यैनमोऽङ्गुष्ठा
भ्यांनमः ओं पद्मिन्यै नम स्तर्ज॰
नीभ्यां स्वाहा ओं विष्णुपत्न्यै नमो
मध्यमाभ्यां वषट् ओंवरदायैनमो
ऽनामिकाभ्यां हुं ओंकमलरूपायै
नमः कनिष्ठाभ्यां फट् एवं
एवंहृदयादिषु ओं देव्यै नमोहृ
दयायनम इत्यादि तथाच निबन्धे
देव्यैहृदयं माख्यातं पद्मिन्यै शिर ई
रितं विष्णुपत्न्यै शिखाप्रोक्ता वर
दायै तनुच्छदं अस्त्रं कमलरूपायै
नमोन्ताःप्रणवादिकाः ततो॰
ध्यानं आसीना सरसीरुहे स्मित
मुखी हस्ताम्बुजै र्बिभ्रती दानं प
द्मयुगाभये च वपुषा सौदामिनीस
न्निभा मुक्ताहार विराजमान पृथु
लोत्तुंग स्तनोद्भासिनी पायाद्वःक
मला कराक्ष विभवै रानन्दयन्ती

हरी एवं ध्यात्वा मानसैः सं
पूज्य शंखस्थापनं कृत्वा पूर्वोक्त॰
पीठशक्ति सहित पीठमन्त्रेणा ए
जांविधाय पुन र्ध्यात्वा वाहनादि
पंचपुष्पांजलि दान पर्यंतं विधा।
यावरणपूजा मारभेत अग्न्यादि च
तुष्केदित्तु च ॐ देव्यै नमो हृदया
य नमः ॐ पद्मिन्यै नमः शिरसे॰
स्वाहा ॐ विष्णुपत्न्यै नमः शिखायै॰
वषट् ॐ वरदायै नमः कवचाङ्गे
कमलरूपायै नमोऽस्त्राय फट्।
ततः पूर्वादिदलेषु पूर्ववत्वलाका॰
दि पूजयेत् तद्वहि रिन्द्रादीन्व
ज्रादींश्च पूजयेत् ततो धूपादि
विसर्जनान्तं कर्म समापयेत् अस्य
पुरश्चरणं दशलक्षजपः तथाच।
दशलक्षं जपेन्मंत्रं मंत्र विद्विजि
तेंद्रियः दशांशं जुहुयान्मंत्री म
धुराक्तैः सरोरुहैः अथ लक्ष्मी
स्तोत्रं ईश्वरउवाच त्रैलोक्य
पूजिते देवि कमले विष्णु
वल्लभे यथात्वं सुस्थिरा कृष्णे तथा
भव मयि स्थिरा ईश्वरी कमला
लक्ष्मी श्चला भूति र्हरिप्रिया पद्मा
पद्मालया संपल्लक्ष्मीः श्रीः पद्म
धारिणी द्वादशैतानि नामानि
लक्ष्मी संपूज्य यः पठेत् स्थिरा।
लक्ष्मी र्भवेत्तस्य पुत्र दारादिभिः
सह इति तंत्रसारः विष्णुपुराणो
क्त लक्ष्मीस्तोत्रं तत्रैव १ अंशे ९
अध्याये द्रष्टव्यं । अथ लक्ष्मी
पूजानिरूपणं स्कन्दपुराणे पौष
चैत्रे तथा भाद्रे पूजयेद्यः स्त्रियः
श्रियं सिंहे धनुषि मीने च सि
ते समस्तरंगमे प्रस्तहं पूजयेल्लक्ष्मीं
शुक्लपक्षे गुरो र्दिने ना परा॰
के नरोंशे च ना स्थिते न ज्यहस्पृशि
द्वादश्यांचैव नन्दायां रिक्तायांच
निरंशके त्रयोदश्यां तथाष्टम्यां
कमलां नैव पूजयेत् ॥
न पूजयेत्स्थानो भौमे न बुधे नैव
भार्गवे पूजयेत् गुरो वारे चाश्म
मे रवि सोमयोः गुरुवारे विशे
षेण च यत्नेन यदि लभ्यते तत्र
पूज्या तु कमला धन पुत्र विवृद्धि
नी नकुर्यात् प्रथमे मासि नैवकृ
र्याद्विसर्जनं नचेटा वादयेत्तत्र नैव
किंचित् सदा पचेत् पौषे चर
शम्यां प्राप्ता चैत्रके पंचमीतथा
नभसे पूर्णिमा ज्ञेया गुरुवारे वि
शेषतः आरके धान्य संपूर्णं॰
नानाभरण भूषिते सुगंधि पुष्प
कुंभेन शुक्लपक्षे प्रपूजयेत् पौषे

4139

तु षिष्ठके दद्यात्परमान्नंच चैत्रे
के षिष्ठकं परमान्नंच नभस्य त
विशेषतः गुरुवार समायुक्ता न
भस्य पूर्णिमा शुभा कमलापूज
येत्तत्र पुनर्जन्म न विद्यते पद्मेन
कमलेव कमलां पूजयेद्यदि ।
इहलोकेसुखं प्राप्य परत्र केशा॰
वं व्रजेत् प्रोक्षयी पूजयेल्लक्ष्मीं॰
पश्चिमानन संस्थितां गंधपु॰
ष्पधूपदीपनैवेद्याद्युपचारकैः । गं
धद्वारेति मंत्रेण गंधनावाहयेदस्यै
श्रिये जात इति द्वाभ्यां पुष्प
णावाहयेत्ततः ततो ध्यानं।
हिरण्यवर्णां हरिणीं सुवर्णरज
तस्रजां चंद्रां हिरण्मयीं लक्ष्मीं जा॰
तवेदसमावह गौरवर्णांत द्विभु॰
जां सितपद्मोपरिस्थितां विष्णो र्व
क्षःस्थलस्थांच जगच्छोभा प्रकाशि
नीं ध्यायेदाद्यां सदा देवीं पूजा।
काले विशेषतः ततः पूजादिकं।
कुर्यात् श्री लक्ष्म्यै नम इत्यृचा।
लक्ष्मीः पद्मालया पद्मा कमलाश्री
र्धृतिः क्षमा तुष्टिः पुष्टि स्तथा
कान्ति र्मेधा विद्या रसाकृतिः हरि
प्रिया तथा विष्णो प्रिया नारायणा
स्य च एताभिः सप्तदशभि र्लक्ष्मीं
जादिनार्चयेत् लक्ष्मी नारायणाभ्यां
च नमान्तेन प्रपूजयेत् पिष्टांच
ॐ
वेदंच पूजयेत्तदनन्तरं लक्ष्मी
चरित्रे न कृष्णपक्षे रिक्तायाद
शम्यां द्वादश्योश्च च श्रवणादि।
वर्ज्जरुत्ते लक्ष्मीपूजां न कारयेत्
इतिकालचंद्रिका । दीपा।
न्विताामावस्यायां लक्ष्मीपूजा
विधि र्यथा तुलाराशि गते भा
नौ अमावस्या नराधिपः स्नात्वादे
वान्पितृन्भक्त्या संपूज्याथ प्रणा
म्यच कृत्वा तु पार्वणश्राद्धं दधि
क्षीर घृतादिभिः ततो ऽपराह्ण
समये घोषयेन्नगरे नृपः लक्ष्मीः
संपूज्यतां लोकाउल्काभि श्चाभिवेष्ट्य
तां अमावास्या यदा रात्रौ।
दिवाभागे चतुर्दशी पूजनीया त
दा लक्ष्मी विज्ञेया सुखरात्रिका
अमावास्यां यदा देवाः कार्त्तिके
मासि केशवात् अभयं प्राप्य
सुप्राश्च क्षीरोदार्णवसानुषु ल
क्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्तास्त्व
जोदरे चतुर्युगसहस्रान्ते ब्रह्मा स
पिति पंकजे अतोत्र विधिवत्का
र्या मनुष्यैः सुखसुप्तिका दिवातत्र
नभोक्तव्यं मते वालातुराज्जना।
प्रदोष समये लक्ष्मीं पूजयित्वा
यथा क्रमं दीपवृक्षा स्तथाका
र्या भक्त्यादेवगृहेष्वपि चतुष्पथ

श्मशानेषु नदी पर्वत मानेषु वृ
क्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च
वस्त्रैः पुष्पैः शोभितव्याः कृष्ण वि
क्रय भूमयः दीपमाला परिक्षिप्तश्च
दोषे तदनन्तरं ब्राह्मणान्भोजयि
त्वादौ विभज्य च बुभुक्षितान् अलंक
तेन भोक्तव्यं नववस्त्रोपशोभिना त्रि
यै मृत्यै विदेशेभ्यश्च बांधवे भ्रत
कैः सह अत्र लक्ष्मी पूजायां पु
ष्पदानकाले नमस्ते सर्वदेवा
नां वरदासि हरिप्रिये या गतिस्त्व
त्प्रपन्नानां सा मे भूयात्त्वदर्चनात्
लक्ष्म्यै नम इत्यनेन वारत्रयं पू
जयेत् स्वावरात्र्यां प्रदोषेतु कुबे
रं पूजयंति ये इति रुद्रयरस्वः
ता कुबेर मपि पूज यंति धनदाय
नमस्तुभ्यं निधि पद्माधिपाय च
भवन्तु त्वत्प्रसादान्मे धनधान्यादि
संपदः इति पठित्वा कुबेराय नम
इति त्रिः पूजयेत् ततो देवगृहादि
षु दीपान्दद्यात् तत्र मंत्रः अग्नि
ज्योति रविज्योति श्चन्द्रज्योतिस्त
थैव च उत्तमः सर्वज्योतीनां दी
पोऽयं प्रतिगृह्यतां ततो ब्राह्म
ब्राह्मणान्स्वबंधूंश्च भोजयित्वा स्व
यं भुक्त्वा सर्वं सख्या प्रत्यय भवि
ष्यत्कं कर्म कुर्यात् यथा स्वावरा

त्रुषः काले प्रदीपोज्ज्वलितालये ।
वेषु वैष्णवबंधुश्च वाचा कुशलया
र्चयेत् प्रदीप वंदने कार्ये लक्ष्मीम
ङ्गल हेतवे गोरोचनालं तैरेव स्था
स्तेषु सर्वतः ॥ लक्ष्मी
पूजा मंत्रः विश्वरूपस्य भार्यासि
पद्मे पद्मालये शुभे महालक्ष्मि न
मस्तुभ्यं सुरात्रिं कुरु मे वर्षा
काले महाघोरे यन्मया दुष्कृतं कृ
तं सुखरात्रिप्रभाते च तन्मे
लक्ष्मी र्व्यपोहतु या रात्रिः सर्व
भूतानां या च देवेष्ववस्थिता स
म्वत्सरप्रिया याच सा ममास्तु सुमंग
ला माता त्वं सर्वभूतानां देवानां
सृष्टि संभवा प्राख्याता भूतले
देवि स्वावरात्रिनमोऽस्तु ते ॥
लक्ष्म्यै नम इति त्रिः पूजयेत् इति
तिथ्यादितत्त्वं तस्या उपा
ख्यानं यथा नारद उवाच श्री
कृष्णस्यात्मन श्चैव निर्गुणस्य नि
राकृते सावित्री यमसंवादे श्रुतं
सुनिर्मलं यशः तद्गुणोत्कीर्तनं स
त्यं मंगलानां च मंगलं अधुना
श्रोतुमिच्छामि लक्ष्म्युपाख्यानमेव च
कोनादौ पूजिता साधि किंभूता
केन वा पुरा तद्गुणोत्कीर्तनं स
त्यं वद वेदविदाम्वर श्रीनारायण

उवाच सृष्टेः रादौ पराब्रह्मन्
कृष्णस्य परमात्मनः देवी वामांश
संभूता बभूव रासमंडले अतीव
सुंदरी रामा न्यग्रोधपरिमंडला ।
यथा द्वादशवर्षीया शश्वत्सुस्थि
रयौवना श्वेतचम्पकवर्णाभा सुख
दृश्या मनोहरा शरत्पार्वण ।
कोटीन्दुप्रभाप्रच्छादितानना श
रन्मध्याह्नपद्मानां शोभा मोचन
लोचना साच देवी द्विधा भूता
सहसैवेश्वरेच्छया समा रूपेण च
र्णेन तेजसा वयसा त्विषा यशसा
वाससा सूक्ष्मा भूषणेन गुणेन ।
च स्मितेन वीक्षितेनैव वचसा ग
मनेनच मधुरेण स्वरेणैव नयेन ।
अनुनयेनच तद्वामांशा महालक्ष्मी द
क्षिणांशाच राधिका राधादौवरया
मास द्विभुजंच परात्परं महा ।
लक्ष्मीश्च तत्पश्चात्तुकमे कमनीयकं
कृष्णस्तद्गौरवेणैव द्विधा रूपो बभू
व ह दक्षिणांशश्च द्विभुजो वामां
शश्च चतुर्भुजः चतुर्भुजाय द्विभुजो
महालक्ष्मी ददौ पुरा लसते हृ
ष्यते विश्वं स्निग्ध दृष्ट्या यया निशं
देवीच्छाया च महती महालक्ष्मीश्च
सा स्मृता द्विभुजो राधिकाकान्तोल
क्ष्मीकांतश्चतुर्भुजः शुद्ध सत्वस्वरूपाच

गोपै र्गोपीभि रावृतं चतु र्भु
जश्च वैकुंठं प्रययौ पद्मयासह
सर्वांशेन समौ द्वौ तौ कृष्ण नारा
यणौ परौ महालक्ष्मीश्च योगेन
नानारूपा बभूव सा वैकुंठे च म
हालक्ष्मीः परिपूर्णतमा परा शुद्ध
सत्व स्वरूपा च सर्वसौभाग्य संयु
ता प्रेम्णा साच प्रधानाच सर्वासु र
मणीषु च स्वर्ग लक्ष्मीश्च शक्र स
म्पत्स्वरूपिणी पाताले षु च मर्त्ये
षु राजलक्ष्मीश्च राजसु गृहलक्ष्मी
र्गृहेष्वेव गृहिणी च कलांशया ।
संपत्स्वरूपा गृहिणां सर्वमंगल
मंगला गवां प्रसूता सुरभी द
क्षिणा यज्ञकामिनी क्षीरोदसिन्धु
कन्या साश्रीरूपा पद्मिनीषु च शो
भास्वरूपा चन्द्रे च सूर्यमंडल मंडि
ता विभूषणेषु रत्नेषु फलेषु च
जलेषु च सर्वशस्येषु वस्त्रेषु स्था
नेषु संस्कृतेषु च प्रतिमासु च दे
वानां मंगलेषु घटेषु च माणिक्ये
षु च मुक्तासमासेषु च मनोहरा
मणीन्द्रेषु च हीरेषु क्षीरेषु चंदनेषु
च वृक्षशाखासुरम्यासु नवमेघेषु
वस्तुषु वैकुंठे पूजिता सादौ दे
वी नारायणेन च द्वितीये ब्रह्म

रूपेषु रूपपत्नीषु दिव्यस्त्रीषु गृहेषु च

णाभक्त्या तृतीये शंकरेणाच वि
ष्णुनार्च्चिता साच क्षीरोदे भारतेषु
ने स्वायंभुवेन मनुना मानवेन्द्रैश्च
सर्वतः ऋषीन्द्रैश्च मुनीन्द्रैश्च स
द्भिश्च गृहिभिर्वै गन्धर्वाद्यैश्च ना
गाद्यैः पातालेषु च पूजिता ।
शुक्लाष्टम्यां भाद्रभद्रे कृता पूजा
च ब्रह्मणा भक्त्याच पक्षपर्य्यन्तं त्रिषु
लोकेषु नारद चैत्रे पौषेच भा
द्रे च पुण्ये मंगलवासरे विष्णु
ना निर्मिता पूजा त्रिषु लोकेषु
भक्तितः वर्षान्ते पौषसंक्रान्त्यां
मेध्या मावाह्य प्रांगने मनुस्तां
पूजयामास सा भूता भुवनत्रये
राजेन्द्रेण पूजिता सा मंगलेनैव ।
मंगला केदारेणैव नीलेन नले
न सुबलेन च ध्रुवेणोत्तानपादेन
शक्रेण बलिना तथा कश्यपे
न च दक्षेण कर्दमेन विवस्वता
प्रियव्रतेन चन्द्रेण कुबेरेणैव वायुना
यमेन वह्निना चैव वरुणेनैव पू
जिता, एवं सर्वत्र सर्वैश्च वंदिता
पूजिता सदा सर्वैश्वर्य्याधिदेवी सा
सर्वसंपत्स्वरूपिणी अपिच ॥
नारद उवाच नारायणप्रिया साच
वरा वैकुंठवासिनी वैकुंठाधिष्ठा
तृदेवी महालक्ष्मीः सनातनी कथं

बभूव सा देवी पृथिव्यां सिन्धुक
न्यका किं तद्ध्यानंच स्तवनं सर्वं
पूजा विधि क्रमं पुरा केन स्तुता
दो सा तन्मां व्याख्यातुमर्हसि श्री
नारायण उवाच पुरा दुर्वाससः
शापात् भ्रष्टश्रीश्च पुरंदरः । ब
भूव देव संघश्च मर्त्यलोकश्च नारद
लक्ष्मीः स्वर्गादिकं त्यक्त्वा रुष्टा प
रमदुःखिता गत्वा लीना च वैकुंठे
महालक्ष्म्याश्च नारद तदा शोका
र्त्ताः देवा दुःखिता ब्रह्मणः सभां
ब्रह्माणंच पुरस्कृत्य ययुर्वैकुंठमेव
च वैकुंठे शरणापन्ना देवा नाराय
णे परे अतीवदैन्ययुक्ताश्च शुष्क
कंठाश्च तालुकाः तदा लक्ष्मीश्च
कलया पुरा नारायणाज्ञया बभू
व सिंधुकन्या सा शक्रसंपत्स्वरूपिणी
तथा मथित्वा क्षीरोदं देवा दै
त्यगणैः सह संप्रापुश्च वरं
तस्या ददृशु स्तांच तत्र हि सुरा
दिभ्यो वरं दत्वा वरमालां च वि
ष्णवे ददौ प्रसन्नवदना तथा क्षीरोद
शायिने देवा अप्यसुरग्रस्तराज्यं
प्रापुश्च तत्प्रसादात् तां संपूज्यच संभू
य सर्वत्र च निरापदः ।
इति ब्रह्मवैवर्त्ते प्रकृति खंडे
३२ । ३३ अध्यायौ लक्ष्मी

अगस्य गृह्णाति यथा यं यंरु
षोगुरु देवो माता तातश्चबान्ध
वः अतिथिः पितृलोकाश्च नया
मितस्य मंदिरं मिथ्या वादीचयः
शश्वन्नास्तीति वाचकः सदा सत्व
हीनश्च दुःशीलो न गेहे तस्यया
म्यहं सत्यहीनः स्थाप्यपहारी मि
थ्यासाक्ष्यप्रदायकः विश्वासघ्नः ।
कृतघ्नो यो नयामि तस्य मंदिरं
चिन्ताग्रस्तो भयग्रस्तः शत्रुग्रस्तो
ऽतिपातकी ऋणग्रस्तो ऽतिकृपणो ।
नगेहं यामि पापिनां दीक्षा
हीनश्च शोकार्त्तो मंदधीः स्त्रीजि
तः सदा पुंश्चली पतिपुत्रो यो
तद्गेहं नैव याम्यहं पुंश्चल्यन्नं
चावीरान्नं यो भुंक्ते कामतः सदा ।
शूद्रान्नभोजी शूद्रयाजी तद्गेहं नैव
याम्यहं यो दुर्वाक्कलहो विष्टः
कृतिः शश्वद्यालये स्त्रीप्रधाना
गृहे यस्य नयामि तस्य मंदिरं ।
यत्रनास्ति हरेः पूजा तदीयगुण
कीर्त्तनं नोत्सुकश्च प्रशंसायां न
यामि तस्य मंदिरं कन्यान्नवेद
विक्रेता नरघाती च हिंसकः न
रकागार सदृशो नयामि तस्य म
न्दिरं स्वदत्तां परदत्तां वा ब्रह्म
वृत्तिं सुरस्य च योहरेद्दानही ।

नश्च नयामि तस्य मंदिरं यत्क
र्म दक्षिणाहीनं मूढधीः कुरुते
शठः सपापी पुण्यहीनश्च नयामि
तस्य मंदिरं मातरं पितरं भार्य्यां
गुरुपत्नीं गुरुंच तं । अना
थां भगिनीं कन्या मनन्याश्रयवा
न्धवान् कार्पण्याद्यो न पुष्णाति
संचयं कुरुते सदा तद्गृहान्नरका
कारान्न यामि तान्मुनीश्वराः सू
न्ने शरीर भक्तस्य य स्तल्पशपति
मंदधीः यः शेते स्निग्धपादेन न
यामि तस्य मंदिरं अधौतपा
दशायी यो नग्नः शेते ऽतिनि
द्रितः संध्याशायी दिवाशायी न
यामि तस्य मंदिरं मूर्द्धि तैलं
पुरा दत्वा योऽन्यदंग मुपस्पृशेत्
स्नाति पश्चाङ्गात्रे वा नयामि तस्य
मंदिरं दत्वा तैलं मूर्द्धि गात्रे
विण्मूत्रं यः समुत्सृजेत् प्रणमे
द्दारे तस्य नयामि तस्य मंदिरं
तृणं छिनत्ति नखैर्नखैर्विलि
खेन्मही गात्रे पादे मलं यस्य
नयामि तस्य मंदिरं ॥ स्नाने ।
वसनं यस्य समलं रूक्ष मस्तकं
विकृतो ग्रासहासो च नयामि त
स्य मंदिरं मंत्र विधौ पत्नीवीच
ग्रामयाजी चिकित्सकः सूपकृद्दे

वनश्चैव न यामि तस्य मंदिरं ।
विचारे धर्मकार्येवा योनिहन्तिविवेको
पतः दिवा मैथुनकारी यो न·
यामि तस्यमंदिरं इत्यादि ब्र
ह्मवैवर्त्ते गणेशखंडे लक्ष्मीचरित्रना
म २२ अध्यायः अपिच कुचेलि
नं दन्तमलोपधारिणं वृक्षाशिनं
निष्ठुरवाक्यभाषिणं सूर्योदये चा
स्तमये चशायिनं विमुञ्चति श्रीरपि
चक्रपाणिनं निरं छेद तृणानां
धरणीविलिखनं पादयो रस्यमा·
र्ष्टिरेन्द्राणामल्पशौचं वसनमलिन
ता दन्तता मूर्खजानां हे संध्येचा
पिनिद्रा विवस्त्रशयनं ग्रामहासा
तिरेकः स्वांगे पीठे च वाद्यं नि·
धनमुपनयेत्कोशवस्यापि लक्ष्मी ।
शिरःसुधौतं चरणौ सुमार्जितौ
वरांगणासेवन मल्पभोजनं अनग्न
शायित्व मपर्व मैथुनं चिरप्रणा
ष्टा श्रिय मानयंति षट् यस्य कु·
ष्मत्पुष्पस्य पांडरस्य विशेषतः शि
रसा धार्यमाणस्य अलक्ष्मीः प्रति·
हन्यते दीपस्य पश्चिमाच्छाया ।
च्छायाशय्यासनस्यच रजकस्तथ·
तीर्थमलक्ष्मी स्तत्र तिष्ठति इत्या
दिगारुडे ११४ अध्यायः अंगविशे
षे तस्याः स्थिति फलं यथा ।
देवा ऊचुः कथयस्व जगन्नाथकेषु
स्थानेष्ववस्थिता पुरुषाणां फलं·
किंवा प्रयच्छत्यथ नृपति द्
तात्रेय उवाच नृणां पादस्थिता
लक्ष्मी निलयं संप्रयच्छति सक्थि
नीसंस्थिता वस्त्रं रत्नं नानाविधं
यसु कलत्रदा गुह्यसंस्था क्रोडस्था
पत्यदायिनी मनोरथान्पूरयति पुरु
षाणां हृदिस्थिता लक्ष्मी र्लक्ष्मी
वतां श्रेष्ठं कंठस्था कंठभूषणं
अभीष्ट बंधुदारैश्च तथाश्लेषं प्रवा
सिभिः मृष्टान्नं वाक्यलावण्यमाज्ञा
मवितथा तथा मुखसंस्थाकवि
त्वंच यच्छत्युदधिसंभवा शिरोगता
संत्यजति ततो ऽन्यं याति संश्रयं
सेयं शिरोगता देहान्यमित्यजति सा
स्मृतं इति मार्कंडेयपुराणे दत्ता
त्रेयचरिताध्यायः ॥
अथ लक्ष्मीचरित्रं श्रीसूतउवाच
मेरुपृष्ठेसुखासीनां लक्ष्मी पृच्छति
केशवः केनोपायेन देवित्वं नृणां
भवसि निश्चला श्रीरुवाच शुक्लाः
पारावता यत्र गृहिणी यत्र चोज्ज्व
ला अकलहाविवसति यत्र तत्राहम
वसाम्यहं धान्यं सुवर्णसदृशं तंदु
लारजतोपमाः अन्नंचैवातुष यत्र
तत्र कृष्ण वसाम्यहं यःसंविभागी

प्रियवाक्यभाषी वृद्धोपसेवीप्रि
यदर्शनश्च अल्पप्रलापीनचदीर्घ·
सूत्रीतस्मिन्सदाहं पुरुषे वसामि ।
योधर्मशीलो विजितेंद्रियश्च वि
द्याविनीतो न परोपतापी अगर्वि
तो यश्च जनानुरागी तस्मिन्सदाहं
पुरुषे वसामि चिरं स्नाति द्रुतं
भुंक्ते पुष्पंघ्राय न जिघ्रति यो।
नपश्येत्स्त्रियं नग्नां नियतं सच।
मे प्रियः भ्यागः सत्यंच शौचंच·
अपयत्नेमहागुणाः यःप्राप्नोतिगु
णानेतान्नरश्चावान्सचमे प्रियः ॥
सर्वं लक्षणमध्ये तु त्याग एवविं
शिष्यते काले देशे च पात्रेचस
चत्यागःप्रशस्यते नित्यमामल
के लक्ष्मी र्नित्यं वसति गोमये
नित्यं शंखे च पद्मे च नित्यंश्रीः
शुक्लवाससि वसामि पद्मोत्प
लशंख मध्ये वसामि चंद्रे च महे·
श्वरेच नारायणे चैव वसुंधराया
वसामि नित्योत्सवमंदिरेषु वस
न्धराया मित्यत्र वसो धराया मि
तिवापाठः यथोपदिष्टा गुरुभक्ति
युक्ता पत्युर्वचो नाक्रमते चनित्यं
नित्यंच भुंक्ते पतिभुक्तशेषं त
स्याः शरीरे नियतं वसामि
तुष्टा च धीरा प्रियवादिनीच
सौभाग्य युक्ताच सुशोभना च
लावण्ययुक्ता प्रियदर्शना यापति
व्रता या च वसामि तासु श्या
मास्त्रियास्ती कृशमध्यभागा सुभ्रुः
सुकेशी सुगतिःसुशीला गभीर
नाभिः समदन्तपंक्ति स्तस्याः शरी
रे नियतं वसामि यापापयुक्तापि
शुभस्वभावा स्वाधीनकान्ते परिभू
तये च अमर्षकामा कुचरित्रशीला
तामेवनो प्रेतगृहंवा त्यजामि पुष्प
पर्णोषितेस्तृतिं श्रवणं वरुभिः
सह भस्मासनं ऊनाग्रीच दूरतः
परिवर्जयेत् चिताङ्गारकं मस्थीनि
वह्निं भस्म द्विजंच गां नपादेन
स्पृशेत्पादे कार्पासास्थि तुषं
गृहं नख केशादकं चैव मैथुनं
पर्वसंध्ययोः वर्जयेन्नग्नशायित्वम
काकी मिष्टभोजनं शिरःसपु
ष्पचरणौ सुधौतौ विनांगनासेव
नमल्पभोजनं अनग्नशायित्व मप
र्वमैथुनं चिरप्रणष्टां श्रिय मानयं
तिषट् सम्मार्जनीरजोवातं निर्गुंडी
कपित्थं वर्जयद्दपि सुगाचासनं
लक्ष्मं चतथा रात्रौ विल्व· पलाशंच
यो दीर्घं अश्ना मूर्द्धपादयोः
उच्छिष्टस्पर्शनं मूर्द्धि स्नानाभ्यंगंच
वर्जयेत् शयनंचान्धकारे च रात्रि

वासो दिने तथा स्नानांबरे।
कुवेशं च वर्जयेत्सुक्कभोजनं प
रेणाहर्त्तितं वस्त्रःस्वयं मात्याप
कर्षणं आलस्य मवसादं च नकु
र्याल्लोष्टमर्दनं शुक्रवारे च यत्नेन
शिलापिष्टं च दर्शके स्वयं वामेन
मूर्द्धानं पाणिना नैव संस्पृशेत्तथा
रक्ताः पुष्पवंतो च न पश्येत्सुधिः
पुमान् दन्तैर्तृणं परस्त्रीणांनाश्लं
यान्ते दिवाकरे कुर्याज्ञान्य यनाको
वा परस्त्रीणां तथैव च परेषांप्रति
कूलं च उदितार्के प्रबोधनं माल
कंटक रक्तैश्च मल्लिकांगार वारि
भिः वृथा विलेखनं भूमौ नकुर्या
न्मर्कतस्तथा स्वपे दोहं स्वयंमा
त्मंस्वयं कृष्टं च चेदनं नापितस्यात
हेत्तोरं शाकादपि हरेत्स्त्रियं स्वयं
दोहमित्यत्र ग्रथितं चेतिवापाठः ॥
न निन्दा गणके विप्रे पादयोर्नैर्त
स्तथा प्रतिकूलं च वल्लीणां भृक्का
च दन्तधावणं अहुतं मांसमूपं च
नग्नाचे स्त्रियन्तथा भक्तगारदर्शना
सेव शाकादपि हरेत् स्त्रियं संत्रे
रचकः परदारसेवी आचारहीनःप
रसेवकश्च संकीर्णचारी पश्चिमदर्शी
लक्ष्मी निष्ठुर दंभये त्यजामि ।
शयनं चार्द्र पादेन वासितवासोदिने
तथा नोत्थीय मथःकुर्यात्सुक्क
पादेन भोजनं अशाविज्ञानवस्त्रा
न्न इर्ष्यया मलावावरो अभूषणा
मपुष्पाच नकुर्यादात्मन स्तस्मै क
र्णौ च वदने घ्राणे तथा करतलेऽपि
च पादे पृष्ठे तथा नेत्रे नकुर्यात्स्तुले
दनुलेपनं चक्षुर्लग्ने रतं प्रयोमु
खलेप्य धनतयः दरिद्रःकार्णलग्नेव
पादे पृष्ठे तथापुष्पः गन्ये पुष्प
तथा लोप रत्नेश्वैव महोदपि ।
प्रहरीतं प्रथमं वस्त्रं वर्जयेत्र कदाच
न अजरजःखररज स्तथा सम्मार्ज
नीरजः स्त्रीणां पादरजो राजन्शाक्रा
दपि हरेत्स्त्रियं कुचेलिनं दन्त
मल्लप्रधारिणामहाशाठं निष्ठुरवाक
भाषिणं सूर्योदये चास्तमिते न
शायिनं विमुञ्चति श्रीरपि चक्रपा
णिनं महाशाठ मित्यत्र वकाशि
नमितिवा पाठः नित्यं क्षेदरस्त
णानांतिति नावलिखनं पादयोर
स्पर्शो च पकारो मैलहीनं वसनमति
मलाःवन्यनेत्रमूर्जानां द्वे संध्येवापि
निद्रा विवसनशयनं ग्राम हासाति
रेकः स्वांगे पीठे च वाद्य हरति
धनपदः केशवस्यापि लक्ष्मी अ
वत्यन मित्यत्र हस्तजा इति वापाठः
एवं यःकुरुते नित्यं मयोक्तामि ।

4147

च केशव तथा तवामितसारं
त्वयोषा निश्चला यथा श्रीभा
षित मिदं स्तोत्रं प्रातरुत्थाय
यः पठेत् तद्गृहं विपुलं रम्यं
नित्यं भवति नान्यथा क्वापि।
तो मुच्यते रोगी वद्धो मुच्येत
बंधनात् आपद स्तस्य नश्यं
तितमः सूर्योदये यथा इतिस्कं
दपुराणे लक्ष्मीकेशवसम्वादेन
लक्ष्मीचरित्रं समाप्तं ॥ ।
लक्ष्मीः स्त्री दुर्गा यथा स्तुतिः
सिद्धिरितिख्याता श्रिया संश्रय
णाच्च वा लक्ष्मी र्वा ललनाद्वा
पि क्रमात्साकांति रुच्यते इतिदे
वीपुराणे ४५ अध्यायः संपत्तिः।
शोभा ऋद्धोषधं वृद्धिनामौ
षधं फलिनीवृक्षः इतिमेदिनी
सीता वीरयोषित ॥ इति
शब्दरत्नावली स्थलपद्मिनी हृ
द्धि शमी इत्यं मुक्ता।
इतिराजनिर्घंटः मोक्षप्राप्तिः।
इतिचंडीटीकायां नागभट्टः ॥
लक्ष्मीकांतः पुं नारायणः यथा
नमःकमलनेत्राय हरये परमा
त्मने जगतः पालयित्रे च लक्ष्मी
कांत नमोस्तु ते इतिजन्माष्टमी
व्रतकथा ॥
लक्ष्मीगृहं क्ली रक्तोत्पलं इति
त्रिकांडशेषः लक्ष्मीवेश्म च ।
लक्ष्मीजनार्दनः पुं शालग्रामवि
शेषः तस्य लक्षणं यथा एक
द्वारे चतुश्चक्रं नवी ननीरदोपमं
लक्ष्मीजनार्दनं ज्ञेयं रहितंवन
मालया इतिब्रह्मवैवर्त्ते प्रकृ
तिखंडे ॥
लक्ष्मीतालः पुं श्रीतालवृक्षः ।
इति राजनिर्घंटः नौर्ध्वत्रिकस्य
परिच्छेदविशेषः तस्य द्रुत लघु
एउ विराम क्रमो यथा दो लोप
दो विरामान्तो दलो एस द विरा
मकः विरामान्तो द्रुतो लघु द्रुतो
लघुविरामकः इतिसंगीतरत्नाक
रे लक्ष्मीर्तालः ॥
लक्ष्मीनारायणः पुं शालग्रामवि
शेषः तस्यलक्षणं यथा एक
द्वारे चतुश्चक्रं वनमालाविभूषितं
नवीननीरदाकारं लक्ष्मीनारायणा
भिधं इतिब्रह्मवैवर्त्तपुराणं ॥
लक्ष्मीनृसिंहः पुं शालग्रामवि
शेषः तस्यलक्षणं यथा द्विचक्रं
विस्तृतास्यं च वनमालासमन्वितं
लक्ष्मीनृसिंहं विज्ञेयं गृहिणां
च सुखप्रदं इतिब्रह्मवैवर्त्तपुराणं
लक्ष्मीपतिः पुं वासुदेवः नर

पतिः इतिमेदिनी लवंगवृक्षः
पुगः इति विश्वः ॥
लक्ष्मीपुत्रः पुं कामदेवः घो
टकः इति मेदिनी कुशः ॥
लवः इतिशब्दरत्नावली ॥
लक्ष्मीपुष्पः पुं पद्मरागमणिः।
इतिहेमचंद्रः ॥
लक्ष्मीफलः पुं विल्ववृक्षः इति
राजनिर्घंटः
लक्ष्मीवान्[न्] पुं पनसवृक्षः इति
शब्दमाला श्वेतरोहितवृक्षः ।
इतिराजनिर्घंटः ॥ ।
लक्ष्मीवान्[न्] त्रि श्रीयुक्तः धनवा
न् तत्पर्यायः लक्ष्मणः २ श्रीलः
३ श्रीमान् ४ इत्यमरः ॥
लक्ष्मीवेष्टः पुं श्रीवेष्टः इति
राजनिर्घंटः ॥
लक्ष्मीशः पुं विष्णुः इति मुग्ध
बोधव्याकरणं ।
लक्ष्मीसमाख्या स्त्री सीता इति
शब्दरत्नावली ॥
लक्ष्मीसहजः पुं चंद्रः इतिश
ब्दरत्नावली ॥
लक्ष्यारामः पुं वनभेदः इति
शब्दमाला ॥
लक्ष्य क्ली शरवेधस्थानं तत्प
र्यायः लक्षं २ शरव्यं ३ इत ।

मरः प्रतिकायः ४ वेध्यं ५
इतिजटाधरः वेधं ६ इतिरत्ना
वली ।
लक्ष्यः त्रि लक्षणयाबोध्यः इति
साहित्यदर्पणः दर्शनीयः इतिल
क्षणान्वर्थदर्शनात् ॥
लाल ग्रहे इति कविकल्पद्रुमः
ललाति ग्रहे ग्रहणं इतिदु
र्गादासः ॥
ला स्त्री ग्रहणे दानं इतिमे
दिनी ॥
लाख ऋ शोषालमर्थयोः इति
कविकल्पद्रुमः ऋ अललाखत्
इतिदुर्गादासः ॥
लाच ऋ उ शक्तौ इतिकवि
कल्पद्रुमः ऋ अललाचत् उ
लाचते शक्तिः सामर्थ्यं इति
दुर्गादासः ॥
लाघवं क्ली आरोग्यं इति राज
निर्घंटः लघुत्वं लघो भाव
इत्यर्थे स प्रत्ययेन निष्पन्नं
लांगलं क्ली स्वनामख्यातभूमि
कर्षणयंत्रं तत्पर्यायः हलं २
गोदारणं सीरः ४ इत्यमरः ।
हलः ५ हालं ६ हाल ७ सीरः ८
इति भरतः लिंगः इतित्रिकां
डशेषः पुष्पविशेषः ॥

५१५९

तालवृक्षः गरुडदारु । इति।
मेदिनी ॥
लांगलग्रहः पुं कृषकः लांगलं
गृह्णाति यदृत्यर्थे अस्त्यस्य येननि।
घनः ॥
लांगलचक्रं क्ली कृषिकर्मनिरूप्ता
कारचक्रविशेषः यथा अथ
लांगलचक्रं स्वरोदवे लाङ्गल
दंडिका शुभ योक्त्रद्वय समन्वितं
दंडिकादि लिखित्वानि दिनेशा ।
ज्ञातभादितं दंडिका इलरूपा।
तो हि हिस्थाने त्रिकं त्रिकं ।
योक्त्रयोश्च त्रिकंचैव मध्ये पंचाग्र
केहिकं दंडस्य च गवांहानिर्भू
पस्य स्वामिना भयं । लक्ष्मी
लांगल योक्त्रस्यात्तथा दंशदि।
नर्क्षके इति ज्योतिस्तत्वं ॥



लाङ्गलदंडः पुं लांगलमध्य
स्थकाष्ठं लांगलेरईशइति भाषा
तत्पर्यायः ईशा २ इत्यमरः ।
ईषा ३ इतिशब्दरत्नावली ॥
लांगलपद्धतिः स्त्री लांगलरेखा
सिराल इति भाषा तत्पर्यायः
सीता २ इत्यमरः सीता ३
इतिशब्दरत्नावली ॥
लांगलिकः पुं स्थावरविषभेदः
इतिहेमचंद्रः ॥
लांगलिका स्त्री लांगलीवृक्षः ।
इतिशब्दरत्नावली ॥
लांगलिकी स्त्री वृक्षविशेषः
लांगलिया इति विषलांगलिया
इतिचभाषा तत्पर्यायः अग्नि
शिखा २ इत्यमरः अग्निज्वला ३
लांगलिका ४ लांगली ५ इति
शब्दरत्नाली गैरी ६ दीप्ता ७ हृ
लिनी ८ गर्भघातिनी ९ अग्नि
निका १० इन्दुपुष्पा ११ अग्निमुखी १२
वह्निशिखा १३ इतिरत्नमाला
अस्यागुणाः ऊष्ठ कुष्ठव्रणनाशि
त्वं इति राजवल्लभः राजनिर्घंटः
क गुणा पर्यायाः कलिकारी शब्दे
द्रष्टव्याः लांगली नपुं बलरामः इति
शब्दरत्नावली नारिकेलः इत्यमरः

सर्पः इतिशब्दचंद्रिका ॥
लांगली स्त्री लांगलाकारपुष्पज
लजपुष्पकविशेषः कोंचडा इति
भाषा तत्पर्यायः शारदी २
तोयपिप्पली ३ शकुलादनी ४
इत्यमरः जलाह्वी ५ जलपिप्प
लिः ६ इतिशब्दरत्नावली पि
तला ७ प्रपामास्नी ८ मत्स्यगं
धा ९ इतिजटाधरः कलिकारी१०
इतिराजनिर्घंटः
लांगुलं क्ली पुच्छं इत्यमरटी
कासारसुंदरी ॥
लांगूलं क्ली पशुपश्चाद्वर्त्तिल
म्बमानलोमाद्यावयवविशेषः
ल्याज इति भाषा तत्पर्यायः
पुच्छं २ लूम ३ वालहस्तः ४ वा
इत्यमरः लंगूलं ६ लांगूलं ७
ललाम ८ श्रावालः ९ इतिश
ब्दरत्नावली लंजः १० पिच्छः ११
वालः १२ इतिजटाधरः गो
लांगलजलमाहात्म्यं यथा लांग
लेनोद्धृतं तोयं मूर्द्धा गृह्णाति
यो नरः सर्वतीर्थ फलं प्राप्य
सर्वपापैः प्रमुच्यते इतिवाराहपु
राणे शोफः इति मेदिनी ऋष्मूलः इ
ति सिद्धांतकौमुद्यामुणादिवृत्तिः ।

लांगूलिका स्त्री पृश्निपर्णी इति
राजनिर्घंटः ।
लांगूली न पुं वानरः इतिशब्दचं
द्रिका ऋषभनामौषधं । इति
राजनिर्घंटः ॥
लाछ इ लक्षणि इतिकविकल्पद्रु
मः इ लांछते लांछति ।
इतिदुर्गादासः ॥
लाज { भर्त्सने भर्गे इति क
लाज इ } विकल्पद्रुमः द्वौ द्वितीय
स्वरिणौ लाजयति इ लांजते ।
भर्त्सन एवकेचित्पठंते । भ
र्गो भर्जनं इतिदुर्गादासः
लाजं क्ली उशीरं इतिमेदिनी ॥
लाजः पुं आर्द्रतंडुलः इतिमे
दिनी ॥
लाजा स्त्री अक्षतः इतिमेदिनी
लाजाः पुं भूम्नि भ्रष्टधान्यं लौ
डोया इति खइ इति च भाषा ।
तत्पर्यायः अक्षतं २ इत्यमरः ।
लाजा ३ अक्षताः ४ इति भरतः
अस्य गुणाः तृस्ना छर्द्यतीसारप्रमे
ह मेदःकफ नाशित्वं ।
कास पित्तोपशमनत्वं अग्निकारि
त्वं लघुत्वं शीतलत्वंच अस्य मंडगुणाः
अग्निकारित्वंदाह तृस्ना ज्वरातीसारनाशित्वं

अशेष दोषामपाचनत्वंच तस्य
पेया गुणा श्रामकंठस्यश्रमघ्नतं ।
तृषातिसाराग्निदौर्बल्यकुक्षिरोग ।
नाशित्वंच इतिराजवल्लभः
अपिच यते च व्रीहयो भृष्टा स्ते
लाजा इति संज्ञिताः यवाद
यश्च ये भृष्टा स्ते धानाः परिकीर्ति
ताः लाजाश्च यवधानाश्च तर्प
णाः पित्तनाशनाः गोधूमधाव·
नालोल्याः किंचिद्रूक्षाश्च दीपनाः
तृष्णातीसारशमनो धानशास्य ।
करःपरः मंदाग्नि विषमाग्नीनां ।
बालस्थविरयोषितां देयश्च सु
कुमाराणां लाजमंडः सुसंस्कृतः ।
इतिराजनिर्घंटः ॥ तस्यचूर्ण
गुणाः ज्ञाता दाडिम खर्जूर म्रदि
ताम्बु सशर्करं लाजचूर्णं समधा
न्नं संतर्पणं मुदाहृतं । लाज
चूर्णं ज्ञातादि जलशर्करा मधुभ्य
सहितं तर्पणं मुक्त मित्यर्थः ।
लाजशक्तुगुणाश्च गुणाश्चये ला
जानां शक्तवः सौद पित्ताडकादि
शेषतः छर्द्यतीसार तृड् दाह
विष मूर्च्छा ज्वरापहा चक्रकश्च ।
तत्तर्पणं मेघादौ प्रदेयं लाज
शक्तुभिः ज्वरापहैः फलरसै
र्युक्तं समधु शर्करं इति भाव

प्रकाशः
लांछनं क्ली नाम चिह्नं इति
इतिमेदिनी ।
लांछनः पुं रागीधान्यं इति
राजनिर्घंटः क्वचित्पुस्तके लांछ·
नीतिच पाठः ।
लाटः पुं देशांतरं वस्त्रं ।
इति मेदिनी जीर्णभूषणादि ।
इति शब्दरत्नावली ॥
लाडृ क्षेपे इति कविक
ल्पद्रुमः लाडयति अललाडत् ।
इतिदुर्गादासः ॥
लापः पुं कथनं लपधातोर्भावे
घञ् प्रत्ययेनेति निष्पन्नं ।
लाप्य त्रि कथनीयं लपधातोः
कर्मणि घ्यण प्रत्ययेनेतिनिष्पन्नं
इतिमुग्धबोधव्याकरणं ॥
लाभः पुं मूलधनादधिकं वाणि
ज्योपार्जितं धनं तत्पर्यायः
फलं १ इत्यमर भरतौ लभ्यं
३ वृद्धिः ४ इति शब्दरत्नावली ।
प्राप्तिः इतिलभ्यत्वार्थदर्शनात्
लाभ्यं क्ली लाभः इतिशब्दर
त्नावली ॥
लामज्जकं क्ली वीरणमूलं इत्य
मरः अस्य पर्याय गुणाउशीर
शब्दे द्रष्टव्या उशीरवत्वीत १

ऌवि तृणविशेषः तत्पर्यायः
स्तनालं २ अमृणालं ३ लवं ४ ल
घु ५ इष्टिकापथिकं ६ शीघ्रं ७
दीर्घमूलं ८ जलाशयं ९ अस्य गु
णाः हिमत्वं तिक्तत्वं मधुरत्वं ।
वात पित्त हर दाह श्रम मूर्छा
तिरक्तमूत्र ज्वरापहत्वंच इतिरा
जनिर्घंटः

लालनं क्ली अत्यन्तस्नेहकरणं
प्रेमपूर्वकबालकादीनां मोहाग
इति भाषा लडकोपसेव उप
सेव इह अत्यन्तपालनं कृत्वा
लयेत् पंचवर्षाणि पुत्र मिति अ
त्र लया रेकत्वालुत्वं इतिकवि
कल्पद्रुमः टीकायां दुर्गादासः त
थाहि लालने बहवो दोषास्ता
डने बहवो गुणाः तस्मात्पुत्रं
च शिष्यंच ताडयेन्नतु लालयेत्
अपिच लालयेत्पंचवर्षाणि द
शवर्षाणिताडयेत् प्राप्ते तु षो
डशे वर्षे पुत्रं मित्र वदाचरेत्
इतिचाणक्यं ॥

लालसा पुं स्त्री महाभिलाषः
इत्यमरः औत्सुक्यं याञ्चा ।
इति मेदिनी दोहदं यथा
दोहदं दौर्हृदं श्रद्धा लालसा
स्पृहा मायित्व इतिहेमचंद्रः

लोलः इतिनानार्थे सएव ।
लालसीकं क्ली पिच्छलं इतिशब्द
रत्नावली ॥

लाला स्त्री मुखभवजलं लाल
इतिभाषा तत्पर्यायः सृणिका
२ स्यन्दिनी ३ इत्यमरः द्राविका
४ स्रागीका ५ इतिशब्दरत्नावली
मुखस्रावः इति राजनिर्घंटः

लालाटिकः त्रि प्रभोर्भालदर्शी ।
कार्याक्षमः इत्यमरः यः सेव
कः क्रोध प्रसाद चिह्न ज्ञानाय प्र
भो र्ललाट मेव पश्यति यश्च
प्रभोः कार्येऽक्षमोऽशक्त स्ता
लालाटिको पूर्ववत्स्मिकः । के
चित्त कार्याक्षम इति भालदर्शि
न एव विशेषणं मत्वा एकमेव
लालाटिकमाहु र्नेत द्वाविति भाव
दर्शीति चपादः लालाटिकः सदा
लस्ये प्रभुभावनिदर्शिनि इत्य
जयः इति तट्टीकायां भरतः
आभूषणविशेष पुं इति मे
दिनी ललाटसंबंधिनि त्रि यथा
प्रासिस्त लालाटिकीत्यादि ॥

लालामेहः पुं प्रमेहविशेषः ।
यथा लालातन्तुयुतं मूत्रं लाला
मेहेन पिच्छिलं प्रमेहतीतिशेषः
अस्यौषधं गुडूच्याः स्वरसः ।

4153

पेयो मधुना सर्वमेहजित् हरिद्रा
चूर्णं युक्तो वा रसो राज्ञा समा
तिकः अपिच चंद्र प्रभा वचा
मुस्ता भूनिंब सुरसरूच हरिद्रा
अतिविषा दार्वी पिप्पलीमूल चित्रकं
रवुहस्ती पत्रकंच त्वगे वंश
लोचना प्रत्येकं कर्षमात्राणि ऊ
र्ध्वेतानि बुद्धिमान् धान्यकं ।
त्रिफला चव्यं विडंगं गजपिप्प
ली स्वर्णमातिकं व्योषं द्वौक्षारो
लवणाचय एतानि टंकमात्रा ।
णिसंगृह्णीयात्पृथक्पृथक् द्विकर्ष
हतलोहंस्याद्वतः कर्षा सिता भ
वेत् शिलाजत्वष्टकर्षं स्यादष्टौ ।
कर्षाश्च गुग्गुलोः विधिना यो ।
जिते रेतैः कर्तव्या गुटिकाशु ।
भा चंद्रप्रभातिविख्याता सर्वरोग
प्रणाशिनी निहंति विंशतिमेहा
न्कृच्छ्र मष्टविधं तथा इत्यादि ।
भावप्रकाशः

लालाविषः पुं लूतादिः इति
हेमचंद्रः ॥

लालास्रावः पुं ऊर्णनाभः इति
हेमचंद्रः ॥

लालिकः पुं महिषः इति हे
मचंद्रः ॥

लालित्यं क्ली ललितस्यभावः ।
यथा प्रीतिं भक्तजनस्य योजन
यते विघ्नं विच्छिन्नस्तत स्तं वृन्दा
रक वृन्द वंदित पदं नत्वा मत
ङ्गाननं पाटी सद्गणितस्य वच्मि
चतुर प्रीतिप्रदां प्रस्फुटां सं
क्षिप्ताक्षर कोमलामलपदै र्ला
लित्य लीलावतीं इतिलीला
वती ॥

लावः पुं स्त्री पक्षिविशेषः ।
लावया इतिभाषा इत्यमरभर
तो अस्यमांसगुणाः लघुत्वं
कटुत्वं मलवृद्धकारित्वं स्वादुत्वं
शीतत्वं त्रिदोषनाशित्वंच इतिरा
जवल्लभः ॥

लावकः पुं लावपक्षी । तत्प
र्यायः लघुजंगलः २ इति त्रि
कांडशेषः ॥

लावणं त्रि लवणसंस्कृतं यथा
सार्पिष्कं दाधिकं सर्पि र्दधिभ्यां
संस्कृतं क्रमात् लवणोदकाभ्या
मुदकं लावणिकमुदश्चिति औद
श्वित मौदश्वित्कं लवणे स्यात्
लावणं इतिहेमचंद्रः लवण
सम्बंधि च नस्ये क्ली इति रत्न
माला ॥

लावणिकं त्रि लवणेनसंस्कृते ।
इतिहेमचंद्रः लवणसम्बंधि च ।

लवणविक्रेतरि पुं लवणपात्रे
स्त्री इतिकेचित् ।
लावण्यं क्ली लवणत्वं लवण
स्वभाव इत्यर्थेस्य प्रत्ययेननिष्प
न्नं सौन्दर्यविशेषः तस्यलक्षणं
यथामुक्ताफलेषु छायायास्तर
लत्वमिवान्तरा प्रतिभाति यद
ङ्गेषु तल्लावण्य मिहोच्यते इत्युज्ज्व
लनीलमणिः तथाहि नीति ।
भूमिभुजां नतिर्गुणवतां शीलंग
नानां धृति र्दम्पत्योः शिशवो
गृहस्य कविता बुद्धेः प्रसादो गि
रां लावण्यं वपुषः स्मृतिस्तु
मनसः शान्ति र्द्विजस्य क्षमा शक्त
स्य द्रविणं गृहाश्रमवतां स्वास्थ्यस
तां मण्डनं इति नवरत्नान्तर्गतामर
सिंहः
लावण्यार्जितं क्ली विवाहकालीनं
श्वश्रुराभ्यां दत्तं धनं यथा प्रीत्या
दत्तंच यत्किंचित्श्वश्र्वा वा श्वश्रुरे
ण वा पादवन्दनिकं यत्लावण्या
र्जितमुच्यते इति विवादचिन्ताम
णिधृत कात्यायन वचनं लाव
ण्यंप्रीतिनेत्युणपादि तथाच पारस्प
णतायै प्रीत्यादिभस्त्रे वाक्ष्यिये स्व
श्रुरादिना दत्तं तत्तीयं स्त्रीधनमि
त्यर्थः इतितद्व्याख्यानं ।

लावा स्त्री पक्षिविशेषः तत्प
र्यायः लावकः २ लावः ३ लवः ४
अस्या मांस गुणाः पथ्यत्वं ।
ग्राहित्वं लघुत्वंच इति राज
निर्घण्टः ॥
लाबुः } स्त्री अलाबुः इति शब्द
लाबूः } रत्नावली
लासः पुं नृत्यमात्रे स्त्रीणां
नृत्यं इतिशब्दरत्नावली युषः
इतिशब्दचन्द्रिका ॥
लासकं क्ली मदकं मटका इति
भाषा इतिहारावली ॥
लासकः पुं लास्यकारी मयूरः
लसकः इतिमेदिनी । वेष्टः
इति धरणिः ।
लासकी } स्त्री नर्त्तकी इत्यमरः
लासिका }
लास्फोटनी स्त्री आस्फोटनी वेध
निका इत्यमरटीकायां राय
मुकुटः ॥
लास्यं क्ली नृत्यं इत्यमरः ।
तौर्यत्रिकं इतिमेदिनी । भा
वाश्रयं नृत्यं ताललयाश्रयं
नृत्तं इति भरतः पुंनृत्यं ।
ताण्डवं प्राहुः स्त्रीनृत्यं लास्य
मुच्यते इति संगीतनारायणे
नारदसंहिता ॥

लासः पुं नर्त्तकः इति शब्द
रत्नावली
लासकं क्ली नृत्यं इतिशब्द
रत्नावली ॥
लास्या स्त्री नर्त्तकी । इति शब्द
रत्नावली ॥
लाक्षकी स्त्री सीता यथा राघ
वेते इयं सीता हारकेशस्य रु
क्मिणी विभोऽवतार मात्रस्य ।
लक्ष्मी र्या कमलालया वारा
णस्यां विशालाक्षी विमलापुरुषो
त्तमे वैकुण्ठे त महालक्ष्मी राधा
वृन्दावने वने ॥ लक्षणाः कम
लादास्तो यस्याः सा लाक्षकी स
तांएवं शतसहस्राणा मीश्वरीरा
धिकाधिका इति पाद्मोत्तरखण्डे
५५ अध्यायः ॥
लाक्षणिकः पुं लक्षणाप्रति
पादकः इति साहित्यदर्पणः ल
क्षणात्मक इति मम्मटत्वं ला
क्षणिकत्वं इति सारमञ्जरी ।
लाक्षा स्त्री रक्तवर्णा हस्तनिर्यास
विशेषः लाक्षा इतिभाषा तत्प
र्यायः राक्षा २ जतु ३ यावः ४
अलक्तः ५ द्रुमामयः ६ इत्यमरः
खदिरिका ७ रक्ता ८ रङ्गमाता
९ पलंकषा १० क्रमिहा ११ द्रुम
व्याधिः १२ अलक्तकः १३ पलाशी
१४ शुद्धिणी १५ दीप्तिः १६ जतुका १७
गंधमादिनी १८ नीला १९ द्रवरसा २०
पिताविः २१ अस्या गुणाः ।
कटुत्वं तिक्तत्वं कषायत्वं श्लेष्म
पित्तार्शशोफ विष रक्त विषमज्व
र नाशित्वंच इति राजनिर्घण्टः
भग्नविसर्प त्वग्दोषनाशित्वं वल्य
त्वंच इतिराजवल्लभः अपिच
लाक्षा वर्ण्या हिमा वल्या स्निग्धा
च तुवरा लघुः अनुष्णा कफ पित्ता
स्रहिक्का कास ज्वर प्रणुत् व्रणोरः
क्षत वीसर्प कृमि कुष्ठगदापहा अ
लक्तको गुणो स्तद्वद्विशेषाद्व्यङ्ग
नाशनः इतिभावप्रकाशः ॥
लाक्षातरुः पुं पलाशवृक्षः इति
शब्दमाला ॥
लाक्षातैलं क्ली पक्वतैलविशेषः
लाक्षादितैलमिति ख्यातं त
द्विविधं स्वल्पं बृहच्च यथाक्रमं
तत्प्रकारं तद्गुणांचाह । लाक्षा
हरिद्रा मञ्जिष्ठा कल्कै स्तैलं वि
पाचितं षड्गुणेनारनालेन दा
हशीतज्वरापहं इति स्वल्पलाक्षातै
लं वृहद्यथा लाक्षारसाढके प्रस्थ
तैलस्य विपचेद्भिषक् । म
स्त्वाढक समायुक्तं पिष्ट्वाचात्र

समावपेत् शातपुष्पी हरिद्रांच मूर्वा
ऊषं हरेणुकां कटुकां मधुकां।
रास्ना मश्वगंधांच दारुच मुस्तकः
चंदनंचैव सुपगत्त समानकेः द्र-
व्यैरेतैश्च तत्सिद्धं अभ्यंगात्क्षारकृता-
परं । विषमाख्यान् ज्वरान् ।
सर्वान्नाशयेव प्रशमं नयेत् कासं
श्वासं प्रतिश्यायं कंडू दौर्गंध्य
गौरवं त्रिकपृष्ठ ग्रहं शूलं गा
त्राणां स्फुरनन्तथा । पापाल।
सीमग्रमंसर्वग्रहनिवारणं ग्रथि
भ्यो निर्मितं सम्यक्तैलं ला
क्षादिकं महत् इति वृहल्लाक्षा-
तैलं इतिसारबोधः ।
लाक्षाप्रसादः पुं पट्टिकालोध्रः
इतिराजनिर्घंटः ।
लाक्षाप्रसादनः पुं रक्तलोध्रः ।
तत्पर्यायः क्रमुकः २ पट्टिका ३
पट्टा ४ इत्यमरः ॥
लाक्षावृक्षः पुं कोशाम्रः इति
राजनिराजनिर्घंटः पलाशवृक्षः
इतिहारावली ॥
लिकुचंक्ली बुक्कं इतिराज-
निर्घंटः
लिकुचः पुं लकुचः इत्यमरः।
लिक्का स्त्री लिक्षा इतिशब्दर
त्नावली ॥

लिख ग लेखने इतिकविक
ल्पद्रुमः श लिखति पुस्तकंलेख
कः अयं विभाषया कुटादि रिति
केचित् तेन लिखितं विश्वस्तो
अपि शाकिरानि रिति लिखि
तव्यं लेखितव्यं लिखनं इत्यादि-
सिद्धं इतिदुर्गादासः ।
लिख इ सृपि इतिकविकल्पद्रुमः
इ लिंखते सृपि गतौ इतिदु
र्गादासः
लिखः पुं लेखनं इति लिख
धातोः क प्रत्ययेन निष्पन्नं ॥
लिखनं क्ली लेखनं लिपिः ।
इत्यमरटीकायां सारसुन्दरी ॥
विधिलिपिरखंडनीया यथा य
स्ययल्लिखनं पूर्वं यत्र काले नि
रूपितं तदेव खंडितं वापि त
त्नाहंच को विधिः विधाताच
विधाताहं येषां येलिखनंकृतं
ब्रह्मादीनांच रुद्राणां न खंडा
कदाचन इतिब्रह्मवैवर्त्ते श्रीकृ
ष्णजन्मखंडे १५ अध्यायः॥
लिखितं क्ली लिपि इत्यमरः
लेखनं इति भरतः लिखित
पत्रादौ त्रि यथा प्रमाणं लि
खितं भुक्तिः साक्षिणश्चेति
कीर्त्तितं इति मिताक्षरायांयाज्ञ-

4157

वल्क्यः मुनिविशेषः पुं यथा
पराशर व्यास शंख लिखितादि
त्यगौतमौ शातातपो वशिष्ठश्च
धर्मशास्त्रप्रयोजकाः इतिश्राद्ध
तत्वे याज्ञवल्क्यः ॥
लिख्या स्त्री परिमाणविशेषः।
यथा जालान्तरगते भानौ यच्चा
णु दृश्यते रजः तै स्त्रसरेणुभिः अष्टे
लिख्या लिख्या षड्भिश्च सर्षपः
इतिशब्दचंद्रिका ॥
लिग इ गतौ इति कविकल्प
द्रुमः इ लिंग्यते इतिदुर्गादासः
लिग इ क चित्रे इतिकविक
ल्पद्रुमः इ क लिंगयति शाङ्गं।
स्त्रीनपुंसकेः शाब्दिकः चित्रंकरो।
तीत्यर्थः इतिदुर्गादासः ।
लिंग क्ली मनः इति सिद्धान्त-
कौमुद्यामुणादिवृत्तिः ॥ ।
लिंगः पुं सर्वः इति सिद्धान्त-
कौमुद्यामुणादिवृत्तिः भूप्रदेशः
रागः इतिनानार्थरत्नमाला ॥
लिंगं क्ली चिह्नं शेफः इत्य
मरः अनुमानं सांख्योक्तप्र-
कृतिः शिवमूर्त्तिविशेषः इति।
मेदिनी व्याप्य यत्नो ।
पुंस्त्वादिः इति त्रिकांडशेषः
सामर्थ्यं यथा यावता मेव।

यावतां लिंग शुद्धिगतं भवेत्
अर्थ शैवाभिधेयस्य तावद्भि र्गुणा
विग्रहः इतितिथ्यादितत्वे पतत्का
रिका व्याख्यायां रघुनंदनः
अथ शेफार्थस्य लिंगस्य पर्यायः
शिश्नः २ स्मरस्तंभः ३ उपस्थः ४
मदनांकुशः ५ कंदर्पमुषलः ६
शेफः ७ मेहनं ८ शेफः ९ मेढ्रः
लांगः ११ ध्वजः १२ रागलता १३
अंगः १४ इति शब्दरत्नावली ॥
लांगूलं १५ साधनं १६ शेफः
कामांकुशः १७ इति जटाधरः
लिंगमूले वादि लान्त वर्णयु
क्तस्वाधिष्ठान नामक षड्दलप
द्ममस्ति यथा मूलाधारे त्रिकोणा
ख्ये इच्छा ज्ञान क्रियात्मके मध्येस्व
यंभुलिंगन्तु कोटिसूर्य्य समप्रभं
तदूर्द्ध्वे हेमवर्णाभं वस वर्ण चतु
र्दलं तदूर्द्ध्वेग्निसमप्रख्यं षड्दलं
हीरकप्रभं वादि लान्त षड्वर्णेनयु
क्तंस्वाधिष्ठान संज्ञकं स्वपदेन प
रंलिंगं स्वाधिष्ठानं ततो विदुः इ
तितंत्रं अस्याधिष्ठातृदेवतादि
र्यथा प्रजननःसर्वभूतानामुपस्था
ध्यात्म मुच्यते अधिभूतं तथा
शुक्रं दैवतंच प्रजापतिः इति
महाभारते आश्वमेधिकपर्व ।

अस्याशुभ लक्षणं यथा।
स्वल्पलिंगे च धनवान्स्याद्धपुत्रा
दिवर्जितः स्थूललिंगो दरिद्रः
स्याद्दुःखोक वृषणी भवेत् इतिगा
रुडे ६३ अध्यायः अपिच महद्दि
राशु गाख्याते स्वल्पलिंगो धनीश्वरः
अपत्यरहितश्चैव स्थूललिंगो ध
नोज्झितः महद्विजानुमि विति
शेषः मेढ्रे वामनते चैव सुता
नरहितो भवेत् वक्रेऽन्यथापु
त्रवान्स्याद्दारिद्र्यं विनते त्वधः
अल्पैस्तु तनयो लिंगे शिरालेऽ
प्यसादी नरः स्थूलग्रन्थियुते लि
ङ्गे भवेत्सद्वारि संयुतः इति गारु
डे ६६ अध्यायः अन्यच्च दीर्घ
लिंगेन दारिद्र्यं स्थूललिंगेन निर्ध
नः कृशलिंगेन सौभाग्यं कृस्वलि
ङ्गेन भूपतिः कर्कशेः कठिनेः लि
ङ्गे परदाररतः सदा रमतेचसदारा
न् निर्धनो भवति ध्रुवं कृश
लिंगेन सुस्त्रीयः रक्तलिंगेन भू
पतिः परस्त्री रमते नित्यं नारीणां
वल्लभो भवेत् कृशलिंगेन रक्ते
न लभते चोत्तमांगनां राज्यं स्वरा
ज्यं दिव्यांगनाः कन्याकायाः पतिर्भ
वेत् इति सामुद्रके । शिव
स्य लिंगरूपस्य तन्निर्मास्याग्राह्यत

स्य कारणं यथा दिलीपउवाच
वेयिस्मार द्विजश्रेष्ठ रुद्र त्रिपुर
हन्तकः कस्माद्विगर्हितं रूपं प्राप
वानत्र भार्यया योनि लिंगस्वरू
पं च कथं स्यात्तन्महात्मनः पंचवक्त्र
स्त्रिनेत्रः शूलपाणि स्त्रिलोचनः
कथं विगर्हितं रूपं प्राप्तवान्द्विज
पुंगव एवं सर्वं समाचक्ष्व मे
ब्रह्मकल्याणनंदन वशिष्ठ उवाच
शृणुराजन्प्रवक्ष्यामि यन्मां त्वं
त्रिगोरवात् स्वायंभुवोमनुः पूर्वं
मंदरे पर्वतोत्तमे इयाज मुनि
भिः सार्द्धं दीर्घं सत्र मनुत्तमं त
स्मिन्समागताः सर्वे मुनयः संशित
व्रताः अल्पिष्टे देवतातत्त्व मिथः
प्रोचु स्तपोधनाः विप्राणां वेद
विदुषां कः पूज्या देवता वरः
इतितस्य वचः श्रुत्वा सर्वएव महर्
षयः भृगुं तपोनिधिं विप्र प्रो
चुः प्रांजलयस्तदा ऋषयऊचुः
अस्माकं संशयं छेत्तुं समर्थो
सि भुभवान् ब्रह्माविष्णुमहेशानाम
मेतिकं व्रज स्वयं गत्वा तेषां स
मीपन्तु तथा दृष्ट्वा च विप्रस्तान्
गुरुं सत्त्वगुणं तेषां यस्मिन्संवि
द्यते मुने स एव पूज्यो विप्राणां
नेतरस्तु कदाचन तस्मात्वं द्विजमुनिश्रेष्ठ

विवुधा निरासनं ॥ त्रिषं कु
रु मुनिश्रेष्ठ सर्वलोकहितं प्रभो
एव मुक्त स्वतस्तूर्णं कैलाशंप्र
तिसत्तमः जगाम वामदेवेनयत्रा
स्ते वृषभध्वजः रुद्रहारमुपागम्याशं
कर स्य महात्मनः शूलहस्त महारौ
द्रं नंदिं दृष्ट्वाब्रवीद्द्विजः संप्राप्तो
हि भृगु र्विप्रो हरं द्रष्टुं सुरोत्त
मं निवेदयस्व मां शीघ्रं शंकर
राय महात्मने तस्य तद्वचनं श्रुत्वा।
त्वानंदी सर्वगणेश्वरः उवाचपरुषं
वाक्यं महर्षि ममितौजसं असा
न्निध्यः प्रभो स्तस्य देव्या क्रीडति
शंकरः निवर्त्तस्व निवर्त्तस्व यदि
जीवितुमिच्छसि एवं निराकृतस्ते
नतत्रातिष्ठन्महातपाः बहूनि दि
वसान्यस्मिन्द्रुद्रद्वारे मुनीश्वरः।
ततः क्रोध समाविष्टो भृगुः प्रो
वाच शंकरं विनष्टस्तमसा रूपो
मान जानाति शंकरः नारीसंग
म मत्तोसो यस्मान्मामवमन्यते
योनि लिंग स्वरूपं वै रूपं त
स्माद्भविष्यति ब्राह्मणं मान जा
नाति तमसा चाप्युपायतः अब्रह्म
ण्यत्व मापन्नो नष्टज्योऽसौ द्विजन्म
नो तस्माद् जलमन्नं तस्मै दत्तं
शैवि स्त्वया शिवस्यान्नं जलं चैव।

पत्रं पुष्पं फलादिकं निर्माल्यम
स्त्वग्राह्यं भविष्यति नसंशयः
एवं शप्त्वा महातेजाः शंकरं लो
कपूजितं उवाच गणा मत्पुत्रं न
स्मिन्भूतले रुद्र भक्ताश्च ये
लोके भस्मलिंगास्थिधारिणः ते
पाषंडत्व मापन्ना वेदवाह्या भव
न्तिवै एवं शप्त्वा मु नि स्त्रि पुर
त्रिपुरहन्तकं जगाम ब्रह्मलोकंवै
सर्वलोक नमस्कृतं इतिपाद्मोत्तर
खंडीयाष्टसप्ततितमाध्यायात् सं
कलितं शिवलिंगस्य पूजा
यात्र यथा ब्रजानाति वसामि
यस्मिन्नाभिष्यंतो ब्रजेत् लिंगस्थ
पूजयेद्देवीं स्थंडिलस्थां तथैवच
पुस्तकस्था महादेवी पाउके प्रति
मास च तल्लिंग माश्रयेत्मंत्री
श्रक्राये यत् प्रतिष्ठितं कथाध्ये
यत्कृतं लिंगं वर्जनीयेत्न साध
कैः अल्पसौख्यप्रदं प्रोक्तं वेदमं
त्रैः प्रतिष्ठितं सात्विकारव्यं स्ति
ग भुक्ति भोग तथैवच । त्ता
तंत्र साधकेन्द्रण । सिद्धिंदा
पं सिद्धिदं देवुवाच सात्विकार
न्त यलिंगं मंत्रहीनं प्रतिष्ठितं नि
र्दर्शित विकासेच अस्वयंभु स्वयंभवं
ऊर्वति भक्तिवात्सल्यं लोकानां।

वासनात्मकं दुर्विज्ञेयं मिदं तात
योगिनामप्यगोचरं मर्त्यैर्जड
धियै र्नाथ कथं विज्ञायते विभो
ईश्वर उवाच साधु साधु महादेवि
रहस्य मिद मुत्तमं यत्त्वया चोदि
तं भद्रे तत्तथैव नचान्यथा दुर्वि
ज्ञेयं सुरैश्चापि किंपुन र्मनुजैस्तु
भिः आधिसुसाधकं चेत्र हृद्यया
नंदकारकं इंद्रियाणांच ज्ञेत्रं।
कोदशापि लिंगदर्शने सेव्यमानं
ततो लिंगं नित्य मानंददायकं।
सुखमान्यप्रपतेन्नित्यं विमानस्था
वरांगना। भैरवं प्रपते नित्यं
क्रीडंतं मातृमंडले उमामहेश्वरं
चापि स्वप्ने पश्यति साधकः अ
निवर्तिताधिकारं तल्लिंगं त्रिभुवनेश्व
रि आक्रमंति महाविघ्नाः सदैं
त्यासुरमानवाः। स्फूर्त्यारं यथा
देवि आक्रमंति नराः प्रिये अन
र्हि तन्त्र भुंजंति तथा लिंगन्तु रु
त्स्वा प्रेतं यथा स्पृश्यते आक्रम
ति पिशाचकाः श्मशानं च यथा लिंगान्न
आक्रमंति तथा प्रिये इत्याद्यैरे
वीपुराणे नंदाकुरप्रवेशाध्यायः।
अथ लिंग लक्षणं। तत्रा
दौ बाण लिंगस्य लक्षणं यथा बाण
लिंगं तथाज्ञेयं भुक्तिमुक्तिप्रदं।

यकं उत्पत्तिं बाणलिंगस्य लक्ष
णं शेषतः शृणु नर्मदा देविका
याञ्च गंगा यमुनयो स्तथा सन्ति
पुण्य नदीनांच बाणलिंगानि षण्मु
खे इत्यादि पूजितश्च उक्षिप्तानि
हितानि च सदा संनिहितो स्वयं
शिवः सर्वार्थदायकः इंद्रलिंगा
नि तत्राहुः साम्राज्यार्थ प्रदानि च
अथाग्नेयलिंग लक्षणं आरुणं
हित्वकीलालमस्तस्पष्टीकरोति ते
आग्नेयं तस्मात्किं निम्न मथ वा
शक्तिलांछितं इदं लिंगवरस्या
भ्यर्चनेनसाधिपति भवेत्॥
अथ याम्यलिंग लक्षणं दंडाका
रंभवेद्याम्यमथवा रसनाकृति।
यद्युक्तं महत्तेन निर्मितं ज्ञाय
ते तदा निषिद्धं निधनं तेन क्रि
यते स्थापितेन तु अथ नैर्ऋतलिं
ग लक्षणं राक्षसं खड्ग सदृशं
ज्ञान योग फलप्रदं कर्कटादिष्व
लिमित कंठ कृति युतं तथा वा
रुणे निकृते लिंगं गार्हस्थ्य नरा
प्रदे अथवारुणलिंग ल
क्षणं वारुणं वर्तुलाकारं पाशां
कं कांतिवर्चसं बुद्धिर्भ्रोभौदः भं
शाल्य संभोग मानन्द मध्यगे॥
अथवायुलिंगलक्षणं क्रमं धूम्रं

४८१

वर्णच्चं धूम्राभं धूम्रध्वजं म
स्तके स्थापितं तस्य तन्न समनि
तं ततः अथ कौबेरलिंग लक्ष
णं तुलकार्पास गदाकारमथवा
गुरु कौवेरस्य मध्यगे॥
अथ रौद्र लिंग लक्षणं दिनं वा
यद्य वा रात्रि मध्ये रविवर्व
सं अधि शूलांकितं रौद्रं हेम।
कुंडलवर्चसं अथ वैष्णवलिंग
लक्षणं चतुर्वर्णमयं वापि वै
ष्णवं ज्ञायते अतः वैष्णवेश्व
र खं चक्राक गदाब्जादि विभूषितं।
श्रीवत्सं कौस्तुभांकंच सर्वस्मि।
हासनांकितं वैनतेय समांकं।
वा तथा विष्णु पदांकितं वैष्णवं
नाम तल्लोके सर्वैश्वर्य फलप्रदं
सालग्रामादि संभूत शशांकं।
श्रीविवर्द्धनं पद्मांकं स्वलिंकं।
कं वा श्रीवत्सांकं विभूतये इतिवी
रमित्रोदये धृत कालोत्तरः।
नारद उवाच अथ वस्तामिति वि
प्र विद्धि मेकादशं परं श्रवणा
यस्य पापानि नाश मायाति तत्क्ष
णात् मधुपिंगलवर्णाभं कमलं
डलिका युतं स्वयंभूलिंगमा।
ख्यातं सर्वसिद्धिनिषेवितं नाना
नावर्णसमाकीर्णं जटाधूलसं
मन्वितम्

लंजयाकृयं लिंगं सदा सर न
मस्कृतं दीर्घाकारं शुभ्रवर्णं कृम
विंडु समन्वितं नीलकंठं समा
ख्यातं लिंगं पुण्यं सदा सरैः शु
क्लाभं शुक्लकेशाच नेत्रत्रय सम
न्वितं त्रिलोचनं महादेवं सर्वपाप
प्रणोदनं ज्वललिंगं जटाजूटं
कृष्णाभं स्थूलविग्रहं कालाग्नि
रुद्र माख्यातं सर्वसत्त्व निषेवि
तं मधुपिंगलवर्णाभं श्वेत यज्ञो
पवीतिनं श्वेतपद्म समासीनं चंद्र
रेखाविभूषितं मलयास्त्र समायुक्तं
त्रिपुरारि समाकृयं शुभ्राभं पिंग
लजटं मुंडमालाधरं परं त्रिशू
लधर मीशानं लिंगं सर्वार्थसाध
नं त्रिशूल डमरुधरं अथ रक्ता
र्द्धभागतः अर्द्धनारीश्वराकारं स
र्वदेवै रभिष्टुतं वृषदक्षमयंका
न्तं स्थूलं लिंगं समुज्ज्वलं महा
कालंसमाख्यातं धर्मकामार्थमो
क्षदं यत्र कथितं तस्य लिंग
चिह्नं महेश्वरिः एकैकं वक्तुमर्थः
स्यात्वद्भिः किंच सुव्रत इति
हेमाद्रिधृत लक्षणाकांडे उक्तोंक
श्रायस यात्र शीर्षं मंत्र विवं
र्जितं यमवर्णितं यल्लिंगं य
मोकेवाकमंडलं स्वाकं स्तवि

कं वाग्रस्तनानान्वितं मतं शाणि
वर्णं महाकाले नंदीशं पद्मरागवत्
त् पद्मरागनिभं सर्वं महाभंसि
ह्यूजितं मौक्तिकाभंनीलनिभंरु
द्रादित्यैःप्रपूजितं वसुदैः से
द्र यतेशो गुह्यके यातुधानकैः
नानावर्णमयं नीलं शशांक
मंडलप्रभं इतिवीरमित्रोदयधृत।
कालोत्तरः इति बाणलिंगलत
प्रयत्नस्य परीक्षा इत्येत·
लक्षणं प्रोक्तं परीक्षातत्त्वको
विदैः त्रिःसप्त पंचवारं वा तुला
साम्यंनजायते तदा बाणसमा
ख्यातंशेषं पाषाणसंभवं इ
तिवीरमित्रोदयधृतं तुलाकर
णान्तंतंडुलेन अपर तुलादिषु
तंडुलायघ्रथिकाःस्युस्तदा तद्वि
गं गृहस्थिणा पूज्यमथार्थं लिंगंवे
दधिकं तदोदासीनपूज्यन्त्विति।
किञ्चरत्नीतिहेमाद्रिधृत लक्षण
कांडे समुद्भवस्तुलायहेतुहिमे
तिनहीयते बाणलिंगमितिख्या
तं शेषंनार्मद मुच्यते त्रिपंचवारं·
यस्यैव तुलासाम्यं नजायते तदा
बाणं समाख्यातं शेषं पाषाण
संभवं इतिमत्स्यसंहिता नर्मदा·
वा प्रतिपिंडूयाघरा तडुपलभ्य·

ते बाणलिंगं तदा विहि तस्ते
स्ताव विवर्द्धनं इतिवीरमित्रोदयः
बाणशब्दमुत्पत्ति रपि तत्रै
व अथ बाणं समाख्यातं यथा
वस्ते तथादितः बाणः सदाशिवो
देवो बाणो बाणानरोऽपि च मेन
यस्मै कृतं तस्माद्बाणलिंग मुदा
हृतं सदा सन्निहित स्तत्र शिवः
सर्वार्थदायकः कृतप्रतिष्ठं तद्धि
कं बाणाख्येन शिवेनच पंकज
सफलाकारं कुंडलस्य समाकृति
भुक्ति मुक्ति प्रदेचैव बाणलिंग
मुदाहृतं पंकजफलं पद्मबीजं
पक्वजम्बु फलाकारं कुक्कुटांड
समाकृति इतिहेमाद्रिधृतलक्षण
कांडेपादः देवीं प्रति शि·
ववाक्यं प्रशस्तं नार्मदं लिंगं
पक्वजंबु फलाकृति मधुवर्णेन
याम्युक्तं नीलंमरकतप्रभं हंसडि
म्बाकृति पुनःस्थापनायांप्रशस्यते
स्वयं संभवते लिंगं गिरिजान
र्मदाजले पुरा बाणासुरेणाहं·
प्रार्थितो नर्मदातटे आविरासमि
रौ तत्र लिंगरूपीमहेश्वरः ॥
बाणलिंग मपि ख्यात मतोऽर्था
जगतीतले अन्येषां कोटिलिंगा
नां पूजने यत्फलं लभेत् ॥

4163

तत्फलं लभते मर्त्यो बाणलि
ङ्गैकपूजनात् । तथा ताम्री
वास्फाटिकी स्वार्णी पाषाणीराज
तीतया वेदिका च प्रकर्तव्यातत्र
संस्थाप्यपूजयेत् ॥ प्रत्यहं·
योर्चयेल्लिंगं नार्मदं भक्तिभावतः
ऐहिकं किं फलं तस्य मुक्ति
स्तस्यकरे स्थिता इतिप्रत्यहं वा·
णलिंगपूजायाः फलं इतिया
ज्ञवल्क्यसंहिता संस्थाप्यपूजी।
बाणलिंगं रत्नकाटिगुणं भवेत्
रसलिंगे ततो बाणात्फलंकोटि।
गुणं स्मृतं गुणांस्तु रसलिंगस्य
वक्तुं शक्नोति शंकरी सिद्धयो·
रसलिंगस्यचरणमाद्याः समंस्थि
तां इतिमत्स्यसंहिता ॥
स्वल्पात्स्वल्पमयान्येव लिंगानिकथि
तान्यपि पवित्राण्येव पूज्यानिसर्व
कामप्रदानि च एतेषां मपि
सर्वेषां काश्मीरं हि विशिष्यते।
काश्मीरादपि लिंगाच्च बाणलि
गंविशिष्यते बाणलिंगात्परंनाम
पवित्र मिह दृश्यते । ऐहिका
मुष्मिकं सर्वं पूजाकर्त्तुः प्रयच्छति
इतिबाणलिंग प्रशंसा इति के
दारखंडे ॥ निषिद्धलिंगमाह त
त्रैव कर्कशे बाणलिंगे तत्पुत्र

दारक्षयो भवेत् चिपिटे पूजिते
तस्मिन्गृहभंगो भवेद्ध्रुवं । एक
पार्श्वस्थिते चैव पुत्र दार धनक्षयः
शिरसि स्फुटिते बाणे व्याधिर्मरण
मेव च छिद्रलिंगे च भिन्ने बाणे
विदेशगमनंभवेत् । लिंगे च
कर्णिकोद्दृष्टा व्याधिमान्जायते पु·
मान् प्रत्यग्रन्ति विनाशेन गो
धनानां क्षयो भवेत् तीक्ष्णाग्रं
वक्रशीर्षं च अष्टलिंगं विवर्जयेत्
अतिस्थूलंचातिकृशं स्वल्पंवाभूष
णान्वितं गृही विवर्जयेत्साहंकृत
द्विमोक्षार्थिनो हितं इतिदुष्टबा
णलिंग लक्षणं इति हेमाद्रिः ।
शुभलिंगमाह अघोरे कपिलं लि
ङ्गं चनाभं मोक्षकांक्षिणः लब्ध्वा
कपिलस्थूलं गृहीनैवार्चयेत्क्वचित्
पूजितव्यंगृहस्थेन वर्णेन भ्रमरो
पमं तत्सपीठ मपीठं वा मंत्र·
संस्कार वर्जितं सिद्धि मुक्तिप्रदं
लिंगं सर्वप्रासाद पीठगं इतिशु
भबाणलिंग लक्षणं इति वीर
मित्रोदयः बाणलिंगेष्वावाहना·
दि न कर्त्तव्यं यथा बाणलिंगा
नि राजेन्द्र स्थितानि भुवनत्रये न
प्रतिष्ठा न संस्कार स्तेषामावाह
नं न च इति भविष्यपुराणं आस्मो

शुद्धैर्नैवोत्थायपः स्मरेद्बाणलिङ्गं।
कं सर्वत्र जय माप्नोति सत्यं सत्यं म-
हेश्वर इति योगसारे ५ परिच्छेदः
॥ अथ बाणलिंगध्यानं । ॐ
प्रसन्नं शक्ति संयुक्तं बाणाख्यं च म
हाप्रभं कामबाणान्वितं देवं सं
सारदहनक्षमं शृंगारादि रसो-
ल्लासं बाणाख्यं परमेश्वरं एवं
ध्यात्वा बाणलिंगं यजेत्तं परमं
शिवं मनसा गंधपुष्पाद्यैः संपूज्या
स्य मंत्रं स्मरेत् प्राणायामं ततः
कृत्वा बाणलिंगं तु तोषयेत् ।
उद्दिष्टदेवस्य दैवं विभाव्य वाग्भ
वैर्जपेत् ततो जपं समाप्याथ स्त
वेनानेन तोषयेत् अथ स्तवः ।
बाणमहाभाग संसारात्त्राहि मां प्र
भो नमस्ते वायुरूपाय नमस्ते
ऽव्यक्तयोनये संसारकारिणे ते-
ऽस्तु नमस्ते सत्यरूपधृक् प्रमथा-
य महेन्द्राय कालरूपाय वै नमः
दहनाय नमस्तुभ्यं नमस्ते योग
कारिणे भोगिनां भोगकर्त्रे च मो
क्षदात्रे नमो नमः नमः कामाग
नाशाय नमः कल्मषहारिणे न
मो विद्याप्रदात्रे च नमो विश्वस्वरू
पिणे बाणाय वरदात्रे च राघवाय
नयायच रामस्यानुग्रहायाय रा

भरतस्य च मुनीनां योगदात्रे च
राक्षसानां तथा च नमस्तुभ्यं नम
स्तुभ्यं नमस्तुभ्यं नमो नमः ॥
येदाद्दिकाशक्तियुक्ताय महामाया
प्रियाय च भगप्रियाय सर्वायु वैरि
णां विग्रहाय च परिवाय योगि
नीनां कौलिकानां प्रियाय च कु
लांगनानां भक्ताय कुलाचाररता
य च कुलभक्ताय योगाय नमो ना
रायणाय च मधुप्रमत्ताय यो
गेशाय नमो नमः कुलनित्याय
गणेशाय कौलिकानां सखाय च
कुलयोगाय निष्ठाय शुद्धाय पर-
मात्मने परमात्मस्वरूपाय लिंगमू
लात्मकाय च सर्वेश्वराय सर्वा
य शिवाय निर्गुणाय च इत्येतत्स्त
वं शतं बाणलिंगस्य शंकर यः पठे
त्साधकश्रेष्ठो गाणपत्यं लभेत सः
स्तवस्यास्य प्रसादेन योगी योगि
त्वमाप्नुयात् राज्यार्थिनो भवेद्राज्यं
भोगिनां भोग एव च साधूनां सा
धनं देव कौलिकानां कुलं भवेत्
यं यं कामयते मंत्री तं तमाप्नोति लीलया
बाणलिंगप्रसादेन सर्व-
माप्नोति सत्वरं किमन्यत्क
थयामीह सर्वं वेत्सि कुलेश्वर
महाभये समुत्पन्ने राजद्वारे-

4165

कुलेश्वर देशान्तरे भये प्राप्ते द
स्युचोरादि संकुले पठनात्स्तव
राजस्य न भयं लभते क्वचित् बा
णलिंगस्य महात्म्यं संक्षेपात्क
थितं मया तस्य श्रवणमात्रेण
नरो मोक्ष मवाप्नुयात् बाणलि
गसदाराध्य योगिनां योगसाधने।
कौलिकानां कुचारे पशूनांश
त्रुनिग्रहे वेदज्ञानां वेद पाठे
रोगिणां रोगनाशने यो यो
नाराधयेदेनं सर्वं तन्निष्फलं भ
वेत् इतिश्रीयोगसारे सर्वागमो
त्तम पार्वती शिवसंवादे बाण
लिंग स्तोत्रं समाप्तं ॥ अथरौ
द्रलिंग लक्षणं नदी समुद्रयो
द्वयोर्मध्यस्य विघर्षणात् । नदी
वेगात्समं स्निग्धं संजातं रौद्र।
मुच्यते इतिवीरमित्रोदयः ॥
सरित्प्रवाह संस्थानं बाणलिंग
समाकृति तदन्यदपि बोद्धव्यं।
रौद्रलिंगं स्रावावहं नदीसागरं।
र्मदाया बाणलिंग समाकृति त
दन्यदपि बोद्धव्यं लिंगं रौद्रंभ
विष्यति रौद्रलिंगं तथाख्यातं
बाणलिंग समाकृति श्वेतं रक्तं
तथा पीतं कृष्णं विप्रादि पूजितं
स्वभावात्कृष्णवर्णं वा सर्वजातिषु

सिद्धिदं नर्मदा संभवं रौद्रं बाण
लिंग वदीरितं इति रौद्रलिंग
लक्षणं इति लक्षण समुच्चयो-
पि अथ शिवनाभि लिंग लक्षणं
उत्तमं मध्यमधमं त्रिविधं लिंग
मीरितं चतुरंगुलमुत्सेधं रम्य-
वेदिक मुत्तमं उत्तमं लिंग मा
ख्यातं मुनिभिः शास्त्रकोविदैः
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धं मधमं
स्मृतं तस्य महिमा शिवनाभि-
मयं लिंगं प्रतिष्ठाप्य महर्षिभिः
श्रेष्ठंच सर्वलिङ्गेभ्य तस्मात्तत्पू-
विशेषतः इति शिवनाभि लिंग
लक्षणं इतिवीरमित्रोदयधृतशि-
वनारद संवादः । अथदेवलि
ङ्ग लक्षणं सिद्धान्तशेखरे ।
कर संपुट संस्पर्श स्थूल टंकेन्दु
भूषितं रेखाकोट संयुक्तं नि
म्नोन्नत समन्वितं दीर्घाकारंच य
लिंगं त्र्यस्र भागादिवर्जितं लिंगं
गोल मिति प्रोक्तं गोलकं प्रोच्य
तेऽधुना कुष्माण्डस्य फलाकारं मा
गधस्य फलोपमं । काक-
डिम्ब फलाकारं गोललिंग मिती
रितं इति गोललिंगलक्षणं ॥
अथार्षलिंगलक्षणं तत्रैव ।
नाना कोलफलाकारं ब्रह्मसूत्रविव

लेनं मूले स्थूलंच यल्लिंगं क
पित्थफलसन्निभं नालस्तवाफला
कारंमध्येस्थूलंच यद्भवेत् मध्ये॰
स्थूलं वरं लिंगमृषिवाणाश्चदास्य
ते इत्यार्षलिंगलक्षणं ॥ अथ॰
लिंगलक्षणं लिंगं हि द्विविधंप्र
कृत्रिमंकृत्रिमंच तल्लिंगं द्वि
विधं ज्ञेय मचलंच चलन्तथा प्र
मेकं त्रिविधं ज्ञेयं लिंगं तद्रु
भयात्मकं प्रासादे स्थापितं लिंग
मचलंतच्छिलादिजं । स्थापितं
मचलं गेहे स्थिरं लिंगं म।
योजितं पंचधा तस्थितं लिंग॰
स्वयंदैवगाणकं । आर्षंचमा
नसं लिंगं तेषां लक्षणमुच्यते
इति सिद्धान्तशेखरः आचार्यश्च
ज्ञेयं स्वैरं स्वयंभूतो महेश्वरः ।
यत्रैव स्वयं व्यक्तं लिंगमस्तुस्व॰
यंभु तत् धमनी यस्य संस्पर्शात्
दृति क्षिप्रमेवत इति षट्
कर्मदीपिका ॥ नानाछिद्रस्य
संयुक्तं नानावर्णसमन्वितं शृद॰
द्धमूलं यल्लिंगं कर्कशं भुविदृश्य
ते तल्लिंगंतु स्वयंभूत मपरं लक्ष॰
णमुच्यते स्वयंभुलिंगमित्युक्तंतच्चना
नाविधं मतं प्रोत्ताभमस्तकंलिं
गंवल्लवं तद्दारुतं पद्माभमस्तकं
ब्राह्मं छत्राभं शाक्तमुच्यते
शिरोयुग्मं तदाग्नेयं त्रिपदं याम्य
मीरितं खड्गाभं नैर्ऋतं लिंगंवरु
णं कलसाकृति वायव्यं ध्वजव
च्छिद्रं कौवेरंतु गदान्वितं ई
शानस्य त्रिशूलाभं लोकपालादि
निःसृतं स्वयंभुलिंग माख्यातं
सर्वशास्त्रविशारदैः इति स्वयंभु
लिंगलक्षणं इति सिद्धान्तशेखरः
दृष्ट्वा लिंगं महेशस्य स्वयंभूतस्य
पार्वति सर्वपापविनिर्मुक्तः ।
परे ब्रह्मणि लीयते एतेषांप्र
पूजा फलं तत्रैव विशेषाच्छृत
जं मुक्तये भक्तये चानुषंगतः
पार्थिवं भुक्तये शाक्तं मुक्तये चा
नुषंगतः एवं वै दारुजं ज्ञेयं॰
विद्धि लिंगं तथा पुनः स्थिरलक्ष्मी
प्रदं ज्ञेयं हैमं राज्यप्रदंच तत्
पुत्रवृद्धिकरं ताम्रं रांगं मायुः
प्रवर्द्धनं इतिमत्स्यसूक्तमहातंत्रे
पारदंचमहाभूत्यै सौभाग्यायच
मौक्तिकं चंद्रकान्तमरक्तजित्सा
हाटकंसर्वकामदं ॥
इतिपद्मपुराणं सर्वप्रदा भू
मि र्मणाय स्तद्वदेव हि अनघाः
स्मृता शुष्टो मणयो विद्युदुज्ज्वलाः
रागो प्रकाशकाः सर्वे विधाया

4167

घातकारिणः नानावर्णास्तुविज्ञे
यारसे गंधेश्च रूपतः वज्राद्याः
स्फाटिकाद्याश्च पुष्पराग्नादि विनि।
र्मितं सर्वकामप्रदं प्रेमो लिंगं॰
तात्कालिकं मतं । इति वीरमि
त्रोदय धृत कालोत्तरः ॥ गांध
र्वं सौभाग्यदं लिंगं पोष्यं भुक्ति
प्रदायकं नानापुष्पोद्भवं लिंगं ।
नानाकामप्रदायकं सैकतं गुण
दं लिंगं सौभाग्याय च लावणं ।
उच्चाटने तु पाषाणं मौलेशत्रुत्व
यावरं तात्कालिकं दर्भिदुश्च कृत्वा
भक्त्या समर्चयेत् इतिलक्षणसमु
च्चयः अथ गंधलिंगं । गरु
डपुराणे कस्तूरिकाया द्वौ भागौ
चत्वारश्चन्दनस्य च कुंकुमस्य त्रय
श्चैव शशिनाश्च चतुःसमं । एतद्वै
गंधलिंगं तु कृत्वा संपूज्य भक्तितः
शिवसायुज्यमाप्नोति वेशुधिः स
हितो नरः पुष्पमयलिंगं यथा।
कार्यं पुष्पमयं लिंगं ञयाणंथ सम
न्वितं नवावशं धरां भूल्कायां।
पृथ्वीशोऽधिपतिर्भवेत् ॥ अथ।
रजोमयलिंगं रजोभिर्निर्मितं।
लिंगं यः पूजयति भक्तितः स्त्रिया।
धरपदं प्राप्य पश्चाच्छिवसमो भ
वेत् अथ गोशकृल्लिंगं ।
श्रीकामो गोशकृल्लिंगं कृत्वा भ
क्त्या प्रपूजयेत् स्वच्छेन कापिले
नैव गोमयेन प्रकल्पयेत् स्वच्छेन
भूमिपतन रहितेन स्पर्शोद्धृतेने
तियावत् अथ यवगोधूमशा
लिजलिंगं कार्यं यष्टि क्रमं
लिंगं यवगोधूमशालिजं श्री
कामः पुष्टिकामश्च पुत्रकामस्त
दर्चयेत् अथसिताखंडमयं लिंगं सिताखंडमयं लिंगं
कार्यमारोग्यवर्द्धनं वश्येलव
णजं लिंगं तालत्रिकटुकान्वि
तं ॥ तालं हरि॰
तालं त्रिकटुकं शुंठी पिप्पलीम
रीच मिति प्रसिद्धं गव्यघृतमयं
लिंगं संपूज्य बुद्धिवर्द्धनं तथा
लवणेन च सौभाग्यं पार्थिवंसर्व
कामदं कामदं तिल पिष्टोत्थं
तुषोत्थं मारणे स्मृतं भस्मोत्थं
सर्वफलदं गुडोत्थं प्रीतिवर्द्धनं॰
गंधोत्थं गुणदं भूरि शार्करोत्थं
सुखप्रदं वंशांकुरोत्थं वंशकरं
गोमयं सर्वरोगदं केशास्थिम
स्थिवं लिंगं सर्वशत्रुविनाशनं
क्षोभने मारणे पिष्ट संभवं लिंग
मुत्तमं दारिद्रदं द्रुमोद्भूतं पिष्टसा
वस्त्रप्रदं दधिदुग्धोद्भवं लिं॰
गं कीर्त्ति लक्ष्मी सुखप्रदं याम

दे धात्मजे लिंगं फलोत्थंफल
दंभवेत् पुष्पोत्थ दिव्यभोगंभुर्म
तैं धात्रीफलोद्भवं नवनी।
तोद्भवं लिंगं कीर्ति सौभाग्य
वर्द्धनं दूर्वाकांडसमुद्भूतमपमृ
त्युनिवारणं कर्पूरसंभवं लिंगं
वलौवे भुक्तिमुक्तिदाः अयस्कांत
चतथान्तु तेयं सासान्यसिद्धिषु।
सर्वं नव मवं श्रेष्ठं तत्र वज्रमरि
च्छिदि यमलिंगं महाभूत्यै सौ
भाग्याय च मौक्तिकं पुष्टिमूलं।
महानीले ज्योतिः क्षीरसमुद्भवं।
सर्षाके कुलसन्तत्यै तैजसं सूर्य
कांतजे चन्द्रापीडंमस्य जितं स्फा
टिकंसर्वकामदं चंद्रापीतं चंद्र।
कांत मित्यर्थः मूलाख्यमणि
जंशत्रुत्तयार्थं मौक्तिकं तथा
यत्सन्निधानान्मूलरोगनाशाःस
मूलमणिः श्रीपुंडरीकं ज्ञेयं
रोगघ्नंमौक्तिकोद्भवं सुभक्तस्य
फलं तीर्थे वैडूर्यं शत्रुदर्पहृत
नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं
सर्वकामदं इतिसारसंग्रहेविशे
षः महाभुक्तिप्रदं हेमं राजतं
भूतिवर्द्धनं आरकूटं तथाकांस्य
म्प्राउ सामान्य मुक्तिदं आरकू
टंपित्तलं विप्र शीशायसं लिंग

शत्रूणां नाशने हितं कीर्त्तिनंकां
स्यजे लिंगं राजते पुष्टिवर्द्धनं पै
त्तले भुक्ति मुक्त्यर्थं निश्रजे
सर्वसिद्धिदं मिश्रज सप्तधातुनिर्मि
ते इतिकालोत्तरः पितृणांमुक्तये
लिंगं पूज्यं रजतसंभवं।
हैमजं सत्यलोकस्य प्राप्तये पूज
येत् पुमान्। पूजयेत्ताम्रजे
लिंगं पुष्टिकामो हिमानवः।
इति शिवनारद संवादः॥
ताम्रादिलिंग पूजनन्तु कलौतरप
वं ताम्रलिंगं कलौ नार्चेत् वैत्यस्य
शीशकस्यच रक्तचंदन लिंगंच
शंखकांस्यायसं तथा तुष्टिकाम
स्तु सततं लिंगं पित्तल संभवं
कीर्त्तिकामो यजेन्नित्यं लिंगं का
स्य समुद्भवं शत्रुमारण कामस्तु
लिंगं लोहमयं सदा सदा शी
शमयं लिंग मायुष्कामो ऽर्चयेत्
नरः इतिमत्स्यसूक्ते महातंत्रे।
स्थिरलक्ष्मीप्रदंहेमं राजतं चै
व राज्यदं प्रजावृद्धिकरं ताम्रं
ताम्रं मायुः प्रवर्द्धनं, विद्वेषकारणं
कांस्यं रीतिजं शत्रुनाशनं।
रोगघ्नं शैशकं लिंग मायसं
शत्रुनाशनं अष्टलोहमयं लिंगं
कुष्ठरोगत्त्वयावहं त्रिलोहसंभवं

4169

लिंगं विज्ञानं प्रति सिद्धिदं
इतिलक्षणसमुच्चयः॥ श्रीश
दं वज्रजं लिंगं शिलाजं सर्वसि
द्धिदं धातुजं धनदं साक्षाद्दारु
जंभोगसिद्धिदं इतिलिंगपुराणं
मा ॥ गंधपुष्पमयंलिंगं तथाद्रि
विनिर्मितं कस्तूरी संभवं लिंगं
धनाकांक्षी प्रपूजयेत् लिंगंगो
रोचनोत्थंच नृपकामस्तु पूजयेत्
कांतिकामस्तु सततं लिंगं कुंकु
मसंभवं श्वेतागुरु समुद्भूतं स
द्बुद्धि विवर्द्धनं धारणाशक्तिदं
लिंगं कृष्णागुरु समुद्भवं यत्तकर्द
मसंभूतं इतिकालोत्तरः॥
पार्थिवे शिव पूजायां सर्वसिद्धि
युतोभवेत् पाषाणे शिवपूजा
यांद्विगुणंफलमीरितं स्वर्णलिंगे
वपूजायांशत्रूणांनाशनं मतं।
सर्वसिद्धीश्वरो रौप्ये फलंत स्याद्व
तगुणं ताम्रे पुष्टिं विजानीयात्।
कांस्येच धनस त्वयः रांगायांच
तत्गुणं लाक्षायां रोगवान्भवेत्
स्फाटिके सर्वसिद्धिः स्यात्तथा
मरकते प्रिये लोह लिंगे रिपो
नाशंकामदं भस्म लिंगकं॥
वालुकायांकाम्यसिद्धि र्गोमयेरि
पुहिंसनं सर्वलिंगस्यमाहात्म्यं।

धर्मकामार्थ मोक्षदं इति मात्
काभेदतंत्रे १२ पटलः। ब्रह्मा
संपूजयेन्नित्यं लिंगं शैलमयं शुभं
तस्यसंपूजनाद्येन प्राप्तं ब्रह्मत्व
मुत्तमं इंद्रनीलमयं लिंगं।
विष्णुःसमर्चयेत्सदा विष्णुत्वं प्रा
प्तवान्येन सोऽभूद्वै कपाल
कः स्फाटिकं निर्मलं लिंगं वरु
णोऽभ्यर्चयेत्सदा तेन तद्वरुणत्व
रि प्राप्तं तेजो बलान्वितं इति
षट्कर्मदीपिका धृत शिवधर्मः
पूजयेत्पार्थिवे लिंगे पाषाणलि
ङ्गके ऽथवा स्वर्णलिंगे ऽथ वा
देवि रौप्ये ताम्रे च कांस्यके॥
पारदे वाथ रांगायां स्फाटिके म
रकते ऽपिवा कार्यभेदे लौहलिंगे
भस्मनिर्मितलिंगके॥ वा
लुकानिर्मिते लिंगे गोमये वाथ
पूजयेत् संस्कारेण विनादेवि पू
षाणादौ नपूजयेत् इतिमातृकाभे
दतंत्रे ७ पटलः। इति शिवलिं
गनिर्माणद्रव्याणि॥ अथ
शिवलिंग संस्कारः संस्कारंच प्रव
क्षामि विशेष इह यद्भवेत् रौ
प्यंच स्वर्णलिंगंच स्वर्णपात्रे निधा
य च तस्मादुत्तोल्य तल्लिंगंदुग्धम
ध्येदिनत्रयं त्र्यम्बकेन स्नापयित्वाकाल

रुद्रं प्रपूजयेत् षोड़शेनोपचारे
ण वेद्यांत पार्वती यजेत् ।
तस्माद्दोल्प तल्लिंगं गंगातोये
दिनत्रयं ततो वेदोक्त विधिना
संस्कार माचरेत् सुधीः पूर्वोक्त
वचनैः फलविशेषकामनया नाना
विधलिंगपूजोक्ता साच पूजा ॥
लिंगं सुलक्षणं कुर्याल्लक्षणैर्लिंग
मलक्षणं हैर्ध्यहीने भवेद्व्याधि
रधिके शत्रु वर्द्धनं मानहीने वि
नाशः स्यादधिके च धिग्भुतयः ।
विस्तारे चाधिके हीने राष्ट्रनाशो
भवेद्ध्रुवं पीठहीने तु दारिद्र्यंशि
रोहीने कुलक्षयः ब्रह्मसूत्र वि
हीने च राज्ञो राष्ट्रंच नश्यति ।
तस्मात्सर्व प्रयत्नेन लिंगं कुर्यात्
सुलक्षणं इत्यादिना सुलक्षण
लिंगस्यैव फलदातृत्व मुक्तं ।
इति मातृकाभेदतन्त्रे ७ पटलः
देव्युवाच इंद्रिये रहितोदेवः
सूक्ष्मरूपः सदाशिवः । आकारो
नास्ति देवस्य किं तस्य पूजनेफ
लं शिवउवाच प्रेते पूजाम
हेशानि कदाचिन्नास्ति पार्वति ॥
रुद्रस्य परमेशानि रौद्री शक्तिरि
तीरिता रौद्री तु परमेशानि प्राद्या
कुंडलिनी भवेत् । वर्त्तते

परमेशानि ब्रह्म विष्णु शिवात्मि
कामाईविफलयाकारैः शिवं वेत्ति
सदा प्रिया शक्तिं विना महेशानि
प्रेतत्वं तस्य निश्चितं शक्तिसंयो
गमात्रेणाकर्मकर्त्ता सदाशिवः
अत एव महेशानि पूजयेच्छिवः
लिंगकं इति सशक्तिक शिवलिंग
पूजन फलं इति लिंगार्चनतन्त्रे
१ पटलः देव्युवाच लिंगप्र
माणं देवेश कथयस्व मयिप्रभो
पार्थिवे च शिलादौ च विशेषो य
थेयो भवेत् श्रीशिवउवाच म
त्तिकातोलकं ग्राह्यं मथवा तोकद्व
यं एतदन्यन्नकुर्वीतकदाचिदपि
पार्वति इति मातृकाभेद तन्त्रे ७
पटलः अपिच मृत्तिकातोल
कंग्राह्यं मथवा तोलक द्वयं
त्रिसूत्रस्य प्रमाणेन खटनंकारये
द्बुधः स्वांगुष्ठपर्वमाणंतु कृत्वा
लिंगंप्रसूजयेत् मृदादिलिंगादौ
नेप्रमाणं परिकीर्तितं फलमुत्तम
वाप्नोति अन्यथा चेत्तदन्यथा इ
ति षट्कर्मदीपिका धृत विश्वसार
तन्त्रे लिंङ्ग वेधो तथा पीठे
समसूत्रनिपातनात् समैवैव वि
ज्ञानीयात्रिसूत्रीकरणं क्विदं इति
कालोत्तरः मृत्तिकाभेदेन ।

ब्राह्मणादीनां पूजाफलस्वप्रशस्त
त्वं यथा चतुर्धा पार्थिवं लिंगंव
र्णभेदेन पार्वति शुक्लं रक्तंत
थापीतं कृष्णंच परमेश्वरि शुक्लं
तुब्राह्मणे शस्तं क्षत्रिये रक्तमी
रितं पीतन्तु वैश्यजातेोस्यात्कृ
ष्णंशूद्रे प्रकीर्तितं तथा शुक्लं।
हि पार्थिवं लिंगं निर्माय यस्तुपू
जयेत् सएव परमेशानि त्रिवर्ग।
फलभाग्भवेत् क्षत्रियस्तु वरारोहे
रक्तंनिर्माय पार्थिवं पूजयेत्सततं।
यस्तु त्रिवर्ग फलमाप्नुयात् हरितं।
पार्थिवं देवि निर्माय यस्तुपूजयेत्
सच वैश्यो महेशानि त्रिवर्गफल
भाग्भवेत् कृष्णं हि पार्थिवं लिंगं
निर्माय यस्तु पूजयेत् सशूद्रः प
रमेशानि त्रिवर्ग फलभाग्भवेत् इ
ति लिंगार्चनतन्त्रे ३ पटलः शिला
दौच महेशानि स्थूलंच फलदायकं
अंगुष्ठमानं देवेशि यद्वा हेमाद्रि
मानकं क्रमेण देवदेवेशिफलं
बहुविधं लभे स्थूलात्स्थूलतरं
लिंगं रुद्रात्ते परमेश्वरि पूज
नाद्यस्ट्देवि फलं बहुविधंस्मृतं।
स्थूलात्स्थूल मिति पार्थिव लिंगे।
तत्परं मृत्तिका तोलक मिति।
विशेषवचनात् शिला स्फाटिक

मरकतादीनां पंचसूत्रीकरणमुक्तं
यथा शिवलिंगस्य यन्मानं तन्मानं
नंतदथोपि तथा भवेत् इति लि
ङ्गत सूत्रयोः योन्यग्रमपि यन्मा
ङ्गपुराणं लिंगस्य यादृग्विस्तारः
परिणाहोऽपि तादृशः लिंगस्य
द्विगुणावेदी योनिस्तदर्द्धसंमिता।
कुर्वीतांगुष्ठतो ह्रस्वं नकदाचिदपि
क्वचित् रत्नादि शिवनिर्माणे मान
मिच्छावशाद्भवेत् इति तंत्रान्तरं
लिङ्गस्योत्पत्तिर्यथा । आकाशंलिंग
मित्याहुः पृथिवी तस्य पीठिका
आलयः सर्वदेवानां लयना
लिंग मुच्यते इति स्कंधपुराणं
॥ लिंग महिमा यथा शिवउ
वाच नत्वप्रसर्विलोऽर्चायां ।
पुष्पधूप निवेदनैः लिंगेऽर्चिते
तथात्यर्थं परं तुष्यामि पार्वति
एव देविपुरा कृते जीनोऽहं
सर्व देवतैः लिंगत्वा लिंग मि
सर्के सदेवासुर किन्नरैः मय
च्छामि दिवं देवि यो मल्लिंगार्च
नेरतः स्मृत्वा सर्वाणि पापानि
निर्गदो दग्धकल्मषः मत्मना मत्सम
स्फारो मासेव प्रतिपद्यते इतिवीर
मित्रोदवधृत स्कन्दपुराणं ॥
द्रव्यविशेषेण पूजादि फल यथा

चरुस्पतनजैले लिंगं स्नापित्वा मम·
मानवाः लक्षाणांवाश्वमेधानांफ·
लमाप्नोति सत्तमः सुगंधिचंदनैर·
स्तैर्लिंग मालिप्य भक्तितः आ
लिप्यते सुरस्त्रीभिःसुगंधैः येद्रव
ईमैः इतितत्रैव लिंगपूजा·
करणादोषतत्पूजाफलंच यथा।
विना लिंगार्चनं यस्य कालोगच्छ·
तिनित्यशः महा हानि र्भवेत्तस्यदु
र्गतस्यदुरात्मनः एकतःसर्वदाना·
निव्रतानि विविधानि च तीर्थानि
नियमा यज्ञा लिंगाराधन मेकतः
तल्लिंगाराधनादन्यत्परा वेदे चतु·
र्ष्वपि विद्यते सर्वशास्त्राणां मेष·
एव सुनिश्चितः भुक्तिमुक्तिप्रदं
लिंगं विविधापन्निवारणं पूजयि
त्वा नरो नित्यं शिवसायुज्यमाप्नु
यात् सर्व मप्यत्परित्यज्य क्रिया·
जाल मशेषतः भक्त्या परमया
विद्वान्लिंगं एकं प्रपूजयेत् ॥
इतिस्कन्दपुराणे अश्वमेध स
हस्राणि वाजपेय शतानिच म
हेशार्चन पुण्यस्य कलां नार्हन्ति
षोडशीं इतिमत्स्यसूक्ते ९ पटलः
बहुनात्रकिं मुक्तेन चराचर मिदं ज
गत् शिवलिंगं समभ्यर्च्य स्थितम
त्रनसंशयः इति लिंगपुराणे ।

शिवस्य एतनोदेवि चतुर्वर्गाधि
पोभवेत् अष्टैश्वर्ययुतो मर्त्यः शं
भु नामयास पूजना स्वयंनाराय
णः प्रोक्तो यदि शंभुं मपूजयेत्
स्वर्गेमर्त्येच पाताले ये देवाः संस्थि
ताःसदा तेषांपूजा भवेद्देविशंभु
नाथस्य पूजनात् इति लिंग
पुराणे असारे खलु संसारेस्मि
रमेतव्रतमयं कामदा वासः
सतां संगो गेऽक्षेमः शंभुपूजनं ॥
इतिषट्कर्मदीपिकाधृत कालोत्तरे
नारदवाक्यं अग्निहोत्रश्चवेदाश्च
यज्ञाश्च बहु दक्षिणाः
शिवलिंगार्चनस्यैते कोटंशे ·पो
नापि तेसमाः छित्वा भित्वा च
भूतानि हत्वा सर्व मिदं जगत्
यजेद्देवं विरूपाक्षं नस पापेन
लिप्यते अनेक जन्मसाहस्रे भ्रा·
म्यमानश्च योनिषु कः समाप्नोति
वै मुक्तिं विनालिंगार्चनं नरः
इतिस्कंदपुराणे । ब्राह्मणः
क्षत्रियो वैश्यः शूद्रो वाप्यनुलोम
जः पूजयेत्सततं लिंगं तन्मन्त्रे
णासादरं तन्मन्त्रेणेति यथायो
ग्य वैदिक तान्त्रिक नाम मंत्रेणे
त्यर्थः इति वीरमित्रोदयधृत स्क
न्दपुराणं मूले ब्रह्मा तथा

मध्ये विष्णु स्त्रिभुवनेश्वरः रुद्रो
परि महादेवः प्रणवाख्यः सदाशि
वः लिंगवेदी महादेवी लिंगं·
साक्षान्महेश्वरः तयोःसम्पूजना।
न्नित्यं देवी देवश्च पूजितौ इति
लिंगपुराणे ॥ अथ पारद
शिव लिंगमाहात्म्यं । ज्योतिर्मयं
महालिंगं कैलाश नगरे प्रिये ।
तस्यैव षोडशांशेकः काश्यां·
विश्वेश्वरः स्थितः पूर्णलिंगमहे
शानि शिववीजेन चान्यथा शि
लामध्ये यथा वक्षे लक्ष्मीनारायणः
परं पारदस्य शतांशैको लक्ष्मी।
नारायणेनहि पकारे विष्णुरूपे
च आकारे कालिका स्वयं रेफं·
शिवं हकारंच ब्रह्मरूपं नचान्यथा
परदं परमेशानि ब्रह्म विष्णुशि।
वात्मकं यो यजेत्पारदं लिंगंस
एव शंभु रव्ययः आजन्ममध्ये।
यो देवि एकदा यदि पूजयेत्
सएव धन्यो देवेशि सज्ञानीसच
तत्त्ववित् सचश्चेवता सधनी स·
राजा भुवि पूज्यते अणिमादि
विभूतीना मीश्वरः साधकोत्तमः
अथपारदशिवलिंगनिर्माणं ।
विधिः पारद शिवनिर्माणे ना
नाविघ्नं यतः प्रिये अतएव महे

शानि शांति स्वस्त्ययनं चरेत् पा
रदं शिववीजं हि ताडनं छिन
कारयेत् ताडनाच्छिन्ननाशः सा
ताड़नाच्छिन्नहीनता ताडनाद्रोगयु
क्तत्वंताडनान्मरणंभवेत् । इतिमा
तृकाभेद तंत्रे ८ पटलः
अथशिवलिङ्गोत्पत्तिः ब्रह्मोवाच
पुरात्वां चंचलं ज्ञात्वा तदग्रे न
प्रकाशितं इदानीं योगिनं ज्ञा
त्वा कथयामिनसंशयः अतिगुह्य
मतिगुह्यमतिगुह्यंनसंशयः गो·
पितव्यं गोपितव्यं गोपितव्यंत्वया
पिच शंभुना गोपितं तत्रे।
तेजान्तरे प्रकाशितं शृणु तत्क
थयाम्यद्य सावधानावधार्य स
र्गोहो विविधाः सर्गा मया सृष्टा हि
नारद देवदानव दैत्याश्च गंधर्व·
यक्षराक्षसाः सर्वेस्त्रीवशगाः स्त्री
णा मैथुनाज्जायते प्रजा केव·
ले हि शिवः शंभु र्दारग्रहण कर्मणि
कदापि न मनश्चक्रे दृष्ट्वा चिंताप
रास्तराः मामेव शरणं जग्मुः से
न्द्रा देवासुरादयः प्रणिपत्यस्तु
तिं कृत्वा उपतस्थुःसमाहिताः
प्रोचुः प्राञ्जलयः सर्वे भयाक्रान्त
मानसाः देवाद्या ऊचुः ब्रह्मा
हिता वयं सर्वे भवानपिजनार्दनः

केवलं हि महादेवो देवदेवजग
त्पतिः विवाहे नमनश्चक्रेक
या वा मोह्यते शिवः उपायंवि
न्तय विभो सद्यरः कथमीश्वरः।
येन स्याज्जगतो नाथ स्तत्कुरुष्व
दयानिधे इति श्रुत्वा वचस्तेषां
ततो ब्रह्मा प्रजापतिः सह ते
र्गरुडारूढं जगाम कमलासनः
उवाच तेजगन्नाथं विष्णु कमल
लोचनं ब्रह्मोवाच सृष्टा मयास
त्वमेष मानुषा मैथुनोद्भवाः सर्वे॰
स्त्वया विनाशंभुंयत्कर्तव्यं वद॰
स्वमे श्रीभगवानुवाच पभिःसह
महावाहो गच्छाम स्व महेशिवे।
कर्त्तव्यं सूचितं तेन श्रुत्वातेयं॰
थाविधि किंतु तयोग्य नारीन्ना
विवाहार्थं प्रकल्पय ब्रह्मोवाच द
त्तगच्छामहे सर्वे अनुज्ञाप्य तेदेव
आद्या शक्ति महाभागा प्रसादय
तु वै लघु कन्या भूत्वा महाशंभुं
मोहयिष्यति शंकरं एव मुक्त्वा
तेः सार्द्धं जगमतु विधि केशवौ॰
यत्र दक्षो महातेजाः साचतेकार्य
मात्मनः उवाच दक्षे तत्कुर्वते॰
यस्तत्र प्रजापतिः ब्रह्मा विष्णु
श्च सर्वे ते तपसा तोषयेच्छिवां
आविर्बभूव सा देवी कालिकाज
गदी ।
श्वरी शाहमंवः किमर्थमिस्तस
मुत्कंवाः सुराःसुराः देव्युवाच श्री
ब्रह्मरूपं यथा कामं भवतो प्रार्थ
नेफलं अचिरात्तत्प्रदास्यामि सत्यं
सत्यं नसंशयः देवाद्याऊचुः भू
त्वा त दक्षकन्यात्वं शंकरं
परिमोहय अस्माकं वांछित
मेवतत्कुरु सिद्धि महाशिवे ।
एतच्छ्रुत्वा वच स्तेषां निरीश
कमलासनं उवाच विस्मयाविश
कालिका जगदीश्वरी देव्युवाच
शंभुरघातनो वालः किं मां संतो
षयिष्यति मम योग्य पुमांस॰
न्तं अन्यैव परिकल्पय ब्रह्मोवाच
शंभुःसर्वगुरु देवो ह्यस्माकं पर॰
मेश्वरः महासत्वो महातेजाः संते
तोषं करिष्यति शंभुतुल्यःउमा
नास्तिकदाचिदपि कुत्रचित
इत्युक्ता प्रसन्ना देवी वाढं मि
त्याहमेश्वरी दक्षाय दर्शनं दत्वाउ
वाचउच्यतां वरः दक्षोपि दृष्टा तां
देवीं खड्ग कर्परधरा परां खर्वां
लम्बोदरीं व्याघ्रचर्मावृतकटिस्थ
लां नीलोत्पल कपालाख्य करद्वयां
वरप्रदां कृतकृत्य मिवात्मनंमेने
दक्षःप्रजापतिः दक्षउवाच ।
यदि मे वरदासित्व देवानामपि

वांछितं मदीय तनया भूत्वा।
शंकरकिंत मोहय तथेत्युक्त्वाज
गद्धात्री अन्तर्द्धानं गता तदा
देवताश्चततो नत्वा यत्र तेपतयो
हरः सतीका परमात्मान उपत
स्थुर्जगत्पतिं प्रणेमु स्तुष्टुभ॰
स्ता शाङ्गगद्रभापिणः देवाद्या॰
ऊचुः भगवन्देवदेवेशलोकनाथ॰
महाप्राय वयंसर्वेन सतीकाः
स्सर्वपरमेश्वर अतस्त्वंऊरू
वोद्वाहं सतीरत्ना यथाभवेत द
त्तगेहेमहाकाली मायेतिपरिकी
र्तिता जाता ते प्रीतये शंभो सातेयो
ग्यानसंशयः ईश्वरउवाच भवतां
प्रीतये सम्यक् करिष्ये नात्र।
संशयः उद्योगः क्रियतांत्तिमं
विवाहाय ममैव हि इत्युक्तास्त
सुराःसर्वे ईश्वरेणमहात्मना कृ।
तकृत्यागताः सर्वे भवनं सर्वसंद
रं दक्षाय कथयामासुः शंकरे।
णोदितं वचः ततो विवाहं निर्वे
र्त्यं कृतकृत्या यथा गताः गताःस
र्वेमहेशोपि सत्या सह तदागेहे
जगाम रेमे सत्या च चिरं निर्भर
मानसः अथ कालेकदाचित्
सत्यासह महेश्वरः रेमेन-शोके
तंसोऽऽ सतीश्रांता भवनतस उवाच
दीनया वाचा देवदेवं जगद्गुरुं
भगवन्नहि शक्नोमि तवभारंसहः
सहं तमस्त्वमोमहादेव कृपाऊ
रु जगत्पते निशम्यवचनं त
स्या भगवान्वृषभध्वजः निर्भरं
रमणं चक्रे गाढं निर्दय मानसः
कृत्वा सहस्रं रमणं सती वसक
मैथुना उत्पातायमनश्चक्रे उ
भयो स्तेन उत्तमं पपात धर
णीपृष्ठे तेव्यापि मतिर्तज्जगत् पा
ताले भूतले स्वर्गे शिवलिंगास्त
दाभवन् तेन भूता भविष्याश्चशि
वलिंगाः सयोनयः यत्र लिंगंतत्र
योनि यंत्र योनि स्ततः शिवः उ
भयो श्चैव तेजोभिः शिवलिंग
वजायत इतिशिवलिंगोत्पत्ति
कथन मिति नारदपंचरात्रान्तर्गत
तृतीयरात्रे प्रथमाध्याये नारदब्र
ह्मसंवादः शिवलिंगस्यायांसर्वे
षामधिकारो यथा शाक्तो वा
वैष्णवो वापि सौरो वागाणपो
ऽथवा शिवार्चन विहीनस्यकुतः
सिद्धि र्भवेत्प्रिये अनाराध्यच॰
मां देवि योऽर्चयेद्देवतान्तरं ।
नरहणाधि [illegible] देवि शापं द
त्त्वानेपुरं पर्वताग्रसमं देवि
सिंहासनादि क्रमेणादि फलानिवक्ष

धान्येव पुष्पाण्येव यथाविधि
समेकं सदृशं चान्नं नानाविधं
महेश्वरि सूपादिकं महेशानि
यदिस्यात्ताम्रवोपमं यद्दत्तपुष्प
नैवेद्यं सर्व्वं विष्ठासमं भवेत् ।
शिवार्च्चन विहीनो यः पूजयेद्देव
तान्तरं विशेषतः कलियुगेस
नरःपापभाग्भवेत् इतिउत्पत्ति
तन्त्रे ६४ पटलः सर्व्वपूजा
स देवेशि लिंगपूजा परंपदं ।
लिंगपूजां विना देवि अन्यपूजां
करोतियः विफला तस्य पूजा
स्यादन्ते नरकमाप्नुयात् तस्मा
ल्लिंगं महेशानि प्रथमं परिपूज
येत् यज्ञाग्ने लिंगपूजायां रहि
तेसन्तं प्रिये तज्ञाग्नं पतितं
मन्ये विष्ठाभूमिसमं स्मृतं ब्रह्म
विट् तत्रियो देवि यदि लिंगं
नपूजयेत् तत्क्षणात्परमेशानि
चण्डालता मियः सूक्ष्मपर
मेशानि सदा शूकरवद्भवेत् शि
वार्च्चनं देवेशि यस्मिन् गेहे ।
विवर्ज्जितं विष्ठागारसमं देवित
द्गृहं विद्धि पार्वति अन्नंविष्ठाप
यो मूत्रं तस्मिन्वेश्मनि पार्वति
शाक्तो वा वैष्णवो वापि शैवो वा
परमेश्वरि । आदौ लिंगं प्रपूज्या
थ्य बिल्वपत्रैर्वरानने पश्चात्सं
महेशा लिंगं प्रार्घ्यं प्रपूजयेत्
अन्यथा पूजवत्सर्व्वं शिवपूजां
विनाप्रिये इति लिंगार्च्चनतन्त्रे
१ पटलः

लिंगकः पुं कपित्थवृक्षः इति
शब्दचंद्रिका ॥

लिंगवर्द्धः पुं कपित्थवृक्षः इति
शब्दचंद्रिका शिश्नवृद्धिकरणं
तस्यौषधं यथा कटुतैलं भ
ल्लातकं वृहतीफलं दाडिमं व
ल्कलैः साधितं लिप्तं लिंगं तेन
विवर्द्धते अपिच कुष्ठ माषमरी
चानि तगरं मधु पिप्पली ।
अपामार्गाश्वगंधाच वृहती सित
सर्षपाः यथा तिलं सैंधवंच
पाणिकोद्वर्त्तनं शुभं लिंग वाङ्
स्तनानांच कर्णयो र्वृद्धिकृद्भवेत्
इति गारुडे १८० अध्यायः

लिंगवर्द्धिनी स्त्री अपामार्गः इति
शब्दचंद्रिका ॥

लिंगवृत्तिः पुं जीविकार्थजटादि
चिह्नधारी तत्पर्यायः धर्म
ध्वजी २ इत्यमरः जीविकादि
निमित्तन्तु योविभर्त्ति जटादि
कं धर्मध्वजी लिंगवृत्तिर्द्वयं तत्र
निगद्यते इति शब्दरत्नावली ।

लिंगालिका स्त्री क्षुद्रमूषिकः त
त्पर्यायः दीना २ इतिहारावली

लिंगिनी स्त्री लताविशेषः पंचगु
रिया इति हिन्दीभाषा । त
त्पर्यायः वज्रपत्री २ ईश्वरी ३ शि
ववल्लिका ४ स्वयंभूः ५ लिंगसंभूता
६ लैंगी ७ चित्रफला ८ चांडाली ९
लिंगजा १० देवी ११ चंडा १२ आ
पस्तम्भिनी १३ शिवजा १४ शिववल्ली
१५ अस्यागुणाः कटुत्वं उष्णत्वं ।
दुर्गंधत्वं रसायनत्वं सर्व्वसिद्धि ।
करत्वं दिव्यत्वं वश्यत्वं रसनियाम
कत्वंच इति राजनिर्घण्टः ॥

लिंगीन् पं हस्ती इतिजटाधरः
धर्मध्वजी यथा अलिंगी लिंगि
वेशेन यो लिंगमुपजीवति ।
सलिंगिनां हरेदेन स्तिर्य्यग्योनौच
गच्छति इति कौर्म्मे उपरि
भागे १५ अध्यायः ।

लिप त्रि उ प प न लेपे इति
कविकल्पद्रुमः त्रि लिम्पोऽस्ति
ङे लेम्पा श प न लिंपति लि
म्पेत चन्दनेन गात्रं स्त्रावी इति
दुर्गादासः ।

लिपः पुं लेपनकर्त्ता इति लि
पधातो कर्त्तरि क प्रत्ययेन नि
ष्पन्नं ।

लिपिः स्त्री लिखितवर्णः त
त्पर्यायः लिखितं २ अक्षरसं
स्थानं ३ लिवि ४ इत्यमरः लि
खनं ५ लेखनं ६ अक्षरविन्या
सः ७ लिनी ८ लिवी ९ इतित
ट्टीका अक्षरचना १० इतिजटाधरः
लिपिका ११ इतिशब्दरत्नावली
लिखितपुस्तकादि इति[illegible]
केचिदिति भरतः ॥

लिपिकरः पुं लेखकः इत्यम
रटीका ॥

लिपिका स्त्री लिपि इतिशब्द
रत्नावली ॥

लिपिकारः पुं लेखकः इत्यम
रः ॥

लिपी स्त्री लिपिः इति शब्द
रत्नावली ॥

लिप्तं त्रि भक्षितं कृतलेपनं ।
तत्पर्यायः दिग्धं २ इत्यमरः ।
विलिप्तितं ३ इति शब्दरत्ना
वली चर्च्चितं ४ इति जटा
धरः मिलितं इति सिद्धान्त
कौमुद्याम्उणादिवृत्तिः विषलिप्त
इतिमेदिनी ॥

लिप्तकः त्रि विषाक्तवाणं इत्य
मरः

लिप्तिका त्रि दंडः यथा वैद्य

स्वचतुर्थांशः श्रवणादौ लिपि
काचतष्कं अभिजित् इतिसङ्क्ष
मुक्तावली ॥
लिप्सा स्त्री इच्छा इत्यमरः।
लिप्सुः त्रि लब्धुमिच्छुः तत्पर्यायः
गृध्नुः २ गर्द्धनः ३ लुब्धक ४ अभिलाष
ुकः ५ अभिलाषुकः ६ लोलुपः
७ लोलुभः ८ इतिहेमचन्द्रः ।
लिपः पुं लेपनकर्त्ता इति
लिंपधातोः कर्त्तरि शप्रत्यय नि
ष्पन्नं इतिमुग्धबोधव्याकरणं।
लिम्पटः पुं शिङ्गः इति हारा
वली ॥
लिम्पाकं क्ली निम्बूकविशेषः
पातिलेबु इतिभाषा तस्यगुणाः
सुरभित्वं स्वादुत्वं नात्यम्लत्वं।
भक्तरोचनत्वं वात श्लेष्महरत्वं।
गुरुत्वं छर्दिघ्नत्वं नाभिपित्त।
कृत्वंच इतिराजवल्लभः ॥
लिंपाकः पुं जम्बीरः खरः।
इतिशब्दरत्नावली ॥
लिविः स्त्री लिपिः इत्यमरः।
लिविकरः पुंलिपिकरः लिपिं।
करोति इत्यर्थे स्कृञ इत्यनेन
कर्त्तरिट प्रत्ययेन निष्पन्नः ।
लिविंकरः पुं लिपिकारः इत्य
मरटीकायां भानुदीक्षितः ॥

लिवी स्त्री लिपिः इतिशब्दर
त्नावली ॥
लिश ऊ. प गे तोल्पे इतिक
विकल्पद्रुमः तोल्पमल्पीभावः ऊ.
पलिश्पेत धर्मः कलौ ओ लेशः।
इतिदुर्गादासः ॥
लिश श गे गत्यां इतिकवि
कल्पद्रुमः लिशति ओ अलिक्षतले
शा इतिदुर्गादासः ॥
लिषः पुं नर्त्तकः लषधातोः ।
कर्त्तरि क्वद् प्रत्ययेन निपातनात्
सिद्धः उपधाया इत्वमपि इतिसि
द्धान्तकौमुद्यामुणादिवृत्तिः ॥
लिह ल न उ ग्लोद इतिकवि
कल्पद्रुमः ल न लेढि मुष्णाति
षड् पदः लीढे ओ अलिक्षत
इतिदुर्गादासः।
लिक्षा स्त्री यूकाण्डं इत्यमरः॥
लिकि इति भाषा इत्यमरभरतौ
तत्पर्यायः । लिक्षा २
लीक्षा ३ लीक्षा ४ लिक्षिका ५
इति शब्दरत्नावली परिमाणवि
शेषः यथा जलान्तर गते ता
नो यथाणुईक्षपते रजः तै अ
ष्टभिर्भवेल्लिक्षा लिक्षा षड्भिश्च
सर्षपः इतिशब्दचंद्रिका । स
यकारकवर्गद्वितीयवर्तीतापिपाठः

4179

ली ऊ. य गे लिषि इतिक
विकल्पद्रुमः ऊ. य लीयते चंद्रःस्व
र्गे ओलीनः इति दुर्गादासः ॥
ली गि श्लिषि इति कविकल्पद्रु
मः गि लिनाति बाला लावण्यं
श्राप्नोतीत्यर्थः कर्माविवक्षायांत
लिनाति जलधौ नदी लीनः ली
निः अयं अन्तस्थत्रतीयादिः इति
दुर्गादासः ॥
ली कि द्रावणे इतिकविकल्पद्रु
मः द्रावणं द्रवीकरणं किलापय।
तिलयति मिथ्या यन्त्राविति लापय
तिलोहमग्नौ कर्मकारः स्नेह इवेत
ताल्या लज्जनाविति जनो हृतम
ग्नौलीनयत्यपि इतिदुर्गादासः।
लीक्षा स्त्री लिक्षा इतिशब्दरत्ना
वली ॥
लीटः त्रि आस्वादितः इतिलिह
धातोः कर्मणि क्त प्रत्ययेन निष्पन्नं
लीनः त्रि लयप्राप्तः श्लिष्टः ।
लीधातोः क्त प्रत्ययेन निष्पन्नः
इतिव्याकरणं । अपिच दि
वाकराद्रक्षति यो गुहासुलीनंदि
वाभीत मिवान्धकारं । तुद्रे।
पि नूनंशरणं प्रपन्ने ममत्वमुच्चैः
शिरसा सतीव इति कुमार
संभवः ॥

लीला स्त्री केलिः विलासः ॥
शृंगारभावचेष्टा इति मेदिनी ॥
लीला इति विख्यः अलब्धप्रिय
समागमया स्वचित्तविनोदनार्थमपि
यस्तया वेश गति दृष्टि हसि
त भणितै रवहृतिः क्रियते सा
लीला तथा च अप्राप्त वल्लभ
समागम नायिकायाः सख्याःपुरा
ःऽत्रनिजचित्तविनोदवुद्ध्या आलाप
वेश गति हास्य विलोकनाद्यैः
प्राणेश्वरानुकृति मा कथयंति
लीलामिति प्रियानुकरणं लीला
यथा तेनोदिते वदति याति त
थातथासावित्यादीन्यन्योपि ली
ऊ. य गे श्लिषि नाम्नीति लक्ष्मी
ला इत्यमरटीकायां भरतः
सा प्रकटाप्रकटभेदेन द्विविधा
यथा प्रकटाप्रकटा चेति लीला
सेयं द्विधोच्यते इति पद्मपुरा
णं तथा हि सदानन्दैः प्र
काशैः स्व लीलाभिस्सदीव्यति
तत्रैकेन प्रकाशेन कदाचिज्जग
दन्तरे सहैव स्वपरीवारै जन्मा
दि कुरुते हरिः कृष्णभावानु
सारेण लीलाख्या शक्तिरेव
सा तेषां परिकराणां तंतंभावं
विभावयेत् प्रपंच गोचरत्वेन

सा लीला प्रकटा स्मृता ग्रस्या
स्त्वप्रकटा भाति भाहृष्प स्वद
गोचराः तत्र प्रकट लीलायामेव
स्यातां गमागमौ गोकुले मथु
रायांच द्वारकायांच शार्ङ्गिणः या
स्तत्र तत्राप्रकटा स्तत्र तत्रैव स
ततः इतिश्रीभागवतामृते ।
लीलावती स्त्री केलियुक्ता वि
लासवती शृङ्गारभावचेष्टान्विता
विलाविशिष्टा इतिलीलाशब्दा
र्थदर्शनात् भास्कराचार्य्यस्यप
त्नी तत्कृतांकशास्त्रः यथा गो
दावरी तीर निवासिनो महाभाष्ट्र
देशोद्भवस्यश्रीभास्कराचार्यस्य
ग्रन्थकर्त्तुः सुप्रिया लीलावतीवि
वदवितिसुहृदयस्य तांपदेली ।
लावत्या लीलावती मिव इतिली
लावतीग्रन्थस्यमंगलाचरणश्लोक
स्यटीकायां भवेशः वेशपावि
शेषः यथा प्रभिन्नूपेण संपन्ना
न् चहूयित्वा विनाभ्रति धर्म
कार्यमितिज्ञात्वानरक्षाति क
र्यचन योऽसौ सवर्णकामश्चद
रिद्रोऽप्ययसत्ववान् नमूल्यमादा
देशपालः सभार्य्य सहितं संयुतः
समद्वीपयतिर्जातःसूर्यापतस्म
प्रभः इतिमत्स्यपुराणे लीला
वतीवेशपाया लवणावलदानेदेम
तरु चटकस्तत्याविपफलदर्शना
त् इतितिष्यादितत्वे स्याप
ग्रन्थविशेषः तस्यद्वितीय श्लोको
यथा दुर्गानाकुलपुञ्जलो गुणास
णाःकर्माधिकं ग्राह्यते जाति विम
तिसागता नव पुनः श्लाघ्या विशे
षस्थितिः सम्बन्धः सहजो गुणा
दिभिरयं यत्रास्त सत्रीतये सान्वी
सानय वेशमकर्म कुशला श्रीन्या
यलीलावती इति मंडनमिश्रः
लीलोद्याने क्ली देववने इतित्रिकां
डशेषः ॥
लीला स्त्री लिता इति शब्दरत्ना
वली ॥
लकुचे पुं लोपः यथा समोलकं
क्लीवात्मयोः समो लकस्मात्
इति मुग्धबोधव्याकरणं ॥
लक्कायितः त्रि अन्तर्हितः यथा
अन्तर्धानं लक्कायन मिति यावत्
यथा गुरो रन्तर्हते शिष्यः निली
यते पलायते लक्कायते लक्का
यतीति लंचापनयनेपि लक लक
काशः शरीरे यस्य स लक्कायः
ततः सइव आचरतीति क्वास
र्थे इति कारकटीकायांइर्गादासः
कर्मणि क्तप्रत्ययेन निष्पन्नोयं ॥

लंगुषः पुं खोलंगः इति रत्न
माला ॥
लुज इ क भाषदार्थे इति कवि
कल्पद्रुमः इ क लंजयति । भा
दीप्तिः षष्ठार्थो निकेतन हिंसाव
त् दानानि इतिदुर्गादासः ॥
लुंव अपनयने इतिकविकल्पद्रुमः
सोऽल्लंवीत्करणनासिकं । इतिदु
र्गादासः ॥
लट ल उ दीप्तिप्रतिहतो इति
कविकल्पद्रुमः ल अलुटत् उलो
टते प्रतिहति शोकादिनापतनंपु
नर्हननं वा । इतिदुर्गा
दासः ॥
लट इ कृतौ इतिकविद्रुमः ।
इ लंसते कृति श्वोर्य्ये इतिदु
र्गादासः
लट क भासे इति कविकल्पद्रु
मः क लोटयति भासो दीप्तिः ।
इतिदुर्गादासः ॥
लट ल ऋ य विलोटविलोडन
योः इतिकविकल्पद्रुमः ल अल
टत् ऋ अलुलटत् अललोटत् य
लठति विलोटः संवधीभावः ।
तत्र लसत्सशोको भवि रोद
दावान् इति भट्टिः विलोडने
लसत्सद्दालकानुर्गाल्कवारानि ।
च लोटति इति हलायुधः इ
तिदुर्गादासः ॥
लट विलोटविलोडनयोः इति
कविकल्पद्रुमः लोटति इति
दुर्गादासः ॥
लठ इ गत्यालस्यक्लेयखोटे
इतिकविकल्पद्रुमः इ लंठते
आलस्ये मंदीभावः स्तेयं चौ
र्य्यं खोटः खोडनं इतिदुर्गा ।
दासः ॥
लठ ल उ प्रतीघाते इति
कविकल्पद्रुमः ल अलठत् उ
लोठते दुर्गादासः ॥
लठ उपघाते इतिकविकल्प
द्रुमः लठति दुर्गादासः
लठ शि लोटे इतिकविकल्प
द्रुमः शि लुठति अलुठील्ललोठ
लोटः संवधीभावः हारो उर्ये
हरिणलीलांलुठति स्तन मंडले
इतिदुर्गादासः ॥
लठ क चौर्य इतिकविद्रुमः
कलोठयति इतिदुर्गादासः ॥
लठमं क्ली अश्वस्यभूमौपुनःपुनः
अमोयहननं लोरा इतिभाषा
टि इति च भाषा तत्पर्यायः ।
वेल्लनं २ इति त्रिकांडशेषः
लठितः त्रि मुहुर्भुविपराहतः

ग्रमशांसर्गोत्थनः उनर्भूमोत्वि·
तोऽस्य: तत्पर्यायः उपाहूतः २
इत्यमरभरतौ वेल्लितः ३
इतिशब्दरत्नावली अपाहूतः ४
पराहूतः ५ इति हेमचंद्रः ।
लुड मंथे इतिकविकल्पद्रु
मः लोडति मन्थो विलोडने
इतिदुर्गादासः ॥
लुड षि संवृतौ श्लेषे इति·
कविकल्पद्रुमः षि लुडतिस्र
लुडीतल्लुलोड इतिदुर्गादासः
लुंट कि अवस्त्रोचौर्ये इतिक
विकल्पद्रुमः दंत्यनकारस्फूर्तिः
टयोगान्मूर्द्धन्यः तेनभ्वादिपत्ते
यगादौ नलोपे लुटत इत्यादि
कि लुंटयति लुंटति । इति
दुर्गादासः ॥
लुंटकः पुं शाकविशेषः नटा
इति भाषा तत्पर्यायः मासवः
२ इतिशब्दचंद्रिका ॥
लुंठी स्त्री लुठने इतिकाचि·
त् शब्दरत्नावली ॥
लुंटाकः पुं चौरः लुटधातोः
वाकप्रत्ययेन निष्पन्नः ॥
लुंटाकी स्त्री चौरास्त्री इतिमुग्ध
बोधव्याकरणं ।
लुंठकः त्रि स्तेयकारकः लुटेरा

इति भाषा यथा ये चौरा वृक्षि
ना हत्वा गरदा ग्रामलुंठकाः स्वा·
मेयादने ते वै पात्यन्ते पातकालि
ताः इतिपाद्मे पातालखंडे॥
लुंठनं क्ली लुठनं इतिकाचित्स
द्रत्नावली ॥
लुंठा स्त्री लुठनं इति काचित्स
द्रत्नावली ॥
लुंठाकः पुं काकः इति त्रिकांड
शेषः ॥
लुंठी स्त्री लुठने इतिकाचित्स
द्रत्नावली ॥
लुंड क चौर्ये इति कविकल्प
द्रुमः कलुंडयति इति दुर्गा दा
सः ॥
लुंडिका स्त्री न्यायसारिणी इति
हारावली ॥
लुंडी स्त्री न्यायसारिणी इति
त्रिकांडशेषः ॥
लुथ ३ ऊन्ये इतिकविकल्पद्रु
मः ॥
इलुन्थ्यते ऊन्या वध क्लेशौ ।
इतिदुर्गादासः ॥
लुप ऋ श प लृ न् गे छेदे
इतिकविकल्पद्रुमः ऋ अलुलुप
त् अलुलोपत् श प न् लुंपति
लुंपते लृ अलुपत् गे लोप्ता ।

इतिदुर्गादासः ॥
लुप इ र य मुपि इतिकवि
कल्पद्रुमः इ र अलुपत् अलोपीत्
अस्मात्पुषादित्वान्नित्यं ङः इत्य।
न्ये वलुप्यति मुपि आकुलीभावे
। पातं मुप्यति लावण्यं·
नेत्रांजनलिप्तैर्नेरैः । इति हला
युधः इतिदुर्गादासः ॥
लुप् पुं लोपः यथा । अभो
भगो ऽघोऽभ्योऽवे लुप् इतिमुग्ध·
बोधव्याकरणं ॥।
लुप्तं क्ली चौर्यधनं लोत इति
ख्यातं इतिशब्दरत्नावली लो
पवति त्रि यथा चतुष्पानितिल
प्तात्ते चांडाले ब्राह्मणेति च प्र
संज्ञा निन्दने हेषात्पुरुषान्नविशि
ष्यते इतितिथ्यादितत्त्वे ॥ ।
लुब कि इ अर्दने इतिकविकल्पि
ल्पद्रुमः किलुंबयति लुम्बति इल
म्ब्यते अर्दने वधः इतिदुर्गादासः
लुब्धः पुं व्याधः लंपटः इति
शब्दरत्नावली ॥
लुब्धः त्रि आकांक्षी इतिमेदि
नी तत्पर्यायः गृध्नुः २ गर्द्धनः
३ अभिलाषुकः ४ तृष्णक् ५ इत्य
मरः ॥
लुब्धकः पुं व्याधः इत्यमरः ।

लंपटः इतिलब्धशब्दार्थदर्पणा
त् लुभ श विमोहने इतिकवि
कल्पद्रुमः शलुभत्यात्मनिकामेच
इतिहलायुधः लोभिता लोब्धा
इतिदुर्गादासः ॥
लुभ य इर गार्ध्ये गार्ध्ये माकां
क्षाष लुभ्यतिधनेलुब्धः इर अलु
भत् अलोभीत् अस्मात्पुषादित्वान्नि षा
त्यं ङः इत्यन्ये इति दुर्गा·
दासः ॥
लुभितः त्रि विमोहितः विमो
हनार्थ लुभधातोः क्त प्रत्ययेन
निष्पन्नं ॥
लुल विमर्दने इतिकविकल्प
द्रुमः सौत्रधातु रयं लुलापः
इतिदुर्गादासः ।
लुलापः पुं महिषः इत्यमरः
लुलापकंः पुं महिषकंदः । दः
इतिराजनिर्घंटः ॥
लुलापकांता स्त्री महिषी इति
राजनिर्घंटः
लुलितः त्रि आन्दोलितः यथा
प्रेंखोलित स्वरलितो लुलिता
न्दोलितावपि इति भूरिप्रयो
गः
लुष स्तेये इतिकविकल्पद्रुमः
लोषति इतिदुर्गादासः

लष हिंसने इतिकविकल्प
द्रुमः सौत्रधात्वयं लषः इति
दुर्गादासः ॥
लषभः पुं मत्तदन्ती इत्युणा
दिकोषः
लूट गे गार्य्ये इतिकविकल्प
द्रुमः गे अत्वत् गायंल्लुमि
च्छालोटति यवं लोकः इतिदुर्गा
दासः ॥
लू ञ गि छिदि इतिकविकल्पद्रु
मः ञ गि लुनाति लुनीते लूनः
लूनिः इतिदुर्गादासः ॥
लूता स्त्री कीटविशेषः माक
डसा इति भाषा तत्पर्यायः त
न्तुवायः २ ऊर्णनाभः ३ मर्कट
कः ४ इत्यमरः मर्कटः ५ लूति
का ६ ऊर्णनाभिः ७ वायकः ८
तन्तुवायः ९ इतिशब्दरत्नावली
पिपीलिका रोगविशेषः इतिमे
दिनी शोथस्य पर्यायः सर्पव्रणाः
२ लूतिका ३ इतिराजनिर्घण्टः त
द्रोगस्य निदानादि यथा लूता
नामन्त्व विषाणां मुत्पत्तिं संख्यां
चाह यस्माल्लूनं तृणं प्राप्य मुने
प्रस्वेद बिन्दवः तेभ्योजातास्त
तो लूता इतिख्यातास्तु षोड
श अप्रकृतः विश्वामित्रोनृप

वरः कदाचिद्दृषि सत्तमं वशिष्ठं
कोपयामास गत्वाश्रमपदं किल
कुपितस्य मुने स्तस्य ललाटे स्वेद
बिंदवः अपतन्दर्शनादेव शम्भु
स्तानीवबर्चसः लूने तृणे महर्षे
स्तुधेन्वर्थं संभृते पि च ततोजा
तास्त्विमा घोरा नानारूपा महाविषाः
तासामष्टौ कष्टसाध्या वर्ज्यास्ताव
त एवहि तद्रूपाणि मंडला प्रत्य
योष्ट कष्टसाध्याः सौवर्णिकाप्रभृ
तयोष्टावसाध्याः तासां सामा
न्यतो दंश लक्षणमाह ताभि
र्द्दष्टे दंशाकोथ्यप्रवृत्ति क्षतजस्य
च ज्वरो दाहोऽतिसारश्च गदाः
स्युश्च त्रिदोषजाः पिडिकावि वि
धाकारा मंडलानि महान्ति च ।
शोथा महान्तो मृदवो रक्ताः श्या
वा श्चलास्तथा सामान्य सर्वल
ताना मेतद्दंशस्य लक्षणं दंशा
कोथ्यदंशमध्ये पूतिभावः दंशम
ध्ये कृष्णकं श्यावं वा जा
लकावृते दग्धाकृति भृशं पाकं
क्लेद प्राप्य ज्वरान्वितं दूषीविषा
भिर्लूताभिस्तद्दष्टमिति निर्दिशे
त् सौवर्णिकादयोष्टावसाध्या प्राण
हरा स्तासां लक्षणमाह प्रायः
श्वेतासिता रक्ता पीताच पिडिका

ज्वरः प्राणान्तिको भवेद्दाहः ।
श्वासो हिक्का शिरोग्रहः ॥
तस्यौषधं यथा रजनीद्वयम पत्ते
ग मंजिष्ठा नागकेशरैः शीता ।
सुपिष्टैः प्रलेपः सद्यो लूता वि
नाशयेत् अपिच अभया रो
चना कुष्ठ मर्कपुष्पं तथोत्पलं ।
नलवेतसमूलानि गरलं सुरसा
तथा सकलिंगा समंजिष्ठा मनः
शिला च शतावरी शृंगाटकं समं ।
गाच पद्म पद्मकेशर मित्यपिक
ल्कीकृत्य पचेत् सर्पिः पयोद्ध्यास
तर्गुणं सम्यक्पक्वे ऽवतीर्णे च
शीते तस्मिन्विनिःक्षिपेत् ॥
सर्पिस्तुल्यं भिषक्क्षौद्रं कृतर
क्षं नियापयेत् विषाणि हन्ति दु
र्गाणि गरदोषकृतानि च स
र्पाह्वति विषं सर्वं गदं ह्यपह
तां लूतां योगजं तमकं कंडुं ।
मांसस्रावं विसंज्ञतां नाशय ।
स्नानाभ्यंगपानवस्तिषु योजि
तं सर्प कीटाखु लूतादि दष्टानां
विषघ्नमपर मृत्युपाशच्छेदि ह्युतं
इतिभावप्रकाशः ॥
लूतारिः पुं दुग्धफेनीक्षुपः इति
राजनिर्घण्टः ॥
लूतिका स्त्री मर्कटकः इतिशब्द

रत्नावली ॥
लूनः त्रि छिन्नः इत्यमरः ॥
लूनकः पुं ~~छेदः इतिमुग्धबोध~~
~~व्याकरणम्~~ भेदितः पशुः इति
मेदिनी लूनिः स्त्री छेदः इतिमु
ग्धबोधव्याकरणं ॥
लूमं क्ली लांगूलं इत्यमरः ।
लूमविषः पुं वृश्चिकादिः इति
हेमचंद्रः ॥
लूष क वधे स्तेये इतिकवि
कल्पद्रुमः ॥
[redacted] कल्मषयति इतिदुर्गादा
सः ॥ लेखः पुं देवः इत्यमरः ॥
लेख्यः . इतिमेदिनी ॥
लेखकः पुं लेखनकर्त्ता तत्प
र्यायः लिपिकरः २ अक्षरचणः
३ अक्षरचुञ्चुः ४ इत्यमरः ॥
वोलकः ५ करकः ६ मसीपाणिः
करप्रणीः ८ इतिशब्दरत्नावली ।
वर्णी ९ इतिजटाधरः ॥
तस्य लक्षणानि यथा सर्वदेशा
क्षराभिज्ञः सर्वशास्त्रविशारदः
लेखकः कथितो राज्ञः सर्वाधि
करणेषु वै शीर्षोपेतान् सु
संपूर्णान् समश्रेणिगतान्समान्
अक्षरान्वै लिखेद्यस्तु लेखकः
सवरः स्मृतः उपाय वाक्कुशा

लः सर्वशास्त्रविशारदः वक्त्रर्थ
वक्राद्यालेनलेकः साङ्कुशनम वा
वचाभिप्रायतत्त्वज्ञो देशकालवि
भागवित् अनाहार्य्योऽनुपेभक्तो
लेखकः साङ्कुशनम इतिमात्स्ये
१८९ अध्यायः अपिच सुसंहृतक
रस्ही तार्थ्यो लघुहस्तोजितात्तरः।
सर्वशास्त्र समालोकीप्रकृष्टोनाम
लेखकः इतिचाणक्यसंग्रहः रा
जलेखक लक्षणं यथा ब्राह्मणो
मंत्रणाभिज्ञो राजनीतिविशा
रदः नानालिपिज्ञोमेधावी नानाभा
षासमन्वितः ॥मंत्रणाचतुरोधीमा
न्नीतिशास्त्रार्थकोविदः संधिविग्र
ह भेदज्ञोराजकार्यविचक्षणः स
दाराजहितान्वेषी राजसन्निधिसंस्थि
तः कार्याकार्यविचारज्ञः सत्यवादी
जितेंद्रियः स्वल्पवादीसुहान्माथ
धर्मज्ञो राजधर्मवित् एवमादि
गुणो युक्तः सएव राजलेखकः।
नृपानुवर्ती सततं नृपविश्वासब
त्सकः नृपते हितकाम्वेषीस एव
राजलेखकः इति पत्रकोमुदी॰
॥ लेखकर्मकायस्थेन कर्त्तव्यं।
यथा लेखकानपि कायस्थान्ले
ख्यकृत्ये विचक्षणान् कुर्यादिति।

शेषः इतिपराशर संहितायां ९
अध्यायः ॥
लेखनं क्ली छर्दनं भूर्जत्वक्।
अक्षरविन्यासः इति मेदिनी
॥ भूमौ लेखन निषेधो य
था न भूमौ विलिखेद्वर्णां मंत्रन्
पुस्तकं लिखेत् इति योगिनी
तंत्रे तृतीयभागे ७ पटलः ले
खनाञ्जनं यथा दन्तोत्त्वकिरा
ला काचशंख चंदन सैंधवैः चूर्णि
ते रंजनं प्रोक्तं पुष्यार्मादि नि
कृन्तने रक्तः कुक्कुटः तस्यागस्त्य
त्वक् शिला मनःशिला इति
भावप्रकाशः ॥
लेखनः पुं काशः इतिराजनि
र्घंटः ॥
लेखनिकः पुं लेखहारकः पर
हस्तेनलेखकः स्वहस्तेनलेखकः
इतिमेदिनी ॥
लेखनी स्त्री लिख्यतेऽनया लेख
नसाधनवस्तु तत्पर्य्यायः वर्णत
लिका २ इतिहारावली वर्ण
तूली ३ कलमः ४ अक्षरतूलिका
इतिजटाधरः कराग्रयः ६ वि
जकः ७ इतिशब्दरत्नावली ॥
लेखनीकरणस्युभास्युभं यथा वे
णुसम्भवा लिखेद्वर्णां तस्यानि भ

4157

वेणुवः ताम्रसम्भवा तविभवो भ
वेन्न तस्यो भवेत् ॥ महा
लक्ष्मी भवेन्नित्यं सुवर्णस्य शाला
कया दूरस्यनस्य सम्भवा वै मति।
वृद्धिः प्रजायते तथा अग्निमयैर्दे
वि पुत्र पौत्रधनागमः अग्निम
ये श्रिजकाष्ठमयेः दैन्येनविद्या
ला लक्ष्मीः कांस्येन मरणं भ
वेत् अष्टाङ्गुलप्रमाणेन दशा।
ङ्गुलेन वाथवा चतुरंगुलसम्भावा
वापो लिखेत् पुस्तके शुभे ॥
तस्मादत्र संख्ये न सम्प्राप्नुयाति
वे दिने यथा दैन्येनेत्यादिवचने
यकस्यैव विधि निषेधौ न
घाताप्यष्टाङ्गुल दशाङ्गुलयो विधिः
निषेध स्यत्वङ्गुले इतियोगिनी
तंत्रे तृतीयभागे ७ पटलः।
लेखनीयः त्रि लेख्यं लेखित
व्यं इति लिखधातोः कर्मण्यनी।
यप्रत्ययेन निष्पन्नं ॥
लेखर्षभः पुं इंद्रः इत्यमरः ॥
लेखहारः } पुं पत्रवाहकः लेखं
लेखहारकः } हरति इत्यर्थेऽण्
प्रत्ययेन कन् प्रत्यये न च निष्पन्नं
इतिसिद्धान्तकौमुदी ॥
लेखा स्त्री लिपिः पंक्तिः इति
मेदिनी ॥

लेख्यार्हः पुं श्रीमालवृक्षः इति
राजनिर्घंटः लेखनयोग्ये त्रि ॥
लेखितं त्रि लेख्यते यत् लि
खितं इतिण्यन्त लिखधातोःक्त
प्रत्ययेन निष्पन्नं ॥
लेख्यं त्रि लेखितव्यं लेखनीयं
इति लिखधातोः कर्मणि य प्रत्य
येन निष्पन्नं व्यवहारांगकक्रि
यापूर्वांगे यथा षाण्मासिकेऽपि
समये भ्रान्तिः संजायते यं
तः धात्राक्षराणि सृष्टानि पत्रा
रूढान्यतः पुरा लेख्यन्तु द्विविधं
प्रोक्तं स्वहस्तान्यकृतं तथा अ
सात्तिकं सात्तिमच्च सिद्धि देशा
स्थिते स्तयोः स्तान्तु सात्तिणा
यत्र धनिकर्णिकलेखकाः तदप्य
पार्श्वकरणं स्मृते त्वाथैः स्थिराक्ष
यात् दर्शितं प्रतिकालेच पठि
तेश्राविते च यत् लेख्यं सिध्यति
सर्वत्र मृतेष्वपिच सात्तिषु ॥
इति व्यवहारतत्वे वृहस्पतिः।
अपिच साम्प्रतं लेख्यंनिरू
प्यते तत्र लेख्यं द्विविधं।
शासनं जानपदंचेति शासनं
निरूपितं जानपदमभिधीयते।
तच्च द्विविधं स्वहस्तकृत मन्यकृ
तं चेति तत्र स्वहस्तकृत मसाक्षिकं

अन्यकृतं ससाक्षिकं। अनयो
श्च देशाचारानुसारेण प्रामाण्यं।
यदाह नारदः लेख्यन्तु द्विवि
धंज्ञेयं स्वहस्तान्यकृत न्तथा अ
साक्षिमत्साक्षिमच्च सिद्धि र्देश
स्थिते स्तयो रिति तत्रात्मकृ
तमाह यःकश्चिदर्थो निष्णातः
स्वरुच्यातुपरस्परं लेख्यन्तु सा
क्षिमत्कार्य्यन्तस्मिन्धनिक पूर्व्वकं
धनिकाधमर्णयो र्योऽर्थो हिर
ण्यादिः परस्पर स्वरुच्या इय
ता कालेनैतावद्देय मियतीच
प्रतिमासंवृद्धि रिति निष्णातो व्य
वस्थित स्तस्मिन्नर्थे कालान्तरे वि
प्रतिपत्तौवस्तुतत्व निर्णयार्थंले
ख्यं साक्षिमद्वक्ष्य लक्षणं साक्षियु
क्तं धनिकः पूर्व्वो यस्मिन्तद्धनिक
पूर्व्वकं धनिक नाम लेखनपूर्व्व
क मितियावत्कार्य्यं कर्त्तव्यं उक्त
लक्षणाःसाक्षिणो वाकर्त्तव्याःक
र्त्तेन यत्कृतंकार्य्यं सिद्ध्यर्थंस्तस्य
साक्षिणः प्रवर्त्तन्ते विवादेषु स्व
कृतं वाप्यलेख्यक मितिस्मरणा
त ~~अपिच प्रवर्त्तन्ते विवादेषु स्व-~~
~~कृतं वाप्यलेख्यकमितिस्मरणात्~~
अपिचसमा मास तदर्द्धाह र्नाम जाति
स्वगोत्रकैः सब्रह्मचारिकात्मीयपि
तृनामादि चिह्नितं समासंवत्सरः मा
स स्तदर्द्धादि स्तदर्द्धः

पक्षः शुक्लःकृष्णो वा अहस्ति
थिः प्रतिपदादिः नाम धनिका
धमर्णयोः जाति र्ब्राह्मणादिःस्व
गोत्रं वाशिष्ठादिगोत्र मेतैः समा
दिभि श्चिह्नितं तथा सब्रह्मचा
रिकं बह्वृचादिशाखाप्रयुक्तं गुण
नाम बह्वृचः इति आत्मीय पि
तृनाम धनिकर्णिक पितृनाम・
आदिग्रहणाद्द्रव्य जाति संख्याबा
धादिग्रहणं एतै श्चिह्नितं लेख्यं
कार्य्य मिति शेषेण सम्बन्धः किंच
समाप्तेऽर्थे ऋणीनाम स्वहस्तेन
निवेशयेत मतं मेऽमुकपुत्रस्ययद
त्रोपरि लेखितं धनिकाधमर्णयो
र्योऽर्थः स्वरुच्या व्यवस्थितः त
स्मिन्नर्थे समाप्ते लिखिते ऋणी
अधमर्णो नामात्मीयं स्वहस्तेनास्मि
न्लेख्ये यदुपरि लेखितं तन्ममामु
कपुत्रस्य मत मभिप्रेत मिति निवे
शयेत्तत्र विलिखेत तथा।
साक्षिणश्च स्वहस्तेन पितृनामक
पूर्व्वकं अत्राहं ममुकः साक्षीलि
खेयुरिति ते समाः तस्मिन्लेख्ये
येसाक्षिणो लिखिता स्तेप्यात्मीय
पितृनाम लेखन पूर्व्वकमस्मिन्न
र्थे अहममुको देवदत्तः साक्षीति
स्वहस्तेनैकेकशो लिखेयुस्तेचसमाःसं

ख्याता गुणतश्च कर्त्तव्याः यद्यध
मर्णः साक्षी वा लिपिज्ञो न भव
ति तदाऽधमर्णोन्येन साक्षी च।
साक्षन्येन सर्व्वसाक्षिसन्निधौ स्व
मतं लेखयेत् यथाह नारदः अलि
पिज्ञऋणी यः स्यात्स्वमतन्तु स ले
खयेत् साक्षीवा साक्षिणान्येन स
र्व्वसाक्षी समीपत इति अपिच
उभयाभ्यर्थितेनैतन्मयाह्यमुक।
सूनुना लिखितं ह्यमुकेनेति ले
खकोऽन्ते ततो लिखेत् ततो ले
खको धनिकाधमर्णिकाभ्याम्・
भाभ्यांप्रार्थितेन मयामुकेन दे
वदत्तेन विष्णुमित्र सूनुना पतल्ले
ख्यं लिखित मित्यन्ते लिखेत्।
साम्प्रतं स्वकृतलेख्यमाह विनापि
साक्षिभि र्लेख्यं स्वहस्त लिखित
न्तु यत् तत्प्रमाणं स्मृतं लेख्यंब
लोपधिकृताद्दते यल्लेख्यं स्वहस्ते
न लिखितं अधमर्णेन तत्साक्षि
भि र्विनापिनापि प्रमाणं स्मृतंम
न्वादिभिः बलोपधिकृताद्दते बले
न बलात्कारेण उपधिनाछ
ल लोभ क्रोधभय मदादिलक्ष
णेनयत्कृतं तस्माद्विना नारदो।
प्याह मत्ताभियुक्तस्त्री बालबला
त्कारकृतंच यत् तदप्रमाणं लिखि

कृतन्तयेति तथैवतत्स्वहस्त कृतं・
परहस्त कृतंच यल्लेख्यं देशाचा
रानुसारेण सर्व्वथक व्यवहारे तंध
कृतव्यवहारयुक्तमर्थ क्रमापरिलो
पेन लिप्यक्षरापरिलोपेन च
लेख मितिसेतावत्तु पुनः साधुशब्दै
रेव प्रातिस्विक देशभाषयापि ले
खनीयं यथाह नारदः देशाचा
राविरुद्धं यद्व्यक्ताधि विधि लक्षणं
तत्प्रमाणं स्मृतं लेख्यं मविलुप्तक
मात्तर मिति विधानं विधि राधे
विधि राधीकरणान्तस्य लक्षणं गो
प्याधि भोग्याधि कालकृत मित्या
दि तद्व्यक्तं विस्पष्टं यस्मिंस्त
द्व्यक्ताधि विधि लक्षणं अविलुप्त
क्रमाक्षरं अर्थानाक्रमः क्रमंचा
क्षराणि च क्रमाक्षराणि अविलुप्ता
नि क्रमाक्षराणि यस्मिंस्तदवि
लुप्त क्रमाक्षरं तदेवंभूतंलिखि
तंप्रमाणं राजशासनवत्तु साधुश
ब्दनियमोऽत्राभिप्रायः लेख्यप्र
सङ्गेन लेख्यारूढ मृणं त्रिभि
रेव देयमित्याह ऋणं लेख्यकृत
न्देयं पुरुषै स्त्रिभि रेव तु यथा
साक्षादि कृत मृणंत्रिभि रेवदेयं
तथालेख्यकृत मप्याहर्त्तृपुत्र तत्पु
त्रैस्त्रिभि रेव देयं न चतुर्थादिभि

रिति नियम्यते ननु७त्र पौत्रे।
ऽर्णादेय मित्यविशेषेणर्णमात्रेपि
मि रेव देय मिति नियत मेव।
वाढमस्यैवोत्सर्गस्य पत्रारूढर्ण-
विषयेस्मृत्यन्तर प्रभवामपवाद-
शंका मपनेतु मिदम्वचनमारब्ध-
मित्याह। पत्रलक्षण मभिधाय
कात्यायनेनाभिहितं पूर्वकालम
तिक्रान्तंपित्रृणान्दाप्यते ऋणमि
ति ऋणपत्रारूढमतिक्रान्तकाल
मपि पित्रादीनामपि पितृणांसंबधि
दाप्यते अत्र पितृणामिति बहुव
चन निर्देशात्कालमतिक्रान्तमि
ति वचनाच्च त्र्यादि दाप्यते इतिप्र
तीयते तथा हारीतेनापि लेख्यंय
स्य भवेद्धस्ते लाभंतस्य विनिर्दिशे
दिति अत्रापि यस्य हस्ते पत्रं स
न्ति तस्यर्णलाभ इतिसामान्येनच
तुर्थादिष्वपिऋणलाभोऽस्तीतिप्र
तीयते अतस्तत्राशंका निवृ-
त्यर्थं एतद्वचन मिति भ्रांतं व-
चनद्वयन्तु योगीश्वर वचनात्सा
रेण योजनीयं अस्यापवादमाह।
आधिस्तु भुज्यते तावद्यावत्त प्र
दीयते स्वबंधकेपि पत्रारूढेऽस्य
णे त्रिभि रेव देय मिति नियमा
दृणापकरणानधिकारेणाप्याह्रे
णोऽप्यन

धिकार आमामविदमुच्यते यावत्त
त्तर्थेन पंचमेनवाऽऽदरणं नदीयते
तावद्देवाधि र्भुज्यत इति वदतास
वन्धकर्णापाकरणे चतुर्थादे
रप्यधिकारो दर्शितः नन्वेतदप्य
युक्त मेवफलभोग्या ननुपपत्ती
ति सत्यं तदप्येतस्मिन्नत्सववाद
वचने पुरुषत्रय विषयमेवस्या
दिति सर्वमनवद्यं शास्त्रकृत्तम
विसमाप्य प्रकृत मेवानुसरति
देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृ
ते तथा भिन्ने छिन्नेथवा छिन्ने
लेख्य मन्यत्कारयेत् व्यवहारात
मे पत्रे पत्रान्तरं कुर्यादिति विधी
यते व्यवहारात्तमन्वेषात्पन्त व्यव
हित देशान्तरस्थे पत्रे दुर्लेख्ये
णानिसंदिह्यमानानि अवाचकानि
वा लेख्यानि लिप्यक्षराणि पदा
निवा यस्मिं स्तदुर्लेख्य तस्मिन्तु
लेख्ये नष्टेकालवशेन उन्मृष्टे म
सी दौर्बल्यादिना मर्दिते लिप्यक्ष
रे हृते तस्करादिभि र्भिन्ने विदलि
ते दग्धे अग्निनाछिन्ने द्विधाभू
ते सति हि भवति एतच्चार्थिप्रत्य
र्थिनोः परस्परानुमतौ सत्यां वि
मत्यान्तु व्यवहारप्राप्तौ देशान्तर
स्थ पत्रानयनाद्यपेक्षया कालो
दातव्यः दुर्लेख्य

स्थिते नष्टेवा पत्रेसाक्षिभिरेवव्य
वहार निर्णयः कार्यः यथाहना
रदः लेख्ये देशान्तरन्यस्ते शीर्णेदु
र्लिखिते हृते सत स्तत्कालकर
णमसतो दृष्ट दर्शन मिति स
तोविद्यमानपत्रस्य देशान्तरस्थस्या
नयनाय कालकरणं कालावधि
र्दातव्यः असतः पुनरविद्यमानस्य
पत्रस्यपूर्वं ये दृष्टवः साक्षिणस्तै र्द
र्शनं व्यवहार परिसमापनंकार्यं।
यदाह साक्षिणो न संति तदादि
व्येन निर्णयः कार्यः अलेख्यसा
क्षिके दैवी व्यवहारे विनिर्दिशे-
दिति स्मरणात् एतच्च जानप
दंव्यवस्थापत्रं राजकीय मपिव्य
वस्थापत्रमीदृश मेव भवति इयां
स्तु विशेषः राज्ञः स्वहस्तसंयुक्तं
स्वमुद्रा चिह्नितन्तथा राजकीयं
स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमदि
ति तथान्यदपि राजकीयंजय
पत्रं हारिवशिष्ठेनोक्तं यथोपन्य
स्त साध्यार्थ संयुक्तं सोत्तरक्रि
यं सावधारणकंचैव जयपत्रकं।
लिख्यते शास्त्रवाकादि हस्तांकमु
द्रितं राजमुद्रया सिद्धः सर्ववादि
नेदद्याज्जयिने जयपत्रक मिति
तथा सभासदोपि मतंमेऽमुक

पुत्रस्याति स्वहस्तं दद्युः सभा
सदश्च ये तत्र स्मृतिशास्त्रविदः
स्थिताः यथा लेख्य विधौ तद्व
त्स्वहस्तं दद्यु रेवत इतिमनुस्मर
णात् सभासदांच परस्परानुमति
व्यतिरेकेणाव्यवहारो निःशल्यो भव
ति यथाह नारदः यत्र सभ्योज
नःसर्वः साध्वेतदिति मन्यते सनिः
शल्यो विवादःस्यात्सशल्यस्त्वन्यथा
भवेदिति एतच्चतुर्विधव्यवहारपद
साधयेत्साध्य मर्थं युक्तश्चोपायान्वि
तंचयत् राजमुद्रांकितंचैव जयपत्र
कमिष्यते इतिस्मरणात् यत्रतही
नता यथा अन्यवादी क्रियाद्वेषी
नोपस्थाता निरुत्तरः आहूतप्रप
लायी चहीनःपंचविधःस्मृत इति
तत्र न जयपत्र मस्ति अपितुहीन
पत्रमेव तत्र कालान्तरे दंडप्राप्त
र्थंजयपत्रं न प्राङ्न्याय विधिसि
द्धार्थमितिविशेषः लेख्य सन्देहे
निर्णय निमित्तान्याह संदिग्धलेख्य
शुद्धिःस्यात्स्वहस्त लिखितादिभिः
युक्ति प्राप्ति क्रिया चिह्न सम्बन्धा
गमहेतुभिः आह शब्दश्चेति
संदिग्धस्य लेख्यस्यशुद्धिःस्वहस्तलि
खितादिभिःस्यात् स्वहस्तेन लिखि
तं यल्लेख्यान्तरं तेन शुद्धिः यदिसह

शास्त्रतराणि भवंति तदा शुद्धिः
स्यादित्यर्थः आदि शब्दात्साक्षिले
ख्यक स्वहस्त लिखितान्तरसंवा
दाच्छुद्धिरिति युक्ता प्राप्तिर्युक्तिः
प्राप्तिः देश काल पुरुषाणां इ
त्थंभूत संबंधः प्राप्तिः अस्मिन्दे
शे अस्मिंकाले अस्य पुरुषस्येदंइ
यं वदत इति युक्तिः प्राप्तिः
क्रिया तत्सात्म्यपन्यासः विक्रम
साधारणं श्रीकारादि सम्बंधः
अर्थि प्रत्यर्थिनोः पूर्वमपि परस्पर
विश्वासेन दान ग्रहणादिसंबंधः
आगमोऽस्यैतावतोऽर्थस्य संभावि
तः प्राप्त्युपायः एव एवं हेतवः
एभिर्हेतुभिः संदिग्ध लेख्य शुद्धिः
स्यादित्यन्वयः यदात लेख्यस्य
देहनिर्णयो नजायते तदासाक्षि
भि निर्णयः कार्यः यथाहकात्या
यनः दूषिते पत्रके वादी तदा
रूढांस्तु निर्दिशेदिति साक्षिस
म्भवविषय निरस्यवचनं साक्ष्यसं
भवविषयन्तु हारीतवचनं नमेवे
न कृतं पत्रं कूट मेतेन कारितं
अधरीकृत्य तत्पत्रमथ दिव्येन नि
र्णय इति एवं शोधिते पत्रे
ऋणं च दातव्य माम्य दाकृत्स्न
मेवर्णन्दात मसमर्थस्तदाकिंक
र्तव्य

मित्यत आह लेख्यस्य पृष्ठेऽभि
लिखेद्दत्वा दत्वर्णिकोधनं धनी
धोप गतं दद्यात्स्वहस्त परिचिह्नि
तं यदापमर्णिकःसकल मर्णंदा
तुमसमर्थ स्तदा शक्त्यनुसारेणाद
त्वा दत्वाऽर्थं कृतस्य लेख्यस्य पृष्ठेऽभि
लिखेदेतावन्मयादत्तमिति उत्तम
र्णोवा उपगतंप्राप्तंधनं तस्यैव ले
ख्यस्य पृष्ठे दद्यादभिलिखेदेताव
न्मयालब्ध मिति कथं स्वहस्तप
रिचिह्नितं स्वहस्त लिखिताक्षर चि
ह्नितं यद्वोपगतं प्रवेशपत्रं स्वहस्त
लिखित चिह्नितमधमर्णायोत्तमर्
णोदद्यात् ऋणे तत्कृत्स्ने दत्ते
लेख्यं किंकर्तव्यमित्यत आह दत्वर्णं
पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारये
त् क्रमेण सकृदेव वाकृत्स्नम्
र्णन्दत्वा पूर्वं कृतं लेख्यं पाटयेत्
यदात दुर्गदेशावस्थितं लेख्यं न
ष्टं वा तदा शुद्ध्यै अधमर्णोत्त नि
हृत्स्यर्थमन्यलेख्यं कारयेदुत्तमर्णं
मधमर्णः सर्वोक्त क्रमेणोत्तमर्णो
विशुद्धिपत्रं अधमर्णाय दद्या
दित्यर्थः ससाक्षिके ऋणे कृत्स्ने
दातव्ये किंकर्तव्य मित्यत आह
साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससा
क्षिकं यत्र ससाक्षिक मृणंतत्

समस्तमेव दद्यात् इति लेख्य
प्रकरणे इति मिताक्षरायांव्य
वहाराध्यायः

लेखचूर्णिका स्त्री तूलिका इ
तिशब्दरत्नावली ॥

लेख्यपत्रः पुं तालवृक्षः इति
भावप्रकाशः लेखनीयपत्रे क्ली

लेख्यस्थाने क्ली लिखनेयत्र।
आफिस इति दप्तरखाना इति
यवनेच्छभाषा तत्पर्यायः ग्रन्थकु
टी २ इतिशब्दरत्नावली ।

लेण्डं क्ली गरुथं न्याद इतिभा
षा यथा उत्ससर्ज हस्तलेण्डम्
धैव भयमापह इति ब्रह्मवैव
र्ते श्रीकृष्णजन्मखण्डे येकुकास्त
वयं २२ अध्यायः ॥

लेप ऋ ऊ गमने इतिकवि
कल्पद्रुमः ऋ अलिलेपत् ऊ ले
पते लिलेपे इतिदुर्गादासः ॥

लेपः पुं लेपनं भोजने ।
इति मेदिनी सपा चुन इति
भाषा इति विश्वः ॥

लेपकः पुं जातिविशेषः राज
इति येकर इति च भाषा तत्प
र्यायः पलगंडः २ इत्यमरः ।
लेपी इ इति शब्दरत्ना ॥
लेप्यकृत ४ इति हेमचंद्रः ॥

लेपनं क्ली लेपः लेपा इति
भाषा यथा वैशाखस्य सितेप
क्षे तृतीयाक्षय संज्ञिता ।
तत्रमांलेपयेद्गन्धलेपनैरतिशोभि
तं इति तिथ्यादितत्त्वं ॥

विष्णुगृहलेपन फलं यथा ।
वाराहउवाच शृणु तत्त्वेन मेदे
विलिप्यमानस्य यत्फलं सर्वं ते
कथयिष्यामि यथा प्राप्नोति मा
नवः गोमयं गृह्य वै भूमे मम
वेश्मापलेपयेत् यस्तानि तत्र
यावन्ति पदानिच विलिम्पतः ।
तावद्वर्ष सहस्राणि दिव्यानि दि
विमोदते यदि द्वादशवर्षाणि
लिप्यते मम कर्मसु जायते वि
पुले कुले धन धान्य समाकुले ।
दिवो नमस्कृतो देवि कुशद्वीपा
याच्छति कुशद्वीप मनुष्याणां सहस्रं
जीवते दश मद्भक्त श्चैव जायते
महिमा गुणवान्शुचिः कुशद्वी
पात्परिभ्रष्टो मम कर्म परायणः
राजा वै जायते सद्यः सर्व धर्मेषु
निष्ठितः लेपनस्य प्रभावेण मम
कर्म परायणः भक्त्या व्यवस्थित
श्चापि सर्वशास्त्राणि गच्छति
देवि कारयेत सर्वं मम चायत
नानि च कारयित्वा यथान्याये

मर्ष लोकायगच्छति गोमयस्य
तु वक्ष्यामि तच्छृणुष्व वसुन्धरे
गोमयेन समासाद्य यावल्लोको
नुगच्छति समीपे यदिवा दूरे ग
त्वानयति गोमयं यावंति तस्य॰
दाम्यस्तावद्वर्ष सहस्रकं गोमया
नयितांचैव स्वर्गलोके महीयते
एकादश सहस्राणि एकादश॰
शतानिच ततःस्वर्गात्स्वलेद्वीपेर
मतेच मुदायुतः शाल्मल्यामयमी
भ्रष्टो राजा भवति धार्मिकः मद्
रूपैव जायेत सर्व धर्मविशारदः
अथ द्वादशवर्षाणि मक्षिकः स
हृष्टमनाः वहते गोमयं स भुम
मलोकाय गच्छति इति वराह
पुराणे देवीगृहलेपनफले
यथा देव्या गृहन्तु यः शुक्रगो
मयेनानुलेपयेत् स्त्रियो वा यः
दिवा पुंसः षण्मासंत निरन्तरं।
स लभेदीप्सितान् कामान् दे
व्यालोकंच गच्छति इतिदेवीपु
राणे ४२ अध्यायः ॥
लेपनः पुं तुरुष्कनामगंधद्रव्यं॰
इति राजनिर्घंटः ॥
लेपी न पुं लेपकः योकर इति
भाषा इति शब्दरत्नावली ले
पकर्त्तरि लेपविशिष्टे च त्रि ॥

लेप्यं त्रि लेपनीयं लेप्तव्यं ।
लिपधातोः कर्माणि य प्रत्ययेन
निष्पन्नं ॥
लेप्यकृत् पुं लेपकः इतिहे
मचंद्रः ॥
लेप्यमयी स्त्री काष्ठादिघटितपु
त्तलिका तत्पर्यायः अंजलिका
रिका २ इतिहेमचंद्रः ॥
लेप्यस्त्री स्त्री सुगंध द्रव्यलिप्ता
स्त्री इतिशब्दरत्नावली ॥
लेयः पुं सिंहराशिः इतिज्योति
स्तत्वं ॥
लेलिहानः पुं शिवः इति शब्द
रत्नावली सर्पः इति हेमचंद्रः
पुनः पुनर्लेहनकर्त्तरि त्रि
लेलिहाना स्त्री मुद्राविशेषः ।
यथा वक्रे विस्तारिते कृत्वाध
यो जिह्वाच चालयेत् पार्श्वस्थ
मुष्टि युगले लेलिहानेति की॰
र्त्तिता यथा नारायणे अन्या
लेलिहाना वक्तव्या योनि मीया
यतः सेन्दु बंधः कूर्च क्रमाद्वि
डः बीजानि चोच्चरन्मंत्री मुद्राव
न्यनमावदेत् तर्जनी मध्यमाना
माः समंकुर्यादधोमुखं अनामा
यां क्षिपेद्धृष्टो अरूंज्वी कृत्वा कनि
ष्ठिकां लेलिहा नाम मुद्रेयं जीव

न्यासे प्रकीर्त्तिता इतितंत्रसारः
लेशः पुं कणा इत्यमरः ॥
लेष्टुः पुं लोष्टु इत्यमरः ॥
लेष्टुघ्नः पुं लेष्टुभेदनः इतिश
ब्दरत्नावली ॥
लेष्टुभेदनः पुं लोष्टुभंगसाधन
मुद्गरः मद्दे इति ख्यातः इति
केचित् इति भरतः तत्पर्यायः
कोटिशः २ इत्यमरः ॥
कोटीशः ३ इति रत्नकोषः ।
लेष्टुघ्नः ४ लेष्टुभेदी ५ लूर्णदंडः
६ इति शब्दरत्नावली ॥
लेष्टिकः पुं हस्त्यारोहकः तत्प
र्यायः करिरोहकः २ इतिश
ब्दमाला ॥
लेहः पुं आहारः भक्षणं ।
इतिहेमचंद्रः तत्पर्यायः ।
स्वादनं २ रसनं ३ स्वदनं ४ स्व
दिः ५ इतिराजनिर्घंटः ॥
लेहनं क्ली जिह्वयारसग्रहणं
चाटन इति भाषा तत्पर्यायः।
जिह्वास्वादः २ इतिहेमचंद्रः ॥
लेहिनः पुं टंकणे इतिहेम।
चंद्रः ॥
लेह्यं क्ली अमृतं इति शब्द॰
माला लेहनीये त्रि ॥
लैंगं क्ली लिंगपुराणं यथा

मात्स्ये कौर्म्य तथा लैंगं शैवं॰
स्कांदं तथैवच इत्यादि पाद्मो
त्तरखंडे ७४ अध्यायः ॥
लैंगी स्त्री लिंगिनी इतिराज
निर्घंटः लिंगसंबंधिनि त्रि ॥
लोक ऋ क दीप्तौ इतिक
विकल्पद्रुमः ऋ अलोकत् क
लोकयति इतिदुर्गादासः ॥
लोक ऋ ङ ईक्षे इतिकवि
कल्पद्रुमः ऋ अलुलोकत् ङ
लोकते विलोकयेन्मो वपुरायु
रेहुंगमकाम विस्तार फलं हरि
णपः इत्यादौ विलोकनं विलोकः
पश्चात्तं करोतीति णो साध्यं ।
इतिदुर्गादासः ॥
लोकः पुं भुवने जनः इत्य
मरः सप्तलोक नामानि यथा
भूर्भुवः स्व र्महश्चैव जनश्च त
प एवच सत्यलोकश्च सप्तैते लो
कास्तु परिकीर्त्तिताः इत्यग्निपु
राणं अपिच भूर्लोको भुवः
स्वर्लोक स्त्रैलोक्य मिह भुच्यते
महर्जन स्तपः सत्यः सप्तलोकाः
प्रकीर्त्तिताः भूर्लोकः पार्थिवो
लोकोऽन्तरीक्ष भुवः स्मृतः
भाव्यो लोको दिवि होतच्छेषा
इहैं यथा क्रमं भूतसाधिप॰

तिर्य्यग्नि स्ततो भूतपतिस्ततः
वायुर्नभस्तोऽधिपति स्तेन वायु
र्नभपतिः भावाय सूर्याधिप
तिस्तेन सूर्यो दिवस्पतिः यक्ष
वीप्सरस श्चैव गुह्यकाः सहराक्ष
सैः भूर्लोक वासिनः सर्वे अंत
रीक्षचरान् शृणु मरुतः सप्तभिः
स्कंधैः रुद्रा स्तथैव चाश्विनौ आ
दित्यावसवः सर्वे तथैवच गवां
गनाः चतुर्थे तु महर्लोके तिष्ठ
न्ते कल्पवासिनः प्रजानांपतिभिः
सर्वैः सेव्यते पंचमो महान् जनः
सनत्कुमाराद्या वैराजश्च स्तथा
तपः षष्ठे तु संस्थिता ह्येते देवा
देवविरोधकाः सत्यस्तु सप्तमो
लोको ह्यपुनर्भववासिनां ब्रह्म
लोकः समाख्यातो ह्यप्रतीघातल
क्षणः महीतलात्सहस्राणां शतात्
ऊर्द्ध्वे दिवाकरः दश तानि ध्रुवे
यावद्द्विगुणे द्विगुणान्तरे दशभो
जन कोटयस्तु मेरु तुंगं ध्रुव
स्ततः त्रयो विंशति लक्षाणि
लोकेशोक उच्यते द्विगुणेषु स
हस्रेषु योजनानां शतेषु च लो
कान्तरमथैकैकं प्रवाहद्वे विधी
यते देव दानव गंधर्व यक्षराक्ष
स पन्नगाः भूत विद्याधराश्चैव अ
ग्नी

ते देवयोनयः ते ब्रह्माण्डस्य म
ध्यस्थाः परत स्तमसावृतं ततो
ऽग्नि वायु राकाशं ततो भूतादि
रुच्यते ततो महान् प्रधानञ्च प्र
कृतिः पुरुषः स्ततः पुरुषादीश्वरो
ज्ञेयो यस्य शक्त्यावृतं जगत्
शिवोमा मातृ देवानां युगपरत
रामतः इति देवीपुराणे ३९
लोकाभ्युदये ग्रहगति नामाध्या
यः दिक्पालानां लोकायथा
प्रजा पतिस्तु भगवान् गुणतः प्रे
क्ष्य देवता आधिपत्येषु सु
श्लेषु न्ययोजयत योगवित् यथा
एतामपि लोकानां देवतानां हि
तोत्तमाः चकार शक्रं राजानं
दैत्यानां दितिपूर्वजं पूर्वस्यां
कौशिको राजा दक्षिणस्यां यमो
दिशि वरुणः पश्चिमायांतु उत्त
रस्यां सदा धनी यथाप्रवर्तनो
क्ता यथा एवं विभज्य राज्या
नि भूमा गोकानि यानि च लोकां
श्चविद्ध्ये दिव्यान्द्रावय पृथक्
पृथक् कस्यचित्सूर्य्यसंकाशान् क
स्यचिद्वह्नि निर्मलान् कस्यचिद्वि
द्युद्विद्योतान्कस्यचिच्चन्द्रनिर्मलान्
नानावर्णान् कामगमाननेक शतयो
जनान् सतान् सुकृतिनां लोकान्·

पावनायच संस्थितान् भानुर्हे
ये तपसंति सौम्या स्तारागणाः
सदा एते सुकृतिनां लोकाये
शान्ताः पुण्यकर्मभिः ये यजंति
मखैः पुण्यैः समाप्त वर दक्षिणैः
स्वदम् विरता दान्ता ऋजवः स
त्यवादिनः दीनानुग्रहकर्त्तारो ।
ब्रह्मण्या लोकपूजिताः योग
युक्ता महात्मानो यान्ति तत्र तपो
ऽन्विताः सर्वमहाः तथाप्युक्ताकोपि
ता ये तमोजिताः । एवं ।
नियोज्य तनयान्स्वयं लोकपि ।
तामहः पौष्करे ब्रह्मसदन मारु ।
रोह प्रजापतिः सर्वैः स्वयंभूद
तेषु पावनेषु दिवौकसः रेमि
रे स्वेषु लोकेषु महेन्द्राद्याभिपा
लिताः इति वह्निपुराणे वारा
हप्रादुर्भावनामाध्यायः ॥
लोककान्ता स्त्री ऋद्धिनामौषधं
इति राजनिर्घण्टः ॥
लोकचक्षुः पुं सूर्यः इति श
ब्दमाला जनस्य लोचनञ्च ॥
लोकजित् पुं बुद्धः इत्यमरः
लोकधारः पुं कर्द्दमः इति
राजनिर्घण्टः ॥
लोकनाथः पुं बुद्धः इति ।
त्रिकाण्डशेषः ब्रह्मा इति शब्दर
त्ना

वली विष्णुः इति तस्य सहस्र
नाम स्तोत्रं शिवः यथा अ
किंचनः सन्प्रभवः स संपदामी
लोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्य्यते न
संति याथार्थ्यविदः पिनाकि
नः इति कुमारसंभवः ॥
लोकपालः पुं राजा इति ह
लायुधः दिक्पालः यथा इन्द्रो
वह्निः पितृपतिर्नैरृति र्वरुणो
ऽनिलः धनदः शंकरश्चैव लोक
पालाः पुरातनाः इति वह्निपुरा
णे ॥
लोकबान्धवः पुं सूर्यः इति ज
टाधरः ॥
लोकमाता स्त्री लक्ष्मीः इत्यमरः
लोकलोचनः पुं सूर्यः इति
शब्दरत्नावली ॥
लोकवाह्यः पुं सर्वाचारवर्जि·
तः यथा लोकवाह्यस्तु योवा
निगवाद्यपाचारवर्जितः इति जटा
धरः ॥
लोकविनायकः पुं शरविशे
षः यथा स्कंदपुराणे पृष्ठेच
आर्यक श्रासकादयः कोमता
स्ते भुवि ज्ञेया येच लोकवि
नायकाः सहस्र शत संख्या

ना मर्त्त्यलोकविचारिणः इति
वह्निपुराणं लोकविश्रुतिः
स्त्री जनश्रुतिः किम्वदन्ती इ
ति केचित् लोकायतं क्ली त
र्कभेदः चार्व्वाकशास्त्रं इत्यमरभ
रतौ लोकायतिकः पुं चार्व्वाकः
इति हेमचन्द्रः ॥
लोकालोकः पुं स्वनामख्या
तपर्व्वतः तत्पर्य्यायः चक्रवाडः
२ इत्यमरः हेमाद्रिद्वीपाम्
द्धीमोदश्च प्राकारवत् स्थितो गि
रौ लोकालोक इति स्वनामख्या
ते यतर्लोक्यते सूर्य्यरश्मिभिः
स्वप्यमानत्वात् इति लोकः न
प्यावहिः सूर्य्यकिरणापर्याप्त ।
लोक्यते इति अलोकः लो
क्यते कर्म्मणि घञ लोका
श्चासौ अलोकश्चेति लोकालोकः
चक्रमद्रीवक्रं वेडते वेष्टयति
चक्रवाडः वडि ङ वेष्टने घञ
ज्ञापकलिङ्गस्यानित्यत्वात् नणत्व
इति भरतः ॥
लोकेशः पुं ब्रह्मा इत्यमरः
बुद्धभेदः इति त्रिकाण्डशेषः ।
पारदः इति राजनिर्घण्टः ॥
लोकेश्वरः पुं बुद्धभेदः इति
त्रिकाण्डशेषः भुवनानां जना
नांच प्रभुश्च ॥
लोकेश्वरात्मजा स्त्री बुद्धशक्तिभे
दः तत्पर्य्यायः तारा २ महाश्रीः ३
ओंकारा ४ स्वाहा ५ श्रीः ६ मनोर
मा ७ तारिणी ८ जया ९ अनन्ता
१० शिवा ११ खदिरवासिनी १२
भद्रा १३ वैश्या १४ नीलसरस्वती
१५ शङ्खिनी १६ महातारा १७ व
सुधारा १८ धनन्ददा १९ त्रिलोचना
२० लोचना २१ इति हेमचन्द्रः ॥
लोच ऋ क भासि इति कविक
ल्पद्रुमः ऋ अललोचत् भासिदी
प्तौ किन्तु पुरुषोत्तम प्रणादे
वो भाष इति मूर्द्धन्य षकारम
ध्यवचनार्थं मारुतः इति दुर्गादा
~~सः ईदृः पर्य्यालोचनं प्रणिधा~~
लोच ऋ ङ इति दुर्गादासः
ईदृः पर्य्यालोचनं प्रणिधान
मिति यावत् ऋ अललोचत्
ङ लोचते कार्य्यं सुधीः इति
दुर्गादासः ॥
लोचं क्ली अश्रु इति जटाधरः
लोचकः पुं मांसपिण्डः अक्षितारका
कज्जलं स्त्रीणां ललाटाभरणं कदली
नीलवस्त्रं निर्बुद्धिः कर्णाभरणं मूर्व्वी
भ्रूरप्यचर्म्म इति मेदिनी नि
र्म्मोकः इति शब्दरत्नावली ॥

लोचनं क्ली चक्षुः इत्यमरः त
स्य शुभाशुभलक्षणं यथा वक्ता
न्तैः पद्मपत्राभैर्लोचनैः सुखभागिनः
नः मार्ज्जारलोचनैः पापा महात्मा
मधुपिङ्गलैः क्रूराः केकरनेत्रा
श्च हरिणाक्षाः सकल्मषाः जिह्मै
श्च लोचनैः गम्भीराक्षा ईश्वराः स्यु
र्मन्त्रिणः स्थूलचक्षुषः नीलोत्प
लाक्षा विद्वांसः सौभाग्यं श्यावचक्षु
षां साक्षात्तारकाक्षाणां म
हाणां मृत्युरेव किल । स
दुःखाताश्च पापाः स्युर्निःस्वाः स्यु
दीर्घलोचनाः हक्स्निग्धा विद्ध।
ना भोगे अल्पायुत्तीति चोन्न
ता विशाललोचनताक्षलिनि दरिद्रा
विषमभ्रुवः इति गारुडे ६६ ।
अध्यायः ॥
लोचनहिता स्त्री तत्पाञ्जने इति
राजनिर्घण्टः ॥
लोचना स्त्री बुद्धशक्तिभेदः अ
स्याः प्रमाणं पर्य्यायाश्च लोकेश्वरा
त्मजा शब्दे द्रष्टव्याः ॥
लोचनामयः पुं चक्षूरोगविशे
षः तत्पर्य्यायः अभिष्यन्दः २
इति त्रिकाण्डशेषः ॥
लोचनी स्त्री महाश्रावणिका इ
ति
राजनिर्घण्टः ॥
लोचमर्कटः पुं लोचमस्तकः इ
त्यमरटीकायां स्वामी
लोचमस्तकः पुं मयूरशिखाक्षु
पं रुद्रजटा इति ख्यातः हेम
न्तयमानिकेति केचित् तत्पर्य्यायः
घरास्या २ कारवी ३ दीप्यः ४
मयूरः ५ इत्यमरः लोचमर्क
टः ६ इति भरतः ॥
लोट ऋ उन्मादे इति कविक
ल्पद्रुमः ऋ अललोटत् लोट
ति लोकः उन्मादवान् स्यात् इति
दुर्गादासः ॥
लोड्डुलः पुं अभिलाटकः इति
संक्षिप्तसारोणादिवृत्तिः
लोड ऋ उन्मादे इति कवि
कल्पद्रुमः ऋ अललोडत्
इति दुर्गादासः ॥
लोणात्तरं क्ली लवणास्त्रं
इति राजनिर्घण्टः ॥
लोणा स्त्री क्षुद्राम्लिका इति
राजनिर्घण्टः ॥
लोणारं क्ली लवणविशेषः
तत्पर्य्यायः लवणोत्थं २ लव
णाकरजं ३ लवणमदः ४ ज
लजं ५ लवणासारः ६ लव
णावणः ७ अस्यगुणाः सत्
क्षारत्वं तीक्ष्णत्वं पित्तहवि

नेःक्रूराः से नानेत्रा गल लोच

कारित्वं सारत्वं रुचत्वं वात गुल्मादि मूत्रनाशित्वं च इतिराजनिर्घण्टः ॥

लोणाम्ला स्त्री लघ्वाम्लिका। इति राजनिर्घण्टः ॥

लोतं क्ली स्तेयधने तत्पर्यायः लोप्त्रं २ इतिजटाधरः ॥ लोप्त्रं ३ लोत्रं ४ लप्त्रं ५ इतिशब्दरत्नावली ॥

लोतः पुं क्ली नेत्राम्बु इति त्रिकाण्डशेषः चिह्नं इतिसिद्धान्तकौमुद्यामुणादिवृत्तिः लवणं अश्रुपातः इति संक्षिप्तसारोणादिवृत्तिः ॥

लोत्रं क्ली लोतं इतिशब्दरत्नावली नेत्रजलं इति संक्षिप्तसारोणादिवृत्तिः ॥

लोधः पुं स्वनामख्यातवृक्षः रक्तवर्णोऽस्य तस्य पर्यायः तिरीटः २ मार्जनः ३ द्रुकः ४ लोध्रः ५ तिल्वकः ६ श्वेतस्य तस्य पर्यायः पुण्ड्रः १ शाबरलोध्रः २ महालोध्रः ३ शाबरः ४ इतिरत्नमाला अस्य गुणाः अस्य गुणाः अस्त्रकफवातनाशित्वं चक्षुष्यत्वं शोथजित्वं सरत्वंच इतिराजवल्लभः ॥

लोध्रः पुं लोधवृक्षः तत्पर्यायः वः गालवः २ शाबरः ३ तिरीटः ४ तिल्वः ५ मार्जनः ६ इत्यमरः ॥ षट् लोध्रमात्रे लोध्र इति ख्याते षट्श्वेतलोध्र इति सुभूतिः त्वाद्य पादः श्वेतलोध्र शेषारक्तलोध्र इतिस्वामी । तस्य पर्य्यायान्तरं यथा रोध्रः ७ भिल्लतरुः ८ भिल्लकः ९ कोडकीलकः लोध्रकद्रुमः ११ शम्बरः १२ हस्तिरोध्रकः १३ तिलकः १४ कोटनीलकः १५ हेमपुष्पकः १६ भिल्ली १७ शाबरकः १८ अस्य गुणाः कषायत्वं शीतलत्वं वात कफास्त्रनाशित्वं चक्षुष्यत्वं विषघ्नत्वं तत्र· विशिष्टो वल्कलोध्रकः इतिराजनिर्घण्टः अपिच लोध्रस्तिल्वस्तिरीटश्च शाबरो गालवस्तथा द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः जीर्णपत्रो बृहत्पत्रः पट्टी लाक्षाप्रसादनः लोध्रो ग्राही लघुः शीत चक्षुष्यः कफपित्तनुत् कषायो रक्तपित्तास्रग्ज्वरातीसार शोथहृत् इति भावप्रकाशः ॥

लोध्रकवृक्षः पुं लोध्रः इतिराजनिर्घण्टः ॥

लोपः पुं छेदः आकुलीभावः

लुपधातो भावे घञ् प्रत्यये निष्पन्नोऽयं व्याकरणमते वर्णनाशः तथाहि नाशविधिर्य्यालोपोऽस्मो माङ्गो विसादि अपिच सकलेभ्यो विधिभ्यः स्माहली लोपविधिस्तथा लोपस्वरादेशयोस्तु स्वरादेशो विधिर्बली इतिदुर्गादासः ॥

लोपा स्त्री अगस्त्यमुनिपत्नी। इतिजटाधरः ॥

लोपाकः पुं शृगालः इति त्रिकाण्डशेषः ॥

लोपापकः पुं शृगालः इति शब्दमाला ॥

लोपापिका स्त्री शृगाली इति शब्दमाला ॥

लोपामुद्रा स्त्री अगस्त्यमुनिभार्य्या इत्यमरः लोपयति योषितां रूपाभिमानमिति लोपा पश्चात् आमुद्रयति स्वस्थः स्फीतिमिति आमुद्रा अनन्तरं कर्म्मधारयः किंवा नमुदं राति अमुद्रा पतिशुश्रूषाया लोपे अमुद्रा लोपामुद्रा लोपा च लोपामुद्रा तु वैदर्भी लोपा स्त्री कुम्भजन्मनः इति कण्ठभूषणं इतिभरतः अस्या अर्घ्यदान प्रसंगेन अगस्त्यार्घ्य दानं लिख्यते अगस्त्यार्घ्यदानन्तु सौरेण सिंहगते विधानात् यथा अप्राप्ते भास्करे कन्यां शेषभूते त्रिभिर्दिनैः अर्घ्यं दद्युरगस्त्याय गौडदेशनिवासिनः नारसिंहे शंखे तोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतं मन्त्रेणानेन वै दद्याद्दक्षिणाशामुखस्थितः काशपुष्प प्रतीकाश अग्निमारुतसंभव मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते प्रार्थनन्तु आतापि भक्षितो येन वातापिश्च महासुरः समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु गंधादिकन्तु अगस्त्याय नम इत्यनेन देयं विशेषानुद्देशे सामान्यतः प्राप्तत्वात् इति दक्षिणाशामुखस्थित इति गंधादावपि अर्घ्यांगकर्त्तृधर्मत्वादिति रत्नाकरः तत्पत्न्यर्घ्यदान मन्त्रस्तु लोपामुद्रे महाभागे राजपुत्रि पतिव्रते गृहाणार्घ्यं मया दत्तं मैत्रावरुणिवल्लभे इतिमलमासतत्त्वे ॥

लोपामुद्रापतिः पुं अगस्त्यमुनिः इतिपुराणं ॥

लोपाशकः पुं शृगालः इति हारावली ॥

लोपाशिका स्त्री शृगाली इति
हारावली ॥
लोप्त्रं क्ली स्तेयधने लोतं।
इत्यमरः ॥
लोप्त्री स्त्री लोप्त्रं इति शब्द-
रत्नावली ॥
लोभः पुं आकांक्षा परद्रव्याभि
लाषः तत्पर्यायः तृष्णा २।
लिप्सा ३ वशः ४ स्पृहा ५ कांक्षा
६ शंसा ७ गर्द्धः ८ वाञ्छा ९ इ
च्छा ११ तृट् १२ मनोरथः १३ कामः
१४ अभिलाषः १५ इति हेमचंद्रः।
तस्य लक्षणं यथा । पर-
वित्तादिकं दृष्ट्वा नेतुं योहृदि
जायते अभिलाषो द्विजश्रेष्ठ स
लोभः परिकीर्तितः इति पा
द्मे क्रियायोगसारे ९ अध्यायः
॥ स च ब्रह्मणोः धराज्जातः।
यथा भ्रूमध्य सम्भवेत् क्रोधो।
लोभ श्चाधर संभवः इति मा
त्स्ये सर्वोत्पत्तिर्नाम ३ अध्यायः
॥ सत्व नाश कारणं यथा
लोभ प्रमाद विश्वासैः पुरुषो
नश्यते त्रिभिः तस्माल्लोभो न
कर्त्तव्यः प्रमादो न न विश्वसेत्।
इति गारुडे नीतिसारे ११५ अ-
ध्यायः अपिच त्रिविधं नरक
स्येदं द्वारं नाशनमात्मनः कामः
क्रोधस्तथा लोभ स्तस्मादेतत्त्रयं
त्यजेत् इतिश्रीभगवद्गीतायां १६
अध्यायः ॥
लोभी न त्रि लोभयुक्तः तत्प
र्यायः गृध्नुः २ गर्द्धनः ३ लुब्धः ४
अभिलाषुकः ५ तृष्णकः ६ लोल
पः ७ लोलुभः ८ इतिजटाधरः
लिप्सुः ९ इतिहेमचंद्रः ॥
लोभ्यः पुं मुद्गः इतिहेमचंद्रः
लोभनीये त्रि
लोमं क्ली लांगलं इति जटा
धरः ॥
लोम न क्ली शरीरस्थकेशः त
त्पर्यायः तनूरुहं २ रोम ३
इत्यमरः तनुरुहं ४ तनूरुट् ५
इति शब्दरत्नावली तत्तु गर्भस्थ
स्य षष्ठेमासि भवति इतिसुखबोधः
अपिच षष्ठेमासिच नारीणांवै
दिके नाधिकारिता उदरस्थस्य
बालस्य नख लोम प्रवर्त्तनात्
इति स्मृतिः ॥
लोमकर्णि स्त्री मांसच्छदा इ
तिराजनिर्घंटः ॥
लोमकर्णः पुं शशकः इतिहेम
चंद्रः लोमयुक्तकर्णविशिष्टेत्रि
लोमघ्नं क्ली इंद्रलुप्तकं रोग इति

भाषा इति भूरिप्रयोगः लो
मशातके त्रि ॥
लोमपादः पुं अंगदेशीयराज
विशेषः सतु ऋष्यशृंगमुनिश्व
शुरः इतिरामायणं ॥
लोमपादपूः स्त्री पुरीविशेषः
अधुनाभागलपुर इति ख्याता।
तत्पर्यायः चंपा २ मालिनी ३
कर्णपूः ४ इति हेमचंद्रः ॥
लोमफलं क्ली भव्यं इतिराज
निर्घंटः ॥
लोमविषः पुं व्याघ्रादिः इति
हेमचंद्रः
लोमशः पुं मुनिविशेषः मेषः
अतिलोमान्विते त्रि । इति मे
दिनी कदाचिद्दन्तुरो मूर्खः।
कदाचिल्लोमशः स्वधी इतिसा
मुद्रकं ॥
लोमशकांडा स्त्री कर्कटी इ
तिराजनिर्घंटः ॥
लोमशपर्णिनी स्त्री माषपर्णी
इतिशब्दचंद्रिका ॥
लोमशपुष्पकः पुं शिरीषवृक्षः
इतिराजनिर्घंटः ॥
लोमशमार्जारः पुं मार्जारविशे
षः गंधगकुला इतिभाषा त-
त्पर्यायः पूतिकः २मार्ज्जातकः
३ सुगंधी ४ मूत्रपातनः ५ गं
धमार्जारकः ६ इतिराजनिर्घंटः
अस्य गुणाः गंधमार्जारवीर्य
न्तु वीर्यकृत्कफवातहृत् कंडूको
ष्ठहरं नेत्र्यं सुगंधं स्वेदगंधनुत् ।
इतिभावप्रकाशः ॥
लोमशा स्त्री काकजंघा मांसी
वचा शूकशिम्बिः महामेदा।
कासीसं शाकिनीभेदः इतिमे
दिनी अतिबला इति विश्वः
शणपुष्पी एर्वारुः गंधमांसी
इतिराजनिर्घंटः ॥
लोमशातनं क्ली लोमपातनं
तस्यौषधानि यथा हरितालं
शंखचूर्णं कदलीदलभस्मना
एतद्द्रव्येण चोद्धर्त्तं लोमशात
नमुत्तमं लवणं हरितालंच तेंदु
ल्याम्रफलानिच लाक्षारस स
माधुक्तं लोमशातन मुत्तमं तथा
च हरितालंच शंखंचैव मनःशि
ला सैंधवेन सहैकत्र छाग
मूत्रेण पेषयेत् तत्क्षणोद्धर्त
नादेव लोमशातन मुत्तमं इति
गारुडे १९५ अध्यायः ॥
लोमहर्षणं क्ली रोमांचः इ
त्यमरः
लोमहर्षणः पुं सूतः यथा

पुराणसंहितांचक्रे पुराणार्थविशारदः प्रख्यातो व्यासशिष्योऽभूत्सूतो वै लोमहर्षणः पुराणसंहितां तस्मै ददौ व्यासो महामुनिः इति विष्णुपुराणे ३ अंशे ७ अध्यायः सचैव बलरामेण हतः यथा तत्रागते बलभद्रे निहतो लोमहर्षणः बलरामास्त्राकुलात्मा नैमिषेऽभूत्स्वबोधया इति कल्किपुराणे २७ अध्यायः ॥

लोमहृत् पुं हरिताले इति हेमचंद्रः

लोमालिका स्त्री शृगालिकाया लोमालिका रोमजिका। किंचिदुल्कामुखीच सा इतित्रिकाण्डशेषः ॥

लोलः त्रि चंचलः साकांक्षः इत्यमरः ॥

लोला स्त्री जिह्वा लक्ष्मीः इति मेदिनी चंचलाक्षीच ॥

लोलार्कः पुं सूर्यः यथा सुकेश्युवाच ततः सुकेशि वचनात्सर्वएव निशाचराः तेनादिष्टं तेषां चक्रुः सदितमानसाः ततः प्रवृद्धिमगतराक्षसा गच्छन्निशाचराः पुत्रपौत्रार्थसंयुक्ताः सदाचारसमन्विताः तज्ज्योतिस्तेजसा तेषां राक्षसानां महात्मनां गतेः नाशक्नुवन्सूर्यो नक्षत्राणि च वै द्रुमाः ततस्त्रिभुवने ब्रह्मन्निशाचरपुरोऽभवत् दिवा सूर्यस्य सदृशः क्षणदायां च चन्द्रवत् ततः क्रोधाभिभूतेन भानुना विप्रभेदिभिः भानुभी राक्षस पुरं ददर्श च यथेच्छया तद्भानुना तदा दृष्टं क्रोधाध्मातेन चक्षुषा निपपाताम्बरात् हृष्टः क्षीणपुण्य इव ग्रहः पतमानं समालोक्य पुरं शालंकटंकटः नमो भवाय सर्वाय इदमुच्चैरथोद्यत तेषां क्रंदित माकर्ण्य चारणा गगनेचराः हाहेति चक्रुशुः सर्वे हरभक्तः पतत्यसौ तच्छ्रुत्वा वचः शार्वः श्रुतवान्सर्वतोऽव्ययः श्रुत्वा सच्चिन्तयामास केनासौ पात्यते भुवि ज्ञातवान्देवपतिना सहस्रकिरणेन तत् पातितं राक्षस पुरं ततः क्रुद्धस्त्रिलोचनः क्रुद्धस्तु भगवान् हरिभानुमन्तं समपश्यत दृष्टमात्रस्त्रिनेत्रेण निपपात ततोऽम्बरात् ततो ब्रह्मा सुरपतिः सर्वैः सार्द्धं समभ्ययात् रम्यं महेश्वरावासं तद्रवि कारणात् गत्वा दृष्ट्वा च देवेशं शंकरं

शूलपाणिनं प्रसाद्य भास्करार्थाय वाराणस्यामुपानयेत् ततो दिवाकरं भूयः पाणिना त्रयशंकरः कृत्वा नामास्य लोलेति रथमारोपयत्ततः आरोपिते दिनकरे ब्रह्माभ्येत्य सुकेशिनं सवान्धवं सनगरं पुनरारोपयद्दिवि इतिश्रीवामनपुराणे सुकेशिचरिते लोलार्कजननंनाम १५ अध्यायः ।

लोलिका स्त्री चांगरी यथा तुद्रा दन्तशठाम्लेष्टा चांगेरीलोलिकाच सा इतिजटाधरः ।

लोलितः त्रि श्लथः ढोलाइतिभाषा लुल विमर्दे अस्माद्भावे क्ति लोलः सोऽस्य जातः इत्यर्थे इतच्प्रत्ययेन निष्पन्नः ॥

लोलुपः त्रि अतिलुब्धः इत्यमरः लोलुभः त्रि लोलुपः इत्यमरः लोष्ट उ॰ संघाते इतिकविकल्पद्रुमः उ॰ लोष्टते भान्त्य। लोकः इतिदुर्गादासः ॥

लोष्टं क्ली लोहमलं इतिराजनिर्घंटः लेष्टुः इत्यमरः ॥

लोष्टः पुं क्ली मृत्तिकाखण्डे ढेलो इति भाषा तत्पर्यायः लेष्टुः २ इति शब्दरत्नावलीअमरश्च। लोष्टुः ३ दलिः ४ इतिहेमचंद्रः ॥

लोष्टघ्नः पुं लेष्टुभेदनः इत्यमरटीकायां भरतः ॥

लोष्टभेदनः पुं लोष्टभंगसाधन मुद्गरः मरे इति ख्याते इति केचित् तत्पर्यायः लेष्टुभेदनः १ लोष्टघ्नः २ लेष्टुघ्नः ३ कोटिशः ४ कोटीशः ५ इत्यमरटीका

लोष्टुः पुं लोष्टः इति हेमचंद्रः ॥

लोह क्ली अगुरु इत्यमरः ।

लोहः पुं क्ली लोहं जोगकं सर्वं तैजसं इतिमेदिनी ॥ रुधिरं इतिराजनिर्घंटः अथ मुंडलोहस्य पर्यायः मुंडं २ मुंडायसं ३ दृषत्सारं ४ शिलात्मजं ५ अश्मजं ६ कृषिलोहं ७ आरं ८ कृष्णायसं ९ अथ तीक्ष्णलोहस्य पर्यायः तीक्ष्णं २ शस्त्रायसं ३ शस्त्रं ४ पिंडं ५ पिंडायसं ६ शठं ७ आयसं ८ निशितं ९ तीव्रं १० खड्गं ११ मुंडजं १२ अयः १३ चित्रायसं १४ चीनजं १५ अस्य गुणाः रूक्षत्व उष्णत्व तिक्तत्व वात पित्त कफ प्रमेह पांडु शूल नाशित्व

तीक्ष्णत्वं मुंडादिकगणात्वंच इ
तिराजनिर्घंटः ॥ अथ लोह।
स्योत्पत्ति नाम लक्षण गुणाः
पुरा लोमिल दैत्यानां निहता।
नां सुरैः ऽपि उत्पन्नानि शरी
रेभ्यो लोहानि विविधानि च।
लोहोऽस्त्री शस्त्रकं तीक्ष्णंपिंडं
कालायसायसी गुरुत्वाद्दृढतो
त्क्लेद कफ दाहस्य कारिता अ
प्यमदोषः स्मृतैर्यो दोषाःसमाप
क्ष्यन्त लोहं तिक्तरसं शीतं म
धुरं तुवरं गुरु रूक्षं वयस्यं
चक्षुष्यं लेखनं वातलं जयेत्
कफं पित्तं गरं शूलं शोथार्शः
प्लीह पांडुताः मेदो मेह कृ
मीन्कुष्ठं तत्किट्टं तद्वदेव हि
षंदत्व कुष्ठामय मृत्युदं भवेत्
हृद्रोग शूलौ कुरुतेऽश्मरी
न्च नाना रुजांचापि तथा प्र
कोपं करोति हृल्लास मप्युद्द।
लोहं नीवहारि मदकारि विषासं
चेदशुद्धिमदसंस्कृतं ध्रुवं पा
टवं न तनुते शरीरके दारुणां
हृदि रुजांच यच्छति तत्सार।
लोहस्य लक्षणं गुणाश्च त
माञ्चल्लिखराकारादिंपगान्पंत
न लोहितं लोहे स्यंत्र सूक्ष्माणि
नत्

सार मभिधीयते लोहं सा
राकृयं हन्याद्ग्रहणी मतिसारकं
अर्द्दं सर्वांगजं वातं शूलंच
परिणामजं छर्दिंच पीनसंपि
त्तं स्वास मास्य अपोहति ॥
अथ कान्तलोहस्य लक्षणं गुणाश्च
यत्पात्रेन प्रसरति जले तैलविंदुः
प्रतप्ते हिंगु गंधं त्यजतिच नि
जं तिक्तता निम्बकल्कः । तप्ते
दुग्धं भवति शिखराकारकं नै
ति भूमिं कृष्णांगः स्यात्सजलचण
कः कान्तलोहं तदुक्तं गुल्मोदरा
र्शः शूलाम मामवातं भगन्दरं
कामलाशोथ कुष्ठानि क्षयं को
न मेयान्नयेत् प्लीहान मम्लपि
त्तंच यकृच्चापि शिरोरुजं सर्वाग्रो
गान्विजयते कांतलोहं नसंशयः
बलं वीर्यं वपुःपुष्टिं कुरुते
ऽग्निं विवर्द्धयेत ॥ अथ किट्टी।
ध्मायमानस्य लोहस्य मलं मुक्त
मुच्यते लोह सिंहाणिका किं
ट्टी सिंहाणंच निगद्यते यल्लोहं
यद्गुणं प्रोक्तं तत्किट्टमपि तत्
गुणं ॥ अथ लोहस्याशुद्धस्य
दोष माह षंदत्व कुष्ठामय
मृत्युकारि हृद्रोग शूलौ कुरु
तेऽश्मरींच नानारुजानाञ्च तथा प्रको

पं कुर्याच्च हृल्लास मशुद्धलोहं
॥ अथ लोहस्य दोष शांतये
शोधन मभिधीयते पत्तलीकृत
पत्राणि लोहस्याग्नौ प्रतापयेत्
निषिंचेत्तप्त तप्तानि तैले तक्रेच
कांजिके गोमूत्रे च कुलत्थानां ।
कषाये च त्रिधा त्रिधा एवंलोह
स्य पत्राणां विशुद्धिः संप्रजाय
ते अथ लोहस्य मारण विधिः
शुद्धलोह भवं चूर्णं पातालगरु
डीरसैः मर्द्दयित्वा पुटेद्वह्नौ दद्या
देवं पुटद्वयं पुटत्रयं कुमार्याश्च।
कुठारच्छिन्निकारसैः पुट षट्कं
ततो दद्यादेवं तीक्ष्ण मृतिर्भ
वेत् अन्यच्च क्षिपेद्द्वादशमांशे
न दरदं तीक्ष्ण चूर्णतः मर्द्द
येत् कन्यकाद्रावै र्यामयुग्मं ततः
पुटेत् एवंसप्तपुटै र्मृतःलोह
चूर्णं मवाप्नुयात् सप्तोऽयमुक्तो
योगीन्द्रैः क्रमोऽन्यो लोहमारणे
॥ कथ्यते रामराजेन कौतूह
लधियाधुना सूतकाद्द्विगुणां ग
न्धं दत्वा कुर्याच्च कज्जली द्वयोः
समं लोहचूर्णं मर्द्दयेत् कन्यका
द्रवैः यामयुग्मं ततःपिंडं कृत्वा
ताम्रस्य पात्रके धर्म्मे धृत्वाऽरु
कस्य पत्रैराच्छादयेद्बुधः यामद्व
या

द्रवेऽत्युष्णे धान्य राशौ न्यसेत्त
तः दत्वोपरि शरावंच त्रिदिना
न्ते समुद्धरेत् पिष्ट्वाच गालयेद्व
स्त्रादेवं वारितरं भवेत् दाडिम
सदलं पिष्ट्वा तत्तत्तुर्गुण वारि
णा तद्रसेनायसश्चूर्णं सञ्जीया
ल्लावयेदपि आतपे शोषयेत्त
च्च पुटेदेव पुनःपुनः एकविं
शतिवारै र्ल्लन्म्रियते नात्र संशयः
एवं सर्व्वाणि लोहानि स्वर्णादीन्य
पि मारयेत् एवंमारित लोहस्य गु
णाः लोहं तिक्तं सरं शीतं कषायं
मधुरं गुरु रूक्षं वयस्यं चक्षुष्यं ले
खनं वातलं जयेत् कफं पित्तं ग
रं शूलं शोथार्शः प्लीह पांडुताः
मेदो मेह कृमीन्कुष्ठं तत्किट्टं
तद्वदेव हि गुणा येकांसमार
स्य यावत्स्वेव रक्तिकाः ।
तावल्लोहं समश्नीया द्यथा दोषा
नलं नरः कूष्मांडं तिलतैलंच
माषान्नं राजिकान्तथा मद्यमम्ल
रसंचैव वर्ज्जयेल्लोहसेवकः इति
भावप्रकाशः लोहपात्रे भक्षण
निषेधो यथा यदात्र आयसे
पात्रे पक्व मश्नाति वै द्विजः स
पापिष्ठोऽपि भुंक्तेऽन्नं रौरवेप
रिपच्यते इतिमत्स्यसूक्त १

तत्रे अपिच अयः पात्रे पयः
पानं गव्यं सिद्धान्नमेव च ॥ ष्ट
शादिकं मधु गुडं नारिकेलो
दकन्तथा फलं मूलञ्च पात्रि
विद्भस्से मुनि र ब्रवीत् इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।
लोहकण्टकः पुं मदनवृक्षः इ
तिशब्दचन्द्रिका लोहमयकण्टक
श्च लोहकान्तं क्ली अयस्कान्ते
इतिराजनिर्घण्टः ॥
लोहकारः पुं लोहकारकः।
इति हलायुधः ॥
लोहकारकः पुं वर्णसङ्करजा
तिविशेषः कामार इति भाषा
तत्पर्यायः व्योकारः २ इत्य
मरः लोहकारः ३ अयस्कारः ४
कर्मकारः ५ कर्मारः ६ इति भ
रत स्मृत्येषा तस्योत्पत्ति यथा।
गोपालात्तन्तुवाया वै कर्मका
रोः कुम्भकारतः । इति परा
शरपद्धतिः ॥
लोहकिट्टं क्ली लोहमलं तत्प
र्यायः किट्टं २ लोहचूर्णं ३
अश्मोमलं ४ लोहजं ५ कृष्णचू
र्णं ६ लोष्टं ७ लोहमलं ८ अस्य
गुणाः मधुरत्वं उष्णत्वं कृमि।
वात शुक्रिभूत मद्कृत्तलमेह
गुल्म

शोफ नाशित्वञ्च इति राज
निर्घण्टः अपिच ध्मायमानस्य लो
हस्य मलं मण्डूर मुच्यते ।
लोहसिंहानिका किट्टो सिंहाणं
च निगद्यते यल्लोहं यद्गुणं।
प्रोक्तं तत्किट्ट मपि तद्गुणं।
इतिभावप्रकाशः ॥
लोहचूर्णं क्ली लोहकिट्टं इति
राजनिर्घण्टः ॥
लोहजं क्ली लोहकिट्टं इति
राजनिर्घण्टः कांस्य इति हे
मचन्द्रः ॥
लोहद्रावी न पुं टङ्कणः इतिरा
जनिर्घण्टः ॥
लोहनालः पुं नाराचः इति
त्रिकाण्डशेषः ॥
लोहपृष्ठः पुं कङ्कपक्षी इत्य
मरः लोहमयपृष्ठयुक्तेत्रि ॥
लोहप्रतिमा स्त्री लोहमयीप्रति
मा तत्पर्यायः सूर्मी १ स्थूणा २
इत्यमरः सूमी ४ सूर्मिः ५ सू
र्म्मः ६ इति भरतः सूर्मिका ७
इतिशब्दरत्नावली ॥
लोहमयं त्रि लोहात्मकं लो
हनिर्मितं लोहशब्दात्तद्रूपार्थम
यट् प्रत्ययेन निष्पन्नं ॥
लोहमारकः पुं शालिञ्चशाकः

इतित्रिकाण्डशेषराजनिर्घण्टौ ॥
लोहलः पुं शृङ्खलाचार्यः इति
मेदिनी ॥
लोहलः त्रि अव्यक्तवाक् इत्य
मरः लोहग्राहकश्च ॥
लोहवरं क्ली स्वर्णं इतित्रिकां
डशेषः ॥
लोहश्लेषणः पुं टङ्कणः इतिहे
मचन्द्रः ॥
लोहसङ्करं क्ली वर्त्तलोहं इति
राजनिर्घण्टः मिश्रितलोहसञ्च।
लोहाख्यं क्ली अगुरु इतिरत्न
माला
लोहाभिसारः पुं लोहाभिहारः
इत्यमरटीकायां भरतः ॥
लोहाभिहारः पुं शस्त्रभृतां रा
ज्ञां नीराजनाविधिः इत्यमरः ॥
महानवम्यां दीप्तायां अश्वादी।
नां नीराजने सति पश्चात्सह।
धारिणा राज्ञा यः शस्त्राकोनि
र्मार्जन प्रधानो विधिःअस्यानाम्ना
क्त लोहाभिहारः लोहस्य श
स्त्रस्य अभिहारः सर्वलोहराणाम
त्रेति वरुडीदिः लोहाभिहारउक्त
क्तो विधि र्नी राजनोत्तर ३।
समरमाला लोहं क्ली शस्त्र
केलोहे इति मेदिनी लोहा

भिसार इतिपठन्त्यन्ये तत्र लो
हंशस्त्रं अभिसार्यते प्रस्थाप्यते
ऽनेति बंधारनाथधारे निः शो
षेण राजनं यत्र सा नीराजना
नीरस्य शान्त्युदकस्य अञ्जनेत्ते
पो यत्रसा नीराजना वा इतिभ
रतः लोहार्गलः पुं तीर्थविशे
षः यथा वराह उवाच शृणु
देविच तत्वेन यस्मात्त्वं परिपृ
च्छसि गृहान्यत्र वसामि म
हतः कर्मणो गतिः ततःसिद्धव
टे गत्वा विंशद्योजने स्थलतः स्त्र
छ मध्ये वराहे हिमवन्तं
समाश्रितं तत्रलोहार्गलं नामनि
वासं मे विधीयते गुह्या पंचद
शा यत्र समन्तात्संचयोजनं
स्थलम्भं प्राप्यमुक्तानां मम कर्मा
नुसारिणां तत्रतिष्ठाम्यहं भद्रे उदी
चीं दिशमाश्रितः तत्रब्रह्मा च
रुद्रश्च स्कन्देन्द्रश्च मरुद्गणाः
आदित्या वसवो रुद्रा अश्विनौ
च महौजसः सोमो बृहस्पतिश्चै
व ये चान्ये च दिवौकसः तेषा
चैवागते दृष्ट्वा चक्रं रुद्रस्य म
होजसं ततो मे सानवाः सर्वत्र
मन्तो लोककृत्तमं मयाचैवान्त
रे कृत्वा कृत्वा मायाञ्च वैसंवी श

नकोटिसहस्राणि शीघ्रमेवनि
पातितं एवं लोहार्गलेत्यासीन्ना
म मेतत्प्रकारितं एकधारापत
त्तत्र इन्द्रगोपक संनिभा यत्त
त्र कुरुते स्नानं समरायोषितो
नरः ब्रह्मलोकं समासाद्य ब्र
ह्मणासह मोदते अथात्रमुसते
प्राणानहंकार विवर्जितः ब्र
ह्मलोकं परित्यज्य मम लोकं
प्रपद्यते गुह्याख्याने महाभा।
गेस्मिन् लोहार्गले मम सिद्धि
कामेन मर्त्येन गन्तव्येनाऽत्रसं
शयः पतेत कस्मिंते भद्रे लो
हार्गल निवासिनः माहात्म्यप
श्यपत्नाति गुह्यं पंच महोज्जसं
मंगल्यंच पवित्रंच मम भक्तस
ख्यावहं इत्यादि वराहपुराणे।
लोहार्गलमाहात्म्य वर्णनेन।
माध्यायः लोहकीलके क्लीही
च लोहि क्ली स्वेतटंकरो इति
कश्चिद्राजनिर्घंटः ॥
लोहिका स्त्री लोहपात्रे तत्प
र्यायः स्वरकोदः २ खरपात्रं।
३ इतित्रिकांडशेषः ॥
लोहितं क्ली रक्तगोशीर्ष·
कुंकुमं रक्तचंदने इतिमेदिनी
पतंगं इतिचन्दने त्वरा।

कुंकुमं रुधिरं इतिराजनिर्घंटः
॥ युद्धे इति हेमचंद्रः॥
लोहितः पुं नदविशेषः भौमः
रक्तवर्णं इति मेदिनी । रोहि
तमत्स्यः मृगविशेषः इतिशब्द
रत्नावली सर्पः सरान्तरः ।
इति धरणिः मसूरः इतिशब्द
चंद्रिका रक्तालुः रक्तशालिः
इति राजनिर्घंटः बलेभद्रः
इतिहेमचंद्रः ॥
लोहितः त्रि रक्तवर्णयुक्तः इ
त्यमरः ॥
लोहितके क्ली रीतिः इतिराज
निर्घंटः ॥
लोहितकः पुं मंगलग्रहः इति
शब्दमाला पद्मरागमणिः इति
हेमचंद्रः ॥
लोहितचंदनं क्ली कुंकुमं इ
तिहेमचंद्रः २। रक्तचंदनेच
लोहितपुष्पकः पुं दाडिमवृक्षः
इतिभावप्रकाशः ॥
लोहितमृत्तिका स्त्री गैरिकं।
इतिरत्नमाला रक्तवर्णमृत्तिका
च लोहिता स्त्री रागादिनारक्त
वर्णा इतिजटाधरः वराहक्रांता
इतिशब्दचंद्रिका रक्तपुनर्नवा
इतिराजनिर्घंटः ॥

लोहितांगः पुं मंगलग्रहः इ
त्यमरः कम्पिल्लकः इतिरा
जनिर्घंटः ॥
लोहिताननः पुं नकुलः इति
राजनिर्घंटः रक्तवर्णमुखेत्रि ।
लोहितायः स क्ली ताम्रं इतित्रि
कांडशेषः ॥
लोहितायसं क्ली रक्तवर्णलो
हजातिः इतिमुग्धबोधव्याकर
णं लोहिताक्षः पुं विष्णुः इति
शब्दमाला कोकिलः इतिशब्द
चंद्रिका रक्तवर्णचक्षुर्युक्ते त्रि।
लोहिनी स्त्री रक्तवर्णास्त्री यथा
रोहिणी रोहिता रक्ता लोहिनी
लोहिताच सा इतिजटाधरः ॥
लोहोत्तमं क्ली स्वर्णं इतिहे
मचंद्रः ॥
लौकायतिकः पुं तार्किकभेदः
चार्वाकशास्त्रवेत्ता लोकायते
वेति इत्यर्थे ष्णिकप्रत्ययेननिष्प
न्नोऽयं ॥
लौकिकः त्रि लोकव्यवहारप्रसि
द्धः यथा वैदिका लौकिकाश्चै
तस्मिये यथोक्ता स्तथैव ते नि
र्णीतार्थास्तु विज्ञेया शास्त्राणे
षा महेश्वरः इतिकलापव्याक
रणे संधिवृत्तौ प्रथमप्रकरणे।

हित इत्यर्थेच ष्णिक प्रत्यय
निष्पन्नः इतिमुग्धबोधव्याकरणं
लौकिकता स्त्री लोकव्यवहारप्रसि
द्धत्वं शिष्टाचारेऽस्य शब्दस्यभूरि
प्रयोगः ॥
लौकिकाग्निः पुं असंस्कृताग्निः
यथा न पैत्र्य यज्ञियो होमो
लौकिकोऽग्नौ विधीयते इतिश्रा
द्धतत्वे ॥
लोड ऋ उन्मादे इतिकविक
ल्पद्रुमः चतुर्दशस्वरी ऋ अत्र
उत् इतिदुर्गादासः ॥
लोहः पुं लोहः इत्यमरटीका
यां भरतः सच पंचविधः यथा
कान्तिः १ पांडिः २ कांतः ३
कालिंगः ४ वज्रकः ५ अस्यैव
योऽष्टविधसंस्कारः यथा शा
लिवर्षणं १ उद्वर्तनं २ अग्निभा
वनं ३ आतपशोषः ४ निषेकः ५
मारणं ६ मर्दनं ७ तालनं ८
सूर्यपाकः ९ स्थालीपाकः १० पु
टीने ११ पुटपाकः १२ पाकनिष्प
न्नः १३ अस्यगुणाः आयुर्बल
वीर्य कामदातृत्वं रोगनाशि
त्वं श्रेष्ठतस्य गुणाः पांडु शू
लार्शः कुष्ठ पांडु प्रमेहमेद
वायु नाशित्वं । वयःस्थैर्यंच

लुप्ततेजः कारित्वं मारकत्वं ।
गुरुत्वंच शोधितस्यास्य गुणा
सर्वरोग नाशित्वं मरणनाशि
त्वंच अशुद्धस्य तस्य गुणाः ।
जारणायोग्यत्वं आयुर्नाशक
त्वं रोगहृत्पीडा त्वमा जडत्व।
कारित्वंच इति रत्नावल्यादयः
अन्यल्लोहशब्दे द्रष्टव्यं ॥
लोहचारकः पुं नरकभेदः
यत्रनिगडे बध्यन्ते इतिपुराण
लोहजं क्ली मण्डूरं इतिरत्न
माला ॥
लोहभांडः पुं अश्मभाले हाम
न्दिस्ता इति भाषा इतिशब्द
चंद्रिका लोहनिर्मितभांडे क्ली।
लोहभूः स्त्री कठिनी सात
लोहपात्रविशेषः यथा लोहा
त्वाचाग्राप्तालोहा लोहभूः कटि
लौह्यपि इतिशब्दचंद्रिका ॥
लोहमलं क्ली लोहमल इति
राजनिर्घण्टः ॥
लोहशंकुः पुं नरकविशेषः
यत्रसूचीभि र्भिद्यते इतिपुरा
णं लोहनिर्मितकीलकश्च ॥
लोहा स्त्री लोहभूः इतिशब्द
चंद्रिका ॥
लोहात्मा स्त्री लोहभूः इतिश

चंद्रिका ॥
लौहितः पुं लोहितः । इति
लोहितशब्दात्स्वार्थेऽण् प्रत्ययेन
निष्पन्नं लोहितसम्बन्धिनि त्रि
लौहितीकः त्रि लोहितवर्णवि
ष्टः इति लोहितशब्दात् इवार्थे
ईकक प्रत्ययेन निष्पन्नं इतिसि
द्धान्तकौमुदी ॥
लौहित्यं क्ली लोहितत्वे इति
मेदिनी ॥
लौहित्यः पुं नदभेदः स च
ब्रह्मपुत्रः इति मेदिनी सागर
इतिशब्दमाला तस्य नदवि
शेषस्य उत्पत्ति र्यथा सगर
उवाच अमोघायां कथं जज्ञे
लौहित्यो ब्रह्मणः सुतः कथं
शांतनुभार्यायां रतः सकमला
सनः पारक्षेत्रेण्य पुत्रो वा कथं
जज्ञे पितामहात् तत्सर्वं श्रो
तुमिच्छामि कथयस्व द्विजोत्तम
और्व उवाच शृणु त्वं नृपशार्दू
ल कथयामि महत्तरं आख्याने
ब्रह्मपुत्रस्य लौहित्यस्य महात्म
नः हरिवर्षे महावर्षे शान्तनु
र्नाम नामतः मुनि रासीन्महा
भागो ज्ञानवान् सततपोयतः तस्य
भार्या महाभागा अमोघाख्या ।

महासती हिरण्यगर्भस्य मुनेस्तां
वृद्धाप्यमोघवा तया सार्द्धं स
कैलासमध्यादापर्वतेऽवसत् ।
लौहित्याख्यस्य सरस स्तीरे वै
गंधमादने एकदास उपोनि।
धी निजपुष्पादिगोचरे जगाम
वनमध्यन्तु चिन्वन् वल्कलानि
च तस्मिन्नवसरे ब्रह्मा सर्वलो
कपितामहः तत्राजगाम यत्रा
स्ति अमोघा शान्तनोः प्रिया तां
दृष्ट्वा देवगर्भाभां युवती मतिसु
न्दरीं मोहितो मदनेनाशु तया
भूहर्षितेन्द्रियः उदीरितेन्द्रियोऽभू
त्वाजित्तस्था महासती अथ्या।
धावतरा ब्रह्मा संयतो मदना।
र्दितः धावमानं विधातारं दृष्टा
मोघामहासती सैवं सैव स्थितिश्चा
ह्यापर्णशालां व्यलीयत इदंचा।
वाचधातारं अमोघा कुपितातदा
पर्णशालान्तरं गता द्वारमावृत्य
तत्राणात् अकार्यंन्नमया कार्यं
मुनिपत्न्या विगर्हितं बलात्सम।
भिचारं तत्वया स्वांच शापामय
हं अमोघया चैव मुक्ते विधात
श्च तदाल्प रेतश्चस्कन्दवतैदे
वाश्रमे शान्तनो मुनेः च्युते रेता
सि आत्मापि हेमयानेसमास्थितः
तज्ज

यातिपरीतात्मा द्रुतं वै स्वाश्र
मंययौ गते वेधसि शान्तनु
र्निजसाश्रम मागतः आगत्य दृ
ष्टा हंसानां पदलाभं तथा भुवि
तेजाश्चतितं भूमौ विधातुर्ज्वलना
पमं अमोघां परिपप्रच्छ पर्णशा
लान्तरस्थितां किमेतन्ने शुभगे
ब्रूहि त्वं हृष्यते तयत् पतिगा
वं पदलाभं तेन अदेव कीट
श मातस्य वचनं श्रुत्वा शान्त
ते मुनिसत्तमं अमर्षितवत्सगद
गकला विकलानना हंस युक्तस्य
दनेन कोप्यागत्य चतुर्मुखः क
मंडलुकरोतीव रतिं मामममाव
त तन्नोमया भर्त्सि तस्य उक्ता
न्तरं लीनया प्रध्यात्वा तेनःसया
तो मया शापभयार्दितः कृत
च अनीकारयदि शक्नोषि शा
न्तनो नरिमानयप्रण सोढुं क
श्चित्शक्नोति नीवटन् सतस्या
वचनं श्रुत्वा स्वयंब्रह्मा समागा
तः इति निश्चित मनसा तत्र ध्या
नपरो भवेत् स्थिध्यानेन त
ज्ञात्वा देवकार्यं मुपस्थितं नी
र्णवतारणं चापि हिताय जग
तो मुनिः ध्यात्वोक्तं चिंत
यित्वा स्वभार्यां मिदं मब्रवीत्
इदंतेजो ब्रह्मण स्तं पिवामो

वे ममात्मया हिताय सर्वज
गतो देव कार्यार्थं सिद्धये भव
त्या निकटं ब्रह्मास्वयमेवस-
मागतः त्वामप्राप्यमहाक्लान्तमा
नयोः ससमर्प्यच गतो निजां पदं
तत्र कर्त्तुं मदुचितद्रवः ततश्च ।
त्वा शंतनो वाक्यममोघातीव
लज्जिता प्रमन्त्रयन्तीवतं प्राहप
तिंनत्वा महासती नाहमस्य तेजो
धास्यामि न देवविमनस्कता अ
वश्यं यदि कर्त्तव्यंपीत्वात्वम
पिवोत्सृजा ततस्तस्यावचः श्रु ।
त्वा युक्तं तथ्यच शान्तनुःस्वा
यंपीत्वाचतत्तेजस्तस्यागर्भेभ्यसेव
यत् संक्रामितेः शान्तनुनातेजो
भि र्ब्रह्मणः सती गर्भंदधानामो
घाख्या हिताय जगतो ततः
तस्यांकाले तसंशामसेजातोजल
संचयः जन्मध्ये तनयश्चापिनी
लवासाः किरीटधृक् रत्नमाला
समायुक्तो रक्तगौरश्चब्रह्मवत्
चतुर्भुजः पद्मविद्याधरशक्तिध
र स्तथा शिशुमारशिरः स्कन्ध
तत्सकायो जलौघकदैः तं
जातेच तथाभूतं शान्तनुर्लो
कशान्तनुः चतुर्णां पर्वतानांच
मध्येशब्दवेशयत् कैलासश्चोत्तरे
पार्श्वे दक्षिणे गन्धमादनः जारुधिः

पश्चिमे शैलः पूर्वे सम्वर्त्तकाह्व
यः तेषां मध्येस्वयं कुण्डपर्वतान्त
विधेः सुतः कृत्वातिवृद्धयेतिसे
शरदीव निशाकरः तेतोय म
ध्यां पुत्र मासाद्य कुण्डिणःस्वयं
क्रमतः तस्य संस्कारानकरोद्दि
हस्युद्धये अथकाले वहुतिथेव्य
तीते ब्रह्मणः सुतः तोयराशि
स्वरूपेण वद्धये पंचयोजनात्
तस्मिन्देवाः पथः सम्भ्रहितीय
द्रवसागरे शीतामलजले होध
देव्याप्सवसो गणेः तस्मिन्नव
सरे रामो जामदग्न्यः प्रतापवान्
चक्रे मातृवधं घोरं मत्वग्ने पितृ
राज्ञया तस्य पापस्यमोक्षायस्व
पितृ ओपदेशतः स जगाममहा
कुण्डं ब्रह्माख्यः स्नात्वा भिक्षया
तत्र स्नात्वाच पीत्वाच मातृहत्या
मपालयेत् वीथीं परशुना कृत्वा
तस्य क्षामवतारयत् इतिकालि
कापुराणे जामदग्न्योपाख्याने ८४
अध्यायः अपिच जातसंभ्रम
यः सो ऽयतीर्थं मासाद्यतंवरं
वीथींपरशुना कृत्वा ब्रह्मपुत्र
मवाहयत् ब्रह्मकुण्डात् सतः सो
ऽयकासारेलोहिताख्ये केला
सोपत्यकायोत न्यपतद्ब्रह्मणःसुतः

तस्यापि सरस स्तीरं समुत्थ्या
यमहाबलः शकरेण दिशं पू
र्वामनयद्ब्रह्मणः सुतं ततोऽपर
श्चापि गिरिं हेमशृंगंविभिद्यच।
कामरूपान्तरं पीठमवाहयदसुंद
रिः तस्य नाम विधि श्चक्रे स्वयं
लोहितगंगकं लोहित्यास्तसो।
जातो लोहित्याख्य स्ततो ऽ
ऽभवत् स कामरूप मखिलं
पीठमाप्लाव्य वारिणा गोपय।
त्सर्वतीर्थानि दक्षिणं याति सा
गरं प्रागेव दिव्य यमुनां संप्लाव्या
ब्रह्मणःसुतः पुनः पतति लो
हिते गत्वा द्वादशयोजनं चै
त्रेमासि सिताष्टम्यां यो नरो नि
यतेन्द्रियः स्नाति लौहित्यतोये
षु स याति ब्रह्मणः पदं चैत्र-
न्तुसकलं मासं शुचिः प्रयतमा
नसः लौहित्य तोये यःस्नाति-
सकैवल्य मवाप्नुयात् इति का
पुराणे ८५ अध्यायः ॥
ल्वी गि श्लिषि इति कविक।
ल्पद्रुमः ओष्ठ वर्गद्यादयः ल्वि
नाति ल्वीनः ल्वीनिः अन्तस्था।
द्योपधइतिरमानाथः लिनातिइ
तिदुर्गादासः ल्वी गिरा गत्यां इति
कविकल्पद्रुमः वकारोपधः गल्वी
नाति ।

ल्वीतः ल्वीतिः गि ल्विनाति
ल्वीनः ल्वीनिः गिनैव क्यादित्व
सिद्धे गकरणं प्वादित्व विक
ल्पार्थं इतिदुर्गादासः ॥
व वकारः सच व्यंजनस्य ऊन
त्रिंशवर्णः यवर्गस्य चतुर्थव
र्णश्च अस्योच्चारणस्थानं दन्तः
ओष्ठश्च इतिव्याकरणं यवर्त्ती
यवकारस्यपफव समवा इत्येक
पदोत्थाउत्वमतिस्यान ओष्ठमुक्त्वा
दन्तकार्यार्थं दन्तमध्येपि तथर
धनतसाव इतिभिन्नपदे पठि
तवान् यथासंकुह्र्षति इत्यादौ
वकारस्य ओष्ठ्यत्वात् उरहस्य
त्वात् अनुस्वारस्य मकारो न
स्यात् वैदिकास्तु अस्योष्ठ्यतिस्या
ने दन्त एवेत्याहुः अतएव त
द्विष्णोःपरमं पदं इत्यादौ तथै
वोच्चारयन्ति इति मुग्धबोधटी
काया दुर्गादासः ॥ तस्य
पर्यायः वो वाणो वारुणीस्व
स्तावरुणो देवसंज्ञकः तोयत
त्त्वं वामांशः इतिबीजवर्णा
भिधानं अपिच वकारो व
रुणो वाणः खेटः एवरुद्रीस्वरोज
रः इतिरुद्रयामले मंत्रकोषः
तस्य स्वरूपं यथा वकार चंच

लापांगि ऊँ३ली मोलमव्य
यं पंच प्राणमयं वर्णं त्रिश
क्ति सहितं सदा त्रिविंदुसहितं
वर्णमात्मादितत्वसंयुतं पंचदेव
मयं वर्णं पीतविद्युल्लभामयं
चतु वर्ग प्रदं वर्णं सर्वसिद्धिप्र
दायकं त्रिशक्ति सहितं देवि
त्रिविंदु सहितं सदा इतिकाम
धेनुतंत्रे कोणत्रय युतांबाला
ब्रह्मविष्णुशिवात्मिका माया
शक्तिः परानित्या ध्यान मस्य
प्रवक्ष्यते इति वर्णोद्धारतंत्रे
अस्य ध्याने ऊन्दपुष्पप्रभा देवी
द्विभुजा पंकजेक्षणा शुक्ल-
माल्याम्बरधरा रत्नहारोज्वलां
परां साधकाभीष्टदां सिद्धां
सिद्धिदां सिद्धसेवितां एवं
ध्यात्वा वकारन्तु तन्मन्त्रं दश
धा जपेत् इतिवर्णोद्धारतंत्रं
वत्व इवार्थः मेदिनी ॥
वं क्ली प्रचेताः इतिमेदिनी
वरुणबीजं इति तंत्रं ॥
वः पुं सान्त्वनं वायुः वरु
णः इति मेदिनी वाऊः मंत्रे
णः कल्याणं वलवान् वसतिः
वरुणालयः इतिशब्दरत्नाव-
ली शार्दूलः वसे शाल्वकः वं
द

नं इतिनानेकार्थकोषः ॥
वः^स त्रि युष्मात् युष्मभ्यं युष्मा
कं युष्मद्शब्दस्य द्वितीया चतु
र्थी षष्ठी बहुवचनान्तरूपोऽयं
इतिव्याकरणं ॥
वंशः पुं कुलपौत्रादिः । तत्प
र्यायः संततिः २ गोत्रं ३ जननं
४ कुलं ५ अभिजनः ६ अन्व-
यः ७ अन्ववायः ८ संतानः ९ ॥
इत्यमरः निहवं १० जातिः ११ इ
तिजटाधरः कुलेच विद्यया ज
न्मना वाप्राणिना मेकलक्षणः
सन्तानो वंश इति जयादित्यः
येनेन विद्ययावा ख्यातस्यापत्य
धारा वंश इति सुभः वंशति
उद्गिरति पूर्वपुरुषान् वंशः ना
म्नीतिशः इत्यमरटीकायां भरतः
तृणजातिविशेषः बांश इति
भाषा तत्पर्यायः त्वक्सारः २ क
र्मारः ३ त्वचिसारः ४ तृणध्वजः ५
शतपर्वा ६ यवफलः ७ वेणुः ८
मस्करः ९ तेजनः १० इत्यमरः कि
कुपर्वा ११ इतिजटाधरः वेणुः १२
इतिशब्दरत्नावली तृणकेतुकः
१३ कंटालुः १४ कंटकी १५ महा
बलः १६ दृढग्रन्थिः १७ दृढ
पत्रः १८ धनुर्द्रुमः १९ धानुष्यः २० दृढकांडः

२१ अस्य गुणाः अम्लत्वं कषा
यत्वं किंचित्तिक्तत्वं शीतलत्वं ।
मूत्रकृच्छ्र प्रमेहार्शः पित्त दाह
स्त्रनाशित्वंच इतिराजनिर्घंटः ।
अपिच वंशः सरो हिमः स्वादुः
कषायो वस्तिशोधनः छेदनःक
फपित्तघ्नः कुष्ठास्रव्रण शोथजित् ।
तत्करीरः कटुः पाके रसेरू-
क्षो गुरुः सरः कषायः कफकृत् ।
स्वादुर्विदाही वात पित्तलः त
द्यवास्तु सरा रूक्षाः कषायाः क
टुपाकिनः वात पित्तकराउष्णा
बद्धमूत्राः कफापहाः इति भाव
प्रकाशः पृष्ठावयवः । पि
ठरदांडा इति भाषा वर्गः इति
मेदिनी वाद्यभांडविशेषः ।
बांशी इति भाषा इतिधर ।
णिः इक्षुः सालवृक्षः इतिराज
निर्घंटः ॥
वंशकः पुं मत्स्यविशेषः वांश
पातामाछ इति भाषा इतिश
ब्दमाला इक्षुविशेषः बांसाइ इ
ति सोमशाड इति च भाषा॥
इतिरत्नमाला अस्य गुणाः
वंशक स्त्वनभिष्यन्दी लघुर्दोष
त्रयापहः इतिराजवल्लभः ॥
वंशकं क्ली अगुरु इतिहारा

वली ॥
वंशकफं क्ली आकाशोड्डीयमा
नेसूत्रं यथा हृष्टस्त्रक क्षित्या
ऊरिन्द्रतूलं मनीषिणः ग्रीष्महा
सं वंशकफ वाततूलं मरुद्ध्वजं
इतिहारावली ॥
वंशकर्पूररोचना स्त्री वंशरोच
ना इतिराजनिर्घंटः ॥
वंशजः पुं वेणुयवः इतिराज
निर्घंटः ॥
वंशजः त्रि सद्वंशजातः तत्प
र्यायः बीज्यः २ वंश्यः ३ इति
हेमचंद्रः ॥
वंशजा स्त्री वंशरोचना इतिश
ब्दरत्नावली ॥
वंशतंडुलः पुं वेणुयवः इति
राजनिर्घंटः ॥
वंशधान्यं क्ली वेणुयवः इति
राजनिर्घंटः ॥
वंशनालिका स्त्री वंशी इतिश
ब्दरत्नावली ॥
वंशनेत्रं क्ली इक्षुमूलं इतिरा
जनिर्घंटः ॥
वंशपत्रः पुं नलः इति राज
निर्घंटः वंशपत्रे क्ली ॥
वंशपत्रकं क्ली हरितालं इति
हेमचंद्रः ॥

वंशपत्रकः पुं तृणमत्स्यविशे
षः बाँशपातामाछ इतिभाषा
इतिशब्दमाला नलः श्वेतेक्षुः
इतिराजनिर्घंटः ॥
वंशपत्रपतितं क्ली समदशा
क्षरपादच्छन्दोविशेषः यथादि
ङ्मुनि वंशपत्रपतितं भरनभ
नलगैः नूतनं वंशपत्रपतितं
रजनि मलतं पश्य शर्क
रमौक्तिक मिवोत्तम मरक
तगं पपच तं चकोरनिकरः
अपिवतिमुदितो वान्त मवेत्य चं
द्रकिरणोरमृतकणामिव वंशप
त्रपतितमिति केचित् वंशदलमि
ति शंभौ इतिछन्दोमंजरी ॥
वंशपत्री स्त्री नाडीहिंगुः तृ
णविशेषः तत्पर्यायः वंशद
ला २ जीविका ३ जीर्णपत्रिका
४ अस्या गुणाः समधुरत्वं शि।
शिरत्वं पित्तरक्तदोषनाशित्वरु
च्यत्वं पशूनां तृप्तदायित्वं च इ
तिराजनिर्घंटः
वंशपीतः पुं कणगुग्गुलुः
इतिराजनिर्घंटः ॥
वंशपुष्पा स्त्री सहदेवीलता
इतिराजनिर्घंटः
वंशपूरकं क्ली इक्षुमूलं इ
ति

राजनिर्घंटः ॥
वंशरोचना स्त्री स्वनामख्यात
वंशपर्वस्थितश्वेतवर्णौषधवि
शेषः वंशलोचन् इति भाषा
तत्पर्यायः त्वक्क्षीरा इत्यमरः
वंशलोचना ३ इतिभरतः ॥
तवक्षीरी ४ शुभा ५ वांशी ६
वंशजा ७ इति रत्नमाला क्षी
रिका ८ इतिशब्दरत्नावली ॥
तुगा ९ त्वक्क्षीरी १० शुभा ११
वंशक्षीरी १२ वैणवी १३ त्वक्सा
रा १४ कर्मरी १५ श्वेता १६ वंशक
र्पूररोचना १७ तुंगा १८ रोचनि
का १९ पिंगा २० वंशशर्करा २१
अस्या गुणाः रूक्षत्वं कषायत्वं
मधुरत्वं हिमत्वं रक्तशुद्धिकारि
त्वं तापपित्तोद्रेकहरत्वंच ॥
इति राजनिर्घंटः अपिच वंश
जा बृंहणी वृष्या बल्या स्वाद्वी
च शीतला तृष्णा कासज्वरश्वास
क्षय पित्तास्र कामलाः हरेत्
कुष्ठं व्रणं पांडुं कषाया वातकृ
च्छ्रजित् इति भावप्रकाशः ॥
वंशलोचना स्त्री वंशरोचना
इति हेमचंद्रः अस्या गुणाः
कषाया मधुरा रूक्षा वातघ्नी वं
शलोचना तवक्षीरी तय श्वास

कासघ्नी मधुरा हिमा इतिरा
जवल्लभः ॥
वंशशर्करा स्त्री वंशलोच
ना इतिराजनिर्घंटः
वंशशलाका स्त्री वीणामूलं।
इतिहेमचंद्रः वंशनिर्मितशला
काच वंशस्तनितं क्ली द्वादशा
वंशस्थविलं क्षरपादच्छन्दोवि
शेषः यथा वदन्ति वंशस्थ
विलं नतौ जरौ विलासवंशस्थ
विलं मुखानिलैः प्रपूर्यायः पंच
मरागमुद्गिरन् व्रजांगनानामपि
गानशालिनो जहार मानं सहरिः
पुनातु वः वंशस्तनितमपिक्वा
पि इतिछन्दोमंजरी ॥
वंशक्षीरी स्त्री वंशरोचना इति
राजनिर्घंटः ॥
वंशाग्रं क्ली वंशांकुरः इति
राजनिर्घंटः ॥
वंशानुचरितं क्ली वंशचरित्र
वर्णनं तत्र पुराणस्य पंचलक्ष
णान्तर्गतलक्षणविशेषः यथा
सर्गश्च प्रतिसर्गश्च वंशो मन्व
न्तराणि च वंशानुचरितं चेति पु
राणं पंचलक्षणं इतिशब्दरत्ना
वली वंशांकुरः पुं वंशस्यांकुरः।
बाँशेरकोंडा इतिभाषा तत्।

पर्यायः करीरं २ वंशाग्रं ३
यवफलांकुरः ४ अस्य गुणाः।
कटुत्वं तिक्तत्वं अम्लत्वं कषा
यत्वं लघुत्वं शीतलत्वं पित्त
रक्तदाह कफघ्नत्वं रुचिकारित्वं
तत्सर्वाणो निर्गुणो निर्गुणत्वंच
इतिराजनिर्घंटः ॥
वंशिकं क्ली अगुरु इत्यमरः
वंशिका स्त्री अगुरु इत्यमरटी
कायां भरतः वंशी । इति
शब्दरत्नावली ॥
वंशी स्त्री मुरली बाँशी इति
भाषा इति शब्दरत्नावली कर्ष
चतुष्टयं इतिराजनिर्घंटः ॥
वंशीवाद्यस्य विवरणं यथा ता
लेन राजते गीतं तालो वादि
त्रसंभवः गरीयः तेन वादित्रं त
च्चतुर्विधमुच्यते ततं शुषिरमा
नद्धं घनमित्थं चतुर्विधं ततं
तंत्री गतं वाद्यं वंशाद्यं शुषि
रं तथा चर्मावनद्धमानद्धं च
नतालादिकं मतं शुषिरं यथा
वंशोऽथ पावी मधुरी तित्तिरी
शंख काहलाः भोडरी मुरली
बुक्का शृंगिका स्वरनाभयः श्रृंग
कापालिकं वंशा अमीवंशस्तथा
परः पंते शुषिरभेदास्तु कथि

ताः सुवर्णमणिभिः वर्तुलः सरल
श्चैव पर्वदोषविवर्जितः वेण
वः खादिरो वापि रक्तचंदनजो
ऽथवा श्रीखंडजोऽयसोवर्णोद
न्निरन्नमयोऽपि वा राजतस्ताम्र
जो वापि लौहजः स्फाटिकोऽथवा
कनिष्ठांगुलि तुल्येन रन्ध्रेणैव
शोभितः शिल्पविद्याप्रवीणेन
वंशः कार्यो मनोहरः वंशेनैव
मतोऽपीति मतंगमुनिनोदितं
ततोऽन्येऽपि तदाकारा वंशाएव
प्रकीर्तिताः तत्रत्यक्त्वा शिरोदे
शात् द्व्यो द्विमित मंगुलं फूत्का
ररंध्रं कुर्वीत मित मंगुलिपर्व·
णा पंचांगुलानि संत्यज्य तारं।
ध्राणि कारयेत् ऊर्ध्वं तथान्यं
ध्राणि सप्तसंख्यानि कोणसातत्
बदरीबीजतुल्यानि संत्यज्याद्ध्यं
मंगुलं प्रान्तयोर्वर्तने कार्ये स्वरा
सैर्नोद भेदे शिक्षकेन कल्पदे
था तेन सम्वरतान्तरेत पंचाङ्गु
लोऽयं वंशः स्यादेकैकाङ्गुलिवृ
द्धितः षडंगुलानि नाम्रा स्यात्
यावदष्टादशांगुलं फूत्कारतार
रंध्रस्य यावदंगुलिमंतरं तद्वशात्
वंशसंजाथिकैः परिकीर्तिते प
कांगुलोऽङ्गुलश्च मंगलस्यान्मंग
लः

श्रुतितारतरत्वेन वांशिकैः मत्र
पेतितः त्रयोदशांगुलो वंशोऽप्य
रः निन्दितो वंशा तत्वैस्तथा
सप्तदशांगुलः महानंदस्तथाने
दो विजयोऽथ जयस्तथा चत्वार
उत्तमा वंशा मतंगमुनि सम्म
ताः दशांगुलो महानंदो नंद ए
कादशांगुलः द्वादशांगुलमानस्तु
विजयः परिकीर्तितः चतुर्दशा
ङ्गुलमितो जय इत्यभिधीयते त्र
ह्यारुद्रौरवि विस्तुः क्रमादत्र
व्यवस्थिताः तेविसं मोदता चापि
सुस्वरत्वं चसौत्रता माधुर्यमिति
पंचामी फूत्कृते ७ गुणाः स्मृताः
शीत्कारबहुलः स्तब्धो विस्वरः
स्फुरितो लघुः अमधुरश्च विज्ञे
याः षड्दोषाः फूत्कृते क्रमात्
इयाप्रयोगवाद्यस्य मत्वता गी
तवादने पतिर्दोषे गुणोऽतीव
निंदितो वंशिकोमतः स्थानका
दिनयाभिज्ञो गमकादेः स्फुट
स्वरः शीघ्रहस्तः कलाभिज्ञो वां
शिको मत्र उच्यते प्रमुक्तिर्वद्
धुक्तिश्च [redacted] युक्तिश्चोंगुले
र्गुणाः कम्पयान्ते समस्तं प्रयु
ली सारणा क्रिया समस्तगमक
ज्ञानं रागरागाणांवेदिता क्रिया

भाषा विभाषासंयुक्तता गीत।
वादने स्वस्थाने चापि त्रिःस्थाने
नादनिर्माणकौशलं गात्रेण
स्थानदातृत्वं तद्दोषाच्छादनं तथा
वांशिकस्य गुणा ह्येते मया संप्र
दर्शिताः इति संगीतदामोदरः
वंशयः त्रि सहंशजातः तत्पर्या
यः कुल्यः २ बीज्यः ३ इति
त्रिकांडशेषः वक र इ. कौटि
ल्ये गतौ इति कविकल्पद्रुमः
कौटिल्य मिह कुटिलीभावः।
कुटिलीकरणं च इ वंकते इ·
वंकते काष्ठं कुटिलं स्यादित्यर्थः
वंकते काष्ठं कुटिलं करोतीत्य·
र्थः इति दुर्गादासः वकः पुं स्वना
मख्यातपक्षिविशेषः तत्पर्यायः
कह्वः २ इत्यमरः द्वारबलिभुक्
३ कंकेरुः ४ शुक्लवायसः ५ दी
र्घजंघः ६ वकोटः ७ मत्स्यवलि
प्रियः ८ इति शब्दरत्नावली नि
श्चलः ९ शिखी १० चंद्रविहंगमः
११ इति त्रिकांडशेषः तीर्थसेवी
१२ तापसः १३ मीनघाती १४
मत्स्याध्यायी १५ निश्चलांगः १६
दांभिकः १७ इति राजनिर्घंटः
अस्य मांसस्य गुणाः स्वादि वक
काकाश्च दाहदाः पवनापहाः
इतिरत्ना

बली अपिच हंससारसः ॥
काचाक्ष वक क्रौंच सारिकाः
नंदीमुखी सकारण्डा वलाकाद्याः :
प्लवाः स्मृताः प्लवन्ते सलिले य
स्मात्पेते तस्मात्प्लवाः स्मृताः कु
लेचराः प्लवाश्चापि कोशस्थाः
पादिनस्तथा मत्स्या पेते समा
ख्याताः पंचधानूपजातयः आ
नूपा मधुराः स्निग्धा गुरवोव
न्हिसादनाः श्लेष्मलाः पिच्छला
श्चापि मांसपुष्टिप्रदा भृशं तथा
भिष्यन्दिन स्तेहि प्रायो पथ्यतमाः
स्मृताः इति भावप्रकाशः
स्वनामख्यातपुष्पवृक्षः तत्पर्यायः
शिववल्ली २ पाशुपतः ३ एका
ष्ठीलः ४ वसुः ५ इत्यमरः
पक्वाष्ठीला ६ शुकः ७ वसुकः ८
वसुकः ९ तनि नदीका वक
पुष्पः १० शिवमल्ली ११ इतिशब्दर
त्नावली काकशीर्षः १२ स्थूल
पुष्पः १३ शिवप्रियः १४ काक
नामा १५ वसरुहः १६ स्वस्तिकः १७
रक्तपुष्पः १८ मुनितरुः १९ अगास्तिः २०
वंगसेनकः २१ इति रत्नमाला अग
स्त्यः २२ शीघ्रपुष्पः २३ मुनिद्रुमः २४
व्रणारिः २५ दीर्घफलकः २६ वक्रपु
ष्पः २७ सुरप्रियः २८ सितपीतनील

लोहितकुसुमभेदाच्चतुर्विधोऽस्या
स्तिः मधुरः शिशिरः दोषश्रम
कास विनाशनश्च भूतघ्नः तथा
च अगस्तिशिवं गोत्वं त्रिदोषघ्नं
भ्रमापहं वलासकासवैवर्ण्यभूत
घ्नं चवलावहं इतिराजनिर्घण्टः अ
पिच अगस्तिकुसुमं शीतं वात
र्थकनिवारकं नक्तान्ध्यनाशनं
तिक्तंकषाय वातघ्नंमुनिभिर्मतं
इतिभावप्रकाशः अन्यच्च वास
कस्यचकुष्माणि वंगसेनस्यचैव।
हि कटुपाकानि तिक्तानि का
सक्षयकराणि च इतिराजवल्लभः
वकः पाशुपतश्चैव शिवापीडश्च
सुव्रतः वसुकश्च शिवो कश्च शि
वेष्टः कमठ्ठरकः शिवमल्लिःशि
वाह्लादः शाम्भवो रविसंमितः
वकोऽतिशिशिरः तिक्तो मधुरो म
धुराम्लकः पित्तदाह कफश्वास
भ्रमसरोचदीपनः इतिच राज
निर्घण्टः शिवमल्ली पाशुपत
एकाष्ठीला वुकोवसुः वुकोः
...कः कटु तिक्तः कफपित्त
विषापहः योनिशूल तथा
दाह कुष्ठ शोथास्त्रनाशनः इ
तिभावप्रकाशः तालव्यशा
कारः यथा शोवान्नो वपरावकः
इति

वीजवर्णाभिधानं कुवेरः ॥
रक्तोविशेषः स च भीमसेन
हतः इति मेदिनी ग्रन्थकोषप
पर्वर्गीय वकारादौ पठितोऽप्य
शाद्धः किन्तु अमरटीकायां भ
रतेन अन्तस्थवकारादि वच
वक धातुभ्यां क्रमेण च प्र
त्ययेन अन् प्रत्यये न चसाधितः
यंत्रविशेषः। यथा जलक
ल्कुप पातालदोला भूधरवा
लुकाः वकाख्या यंत्र भेदाः
स्युः वंग्राद्याश्च मूषिकाः इति
शार्ङ्गचंद्रिका अस्य विवरणं य
था दीर्घकंठ काचकूप्यां गि
लयेत्खल्वभाण्डके तीर्यक्कृत्वा
पचेत्तत्तुल्यां वकयंत्र मितिस्मृ
तं इतिवैद्यके असुरविशेषः
स च भीमसेनेन हतः यथा सं
स्वत्सरकाले सर्वे पाण्डवास्त्वप
करा गत्वा कैलाशयाभ्यासे पाय
यित्वा पशुर्जलं ते तत्र दहम्
शीला महासत्वमवस्थितं तत्रस
वज्रनिर्भिन्नं गिरेः कूट मिवच्युतं
तस्यैववकोनाममहानसुरो वकरूपध
कृ आगास्ततरसा कुसंलीलातटेऽप्य
महलीकसे महावकमुखं दृष्ट्वा
सादयाऽर्भकाः वभूवुरिन्द्रियाणी
व विनाप्राणं विचेतसः ते तालुमूलं

प्रदहन्त मग्निवकोपालसत्तमपि
तरंजगद्गुरोः चर्छर्द सद्योऽति
रुषाहतं वक स्तुडन रक्तकं
नरत्मपघ्नत तनापतन्तसनि
गरह्लतट्याे दोर्भ्यां वकं कंस
सखेसतो गतिः पश्यत्सुबालेषु
ददार लीलया मुदावहोवीरणा
वद्धिवौकसां इति श्रीभागवते
१०स्कन्धे ११ अध्यायः ॥
वकचिंचिका स्त्री मत्स्यविशे
षः तत्पर्यायः वकाची २ इति
हारावली ॥
वकजित् पुं भीमसेनः इतिवि
कोडेशेषः श्रीकृष्णश्च ॥
वकधूपः पुं वृकधूपः इत्यमर
टीका
वकनिषूदनः पुं भीमसेनः इ
तिहेमचंद्रः श्रीकृष्णश्च ॥
वकपुष्पः पुं वकवृक्षः इति
शब्दरत्नावली अगस्तिकुसुमे
स्त्री वकवृत्तिः पुं वकतुल्यव
र्त्तनविशिष्टः यथा पाषण्डिनो
विकर्मस्थान्वैडालव्रतिकान्सा
ठान् हैतुकान्वकवृत्तीश्च वाङ्मा
त्रेणापिनार्च्चयेत् इति विष्णुपुरा
णे ३ अंशे १८ अध्यायः तस्य
लक्षणं यथा अधोदृष्टिर्नैकृतिकः
स्वार्थ

साधनतत्परः शठो मिथ्या
विनीतश्च वकव्रति रुदाहृत
इति तट्टीकायां श्रीधरस्वामी
अपिच अधोदृष्टिर्वैकृतिकः
स्वार्थसाधनतत्परः शठः मि
थ्याविनीतश्च वकव्रति रुदा
हृतः इतिपाद्मोत्तरखण्डे ११५ अध्या
यः वकवैरी पुं भीमसेनः इति
जटाधरः श्रीकृष्णश्च ॥
वकव्रती पुं मिथ्याविनीतः व
कवृत्तिः इति जटाधरः तस्य
लक्षणं यथा अधोदृष्टिर्नैकृ
तिकः स्वार्थसाधनतत्परः शठो
मिथ्याविनीतश्च वकव्रत चरो
द्विजः इतिदानसागरेमनुः ॥
वकाची स्त्री वकचिंचिकाम
त्स्यः इतिहारावली ॥
वकारिः पुं श्रीकृष्णः यथा त
दावकारिं सर्वलोकवासिनः
समाकिरन्नंदन मल्लिकादिभिः
समीडिरे चानक शंख संस्त
वै स्तद्वीक्ष्यगोपालसुता विसि
स्मिरे इति श्रीभागवते १० स्कन्धे
अध्यायः वकुलः पुं स्वनामख्या
तपुष्पवृक्षः तत्पर्यायः केसरः २
इत्यमरः केशवः ३ इतिभरतः
वकुलः ४ सिंहकेसरः ५ वर

तङ्गः ८ सीधुगंधः ७ मुकुलः
८ मुकुलः ९ इतिशब्दरत्नावली
सीधुस्वेमधु १० दोहलः ११ मधु
पुष्पः १२ सुरभिः १३ भ्रमरानंदः
१४ स्थिरकुसुमः १५ शारदिकः
१६ करकः १७ सीमंतः १८ वि
शारदः १९ गूढपुष्पकः २० ध
न्वी २१ मदनः २२ मधामोदः २३
चिरपुष्पः २४ अस्यगुणाः शीत
लत्वं हृद्यत्वं विषदोषनाशि
त्वं मधुरत्वं कषायत्वं मदा
ढ्यत्वं हर्षदायकत्वंच तत्कुसु
मगुणाः रुच्यत्वं शीताढ्यत्वं
सुरभित्वं शीतलत्वं मधुरत्वं
स्निग्धत्वं कषायत्वं मलसंग्रह
कारकत्वंच इति राजनिर्घण्टः
अपिच वकुलो मधुरस्तुवरि
हृत्केसरकस्तथा वकुल स्तुवरो
ऽनुष्णः कटुः पाके रसे गुरुः क
फपित्त विष श्वित्र कृमि दन्त
गदापहः इतिभावप्रकाशः तत्
फलगुणाः वकुलं मधुरंग्राहि
दन्तस्थैर्यकरं परं तत्पुष्पगुणाः
रसे कषायं मधुरं शीतेपि
त्तकफापह्नुत् तद्वद्वकुलपु
ष्पंच कल्हारोत्पल पाटले इति
राजवल्लभः अशोकस्तिर्यग्या वि
वर्द्धे तस्य सूर्या महेशी ।

कुसुमायुधः आरात्स्थित्वाग्रतो
धन्वी सन्तापयित मघतः तत
स्तमग्रतो दृष्ट्वा कोपाध्मात हृ
षाद्रदः स्मरमालोकयामास
शिखाग्राच्चरणान्तिकं आलो
कित स्त्रिनेत्रेण मदनो द्युतिमा
नपि आदह्यत तदा ब्रह्मन्पा
दादारभ्य कलेवरं प्रदह्यमानौ
चरणौ दृष्ट्वासौ कुसुमायुधः उ
त्ससर्ज धनुः श्रेष्ठं तज्जगामाथ
पंचधा यदासीन्मुष्टिबन्ध स्तद्रु
क्मपृष्ठं महाप्रभं सचम्पकतरु
र्जातः सुगन्धाढ्यो गुणाकृतिः
नाहस्थानं शुभाकारं यदासीद्व
ज्रभूषितं तज्जातं केशरारण्यं वकु
लं नामतो नगः या च कोटी
सुभा ह्यासीदिन्द्रनीलविभूषि
ता जाता सा पाटला रम्या भृङ्ग
राजिविराजिता नाहोपरि तथा
मुष्टौ स्थाने चन्द्रमणिप्रभं पंच
गुल्माभवज्जाती शशांक किरणो
ज्ज्वला ऊर्द्ध्वं मुष्टेः अधः कोट्याः
स्थाने विद्रुमभूषिते तस्माद्बहु
पुटा मल्ली संजाता विविधा भुवे
इतिश्रीवामनपुराणे ८ अध्यायः
वकुला स्त्री कटुका इति रा
जनिर्घण्टः ॥

वकुली स्त्री काकोली इतिश
ब्दचन्द्रिका ॥
वक्कुलः पुं वकुलवृक्षः इति
शब्दरत्नावली ॥ ॥
वकेरुका स्त्री बलाका वा
तावर्जितशाखा इतिमेदिनी ।
वकोटः पुं वकः इति त्रिकां
डशेषः ॥
वक्र ऊ गतौ इतिकविकल्प
द्रुमः ऊ० वक्रते इतिदुर्गादा
सः वक्रम् त्रि कुटिलः ही
नः वचनार्हः इति मेदिनी व
चनेक्लीवक्ता त्रि यो वक्रेणा
नातिसः इतिभरतः ओविसा
लड विशिष्ट वदति इतिमुकुटः
तत्पर्यायः वदः २ वदावदः ३
इत्यमरः वदान्यः ४ वग्मा ५ ।
इति जटाधरः सुष्ठुवक्ता इतिमेदि
नौ वक्तुमाप्नी ... इत्येकः
तत्पर्यायः इति शब्दमाला तत्प
र्यायः वाचोयुक्तिपटुः २ वाग्मी
३ वावदूकः ४ इत्यमरः वचक्नुः
५ सुवचाः ६ प्रवाक ७ इतिज
टाधरः पंडितः इतिमेदिनी वक्त्रं
क्ली मुखे इत्यमरः तगरमूलं इ
ति शब्दमाला वस्त्रभेदः इतिमेदि
नी छंदोविशेषः इतिहेमचंद्रः त
स्य लक्षणादि

यथा भवत्यर्हसमे वक्त्रे वि
षमेच कदाचन तयो र्हयो हृ
पान्तेऽप्यञ्जरस्तद्युनोच्यते व
क्त्रं युग्मयोर्गोस्याता मयोर्यो
गुरुभि ख्यातं अत्र द्विराविर्म
श्लोकः एषपित्यः वक्त्रांभोजे
सदा स्मेरं चत्तुर्नीलोत्पले फले
बल्लवीनां मुरारातेः श्चेतो भृंग
महोत्सवः इतिच्छन्दोमंजरी
वक्त्रखुरः पुं दन्तः इतित्रि
कांडशेषः ॥
वक्त्रजः पुं ब्राह्मणः इतित्रि
कांडशेषः मुखजाते त्रि ॥
वक्त्रतालं क्ली मुखवाद्ये इति
केचित् त्रिकांडशेषे मुखवाद्यं
वक्त्रतालमिति लिखितं ॥
वक्त्रपट्टः पुं अश्वान्नभोजन
पात्रे तोवड़ा इति भाषा तत्प
र्यायः तलिका २ जलसारके ३
इतिहेमचंद्रः ॥
वक्त्रभेदी न पुं तिक्तरसः इति
हेमचंद्रः मुखभेदके त्रि ॥
वक्त्रवासः पुं नारंगः इतिराज
निर्घण्टः मुखगंधश्च ॥
वक्त्रशोधनं क्ली भव्यं इति
राजनिर्घण्टः मुखशुद्धिकारणेच
वक्त्रशोधीन पुं जम्बीरः इति

नरायथः सुखशेषयके त्रि
वक्रासवः पुं मयरमधु इ
तित्रिकांडशेषः ॥
वक्रे स्त्री नदीवंकः तत्पर्या-
यः पुटभेदः २ इत्यमरः वंकः ३
इति भरतः ॥
वक्रः पुं शनैश्चरः इतिमेदि
नी मंगलग्रहः इतिहेमचंद्रः
रुद्रः त्रिपुरासुरः इतिधरणिः
पर्पटः इति राजनिर्घंटः ॥
वक्रगति विषग्रहः सत्यपस्य
ग्रहस्याश्रितात्र्यपि स्थितराशी
य त्रिंशांशांतर्गतादेशात्पंचम
षष्ठांशे रवि स्तिष्ठति यथा व
क्राःस्युःपंच षष्ठेऽर्केत्तति व
क्रात्नवाष्टमे नवम दशमेभा
नौ नायते सहजागतिः द्वाद
शैकादशे सर्वे लभंते शीघ्र
तां पुनः ग्रावयिगंशकमिति
यावथः संख्यान्न कंपते न
त राघ्यन्तरस्पर्शात्द्वितीया
दि निरूपणे राहुकेतू सदा
वक्रौ शीघ्रगौ चंद्रभास्करौ
इतिज्योतिस्तत्वे वक्रः त्रि य
ल्लजः बांका इतिभाषा तत्प-
र्यायः अराले २ वृजिनं ३ जिह्म
४ ऊर्मिमत् ५ कुंचितं ६ नतं ७
आविद्धं ८ कुटिलं ९ भुग्नं ।

१० वेल्लितं ११ इत्यमरः वंकुरं
१२ वंकं १३ विनतं १४ उन्नुरं १५
इतिशब्दरत्नावली अवनतः १६
आनतः १७ भंगुरः १८ इतित
टाधः वक्राणि यथा अलकः
भालः २ भ्रूः ३ नखविकं ४ भ्रू
कुपाः ५ कुंचिका ६ मदनकंक
णां ७ बालेन्दुः ८ दात्रं ९ कुद्दा
लः १० वंकुकः ११ सुकासि १२
पलाशपुष्पं १३ विद्युत् १४ करा
लः १५ शाकचत्रः १६ फणा १७
प्रबोधः १८ करः १९ हस्तिदंतः २०
शूकरदन्तः २१ सिंहनखादिः २२
इतिकविकल्पलताकूरः इतिमे
दिनी वक्रकंटः कुटिलकंटक
श्च वक्रकंटकः पुं खदिरवृ-
क्षः इतिराजनिर्घंटः ॥
वक्रखङ्गः पुं करवालः इतिरा
जनिर्घंटः ॥
वक्रग्रीवः पुं उष्ट्रः इतित्रिकांड
शेषः ॥
वक्रचंचुः पुं शुकपक्षी इतिशब्द
रत्नावली ॥
वक्रताले स्त्री वाद्यविशेषः
तत्पर्यायः
मुखवाद्य २ वक्रनालमिति
वा पाठः इति त्रिकांड

4227

शेषः ॥
वक्रताली स्त्री मुखवाद्ये इ
तिशब्दरत्नावली
वक्रतुंडः पुं शुकपक्षी इति
शब्दरत्नावली ॥
वक्रदंष्ट्रः पुं शूकरः इतिके-
चित् वक्रनक्रः पुं पिशुनः शु-
कपक्षी इतिमेदिनी ॥
वक्रनाले स्त्री मुखवाद्ये इ
मुद्रांकित त्रिकांडशेषः ॥
वक्रनासिकः पुं पेचकः इति
त्रिकांडशेषः कुटिलनासायु
क्ते त्रि वक्रपुच्छः पुं स्त्री कुक्कु
रः इतित्रिकांडशेषः सलोमकु
टिललांगूलंच ॥
वक्रपुष्पः पुं वकवृक्षः इति
शब्दरत्नावली पलाशवृक्षः इ
तिराजनिर्घंटः ॥
वक्रवालधिः पुं कुक्कुरः इति
हेमचंद्रः कुटिलपुच्छश्च ।
वक्रभणितं स्त्री कुटिलवा-
क्यं तत्पर्यायः छेकोक्तिः २ इ
तित्रिकांडशेषः ॥
वक्रभः पुं पलायनं इतिश
ब्दरत्नावली ॥
वक्रलांगूलः पुं कुक्कुरः इ
तिराजनिर्घंटः कुटिलपुच्छे त्रि

वक्रवक्त्रः पुं शूकरः इतिश
ब्दरत्नावली कुटिलमुखवि
शिष्टे त्रि वक्रशल्या स्त्री कुटुंबि
नीक्षुपः इतिराजनिर्घंटः
वक्राग्रे स्त्री कवाटवकहस्तः
इतिरत्नमाला कुटिलाग्रभागश्च
वक्रांगः पुं हंसः इतिहेमचं
द्रः कुटिलावयवे त्रि ॥
वक्रिः त्रि मिथ्यावादी वक्र
धातोः क्रियासमयेन निष्पन्नः
वक्री न पुं बुद्धः इतिशब्दरत्ना
वली वक्रविशिष्टे त्रि यथा
लग्नेशो यदि वक्री स्यात्सुतः
कार्येषु वक्रता लग्नेशोऽस्तंगा
ते मर्त्यो दुःखादिव्याधिसं
युतः इतिज्योतिस्तत्वे ॥
वक्रोक्तिः स्त्री काकूक्तिः य
थाकामयेतुकलत्रकृष्णतत्रुत्र
प्रवाणे अथ दृष्टे दूषात्संगे
दातावक्रोक्तिभिः पदैः आह्ल
ाणानाहयकिंचिन्मेयान्तरहन
निर्जने तत्कस्मिंस्थाने नयेत्
विभाजं यथाक्रमं नवान्नानव
तत्तीर्थपानव्य केनचित्कवित्
कृतसमदीपमेवं वक्रोक्तिभिःका
कूक्तिभिः इतिघृतितिर्थं कु
टिलोक्तिः यथा वादीच्याकरणे

विमैव विदुषां पृष्टः प्रविष्टः
सभांजनस्तत्रमभिः स्मयास्फुटव
इ भ्रुभंग वक्रोक्तिभिः क्रीतः
सत्तूपहासमेति गुणकोयो।
लानभिज्ञस्तथा स्योतिर्विस्मद्ः
सि प्रगल्भु गुणकः प्रश्नप्रपंचो
क्तिभिः इति सिद्धान्तशिरोम०
णौ गोलाध्यायः वक्रोक्तिका
स्त्री अट्टहरदहास्यं इषद्धास्यं।
तत्पर्यायः स्मितं २ इतिहेमचं
द्रः वध ३ स्तपि इतिकविक
ल्पद्रुमः इ वंचते स्तपि गतौ
इतिदुर्गादासः॥
वाव स्तपि इति कविकल्प
द्रुमः वावति स्तपि गतौ इति
दुर्गादासः॥
वगाहः पुं अवगाहः इतिमु
ग्धबोधव्याकरणेऽवरतश्च ॥
वक्तृः पुं वक्ता इति सिद्धा
न्तकौमुद्यामुणादिवृत्तिः वाव
दूकः इतिसंक्षिप्तसारोणादि
वृत्तिः वच्ये इ० गतिलिप्सा
देश ऊवेष । इति कविक
ल्पद्रुमः ॥
इ वेंच्यते इ० वंचते । ज
वे पव कैश्चित् पठ्यते इ
तिदुर्गादासः ॥

वंकः नदीवक्रं इत्यमरटीका
यां भरतः॥
वंका स्त्री वल्लायभागः तत्प
र्यायः पल्ययनं २ इतित्रिका
ण्डशेषः॥
वंकि : पुं कंटकः इतित्रि
काण्डशेषः॥
वंक्यः त्रि वक्रं यथा वंकं
काष्ठं इतिमुग्धबोधव्याकरणं
वंक्रि स्त्री पार्श्वास्थि तत्पर्यायः
पर्शुकं २ इति हेमचंद्रः॥
वंक्रिः पुं स्त्री वाद्यभेदः इ
त्युणादिकोषः गृहदारु पार्श्वा
स्थि इति सिद्धान्तकौमुद्यामु
णादिवृत्तिः॥
वंगं स्त्री धातविशेषः रां इति
भाषा तत्पर्यायः त्रपुः २ स्वर्ण
जं ३ नागजीवनं ४ म्लेंहंपरं
गं ६ गुरुपत्रं ७ पिच्चटं ८ चक्र
संज्ञं ९ तमरं १० नागजं ११ कु
स्तीरं १२ आलीनकं १३ सिंहलं १४
इतिहेमचंद्रः सवेतं १५ नागं १६
जश्र १७ इतिशब्दरत्नावली॥
अस्यगुणाः तिक्तत्वं मधुरत्वं।
भेदित्वं पांडुत्वं कृमि वातना
शित्वं लेखनत्वं किंचित्०
पित्तकारित्वंच इतिराजवल्लभः

अप्सवंगशब्दे द्रष्टव्यं ॥
सीसके देशविशेषे पुंभूम्नि
इति मेदिनी सतुप्राचीदेशा
न्तर्गतदेशविशेषः यथा अं
गवंगा मद्रकाः अन्तर्गिरि ब
हिर्गिराः इत्युपक्रम्य प्राग्जा
गधगोनर्दाः प्राच्याजनपदाः।
स्मृताः इतिवृत्तिमत्स्यपुराणव
चनं मतान्तरे यथा आग्नेय्यां
मंगवंगोपवंग त्रिपुरकोचलाः
कलिंगोड्रान्ध्र किष्किन्ध्या वि
दर्भ सबरादयः इतिज्योतिस्तत्व
धृत कूर्मचक्रवचनं तत्सीमा
यथा रत्नाकरं समारभ्यब्रह्म
पुत्रान्तगं शिवे वंगदेशो मया
प्रोक्तः सर्वसिद्धिप्रदर्शकः इति
शक्तिसंगमतंत्रे ७ पटलः॥
वंगः पुं चंद्रवंशीयबलिरा
जपुत्रः यथा बलिःसुतपसो
गेहे अंगवंग कलिंगकाःसु
ह्म पौंड्राश्चबालेया ह्यनपान
स्वधागताः इतिगारुडे ७६।
अध्यायः वार्ताकुः कार्पासः इ
तिमेदिनीवंगजं स्त्री सिंदूरं इ
तिरत्नमाला वंगदेशजाते त्रि
वंगनः पुं वार्ताकुः बेगुन् इति
भाषा इतिशब्दरत्नावली।

वंगशुल्वजं स्त्री कांस्यं इति
हेमचंद्रः॥
वंगसेनः पुं बकवृक्षः यथा
वंगसेनकं वंगसेन स्त्याति
इ मुकनाशोमुनिद्रुमः अन
ल्पिः ऊनलीति त्रिकाण्डशेषः
अपिच वृक्षपुष्पा मुनितरु
रागास्ति वंगसेनकः इतिरत्न
माला अस्यपुष्पगुणाः वासकाख्य
च पुष्पाणि वंगसेनस्य चैवहि
कटुपाकानि तिक्तानि कास
क्षयकराणिच इतिराजवल्लभः
वंगला स्त्री रागिणीविशेषः
इतिहलायुधः वंगालीतिकेचि
न्मान्तरे वंगालः पुं भैरवराग
स्यपुत्रः यथा वंगालः पंचमः
षष्ठो मधुरो हर्षकस्तथा दे
शाखो माधवः सिंधुः भैरव
पुत्राः प्रकीर्तिताः अस्यध्यानं
कृत्वा त्रिवेषितकरंडव स्वय
म्भी भास्वत्त्रिशूलपरिमंडितवा
मदस्तः भस्मोज्ज्वलोनिविडवद्ध
जटाकलापो वंगाल इत्यभिहित
श्रुतिगानवर्णः षोडवोदेववंगा
लो ग्रहांशन्यास मध्यमः अहर्षे
विनियोक्तव्यः प्रोक्तोऽयंमुनिना
स्वयं इति संगीतरत्नाकरे:॥

वेगारि पुं हरितालं इति
हेमचंद्रः ॥
वंगाली स्त्री भैरवरागस्य रा
गिणी यथा भैरवी कौशि।
की चैव भावेलावती तथा वं
गाली चेतिरागिण्यो भैरवस्य
व वल्लभाः इति संगीतदामो
दरः अस्यामूर्त्तिः मनोज्ञस्य
काश्याभूषिता गीत्वकः दया
नां यराणीयरंस्या योगिंः कुमा
री कमनीयमूर्त्तिर्वंगालिके
यंस्तुचि सांगगीता इतिसंगी
तरत्नाकरः वंगाली औडवास्ते
यारहांशन्यास षड्जभाक्
स्त यहीनाच विज्ञेया मूर्छ्छ॰
नाप्रथमा मता इतिसंगीतप
र्णाः वंक्षणः पुं ऊरुसंधिः ऊँ
चुकीइति भाषा इत्यमरः वङ्
क्षुः स्त्री गंगास्रोतोविशेषः।
यथा तस्याः स्रोतसि सीताच
वङ्क्षुः भद्रा च कीर्तिता इ
तिशब्दमाला साचकेतुमालवर्ष
स्थागंगा यथा पर्वमाल्यवच्छि
रवसान्निष्पतन्ती ततउपतवेगा
केतुमालमपि वंक्षुः पतीच्यांदिशि
सरित्पतिंप्रविशति इतिश्रीभाग
वते ५ स्कंधे १७ अध्यायः वचचेवा
चि संदेशे । इति

कविकल्पद्रुमः गै वक्ता अयं
सेम् इत्येके नवचत्यप्रियंक्व
इतिहलायुधः इतिदुर्गादासः
वच क संदेशे इतिकविकल्पद्रु
मः संदेशो वचनविशेषः ।
क वाचयत्यखिलां लिपि मिति
हलायुधः इतिदुर्गादासः॥
वचल गै वाचि इतिकविकल्प
द्रुमः लवक्तिर्नप्रयोज्या इत्याले
कारिकाः इतिदुर्गादासः॥
वचः पुं कीर पक्षी इतिमेदि
नी वचः स क्ली वाक्यं इत्यमरः
वचक्रुः पुं ब्राह्मणः इतिमेदि
नी वचक्रुः त्रि वावदूकः इति
मेदिनी वर्वरी स्त्री शारिका व
र्त्तिः शास्त्रभेदः इतिशब्दरत्नावली
मेदिन्या वचंडा इति वंडा इ
तिचपाठः ॥
वचनं क्ली उक्ती इतिशब्दचंद्रि
का वाक्यं तत्पर्यायः इतास
रस्वती ब्राह्मी भाषा वाणीच
शारदा गिरा गीश्च गिरादेवी
गीर्देवी भारतीश्वरी वाग्वादा
वचसामीशा वाग्देवी वर्णमा
तृका वचनं भाषितं चोक्ति
र्व्याहारोलपितंवचः
तारती वच सो

देवपर्यायः परिकीर्त्तितः य
थास्थाने यथायोग्यं भेदज्ञे
ज्ञानमनीषिभिः इतिशब्दरत्नाव
ली तत्र त्रिविधं यथा वृषि।
कृष्णउवाच वचनं त्रिविधं शैल।
लौकिके वैदिके तथा सर्वज्ञा
नातिशास्त्रज्ञो निर्मलज्ञान चक्षु
षा अस्तत्र महिते पश्चात्संपश्यते
श्रुति सुंदरं सुबुद्धि शत्रुवेद
तिन हि तेषां कदाचन आपदः
प्रीतिजनकं परिणामसुखा
वहं दयालु धर्मशीलस्य वो
ययसेव वोधवं श्रुतिमात्रात्स्व
यातल्लं सर्वकाले सत्यावरं स
संसारं हितकरं वचसां श्रेष्ठम्
प्सितं पवंस त्रिविधं शैलनी
तिसारनिरूपितं कथ्यतो त्रिषु
मध्ये किं वदामि वाक्यमीप्सि
तं इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खंडे ७० अध्यायः विभक्तिः सा
तुस्यादि स्यादिश्च यथाके
कैकं वचनं क्रमात्कृदवुस
तंस्यात् इति मुग्धबोधव्याक
रणं वचनग्राही न् त्रि वचनेस्थि
तः इत्यमरटीकायांरमानाथः।
वचनीयः त्रि कथनीयः इतिव
चधातोः कर्मणि अनीयप्रत्ययेन

निष्पन्नं॥
वचनीयता स्त्री लोकापवादः
यथा जनप्रवादः कौलीनं विगा
नं वचनीयता इतिहेमचंद्रः॥
वचनेस्थितः त्रि वचने तिष्ठति
यः १ विनयग्राही २ आश्रवः
वचनस्थः तत्पर्यायः विधेयः
इत्यमरः वश्यः ५ प्रणेयः ६
इति केचिदिति भरतः ॥
वचनोपक्रमः पुं वाक्यारंभः
इतिभरतशब्दरत्नावल्यौ तत्प
र्यायः उपन्यासः १ वाङ्मुखं २
इत्यमरः ॥
वचरः पुं कुक्कुटः शठः इति
मेदिनी ॥
वचलुः पुं शत्रुः यथा पुंसि
मंतः स्वपणपुञ्ज वचलु जंगल
स्तथा अवणपुञ्ज शवणपुः स्या
दमिन्द्र सणि विल्पपि इतिशब्द
माला ॥ वचसांपतिः पुं वृह
स्पतिः यथा जीवोङ्गिरास्सु
रगुरुर्वचसांपतीज्यो इतिदी
पिका वचक्नुरः त्रि वचने
स्थितः इतिकेचित् ॥
वचा स्त्री औषधविशेषः वच
इतिभाषा तत्पर्यायः उग्रगंधा
२ षड्ग्रन्था ३ गोलोमी ४ शत

पर्विका ५ इत्यमरः नीलता ६
कुटिला ७ मंगल्या ८ विजया
९ उग्रा १० रक्तोघ्नी ११ इतिरत्नमा
ला वच्या १२ लोमशा १३ इति
जटाधरः भद्रा १४ अमला गु
णाः अतितीक्ष्णत्वं कटुत्वंउ
ष्णत्वं कफाध्मग्रन्थि शोफवा
तज्वरातिसार स्राद भूतनाशि
त्वं वांतिकारित्वंच इतिराज
निर्घंटः अपिच वचोग्रगंधा
षड्ग्रन्था गोलोमी शतपर्वि
का क्षुद्रपत्रीच मंगल्याकुटि
लोग्राच लोमशा वचोग्रगंधा
कटुका तिक्तोष्णावान्तिवह्नि
कृत् विबंधाधिनी अपस्मार
कफोन्माद भूत जंतुनिला
ह्येत् अथ खुरासानी वचा पा
रसीकवचा शुक्लाहैमवतीति
साहैमवत्युदिता तद्वत्शूलेर
विविशेषतः अथमहाभरीव
चा यस्यालोके कुलीजन इति
नामान्तरं सुगंधाप्युग्रगंधा
त विशेषात्कफकासघ्नतस्व
स्वरत्वकरीरुच्या हृत्कंठशाव
शोधिनी अपरासुगंधास्थूलग्र
न्थिःसा लोके महाभरी इतिना
म स्थूलग्रंथिः सुगंधाख्या तेना
टीनगुणास्स्मृता

अथ चोपचीनीति लोकेप्रसिद्धा
तस्यागुणाः द्वीपान्तर वचा क
द्वीतिक्तोष्णावह्निदीप्तिकृत् वि
बंधाध्मान शूलघ्नी शकृन्मूत्रवि
शोधिनी वातव्याधीनपस्मारमु
न्मादं तनुवेदनां व्यपोहति विशे
षात्फिरंगामयनाशिनी इतिभा
वप्रकाशः अपरंच वचाचूर्णावा
त कफ त्वसीघ्नी स्मृतिवर्द्धि
नी इति राजवल्लभः अन्यच्च
अद्भिर्वा पयसाज्येनमासमेकंतु
सेविता वचा कुर्य्यान्नरं प्राज्ञं
श्रुतिधारणा संयुतं चंद्र सूर्य
ग्रहे पीतं पलमेकं पयोन्विते
वचाया लक्षणं कुर्य्यान्महाप्रज्ञा
न्वितं नरः इतिगारुडे १९८
अध्यायः
वचोग्रहः पुं कार्शिः इतिराज
निर्घंटः
वज गतौ इतिकविकल्पद्रुमः
वजति इतिदुर्गादासः ॥
वजक संस्कृतौ गतौ इतिक
विकल्पद्रुमः अयं मार्गणसं
स्कारे इति प्राञ्चः मार्गणस्य
स्यपत्रादिना संस्कारो मार्गण
संस्कारः करजयति पत्रैर्वाणं
कांडकारः इतिरमानाथः ।

मार्गण संस्कारयो रितिकश्चि
त् इतिदुर्गादासः
वज्रं पुं क्ली इंद्रस्यास्त्रविशे
षः वाज् इति भाषा तत्पर्य्यायः
ह्रादिनी २ कुलिशं ३ भिदुरं ४
पविः ५ शतकोटिः ६ स्वरुः ७ ।
शंबः ८ दंभोलिः ९ अशनिः १०
इत्यमरः कुलीशं ११ भिदिरं १२
भिदुः १३ स्वरुम् १४ संबः १५
संवः १६ अशनी १७ वज्राशनिः
१८ इतितट्टीका जंभारिः १९ ।
त्रिदशायुधं २० शतधारं २१ श
तारं २२ आपोत्रं २३ अक्षजं २४
इति पुरुषोत्तमः गिरिकंटकः
२५ गोः २६ अभोत्थं २७ मेघभू
तिः २८ गिरिज्वरः २९ इतिशब्द
रत्नावली जाम्बविः ३० दंभः ३१
इतिजटाधरः भिदुः ३२ अम्बुजं
३३ इतित्रिकांडशेषः ॥ अ
स्योत्पत्ति र्यथा तथेत्युक्तः सा
रविणा अंशो कृत्वा दिवाकरं
पृथक्चकार तेनेनस्याकं विशे
रकल्पयेत् त्रिशूलंचापि रुद्रस्य
वज्रमिंद्रस्य चापिकं दैत्यदानव
संहर्तुः सहस्त्रकिरणात्मकं रूपं
च प्रतिमंचक्रे त्वष्टा पारास्फुतेन
रत् नशाशककाय तद्द्रुष्टुं पारदूपं

देवः पुनः अर्चाम्वपि ततःपादौ
नकश्चित्कारयेत् क्वचित् यःक
रोति सपापिष्ठं गतिमाप्नोतिनि
न्दितां कुष्ठरोग मवाप्नोतिश्च ।
लोकेस्मिन् दुःख संयुते तस्मात्
धर्म कामार्थी विशेषाय तनेऽच
नक्वचित्कारयेत्पादौ देवदेवस्य
धीमतः इतिमात्स्ये ११ अध्यायः
अपिच प्रविश्य जठरं शुद्धो ।
देव्य मातुः पुरंदरः ददर्शोर्द्ध्व
रवबालं कठिनस्त करे महत्
तस्यैवान्तेऽथ ददृशे पेशीमां
मांसस्य वासवः शुद्ध स्फटिक
संकाशां कराभ्यां जगृहेचतां
ततःकोप समाविष्टो मांसपे
शीं शतक्रतुः कराभ्यामर्दयामा
सततः साकठिनाभवेत् ऊर्द्ध्वेना
र्द्धंच वद्धये तयोरूर्द्ध्वं वद्धयत्तया
शतपर्वा च कुलिशः संजातोमां
सपेशितः इति वामने ६८ अ
ध्यायः दधीचस्य वधार्थं दधी
चिमुने रस्था देवाज्ञया विश्व
कर्मणा निर्मितवज्रस्य प्रमाणं
यथा पवंकृतव्यवसितो दधीचा
शर्वणा तनुं परे भगवति अस्य
गणान्याने समयन्नको यतातास
मनो बुद्धि तत्त्वहक ध्वस्तबंधनः

आस्थितः परमयोगं न देहं बुबुधे
गतं अथेन्द्रो वज्रमस्थिनिर्मितं
विश्वकर्मणा मुनेः सक्थिभिरु
त्सिक्तो भगवत्तेजसान्वितः वृतोदे
वगणैः सर्वैर्गजेन्द्रो पर्यशोभत स्त
यमानो मुनिगणैः त्रैलोक्यं हर्षयन्नि
व इति श्रीभागवते ६ स्कंधे ९ अ
ध्यायः तन्निर्वाणवारकविधिर्य ।
था प्रचंडपवनाघाते मेघेषु मुनि
नेभ्यः जियदेजैमिनीयोऽस्मिभाद्रु
ध्वोवाप्युदस्रुवः तस्मादभूदयं
चावं विद्युतोयोःवसीदति इत्याह
फिकतत्वपूत ब्रह्मपुराणे मुनेः
कल्याणा मित्रस्य जैमिनेश्चापि ।
कीर्तनात् विद्युदग्नि भयं नास्ति
पठितेच गृहोदरे लिखितेचात्र
हौदेवे इतिवायात् जैमिनिश्चसु
मन्तुश्चवैशंपायन एवच पुलस्त्यः
पुलहश्चैव पंचैते वज्रवारकाः इ
ति पुराणे तत्वविशेषः हीरा ।
इति भाषा तत्पर्यायः इन्द्रायुधं
२ हीरं ३ भिदुरं ४ कुलिशं ५ प
विः ६ अभेद्यं ७ अशिरं ८ रत्नं
९ दृढं १० भार्गवकं ११ षट्कोणं
१२ बहुधारं १३ शतकोटिः १४ अ
स्य गुणाः षडस्रपतत्वं सर्वरोगा
पहारकत्वं. सर्वाघशमनत्वं सौर
ख्यत्वं

देहदार्ढ्यकरत्वं रसायनत्वंच
तद्विशेषो यथा स्वच्छं विद्युदा
भं स्निग्धं सौन्दर्यलघुलेखनं ।
षडस्रं तीव्रधारंच लघुशाम्बारे
श्रियं दिशेत् तस्यकलक्षणं
यथा भस्माभं काकपादंच रेखा
क्रान्तं वर्तुलं अधारमलिनं
बिन्दु संत्रासं स्फुटितं स्त्र्यानी
लाभं चिपिटं रूक्षं तद्वज्रं दोष
लं त्यजेत् वज्रस्य चतुर्वर्णा
लक्षणं यथा श्वेत लोहितपीत
मेचकतया छाया ब्राह्मणः क्ष
त्रियादिवत् सिद्धास्यत्वमन
सः शासन्ति सत्यं ततः स्फीतां की
र्तिमनुत्तमां श्रियमिदं दत्ते य
था संभूतं मर्त्यानां यथायथं
त कुलिशं पथ्यं हितं नान्यतः
तस्य परीक्षा यथा यत्पाषाणात
लेनिकाषा निकरे मोहूष्यते निष्ठुरे
यच्चान्योपल लोहमुद्गर मुखैर्लेखा
न्यायात्पादनं यच्चान्यं निर्मलीलये
व दलयेद्वज्रणा वाभिघ्नतस्तज्जात्यं
कुलिशं वदंति कुशलाः श्लाघ्यं
महार्घं तत् तस्य वर्णगुणा
यथा विप्रः सोपि रसायनेषुव
लवान्नगंग सिद्धिप्रदो वलत्पस्त
न्यणां वली पलितजिन्मृत्युःजयेर

न्नसा इत्याकर्षणं सिद्धिदस्त्व
मतरांवैश्योऽथ शूद्रो भवेत्स
र्वव्याधिहरः स्तदेव कथितो
वज्रस्य वर्णागुणाः इति राज
निर्घण्टः अपिच अथवज्रस्य ना
मलक्षणगुणाः हीरकः पुंसि व
ज्रोःस्त्रीचंद्रो मणिवरश्चसः स च
श्वेतः स्मृतो विप्रो लोहितः क्ष
त्रियोमतः पीतो वैश्योऽसितः
शूद्रश्चतुर्वर्णात्मकश्चसः वसा
येन मतो विप्रः सर्वसिद्धिप्रदा
यकः क्षत्रियो व्याधिविध्वंसी
जरा मृत्युहरः परः वैश्यो धनप्र
दः प्रोक्तः स्तथा देहस्य दार्ढ्यकृ
त् शूद्रो नाशयति व्याधीन्वय
स्तंभं करोतिच पुं स्त्री नपुंस
काश्चेते लक्षणीयाश्च लक्षणैः
सुवृत्ताः फलसंपूर्णास्तेजोयुक्ता
बृहत्तराः पुरुषा स्ते समाख्याता
रेखाबिन्दुसमायुक्ताः षडस्रास्ते
स्त्रियः स्मृताः षडस्राः षट्को
णाः त्रिकोणाश्च सदीर्घास्तु ते
विज्ञेया नपुंसकाः तेषु स्युः पु
रुषाः श्रेष्ठा रसबंधनकारिणः स्त्रि
यः कुर्वन्ति कायस्य कान्तिं स्त्रीणां
सुखप्रदाः नपुंसकास्त्ववीर्याः स्यु
रकामाः सत्ववर्जिताः स्त्रियः स्त्री
भ्यः प्रदातव्याः क्लीवं क्लीवे

प्रयोजयेत् सर्वेभ्यः सर्वदा दे
याः पुरुषा वीर्यवर्द्धनाः अशु
द्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां
तथा पाण्डुतां पंगुरत्वंच तस्मा
त्संशोध्य मारयेत् मारितस्य वज्र
स्य गुणाः आयुः पुष्टिं बलं वीर्यं
वर्णं सौख्यं करोतिच सेवितं
सर्वरोगघ्नं मृतं वज्रं न संशयः
इति भावप्रकाशः अपरञ्च ।
अथ वज्रगणाना विष्णुधर्मोत्तरे
वज्रं मरकतंचैव पद्मरागंच मौ
क्तिकं इन्द्रनीलं महानीलं वै
दूर्यं गंधसंज्ञकं चन्द्रकान्तं सूर्य
कान्तं स्फाटिकं बलकं तथा क
र्केतरं पुष्परागं तथा ज्योती र
सं द्विज स्फाटिकं राजवर्तंच
तथा राजमतं शुभं सौगंधिकं त
था गंजं शंख ब्रह्ममयं तथा गो
मेदं रुधिराख्यंच तथा भल्लात
कं द्विज धूलीमरकतंश्चैव तस्य
कं सीसमेवच पीलुं प्रवाल
कंचैव ~~गस्यकं सीसमेवच मौ~~
गिरिवज्रंच भार्गव भुजंगमणि
मेवतथा वज्रमणिः शुभः टिट्टि
भंच तथा पीलं भ्रामरंच तथोत्प
लं वज्रादेतानि सर्वाणिर्षपा
पिच महीतले सर्वाणि प्रतिव

हानि मयारोप समुदये इति
युक्तिकल्पतरुः तस्योत्पत्तिपरी
सामुत्याशिष्या वज्रिपरी
सांसत्वानांवलो नामासुरोऽभवे·
त् इन्द्राद्या निर्जिता तेन निर्जेतुं
तैर्नशक्यते इत्युपक्रम्य सुराश्च।
भावे विशुद्धे यस्माद्वज्र सुराङ्गते
वज्रपूर्वा परीक्षेयं ततोऽस्माभिः
प्रकीर्त्त्यते तस्यास्थिलेशो निप
पात येषु भुवः प्रदेशेषु कथञ्चि
देव वज्राणि वज्रास्ति वज्रायु
ध निर्जिगीषो भवेति नानाकृ
तिमन्ति तेषु हैम मातङ्गसौरा
ष्ट्राः पौण्ड्रकालिङ्गकोशलाः वैणा
तटाः ससौवीरा वज्रस्याष्टाविहा
कराः आताम्रा हिमशैलजाश्च श
शिभा वेणातटीयाः स्मृताः सौ
वीरे तु सिताब्ज मेघ सदृशास्ता
म्राश्च सौराष्ट्रजाः कालिङ्गाः कन
कावदातरुचिराः पीतप्रभाः को
शले श्यामाः पौण्ड्रभवा मतङ्गविष
ये नात्यन्तपीतप्रभाः अत्यर्थं ल
घु वर्णतश्च गुणवत्पार्श्वेषु सम्य
क्समं रेखा बिन्दु कलङ्क काक
पद त्रासादिभिर्वर्जितं लोकेऽस्मि
न् परमाणुमात्रमपि यद्वज्रं क्वचिद्दृश्य
ते तस्मिन्देव समाश्रयो व्यवसितस्त
क्ष्णाग्रधारं यदि वज्रपूर्वाणि
स्या देवानामपि परिग्रहः

श्लोकः वर्णोऽस्य विभागः का
र्यो वर्णाश्रयादेव हरित सितपी
तपिङ्ग श्यामाताम्राः स्वभावतो
रुचिराः हरि वरुण शक्र हुतवह
पितृपति मरुतां स्वकावर्णाः
विप्रस्य शङ्ख कुमुद स्फटिका
वदातः स्यात्क्षत्रियस्य शश बभ्रु
विलोचनाभः वैश्यस्य कान्तक
दलीदलसन्निकाशः शूद्रस्यधौ
त करवालसन्निकाशः शूद्र
स धौत करवालसमानदीप्तिः
द्वौ वज्र वर्णौ पृथिवीपतीनां सद्भिः
प्रतिष्ठानतु सार्वजन्यौ यः स्याज्ज
वाविद्रुम भङ्गशोणो यो वा हरि
द्रारससन्निकाशः ईशत्वात्सर्व
वर्णानां गुणवत्वाद्वर्णिके का
मतो धारयेत्सज्ज्ञानतत्त्वस्मात्क
थंचन अप्रयोगत हन्यादि याह
कस्माद्वर्णसङ्करः ततः कश्चनैव
ज्ञो वर्णानां सङ्करो मतः न च मा
गे विभाग मात्रेणास्य विद्भ्या व
ज्रपरिग्रहोऽविधेयः गुणावस्थामेप
दो विभूति विपरीतो व्यसनोद
यस्य हेतुः एकमपि यस्य शृङ्गं
विदलित मवलोक्यते विशीर्णं
वा गुणावदपि तन्नधार्य्यं वज्रमा
योषिद्भि भवेन स्फुटितानि विशी
र्णा शृङ्गदेशा मलवर्णाः एवं तेषु
येत मध्ये नहि वज्र स्तोपि वज्र

माश्रित्य सम्याश्रय तालसीमान्
ङ्गुयात् यस्यैकदेशः क्षतजावभा
सो यदा भवेल्लोहित वर्णचित्रं
न उन्नकर्णा हिपमाणमाशुस्वल्प
द् सत्वा इपि जीवितान्तं करो।
ध्यः पार्श्वाणि धाराश्च षडष्टौ द्वा
दशेति च उत्तुङ्ग समतीक्ष्णाग्रा व
ज्रस्याकरजा गुणाः षट्कोटिशुद्धम
मलं स्फुटतीक्ष्णधारं वर्णान्वितं
लघु सुपार्श्वमपेत दोषं इन्द्रायुधां
शु विसृतिच्छुरितान्तरीक्षमेवं।
विधं भुवि भवेत्सुलभं न वज्रं।
तीक्ष्णाग्रं विमलमपेत सर्वदोषं
धत्ते यः प्रयततनुः सदैव वज्रं हरि
तं प्रतिदिनमेति यावदायुःश्री
संपत्सुतधनधान्यगो पशूनां वा
तव्यक्ति विषध्याग्नितस्करास्तु भया
नि च हरात्तस्य निवर्त्तन्ते कर्माण्या
थर्वणानि च यदि वज्रमपेत स·
र्वदोषं विभ्रयात्तन्तुल विशति गुरु
ते मणिशास्त्रविदो वदन्ति तस्य
द्विगुणं रूपक लक्षणं मनुष्य
लं त्रिभागहीनार्द्धं तदर्द्धशेषत्र
योदश त्रिंशदत्राष्टभागाः अशी
ति भागोऽयं शतांशभागाः सहस्र
भागोऽस्य समान योगः यत्नेऽपि
होदशाभिः कृतस्य वज्रस्यसम्यक्ता।
प्रथमं प्रदिष्टं द्वाभ्यां क

माङ्गानि मुपागतस्यैकावमान्
स्य विनिश्चयोऽयं न वापि तण्डुले
देव वज्राणां धारणक्रमः अष्टाभिः
सर्षपै र्गौरैः तण्डुलं परिकल्प
येत् यत्र सर्व गुणा युक्तं वज्रं
तरति वारिणि रत्नवर्गे समस्ते ।
पितस्य धारणा क्षिप्यते येनापि
हि दोषेण तस्याल्पेन दूषितं
सम्मूल्यात्दशांशभागं वज्रं लभतिमा
नवः प्रकटानेक दोषस्यस्वल्पस्य
महतोऽपिवा सम्मूल्यात्तु नशोभा
गो अन्यस्मिन् विधीयते स्फट
दोषमलंकारे वज्रे यद्यपिदृश्य
ते रत्नानां परिकर्म्माणि मूल्य
तस्य भवेत्तु प्रथमं गुणसम
दाम्भुपेतं प्रतिवद्धे सदुपेतिय
द्दोषं अलमाभरणेन तस्यरा
ज्ञोगुणहीनोपि मणिर्न भूषणा
य नार्यो वज्र मधार्य्यं गुणवदपि
सततमसन्ततिकामा अन्यत्र दीर्घ
चिपिट फलाकुणो विमलान्तु
प्रयसा पुष्परागेण तथा गोमेद
केन च वैदूर्य्यस्फटिकाभ्यां च का
चैश्चापि पृथग्विधैः प्रतिरूपाणि
कुर्वन्ति वज्रस्य कुशला जनाः
परीक्षा तेषु कर्त्तव्या विद्वद्भिः स
परीक्षकैः तारोल्लेखनशाणाभि
र्लोषा कार्य्य परीक्षणं ।

ह्रुपिश्चांयानि रत्नानि येचान्ये
लोहधातवः सर्वाणि विलिखे
द्वज्रं तच्चैतैर्न विलिख्यते गुरु
ता सर्वरत्नानां गौरवाधारकार
णांवज्रेतान्यपरीत्येन स्वयःपरि
वर्तते जाति रत्नानि विलिखे
ति वज्रं कुरुविन्दः वज्रं वेज्रं।
विलिखति नान्येन लिखितेवज्रे
वज्राणि मुक्ता मणयो येचकेच
केचातयः नतेषां प्रतिवद्धानां
भा भवत्यूर्द्धगामिनी तिर्यक्
त्तनत्वात्केषांचित्कथंचिद्दिह
प्रपते तिर्यगालिख्यमानानां।
सा पार्श्वेष्वपि दृश्यते यद्यपि·
विशीर्णा कोटिःसविंद्रेखावान्वि
तोविवर्णोवा तदपि धनधान्य
पुत्रान् करोति सेव्यमानो वज्रः
सौदामिनीविस्फुरिताभिरामंरा
जा यथोक्तं कुलिशंदधानः प
राक्रमाक्रांत परप्रतापः सम
स्तसामन्त भुवं भुनक्ति इति
गारुडे ६८ अध्यायः॥
वज्रं क्ली बालकः धात्री इ
तिमेदिनी कांजिकं इतिश
ब्दरत्निः। वज्रपुष्पं इतिशब्दर
त्नावली लोहविशेषः सचव
ज्रविधो यथा नीलपिंड १ अरु
णाभ २

मोरके ३ नागकेशरं ४ तिनि
शं ५ स्वर्णवज्रं ६ शैवालवज्र
शाणावज्रं ८ रोहिणी ९ कोको
ले १० ग्रैधिवज्रकं ११ मदनाख्य
१२ इत्यादि तेषां नामानुरूपंचि
ह्नं इति पुराणं अभ्रविशेषः
तस्योत्पत्यादि यथा। पुरा
वधाय वृत्रस्य वज्रिणा वज्रमुद्ध
तं विस्फुलिंगास्ततस्तस्य गगने
परिसर्पिताः ते निपेतु र्हैमवत्या
नाद्रिवरेषु महीभृतां तेभ्य
एव समुत्पन्नं तत्तज्ज्ञिशिश्चाद्भुक
तद्वज्रं वज्रजातत्वादभ्र मभ्र रवो
द्भवात् गगनात्स्खलितं यस्मात्
गगनंच ततो मतं पिनाकं द
र्दुरं नागं वज्रंचेति चतुर्विधं
वज्रेत वज्रवंतिष्ठेत्तन्नामो विक्र
ति बृजेत सर्वाभेषु वरेवज्रेष्या
पिवाद्वैव स्त्रसृजेत् इति भाव
प्रकाशः॥
वज्रः पुं कोकिलाक्षवृक्षः श्वेत
कुशः इति राजनिर्घण्टः सेहुं
डः इतिभावप्रकाशः॥
श्रीकृष्णप्रपौत्रः यथा अनिरु
द्धात्सुभद्रायां वज्रो नाम नृपो
ऽभवत् प्रतिवाहुर्वज्रसुत स्त्वा
सुबाहुस्तस्य सुतोऽभवत् इतिगारुडे

4239

१४४ अध्यायः अपिच प्रद्युम्न
आसीत्प्रथमः पितृवद्रुक्मिणी
सुतः सरुक्मिणो दुहितरमुप
येमे महावधः तस्यां ततोऽनिरु
द्धोऽभूत्नागायुत बलान्वितः स
चापि रुक्मिणः पौत्रीं दौहित्रो
जगृहे ततः वज्रस्तस्याभवद्यस्तु
मौषलादवशेषितः प्रतिवाहु
रभूत्तस्मात्सुवाहुस्तस्य चात्मजः।
इति श्रीभागवते ९ स्कंधे ९०।
अध्यायः विष्कंभादि सप्तविंश
तियोगान्तर्गत पंचदश योगः।
तस्याद्यनवदंडा वर्ज्जनीया यथा
त्यजाद्यौ पंच विष्कंभे सप्तशूलेच
नाडिकाः गंडव्याघातयोः षट्च
नव हर्षण वज्रयोः वैधृतिव्यति।
पातौच समस्तौ परिवर्जयेत्।
शेषायथार्थनामानो योगाः का
र्येषु शोभनाः इतिज्योतिस्तत्त्वे
अत्रजातफले यथा गुणी गु
णज्ञो बलवान् महौजाः स
द्रत्न वस्त्रादि परीक्षकःस्यात्
वज्राभिधाने यदि चेत् प्रसूतो
वज्रोपमः स्याद्रिपु कामिनीनां
इतिकोष्ठीप्रदीपः॥
वज्रकं क्ली वज्रक्षारं इतिराज
निर्घण्टः सर्वतोभद्रचक्रान्तर्गत।

सूर्यभोग्य नक्षत्रात्त्रयोविंश
नक्षत्रात्मक उपग्रहः यथा सू
र्यभात्पंचमं धिष्ण्यं ज्ञेयं विद्युन्मु
खाभिधं शूलंचाष्टमगं प्रोक्तं
सन्निपाते चतुर्दशं केतुमष्टाद
शं प्रोक्त मुल्कास्यादेकविंशतिः
द्वाविंशतितमे कम्पः त्रयोविंश
न्तु वज्रकं निर्घातश्च चतुर्विंश
मुक्ता अष्टावुपग्रहा इतिज्यो
तिस्तत्त्वं॥
वज्रकटः पुं हनूमान् इति
हेमचन्द्रः॥
वज्रकंटकः पुं स्नुहीवृक्षः इ
तिजटाधरः कोकिलाक्षः
इतिराजनिर्घण्टः॥
वज्रकंदः पुं वज्रकर्णः मक
रकेन्द्रात् इतिभाषा इतिरत्न
मालावज्रकपाली न पुं बुद्धवि
शेषः तत्पर्यायः हेरम्बः २ हेरु
कः ३ वज्र सत्वः ४ देवः ५ नि
कुंभीशः ६ शाक्याख्यः ७ वज्र
टीकः ८ इतिहेमचन्द्रः॥
वज्रकालिका स्त्री मायादेवी इति
हेमचन्द्रः॥
वज्रकेतुः पुं नरकराजः यथा
गते वशिष्ठे नरकःप्रीत्रेवि
स्मयस्सुतः इत्युपक्रम्य इतिया

मीस्फति स्तस्य वज्रकेलोस्तदा
चला हूलंच माहिरागोल्मस्तंवा
गास्सनगरंप्रति इतिकालिका
पुराणे ३८ अध्यायः ॥
वज्रचर्म्मा न पुं खड्गी गंडकं इ
तिराजनिर्घंटः ॥
वज्रजित् पुं गरुडः इतिहेम
चंद्रः ॥
वज्रज्वाला स्त्री वज्राग्निः इति
हलायुधः ॥
वज्रटीकः पुं वज्रकपालीनाम
कुक्कुरः इति त्रिकांडशेषः ॥
वज्रतुंडः पुं गरुडः गणेशः
इति त्रिकांडशेषः गृध्रः मशा
कः इति राजनिर्घंटः ॥
वज्रदंतः पुं शूकरः मूषिकः
इतिशब्दमाला ॥
वज्रदशनः पुं मूषिकः इति
हेमचंद्रः ॥
वज्रद्रुः पुं स्नुहीवृक्षः इत्यम
रः वज्रद्रुमः पुं स्नुहीवृक्षः इ
तिशब्दरत्नावली ॥
वज्रधरः पुं इंद्रः इतिहलायु
धः जिनविशेषः इतित्रि।
कांडशेषः ॥
वज्रनिर्घोषः पुं वज्रजनितश
ब्दः इतिहलायुधः ॥

वज्रनिष्पेषः पुं वज्रनिर्घोषः ।
तत्पर्यायः स्फूर्जथुः २ इत्यमरः
हे वज्रजनितशब्दे अस्मान्ससंच
हनात्मयं साथि मचाडवज्रमि
त वज्रं तस्य साटोपधनोदयमि
तिकेचित् हेस्फूर्जौ वज्रनि[illegible]
ष्पेषे निष्पेषः संघर्षः ध्वनिः अ
शन्याघात इत्यके निष्पेषमशनि
नं साटोपध्वनिस्त्वहृत्वधनिरभिप्रे
तः श्रुत्वा विः स्फूर्जथु मस्वा।
निनादं परिदेविनीति भट्टिः हि
लोऽडरिति अथुः निपातनात्
दीर्घः स्फूर्जथु रिति दीर्घार्थं
परस्त्वं केचित्तदीर्घं नेच्छंति के
चिद्विभाषया दीर्घमिच्छंति व
ज्रस्यनिष्पेषो वज्रनिष्पेषः योपि
षत्तचरणेनेचन निष्पेषा द्विमूर्ह
मः इतिभरतः वज्रपाणिः पुं इंद्र
इतित्रिकांडशेषः ॥
वज्रपुष्पं क्ली तिलपुष्पं इत्यम
रः वज्रपुष्पा स्त्री शतपुष्पा इ
तिराजनिर्घंटः
वज्रमूली स्त्री माषपर्णी इति
राजनिर्घंटः ॥
वज्ररथः पुं क्षत्रियः इतिपुराणं
वज्ररदः पुं शूकरः इतित्रिकांड
शेषः वज्रतुल्यदंतश्च ॥

4241

वज्रवल्ली स्त्री अस्थिसंहारलता।
इतिहारावली ॥
वज्रवाराही स्त्री मायादेवी त।
त्पर्यायः मारीची २ त्रिमुखा ३
वज्रकालिका ४ विकटा ५ गौ
री ६ पोत्रिरथ्या ७ इतित्रिकांडशे
षः वज्रवीजकः पुं लताकरंजः
इतिराजनिर्घंटः ॥
वज्रवृक्षः पुं सेहुंडवृक्षः इति
राजनिर्घंटः ॥
वज्रशल्यः पुं शल्यकनामाजंतुः
इतिराजनिर्घंटः ॥
वज्रशृंखला स्त्री विद्यादेवी इति
हेमचंद्रः ॥
वज्रसर्पः पुं कुद्रविशेषः । इति
त्रिकांडशेषः ॥
वज्रसारं क्ली सारविशेषः तत्प
र्यायः वज्रकं २ तारश्रेष्ठं ३ वि
दारकं ४ सारः ५ चंदनसारः ६
धूमोत्थं ७ भस्मांगकं ८ अस्य।
गुणाः गुरुत्वं तीक्ष्णत्वं सा
रत्वं रेचनत्वं गुल्मोदरार्त्ति वि
हृद्यं श्लेष्मघ्नं [illegible]
त्वं सरत्वंच इतिराजनिर्घंटः
वज्रा स्त्री स्नुहीवृक्षः गुडूची इ
तिमेदिनी दुर्गा यथा वज्रांकु
शकरी देवी वज्रा तेनोपगीयते

इतिदेवीपुराणे ४५ अध्यायः
वज्रांगः पुं सर्पः इतिराजनि
र्घंटः वक्रांग इतिवापाठः
वज्रतुल्यांगयुक्तेपि ॥
वज्रांगी स्त्री गवेधुका इतिश
ब्दचंद्रिका अस्थिसंहारी इति
भावप्रकाशः ॥
वज्राभः पुं दुग्धपाषाणः इति
राजनिर्घंटः हीरकतुल्यदीप्ति
मति त्रि वज्राशनिः पुं वज्रं इति
त्रिकांडशेषः ॥
वज्रास्थिशृंखला स्त्री कोकिला
क्षवृक्षः इतिराजनिर्घंटः ॥
वज्री न पुं इंद्रः इत्यमरः बुद्धः
इतिमेदिनी ॥
वज्री स्त्री स्नुहीभेदः इतिमे
दिनी वंचकः पुं शृगालः इत्य
मरः गृहबभ्रुः इतिमेदिनी ॥
वंचकः त्रि खलः धूर्त्तः इति
मेदिनी ॥
वंचथः पुं धूर्त्तः इत्युणादि
कोषः वंचना कोकिलः इति
संक्षिप्तसारोणादिवृत्तिः ॥
वंचनं क्ली प्रतारणं इतिहेम
चंद्रः तस्य गोपनीयत्वे यथा
वंचनंचापमानंच मतिमान्नप्रका
शयेत् इतिचाणक्यसंग्रहः ॥

वंचना स्त्री प्रतारणा । वंचित व
न्चुधातोर्भावे अनप्रत्ययेन
निष्पन्नः प्रयोगो यथा तेका
न्तंमुनयोऽपारिद्धाः प्रेम हेमवतें
पुरे सर्गाभिसृष्टेपि सुकृतं वंच
ना मिवमेनिरे इति कुमारसंभ
वे ६ सर्गः ॥
वंचितः त्रि वंचनाविशिष्टः
प्रतारितः तत्पर्यायः विप्रलं
ब्धः २ इति हेमचंद्रः ॥
वंचुकः त्रि प्रतारणाशीलः त
त्पर्यायः धूर्तः २ वंचूकः ३ इ
ति शब्दरत्नावली ॥
वंच्यं त्रि गमनीयं इति भरत
धृतवंचधातोः कर्मणि ण्यप्र
त्ययेन निष्पन्नं इति मुग्धबोध
व्याकरणं वंजुलः पुं तिनश
वृक्षः अशोकवृक्षः इत्यमरः ।
वेतसवृक्षः इति मेदिनी स्थल
पद्मवृक्षः इति शब्दरत्नावली ।
पक्षिविशेषः इति हलायुधः
वंजुलद्रुमः पुं अशोकवृक्षः
इति राजनिर्घंटः ॥
वंजुलप्रियः पुं वानीरवृक्षः
वेतसवृक्षः यथा विदुलो वेतसः शी
तो वानीरो वंजुलप्रियः इति रत्न
माला वंजुला स्त्री बहुदुग्धा गौः
इति

हेमचंद्रः ॥
वट तक वेष्टे भागे इति
कविकल्पद्रुमः वटयति इति
दुर्गादासः ॥
वट वेष्टे इति कल्पद्रुमः वट
ति वृत्ते लता इति दुर्गादासः
वट इ कि वेष्टने इति कविक
ल्पद्रुमः वेष्टने विभागः इ
ति ग्रासते कि वंटयति वंटवेति वे
ष्टेति हारकेयस्मात्त्वाप्यविभाज्य
दंपरे इति हलायुधः अयंचुरा
दौके ञ्चिन्नपक्षते इति दुर्गासिंहा
दयः इति दुर्गादासः ॥
वट म उक्तौ इति कविकल्प
द्रुमः मवटयति इति दुर्गादासः
वट इ स्तेये सौत्रधात्वयं इति
कविकल्पद्रुमः इ वंटकः इति
दुर्गादासः ॥
वटः पुं वृक्षविशेषः वड्गा
छ इति भाषा तत्पर्यायः न्य
ग्रोधः २ बहुपात् ३ इत्यमरः ॥
वृक्षनाथः ४ यमप्रियः ५ इति
शब्दरत्नावली रक्तफलः ६ शृं
गी ७ कर्मजः ८ ध्रुवः ९ क्षीरी १०
वैश्रवणावासः ११ भांडीवः १२
इति जटाधरः जटालः १३ रोहि
णः १४ अवरोही १५ विटपी

१६ स्कंधरुहः १७ मंडली १८
महाच्छायः १९ भंगी २० यक्षा
वासः २१ यक्षतरुः २२ पादरोहि
णः २३ नीलः २४ शिफारुहः
२५ बहुपादः २६ वनस्पतिः २७ अ
स्य गुणाः कषायत्वं मधुरत्वं ।
शिशिरत्वं कफ पित्तज्वरदाह
तृष्णामोह व्रण शोफ नाशि
त्वंच इति राजनिर्घंटः अपिच ।
वटः शीतो गुरु ग्राही कफपित्त
व्रणापहः वर्ण्यो विसर्पदाहघ्नः
कषायो योनिदोषहृत् इति भा
वप्रकाशः सच रुद्रस्वरूपः यथा
ऋषय ऊचुः कथं त्वया सत्याव
टोगोब्राह्मणे समो कृतो सर्व
भोपि तरुभ्यस्तो कथं पूज्यत
मो कृतो सूत उवाच अश्वत्थरूपी
भगवान्विष्णुरेव न संशयः रुद्र
रूपो वटस्तद्वत्पलाशो ब्रह्मरू
पधृक् दर्शन स्पर्श सेवासु ते
वै पापहराः स्मृताः दुःखापद्या
धिदुष्टानां विनाशकारिणो ध्रु
वं इति पाद्मोत्तरखंडे १६ अध्या
यः अस्मात्सलाघा शोके दृष्ट
वं व्रजमंडलाभ्यंतरीणवट
संज्ञक षोडश वनानि यथा
अथैषा षट्सांग वनानामभ्यंतरे

संकेत वटाद्या यमुनाया अत
रशीति क्रोश मर्य्यादांतरेदति
गोचर ठटयोः षोडशवनानि
पाद्मे संकेत वटमादौ तु भा
ण्डीराख्यं वटं द्वयं यावकाख्यं
तृतीयंच वटं शृंगार संज्ञकं ॥
तुर्यं वंशीवटं श्रेष्ठं पंचमे श्री
वटंच षट् सप्तमेच जटाजूटं
कामाख्यवटं अष्टमे मनोरथव
टं च नाम नवमं परिकीर्तितं आ
शावटं महाश्रेष्ठं दशमं शुभदा
यकं अशोकाख्यं वटं श्रेष्ठमे
कादश मुदाहृतं नामकेलिव
टं श्रेष्ठं द्वादशं परिकीर्तितं ना
म ब्रह्मवटं चैव त्रयोदशमसंज्ञ
कं नामरुद्रवटं श्रेष्ठं चतुर्दश
मुदाहृतं श्रीधराख्यं वटं ख्या
तं पंचदशममीरितं सावित्राख्यं
वटं श्रेष्ठं सोयं षोडश निर्मितं
इति वृन्दमंडलाभ्यंतरे षोडशवटानि
इति नारायणभट्टकृत व्रजभक्ति
विलासः कपर्दः करि इति
भाषा इति मेदिनी गोलः
भस्म वडा इति भाषा ॥
साम्य इति हेमचंद्रः ॥
वटः त्रि गुणः वेष्टे इति भा
षा इति मेदिनी ॥

वटकः पुं पिष्टकभेदः बड़ा
इतिख्यातः इत्यमरभरतौ
अस्य गुणाः विदाहितेत्यस्मा
कारित्वंच इतिराजवल्लभः ॥
अपिच माषाणां पिष्टिकांशु।
कोल्लवणार्द्रक हिंगुभिः कृत्वा
विदध्याद्वटकांस्तांस्तैलेषु पचेत्।
ततस्तैः विमुक्ता वटका बल्या
बृंहणाः वीर्यवर्द्धनाः वातामय
घ्नाश्च रुच्या विशेषाद्दर्दितापहाः
विबंधभेदिनः श्लेष्मकारिणोः
त्यग्निदीप्तिताः संचूर्णं निक्षिपे
त्तक्रे भृष्टं जीरक हिंगुच लव
णं तत्रवटकान्सकलान्विम
र्जयेत् सुकृत स्तत्र वटकोबल
कृद्रोचनो गुरुः विबंधकृद्दि
दीवश्लेष्मलः पवनापहः राम
कयाति रोचिका पाचना तीक्ष्ण
भक्षयेत् अथाम्लिकावटकः अ
म्लिकांस्वेदयित्वात् जलेनसह
मर्द्दयेत् तन्नीरे कृतसंस्कारे व
टकान्मज्जयेज्जनः अम्लिकावट
का स्तेत रुच्या वह्निप्रदीपनाः
वटकस्यगुणाः पूर्वं ये तेऽपिच
समन्विताः अथातक्रवटकः मु
द्गानांवटका स्तक्रे मज्जिताल
घवोहिमाः संस्कारस्य प्रभावेनत्रि
दोष

समन्वाहिताः अथ माषवट
टकः माषाणां पिष्टिका हिंगु
लवणार्द्रक संस्कृताः तयावि
रचिता वस्त्रे वटिकाः साधुशो
षिताः तालिता स्तप्ततैलतता
अथवास्वप्नेहिताः वटकस्यगु
णैर्युक्ताज्ञातव्या रुचिराभृशं
अथकूष्मांडवटिः कूष्मांडकवटी
ज्ञेया पूर्वोक्तवटिकागुणा वि
शेषात्पित्तरक्तघ्नी लघ्वीचकथि
ताबुधैः अथ मुद्गवटिका।
मुद्गानां वटिका तद्वद्विहिताऽपि
ता तथा पथ्या रुच्या ततो ल
घ्वीमुद्गसूपगुणा स्मृता इतिभा
वप्रकाशः अष्टमाषकपरिमाणं
यथा दशगुञ्जात्मक माषःस्यात्
श्चानो माषचतुष्टयं होशाणो
वटकः कोण स्तोलकोऽक्षएव
अक्षः इतिशब्दमाला ॥
वटपत्रः पुं सितार्जकः इति
राजनिर्घंटः ॥
वटपत्रा स्त्री त्रिपुरमालीपुष्प
वृक्षः इतिरत्नमाला ॥
वटपत्री स्त्री पाषाणभेदीवि
शेषः तत्पर्यायः इनानी २ पे
रावती ३ गोधावती ४ इरावती ५
प्रणामा ६ खहंगनामिका ७ अस्यागुणाः

हिमत्वं गोल्लत्वं मेह कृच्छ्र
विनाशित्वं बलदाहत्वं व्रणह
न्तृत्वं किंचिद्दीपनकारित्वंच इ
तिराजनिर्घंटः अपिच वटपत्री
तु कथिता मोहिन्येरावती बुधैः
वटपत्री कषायोष्णा योनिमूत्र
गदापहा इतिभावप्रकाशः ॥
वटरः पुं कुक्कुटः वेष्टः शाठः
चौरः चंचलः इति शब्दरत्ना
वली ॥
वटवासी पुं स्त्री यक्षः इति।
हेमचंद्रः वटवृत्तवासकर्त्तरित्रि
वटाकरः पुं रज्जुः इत्यमरटी
का यां स्त्री रज्जुः दडि इति
वेटे इतिच भाषा इतिपुराणं।
वटावीकः पुं चौरविशेषः यथा
नामचौरो वटावीकः संधिचौर
स्तु हारकः इतिशब्दमाला।
वटिः स्त्री उपजिह्विका यथा
उपजिह्विकोत्पादिकाच वटि
रुद्देहिकादिवी इतिहारावली
वटिका स्त्री वटी बड़ी इतिभा
षा तत्पर्यायः निस्तली २ इति
शब्दचंद्रिका अथ वटिकाविधिः
वटका अथ कथ्यन्ते तन्नामानि व
टिका वटी मोदको गुटिकापिंडी

शमाश्रमः बटारका

गुडो वर्त्ति स्तथोच्यते लेह्यवत्
साध्यते वह्नौ गुडो वाशर्कराय
वा गुग्गुलु र्वा क्षिपेत्तत्र चूर्णं त
न्निर्मिता वटी तत्र वह्निसिद्धगु
डादौ कुर्याद्वह्निसिद्धेनकेचिद्गु
ग्गुलुनावटं द्रवेण मधुना वापि
गुटिकां कारयेद्बुधः सिता चतुर्गु
णा देयावटीषु द्विगुणो गुडः चू
र्णे चूर्णसमः कार्यो गुग्गुलुर्मधु
तत्समं तत्समं चूर्णसमं द्रवन्तु
द्विगुणं देयंमोदकेषु भिषग्वरैः
द्रवं चतुर्गुणमिति वापाठः द्रवं
द्रवद्रूप द्रव्यं कर्षप्रमाणं तस्मा
त्रा वले हृद्यप्रयुज्यते बलामि
ति कालादे रपुपलक्षणं इति
भावप्रकाशः येनेनोपयोगिद्रव्यं
अस्यापि वड़ी इति भाषा यथा
माषाणांपिष्टिका हिंगु लवणा
र्द्रक संस्कृता तयाविरचिता व
स्त्रे वटिकाः साधुशोषिताः ता
लिता स्तप्ततैलेतो अथवास्वप्ने
हिताः वटकस्यगुणैर्युक्ता ज्ञात
व्या रुचिरा भृशं कूष्मांडकव
टी ज्ञेया पूर्वोक्त वटिकागुणा
विशेषात्पित्तरक्तघ्नी लघ्वीचकथि
ताबुधैः मुद्गानां वटिकातद्वद्विता
साधिता तथा पथ्या रुच्याततो

तन्त्रीमुद्गसूपगुणास्तत्र इतिभा
वप्रकाशः ॥ वृक्षविशेषः तत्पर्या
यः नदीवटः २ यज्ञवृक्षः ३ सिद्धा
र्थः ४ वटकः ५ श्रमणा ६ भेदिनी ।
णी ७ क्षीरकाष्ठा ८ अस्यागुणाः
कषायत्वं मधुरत्वं शिशिरत्वं ।
पित्तनाशित्वं दाहतृष्णाश्रमश्वा
सविषच्छर्द्दिश्रमनत्वञ्च इति
राजनिर्घण्टः ॥
वटी स्त्री वटः इत्यमरः ॥
वटुः पुं माणवकः यथा वटुः
पुनर्माणवकोऽभिक्षास्याग्रासमा
मके इति हेमचन्द्रः ब्रह्मचारी य
था वटुर्वर्णी ब्रह्मचारी इति श
ब्दरत्नावली ऊढवृत्तः यथासे
तूकपर्णाः प्रेणाणकः स्फुकना
सः ऊटलटः अस्त्रो वटु दीर्घवृ
न्तो दीर्घवृन्तक इत्यपि इति च श
ब्दरत्नावली बालकः यथा वा
लको माणवो बालः किशोरो वटु
रित्यपि इत्यपि शब्दरत्नावली
वटुकः पुं बालकः इति शब्द
रत्नावली भैरवविशेषः अस्य
संज्ञादि यथा अघोरेरुटुकं ऊन्ने
मापदुद्धारणं तथा ऊरुद्वयं
पुनर्द्वैज्ञं वटकञ्च समहेर फक
विशासहवानाशक्तिरुद्रो म

हामनुः अस्य श्रुता प्रातःकृ
त्यादि प्राणायामान्तं विधायपी
ठन्यासं कुर्यात् यथा धर्मादि
ग्रन्थेस्वर्यान्तं देहे विन्यस्य अस्या
दिन्यासं कुर्यात् यथा शिरसि
ओं बृहदारण्यक ऋषये नमः
मुखे गायत्रीछन्दसे नमः हृदि
वटुकभैरवाय देवतायै नमः
ततो मूर्त्तिन्यासः ह्रां ॐ ईशाना
य नमोऽङ्गुष्ठयोः ह्रीं ॐ तत्पु
रुषाय नमस्तर्ज्जन्योः ह्रूं ॐ अ
घोराय नमो मध्यमयोः ह्रैं ॐ
वामदेवाय नमोऽनामिकयोः
ह्रौं ॐ सद्योजाताय नमः कनिष्ठ
योः पुनस्तत्तदङ्गुलीभिः शिरो
वदन हृद्गुह्य पादेषु तत्तद्बीजा
दिकास्तत्तन्मूर्त्तीर्न्यसेत् तथोर्द्ध्वपू
र्व्वदक्षिणोदीच्यपश्चिमेषु मुखेषु
च तान्न्यसेत् तथाच निबन्धे अ
ङ्गुली देहवक्त्रेषु मूर्त्तीर्न्यसेद्यथा
पुरा सद्यादि पञ्च ह्रस्वाद्याः शक्ति
बीजपुरःसरं वकारं पञ्चह्रस्वाद्य
मीशानादिषु योजयेत् ततः क
रन्यासो तद्यथा ओं ह्रां वां अङ्गु
ष्ठाभ्यां नम इत्यादि ओं ह्रां वां हृद
याय नम इत्यादि षड्दीर्घबीज
हृदयेन कुर्यात् तथाच निबन्धे षड्दीर्घ

युक्तया शक्त्या वकारेणापि तद्व
त् अङ्गानि जातियुक्तानि आ
वाह्येन कल्पयेत् ततो ध्यानं त
स्य ध्यानं त्रिधा प्रोक्तं सात्त्विका
दि प्रभेदतः सात्त्विकं यथा वन्दे
बालं स्फटिकसदृशं कुण्डलोद्भासि
वक्त्रं दिव्याकल्पैर्नवमणिमयैः किं
किणीनूपुराद्यैः दीप्ताकारं विशद
वदनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जा
भ्यां वटुकमनिशं शूलदण्डौ दधानं
१ एवं ध्यात्वा राजसं यथा उद्यद्
भास्कर सन्निभं त्रिनयनं रक्ताङ्ग
रागस्रजं स्मेरास्यं वरदं कपालम
भयं शूलं दधानं करैः नीलग्री
व उदार भूषणशतं शीतांशुखं
डोज्ज्वलं बन्धूकारुणवाससं भय
हरं देवं सदा भावये २ ॥
तामसं यथा ध्यायेन्नीलाद्रिकां
तं शशिशकलधरं मुण्डमालं महे
शं दिग्वस्त्रं पिङ्गकेशं डमरुमथ सृ
णिं खड्गशूलाभयानि नागं घण्टां
कपालं करसरसिरुहैर्बिभ्रतं भीम
दंष्ट्रं सर्पाकल्पं त्रिनेत्रं मणिमयवि
लसत्किङ्किणीनूपुराढ्यं ३ सा
त्त्विकं ध्यानमाख्यातमपमृत्युवि
नाशनं आयुरारोग्यजननमपवर्ग
फलप्रदं १ राजसं ध्यानमाख्यातं

धर्मकामार्थसिद्धिदं २ तामसं श
त्रुशमने कृत्याभूतग्रहापहं ३
एवं ध्यात्वा मानसैः संपूज्य शंख
स्थापनं कुर्यात् अस्य स्नायन्ते
धर्माधर्मादिभिः क्रमे पीठे पं
कजशोभिते षट्कोणान्तस्त्रिको
णाख्ये व्योम पंकजसंयुते ततो
मूलेन मूर्त्तिं संकल्प्य पूर्ववद्ध्या
त्वावाहनादिकं कुर्यात् तत्रक्र
मः मूलेन सद्योजातमन्त्रेणावाह
नं मूलादिवामदेवेन स्थापनं
मूलेन सान्निध्यं अघोरेणासन्नि
रोधनं तत्पुरुषेण योनिमुद्राप्र
दर्शनं ईशानेन वेदन मिति वि
शेषः ततः कर्णिकायां दिक्
कोणेषु इमानादीन् यजेत् त
तो व्योम पंकजदलेषु असिताङ्गा
दि भैरवान् यजेत् असिताङ्गो
रुरुश्चण्डः क्रोधोन्मत्तश्च भैरवौ
कपाली भीषणश्चैव संहारोऽष्ट
व भैरवाः एते अष्टभैरव हिनौ
यावरण ततः षट्कोणेषु ओं
ह्रां हृदयाय नम इत्यनेन प्रजये
त् ततः पूर्वादि डाकिनी राकि
णी लाकिनी काकिनी शाकि
नी हाकिनी मालिनीश्चान्देवीश्च
ज्ञात्वा उमा षड्ङ्गान्हृषड्भान्मात्का

पुत्रान्दक्षिणे यजेत् ऊर्द्धेच
हंसद्रवीपुत्रान् अधोः योगबीं
पुत्रान् तद्वहिः स्वपत्रेषु लोके
शान् वटुकरूपान्समर्चयेत् त
द्वहिः पूर्वे ॐ ब्रह्माणीपुत्राय
नमः एवः मीशानेमाहेश्वरी
पुत्राय अग्नेयं वैष्णवीपुत्राय।
अनिले कौमारीपुत्राय पश्चि
मे इंद्राणीपुत्राय नैर्ऋते नमस्
लक्ष्मीपुत्राय याम्ये वाराही
पुत्राय अनले चामुण्डापुत्राय त
द्वाव निवेश्य ब्रह्माणीपुत्रकं
पूर्वे माहेश्वरीपुत्रमैश्वरे वैष्णवी
पुत्रकं सौम्ये कौमारीपुत्रमानि
ले इंद्राणीपुत्रकं भूयः पश्चि
मे पूजयेत्ततः महालक्ष्मीसुतं प
श्चाद्दक्षिणे दिशि समर्चयेत् वारा
हीपुत्रकं याम्ये चामुण्डापुत्रमा
नले तद्बहिः देशादिक्षुच देत्र
दक्षिणपाल्लकं वेतालं वह्नि
जिह्वकबालकालांतकं एक
पादं भीमरूपं अनलेचालकेश्वरं
पूजयेत् ततो योगिनीसहितांस्
तु योगीशानमः एवं योगिनी
सहित भूमिसु योगीशाय नमः
इत्यावाति निवेशितिशु पूजयेत्
अस्मिन्कर्मणाह्नि विंशतिल
क्षजपः चाल्लितंजपेत्मंत्रं इवि

व्याशी जितेन्द्रियः तद्दशांशेन
जुहुयात्तिले मधुरसंयुतैः
अथ वलिदानं पूर्वविघ्ने दुर्गां
समाराध्य वलिंदद्यात् शाल्यन्न
पललं सर्पि मानचूर्णानि शर्क
रा: गुडमिक्षुरसा सूप मधुकेः प
रिमिश्रितैः कृत्वा कवलमाराध्य
देवं मागुरुकवल्मना रक्तचंदन पु
ष्पाद्यैर्निभितंस्मै वलिंदंदेत्।
यद्वा अन्यूनांग मजं हत्वा राजस
माशुदीरितं वलिप्रदान समये
विशांत सर्वं सेन्यकं निवेदयेद्
लितेन वटुकाय विशिष्टधीः वि
दर्भपञ्चजनाम्रा वलिमंत्रे तथा
सुधीः प्रातुप्रत्तस्य रुधिरं पिबन्
व दिने दिने भक्तपत्नं गाणेशमा
हे सारमेय समन्वितः वलिमंत्रो
ऽयमाख्यातः सर्वेषां विजयप्रदः
अनेन वलिना हृष्टो वटुकः पर
मेश्वरः सर्वं गणेभ्यो विलनेक्षी
मिष्टं कुर्वमानसः एवं कृते पर
बलं दीयते नात्र संशयः॥
इति मंत्रसारः अथ वटुकभैर
व स्तोत्र कैलासशिखरासी
नं देवदेवं जगद्गुरुं शंकरं परि
पप्रच्छ पार्वती परमेश्वरं
श्रीपार्वत्युवाच भगवन्सर्वधर्मज्ञ

सर्वशास्त्रागमादिषु आपदुद्धार
णं मंत्रं सर्वसिद्धिप्रदं नृणां सर्वे
षांचैव भूतानां हितार्थं वाञ्छितं
मया विशेषतस्तु राज्ञां वै शांतिपु
ष्टिप्रसाधनं अंगन्यास करन्यास
बीजन्यास समन्वितं वक्तुमर्हसि
देवेश मम हर्षविवर्द्धनं श्रीभगवा
नुवाच श्रृणु देवि महामंत्रमाप
दुद्धारहेतुकं सर्वदुःख प्रशमनं
सर्वशत्रुनिवर्हणं अपस्मारादिरो
गानां ज्वरादीनां विशेषतः नाश
नं स्मृतिमात्रेण मंत्रराज मिमंप्रि
ये ग्रहराज भयानांच नाशनं सुख
वर्द्धनं स्नेहाद्वक्ष्यामि ते मंत्रं
सर्वसारमिमं प्रिये सर्वकामार्थ
दं मंत्रं राज्यभोगप्रदं नृणां।
प्रणवं पूर्वमुद्धार्य देवीप्रणवमु
द्धरेत् वटुकायेति वै पश्चादाप
दुद्धारणाय च कुरुद्वयं ततः प
श्चाद्वटुकाय पुनः क्षिपेत् देवीप्र
णव मुद्धृत्य मंत्रराज मिमंप्रिये
मंत्रोद्धार मिमं देवि त्रैलोक्यस्या
पि दुर्लभं अप्रकाश्य मिमं
मंत्रं सर्वशक्ति समन्वितं स्मरणा
देव मंत्रस्य भूतप्रेतपिशाचकाः
विद्रवन्ति भयार्त्ता वै कालरुद्रा
दिव प्रजाः पठेद्वा पाठयेद्वापि पूज

येद्वापि पुस्तकं नाग्नि चौरभ
यं वापि ग्रहराजभयं तथा नच
मारीभयं तस्य सर्वत्र सुखवान्भ
वेत् आयु रारोग्य मैश्वर्यं पुत्र
पौत्रादि संपदः भवंति सततं
तस्य पुस्तकस्यापि पूजनात् श्री
पार्वत्युवाच य एष भैरवो नाम
आपदुद्धारको मतः त्वयाच कथि
तो देव भैरवः कल्पउत्तमः तस्य
नामसहस्राणि आयुतान्यर्बु
दानिच सारमुद्धृत्य तेषांवैनामा
ष्टशतकं वद श्रीभगवानुवाच
यस्तु संकीर्तयेदेतत्सर्वदुष्टनि
वर्हणं सर्वान्कामानवाप्नोति सा
धकः सिद्धिमेवच श्रृणु देवि
प्रवक्ष्यामि भैरवस्य महात्मनः
आपदुद्धारकस्येह नामाष्टशत
मुत्तमं सर्वपापहरं पुण्यं सर्वा
पत्तिनिवारकं सर्वकामार्थदं
देवि साधकानां सुखावहं देहा
ङ्गन्यासनंचैव पूर्वं कुर्यात्समा
हितः भैरवं मूर्ध्नि विन्यस्य
ल्लाटे भीमदर्शनं अक्षणोर्भूता
श्रयं न्यस्य वदने तीक्ष्णदर्शनं
क्षेत्रपंकर्णयो र्मध्ये क्षेत्रपालं
हृदि न्यसेत् क्षेत्राख्यं नाभिदेशे
च कट्यां सर्वाघनाशनं त्रिनेत्र

मूर्वोविंमस्स नंवयो रक्तपा
गिकं पादयो देवदेवेशं सर्वो
गे वटुकंन्यसेत् पंचमासवि
धिं कृत्वा तदनंतर मुत्तमं नामा
ष्टशतकस्यापिछन्दोऽनुष्टुप्
हतं वृहदारण्यको नाम ऋषि
श्च परिकीर्तितः देवताकपि।
ला चेह सद्भिर्वटुकभैरवः धर्मा
र्थे काम मोक्षेषु विनियोगः प्र
कीर्तितः ओं भैरवो भूतनाथ
श्च भूतात्मा भूतभावनः क्षेत्रज्ञः
क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो वि
राट् श्मशानवासी मांसाशी ख
र्पराशी मखांतकृत् रक्तपः
प्राणपः सिद्धः सिद्धिदः सिद्ध
सेवितः करालः कालशमनः
कलाकाष्टातनुः कविः त्रिनेत्रो
बहुनेत्रश्च तथा पिंगललोचनः
शूलपाणिः खड्गपाणिः कंका
ली धूम्रलोचनः अभीरुर्भैरवो
भीरु भूतपो योगिनीपतिः ध
नदो धनहारी च धनवान् प्रति
भानवान् नागहारो नागके
शो व्योमकेशः कपालभृत् का
लः कपालमाली कमनीयः क
लानिधिः त्रिलोचनो ज्वलन्नेत्रस्त्रि
शिखी च त्रिलोकपात् त्रिवृत्तनय
नो डिंभः शांतः शांतजनप्रियः व

परिचारकः धूर्तो दिगंबरः शौरि
र्हरिणः पांडुलोचनः प्रशान्तः शा
न्तिदः शुद्धः शंकरप्रियबांधवः अ
ष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्त
पोमयः अष्टाधारः कलाधारः सर्प
युक्तः शशीशिखः भूधरो भूध
राधीशो भूपतिर्भूधरात्मकः कं
कालधारी मुंडी च व्यालयज्ञोपवी
तवान् जृंभणो मोहनः स्तंभी मा
रणः क्षोभणस्तथा शुद्धनीलांज
नप्रख्यो देहो मुंडविभूषितः बलि
भुक् बलिभूतात्मा कामी कामप
राक्रमः सर्वापत्तारको दुर्गो दुष्ट
भूतनिषेवितः कामी कलानि
धिः कांतः कामिनीवशकृद्वशी
सर्वसिद्धिप्रदो वैद्यः प्रभाववान्
१०८ अष्टोत्तरशतं नाम भैरवस्य म
हात्मनः मयाते कथितं देवि र
हस्यं सर्वकामिकं यइदं पठति
स्तोत्रं नामाष्टशतमुत्तमं ॥
न तस्य दुरितं किंचिन्न रोगेभ्यो भ
यं तथा न शत्रुभ्यो भयं किंचित्प्रा
प्नोति मानवः क्वचित् ॥
पातकानां भयं नैव पठेत्स्तोत्र
मनन्यधीः मारीभये राजभये तथा
चैराग्निजे भये गैत्पातिके महाघो
रे तथा दुःस्वप्न दर्शने ।

वटुको वटुकेशश्च खट्वांगवरधारकः भूताध्यक्षः पशुपतिर्भिक्षुकः

बंधने च तथा घोरे पठेत्स्तो
त्रं समाहितः सर्वे प्रशमनंया
न्ति भयाद्भैरव कीर्तनात् ए
कादश सहस्रं तु पुरुषश्चरणं
मुच्यते विसंध्यं यः पठेद्देवि संवत्
सर मतंद्रितः ससिद्धिं प्राप्नुयादिष्टां
दुर्लभामपि मानुषः षाण्मासान्भू
मिकामस्तु स जप्त्वा लभते महीं
राजा शत्रु विनाशाय जपेन्मा
सष्टकंपुनः रात्रौ वारत्रयं चैव ना
शयत्येव शात्रवान् जपेन्मासत्र
यं रात्रौ राजानं वशमानयेत् ध
नार्थी च सुतार्थी च दारार्थी यस्तु
मानवः पठेद्वासत्रयं यद्वा वारमे
कं तथा निशि धनं पुत्रां स्तथा दा
रान्प्राप्नुयान्नात्र संशयः रोगी रो
गात्प्रमुच्येत बद्धो मुच्येत बंधना
त् भीतो भयात्प्रमुच्येत देवि स
त्यं न संशयः यान्यान्समीहते ।
कामां स्तांस्ता नाप्नोति निश्चितं
अप्रकाश्यमिदं गुह्यं नदेयं यस्य
कस्यचित् सत्कुलीनाय शांता
य ऋजवे दंभवर्जिते दद्यात्स्तो
त्रमिदं पुण्यं सर्वकामफलप्रदं ध्या
नं वक्ष्यामि देवस्य यथा ध्यात्वा
पठेन्नरः ओं शुद्धस्फटिकसंका
शं सहस्रादित्यवर्चसं अष्टबाहुं त्रि

नयनं चतुर्बाहुं द्विबाहुकं
भुजंगमेखलं देव मग्निवर्णं शि
रोरुहं दिगम्बरं कुमारीशं वटु
काख्यं महाबलं खट्वांग मसि
पाशं च शूलं चैव तथा पुनः डम
रुं च कपालं च वरदं भुजगं तथा
नीलजीमूतसंकाशं नीलांजन
चयप्रभं दंष्ट्रा करालवदनं नू
पुरांगदभूषितं आत्मवर्णसमो
पेतं सारमेयसमन्वितं ध्यात्वा
जपेत्सुसंतुष्टः सर्वान्कामान
वाप्नुयात् एतच्छ्रुत्वा ततो देवी
नामाष्टशत मुत्तमं भैरवाय प्र
हृष्टाभूत्स्वयं चैव महेश्वरी इति
विश्वसारोद्धारतंत्रे आपदुद्धारक
स्तोत्रे भैरवस्तवराजः समाप्तः अथ
वटुकभैरवकवचं श्रीभैरवउवाच
देवेशि देहरक्षार्थं कारणं कथ्य
तां ध्रुवं म्रियंते साधका येन वि
ना श्मशानभूमिषु रणेषु चाति
घोरेषु महावायुजलेषु च शृंगि
मकर वज्रेषु ज्वरादिव्याधि वह्निषु
श्रीदेव्युवाच कथयामि शृणु प्राज्ञ
वटोस्तुकवचं शुभं गोपनीयं प्रय
त्नेन मातृजारोपमं यथा तस्य ध्यानं
त्रिधा प्रोक्तं सात्विकादि प्रभेदतः
सात्विकं राजसं चैव तामसं देव तत्

मृणाङ्ग वंदे वालं स्फटिकसदृ
शं कुंडलोद्भासि वक्त्रं दिव्याक-
ल्पैर्नवमणिमयैः किंकिणीनूपु
राद्यैः दीप्ताकारं विषदवदनं सुप्र
सन्नं त्रिनेत्रं हस्ताब्जाभ्यां वटुक
मनिशं शूलदण्डौ दधानं १ ३
उद्यद्भास्करसन्निभं त्रिनयनं रक्ता
ङ्गरागस्रजं स्मेरास्यं वरदं कपाल
मभयं शूलं दधानं करैः नील-
ग्रीवमुदारभूषणशतं शीतां
शुचूडोज्ज्वलं बंधूकारुणवाससं
भयहरं देवं सदा भावये २ ध्या
येन्नीलाद्रिकांतं शशिशकल।
धरं मुंडमालं महेशं दिग्वस्त्रं पिंग
केशं डमरुमथ सृणिं खड्गशूलं।
लाभयानि नागं घंटां कपालं क
रसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलस
त्किंकिणीनूपुराढ्यं ३ अस्य वटु
कभैरवकवचस्य महाकाल ऋषि
रनुष्टुप्छंदः श्रीवटुकभैरवो देवता
वं बीजं ह्रीं शक्तिरापदुद्धारणाये
ति कीलकं मम सर्वाभीष्टसिद्ध
यै विनियोगः ॐ शिरो मे भैरवः
पातु ललाटं भीषणस्तथा नेत्रे
च भूतहननः सारमेयानुगो भ्रुवौ
भूतनाथश्च मे कर्णौ कपोलौ प्रेत

पुटौ तथोष्ठौ च भस्मांगः सर्वभूष
णः भीषणास्यो ममास्यं च शक्ति
हस्तो गलं मम स्कंधौ दैत्यरिपुः
पातु बाहू अतुलविक्रमः पाणी
कपाली मे पातु मुंडमालाधरो
हृदं वक्षःस्थलं तथा शांतः काम
चारी स्तनं मम उदरं च स मे तुष्टः
क्षेत्रेशः पार्श्वतस्तथा क्षेत्रपालः
पृष्ठदेशं क्षेत्राख्यो नाभितस्तथा
कटीं पापौघनाशश्च वटुकेलिं
गदेशकं गुदं रक्षाकरः पातु
ऊरू रक्षाकरः सदा जानू च घुंघु
रावो जंघे रक्षतु रक्तपः गुल्फौ च
पादुका सिद्धः पादपृष्ठं सुरेश्वरः
आपादमस्तकं चैव आपदुद्धारण
स्तथा सहस्रारे महापद्मे कर्पूर
धवलो गुरुः पातु मां वटुको
देवो भैरवः सर्वकर्मसु पूर्वस्याम
सितांगो मे दिशि रक्षतु सर्वदा।
आग्नेय्यां च रुरुः पातु दक्षिणे चंड
भैरवः नैर्ऋत्यां क्रोधनः पातु
मामुन्मत्तस्तु पश्चिमे वायव्यां मे
कपाली च नित्यं पायात्सुरेश्वरः
भीषणो भैरवः पातु उत्तरस्यां दिशि
सर्वदा संहारभैरवः पातु दिश्यै
शान्यां महेश्वरः ऊर्ध्वं पातु विधा
ता वै पाताले नंदिको।

विभुः सद्योजातस्तु मां पायात्सर्व
तो देवसेवितः । वामदेवोऽव
तु प्रीतो रणे घोरे तथावतु
जले तत्पुरुषः पातु स्थले पा
तु गुरुः सदा डाकिनीपुत्रकः।
पातु दारांस्तु लाकिनीसुतः ॥
पातु शाकिनिको भ्रातॄन्प्रियं मे
सततं गिरः लाकिनीपुत्रकः पा
तु पशूनश्वानजांस्तथा । महा
कालोऽवतु छत्रं सैन्यं वै काल।
भैरवः राज्यं राज्यश्रियं पाया
द्भैरवो भीतिहारकः ॥ र
क्षाहीनं तु यत्स्थानं वर्जितं कव
चेन च तत्सर्वं रक्ष मे देव त्वं य
तः सर्वरक्षकः ॥ एतत्कव
चमीशान तव स्नेहात्प्रकाशितं
नाख्येयं नरलोकेषु सारभूतं च
सुप्रियं यस्मै कस्मै न दातव्यं।
कवचेशं सुदुर्लभं न देयं पर
शिष्येभ्यः कृपणेभ्यश्च शंकर
यो ददाति निषिद्धेभ्यः सर्वभ्र
ष्टो भवेद्ध्रुवं अनेन कवचेशे-
न रक्षां कृत्वा द्विजोत्तमः विचरन्
यत्र कुत्रापि विघ्नौघैः प्राप्यते न
सः मंत्रेण म्रियते योगी कवचं
यन्न रक्षितः तस्मात्सर्वप्रयत्नेन।
दुर्लभं पापचेतसां भुर्जे रंभा-

त्वचे वापि लिखित्वा विधि
वत्प्रभो धारयेत्पाठयेद्वापि
स्पृशेद्वापि नित्यशः संप्राप्नो-
ति प्रभावं वै कवचस्यास्य
वर्णितं नमो भैरव देवाय सारभू
ताय वै नमः नमस्त्रैलोक्यना
थाय नाथनाथाय वै नमः इति
विश्वसारोद्धारतंत्रे आपदुद्धा
रकल्पे भैरवभैरवीसंवादे वटु
कभैरवकवचं समाप्तं ॥
वटुकराणां स्त्री उपनयने इ
ति त्रिकांडशेषः ॥
वठ इ ङ एकचरे इति क
विकल्पद्रुमः एक कर्टक च
रणं इ वंठते ङ वठते चोर
श्चारयति एकभ्रत्नीत्यर्थः
इति दुर्गादासः ॥
वठ स्थौल्ये इति कविकल्प
द्रुमः स्थौल्ये सिद्र सामर्थ्ये तु
ठति दाता दाते समर्थः स्यादि
त्यर्थः इति दुर्गादासः ॥
वठरः पुं मूर्खः इत्युणादिको
षः श्रेष्ठः इति हेमचंद्रः शठ
कारः वक्रः इति संक्षिप्तसारो
णादिवृत्तिः ॥
वठरः त्रि शाठः मंदः इति
त्रिकांडशेषः

वड इ क विभागे इतिक
विकल्पद्रुमः इकवंडयति अ
यंकेश्चिन्न यक्षते इतिदुर्गा
दासः वड इ ङ वेष्टे विभागे
इतिकविकल्पद्रुमः इ वंडते ङ
वंडते इतिदुर्गादासः वड आ
रोहणे सेवने चालये । इ
ति कविकल्पद्रुमः वडभी व
डिश्री इतिदुर्गादासः

वडभी स्त्री स्वदच्छदा मुदनि इ
तिभाषा इत्यमरः तत्पर्यायः।
गोपानसी २ इति तट्टीका सा
रसुंदरी चंद्रशालिका ३ क
टागारं ४ इतित्रिकांडशेषः॥
चंद्रशाला च वडभी स्याता प्रा
सादमूर्द्धनि इति श्रीधरः वे
लायां वडभो हृदा इतिरुद्रः
वडभी चंद्रशालेति प्रासादादौ
च मंडपे इति कोषान्तरं अ
द्धान्ते वडभी चंद्रशाले सोभा
द्भुवेषमति इतिभरतः कस्या
न्नापि वडभिः तां कस्यांचि
दूवत वडभाविति मेवहृतः
वडभिः वडभी वलभिः वल
भीचेति चातूरूप्यमिति बृहाः इ
भरतः॥
वड्रा स्त्री वटकः यथा कटसो
नाम

वातालै धुक्तं यत्नोद्धृतं पिंडं।
पिंडं चूर्णं वटो वड्रा इतिशब्द
चंद्रिका॥
वडिशं क्ली मत्स्यधरणार्थं वक्र
लोहकंटकविशेषः वंशी इति
भाषा तत्पर्यायः मत्स्यवेधनं २
इत्यमरः वलिशं ३ वडिशी ४
वडिशा ५ इति भरतः॥
वलिशी ६ मत्स्यवेधनी ७ इति
भट्टीकांतरं वलिसी ८ वलिसं ९
वडिशी १० वलिशिः ११ इतिश
ब्दरत्नावली मत्स्यभेदनं १२
इति जटाधरः॥
वडिशी स्त्री वडिशं इति शब्द
रत्नावली॥
वड्डं त्रि बृहत् इत्यमरः अस
भाषा वड॥
वण शब्दे प्राहे इतिकविकल्प
द्रुमः अवणीवत् अववाणात् इ
तिदुर्गादासः॥
वंट तक भागे इतिकविकल्प
द्रुमः वंटयति वंटापयति ।
इतिदुर्गादासः॥
वंटः पुं भागः दात्रमुष्टिः इति
हेमचंद्रः अकृतोद्वाहः इति
शब्दमाला॥
वंटकः पुं भागः इत्यमरः

4255

वंठः पुं अकृतोद्वाहः॥ खर्वः
कुंतायुधः इतिमेदिनी॥
वंठरः पुं स्थगिकारज्जुः उक्ष
स्य लांगूलं। करीरकोषः ता
लस्यपल्लवं पयोधरः। इति
मेदिनी तत्रओष्ठ्यवकारादौ ग
णितोयं किंत वठिङ एकव
देशत्स्मात् अवच प्रत्ययेन निष्प
न्नत्वात्तस्य वकारादौ लिखितः।
वंठालः पुं सूरयुद्धं नौकादं
वित्रं इतिमेदिनी हेमचंद्रश्च।
वंडः पुं अनावृतमेढ्रः तत्प
र्यायः दुश्चर्मा २ छिन्नग्रकः ३ शि
पिविष्टः इतिहेमचंद्रः॥
वंडः त्रि हस्तादिवर्जितः बोंडे
इति भाषा इतिमेदिनी वंडा
(हीं मेदिनी शति) वत्प सामं। तत्पर्यायः ।
वा २ यथा ३ तथा ४ एव ५ एवं
६ इत्यमरः
वत अ खेदः अनुकंपा। सं
तोषः विस्मयः आमंत्रणं ।
इत्यमरः॥
वतंसः पुं कर्णपूरः कर्णभू
षणं
शेखरः शिरोभूषणं इति मे
दिनी॥
वतंडः पुं मुनिभेदः तस्यापत्यादि

कोषः॥
वत्नः पुं देवनदी मत्स्याक
पेण्याः अस्तिरोगः। इति
संक्षिप्तसारोणादिवृत्तिः॥
वतोका स्त्री अवतोका इत्यम
रटीकायां भरतः॥
वत्सं क्ली वक्षः इत्यमरः॥
वत्सः पुं वर्षः गोशिशुः बाछु
र इति भाषा तत्पर्यायः शाकृ
त्करिः २ तर्णकः ३ इतिवैश्य
वर्गनानार्थेचामरः पुत्रादि वा
च्या इतिभाषा इतिमेदिनी॥
वत्सकं क्ली पुष्पकासीसं इति
राजनिर्घंटः॥
वत्सकः पुं कुटजः इत्यमरः।
इंद्रयवः इतिराजनिर्घंटः॥
वत्सकबीजं क्ली इंद्रयवः इति
राजनिर्घंटः॥
वत्सकामा स्त्री वत्साभिलाषि
णी गौः तत्पर्यायः वत्सला २
इतिराजनिर्घंटः पुत्रादिकामा
स्त्रीच॥
वत्सतरः पुं प्राप्तदमनकालग
वः दोश्राने बाछुर इतिभाषा
तत्पर्यायः दम्यः २ इत्यमरः॥
उद्दीतः ३ गडिः इतिराजनिर्घंटः

वत्सतरी स्त्री वृषोत्सर्गे वृषप
त्नीत्वेन कल्पिता विहायणी।
गौः यथा कात्यायनसूत्रं म
यस्विन्याः पुत्रो यूथे च रूपवान्स्या
त्तमलंकृत्य यूथ मुख्या श्चतस्रो
वत्सतर्य्य स्ताश्चालंकृत्य एतं यु
वानं पतिं वो ददामि तेन क्रीडं
ती श्चरथ प्रियेण मानाः सामज
नुषा सुभगा रायस्पोषेण समि
षा मदेम इत्यनयैवर्चोत्सृजे
दत्रिभिरर्थस्तु हे वत्सतर्य्यो वो
युष्माकं एतं युवानं पतिं स्वामि
नं ददानी त्वं प्रार्थयामि तेन स्ह
षेण सह क्रीडंतीः खेलं त्यश्चर
थ भ्रमथ हे वत्सतर्यो युष माप
मानः नास्मत्स्वत्वविषया भविष्य
थ किंतु मया त्यक्तव्याः वयं वृष
स वत्सतरीणां च त्या
गेन रायस्पोषेन धनसमृद्ध्या
सजन्तुषा स्वजन्मव्यापकेन
इषा अन्नेन च समदेम हृष्टा भ
वामः सुभगा लोकस्य प्रिया इति
संमादेम इति भविष्यत्सामीप्ये
वर्तमान इति पाणिनिस्वराद्
त्रिवर्णे वर्तमान वत्सतरीविशेष
यति स्मृतिः कृष्णलोहितापत्नी पा
र्श्वांसनीलवर्णंडोरे एषतत्तभवेत्तु
वृषभस्य तु मोक्षणे । तस्याः
वयःप्रमाणं यथा त्रिहायनीभि
र्धन्याभिः सुरूपाभिः सुशोभितः
सर्वोपकरणोपेतः सर्वशस्यचरो
महान् उत्स्रष्टव्यो विधानेन स्म
ति स्मृति निदर्शनात् इति श्रु
द्धि तत्त्वे वृषोत्सर्गविचारः ॥
वत्सनाभः पुं विषवृक्षविशेषः।
इत्यमरः स तत्स्थावरविषभेदः ।
प्रायो वत्साङ्गम्पति हिनस्तिवत्स
नाभः प्राप्य च हिंसे चात्मनिति
यत्र वत्सस्य नाभिरिव वत्सनाभः
स्यः अवितत्स्योति नहृद्धिः अयं सिंधु
वारपत्रसदृशपत्रः इति भरतः तत्
पर्यायः अमृतं २ विषं ३ उग्रं ४
महौषधं ५ गरलं ६ मारणं ७ ना
गः ८ स्तोककं ९ प्राणहारकं १०
स्थावरादि ११ अस्य गुणाः अति
मधुरत्व उष्णत्व वातकफकंठरु
क्सन्निपातनाशित्व पित्तसन्तापका
रकत्वंच इति राजनिर्घंटः अस्य प्र
यत्नेन रूपाणि यथा सिन्धुवार सह
कपत्रो वत्सनाभ्याकृति स्तथा
यत्पार्श्वेन उरो वृद्धिर्वत्सनाभः
सभाषितः तस्य सामान्यगुणा
यथा विषं प्राणहरं प्रोक्तंव्य
वायि

सा

4257

च विकासिच आग्नेयं वातक
फहृद्योगवाहि मदावहं व्यवा
यि सकलकायव्यापनपूर्वकपा
कगमनशीलं विकासि ओजः
शोषणपूर्वकं संधि बंध शि ।
थिलीकरणशीलं आग्नेयं अ
धिकाग्निसंयोगवाहि संसर्गगु
णग्राहकं मदावहं तमोगुणा
धिक्येन बुद्धि विध्वंसकं तदेव यु
क्तिपूर्वकं तत्प्राणदायि रसायनं।
योगवाहि त्रिदोषघ्नं देहपुष्टि वी
र्यवर्द्धनं येऽगुणा विषे स्युस्ते
ते स्युर्हीना विशोधनात् तस्मा।
द्विषं प्रयोगेषु शोधयित्वा प्रयोज
येत् इति भावप्रकाशः ॥
वत्सपत्तनं स्त्री भारतवर्षीयोत्त
रदेशविशेषः तत्पर्यायः कौ
शाम्बी २ इति हेमचन्द्रः ॥
वत्सपालः पुं श्रीकृष्णः ॥ बल
देवः यथा वृन्दावनं गोवर्द्ध
नं यमुनापुलिनानि च वीक्ष्या
सीदुत्तमा प्रीती राममाधवयो
र्नृप एवं व्रजौकसां प्रीतिं य
च्छंतौ बालचेष्टितैः कलवाक्यैः
स्वकालेन वत्सपालौ बभूवतुः
इति श्रीभागवते १० स्कंधे ११
अध्यायः ॥
वत्सरः पुं द्वादशमासात्मककाः
लः अयनद्वयात्मकश्च तत्पर्या
यः संवत्सरः २ अब्दः ३ हायनः ८
शरत् ५ समा ६ इत्यमरः श
रदा ७ वर्षं ८ वरिषं ९ संवत् १०
इति शब्दरत्नावली अतः वत्सवि
चारे च वत्सर परिकल्पनमाड
राचार्याः आधानपूर्वमेके प्रसू
तिपूर्वं सदाभ्येत ॥ सौरसाव
न नाक्षत्र चांद्रभेदेन चतुर्विधो
वत्सरः यथा तत्रैतेन यतनादिषु
वर्षगणना सावनेन शुभाशुभ
गणनं तत्सौरेणेति सिद्धं सावन
संवत्सरेण एकदिनाधिकवत्स
रेणाद्यत्र भवतीत्यनयो भेदः
सौरस्तु पंचषष्ट्यधिकत्रिशतदि
नैर्भवति यथा मेषादीनां मरुद्द
त्वे यावता समाप्त चंद्रकं ६०
तुलादीनां मष्ट सम्बद्धकेतलि
खितः १८ चांद्रवत्सरः पिष्ट
दशमासैर्भवति । मलमा
स पाते तु त्रयोदशमासै र्भवति
तथा च श्रुतिः द्वादशमासाः सं
वत्सरः क्वचित्त्रयोदशमासाः सं
वत्सर इति त्रयोदशमासियामा
से स्मृतिः यस्मिन् द्वादशैक
श्चयत्र इति यद्यो मासः इति य

ख्यामासाः स्वमेकः सम्वत्सर इ
तिग्राह्यमपथ कृत्वा यत्प्रस्वमेक
शव्दयोर्मासवर्ष पर्यायतोक्ता इ
ति मलमासतत्वे अथ षष्टि संव
त्सरगणना शकेन्द्रकालःपृथ
गाकृति २२ युःशशांक नंदाश्वि
युगैः ४२११ समेतःशरादि वंहि
नु १०७५ हृतः सलब्धः षष्ट्यावशि
ष्टाः प्रभवादयोब्दाः वृषेवजेव
यत्वेषं त्लरैः संख्यांबोर्मिभिः
१८ हृतबुक्तमतःखो मिनिहृतेः
शेमासकादयः अप्रार्थाः शकेन्द्र
कालः शकराजाद्र कालः पृथ
कस्थाकृतिघ्नः २२ द्वाविंशत्याप
रितः शशांक नंदाश्वियुगैः रेक
नवत्यधिक शतद्वयाधिकचत्वः
सहस्रैः समेतोंकः शरादिवन्हि
न्दुहृतः पंचसप्तत्यधिकाष्टदश
शते यीवल्लब्धं हत्ते शाकोत्ति
तावता हृतः कर्तव्यः सलब्धःप
र्वशकाद्ः शरेत्यादिना लब्धसं
ख्याया युतः कार्यः षष्ट्यामशेषे
षष्ट्यादेशेऽङ्कः शर्वत्पष्ट्याहृतत
च्छ्यावशिष्टे प्रभवादयः एकावशे
षे प्रभवः द्वाघवशिष्टे विभवा
दिः वर्षवञ्जेल्य यत्क्षेप वर्षांतिरि
क्ते शराद्विवस्विद्धसलावशिष्टे त
स्ववर्षे द्वादशभिःसंख्यांबोर्मिभिः

षष्ट्या हृते यत्क्रमत इत्यनेनष
ष्टिहृतावशिष्टांकादेऽङ्गःषष्टि
हृतेलब्धांशके ख्यामिहृते त्रिं
शताहृतेऽवशिष्टां शकालब्या
मासाःस्य रिति प्रभवादि वर्षएव
पक्रम आद्या त्रविंशतिर्ब्राह्मी
द्वितीया वैष्णवी स्मृता तृतीयारु
द्रदेवत्याश्रेष्ठा मध्याधमा भवेत
भविष्यपुराणे भैरव उवाच षष्ठ्
यब्दकथयाम्यत्र क्रूराः सौम्याश्चये
प्रिये संवत्सरफलं मुख्यप्रभवादौ
वरानने वहुतोया स्तथा मेघा
वहुशस्याच मेदिनी वहुक्षीरास्त
था गावोव्याधिरोग विवर्जिताः
प्रशान्ताः पार्थिवाश्चैव प्रभवेपरि
कीर्तिताः १ सुभिक्षंक्षेममारोग्यंवि
भवे व्याधिवर्जिताः प्रशान्ता मानवा
स्तत्र वहुप्रम्या वसुंधरा हृष्टा स्त
ष्टा जनाः सर्वे विभवेचवरानने २
रोगा वहुविधाश्चैवमनुष्या वाजि
कुंजराः सर्वदवमणाघ्राणि शुक्ल
वर्षे वरानने ३ उत्सवैश्च जगत्सर्वंप्र
तथान्यसमाकुलं नित्योत्सवःप्रजा
वृद्धिः प्रमोदे जायते प्रिये ४ नीरो
गाश्च निरावाधा मानवा विगतह
र्दः वहुक्षीरा स्तथा गावः प्राजापते

वरानने ५ निरातंकं जगत
सर्वंधनयौवन गर्वितं अंगिरसि
प्रजाःसर्वा नित्योत्साहा वरानने
६ सुभिक्षं क्षेम मारोग्यं वृष्टा
काले सुशोभनं । शस्यवृद्धि
विजानीयात श्रीमुखेस्सर्वदेवि
७ वहुक्षीरा स्तथा गावोधान्यं
च वलवत्तरं जायंते सर्वशस्या
नि भाववर्षे वरानने ८ महार्घं
जायतेसर्वंघृत तैलरसादिकं प्र
जानांच भवेद्वृद्धि युवनि संवत्सरे
शुभे ९ निष्पत्तिःसर्वशस्यानाम
न्यान्यवि कीर्तिता क्षत्तःक्षीरगु
डादीनां प्रवलत्वं वरानने १० ।
सुभिक्षंक्षेममारोग्यंकार्पासस्य।
महार्घता लवनं मधुमत्थच ईश्व
रवर्षेतंभं प्रिये ११ सुभिक्षं क्षेम
मारोग्यं प्रमुदिताः पार्थिवाःप्रिये
तस्करोपद्रवे वित्तं वहुधान्ये
वरानने १२ राष्ट्रभंगश्च दुर्भिक्षं
तस्करैः श्चोपपीडनं जालीया
हिग्रहे वोर प्रमाथिनिवरान
ने १३ जायन्ते सर्वशस्यानि वि
क्रमी निरुपद्रवा लवनं मधु
गव्यंच महार्घं विक्रमे प्रिये १४
कोद्रवाः शालि मुद्राश्च शाकृमा
षाःस्तथैवच महार्घंजायतेसर्वंवृषे

सर्वदिते १५ चनका मुद्रमाषा
श्च अन्नच विरलं प्रिये महा
र्घंजायते सर्वं चित्रभानौ वरान
ने १६ सुभिक्षं क्षेम मारोग्यंपवि
र्षंच निरुपद्रवं व्यवहारो भ
वेद्धृष्टः स्वभानौ देवपूजिते ।
१७ सुभिक्षंक्षेम जायते धान्य
स्याथ प्रपीडनं प्रासं भवतिमा
मान्य तारणे सर्वदिते १८
वहुशस्यानि जायन्ते सर्वदेशे
स्वलोचने सौराष्ट्रे लाटदेशे च
पार्थिवेनात्रसंशयः १९ दुर्भिक्षं
जायतेघोरं सर्वोपद्रवसंयुतं ।
अनावृष्टिः समाख्याता व्ययेस
त्सरे प्रिये २० ॥ उद्यतो
वर्षतो मेघो जलं नैवोपजायते
महार्घं सर्वजिद्वर्षे सर्वमेव व
रानने २१ कोद्रवाःशालिमुद्गा
श्च कंगुमाषास्तथैवच स्तनभ
जायतेस्वच्छं जगद्धे सर्वधारिणि २२
अनग्निप्रवला लोका धान्यौषधि
प्रपीडनं जायते मानुषे कर्षवि
रोधिनि नसंशयः २३ सर्वाः
प्रजाः प्रपीड्यंते व्याधिःशोकश्च
जायते शिरो वक्षो ऽदिरोगा
श्च पापादि विकृते जनाः२४
उपद्रुतं जगत्सर्वं तस्करैर्मूषि

केः खगेः पीडिताश्च प्रजाःस
र्वादेशभंगाः खरे प्रिये २५ सु
भिक्षं क्षेमं मारोग्यं शस्यं भव
ति शोभनं दृढ़तीरा स्तथा गावो
नंदनं नंदने प्रिये २६ अल्पतो
या स्तथा मेघा वर्षति विकृते
हुते नश्यन्ति सर्वशस्यानि वि
जयेनाऽत्र संशयः २७ क्षत्रियाश्च
तथा वैश्याः शूद्राश्च नट नर्तकाः
पीडिता स्ते ज्वरारोहे जये सर्वेन
संशयः २८ सर्वौषध तथा दे
वि रसजलसमन्वितं सुभिक्षं त
जगत्सर्वं मन्मथे सुरवंदिते २९
तप धान्य जयो देवि सर्वशा
स्यमहार्घता व्यवहाराश्च नश्यन्ति
दुर्मुखे दुर्मुखाः प्रजाः ३० पीडय
न्ते सर्वशस्यानि देशे देशे सुवि।
स्मिते हेमलंबे प्रजाः सर्वाः स्ती
यंते नात्र संशयः ३१ लम्बेः पा
र्थिवे श्चैव अभिभूत मिदं जग
त अर्घो भवति साधारणो विल
म्बे भयं महत् ३२ विसमस्यं ज
गत्सर्वं विरोधे भय संभवे वि
कारीसर्वतोपायो मम वाक्यं त
त्त्वथा ३३ कचिद्वर्षति पर्जन्या
देशेखंडित्रमण्डलः दुर्भिक्षं पार्वती
दर्शे कालवशा विपर्ययः ३४ दुर्भि

क्षं जायते सर्वा मेदिनी दुष्पति
प्रिये श्चैव स्रवंति तोयानि पी
डिता मानवा भुवि ३५ सुवर्णाद्
प्रधान्यानि जगत्सर्वं सुशोभनं
ब्राह्मणा वणिजः स्तुष्टाः सुभि
क्षे शुभकृत्प्रिये ३६ सुभिक्षं क्षेम
मारोग्यं नृपा गो ब्राह्मणाःप्रि
ये सुस्थिताः शोभने वर्षे प्रजाः
सर्वाः सुलोचने ३७ विषमस्थं जग
त्सर्वं व्याकुलं समुदाहृतं जनानां
जायते भद्रे क्रोधे क्रोधः परस्प
रे ३८ सर्वत्र जायते क्षेमं
वेशास्य महार्घता विश्वावसौ व
रारोहे कार्पासस्य महार्घता ॥
३९ पार्थिवे नृप लोकाश्च सम
स्ताः खंडमंडल प्रपीडयन्ते जनाः
सर्वे भय भीताः पराभवे ४०
स्तथा धान्यानि पीड्यन्ते प्लवंगे वर्ष
तिवासवः प्लवंगे पीडिताः सर्वाः
प्रजाश्च सुरवंदिते ४१ जायन्ते स
र्वशस्यानि सुभिक्षं निरुपद्रवं
सौम्यदृष्टि भवेद्राजा कीलके
च शुभं वदेत ४२ सुभिक्षं क्षे
ममारोग्यं साधवश्च निरुपद्रवं सौ
म्यदृष्टि भवेद्राजा सौम्ये सौख्यप्र
कीर्तितं ४३ तोय पूर्णा । भवेन्मे
घो वर्षते च दिने दिने निरुप

द्रवाश्च राजानः सर्वसाधारणोप्रि
ये ४४ वासवो वर्षते देवि देशो
खंडमंडले अहिक्षत्रे कान्य
कुब्जे विरोधी कृषिनाशकृत ४५
अभिभूतं जगत्सर्वं क्लेशो बहुवि
धः प्रिये मारुतः फलदाहेश्च प
रिधाविणि शोभने ४६ निष्प
त्तिःसर्वशस्यानां सुभिक्षं भवति
प्रिये प्रमाथिनि जलाढ्यारीजल
दो मोदते प्रजा ४७ निष्पत्तिः
सर्वशस्यानां सर्वधान्य महा
र्घता घृतं तैलसमं याति आ
नंदे नंदति प्रजा । ४८ । को
द्रवाः प्राणिसुखाश्च पीड्यन्ते बहु
वर्णिनि सर्वौषधानि धान्यानि
राक्षसे निष्ठुराः प्रजाः ४९ दुर्भिक्षं
जायते घोरं धान्यौषधि प्रपीडनं।
अनले च समाख्यातं नाऽत्र कार्या
विचारणा ५० देशभंगः सुदुर्भि
क्षं समाख्यातं कथयाम्यहं पिंग
ले वारुपश्यामि दुर्भिक्षं नर्मदा
तटे ५१ भोमदिष्णो विनश्यप ।
न्ति ये वासे भट नर्तकाः वास
को वर्षते देवि प्रास्वेच नहिता
यते तिलसर्षप माषादिकोपि
सानां महार्घता गो महिष्याः सुवर्णा
निकांस्य ताम्रायशोषतः ॥ तत

सर्वं देवि विक्रीय कर्तव्योधा
न्यसंचयः तेन धान्येन लोकाः
यं निस्तरिष्यति दुर्दिनं पार्थिवा
मोषका दीनाः कालयुक्तेऽपि पी
डिताः ५२ तोयपूर्णाः स्तनाभ्रे
द्या बहुशस्याच मेदिनी निष्ठुराः
पार्थिवा देवि सिद्धार्थेच वरानने ५३
अल्पतोया जनाश्चैव कीटकाश्च
बलाः स्मृताः विरुद्धाः पार्थिवा
देवि रौद्रेसंवत्सरेप्रिये ५४
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो
न वर्तते भवेद्धे मध्यमा वृष्टि
दुर्मतो समुपस्थिते ५५ सुभि
क्षं जायते लोकः सर्वोपद्रव वर्जि
तः प्राणिनां जायते हर्षो दुंदुभौ
वरवर्णिनि ५६ महिषी गोदिर
एपादि ताम्र कांस्याद्यशोषतः तत्स
र्वं देवि विक्रीय कर्तव्यो धान्य
संचयः रक्तसंवत्सरे देवि क्रूर
बुद्धि नराधिपः मानवाः क्रूरचे
ष्टाश्च संग्रामे न जयो भवेत ५७
दुर्भिक्षं सर्वतो रोगो धान्यो
षधि प्रपीडनं पापरोगो भवे
देवि रक्ताक्षः सुरवंदिते ॥
५८ रोगो मरणं दुर्भिक्षं विरो
धो बहुसंकुलः क्रोधे तु विषमं
सर्वं समाख्यातं क्षयप्रिये ५९

मेदिनी चलते देवि सर्वभूतं
चराचरं देशभंगश्च दुर्भिक्षंतत
घेसंक्षीयते प्रजा सौराष्ट्रेमाल
वे देशे दक्षिणे कोंकणे तथा
दुर्भिक्षं जायते घोरं तत्र संव
त्सरे प्रिये कोशदोचर्मनद्योश्च
यमुना नर्मदा तटे विंध्यायां
सैंधवे चापि विनश्यति नसंश
यः सिंहलं मध्यदेशाश्च कोलन
वे तथैवच तत्र तप्यति सर्वाणि
नान्यथा वत्सराणिति ६ का
र्त्तिकादि द्वादशवर्षाणि यथा व
त्सरसंहितायां नक्षत्रेणसहोदय
मस्तंवा येन याति सुरराजमंत्री
तत्संज्ञं वक्तव्यं वर्षं मासक्रमे
णैव वर्षाणि कार्त्तिकादीनिघ्ना
ग्नेयाद्द्वयानुयोगीनि क्रमशास्त्रि
भंच पंचम मन्त्यमुपान्त्यसविते
यं कृत्तिका पंचमं फाल्गुनंच
यं अन्त्यमाश्विनं उपान्त्यं भा
द्रं अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फा
ल्गुनश्च त्रिभो मतः शेषामासा
द्विभाज्ञेयाः कृत्तिकादि व्यवस्थया
देहे चित्रादि ताराणां पूर्णापर्वे
न्दुसंगते मासा श्चैत्रादयोज्ञेया
स्तिकैः षडन्त्य मध्यमाः इति म

ये नक्षत्रेण ग्रहस्य तन्नक्षत्रेणाख्या भेदः

हः षण्णाकांडाद्व पूर्णामर्वेन्दुसंग
तेपौर्णमासीयुते देहे तारे मदे
कवाक्यतया पूर्ववचने पौर्णमा
स्याः कृत्तिकादि सम्बंधात् कार्त्तिका
दित्वंतथा वर्षाणामपि गुरोः कृ
त्तिकादावस्तोदय संबंधात्कार्त्ति
कादित्वं तेन कृत्तिका रोहिण्यो
रेकतरस्मिन्गुरो रस्तोदयेऽन्यतर
लाभे कार्त्तिकं वर्षं एवं मार्गशीर्षा
दि अत्र वर्षद्वय घटकयो र्नक्षत्र
यो रेकतरस्मिन्नस्तंगतो गुरुरन्यत
रस्मिन्नुदेति तत्र का गति रिति चे
त्कार्त्तिकोत्तरं मार्गशीर्षं ततः पौ
ष मित्यादि क्रमान्नति विति ॥
फलानिच शाकदानलोपजीविक
गोपीडा व्याधिशोकश्च वृद्धिस्त
रक्तपीतकुसुमानां कार्त्तिके वर्षे
१ सौम्येऽव्दे ऽनावृष्टि र्मृगाखु शल
भांडजेश्च शस्यनाशः । व्याधिभ
यं मित्रैरपि भूपानां जायते वै
रं २ शुभकृन्मानः पौषो नि
वृत्तवैराः परस्परं भूपाः ।
द्वित्रिगुणो धान्यार्घः पौष्टिक
कर्म प्रसिद्धिश्च ३ ॥ पित्र्य
अब्दा परिहृष्टि मांघे हार्दंच सर्व
भूतानां आरोग्य वृष्टि धान्यार्घ

सीलाभः ... सानां पौर्णमा

संपदो मित्रलाभश्च ४ फाल्गु
नेवर्षे विद्यात्क्वचित्क्वचित्क्षेममद्
श्याद्दि शस्यानि दौर्भाग्यं प्रम ।
दानां प्रबला श्चौरा न्पराश्चायाः
५ चैत्रे मंदा वृष्टिः प्रियमन्नंक्षे
ममवनिपा स्सदवः वृद्धिश्चकोष
धान्यस्य भवति पीडाच रूपवतां
६ वैशाखे धर्मपरा विगतभ
याः प्रमुदिताः प्रजाः सन्पाः यज्ञ
क्रियाप्रवृत्तिः निष्पत्तिः सर्वशस्या
नां ७ ज्येष्ठे ज्ञाति कुलधर्मश्रेणी
श्रेष्ठान्नृपाः सर्वधर्मज्ञाः पीड्यन्ते
धान्यानिच हित्वा कंगुशमीजाति
८ आषाढे जायंते शस्यानि क्व
चिद्वृष्टि रन्यत्र योग क्षेमं मध्यं
शस्यश्च भवंति भूपाः ९ ।
श्रावणे वर्षे क्षेमं कामं शस्या
निपाक मुपायांति क्षुद्रा येपा
र्थिवास्ते पीड्यन्ते येच म्लेच्छाः
१० भाद्रपदे वीजं निष्पत्तिंयाति
पूर्वशस्यंच न भवत्यपरं शस्यं
क्वचित्सुभिक्षं क्वचिच्च दुर्भिक्षं ११
आश्वयुजेऽम्बनस्र पतति जलं
प्रमुदिताः प्रजाः क्षेमं प्राणाचयः
प्राणाभृतां सर्वेषामर्घ वाहुल्यं १२
इतिज्योतिस्तत्वं ॥ समा
घादि पंचवत्सरा यथा । शाका

द्वासंचभिः शेषात्समाघादिभ्रुव
त्सराः समवीदानुपूर्वाश्च त
थोदापूर्वका मताः सम्वत्सरादि
फलमुक्तं विश्वधर्मोत्तरे सम्वत
सरे तथा दानं तिलस्यतु महा
फलं परिपूर्वं तथा दानं यवा
नांच द्विजोत्तमाः इडापूर्वे ऽन्न
वस्त्राणांधान्यानांचानुपूर्वके उ
द्वासंवत्सरे दानं रजतस्य महा
फलं ज्योतिर्विदस्तित्र मध्यात्म
भवादेश्च संभवे । कृत्तुत्तदस्त
माघादि वर्षाणामपि संभवं ।
इत्यमध्यात् गुरुमध्यभोगमाहा
नात् प्रभवादेः प्रभवादिवर्षप
हे इतिमलमासतत्वं ॥
वत्सरान्तकः पुं फाल्गुणमासः
इति राजनिर्घंटः
वत्सलः त्रि स्नेहयुक्तः । तस्य
पर्यायः स्निग्धः २ इत्यमरः ॥
वत्सलः पुं शृंगारादिदशरसान्त
र्गतरसविशेषः तत्पर्यायः
वात्सल्यं २ इतिजटाधरः ॥ ।
वत्सला स्त्री वत्सकामागौः इति
हेमचंद्रः ॥
वत्सादनः पुं वृकः इतिराज
निर्घंटः ॥
वत्सादनी स्त्री गुडूची इत्यमरः ।

वत्साली स्त्री गोदुग्धा । इति
जटाधरः ॥
वद इ उ. अभिवादयोः इ
तिकल्पद्रुमः अभिवादो नम
स्कारः इ वन्दते उ. वन्दितेश
रुस्लोकः नमस्करोति स्तौति
वा इत्यर्थः इतिदुर्गादासः ।
वद पे वाति इतिकविकल्प
द्रुमः पे उवात् इतिदुर्गादासः
वद क वाक्सन्देशयोः । इति
कविकल्पद्रुमः क वादयति
सन्देशो वचनविशेषः प्रथमा
त्मनेपदीत्येके इतिदुर्गादासः
वद न उ. वाक्सन्देशयोः इति
कविकल्पद्रुमः न वदति इ.व
दते प्रथमात्मनेपदीत्यन्ये इति
दुर्गादासः ॥
वदः त्रि वक्ता इत्यमरः ॥
वदनं क्ली मुखं इत्यमरः ॥
वदन्नासवः पुं अथर्वस्य इति
भूरिप्रयोगः ॥
वदन्तिः स्त्री कथा इतिसिद्धा
न्तकौमुदी न्तकौमुदी विसर्गस्य
ने वदतेतिपदंक्रियापदं भवति
वदान्यः त्रि वदान्यः इत्यमर
टीका सारसुन्दरी ॥
वदान्यः त्रि बहुप्रदः वल्गुवाक

इत्यमरः ॥
वदामं क्ली फलविशेषः बादा
म् इति भाषा तत्पर्यायः सुफ
ल २ वातवैरिः ३ नेत्रोपमं ४ ।
अस्यगुणाः उष्णत्वं स्निग्धत्वं
वातघ्नत्वं गुरुत्वं शुक्रकारित्वं
च इति राजनिर्घण्टः अपिच ।
वातादो वातवैरीस्यान्नेत्रोपमफ
लस्तथा वाताद उष्णः स्निग्धः
ग्धो वातघ्नः शुक्रकृद्गुरुः वाता
म्लमज्जा मधुरो वृष्यः पित्तानि
लापहः स्निग्धोऽस कफहृच्छ्रेष्ठो
रक्तपित्तविकारिणां इतिभा
वप्रकाशः ॥
वदालः पुं मत्स्यविशेषः । बो
आलि इतिभाषा तत्पर्यायः ।
पाठीनः २ इति त्रिकाण्डशेषः
हव्यकव्ययो लत्तेप्योपयोगित्वं य
था पाठीन रोहितावाद्यौ नि
युक्तौ हव्यकव्ययोः इतिमनुः
वदालकः पुं पाठीनमत्स्यः ।
इतिभूरिप्रयोगः ॥
वदावदः त्रि वक्ता इत्यमरः ।
वधूः स्त्री एका नारी स्नुषा
इत्यमरः शारिरोषधिः शटी
नवोढा भार्या इतिमेदिनी
भरतमल्लिकेन अमरकोषटीकायां

पवर्गी यवकारादि वंधधातुना
निष्पादितोऽयं शब्दः । मेदिनी
कोषकारेण तु अन्तःस्थवका
रादिशब्दमध्ये परिगणितः ॥
पितृगृहभोजनानन्तरं स्वामि
गृहभोजने अस्या दोषो यथा
भुक्त्वा पितृगृहे कन्या भुङ्क्ते
स्वामिगृहे यदि दौर्भाग्यं जाय
ते तस्याः शपंति कुलनायिकाः
इतिकर्मलोचनं नववधूगमन
दिनं पवर्गी षवकारादिवधूशब्दे
द्रष्टव्यं ॥
वधूजनः पुं योषित् इतित्रिकां
डशेषः ॥
वधूटशयनं क्ली गवाक्षः यथा
वातायनं गवाक्षः स्याद्वधूटश
यनन्तथा इतित्रिकाण्डशेषः ॥
वधूटी स्त्री स्नुषा इति त्रिकाण्ड
शेषः सुवासिनी इति हेम ।
चंद्रः अल्पावयः इतिहारावली
वन संभक्तिशब्दयोः इतिकविक
ल्पद्रुमः वनति संभक्तिः सेवनं
इतिदुर्गादासः ॥
वन उ म व्याहतौ इतिकवि
कल्पद्रुमः उ वनित्वा वन्त्वा ममव
नयति मित्वेपि असम्मोन्वलक्ष
त्वाद्विना केवलस्यक्तस्य विकस

सोपसर्गस्यैव नित्यं ह्रस्वः ।
वनयति वानयति व्याहृति व्या
पारः अयंत कर्मवत् क्रियामा
त्र इत्यन्ये इतिदुर्गादासः ॥
वन र उ उ. याचे इति कविक
ल्पद्रुमः र उ. वनुते उवनित्वाव
त्वा इतिदुर्गादासः ॥
वन कि उपकृतिशब्दघात शब्दे
पतायेषु इति कविकल्पद्रुमः ॥
कि वानयति वनयति अयं कश्चि
न्मन्यते इतिदुर्गादासः ॥
वनं क्ली स्त्री बहुवृक्षयुक्तस्था
नं तत्पर्यायः अटवी २ अरण्यं ३
विपिनं ४ गहनं ५ काननं ६
इत्यमरभरतौ दावः ७ दवः ८
अटविः ९ भीरुकं १० कान्तं ११
अटिनं १२ इति शब्दरत्नावली ॥
शान्तं १३ सघनं १४ आन्तरं १५
विटपं १६ इतिजटाधरः । का
न्तारं १७ इतिराजनिर्घण्टः ॥
गृहसमीपकर्तव्यवनं यथा वि
विराम्यन्ते भद्रा स्थापिता ब्रल सीनां पन भुत्रपदार्थीन भएप दाहरिभक्तिरा प्रभाते ब्रलः
सीदृष्ट्वा स्वर्णदानफलं लभेत्
मालतीयूथिका कुन्दमाधवी के
तकी तथानागेश्वरं मल्लिकाच
काञ्चनं

बकुलं शुभं अपराजिता च सु-
भद्रा तेषां सुधानमीप्सितं पू-
र्वे च दक्षिणे चैव सुभद्रे नात्र सं-
शयः । इति ब्रह्मवैवर्त्ते श्रीकृष्णज-
न्मखण्डे ८२ अध्यायः ॥ मथुरायां
द्वादश वनानि यथा, सन्ति मधुव-
नं नाम विख्यातमुत्तमं तद्दृ-
ष्ट्वा मनुजो देवि सर्वान्कामानवा-
प्नुयात् । वनं तालवनं चैव द्विती-
यं वनमुत्तमं । तत्र स्नात्वा नरो दे-
वि कृतकृत्यो हि जायते । तृतीयं
कुमुदं नाम वनं चैवोत्तमं तथा ।
तत्र गत्वा नरो देवि कृतकृत्यो हि
जायते । एकादशी कृष्णपक्षे मा-
सि भाद्रपदे हि या । तत्र स्ना-
त्वा नरो देवि रुद्रलोके महीयते ।
चतुर्थं काम्यकवनं वनानां वनमु-
त्तमं । तत्र गत्वा नरो देवि मम लो-
के महीयते । विमलस्य च कुण्डे तु स-
र्वपापैः प्रमुच्यते । यस्तु प्रमुञ्चते
प्राणान् मम लोकं स गच्छति ।
मे पञ्चमं बकुलवनं वनस्थानमनुत्त-
मं । तत्र गत्वा नरो देवि अग्निस्थानं
स गच्छति । यमुनायाः परे पारे दे-
वानामपि दुर्लभं । अस्ति भद्रवनं ना-
म षष्ठं वनमनुत्तमं । तत्र गत्वा तु
स्वयं मद्भक्तो मत्परायणः । तदन्तस
प्र

भावेन नागलोकं स गच्छति । स-
प्तमं तु वनं भूमे खादिरं लोक-
विश्रुतं । तत्र गत्वा नरो भद्रे मम
लोकं स गच्छति । महावनं चाष्ट-
मं तस्यैव तु मम प्रियं । तस्मिन्स्ना-
त्वात्र मनुजो इन्द्रलोके महीयते ।
लोहजं यवनं नाम लोहजंघेन र-
क्षितं । नवमं तु वनं देवि महा-
पातक नाशनं । वनं बिल्ववनं ना-
म दशमं देवपूजितं । तत्र गत्वा
तु मनुजो ब्रह्मलोके महीयते । ए-
कादशं तु भाण्डीरं योगिनां प्रि-
यमुत्तमं । तस्य दर्शनमात्रेण नरो
गर्भं न गच्छति । भाण्डीरं समनु-
प्राप्य वनानां वनमुत्तमं । वासु-
देवं ततो दृष्ट्वा पुनर्जन्म न विद्यते ।
वृन्दावनं द्वादशमं वृन्दया परिर-
क्षितं । ममैव च प्रियं भूमे महापातक-
नाशनं । वृन्दावनं तु गोविन्दं ये पश्य-
न्ति वसुन्धरे । न ते यमपुरं यान्ति वैकु-
ण्ठं प्राप्नुयुर्नराः । इति वाराहे [illegible]
मथुरातीर्थे वनद्वादशकवर्णनं
नामाध्यायः ॥ वनविशेषे मरणफ-
लं यथा, येदं कथितं पापं मया
उग्रमथ्याम्बुते तत्सर्वं भवेत्तस्य
अल्पपुण्यकं च अरण्यानि भव-
न्ति मथुरा चैवोपरोगिणाश्च ये यवं

दण्डकारण्यं नैमिषं कुरुजाङ्ग-
लं उत्पलावृतमारण्यं जम्बुमा-
र्गोऽथ पुष्करं हिमवाँस्ततो
ऽरण्यदशमः परिकीर्त्तितः नवस्वे-
तेष्वरण्येषु यस्तु प्राणान्परित्य-
जेत् । ब्रह्मलोकातिथिर्भूत्वा स ।
याति परमं पदं । इति देवीपुराणे
अरण्योपवनप्रशंसा ॥ अरण्ये ।
वर्णनीयानि यथा, अरण्यः शिव-
राहेभव्याघ्रसिंहादयो द्रुमाः ।
शुक काक कपोताद्या भिल्ल-
मल्लदवादयः । उद्याने वर्णनी-
यानि यथा, उद्याने सरणिः सर्व-
फल पुष्प लता द्रुमाः । पिकालि-
केकिहंसाद्याः क्रीडा वाप्यध्व-
स्थितिः । इति कविकल्पलतायां
१ स्तवके ३ कुसुमं ॥
वनं क्ली जले निवासे आ-
लयः । इति मेदिनी प्रस्रवणं ।
इति हेमचन्द्रः ॥
वनकदली स्त्री काष्ठकदली इ-
ति राजनिर्घण्टः
वनकन्दः पुं वनशूरणः धर-
णीकन्दः । इति राजनिर्घण्टः ॥
वनकार्पासी स्त्री वनोद्भवकार्पा-
सः तत्पर्यायः त्रिपर्णी २ भार-
द्वाजी ३ वनोद्भवा ४ इति रत्नमा-
ला

वनकोलिः स्त्री वनजबदरी तत्प-
र्यायः कर्कन्धिका २ फलकर्कशा
३ इति कोषान्तरं ॥
वनगोचरः पुं व्याधः इति के-
चित् ॥
वनगौः स्त्री गवयः इति राज-
निर्घण्टः ॥
वनचन्दनं क्ली अगुरु देवदारु
इति विश्वः ॥
वनचन्द्रिका स्त्री मल्लिका इति
राजनिर्घण्टः
वनचम्पकः पुं वनजचम्पकपुष्प-
वृक्षः तत्पर्यायः । वनदीपः २
हेमाह्वः ३ सुकुमारः ४ अस्य
गुणाः कटुत्वं उष्णत्वं वातकफ-
नाशित्वं वर्ण्यत्वं वल्यत्वं व्रण-
रोपहत्वं वृषस्तम्भकारित्वं च ।
इति राजनिर्घण्टः ॥
वनच्छागः पुं अरण्यच्छागलः
तत्पर्यायः पट्टकः २ शिम्बावाह-
कः ३ इति त्रिकाण्डशेषः ॥
शूकरः इति शब्दमाला ॥
वनजं क्ली अम्बुजं इति मेदिनी
वनजः पुं मुस्तकः इति मेदिनी
गजः इति विश्वः वनशूरणः
इति राजनिर्घण्टः ॥
वनजा स्त्री मुद्गपर्णी इति मेदिनी

अरण्यकार्पासी वन्योपोदकी
॥ अश्वगंधा गन्धपत्रा । मि
श्रेया पैठं इति राजनिर्घंटः
वनजीरः पुं वनोद्भवजीरकः ।
तत्पर्यायः बृहत्पली २ स्थूल
पत्रः ३ अरण्यजीरः ४ कणाः ५
अस्य गुणाः कटुत्वं शीतत्वं
व्रणनाशित्वंच इति राजनिर्घंटः
वनतिक्तः पुं हरीतकी इति
शब्दमाला ॥
वनतिक्ता स्त्री वनतिक्तिका इ
तिरत्नमाला ॥
वनतिक्तिका स्त्री पाठा इत्यम
रः वनदः पुं मेघः इतिशब्दमा
ला वनदातरि त्रि ॥
वनदमनः पुं अरण्यदमनः इति
राजनिर्घंटः ॥
वनदीपः पुं वनचंपकः इति ।
राजनिर्घंटः ॥
वनधेनुः पुं वात्सी इति राज
निर्घंटः ॥
वनपल्लवः पुं शोभांजनवृक्षः
इतिजटाधरः अरण्यजपल्लवेच
वनपांसुलः पुं व्याधः इति
शब्दरत्नावली
वनपिप्पली स्त्री वनोद्भवपिप्प
ली तत्पर्यायः सूक्ष्मपिप्पली २ क्षु
द्रपिप्पली ३ वनकणा ४ अ
स्या गुणाः कटुत्वं उष्णत्वं ती
क्ष्णत्वं रुच्यत्वं दीपनत्वं मा
ध्याम्यगुणाढ्या शुष्का स्वल्पगु
णा इतिराजनिर्घंटः ॥
वनपुष्पा स्त्री शतपुष्पा इति
राजनिर्घंटः ॥
वनपूरकः पुं वनबीजपूरकः
इतिराजनिर्घंटः ॥
वनप्रियं क्ली त्वचं इति राज
निर्घंटः ॥
वनप्रियः पुं कोकिलः इत्यम
रः अरण्यप्रियमात्रे त्रि ॥
वनभद्रिका स्त्री भद्रवला इति
केचित् ॥
वनभुक् पुं ऋषभौषधं इति
शब्दचन्द्रिका ॥
वनमल्ली स्त्री वनोद्भवमल्लिका
इतिशब्दरत्नावली ॥
वनमल्लिका स्त्री सेवा इत्यम
रः वनमाला स्त्री श्रीकृष्णस्य
माला तत्स्वरूपंयथा आजानु
लम्बिनी माला सर्वर्त्तुकुसुमोज्ज्व
ला मध्येस्थूलकदम्बाढ्या वन
मालेति कीर्त्ति इतिशब्दमाला
वनमालिनी स्त्री द्वारकापुरी
इति त्रिकाण्डशेषः वाराही इति

4269

मेदिनी ॥
वनमाली न पुं श्रीकृष्णः इत्यमरः
वनमुक् च पुं मेघः इतिशब्दर
त्नावली ॥
वनमुद्गः पुं मकुष्टकः इत्यमरः
तत्पर्यायः वरकः २ निगरफकः
३ कुलीनकः ४ खंडी ५ इतिहे
मचंद्रः अस्य अन्यपर्याय गुणो
मुकुष्ट मकुष्टक शब्दयो र्द्रष्टव्यो
वनमुद्गा स्त्री मुद्गपर्णी इतिरा
जनिर्घंटः ॥
वनमूतः पुं मेघः वनं जलंमू
तं वद्धं अनेन वनं मुंचति इ
ति वामनीयादिः इत्यमरटीकायां
भरतकृत जीमूतशब्दव्युत्पत्ति द
र्शनात् ॥
वनमूर्द्धजा स्त्री कर्कटशृंगी इति
राजनिर्घंटः ॥
वनमोचा स्त्री काष्ठकदली इति
राजनिर्घंटः ॥
वनरः पुं वानरः इति भरत
द्विरूपकोषः ॥
वनराजः पुं सिंहः इति शब्द
माला वनस्यराजाच ॥
वनलक्ष्मीः स्त्री कदली इति
राजनिर्घंटः ॥
वनवर्वरः पुं कृष्णार्जकः इतिराज
निर्घंटः ॥
वनवर्वरिका स्त्री अरण्यजववरी
वनवाबुई इति भाषा तत्पर्यायः
सुगंधिः २ सूक्ष्मपत्रकः ३ दोषा
क्लेशी ४ विषघ्नः ५ खरपुष्पः ६
सूक्ष्मपत्रकः ७ निद्रालुः ८ शोफ
हारी ९ खरकः १० अस्य गुणाः
उष्णत्वं सुगंधित्वं पिशाचवाति
भूतघ्नत्वं ज्ञाणसंतर्पणत्वंच इ
ति राजनिर्घंटः ॥
वनवल्लरी स्त्री निःश्रेणिकाख्यतृणं
इति राजनिर्घंटः ॥
वनवह्निः पुं दवानलः इति
[illegible] हेमचंद्रः ॥
वनवासनः पुं खट्टाशः इति
त्रिकाण्डशेषः ॥
वनवासी न पुं ऋषभनामौषधं
मुष्ककवृक्षः वाराहीकंदः शा
ल्मलीकंदः नीलमहिषकंदः ।
इति राजनिर्घंटः वनवासक
र्त्तरि त्रि ॥
वनवीजः } पुं वनबीजपूरकः
वनवीजकः } इतिराजनिर्घंटः
वनवीजपूरकः पुं अरण्यजात
बीजपूरः तत्पर्यायः वनजः २
वनवीजकः ३ वनवीजः ४ अम्ल
सारा ५ गंधाम्ला ६ वनोद्भवा ७ दे

बृहती ८ पीता ९ देवदासी १० दे
वेष्टा ११ मातलेंगिका १२ पचनी
१३ महाफला १४ अस्य गुणाः
अम्लत्वं कटुत्वं उष्णत्वं रुचिप्रद
त्वं वातामदोष कृमि कफश्वा
स नाशित्वंच इति राजनिर्घंटः
वनहंत्ताकी स्त्री वृहती इतिरा
जनिर्घंटः ॥
वनव्रीहिः पुं नीवारः इतिहेम
चंद्रः ॥
वनशूकरी स्त्री कपिकच्छुः इ
तिराजनिर्घंटः आरण्यवराही
च वनशृंगाटः पुं वनोद्भवोलः व
नगोल इतिभाषा तत्पर्यायः ॥
४ २वमः ३ वनकंरः ४ अरण्यशृंगाट
सितशृंगाटः ५ वनजः ६ अतस्य
गुणाः ७ वनकंटुलः ८ अस्य गुणाः
रुच्यत्वं कटुत्वं उष्णत्वं कृमि
गुल्मशूलादिदोष सर्वारोचक
नाशित्वं इति राजनिर्घंटः ॥
वनशृंगाटः पुं गोक्षुरकः इ
त्यमरः ॥
वनशृंगाटकः पुं गोक्षुरकः इ
तिराजनिर्घंटः ॥
वनशोभनं क्ली पद्मं इतिश्रा
द्धचंद्रि वनस्यशोभाकर्तरि त्रि
वनश्वा पुं गंधमार्जारः वेचकः

व्याघ्रः इति मेदिनी ॥
वनसंकटः पुं मसूरः इतिशब्द
चंद्रिका ॥
वनसमूहः पुं अरण्यसंहतिः
तत्पर्यायः वागुरा २ इत्यमरः ॥
काम्या ३ इतिशब्दरत्नावली ॥
जलसमूहस्य ॥
वनसरोजिनी स्त्री वनकार्पासी
इतिशब्दरत्नावली ॥
वनस्थः पुं मृगः इति शब्द
चंद्रिका वनवासिनि त्रि ॥
वनस्था स्त्री अश्वत्थीवृक्षः इति
राजनिर्घंटः ॥
वनस्पतिः पुं विनापुष्पंफलि
द्रुमः वृक्षमात्रे इति मेदिनी ॥
श्याल्मलीवृक्षः इति राजनिर्घंटः
वनहरिद्रा स्त्री अरण्यजहरिद्रा
तत्पर्यायः शोली २ शोलिका
३ वनार्थिष्ठा ४ अस्याः गुणाः ।
कटुत्वं गोल्पत्वं रूक्षत्वं तिक्त
त्वं दीपनत्वंच इति राजनि
र्घंटः ॥
वनहासः पुं काशतृणं इतित्रि
कांडशेषः कुंदवृक्षः इतिराज
निर्घंटः ॥
वनहासकः पुं काशतृणं इति
शब्दरत्नावली ॥

4271

वनाखुः पुं शशकः इतित्रिका
ण्डशेषः ॥
वनाखुकः पुं मुद्गः इतित्रिकांड
शेषः ॥
वनाजः पुं वनच्छागः तत्पर्यायः
इडिक्कः २ शिखवाहकः ३ एड
शृंगः ४ इति हेमचंद्रः ॥
वनाटुः पुं वर्वणा नीलमक्षिका
इतिशब्दचंद्रिका ॥
वनाम्लः पुं कुससपाकफलः ।
इतिशब्दमाला ॥
वनाम्रः पुं कोषाम्रः इति राज
निर्घंटः ॥
वनायुः पुं देशविशेषः यथा ।
ना गया गवय वायु वनायु मंडसाल
तं इतिशब्दरत्नावली ॥
वनायुजः पुं वनायुदेशोद्भवघोट
कः अश्वभूपालवे वानायुजः ।
इतिशब्दरत्नावली ॥
वनारिष्टा स्त्री वनहरिद्रा इति
राजनिर्घंटः ॥
वनाशिकः पुं पुष्पजीवी माला
कारः इतिजटाधरः ॥
वनार्द्रका स्त्री वनभवार्द्रकं इति
राजनिर्घंटः अस्याः पर्याय गु
णा पेंदशब्दे द्रष्टव्या ॥ व
नालिका स्त्री हस्तिशुंडी यथा

वज्रवल्लस्थिसंहारो हस्तिशुंडी
वनालिका इतिहारावली ॥
वनाश्रयः पुं द्रोणकाकः इ
तिजटाधरः ॥
वनाहिरः पुं शूकरः इतित्रि
कांडशेषः ॥
वनिः पुं अग्निः वनि रुचिश्र
जि अति वसि वनि सनिधनि
ग्रन्थि चलिभ्यश्च इत्यनेनवनपा
तो र्वर्तिनहत इ इत्ययेन निष्प
न्नः इति सिद्धांतकौमुद्यामुणादि
वृत्तिः वनितः त्रि याचितः से
वितः इति मेदिनी ॥
वनिता स्त्री जातरागस्त्री स्त्री
सामान्ये इति मेदिनी ॥
वनी स्त्री वनं इत्यमरटीकायां
भरतः ॥
वनीनः पुं वानप्रस्थः यथा हर
हृमेधी शरद्धंतयोऽगीहि यवा
श्यां यशेन वनी वर्षासु प्रयामा
कै रापत्कल्पे ऽन्यैः पुरातनै वी
इतिश्राद्धविवेकोऽगे हारीतः
वनीकः त्रि याचकः इत्यमर
टीकायांसारसुंदरी ॥
वनीयकः त्रि याचकः इत्यमरः
वनेचरः पुं अरण्यचारी यथा
वनेचराणां वनिता सखानां दरी

यत्रोत्संग निषक्तभासः म
वंति यंत्रोसधयो रजन्यामतै-
लपूराः सुरत प्रदीपाः इति कु
मारसंभवे १ सर्गः ॥
वनेज्यः पुं बृहत्सालः इति
राजनिर्घंटः ॥
वनेसर्जः पुं असनवृक्षः इ
ति रत्नमाला ॥
वनेत्तडा स्त्री कवंजः इति
रत्नमाला ॥
वनोद्भवा स्त्री वनकार्पासी
इति रत्नमाला ॥
वनौकाः पुं वानरः इत्यम
रः वंदका स्त्री वंदा यथा वं
दाकाशोखरी सेव्या वंदा चवं
दकेष्यते इति भरतधृतरुद्रः
वंदथः पुं स्तोता स्तव्यः ॥
वंदिधातोः वथ प्रत्ययेन नि-
ष्पन्नः इति सिद्धांतकौमुदी
वंदनं क्ली वदनं इति शब्दच
न्द्रिका प्रणामः सतु षोड
शाधाभक्त्यंतर्गतभक्तिविशे
षः यथा पाद्मोत्तरखंडे शि
वपार्वतीसंवादे अर्चनं वंदन
वं प्रोक्तं प्रोक्त चक्रांकनं
देः धारणं चोर्द्ध पुंड्राणां नम
ज्ञानं यदीरितः अर्चनंच जपो
ध्यानं

तन्नामस्मरणं तथा कीर्त्तनं श्रव
णंचैव वंदनं पादसेवनं तत्पा-
दोदकसेवाच तन्निवेदित भोजनं
तदीयानांच संसेवा द्वादशीव्रत
निष्ठता तुलसीरोपणं विष्णो
र्देवदेवस्य शार्ङ्गिणः भक्तिः षोडश
धा प्रोक्ता भवबंधविमुक्तये ॥
इति हरिभक्तिविलासे ११ विलासः
षोडशोपचारस्यान्तर्गतशोपचा
रः यथा आसनं स्वागतं पाद्य
मर्घ्य माचमनीयकं मधुपर्काच
मन स्नान वसनाभरणानिच गं
धपुष्पे धूपदीपो नैवेद्यं वंदनं
तथा इत्याह्निकतत्त्वे आचारचि
न्तामणिः अथ वंदने प्रणाम
स्य साष्टांगं तन्मुद्राच मस्तो
येन पठेत्भक्तिप्रणाममेव प्राप्नो
द्भगवन्निति तदुक्त मेकादशीश्री
भगवता स्तवै रुच्चावचैः स्तोत्रैः
पौराणैः प्राकृतै रपि स्तुत्वा प्र
सीद भगवन्निति वंदेत दंडव
त् अथ प्रणाम विधिः कालि
काखंडे यः स्वयं सह पद्भ्यां
करिताभ्यां नमस्कृतिं शिरोम
स्तकयोः कृत्वा वाहुभ्यांच परं
अयनं पादि मामीषा भीतं मू
त्युमहारोणाविति किंचायमे दोर्भ्यां

पद्भ्यांच जानुभ्यां उरसा शिरसा
दृशा मनसा वचसा चेति प्रणा
मोऽष्टांग ईरितः जानुभ्यांचैव
बाहुभ्यां शिरसा वचसाधिया
पंचांगकः प्रणामः स्यात्पूजासु
प्रवराविमाविति मत्स्ये दक्षिणे
कृत्वा कुर्यात्तत्प्रणामो बुधः प्रद-
क्षिणं च प्रणामांस्तीन्याकस्मात्रिष्टि
कार्त्तिकान् तथाच नारदपंचरात्रे
मंत्रिं वीस हरिं चार्थं गुरुं स्वयं
गुरुरुमेव च हित्वात्रिविषाद्यस्य
वाथतद्विष्णनद्दके नमेनद्दस्मि-
पुवा तदर्ह सर्वथा नमेत विष्णु
धर्मोत्तरे देवाख्यो दर्शनादेव प्रणा
मेन्मधुसूदनं स्यानाद्येन्नाथक
तेथा कृष्णार्चा द्विजसत्तमाः देवाख्यो
दृष्ट्वा तं विष्णु वि सर्वं प्रकीर्तितं
अथ नमस्कार माहात्म्यं नारसिं
हे नमस्कारः स्मृतो यस्तः सर्वय
ज्ञेषु चोत्तमः नमस्कारेण चैकेन
नरः पूतो हरिं व्रजेत् स्कांदे ।
दंडप्रणामं कुरुते विष्णवे भक्ति
भावितः रेणुसंख्यं वसेत्स्वर्गे षा
तमन्वन्तरं नरः तथैव श्रीकूर्म
नारदसंवादे प्रणम्य दंडवद्भूमौ न

नमस्कारेण चैकेन नरः पूतो
हरिं व्रजेत् तथैव शिवोमासंवा
दे भूमि मापीड्य जानुभ्यांशि
रश्चारोप्य वै भुवि प्रणमेत्यो हि
देवेशं सोऽश्वमेध फलं लभेत्
तथैवाप्यत्र तीर्थकोटि सहस्राणि
णि तीर्थकोटि शतानि च ना
रायण प्रणामस्य कलां नार्हंति षो
डशीं प्रणाम्येनापि नमस्कारं कुर्व
तः शार्ङ्गधन्विने शतजन्मार्जितं
पापं तत्क्षणादेव नश्यति देवु
गंधितमाजस्य कृष्णा देहे भवे
ति ये तावद्दर्ष सहस्राणि वि
ष्णुलोके महीयते विष्णुधर्मो
त्तरे अभिवाद्य जगन्नाथ कृता
र्थस्य तथा भवेत् नमस्कार
क्रिया तस्य सर्वपाप प्रणाशि
नी जानुभ्यांचैव पाणिभ्यांशि
रसाच विचक्षणः कृत्वा प्रणामं
देवस्य सर्वान् कामानवाप्नुयात्
ब्रह्मपुराणे अनादिनिधनं देवं
दैत्यदानव दारणं ये नमन्ति न
रानित्यं नहि पश्यन्ति ते यम
मक्कारेण योऽर्चयेत सपश्यति
मवाप्नोतिमतां कुलयातै रपि ।
मेनेना जयतं नाथं विष्णुनारा
यणं द्विजाः नमन्ति नहिते विष्णोः
स्थानादन्यत्रगामिनः नारदेयी
कोऽपि हि मस्य सुकृत्यगामो

दशाश्वमेधावन्दैते नैवतस्माद
शाखामेधी पुनरेति नन्मकृस
प्रणामी नपुनर्भवाय भक्तिस•
भोदये विसो ईदप्रणामार्थे भक्ते
रुपननाशुवि पातितं पातकेक
स्तन्नोतिष्ठेति पुनः सद् प्रणिपा
पेतुराचारे नवेत्वन्मपाणतं हरे ने
हंते किंकरा याम्या उल्कुकास्त
थनं यथा श्रीविष्णुपुराणे स्मी
समस्तनिभमहानुशासने हरि
ममरमणार्चितोद्गि पद्मं प्रणा
मविधिः परमार्थतो हिमर्मः त
मपगत समस्तपापवंधे ब्रज
परिहृत्य यथाग्निमास्पसिक्तं
वक्ष्मवेवेर्ज प्रभणागतवत्स्तेणा
पाते हरीमीशे प्रणामस्तिये,
नराः नपतंतिभवाम्बुधोस्कृवे
पतितात्तृद्धतिस्वतानसो प्रश्न
सकृत्ये च बलिबाडोच्छ्रस्तेय
एकमाय कृतःसमुधमःसपृत्रमे
कार्यसिद्धिये समारिनः यलोक
पाते लारनुगहोःसवे नत्ताकृ
वोसवेदः पुदेःपिनः प्रणपदवा
नामागेश्वृदृस्तवे प्रहो भागपत्रो
भागपत्रे भागेनाशमिदं येषांट
रिनन्नोपाशिनो तस्ते यथा तथा
किंच नारसिंहे श्रीयमोक्ते तस
वे नारसिंहस्य शिसा रमितनेन

सः प्रणामं ये प्रकुर्वंति तेषाम
पि नमो नमः मविष्योत्तिरे वनत
येनुप्रसंगे विसोर्देवस्य गृहान्तर्ज
नार्दनजगत्पते प्रणामं ये प्रकु
र्वंति तेषामपि नमो नमः इत्यादि
प्रथ प्रणाममनिसत्ता बृहन्नारदी
ये तु कोपाद्यानारंभे सकृता
ननमेयुक्त विसवेशामकारिणा
शंवोपमं विनानीयात् कदाचि
दपि नालपेत् किंच पाद्मे वैशा
खमाहात्म्ये यमब्राह्मणसंवादे
पक्षपंते भगवदूपारेनामशास्त्रपमे
त्पुदे प्रकृत्वा तस्यणामादि यांति
ते नरकोकसः प्रथ नमस्कारनि
षिद्धानि विष्णुस्तता जन्म प्रभृति
यत्किंचित्सुमान्वे धर्म माचरेत् सर्वं
तन्निष्फलं याति पकहस्ताभिवा
दनात् वाराहे वसप्रावृतदेहस्तया
नरः प्रणामेतस्यो श्विवी जायते
मूर्खः सप्तजन्मानि भाषिनि किंचा
त्र प्रये पृष्ठे वामभागे समीपे
गर्भमंदिरे जप होमनमस्काराव
कुर्यात्केशवालये प्रपितु सह
रुको निपतितो नशाक्तः प्रणा
मेस्पृः उत्थायोत्थाय कर्तव्ये
उल्मश्रीपापातने ततः प्रदक्षिणां
कुर्यात् भक्त्या भगवतो हरेः।

4275

नामापि कीर्तयन् शक्नोतोच
माष्टांग वंदनो इति हरिभ।
क्तिविलासे ८ विलासः प्र
मतनमस्कारप्रसंगे प्रणामशाहे
वद्द्यवं॥।
वंदनमाला स्त्री तोरणः इति
हलायुधः देभास्तंभचतुष्टये।
ष्टितायुपत्रविनमाला यथा
ऊर्ध्वाद्वंदनमालां यो दंभास्तंभे
नपेभनेः हतदेवोद्रवेः प
डे नागेड चक्रपाणिनः युगानि
पत्र संख्यान्यां स्वर्गे तस्योत्सवो
भवेत् कल्पते वासवाधिष्ठ की
डेत् वायरोहत इति हरिभक्ति
विलासे १२ विलासः वंदनमालि •
का स्त्री वहिर्द्वारोपरिस्थमाला
यथा तोरणोर्द्वेत मंगल्यसमवं
दनमालिका इति हेमचंद्रः॥
वंदना स्त्री स्तुतिः तत्पर्यायः।
समीची २ इति त्रिकाण्डशेषः॥
होमभस्मजातिलके यथा।प
शाम्नामाहरेत्स्सं ऋचा वायो
वेणावा वंदनो कार्येणेन शि
रः कंठांशकेषु च कल्पपयेपति
मंत्रेण यथानुक्रमयोगतः इ
ति तिथ्यादितत्वेवसिष्ठवचनं॥

वंदनी स्त्री नतिः जीवातुः॥
वंदी याचनकर्म इति मेदिनी
कोषिकमके वटी स्थाने कटी
पाचन कर्मस्थानेमाचलकर्म इ
तिचपाठः तवर्गपवर्गीय वका
राद्यौतिविलोःयशद्र्भः किंत व
दि ङ• अतसिवाद्या विवस्मा
त् अनदूमनय निष्पन्नत्वात्प्र
त्यस्य वकारादौ लिखितः
वंदनीयः त्रि स्तवनीयः वंद्यः
वंदितव्यः वदधातो स्तीय प्र
त्ययेन निष्पन्नः॥
वंदनीयः पुं पीतभृंगराजः
इति राजनिर्घंटः वंदनीया स्त्री
गोरोचना इति त्रिकांडशेषः
वंदा स्त्री वृक्षोपरिवृक्षः वांड•
इति परगाछा इति च भाषा
तत्पर्यायः वृक्षादनी २ वृक्षरुहा
३ जीवंतिका ४ इत्यमरः वंदा
का ५ केवली ६ सेवा ७ वंदका
८ इति भरतधृतरुद्रः वंदकः ९
नीलवल्ली १० इति रत्नमाला॥
वंदाकी ११ परवासिका १२ इति
शब्दरत्नावली वाशिनी १३ पाद्रि
१४ वंधा १५ परपुष्पा १६ प
राश्रया १७ इति शब्दचंद्रिका॥

लताविशेषः मिसकी इति
मेदिनी अस्याः पर्यायान्तरं गु
णाश्च वंदाकशब्दे द्रष्टव्याः ॥
वंदाकः पुं वृक्षोपरिवृक्षः ।
बाँदा इति हिन्दीभाषा तत्प
र्यायः पादपरुहा २ शिखरी ३
तरुरोहिणी ४ वृक्षादनी ५ वृक्ष
रुहा ६ कामवृक्षः ७ शेखरी ८
केशरुपा ९ तरुरुहा १० तरुस्था
११ गंधमादनी १२ कामिनी १३
तरुभुक् १४ श्यामा १५ उपदी
१६ अस्य गुणाः तिक्तत्वं शि।
शिरत्वं कफ पित्तश्रमापहत्वं।
वृष्यादिसिद्धित्वं वृष्यत्वं क
षायत्वं रसायनत्वंच इतिराज
निर्घंटः अपिच वंदाकः स्वादि
ष्ट तिक्तः कषाय मधुरो रसे।
शीतलः कफ वातास्त्र रक्षो व्रणा
विषापहः इतिभावप्रकाशः।
वंदाका स्त्री वंदा इति भरत
धृतरुद्रः ॥
वंदकी स्त्री वंदा इति शब्द
रत्नावली ॥
वंदारुः त्रि वंदनशीलः तत्प
र्यायः अभिवादकः २ इत्य
मरः अभिवादयिता ३ इतिशब्द
रत्नावली ॥

वंदिः स्त्री आकृष्टमनुष्यगवादिः
कयदी इति भाषा तत्पर्यायः
प्रग्रहः २ उपग्रहः ३ वंदी ४
इत्यमरभरतौ वंदिका ५ ।
इति शब्दरत्नावली सोपानकः
इत्यमरादिकोषः ॥
वंदिग्राहः पुं अन्यगृहदेवता
गारभेदकः यथा वंदि ग्राहां
स्तथा वाजि कुंजराणांचहारिणः
प्रसह्यघातिनश्चैव शूलानारोप
येन्नरान् वंदिग्राहादीन् बलाव
ष्टंभेन घातकांश्च नरान्शूलाना
रोपयेत् अयंच वधप्रकारविशे
षोपदेशः अन्यागारायुधागार
देवतागार भेदकान् हस्त्यश्वर
थहर्तॄंश्च हन्यादेवाविचारयन्
इति मनुस्मरणात् इति मिताक्ष
राव्यवहारकांडेदंडप्रकरणं ॥
वंदिचोरः पुं वंदिग्राहः तत्पर्या
यः मावलः २ इति हारावली
बन्दीकारः ३ इति त्रिकांडशे
षः ॥
वंदिपाठः पुं स्तुतिपाठः तत्प
र्यायः भोगावली २ इतित्रि
कांडशेषः वंदी स्त्री वंदिः ३
त्यमरटीकायां भरतः ॥

वंदी पुं राज्ञादेर्यशादोवीर्या
दिस्तुतिकारकः तत्पर्यायः ।
स्तुतिपाठकः २ इत्यमरः माग
धः ३ मगधः ४ इत्यन्ये इतिभर
तटीकायां भरतः अस्योत्पत्तिर्वै
श्या क्षत्रियाद्विप्रकन्यायां सूतो
भवति जातितः वैश्यान्मागध
वैदेहौ राज विप्रांगनासुतौ ।
इतिमानवे ९ अध्यायः ॥
श्राद्धोत्तरभक्षेशक्तितोदानस्या
करणे निन्दा यथा वंदिभ्यश्चै
व मर्थिभ्योऽन्नार्थिभ्योऽन्नमर्थितः
यदि तत्र नदद्यात्तु विफलं श्राद्धं
तो भवेत् वंदिनो वीर्यस्तोतारः
अर्थितः सत्यपि पश्चोऽन्नं न
दद्यात् श्राद्धं विफलं भवेदि
त्यर्थः सूताः पौराणिकाः प्रोक्ता
मागधावंशशंसकाः वंदिनस्त्वम
लप्रज्ञाः प्रस्तावसदृशोक्तयः इ
त्युक्तेः इत्थंच श्राद्धोत्तरदानविधे
धात् श्राद्धे वंदिप्रभृतिभ्योदान
करणेनिंदाश्रवणाच्च श्राद्धात्पूर्वं
तदर्थं भोज्यादिकं उत्सृजेत्।
इतिश्राद्धतत्त्वं ॥
वंदिकारः पुं वंदिग्राहः सिंदेल
चोर इतिभाषा तत्पर्यायः मावे
लः २ प्रसह्यचोरः ३

चिल्लाभः ४ इतित्रिकांडशेषः ॥
वंधा स्त्री वंदा इति शब्दचं
द्रिका गोरोचना इति भावप्र
काशः
वंद्रं क्ली कल्याणं इतिसिद्धा
न्तकौमुद्यामुणादिवृत्तिः
वंद्रः त्रि पूजकः इत्युणादि
कोषः
वभ्रं क्ली त्वचं इति राजनिर्घं
टः वन्यः त्रि वनोद्भवः इतिमे
दिनी वन्यः पुं वनसूरणः वारा
हीकंदः देवनलः इति राजनिर्घंटः
वन्या स्त्री वनसमूहः इत्यमरः
जलस्रुतिः इति मेदिनी
गुडूची गोपालकर्कटी गुंजा
मिश्रेया भद्रमुस्ता गंधपत्रा
इति राजनिर्घंटः
वन्योपोदकी स्त्री लताविशेषः
वनपुई इति भाषा तत्पर्यायः
वनजा २ वनसाह्वया ३ अस्या
गुणाः तिक्तत्वं कटुत्वं उष्णत्वं
रोचनत्वंच इति राजनिर्घंटः
वपः पुं अंशी भागी इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः
वप डु ञ् न उ पे मुंडनतन्तुवी
जोप्त्या इतिकविकल्पद्रुमः
उवपमा जवपति वपेताउआप्ति

मं मुण्डे मेदिनिकरणे वपति
मस्तकं नापितः वपति तन्तु-
वायः यदि वपति कृषाणोऽक्षे-
त्रमासाद्य बीजं इति दुर्गादासः
वपः पुं केशमुण्डने बीजवपने
इति वपधातोर्भावेऽच्प्रत्ययेन
निष्पन्नं ॥
वपनं क्ली केशमुण्डनं बीजा-
धाने इतिमेदिनी ॥
वपनी स्त्री नापितशाला इति
हेमचन्द्रः ॥
वपा स्त्री छिद्रं मेदः इत्यम
रः ॥
वपिलः पुं पिता इत्युणादि
कोषः
वपुः क्ली शरीरं इत्यमरः
प्रशस्ताकृतिः मेदिनी ॥
वपुःस्रवः पुं शरीरस्थरसधा
तुः इति राजनिर्घण्टः ॥
वपुनः पुं देवता इति शब्द
रत्नावली ॥
वपुषा स्त्री स्तुषा इति शब्द
प्रकाशः ॥
वपुष्टमा स्त्री पद्मचारिणी इ
तिजटाधरः ॥
वप्ता क्र पुं जनकः इतिमेदि
नी ॥ कविः इति जटाधरः ॥

वप्ता स्र त्रि वापकः इतिमेदिनी
वप्रं क्ली पुं दुर्गनगरे परिखाया
उद्धृतमृत्तिकास्तूपवद्धे यद्दृष्टी
आकारो निवेश्यते तत्र तथा वा
र्द्धमाने खाताद्धृतेन मृदा वप्रं
कारयेत तस्योपरि आकारमि-
ति तत्पर्यायः चयः २ इत्यमर
भरतौ मृत्तिकास्तूपः ३ इति
शब्दरत्नावली महावप्रो यथा
महोद्यानो महावप्रा तत्र
ताम्रपाभित्ता आकार दृढ सं
हाथा. सिंहकोवामरावती ॥ म
हात्वप्रा यस्याः आकाराणा
रक्षता कविमेखिता भूमि
र्वप्रसंज्ञा इति विश्वप्रकाशेप
क्षेपे ॥ अप्पय्यः वप्रति वी
जमंत्र होत इति भाषा तत्पर्यायः
केदारः २ क्षेत्रे ३ इत्यमरभरतौ
निकुलः ४ वप्रकं ५ वाटिका
पाटीरः ७ इति जटाधरः
वेत्रः तटः इति मेदिनी
कर हेमचन्द्रौ ॥
वप्रं क्ली सीसकं इति हेमचं
द्रः ॥
वप्रः पुं तातः इति मेदिनी
आकारः इति विश्वः प्रजापतिः
इतिसंक्षिप्तसारोणादिवृत्तिः ॥

वप्रा स्त्री मंजिष्ठा इति राज
निर्घण्टः ॥
वप्रिः पुं क्षेत्रं वपधातोः क्रिन्
प्रत्ययेन निष्पन्नः । इति सिद्धान्त
कौमुद्यामुणादिवृत्तिः इगतिः ।
समुद्रः इतिसंक्षिप्तसारोणादि
वृत्तिः ॥
वम्री स्त्री वल्मीकः इतिहलायुधः
वः पुं एकादशाकरणान्तर्गतम
ध्यकरणं तस्याधिपतिरिन्द्रः त
त्रविहितानि यथा पौष्टिकस्थिर
शुभानि ववाख्ये इति ज्योति
स्तत्वं अन्नजातफलं ववाभिधा
ने जननं हि यस्य प्रसूते ऽशिष्यी
यो मनुजः कृती स्यात् पद्मालया
तन्निलये निवासं करोतिनित्यम
विचक्षणः स्यात् इति कोष्ठी प्र
दीपः । दाक्षिणात्यमते अस्य
शब्दस्य प्रथमवकारः पवर्गीयः
शेषवकारोऽन्तस्थः ॥
वभ्र गत्यां इति कविकल्पद्रुमः
वकारादिः ओष्ठ्यवर्ग चतुर्थोपधः
वभ्रति इतिदुर्गादासः
वम ण उद्गिरि इतिक
विकल्पद्रुमः वकारादिः ण वेमतः
ववमतः अस्य न पत्वार्थ विधा
यकसूत्रेपणादौ चेमन पठ ॥

न्तेवेमुश्च केचिदुधिरमित्यादिसा
धनाय तत्सूत्रे दंत्यवकारादिव
र्जनस्यानित्यत्वान्नीऊचेति केचि
त्तु न वेर्यवकारादि धातत्त्वेमण
त्वि इतिमलयंति नवामःवमः
उदवमित्वा वान्त्वा हवमथुः उद्गि
दि वान्तो वमति अन्नमजीर्णा
वान् अस्वस्थेऽपि मो तल फल
इत्यादिना केवलस्य कस्यचिक
त्वचान्तोपसर्गस्य नित्यं कत्वः व
मयति वामयति प्रवमयति इति
दुर्गादासः ॥
वमः पुं स्त्री वमनं इतिवम
धातो अच्प्रत्ययेन निष्पन्नं इ
ति सिद्धान्तकौमुद्यामुणादिवृत्तिः
वमथुः पुं वमिः हस्तिशुण्डनि
र्गतजलकणाः तत्पर्य्यायः कर
शीकरः २ इत्यमरः ॥
वमनं क्ली छर्दनं अर्द्दनं इति
मेदिनी आहुतिः इति विश्वः
वमनः पुं शणः इति राज
निर्घण्टः ॥
वमनी स्त्री जलौका इतिराज
निर्घण्टः
वमनीया स्त्री मक्षिका इति
राजनिर्घण्टः वमनयोग्ये त्रि ॥
वमिः स्त्री मच्छर्दिका इत्यमरः ॥

अथ छर्द्यधिकारः तत्र छर्दिर्वि
प्रकृष्ट सन्निकृष्ट निदानं पूर्व
पं संप्राप्तिमाह अतिद्रवैरति·
स्निग्धैरहृद्यैर्लवणैरपि अ
काले चातिमात्रैश्च तथासात्म्यै
श्च भोजनैः श्रमाद्भयात्तथोद्वे
गादजीर्णात्कृमिदोषतः नार्या
श्चापन्नसत्वाया स्तथातिद्रुतम
श्नतः दुष्टैर्दोषैः पृथक्सर्वैर्बीभ·
त्सालोकनादिभिः दीलैर्हेतुभि
श्चान्यै र्द्रुतमुत्क्लेशितो बलात्
आमातं श्रमम्यकाद्वाकाद्भात्
अजीर्णात्सर्वथा स्थितादुक्तात् ।
आपन्नसत्वायाः आमगर्भायाः अ
मेध्यैर्भक्ष्यैः विकृतैर्हेतुभिः छा
दता कारिभिः अनिष्ट श्रवणास्प
र्शन दर्शनभक्षणा घ्राणोत्क्लि
ष्टपने ऊर्ध्वं नीत्वा मुखं हरति छि
र्वे सर्वरूपमाह हृल्लासोद्गाररो
धौ च प्रसेको लवणास्यता मुखा
न्नपानेच्छा श्रमो वमीनामग्रतः
स्थितं छर्दः सामामलक्षणम्
र ज्ञातयमानं वैरस्यमन
भंजनैः निरुच्यते छर्दिरिति दो
षो वक्त्रं प्रधावितः छादयन्नाननं
अंगानि अंगभेदैः अर्दयन् अ
गानि पीडयन् वक्त्रं प्रधावितः व
के

प्रतिधावितः दोषः छर्दिर्निरुच्य
ते वातजाया लक्षणमाह ।
हृत्पार्श्वपीडा मुखशोष मूर्ध
नाभ्यर्त्ति कास स्वरभेद तोदैः उ
द्गार शब्द प्रबलं सफेनं वि
च्छिन्नकृष्णं तनुकं कषायं कृ
च्छ्रेण चाल्पं महता च वेगे
नार्तोनिलात् छर्दयतीव दुःखं क
षायं कषायरसं दुःखेदुःखमिव
छर्दयति पित्तजामाह मूर्च्छापि
पासामुखशोष मूर्द्धताल्वक्षि संता
प तमोभ्रमार्तः पीतं भृशोष्णं ह
रितं सतिक्तं धूम्रं च पित्तेन वमेत्स
दाहं कफजामाह तंद्रास्यमाधु
र्यकफप्रसेक सन्तोष निद्रारुचि
गौरवार्त्तः स्निग्धं घनं स्वादु क
फानुविद्धं सलोमहर्षोऽल्परुजं
वमेत्तु संतोष तृप्तिः त्रिदो
षजामाह शूलाविपाकारुचि दा
ह तृष्णा श्वास प्रमोह प्रबला प्र
सक्तं छर्दिस्त्रिदोषाल्लवणाम्लनी
लसान्द्रोष्ण रक्तं वमतां नृणां स्या
त् आगंतुजामाह बीभत्सजा
च कृमिजामजा च बीभत्सजा
दौर्हृदजा च या हि सा पंचमी तां
च विभावयेच्च दोषाच्छर्दयेद्वैव य
थाक्रमादौ एताः पंचागंतुजत्वेन

साम्याद्वैव अत एव सा आगंतु
जा पंचमी विभावयेत् अनुबध्ये
त् उपद्रवानाह कासः श्वासोज्वर
स्तृष्णा हिक्का वैचित्त्यमेव च हृद्रो
गस्तमकश्चैव ज्ञेया छर्देरुपद्रवाः
वैचित्यं विकलचित्तत्वं तमकः
ऽतमः श्वासभेद एव तमकः।
तृष्णापि श्वासोक्ता ॥ अ
साध्या साध्यमाह क्षीणस्या
छर्दिरतिप्रसक्ता सोपद्रवा सा
ऽसृक्पूयवती सचन्द्रिका तां
मवदेत् साध्यां साध्यां चिकित्
सेत् निरुपद्रवां च सचन्द्रिका म
यूरपिच्छचन्द्रिका स्वप्नायुक्ता ॥
अथ छर्दि चिकित्सा आमाशयो
त्क्लेश भवा हि सर्वा छर्द्यो।
मता लंघनमेव तस्मात् विधी
यते मारुतजां विनात संशोधनं
वा कफ पित्तहारि अथ छर्दीणा
मुः १ हरीतकीरोदकं पीतं छ
र्दि पनसंभवो मृत्तामलकास्
प्रेवा सर्वापिक्कः ससैंधवः क्षीरो
दकं लीढ्वा सक्षीरस्य उदके ध्रु
चूर्णी त्रिफला निम्ब पटोलैः क
थितं जलं पिबेन्मधुयुतं तेन छ
र्दिर्न प्रशाम्यति पित्तजा ३ हरीतकीनां
चूर्णानि लिह्यात् माक्षिकसंयुतं अधो

मार्गीकृते दोषे छर्दिः शीघ्रं नि
वर्तते २ विडंग त्रिफला विश्वा
चूर्णं मधुयुतं पिबेत् विडंगप्लव
शुंठीनां चूर्णं वा कफजां वमिं
मवं वैवश्यं मुक्ते गुडलिनी इति
लोके ४ पिप्पल्या जीफलं लाजाव
शर्करा च एलाकिता दत्वा
मधुयुक्तं चापि ऊर्ध्वं सलिलम
वा तासका मालिते पीतं हन्ति
छर्दिं त्रिदोषजां ६ गुडूच्याः रचितं
हंतिहिमं मधुसमन्वितं दुर्निवा
रा मपि छर्दिं त्रिदोष जनितां च
लात् ७ एला लवंग गजकेश
र कोलमज्जलाज प्रियंगु घ
न चंदन पिप्पलीनां ।
चूर्णानि माक्षिक सिता सहि
तानि लीढ्वा छर्दि निहन्ति क
फवातज पित्तजातां एलादि
चूर्णं ८ कृष्णस्य वल्कलं शुष्कं
दग्धं निर्वापितं जले तज्जलंपा
नमात्रेण छर्दिं नयति दुर्जयां ९ प
थ्या त्रिकटु भास्कल जीरकाणां
चूर्णो लिहन् मधुना नाशयेच्छ
र्दिं महतीं च त्रिदोषजां १० वि
ल्वत्वचो गुडूच्या वा क्वाथः क्षौ
द्रेण संयुतः छर्दिं त्रिदोषजां हंति
पर्पटः पित्तजां तथा ११ आम्रा
स्थि विल्वमिश्रं च पीतः समधुश

करः तिरस्माद्धर्षतीसारवैश्वानर
इवाकृतिं निर्युद् क्लायः १२ ज
म्बाम्रपल्लव मृतेलाजरसःसंयुते
पीतं शमयतिमधुना प्रक्रेवमिम
तिसारंस्तपार्तिमुग्रां १३ वीभत्सजां
ह्ययुक्तमेदिष्टे दौर्हृदजांफलैः ल
वं नैरामयजांछर्दिंजयेत्सात्मैःरसा
त्म्यजां १४ कृमिहृद्रोगवद्भ्याल
मिं कृमि समुद्भवां तत्र तत्र यथा
दोषं क्रियांकुर्यात् चिकित्सकः १५
इतिछर्द्यधिकारः इतिभावप्रका
शः वमिः पुं अग्निः इतिमेदिनी
धूर्त्तः इतिशब्दरत्नावली ॥
वमितः त्रि वान्तः वमनकृतव
त्त इतिमुग्धबोधव्याकरणं ॥
वंभः पुं वंशः इति शब्दरत्ना
वली ॥
वम्रीकूटः पुं वल्मीकः इति
हेमचंद्रः ॥
वय उ॰ गतौ इति कविक
ल्पद्रुमः इ॰ वयते इतिदुर्गादा
सः वयं त्रि अस्मदादिः आस्मा
इतिभाषा अस्मच्छब्दस्यबह्वादे
शो जसितिबोध्यं इतिव्याकरणं
वयः स क्ली पक्षी बाल्यादिः इ
त्यमरः यौवनं इतिमेदिनी ॥

वयोविशेषे कर्त्तव्यानियथा ।
शैशवेऽभ्यस्त विद्यानां यौवने
विषयैषिणां वार्द्धके मुनिवृत्तीनां
योगेनान्ते तनुत्यजां इतिरघुवं
शे १ सर्गः ॥ अपिच ।
प्रथमे नार्जिता विद्या द्वितीये
नार्जितं धनं तृतीये नार्जितंपुण्यं
पुण्यं चतुर्थे किं करिष्यति ॥
इति चाणक्यं वयोविशेषाणां
नियमायथा कौमारं पंचमा
ब्दांतं पौगंडं दशमावधिकैशो
रं आपंचदशात् यौवनंचततः
परं इति प्रायश्चित्ततत्वधृतवच
नं अपिच । आषोडशाद्
वेद्बाल स्तरुणः स्तत उच्यते ।
वृद्धःस्यात्सप्ततेरूर्द्ध वर्षीयान्नव
ते परं इति भरतधृतास्मृतिः
॥ अमचं बालं बुद्धिर्वयो
रूपं चतस्त्वकमाचरेतश्री दश
केन निवर्त्तन्ते मनः सर्वेन्द्रि
याणिच इति महाभारतं वयःस्थःत्रिशु हेमचंद्रः
वयःस्थः त्रि युवा इत्यमरः वय
सियौवने तिष्ठति इति वयस्थः
उः निपातादिसगर्गस्य बाल्यकव
यःस्थश्च वयः पत्तिणि बाल्यादौ
वयोयौवनमात्रके इति विश्वः इति

८३
4283

भरतः ॥
वयस्था स्त्री आमलकी हरीतकी
सोमवल्ली इत्यमरः ॥ गुडूची
सूक्ष्मैला काकोली ॥ ब्राह्मी ।
इति मेदिनी शाल्मलिः । इति
हेमचंद्रः ॥ क्षीरकाकोली इति
भावप्रकाशः ॥ मत्स्याक्षी ॥
मत्स्याक्षी ॥ युवती । इति राज
निर्घंटः ॥
वयस्यः पुं समानवयस्कः । तत्प
र्यायः स्निग्धः २ सवयाः ३ इत्य
मरः ॥
वयस्या स्त्री सखी इत्यमरः ।
वयुनं क्ली ज्ञानं यथा हन्तास्ये
रचयति विधिं पीठकोडवला
येष्विदं ह्यन्तर्निहितवपुषः शिका
भांडेषु नहित । इति श्रीभागव
ते ९ स्कंधे ८ अध्यायः शिका।
भांडेषु अन्तर्निहितस्यात्मनो वयु
नं ज्ञानं यस्य सः ॥ इति तट्टी
काया श्रीधरस्वामी ॥
वयुनः पुं देवतागारं ॥ इत्य
मरादिकोषः ॥
वयोधाः स पुं युवा इत्यमरादि
कोषः ॥
वयोरंगं क्ली सीसकं इति राज
निर्घंटः ॥

वरतक ईप्से इति कविकल्प
द्रुमः रेफोपधः वरयति । इति
दुर्गादासः ॥
वरं क्ली कुंकुमं ॥ मनाक्प्रियं
इत्यमरः ॥ तथाच । वरंप्राणा
स्त्याज्या नच पिशुनवादेष्वभिरु
चि वरं मौनं कार्यं नच वचन
मुक्तं यदनृतं वरं क्लीवं भाव्यं
नचपरकलत्राभिगमनं वरं भिक्षा
शित्वंनच परधनानां हरणं ॥
इतिवामनपुराणे ५८ अध्यायः
वरं म व मनाक्प्रियं यथा म
नागिष्टे वरं क्लीवं केचिदाकल
हन्यस्य इतिमेदिनी ॥
वरः पुं वरणं तत्पर्यायः ॥
वृतिः २ इत्यमरः हे वेष्टने
प्रार्थनाविशेषे इत्येष इतिभर
तः देवाद्वृतः । देवसकाशा
त्प्रार्थितः अभीष्टः । तपोभिरि
ष्यते यस्तु देवेभ्यः सवरोमतः
इतिच भरतः जामाता ॥
विटः इति मेदिनी गुग्गुलुः
इतिशब्दरत्नावली पतिः इति
हेमचंद्रः ॥
वरः त्रि श्रेष्ठः इत्यमरः ॥
वरकं क्ली पोताच्छादनं इति
हारावली पोताधोन साधारण

वत्वं इति शब्दरत्नावली
वरकः पुं वनमुद्गः इतिहेम
चंद्रः पर्पटः इति राजनिर्घंटः
तृणधान्यभेदः चीना इतिभाषा
तत्पर्यायः स्थूलकंगुः २ रूक्षः
३ स्थूलप्रियंगुः ४ अस्यगुणाः
मधुरत्वं रूक्षत्वं कषायत्वं वात
पित्तकारित्वंच इतिराजनिर्घंटः
वरकांतः पुं इंद्रः इति हेम
चंद्रः वरचंदनं क्ली कालीयं दे
वदारु इतिमेदिनी ॥
वरटं क्ली कुंदपुष्पं । इतिश
ब्दरत्नावली ॥
वरटः पुं हंसः इति मेदिनी
कीटविशेषः बोलता इतिभा
षा ॥
तत्पर्यायः गंधोली २ वरला ३
इत्यमरः गंधोलिः ४ वरला ५
इति शब्दरत्नावली वरली ६
इति जटाधरः तरटा ७ करटा ८
रक्तवर्णा ९ इतिराजनिर्घंटः
वरटा स्त्री हंसी कला इत्यम
कुसुंभबीजं ॥ इति भा
वप्रकाशः ॥
वरटी स्त्री हंसी इति मेदिनी
गंधोली इतित्रिकांडशेषः ॥
वरटिका स्त्री कुसुंभबीजं तत्

तत्पर्यायः वरटा २ अस्यगुणाः
मधुरत्वं स्निग्धत्वं रक्तपित्त क
फापहत्वं कषायत्वं शीतलत्वं ।
गुरुत्वं अवृष्यत्वं अनिलापह
त्वंच इति भावप्रकाशः ॥
वरणं क्ली कन्यादिवरणं वेष्टनं
इतिमेदिनी पूजनादि । इतिश
ब्दरत्नावली ॥ अथ वरणवि
धिः तेषां आचार्यादीनां होमसा
ध्ये कर्मणि होमारंभात्पूर्वमान
सर्थ्य यजमानेन स्वयं वरणं
कार्यं दान वाचनान्वारंभ वरण
व्रत प्रमाणेषु यजमानं प्रतीयात
इति हरिशर्मधृतकात्यायनसूत्रा
त् तत्र ब्रह्मवरणं प्रथमतः ज्यो
तिष्टोमे ब्रह्मोद्गातृ होत्रध्वर्यु
स्मादि क्रमदर्शनेनाभ्यर्हितत्त्वा
या दृष्टपरिकल्पनाया न्याय्य ।
त्वात् सगति सोपान प्रश्नतया
ऽप्येवं वरणोत्त गंधादि दान
द्वारा प्रीति संपाद्य कर्मकरण
प्रेरणं तत्रच सर्वत्र प्राङ्मु
खोदाता गृहीता च उदङ्मुखः
इतिवचनात् यजमानस्य प्राङ्मुख
त्वं आचार्यादीनां मुदङ्मुखत्वं प्रती
यते वरणविधिमाह कात्यायनः
आसन माहार्य माह साधुभवानास्ता

42-85

मर्चयिष्यामो भवंत मिति आसन
माहार्यानीय संस्थाप्याह साधुभ
वानास्ता मिति साधवा सासे।
इति प्रतिवचनं ॥ अर्चयिष्या
मो भवंत मिति पुनरुक्ते अर्चय
इतिप्रतिवचनं सामर्थ्यात् इतिर
विशर्मा इतिसंस्कारतत्वं ॥
मेदिनीमते पवर्गीयवकारादिश
ब्दोऽयं किंतु अंतस्थवकारादि
वृधातो रुनट् प्रत्ययेन निष्पन्न
त्वादत्र लिखितः ॥
वरणः पुं प्राकारः वरुणवृक्षः
इत्यमरः उष्ट्रः इति हारावली
संक्रमः सांको इति भाषा ।
इतिहलायुधः ॥
वरणसी स्त्री वाराणसी । इति
शब्दरत्नावली ॥
वरणा स्त्री नदीविशेषः इति
शब्दरत्नावली सातु वाराणस्या
उत्तरसीमा तस्या उत्पत्ति यथा।
हरिरुवाच महेश्वर श्रृणुष्वेमां
मम वाचं कलस्वनां अस्मादाद्य
यकटी शुभदा पुण्यवर्द्धिनी ॥
योऽसौ पादांगुष्ठे पुण्यप्रदेशः।
प्रभवोऽव्ययः प्रयागे वसते
नित्यं योगशायी तु विश्रुतः ॥
वरणादिति विख्याता तस्य विनिर्गता

सरिद्वरा। विख्याता वरणेतिवै स
र्वपापहरा शुभा ॥ सव्यादस्मा दि
तीयाच असि रित्येव विश्रुता
ते उभेच सरित्श्रेष्ठे लोकपूज्ये
बभूवतुः ताभ्यां मध्ये तयो
र्देशः सुतत्वेन योगशायिनः से
लोकप्रभवं तीर्थं सर्वपापप्र
मोचनं न तादृशोऽस्ति गगने
न भूम्यां न रसातले । न
चास्ति नगरी पुण्या ख्याता वा
राणसी शुभा यस्यां हि भोगि
नोऽनाशं प्रयांति भवतो लयं इ
ति वामने ३ अध्यायः
वरंडः पुं अंतरावेदिः समूहः
मुखरोगः मलव्रण इति वह
मुखफोड़ा इति बंगभाषा इतिमे
दिनी अस्मिन् पवर्गी यवका
रादि स्वं किंतु अंतस्थवकारा
दि हेमचंद्रो मेदिनिक सृष्टेन
प्रमाणत्वेनात्रैव लिखितः
वरंडकः पुं मातंगवेदिः हाति
हरोला इति भाषा यौवन
कंटकः वयसफोड़ा इतिभाषा
वर्तुलः गोल इतिख्यातः इति
मेदिनी भित्तिः इतिहेमचंद्रः
मेदिनीकारेणायं पवर्गी यव
कारादौ लिखितः किंतु हेम

वंडेण वृन्त पात निष्पान्नत्वात्
अन्त्यस्थवकारादौ परिगणितः॥
वरंडकः त्रि विशालः भयसंप
न्नः कृपणः इति शब्दरत्नावली
वरंडा स्त्री सारिका ॥ वर्तिः
शस्त्रभेदः इतिमेदिनी ॥
वरंडालः पुं पर्वंडवृक्षः इति त्रि
कांडशेषः ॥
वरतिक्तः पुं कुटजवृक्षः इति
राजनिर्घंटः ॥
वरतिक्तिका स्त्री पाठा आकना
दि इति भाषा इतिराजनिर्घंटः
वरत्वरी स्त्री रेणुकानामगंधद्र
व्यं इति शब्दचंद्रिका ॥
वरत्रा स्त्री हस्तिकक्षबंधः का
छदड़ी इति ख्याता तत्पर्यायः
चूषा २ कक्ष्या ३ कक्षा ४ चर्मर
ज्जुः तत्पर्यायः नद्धी २ वध्री ३ व
र्ध्री ४ वाध्री ५ इत्यमरस्वरतौ ॥
वरत्वचः पुं निम्बवृक्षः इतिरत्न
माला श्रेष्ठवल्कके क्ली ॥
वरदः त्रि अभीष्टदाता तत्पर्या
यः समर्द्धकः २ । इत्यमरः॥
समर्द्धः ३ वाञ्छितार्थदः ४ इति
शब्दरत्नावली प्रसन्नः इति
मेदिनी ॥
वरदा स्त्री कन्या इतिमेदिनी
आदिमभक्ता इति राजनिर्घंटः ॥
अस्य गंधा इतिभावप्रकाशः ॥
वरदाचीच ॥
वरदाचतुर्थी स्त्री माघशुक्लचतुर्थी
तस्यां गौरीपूजा यथा भवि
ष्योत्तरे माघशुक्लपक्षे अधिकृत
चतुर्थी वरदा नाम तस्यां गौरी
सुपूजिता सौभाग्य मतुलं कुर्या
त्सर्व्वस्या स्त्री अपि श्रियं ॥
इति तिथ्यादितत्वे ॥
वरदारु पुं वृक्षविशेषः भूइस
ह इति हिंदीभाषा तत्पर्यायः
भूमीसहः २ ह्रावदारुः ३ स्वर
च्छेदः ४ अस्यगुणः शिशिरत्वर
क्तपित्तप्रसादनत्वंच इति भाव
प्रकाशः ॥
वरपारणाख्यः पुं क्षीरकंचुकीवृक्षः
इति रत्नमाला ॥
वरप्रदा स्त्री लोपामुद्रा । इति
हेमचंद्रः वरदा तरि त्रि ॥
वरफलः पुं नारिकेलवृक्षः इति
शब्दचंद्रिका तत्फले श्रेष्ठफले
च क्ली ॥
वरभावी स्त्री रेणुकानामगंधद
व्यं इतिशब्दचंद्रिका ॥
वरम् व्य ईषत्प्रियः । इतिमे
दिनी ॥

वरवरा स्त्री चर्पणी वाबुलिया
इतिभाषा इतिशब्दचंद्रिका ॥
वरयिता पुं भर्त्ता इति हेम
चंद्रः वरणकारयिताच ॥
वररुचिः पुं कविविशेषः तत्प
र्यायः पुनर्वसुः २ इति त्रिकां
डशेषः सच विक्रमादित्यराज
सभास्थ नवरत्नांतर्गत रत्नविशे
षः यथा धन्वन्तरिः क्षपणका
मरसिंहशंकु वेतालभट्ट घटकर्प
र कालिदासाः ख्यातो वराहमि
हिरोनृपतेः सभायां रत्नानिवैव
रत्ने वरलः पुं स्त्री वरटः बोल
ता इतिभाषा यथा विषस्रक्
भृंग रोलो वाल स्तणषट्पदः
इतिशब्दमाला
वरलब्धः पुं चंपकवृक्षः इति
त्रिकांडशेषः वरमालेति ॥
वरला स्त्री हंसी इति मेदिनी
तत्र पवर्गीयबकारादौ पठितो
यं वरटाच
वरली स्त्री वरटा इत्यमराध
रः वरवत्सला स्त्री श्वश्रूरथाली
इतिशब्दमाला ॥
वरवर्णिनी स्त्री अलक्ष्मास्त्री त
त्पर्यायः वरारोहा २ मत्तकासि
नी ३ उत्तमा ४ इत्यमरः मत्त
काशिनी ५ इति भरतः लाक्षा
हरिद्रा रोचना फलिनी ॥
साध्वीस्त्री इतिमेदिनी गौरी
सरस्वती लक्ष्मी इतिशब्दरत्ना
वली ॥
वरवाल्हीकं क्ली कुंकुमं इत्यम
रटीकायां
वरवृक्षः पुं शिवः इतित्रिकां
डशेषः ॥
वरा स्त्री फलत्रिकं इतिमेदिनी
रेणुकानामगंधद्रव्यं इतिशब्द
चंद्रिका गडूची मेदा ब्राह्मी
विडंगे पाठा हरिद्रा ।
इतिराजनिर्घंटः शताच ॥
वरांकः पुं शिवः इतिमेदि
नी गुडं इतिहेमचंद्रः ॥
वराकः त्रि शोचनीयः इतिमेदि
नी प्रवरः इति शब्दमाला
वरांगं क्ली मस्तकं गुह्यं इत्य
मरः गुडत्वक् योनिः इति
त्रिकांडशेषः श्रेष्ठावयवे क्ली
तद्युक्ते त्रि ॥
वरांगः पुं हस्ती इति त्रिकांड
शेषः विष्णुः यथा सुवर्णवर्णो
हेमांगो वरांगश्चंदनांगदी ।
इति तस्य सहस्रनामस्तोत्रे ॥

वरांगकं क्ली गुडत्वक् इत्य
मरः श्रेष्ठावयवयुक्ते त्रि ॥
वरांगना स्त्री अतिप्रशस्तांग
युक्ता स्त्री यथा शिरःसुपुष्पं
चरणौसुपूजितौ वरांगनासेव
नमल्पभोजनं अनग्नशायित्वम
पर्वमैथुनं चिरप्रणष्टां श्रियमा
नयन्ति षट् इतिलक्ष्मीचरित्रं ॥
वरांगरूपोपेतः त्रि श्रेष्ठरूपयु
क्तः सुंदर इत्यर्थः तत्पर्यायः
सिंहसंहननः २ इत्यमरः ॥
वरांगी स्त्री हरिद्रा इतिराज
निर्घंटः ॥
वरांगीन पुं अम्लवेतसः वरांग
श्वाम्लवेतसं इति वापाठः इति
रत्नमाला श्रेष्ठांगयुक्ते त्रि ॥
वराटः पुं कपर्दकः इतिराज
निर्घंटः रज्जुः यथा वराटः स्फुला
वराटो ना इति स्त्रीकांडे रत्न
कोषः इत्यमरटीकायांभरतः ।
वराटकः पुं स्त्री कपर्दकः कौड़ि
इति भाषा इत्यमरः तस्य संख्या
भेदेन संज्ञाभेदा यथा ।
वराटकानां दशकद्वयं यत्साका
किणी ताश्च पणश्चतस्रः तेषो
डशा द्रम्म इहावगम्या द्रम्मैस्त
था षोडशभिश्च निष्कः इतिली
ला
वती अपिच ताम्रिकः कार्षि
कःपणाः इतियाज्ञवल्क्यवचनेन
गुंजाः पंचाद्यमाषक स्ते षोडशा
क्षः कर्षोऽस्त्री इत्यमरसिंहोक्ते
नच अशीतिवराटिकापरिमितता
मेषपणस्य संकेतितः सच तावत्सं
ख्यकवराटकैर्लभ्यते इतिवराट
केष्वपि तथा व्यवहारः । प
तन्मूलकं भविष्यमत्स्यतत्त्वे
दृष्टवचनं यथा अशीतिभिर्वराटकैः
पण इत्यभिधीयते तैः षोडशैः
पुराणः स्यात् रजतं सप्तभिस्तु तैः
इतिप्रायश्चित्ततत्त्वं ॥
तेच दक्षिणार्थं विधीयन्ते यथा
इह मत्स्यादियं दाने हस्ते यस्त
स्य दक्षिणाः तस्मात्तेन काकि
नीवा फलं पुष्पमथापि वा प्रद
द्याद्दक्षिणां यत्ने तथा सफ
लो भवेत् इति स्मृतितत्त्वं ॥
वराटकः पुं रज्जुः पद्मबीजं ।
इतिमेदिनी ॥
वराटकरजाः स्री पुं नागकेशरवृ
क्षः इतिशब्दमाला ॥
वराटिका स्त्री कपर्दकः इत्य
मरटीकायांभरतः राजनिर्घंटश्च
तच्छब्दार्थिकाच यथा प्रयागे
मुच्यते येन तेन गंगा वराटिका

इत्यइदः
वराणः पुं इंद्रः इति त्रिकांड
शेषः वरुणवृक्षः इतिशब्दर
त्नावली ॥
वराणसी स्त्री काशी यथा का
शीवाराणसी वाराणसी शिवपुरी
वराइति हेमचंद्रः ॥
वरादनं क्ली राजादनं इतिश
वंद्रिका ॥
वराभिधः पुं अम्लवेतसः इति
राजनिर्घंटः श्रेष्ठनामाच ॥
वराम्रः पुं करमर्दः कराम्ल इति
वा पाठः इति रत्नमाला ॥
वरारकः क्ली हीरकं इतिहेम
चंद्रः ॥
वरारोहः पुं हस्त्यारोहः ॥ अ
श्वारोहः इति विश्वः ॥
वरारोहा स्त्री उत्तमा स्त्री । इत्य
मरः कटिः इतिहेमचंद्रः ॥
वरालिका स्त्री दुर्गा इतित्रिकां
शेषः
वराशिः पुं स्थूलवस्त्रं मोटा
कापड़ इति भाषा तत्पर्यायः
स्थूलशाटकः २ इत्यमरः वरासिः
३ स्थूलशाटके ४ स्थूलशाटिका
५ इतितट्टीकायां भरतः ॥
स्थूलपट्टाकः ६ इतिशब्दरत्नाव
ली
वरासि ७ स्त्रीवदिति जटाधरः
वरासनं क्ली जवापुष्पं इतिश
ब्दमाला उत्तमासनेच ॥
वरासनः पुं षिड्गः द्वारपालः
इति विश्वः ॥
वरासिः पुं स्थूलशाटकः खड्गप
दः इतिधरणिः ॥
वरासी स्त्री स्नानवासः इतिश
ब्दमाला ॥
वराहः पुं पशुविशेषः वराह
इति भाषा तत्पर्यायः शूकरः २
घृष्टिः ३ कोलः ४ पोत्री ५ ।
किरिः ६ किटिः ७ दंष्ट्री ८ घो
णी ९ स्तब्धरोमा १० क्रोडः ११ भू
दारः १२ इत्यमरः किरः १३ मुस्तादः
१४ मुखलांगलः १५ इतिजटाध
रः स्थूलनासिकः १६ दंतायुधः १७
बक्रवक्त्रः १८ दीर्घतरः १९ आख
निकः २० भूक्षित् २१ बहुसूः २२
इतिशब्दरत्नावली अस्यामांस
स्य गुणाः गुरुत्वं वातघ्नत्वं
बलवर्द्धनत्वंच इतिराजवल्लभः
वहुमूत्रत्वं विरूक्षत्वंच इति
नैव पाठान्तरं अत्यन्तमुकरहत्ये
दृष्टं तन्मांसं दिशते न दे
वं ॥ यथा । नाभक्षयेत
वेदार्थं भक्षयेत महिषी

दीर्घं वर्जयेत् । पंचनखं मत्स्यं व
राहमांसानि चेति इत्याह्निकत
त्त्वधृतविष्णुसूत्रं ॥ वराहमां
सं भुक्त्वा विष्णुस्नानादि निषेधो य
था वराह उवाच भुक्त्वा वाराह
मांसं तु यो वै मामुपसर्पति पतने
तस्य वक्ष्यामि यथा भवति सुन्दरि
वाराहो दशवर्षाणि भूत्वा तु चर
ते वने व्याधो भूत्वा महाभागे
समाः सप्त च सप्तभिः कृमिर्भूत्वा
समाः सप्त तिष्ठते तस्य कुकुले
अथोहे मूषिको भूत्वा वर्षाणि
चतुर्दश एकोनविंशवर्षाणि काया
तथानश्च जायेत शल्लक स्त्वष्टवर्षा
णि जायते भवने वकः व्याघ्र स्त्रिंश
तिवर्षाणि जायते पिपीलाशनः
पयसंसारितो गत्वा वाराहामिष
भक्षकः जायते विपुले सिद्धे ऊ
ले भागवतस्य या । हृषीकेशाय व
चः कृत्वा सर्वकर्माणि लक्षणा शि
रसा चाञ्जलिं कृत्वा वाक्यमेतदु
वाचह एतत्कोपरमं गुह्यं मद्भ
क्तसुखावहं वाराहमांसभक्षणात्
येन मुच्यन्ति किल्बिषात् वारा
हउवाच भवेति सात्वता येनति
र्यकं चावसाणस्य गोमयेन दि
नं पंचकमाहारेण सप्त वै पानीयं
त

ततो भूत्वा तिष्ठेत् सप्तदिनं ततः
अक्षार लवणं सप्त सक्तुभिश्च तथा
त्रयः तिलभक्ता दिनान्सप्त सप्त
पापाणाम्भक्षकः तपो भुक्त्वा दिनं
सप्त कारयेच्छुद्धिमात्मनः शान्त
दान्त परः कृत्वा अहंकारविवर्जि
तः दिनान्येकोनपंचाशत्त्वेतत्कृ
तनिश्चयः शक्रकः सर्वपापेभ्यश्च
संतो विगतज्वरः । कृत्वा तु
मम कर्माणि मम लोकाय गच्छे
इति वाराहमांसभक्षणप्रायश्चि
त्तं इति वाराहपुराणं ॥
वनवराहमांसस्याहारो विहितं य
था अग्रनीतानुहत्तौ हारीतः ।
महारण्यवासिनश्च वराहो लभ्ये
ति एवंच विवदन्ते श्राद्धमप्
करोत्येति वशिष्ठात्कं सेतुम्भेन
याय वस्थितं कल्पतरुकृत आह्नेति
युक्तानि युक्ततयेति दिल्पास
कस्य सर्वथा निषेधः यथा वाराहे
भगवद्वाक्यं भुक्त्वा वराहमांसं तु
यस्तु मामुपसर्पति दशवेदशवर्षा
णि भूत्वा वै चरति वने तुत्पाका
दर्शीत्वं याज्ञवल्क्यः । दग्धुपा
केन वै मासं पायसेन तु वत्सरं
मात्स्यहारिणकौरभ्र शाकुनि
छाग पार्षतैः ऐण रौरव-

वाराहशास्त्रे मांसे यथाक्रमं मा
स हृद्याभिवर्धयन्ति दत्तेनेह पि
तामहाः इति श्राद्धतत्त्वं ॥
विष्णोरवतारविशेषः यथा स्वा
म्भुव उवाच कुत्र प्रजाः स्थास्यन्ति पृ
थिवी तावत्सलयार्णवे मग्ना तस्या
उद्धरणे यत्नं कुरु इति श्रुत्वा ब्र
ह्मा भगवन्तं ध्यानवान् ध्यायतस्त
स्य नासाविवरात् अंगुष्ठप्रमाणो व
राहपोतो निर्गात् सच आका
शस्थः सन् क्षणमात्रेण पर्वतोपमो
बभूव तं विस्मितं मत्वा ब्रह्मा तुष्टा
वसच तेन स्तुतः प्रलयार्णवज
लमध्ये प्रविश्य दन्ताग्रेण पृथ्वीमुद्
त विजधार एकान्ता संस्था अंत
र्हितो बभूव ततः पृथिव्या राज्ञा स्वा
यंभुवमनु रासीत् इति श्रीभागवत
मतं तदवतारकार्ये क हिरण्याक्षव
धो यथा वराहपर्वतो नाम यः
पूर्व हरिनिर्मितः स एव भूतो
भगवानाजगामामुरान्तिके ततस्त
द प्रतीकाशो महाकायो व्वसमन्
तमं सरस्रावं ततस्तकं स्वर्णवक्षि
हिमशुभ्र यो वेदः स्त्रेहाणाक्षत
नो भाविनामपि विष्णुर्योगेश
विष्णु यो यज्ञो यत्तकर्मणा ।
विष्णु यस्य प्रसादेन स्वनस्थादिवो

कसः प्राग्मे महर्षिभि देवमाख्र
वेति सयाऊत ततो दैत्यइवकर
पुराणे शंख मत्तमं वकोणाद
धौसेन विक्षिपन् दैत्यजीविते ॥
ततः संरक्तनयनो हिरण्याक्षो म
हासुरः कोऽयमिति वदन् घोणा
रायण मदैत्तन वाराहरूपिणं दे
वं स्थितं पुरुषविग्रहं । शंख
चक्रोद्यतकरं देवानामतिनाशनं
वराहं शंख चक्राभ्यां ताभ्याम
सुरसूदनः सूर्याचन्द्रमसोमध्ये
पौर्णमास्यामिवाम्बुदः ततो हि
रण्याक्षमुख्याश्च सर्वे समाद्रवन् दै
त्यगणाः हरेषं निहन्तुकामाः स
हसा वराहं महीन शक्ता तु न
मृगेन्द्रपाः ते वध्यमानोऽभिघायेन
शस्त्रैः दैत्यास्त्वे दीनक्रोधवेक्ष्य ।
नाभी चचाल सहस्रदंष्ट्रो वै मेघैः
तहला इव मंदराद्रिः दैत्य स्त
तोऽसौ स्तवराह माहवे निपातया
मास रुषा ज्वलन्ती शक्तिं यथा
दिव्यायुधमास्य अंजे प्रवर्षमानोऽपि
गिरिंश्मेघः स हन्यमानो गद्या
प्रत्ययः प्रोवाच दैत्य स्तवराहमू
र्तिः प्रजापतेः सत्यमिमं निहत्यप्र
सेयुक्त सन्ति यथा सोऽदः बल
समासाद्य परे रजेन्द्र विनाशयि

मद्र मेव प्राप्तो दैत्यं त्वयासौ
क्रमतो ह्रिदेवान् हृतस्वकीयास्तु
नवोपपन्नान् संस्थापयिष्यामि न
संशयोऽत्र दैत्येन्द्रदर्पः क्रान्तमत्स
मीपे एवं ब्रुवति वाक्यं त
स्मो वै [illegible] स्पानवत् सर्वाङ्गमात
सुघस्य सर्वमहत्सं रता दानवा
स्तापि समरे मय तार पुरोगमाः
उद्यतायुध निस्त्रिंशाः सर्वे तं स
माद्रवन् स ताड्यमानोपि तैस्तै
दैत्यैः समायुधोद्यतैः न चचाल
वराहस्तु मैनाक इव पर्वतः ॥
क्रोधसंरक्तनयनः शंखचक्रधरो
हरिः वावर्द्धत स वेगेन आप्लुवन्स
र्वतो दिशो ते तथा वासवेंद्रणा वर्द्ध
मानं नभस्तले क्रमशः सहसा पर्व
तस्तुल्य मधुसूदनं दीप्ताग्निसह
शं तीव्रं दर्शनीय सवर्णानं स्तव
[illegible] पर्यतं चतुर्वाहं भयानकं मे
[illegible] कृपैः सिक्तं दानव
[illegible] अहितीयं प्रत्यक्ष सुर
[illegible] स्थान मानानिता
[illegible] कामगं कामरूपिणं चक्रमुद्य
म समरे [illegible] स्वेन तेजसा ।
चिच्छेद [illegible] चक्रेण छिन्नता
[illegible] तथा स छिन्नवाहु विशि
तान [illegible] कबंधवत्स्थितः

सो [illegible] विशाखइव पादपः ततः
स्थितस्यैव शिरस्तस्य भूमावपात
यत हिरण्मयं रुक्मचित्रं मेरोः
शृंग मिवोन्नतं हिरण्याक्षे हते
दैत्या येशेषा ये दानवाः सर्वेत
स भयाकुलास्ते [illegible] दिशोद
शा इति वक्ष्यमाणं ॥ अथ
वराहावतारकारणं सम्भवपि म
हादेवकर्तृकतच्छरीरनाशश्च त्रै
लोक्य मखिलं दर्पं यदा कान्ता
ग्नितदा अनंतः पृथिवीं त्यक्त्वा विशे[illegible] गतः
तु पृथिवी तलमभ्याद् योगता । त
तो वराहरूपेण निमग्ना पृथिवीं ज
ले मग्नां समुद्धारार्थमपतत्स
लिलोपरि वराहोपि स्वयं गत्वा
लोकालोकाकृयं गिरिं ॥ वारा
ह्या सहं रेमे स पृथिव्या चारुरूप
या स तया रममाणस्तु स चिरं पर्व
तोत्तमे नावाप तोषं लोकेशः पो
त्री परम कामुकः पृथिव्याः पोत्रि
रूपाया रमयन्त्या स्ततः सुताः
त्रयो जाता हिरण्याक्षा स्तेषां ना
मानि वै शृणु वृत्तः कनको घो
रः सर्व एव महाबला स तैः पुत्रैः
परिवृतो वाराही भार्यया स्वया
रममाणा स्तदा कायन्त्यागं नैवागत

4293

हिया इव स्तनस्य शिशुभिः क्रीड
द्भिः पोत्रिभिस्तदा जगंति तत्र
भग्नानि नदीः कल्पतरुस्तथा ततो
देवगणाः सर्वे सहिता देवयोनि
भिः शक्रेण सहिता मंत्रं चक्रुः स
मक्रगहितं ततो निश्चितास्ते सर्वे
शक्राद्या मुनिभिः सह ॥
श्रवणं शरणं जग्मु नारायणम
जं विभुं तं समासाद्य गोविंदं वा
सुदेवं जगत्पतिं प्रणम्य सर्वेवि
दशा स्तुष्टुवु गरुडध्वजं देवाऊचुः
॥ नमस्ते देव देवेश जगत्का
रणकारण कालस्वरूपिन्भगवन्स
र्वात पुरुषात्मक ॥ इति स्तुतो
देवदेवो भूत भावनभावनः सेंद्रै
र्देवगणैः रुचे तान्सर्वान्मेघनिस्वनः
॥ श्रीभगवानुवाच यदर्थं मा
मता यूयं यदो भय मुपस्थितं य
त्र यद्वा मया कार्यं तद्देवा स्तु[illegible]
मुच्यतां देवाऊचुः पीड्यते वसुधा
निसं क्रीडया यत्त पोत्रिणा लोका
श्च सर्वे संत्रस्ता नाश[illegible]
इति तेषां निगदतां श्रुत्वा वाक्यं ज
नार्दनः उवाच शंकरं देवं ब्रह्मा
णं च विशेषतः यत्कृते देवताः
सर्वाः प्रजाश्च सकलाः इमाः प्राप्नु
वंति महद्दुःखं पीड्यते सकलं ज

गत वाराहं तदहं कायं त्यक्तुमि
च्छामि शंकर निदेश शक्तं तत्प
कं स्वेच्छया नहि शक्यते ॥ त्व
त्याजयस्व तत्कायं यज्ञात्मा शंक
र शंभुना त्वमाप्यायस्व तेजोभिर्ब्रह्मन्
स्मरहर मृडः आप्यायतं तदोद
वाः शंकरो हन्तुं पोत्रिणं रज
स्वलायाः संसर्गात्त्रिप्राणोमारणात्त
था कायः पापकरो भूत स्तत्र
कं भुज्यते पुनः ॥ प्रायश्चित्तेन तु
पैतैर्यः प्रायश्चित्त मरं ततः
करिष्यामि तदर्थं मे तत्प्रयत्नेन पा
त्यतं प्रजापाल्या मम सदा यादि
सीदति नित्यशः मत्कृते प्रस
हं तस्मात्त्यजे कायं प्रजाकृते ।
श्रीमार्कंडेय उवाच इत्युक्तो वा
सुदेवेन तदा च ब्रह्मशंकरौ तथा
यथोक्तं तत्कार्य मिति गोविंद
मूचतुः वासुदेवोः पितामहम्वि
रूप्य विरंचा स्तदा वाराहं तेज
सा [illegible] स्वयं [illegible] तवत्
॥ प्राणैः प्राणे यदा तेज आह्व
तेन माधवः तदा देहस्तु वा
राह सत्वहीनं [illegible] तदा भ्या
त्रिदशाः सर्वे महादेव मुमापतिं ।
अनुजग्मु स्तथा तेन आभात्व स
र्वा पाने ततः सर्वे देवगणाः सं

स्वं तेजो वृषध्वजे ग्रादये तेन
वलवान् सोतीव समजायत ततः
सरभरूपी सततत्तगाद्गिरिशोऽभ
वत् ऊर्द्धाधो भावत ग्राश्टपाद
पृष्ठः सभैरवः द्विलक्षयोजनो ।
च्छायः साईलक्षैकविस्तृतः ऊ

[margin:] द्विवराहकायलक्षतयो ततविस्तृतः

र्द्धलक्षाईविस्तृतःपार्श्वे वर्द्धमान
स्तदा भवत् तमायांतं ततोदृष्ट्वा
क्रोधाद्धावंत मंजसा सुवृत्रःक
नकोधोर ग्रासेदः क्रोधमूर्छिताः
उद्धिक्षिपु स्तं युगपत्तोद्यचालैर्म
हावलाः तत स्कंदमहासेनासरतः
कंठ मथ्यतः । भित्वा वपुर्व
राहस्य पातयामास तत्तले ॥
तेपात्तविषा प्रथमं सकूलं कनकं
तया चोरंच कंठदेशेषु भित्वा
भित्वा जघानद्र त्यकृशाणास्त
ते सर्वे पेत तोषे महार्णवे
जलशायं चितन्वानः काला
नलसमर्विषः पतितेषु वराहेषु
ब्रह्माविसर्ज्जनतया स्वस्थार्थं चि
न्तयामासः पुनरेव समागताः
इतिकालिकापुराणेत्र्याद्यायेविंशि
ततमविंशाध्यायांतकलितः ॥
वराहः पुं गिरिः मानभेदः ॥
पर्वतभेदः मुस्ता इतिमेदिनी ॥

शिशुमारः वाराहीकंदः ।
इति राजनिर्घंटः शूद्रवाही
पंतर्गत तद्गही पविशेषः यथा
गंधर्वोवरुणः सोमो वराहः तेक
पवच ऊमदश्च कलेरुद्रा नागो
भद्रारकलाण चंद्रेन्दुमलराशः
खवगांगक गर्भंसिमान् लाशक
प्लकुमारी च तद्वीपादशाष्टभिः
इतिशब्दमाला ॥
वराहकंदः पुं वाराही इति रा
जनिर्घंटः ॥
वराहकांता स्त्री वाराही कृतः
इति शब्दरत्नावली ॥
वराहकाली न पुं सूर्यमणिपुष्प
वृक्षः तत्पर्यायः सूर्यावर्त्तः २
इतिहासवली ॥
वराहक्रांता स्त्री चुपविशेषः
इतिशब्दमाला तत्पर्यायः ॥
लज्जालुः २ समंगा ३ लजकारिका
४ वराहनामा ५ वदरा ६ शूकरी
भिक्षोपिका ८ नमस्कारी ९ गंड
काली १० खदिरी ११ इति रत्नमा
ला लज्जालुका १२ अंजलिका
रिका १३ कृतांजलिः १४ गंड
कारी १५ समीच्छदा १६ इतिश
ब्दांतरं वाराही चामापाल इति
ख्याते इति सुभूतिः इत्यमरः ॥

4295

टीकायां भरतः ॥
वराहस्तन्य न पुं वाराहीकंदः ।
इतिशब्दमाला
वराहिका स्त्री कपिकच्छुः इ
तिराजनिर्घंटः ॥
वराही स्त्री भद्रमुस्ता शूकर
कंदः इतिराजनिर्घंटः ॥
~~वराही स्त्री भद्रमुस्ता शूकरक~~
वसितः त्रि उपासितः इत्यमरः ।
वरिवस्या स्त्री शुश्रूषा इत्यम
रः वरिवसितः त्रि उपासितः
इत्यमरः ॥
वरिषी स्त्री वडिशी इतिशब्द
रत्नावली ॥
वरिषं क्ली वत्सरः इतिशब्द
रत्नावली ॥
वरिषाः स्त्रीभूम्नि वर्षा इतिभरत
द्विरूपकोषः ॥
वरिषाप्रियः पुं चातकपक्षी ।
इतिशब्दरत्नावली ॥
वरिष्ठं स्त्री ताम्रे इत्यमरः ।
मरिचे इति मेदिनी ॥
वरिष्ठः त्रि अयमनयोरतिशयेन
उरुः इति व्याकरणं वरतमः
उरुतमः इतिमेदिनी वृक्षः इ
मनमः वरिष्ठः पुं तित्तिरिपक्षी ।

मेदिनी नारंगवृक्षः इति राज
निर्घंटः ॥
वरिष्ठा स्त्री आदित्यभक्ता इति
राजनिर्घंटः ॥
वरी स्त्री शतावरी इत्यमरः
सूर्यपत्नी इति त्रिकांडशेषः
वरीयान् स त्रि श्रेष्ठः वरिष्ठः
ग्रतियुवा इति मेदिनी
वरीयान् पुं विष्कंभादिसप्तविंश
तियोगान्तर्गताष्टादशयोगः तत्र
जातफलं दाता दयालुःसततो
त्सवेशः सत्कर्मकर्त्ता मधुरस्व
भावः नरो वलीयान्यवजन्मना
प्रयोगो वरीयान्यदि जन्मका
ले इतिकोष्ठीप्रदीपः ॥
वलीवर्दः पुं वलीवर्दः इत्यम
रटीकायां रमानाथः ॥
वरीषुः पुं कामः इतिकांडशे
षः ॥
वरुडः पुं म्लेच्छजातिविशेषः ।
यथा पुलिन्दा नाहला निष्टाः
शवरावरुडा भटाः माला भिल्लाः
किरातास्च सर्वेपि म्लेच्छजातयः
इति हेमचंद्रः वरुडः पुं अंत्यजजा
तिविशेषः यथा रजक श्चर्मका
रश्च नटो वरुड एवच कैवर्त्तमेद

शिलाश्मसम्भेते चोपजाः स्मृताः
घोत्रीमुमनादौ शोषो यथा प
तेषांत त्रियो गत्वा शुक्राचम
तिरश्च पतत्पत्रात्तो विप्रो
ज्ञानात्साम्पंत गच्छति इतिमा
यश्चितत्तत्त्वधृत यमदूने अ
स्योत्पत्ति यथा केवर्तस्य चक्र।
मायां पैण्डिकादेव सौचिकः सौ
चिकात् पैण्डिकाज्जातो वरोव
वरुड पवच इति पराशरप।
द्धतिः ॥

वरुणः पुं देवताविशेषः स च
कश्यपस्य अदितिनाम्नि पत्न्यां जा
तः तस्य चर्षणी पत्नी भृगु।
वाल्मीकी पुत्रौ जातौ इति।
श्रीभागवतमतं स च जलाधिप
तिः पश्चिमदिक्पालश्च तस्य
पर्यायः प्रचेताः २ पाशी ३
यादसांपतिः ४ अप्पतिः ५ इ
त्यमरः यादःपतिः ६ अपांपतिः
७ इति तट्टीकायां भरतः
कुम्भकः ८ मेघनादः ९ जलेश्व
रः १० पश्चिमेशः ११ दैत्यदेवः १२ जी
वनावासः १३ जलंधरः १४ इति शब्द
रत्नावली नारितिमम्ः १५ कुं...
१६ रामः १७ ...पाशः १८ इतिजल
धः जलाधोपात्ततो

सौ ग्रस्तस्य जाविषि यथा । स्व
प्रीपपंचरात्रे अथ शाप्पासतः
कुर्यात्तस्य रत्नादि निर्मितं हि
भुजं हंसपृष्ठस्थं दक्षिणेनाभय
प्रदं वामेन नागपाशंतं धार
यंतं स्वभोगिनं सलिलं वासमा
भोगं कारयेद्यादसांपतिं ॥
वामेन कारयेद्वृद्धिं दक्षिणे पुच्छ
कुम्भं नागैर्नदीभिर्यादोभिः स
मुद्रैः परिवारितं कृत्वैवं वरुणं
देवं प्रतिष्ठाविधिनार्चयेत् पुष्क
ते ऋषिरासीन्महाभाग ऋतवागि
ति विश्रुतः तस्यापुत्रस्य पुत्रोऽ
भूत्रेवत्यन्ते महात्मनः तस्य
विधिवच्चक्रे जातकर्मादिकाः क्रि
याः तथोपनयनादीश्च सचाशी
लोऽभवन्मुने यतः प्रभृति जा
तोऽसौ ततः प्रभृतिसोऽप्यृषिः दीर्घ
रोग परामर्श मवाप मुनिपुंगवः
माता चास्य परा मार्त्ति कुष्ठरो
गादि पीडिता जगाम सपिताख्य
सचिंतयामास दुःखितः किमेत
दितिसोऽप्यस्य पुत्रोऽत्यन्तसद्धर्म
तिः जग्राह भार्य्यां मन्यस्यमुनि
पुत्रस्य मेदधीः ततो विषण्णो
मनसा ऋतवागिदमुक्तवान् अ
पुत्रता मनुष्याणां श्रेयसे न कुपु

त्रता कुपुत्रो हृदयायासं सर्व
दाकुरुते पितुः मातुश्च स्वर्गसंस्थां
श्च स्वपितॄन्पातयत्ययः सुहृदां
नोपकाराय पितृणां नापितृप्त
ये पित्रोर्दुःखाय धिक्जन्म तस्यदु
ष्कृतकर्मणः धन्यास्ते तनया
षां सर्वलोकाभिसम्मताः परोप
कारिणः शान्ताः साधुकर्मण्यनुव्र
ताः अनिर्वृतं तथा मूढं परलो
क पराङ्मुखं नरकाय नसद्
से कुपुत्रालम्बि यन्मनः करोति
सुहृदां दैन्य महितानां तथामु
दं अकालेच जरां पित्रोः कुपुत्रः
कुरुते हि वै मार्कण्डेयवाच एवं
सोऽत्यन्त दुष्टस्य पुत्रस्यच रि
तै र्मुनिः दह्यमानमनावृत्ति र्वृद्धं
गर्गमपृच्छत ऋषिरुवाच सुव
तेन पुरा वेदा गृहीता विधिव
न्मया समाप्य वेदान् विधिवत्कृ
तो दारपरिग्रहः सदारेण यथा
कार्य्याः श्रौताः स्मार्त्ता स्वधाक्रि
याः नानुष्ठिताः कृता काचिद्यावि
द्य महामुने गर्भाधान विधाने
न न काममुत्पत्ता पुत्रार्थं जनि
तश्चायं पुत्रान्मो विम्पता मुनेऽसौ
यं किमात्मदोषेण मम दोषेणवामु
ने अस्मद्दुःखवहो जातो दोः ।

शील्याहंदुःशोकदः गर्गउवाच
रेवत्यन्तेमुनिश्रेष्ठ जातोऽयंतन
यस्तव तेनदुःखाय तेकालेदु
ष्टेयस्मादजायत नतेऽपचारो नैः
वास्य मातुर्नापिकुलस्यते तस्य
दौःशील्यहेतुत्वं रेवत्यन्तमुपाग
तं ऋतवागुवाच यस्मान्ममैक
पुत्रस्य रेवत्यन्तसमुद्भवं । दौ
शील्य मेतत्स्मात्तस्मात्पततामाशु
रेवती मार्कंडेयउवाच । त
नैवं व्याहृते शापे रेवत्यृक्षंप
पात ह पश्यतः सर्वलोकस्य
विस्मयाविष्टचेतसः रेवत्यृक्षंच
पतितं कुमुदाद्रौसमन्ततः भास
यामास सहसा वनकंदरनिर्झ
रान् कुमुदाद्रिश्च तत्पातात्ख्याता
रैवतकोऽभवत् । अतीवरम्यः
सर्वस्यां पृथिव्यां पृथिवीधरः
तस्यर्क्षस्य तथाकांति र्जाता पंक
जिनीसरः ततो जज्ञे तदाकन्या
रूपेणातीवशोभना रेवतीकां
तिसंभूतां तां दृष्ट्वा प्रमुचो मुनिः
तस्या नाम चकारेत्थं रेवतीति
हि भागुरे पोषयामास चैवेनां
स्वाश्रमाभ्यास संभवां प्रमुचः
स महाभाग स्तस्मिन्नेव महाचले
तान्तु यौवनिनीं दृष्ट्वा कन्यकांरूप
शालिनीं समुनि श्चिन्तयामास
कोऽस्या भर्ता भवेदिति एवं चिन्त
यतः कालो जगाम सुमहात्मनः
नचाससाद सदृशं वरं तस्यामरा
मुनिः ततस्तस्या वरं प्रष्टुमग्नि
स प्रमुचो मुनिः विवेश वह्नि
शालांवै पृष्ट स्तं प्राह हव्यभुक्
महाबलो महावीर्यः प्रियवाक्
धर्मवत्सलः दुर्दमो नाम भवि
ताभर्ताह्यस्यामही पतिः मार्कंडे
यउवाच अनन्तरंच मृगयाप्रसं
गेनागतो मुने तस्याश्रमपदंधी
मान्दुर्दमः सनराधिपः प्रियव्र
तान्वयभवो महाबलपराक्रमः
पुत्रो विक्रमशीलस्य कालिन्दी
जठरोद्भवः सप्रविश्याश्रमपदं
तान्तन्वीं जगतीपतिः अपश्य
मान स्तमृषिं प्रियेत्यामंत्र्य पृष्ट
वान् राजोवाच क्वगतो भगवा
नस्मादाश्रमान्मुनिपुंगवः तंप्रण
न्तुमिहेच्छामि तत्वं प्रब्रूहिशोभने
मार्कंडेय उवाच अग्निशालां
गतो विप्र स्तच्छ्रुत्वा तस्य भाषि
तं प्रियेत्यामंत्रणांचैव निष्क्रा
न्तस्त्वरान्वितः सददर्श महात्मा
नं राजानं दुर्दमं मुनिः नरेंद्र
चिन्हसहितं प्रश्रयावनतंपुरःतास्मिं

4061

दृष्टेततः शिष्य मुवाचसत्वरो
तस्मै गौतमानीय तांशीघ्रमर्घो
ऽस्य जगतीपतेः एष तावदयं
भूप श्चिरकालादुपागतः नामा
ताच विशेषेण योग्योऽर्घोऽस्यस
त्तम श्रीमार्कंडेयउवाच ततःस
चिन्तयामास राजा नामात्स्कार
णं विवेद नच तन्मौनी जगृहे
चैवतन्नृपः तमासनगतं विप्रगृ
हीतार्घं महामुनिः स्वस्त्याहृता
नेंद्र मपिते कुशलं पुरे कोषे
बलेऽथमित्रेषु भृत्यामात्येषुचे।
श्वर तथात्मनि महाबाहो यत्र
सर्वप्रतिष्ठितं पत्नीचतेकुशलि
नी यत्रत्रवात्र तिष्ठति पृच्छाम्य
स्यास्ततो नाहं याःकुलिन्योऽपरास्त
व राजोवाच त्वत्प्रसादात्कुशलं
नकचिन्मुनिसत्तम जातकौतूहल
स्त्वास्मि ममभार्यात्रका मुने ऋ
षिरुवाच रेवतीत्वमहाभागा त्रैलो
क्ये सापि सुंदरी । तवभा।
र्यावरारोहा मानवेंद्र नवेत्सिकिं
राजोवाच सुभद्रा शांततनया
कावेरीतनयां विभो सूरात्मजां
सुजातांच कदम्बांच वरूथजां
विपाशांनंदिनीं चैव वेद्मि भार्यां
गृहे ह्रियाः तिष्ठन्ति मे नभगवन् ॥
रेवतीं वेद्मिकात्वियं ऋषिरुवा
च प्रियेति साम्प्रतं येयं त्वयोक्ता
वरवर्णिनी किं विस्मृतं तेभूपा
लश्लाघ्यैषागृहिणी तव राजोवाच
सत्यमुक्तं मया किंतु भावोदुष्टो
नमेमुने नात्र कोपं भवान्कर्तुं
महत्यस्मास्वयाचितः ऋषिरुवाच
सत्यं ब्रवीषि भूपाल नभावस्तव
दूषितः व्याजहार भवानेव वह्नि
नान्नोदितः मया पृष्टोहुतवहः
कोस्या भर्तेति पार्थिव भविता
तेन चाप्युक्तो भवानेवाद्यचागतः
तद्गृह्यतां मया दत्ता भवतापि कन्या
य प्रियेतामंत्रिताचेयं विचारं कुरु
षे कथं श्रीमार्कंडेयउवाच तत
स्त्रसोऽभवन्मौनी तेनोक्तः पृथि
वीपतिः ऋषि स्त्वयोद्यतः कर्तुं त
स्यावैवाहिकं विधिं समुद्यतंच पि
तरं विवाहाय महामुने उवाचक
न्यासा किंचित्प्रश्रयावनतानना य
दि मप्रीति मांस्तात प्रसादं कर्तुमिच्छ
सि रेवत्यृक्षे विवाहं मेतत्कुरुष्व
प्रसादितः ऋषिरुवाच रेवत्यृ
क्षं न वै भद्रे चंद्रयोगि दिविस्थि
तं अन्यानि सन्ति ऋक्षाणि
सुभ्रुवैवाहिकानिते कन्योवाच
ताततेन विना॰

कालो विकलः प्रतिभाति मे विवाहो विकले काले म ह्रियायाः कथं भवेत् ऋषिरुवाच ऋतवागिति विख्यात स्तपस्वी रेवतीं प्रति चकार कोपं क्रोधे न तेनर्क्षं तन्निपातितं मयाप्यस्मै प्रतिज्ञाता भार्य्येति मदिरेक्षणे नचेच्छसि विवाहं त्वं संकटं नः समागतं कन्योवाच ऋतवाक् समुनि स्तात किं मेकस्तरांस्त पः नत्वया समता तेन ब्रह्मबंधोः सुतास्मि किं ऋषिरुवाच ब्रह्मबंधोः सुता नत्वं बाले नैवातपस्विनः सुतात्वं मम यो देवान्कर्त्तुमन्यान्समुत्सहे कन्योवाच तपस्वी यदि मे तात स्तत्किमृक्ष मिदं दिवि समारोप्य विवाहो मेनात्र हे क्रियते पितः ऋषिरुवाच एवं भवतु भद्रं ते भद्रे प्रीतिमती भव आरोपयामीन्दुमार्गे रेवत्यं कृते तव श्रीमार्कण्डेय उवाच ततस्तपःप्रभावेन रेवत्यृक्षं महामुनिः यथा पूर्वं तथा चक्रे सोम योगे द्विजोत्तमः विवाहश्चैव दुहितु र्विधिवन्मन्त्रयोगजं निष्पाद्य प्रीतिमान्भूपो जामातर मथाब्रवीत् ऋषिरुवाच गेहादि कं ते भूपाल कथ्यतां किं ददामहे दुर्लभ मपि दास्यामि माप्रतिहतं तपः राजोवाच मनोः स्वायंभुवस्याहं वंशजः सन्ततेो मुने मन्वन्तराधिपं पुत्रं त्वत्प्रसादाद्वृणोम्यहं मुनिरुवाच भविष्यत्येष ते कामो मनुस्त्वत्तनयो महान् सकलां भोक्ष्यते भूमिं धर्म्मवित् भविष्यति श्रीमार्कण्डेय उवाच तामादाय ततो भूपः स्वदेव नगरं ययौ तस्यां चाजायत सुतो रेवत्यां रैवतो मनुः समेतः सकलै र्धर्म्मै र्मानवै रपराजितः विज्ञाता खिल शास्त्रार्थो वेद विद्यार्थ शास्त्रवित् इतिमार्कण्डेयपुराणे रैवतमन्वन्तरं समाप्तं ॥

रेवतीभवः पुं शनैश्चरः इति हेमचन्द्रः

रेवतीरमनः पुं वलदेवः इत्यमरः ॥

रेवतीशः पुं वलरामः इति हेमचंद्रः

रेवन्तः पुं सूर्य्यपुत्रविशेषः स च गुह्यकाधिपतिः तस्योत्पत्ति र्यथा ततोऽसौ योग मास्थाय स्वां भार्य्यां वडवां रविः ददर्श

नियमस्था स्ता मश्वरूपमथार्क रोत् मैथुनायोपचक्राम सूर्य्यो । सा च परान्वितः नेच्छंती तेन सा योगं परपुंसोऽभिशंकया संग्रहात् संमुखीतेनो शुक्रं नासिकया रवेः देवो च ततः प्रजायेता मश्विनो भिषजां वरौ नासत्यौ दौ तृतीयश्च रेवन्तोऽश्ववाहकः इति वह्निपुराणं अपिच ततोऽश्वरूपधृक्भानु स्तत्रागमत्कुरून् ददृशे तत्र संज्ञान्त वडवारूपधारिणीं सा च दृष्ट्वा तमायान्तं परपुंसोऽभिशंकया जगाम संमुखं तस्य पृष्ठ रक्षण तत्परा ततश्च नासिका योगे तयो स्तत्र समेतयोः नासत्य दस्रौ तनयाव श्ववक्त्राद्विनिर्गतौ रेतसोऽन्ते च रेवन्तः खड्गी धन्वी तनुत्रधृक् अश्वारूढः समुत्पन्नो वाण तूणसमन्वितः ततःस्वं रूपममलं दर्शयामास भानुमान् तस्यै साच समालोक्य स्वरूपंमुदमाददे स्वरूपधारिणीं चेमामानिनाय निजाश्रमं संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ततः पूर्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः द्वितीयश्च यमः शापाद्धर्म्मदृष्टिरभूत्सुतः । कृमयो मांसमादाय पादतस्ते महीतलं पतिष्यन्तीति शापान्तं तस्य चक्रे पितास्वयं धर्म्मदृष्टि र्यतश्चासौ समो मित्रे तथाऽरौ ततोनियोगं तंयाम्ये चकार तिमिरापहः यमुना च नदी जज्ञे कलिंदान्तरवाहिनी अश्विनौ देवभिषजौ कृतौ पित्रा महात्मना गुह्यकाधिपतित्वे च रेवन्तो विनियोजितः इतिमार्कण्डेयपुराणोक्तवैवस्वतमन्वन्तरे ॥ समस्तनिकटेष्वनीराजनविधौ रेवन्तस्यार्जकः स्तस्यैक पूजाविधि र्यथा सप्तमेऽह्नि वरेवन्तं पूजयेत्तोरणान्तरे सूर्य्यपुत्रं महावाहुं द्विभुजं कवचोज्वलं ज्वलन्तं शुक्लवर्णेन केशान्वितमश्वासमारूढं कंशा वामकरे विभ्रद्दक्षिणे तु करे पुनः एकरूमस्य महाश्वेतं सितसैन्धव संस्थितं एवंविधन्तु रेवन्तं प्रतिमायां घटेऽपिवा सूर्य्यपूजा विधानेन पूजये त्तोरणान्तरे इतिकालिकापुराणे नीराजनविधिः ८८ अध्यायः कोजागरपूर्णिमारात्रौ द्वारोपान्ते तस्य पूजाविधि र्यथा द्वारोपान्ते स्तदीमस्त संपूज्यो हयवाहनः यवाक्षतहुतोपेते स्तंडुलैश्च स·

नर्पितः संहृनितव्यः हर्योडुः
पयसा पायसेनव स्कंदःसभा
र्योरुद्भुतया नंदीश्वराङ्गनि गो
मद्भिः सरभिस्तन्याभ्यागवद्भिर्ङ्
नाशनः उरश्चवद्भिवरुणोगज
वद्धि विनायकः सुन्याःसाम्ये
श्रेवन्तो यथा विभव विस्तरैः
इति तिथ्यादितत्त्वं ।
रेवन्तमनुसूः स्त्री संज्ञा इति
त्रिकांडशेषः ।
रेवा स्त्री नर्मदानदी इत्यमरः
असौ शिवलिङ्गोत्पत्ति यथा।
रेवया चक्रते पूर्वं तपः शिवस्य
तद्दिदं मम त्वत्सदृशः पुत्रोभू
यादिति वियो तथा अहं क
स्यापि न सुतः किंकरिष्यामि
चिन्तयन् रेवायास्तु वरो देयस्तु
वशंपरागलांछन निश्चितैवं त
दाभोक्तं प्रसन्नेनान्तरात्मना लिङ्ग
रूपेण ते देवि गजानन पुरः
स्कृतः गर्भे तव वसिष्यामि
पुत्रो भूत्वा शिवप्रिये ममत्वम
ठ्मूर्त्तिःखाता जलमयी शिवा
शिवशक्ति विभेदेन चावामेकत्र
संस्थितौ पवंदत्तवरा रेवामत्ता
त्रिश्च मिहागता रेवाखंडमिति
ख्याते ततः प्रभृति गोपते ।

इति वाराहे सोमेश्वरादिलिंगम
महिमाध्यायः । इतिः । सा
च कामपत्नी नीलीहृतः इति
मेदिनी दुर्गा यथा रेवा त
नर्मदा देवी नदी वा रेवतीमता
अतिखंडन रेथा वा लोके देवी
प्रकीर्त्तिता इतिदेवीपुराणे ४५
अध्यायः
रेष ङ उ· क्रेषायां इतिकवि
कल्पद्रुमः क्रेषा चोटककर्त्तृक
शाद्वः ङ अरिरेषत् उ· रेषते
रिरेष ऽस्यः इतिदुर्गादासः ॥
रै शाद्वे इतिकविकल्पद्रुमः
रेफादिः रायदि इतिदुर्गादा
सः
रैवतः पुं सुवर्णालुक्षुतः शैल
भेदः शंकरः इतिमेदिनी ॥
दैत्यविशेषः इति धरणिः ।
वर्त्तमानकल्पीयः पंचमो मनुः
सत रेवती गर्भे उद्गम राजपुत्रः
अस्मिंमन्वन्तरे विकुंठोऽवतारः
विभुरिंद्रः भूतरयादयो देवाः
हिरण्यरोमादयः सप्तर्षयः इति
विंशाद्य स्तन्मनसुताः इतिश्री
भागवते तद्विवरणं यथा पं
चमस्य मनोस्तह्नरेवतस्यान्तरे
सृणु देववाङ्ः सवाङ्गुपर्णिणः

सोमपो मुनिः हिरण्यरोमास
श्चाश्चः समैते स्पषयः स्मृताः
देवा श्वाभूतरजस स्तथा प्रकृत
यःस्मृताः अरुणा स्तत्त्वदर्शीचवि
तवान्ह्यपःकपिः मुक्को निः
हलका सत्वो निर्मोहोऽथप्र
काशकः धर्मवीर्य्यवलोपेतोर
शैते रैवतात्मजाः भृगुः स
धामा विरजः सहिस्युर्नाद प्रवच
विवस्वानतिनामा च षष्टिसम
र्षयोःपरे इतिमात्स्ये ९ अध्यायः
मार्कंडेयपुराणोक्तरैवतमनुविव
रणान्तु रेवतीशाद्वे दृष्टव्यं ।
रैवतकं स्त्री पारेवतद्रुत्तः इति
राजनिर्घंटः
रैवतकः पुं रैवतपर्वतः । त
त्पर्य्यायः उज्जयन्तः २ इतिहेम
चंद्रः तस्य नामकारणं रेवती
शाद्वे दृष्टव्यं ॥
रैवतिकः त्रि रेवत्याअपत्ये इति
मुग्धबोधव्याकरणं ।
रोकं स्त्री छिद्रं इत्यमरः ।
नौका चलं इतिमेदिनी ।
रोकः पुं क्रयभेदः ॥ दीप्तिः
इतिमेदिनी ॥
रोगः पुं ऊशेषधं इतिमे
दिनी देहभंगकारकः तत्

पर्य्यायः रुक् २ रुजा ३ उपता
पः ४ व्याधिः ५ गदः ६ आमयः
इत्यमरः अपाटः ८ आमः ९
आतंकः १० भयः ११ उपघातः १२
भंगः १३ अर्त्तिः १४ तमोविकारः
१५ ग्लानिः १६ त्तयः १७ अमार्गेरः
१८ स्सम्भत्यः १९ इति राज
निर्घंटः अमः २० इतिजटाधरः
मांद्यं २१ आकल्यं २२ इतिहेम
चंद्रः अथनिदानादि यथा ।
धन्वन्तरिरुवाच सर्वरोगनिदानंव
क्ष्ये सुश्रुत तत्वतः आत्रेयाद्यै
र्मुनिवरै र्यथापूर्वं मुदीरितं रो
गः पाप्मा ज्वरो व्याधि र्विकारो
दुष्ट मामयः यस्मातंकगदाबाधाः
शद्धाः पर्य्यायवाचिनः निदानं
पूर्वरूपाणि रूपाण्युपशय स्तथा
संप्राप्ति श्चेतिविज्ञानंय रोगा ।
णां पंचधा स्मृतं निमित्तहेत्वा
यतन प्रत्ययोत्थानकारणैः नि
दान माङः पर्य्यायैः प्राग्रूपं येन
लक्ष्यते उत्पित्सु रामयोदोष·
विशेषेणानधिष्ठितः । लिङ्ग
मव्यक्त मल्पत्वाद् व्याधीनां तद्यथा
तथं तदेव व्यक्ततां . यातं
रूप मितिभिधीयते संस्थानं
व्यंजनं लिङ्गं लक्षणं चिह्नमाकृतिः

हेत व्याधि विपर्य्यस्तं विपर्य्य
स्तार्थकारिणां औषधान्नविहारा।
णां उपयोगं सुखावहं विद्या
दुपशमं व्याधेः सहिसात्म्यमिति
स्मृतः विपरीतोनुपशयोव्याधि।
सात्म्याभिसंज्ञितः यथा दुष्टेनदो
षेण तथा चात्मविसर्पता निर्वृत्ति
रामयस्यासौ संप्राप्तिर्जाति रागतिः
संख्याविकल्प प्राधान्यबल काल
विशेषतः स भिद्यते यथात्रैव
संख्यान्ताष्टौ ज्वरा इति दोषाणां
समवेतानां विकल्पांशांशकल्प।
ना स्वातंत्र्य पारतंत्राभ्यां व्याधेः
प्राधान्यमादिशेत् हेत्वादि का
त्स्न्यावयवै बेलावल विशेषणं
नक्तं दिनर्त्तु भुक्तांशो व्याधिका
लो यथा मलं इति प्रोक्तो निदा
नार्थःसव्यासेनोपदेक्ष्यते सर्वेषा
मेव रोगाणां निदानं कुपितामला
ः तत्प्रकोपस्य तु प्रोक्तं वि
विधाहितसेवनं अहित सि
विधो योगस्त्रयाणामागदस्य
तः तिक्तोषण कषायाम्लरूक्षाप्र
मितभोजनैः धावनोदीरणा नि
शाजागरात्युच्चभाषणैः क्रियाभि
योगभी शोक चिन्ता व्याया मे
थुनैः ग्रीष्माहोरात्रभुक्तान्तेप्रकुप्य

तिसमीरणः पित्तं कट्वम्लतीक्ष्णो
ष्णपटु क्रोध विदाहिभिः शरन्म
ध्याह्नरात्र्यर्द्ध विदाहसमयेषु च
स्वाद्वम्ललवण स्निग्ध गुर्वभिष्यंदि
शीतलैः आस्यास्वप्न सुखाजीव दि
वास्वप्नादिबृंहणैः प्रच्छर्दनाद्ययोगे
न भुक्तमात्र वसन्तयोः पूर्वाह्ने
पूर्वरात्रेच श्लेष्मा वस्याभि शंक
रान् मिश्रीभावात्समस्तानां सन्नि
पातस्तथा पुनः संकीर्णाजीर्ण
विषम विरुद्धाध्यशनादिभिः व्या
पन्न मद्यपानीय शुष्क शाकाम्ल
मूलकैः पिण्याक मृत्यवसरा पूतिशु
ष्क कृशामिषैः दोषत्रयकरैः स्तैस्तै
स्तथान्नपरिवर्त्ततः ऋतोर्दुष्टात
रोवातात्विग्रहावेशाद्विहरात्
दुष्टामात्यर्वतस्रोषाक्रूरे जंन्मर्क्ष
पीडनात् मिथ्यायोगाच्च विवि
धात्पापानां च निषेवनात् स्त्रीणां
प्रसववैषम्यात्तथा मिथ्योपचा
रतः प्रतिरोग मिति क्रुद्धा
रोगाविध्यानगामिनः रसायनी
प्रपद्यास्तु दोषा देहे विकुर्वते
इतिगारुडे सर्वरोगनिदानं १९१
अध्यायः रोगविशेषाणां औष
धानि गारुडे १८९ १९० १९१ १९२
१९३ १९४ १९५ १९६ १९७

१९४ १९९ अध्यायेषु द्रष्टव्यानि
सर्वरोगहरवैष्णवकवचंच तत्रैव
२०० अध्याये द्रष्टव्यं अपिच
नतकःसर्वरोगाणांउर्वारो दारु
णोज्वरः शिवभक्तश्च योगीचस
एव विकृताकृतिः भीम स्त्रि
पादस्त्रिशिरा षड्भुजो नवलोच
नः तप्सम्भरणे रोद्रः काला
न्तकयमोपमः मंदाग्नि स्तस्यजन
कोमंदाग्ने र्जनको त्रयः पित्त
श्लेष्मसमीराश्च प्राणिनां दुःखदा
यकाः वायुजः पित्तजश्चैव श्लेष्म
जश्च तथैवच ज्वरभेदाश्च त्रि
विधा चतुर्थश्च त्रिदोषजः पाण्डु
कःकामलःकुष्ठः शोथः सीहाच
मूत्रकः ज्वरातिसार ग्रहणीका
श व्रण हलीमकाः मूत्रकृच्छ्रश्च
गुल्मश्च रक्तदोष विकारकः आर्श
श्च मेहजः कुब्जागात्रश्च गलगण्ड
कः भ्रमरी सन्निपातश्च विस्फो
टी दारुणीसति एषांभेदप्रभेदेन
चतःषष्टि रुजःस्मृताः मृत्युकन्या
सुताश्चैते जरातस्याश्च कन्यका
जराच भ्रातृभिःसार्द्धं भ्रमन्द्भमति
भूतलं एतेचोपायवेत्तारं नगच्छं
तिचसंयतं पलायन्तेच तंदृष्ट्वा वैनतेय
मिवोरगाः चक्षुर्नेत्रंच व्या

यामः पादाधस्तैलसेवनं कर्णे
तैलं मूर्ध्नि तैलं जराव्याधिवि
नाशकं वसन्ते भ्रमणं वह्निसे
वास्वप्नं करोतियः बालांच सेव
तेकाले जरातंनोपगच्छति स्ना
तःशीतोदकस्नायी सेवते चंदन
द्रवं नोपयाति जरा तंच निदाघे
ऽनिलसेवितं प्राहृड्ष्णोदकस्ना
यी वृनतोयं नसेवते समयेचस
माहारी जरा तं नोपगच्छति या
दृशेऽहं न गच्छाति भ्रमणं नचव
र्जयेत् स्वातस्नायी समाहारी जरा
तंनोपतिष्ठते स्वातस्नायी चरेर्मन्त
काले वह्निं निषेवते भुंक्ते न
वान्नं मुखंच जरा तंनोपगच्छति
शिशिरेऽशुक वह्निंच नवोष्णा
नचसेवते यपत्तोप्णोदकस्नायी
जरातं नोपगच्छति सद्योमांसंन
वान्नंच बालास्त्री क्षीरभोजनं
घृतंच सेवते योहि जरा तंनो
पगच्छति भुंक्ते सदन्नं स्नात्वा
लेहस्नायी पीयते जलं नित्यं
भुंक्ते च ताम्बूलं जरा तंनोप
गच्छति दधि ह्येयंगवीनंच नव
नीतं तथाम्बुभं नित्यं भुंक्ते सेव
सी योजरा तंनेवगच्छति शुष्क
मांसंस्त्रियो वृद्धा बालार्क भक्षणं

संसेवन्ते नरा याति महाशश्च
रुभिःसह रात्रौ ये दधिसेव
न्ते पुंश्चलीव रजस्वला तमुपैति
जरा दृष्ट्वा भ्रातृभिः सह संदरि
रजस्वला च ऊलटा चाचीरजार
हतिका शूद्रयाजकपत्नीयास्वल
हीनाच या सति योदिताश्चाम
न्नभोजीब्रह्महत्यांलभेहसः तेन
पापेन साईं सा नरा तमुपगा।
ह्युतिषापानांव्याधिभिः साईमि
त्रतासन्नतं भ्रुवं पापं व्याधिज
रावीजं विन्नवीजंच निश्चितं पापे
नजायते व्याधिः पापेनजायतेज
रा पापेनजायते दैन्यं दुःखं
शोकं भयं कलिः तस्मात्पापं
महावैरं दोषवीजं ममंगलं।
भारते सन्ततं सन्तो नाचरंति
भयातुराः स्वधर्माचारयुक्तंचहरी
त्तिं हरिसेवकं गुरु देवातिः
थीनांच भक्तं सक्तं तपःसुच व्र
तोपवासयुक्तंच सतातीर्थनिषे
विनं पापाद्भवन्ति तं दृष्ट्वा वै
नतेय मिवोरगाः पलायनस्ते
वेन व्याधि संघस्य दुर्जयः सर्वदो
ष समये काले सर्वग्रहीण
ति जरयसर्वरोगाणांजनकाःक
थितं मतिपित्त श्लेष्मजस्यजन
का

क्षयः पते यथा संचरंति स्वयं
यांति च देहिषु तमेव विवि
धोपायं साध्वि मत्तो निशामय
दधिजाज्वल्यमानाया माहाराभाव
एवच प्राणिनां जायते पित्तं च
क्रौच माणिग्रके तालं विल्वफ
लंभल्लातकलपानंच तत्वाणां तदे
व तभवेत्पित्तं क्षयःप्राणहरंपरं
तमोदकंच शारदि भाद्रतिक्तंवि
प्रोषतः देवग्रन्थस्य यो भुंक्ते
पित्तं तस्य प्रजायते सशर्करंच
धन्याकं पिष्टं शीतोदकान्वितं
वाताकं सर्वगव्यंच दधि तक्र
विवर्जितं विल्व तालफलंप
क्वंसर्वमत्तारमेवच आर्द्रकंमुद्र
यूषंच तिलपिष्टं सशर्करं प्रतार
स्थाने पेतवमितिबपाठः पित्त
नयकरं सद्योवलपुष्टिप्रदं परं
पित्तनाशचतद्वीज मुक्तमत्स्य निवो
धमे भोजनानन्तरं स्नानं जलपानं
विनाभ्यषा तिलतैलं स्निग्धतैलंति
ग्धमामलकीद्रवं पर्युषितान्नं
तक्रंच पक्वरंभाफलं दधि छा
याम्बुशर्करान्वितं सुस्निग्धस्थल
सेवनं नारिकेलोदकं चूतस्नानं
पर्युषितंजलं तरुमूला पक्वफ
लंसपक्वं कर्कटीफलं खातस्नानंच

4069

वर्षासु मूलकं श्लेष्मकारणं व
सन्तेभे तज्जन्मं सहहीर्यविनाश
नंवक्तिस्विदं भ्रष्टिभंगं पक्वतैलं
शोषकं भ्रमणं शुष्कभतंच श्र
क्षपक्वं हरीतकी पिंडारकमप
क्वंचरंभाफल मपक्वकं वेशवा
र सिंधुवार मनोहार मपानकं
सद्घृतं रोचनाचूर्णं सघृतं शुष्क।
शर्करं मरीचं पिप्पली शुष्कमा
र्द्रकंजीरकं मधु द्रव्याण्येतानि
गंधर्विस्यः श्लेष्महराणिव वल
पुष्टिकराणेव तामुवीजंनिशा
मय भोजनानन्तरं सद्यो गमनं
धारणं तथा छेदनं वह्नितापश्च
शश्वद्भ्रमणं मैथुनं वृद्धस्त्रीग
मनंचैवमनःसंताप एवव्याति
रूतमनाहारं शुष्कं कलहमेवच
कटुवाक्यं भयं शोकः केवलंवा
युकारणं भ्रातारत्र्यवक्ये तज्ज
न्मनिशामय तदौषधं पक्वरंभा।
फलंचैव सवीजं शर्करोदकं ना
रिकेलोदकंचैव सद्यस्तक्रं सुमिष्ट
कं माहिषंदधिमिष्टंच केवलं वा
सशर्करं सद्यः पर्युषितान्नंच
सौवीरं शीतलोदकं पक्वतैल
विशेषश्च तिलतैलंच केवलं।
लांगलीतालखर्जूर शुक्लामलकी

द्रवं शीतलोष्णोदकस्नानंस्व
स्निग्धवंदनद्रवं स्निग्धपद्मपत्रतल्पं
सुस्निग्धव्यजनानिलः एतत्कथि
तंवत्से सद्यो वातप्रणाशनं
वायवस्त्रिविधाः पुंसां क्लेश संन्ना
पक्वामजाः व्याधि संघस्य क
थितस्तत्राणि विविधानिच ता
नि व्याधिप्रणाशाय हतानि स
द्भिरेव च तेजांस्येतानि सर्वाणि
व्याधिक्षयकराणिच रसायनाद
यो येषु चोपायस्य सुदुर्लभः
नशक्तः कथितं साध्वि याथार्थ्यं व
स्तरेणाच येषांच सर्वं तेजाणांकृ
तार्थानां विचक्षणे इति ब्रह्मवै
वर्ते ब्रह्म खंडे १८ अध्यायः
अथव्याधिलक्षणं तत्र वाग्भटः रो
गस्तु दोषवैषम्यं दोषसाम्य मरो
गता रोगाद्रःखस्य दातारो ज्वर
प्रभृतयो हि ते नेत्र स्वाभावि
काःकेचित्केचिदागन्तवः स्मृताः
मानसाः केचिदाख्याताः कथिताः
केपि कायिकाः तत्रस्वाभाविकाः
शरीरस्वभावादेवजाताः क्षुत्पिपा
सा सुप्सा जागरा स्मरप्रभृतयः
अथवा स्वस्य भावाडुत्पन्नजाताः
स्वाभाविकाः सहजा इतियावत्
तेच जन्मोहादयः आगन्तवो।

रभिघातादि जनिताः अथवा
जन्मान्तर भाविनः मानसाः का
मक्रोध लोभ मोह भयाभिमान
दैन्य पैशुन्य विषादेर्षासूयामात्स
र्यामात्सर्य्य प्रभृतयः अथवा उन्मा
दापस्मार मूर्च्छा भ्रम तमःसन्न्या
सप्रभृतयः कायिकाः पाण्डुरोग
प्रभृतयः कर्मजाः कथिताः केचि
द्दोषजाः सन्ति चापरे कर्मदोषो
द्भवाश्चान्ये व्याधयस्त्रिविधाःस्मृ
ताः तत्रकर्मजा व्याधयः यत्प्राक्त
नं दुष्कर्मप्रबलं व्याधिरूपं केव
लं भोग न्यूनं प्रायश्चित्तनाश्यं
वा ततो जाताः न तु दुष्टवाता
दिदोषेण जनिताः तथा यथा
शास्त्रेण निर्णीता यथाव्यापि
चिकित्सिताः नशमं यान्तियेरो
गास्तेज्ञेयाःकर्मजा बुधैः दोष
जाः मिथ्याहार विहार प्रकुपित
वातपित्त कफजाः ननुमिथ्या
हारविहारेण अपि प्राक्तनस्य
कृतेनेनैतद्रूपं दृश्यत एव ततो
दोषजेष्वपि प्राक्तनकर्मैव कारणं
तत्कथंदोषजा इति उच्यते दो
षजेष्वपि वस्तुत आदिकारणं दु
ष्कर्मवतत एव किन्तु तत्र मिथ्या
हारविहार भूषितादोषाहेतवोदृश्यं
ते

इति दोषजा इत्युच्यन्ते इतिसमाधः
कर्मदोषोद्भवाः । स्वल्पदोषा
गरीयांस स्ते ज्ञेयाः कर्मदोषजाः
अत्र कारणं दुष्कर्मप्रबलं यतोदो
षाल्पत्वेपि व्याधे गरीयस्त्वं तत्क
र्मक्षयादेव क्षीणं भवति दोषास्तु
स्वल्पा अपि निदानत्वेनोक्ताःदृश्य
न्तएवेति दोषाणां कारणत्वं
मन्यत इति कर्मदोषोद्भवाः कर्म
क्षयात्कर्मजाः दोषजाःस्वस्वभेष
जैः कर्मदोषोद्भवा यान्ति कर्म
दोषक्षयात्क्षयं दोषजाः स्वस्व
भेषजैः इति दोषजेष्वादिकार
णं दुष्कर्म तत्क्षयकार्यं द्रव्यतया
दिजनित दुःखभोगेन कटुतिक्त
कषायाद्युग्रस्य भक्षणादिजनि
त दुःखभोगेन क्षयं याति शे
षादृष्टहेतवो दोषा स्ते स्वस्व भे
षजैःक्षयं यान्तीत्यर्थः साध्यासा
ध्याश्चसाध्यास्तु व्याधय स्त्रिविधाः
स्मृताः सुखसाध्यः कष्टसाध्योहि
विधःसाध्य उच्यते याप्यलक्षण
माह याप्यनीयस्तु तं विद्यात्क्रियां
धारयते हितं क्रियायान्तु निवृ
त्तायां सद्यो यश्च विनश्यति प्रा
प्ता क्रिया धारयति स्थापिनं शा
प्य मातुरं प्रपतिष्म दिवागारस्तम्भो

4071

यत्नेन योजितः साध्या याप्य
त्वमायाति याप्या श्चासाध्यतांतथा
घ्नंति प्राणानसाध्यास्तु नराणाम
क्रियावतां अक्रियावतां चिकित्
सारहितानां अथोमद्य लक्ष
णं रोगारंभक दोषस्य प्रको
पादुपजायते यो ऽन्याविकारः
स्तबेधे रुपद्रव इहोदितः ।
अथारिष्ट लक्षण माह रोगि
णो मरणं यस्मादवश्यंभावि
लक्ष्यते तल्लक्षण मरिष्टं स्यादि
ष्टंचापि तदुच्यते अथ रोगस्य
चिकित्सा लक्षण माह याक्रि
याव्याधिहरणी साचिकित्सा नि
गद्यते दोष धातु मलानांया
साम्यकृत्सैव रोगहृत् क्रियात्र
कर्मव्याधि क्रियते ऽनयेतिव्याधि
हरणी करणाधिकरणयोश्चेतिस
त्रेणात्र करणार्थेल्युट् तथाच
याभिःक्रियाभि र्जायन्ते शरीरे
धातवःसमाः साचिकित्साविं
काराणांकर्म तद्भिषजां मतं ।
याप्तुदीर्णंशमयति नान्यंव्याधिं ।
करोतिच साक्रिया न तुयाया ।
र्धि हरत्यन्यमुदीरयेत् क्रियात्र
चिकित्सातथाचामरसिंहः आरंक्षा
निष्कृतिःशिक्षा पूजनं संप्रधारणा
उ

पायः कर्म चेष्टा च चिकित्साचन
वक्रिया इति अथचिकित्साविं
धमुपदेशः ज्ञात्वा तत्र चिकित्सः
साज्ञोपेत्योऽन्तया गदः वह्नि
शत्रु विषे स्वल्पःस्वल्पोऽपि विक
रोलसौ रागमादौ परीक्षेत त
तोऽनन्तरमौषधं ततः कर्म भि
षक्साध्याज्ञानपूर्वं समाचरेत्
अयमर्थः भिषक् आदौ रोगं
परीक्षेत विचारयेत् ततोऽनन्तरं
औषधं* विचारानन्तरं ज्ञानपूर्वकसा
वधानो न तु अज्ञतया कर्म चि
कित्सा मौषध दानादिरूपं समा
चरेदित्यर्थः रोगाज्ञानेचि
कित्साकरणे दोषमाह यस्तु
रोग मविज्ञाय कर्माण्यारभते
भिषक् अपौषध विधानज्ञस्तस्य
सिद्धि र्यदृच्छया यदृच्छया सि
द्धिरपासिद्धि र्भवति नापि भवती
त्यर्थः अन्नस्तु भेषजं केवलं क
र्त्तुं योजानाति नवामयं वैद्यकर्म
सचेत्कुर्य्यात् वधमर्हति राजतः
रोगज्ञाने भेषजाज्ञाने दोषमाह ।
यस्तु केवल रोगज्ञो भेषजेष्व
विचक्षणः । तंवैद्यं
प्राप्य रोगी स्याद्यथा नौ ।
र्नाविकं विना ॥ नाविकं

*विचारयेत् ततःपश्चा
तरोगौषधं

कार्य्यभारं विधा यथा नौः संक
टे पतति तथा रोगी त्वर्थः ग्रन्थे
तु यस्तु केवलशास्त्रज्ञः क्रिया
स्वकुशलो भिषक् स मुह्यत्यातुरं
प्राप्य भीरुः शास्त्रीव वाहवे ।
रोगौषधयोर्ज्ञाने गुणमाह यस्तु
रोगविशेषज्ञः सर्व भेषज्यकोवि
दः देशकालविभागज्ञस्तस्य ।
सिद्धिर्न संशयः आदावन्ते रुजां ।
ज्ञाने प्रयतेत चिकित्सकः भे
षजानां विधानेऽथ ततः कुर्य्या
च्चिकित्सितं चिकित्सित मित्यत्र
भावेक्तः इति भावप्रकाशे पूर्व
खण्डः अथ येन रोगाणां
ज्ञानं स्यात्तदाह हेतुस्तद्रु
संप्राप्तिः पूर्वरूपं च लक्षणं तथै
वोपशमः पंच रोगविज्ञानहेत
वः तत्र हेतो र्लक्षणमाह य
त्तनस्मादिना येन तस्य तद्देतुरुच्य
ते शास्त्रे संव्यवहाराय तत्पर्य्याया
स्त्वथ स्मह निदानं कारणं हेतुर्नि
मित्तंच निबंधनं मूल मायत
नं तत्र प्रत्ययोपि निगद्यते त
त्र हेतु र्व्याधीनां ज्ञानाय हेतुर्य
थावर्षा तृत श्रम हिमानशाना ।
तिमैथुन शोकचिन्ताभयादयो वा
तप्रकोपहेतवो वातजान्व्याधीन्

बोधयन्ति शरत् कट्वम्लोष्ण तीक्ष्ण
क्रोध तृषा क्षुधाभिघातादयः पि
त्तप्रकोपहेतवः पित्तजान्व्याधीन्बो
धयन्ति वसन्त मधुर स्निग्ध शी
तादयः कफप्रकोप हेतवः कफ
जान्व्याधीन् बोधयन्ति अथ
संप्राप्ते र्लक्षणमाह यथा दुष्टेन
दोषेण यथा चानुविसर्पता उत्प
त्ति र्यामयस्यासौ संप्राप्ति र्जाति
रागतिः यथा दुष्टेन दोषेण यथा
कारणभेदेन दोषेण यथा
चानुविसर्पता अनेकधा दोषाणां
विसर्पणं मूर्द्धाध स्तिर्य्यगादिग
तिभेदेन तथा च विसर्पताऽत्रा
मयस्या उत्पत्तिः असौ संप्राप्तिः
शास्त्रव्यवहाराय संप्राप्तेः पर्य्याया
वाह जाति रागति रिति संप्राप्ते
रौपाधिक भेदानाह संख्याविक
ल्पप्राधान्य बल काल विशेषतः
सा भिद्यते यथा त्रैव वक्ष्यन्तेऽ
ष्टौ ज्वरा इति संख्यादिरूपाधेर्वि
शेषास्तेभ्यः सा संप्राप्ति र्भिद्य
ते भेदवती क्रियते इत्यर्थः त
त्र संख्या विवृणोति यथा ज्वरो
ऽष्टधा अतीसारः षड्विध इत्या
दि विकल्पं विवृणोति दोषाणां सम
वेतानां विकल्पोंऽशांशकल्पना समवे

तानां समुदितानां दोषाणां अं
शांश कल्पना हीन मध्याधिक
भेदैर्भाग कल्पना विकल्पः प्राधा
न्यं विवृणोति स्वातंत्र्य पारतंत्र्या ।
भ्यां व्याधेः प्राधान्यमादिशेत् व्याधेः
स्वातन्त्र्येण प्राधान्यं पारतंत्र्येणा
अप्राधान्यं च विवेदेदित्यर्थः यथा
था स्वतंत्रस्य ज्वरस्य प्राधान्यं ज्वरा
धीनानां श्वासादीना मप्राधान्यं ।
बलं विवृणोति हेत्वादि कार्त्स्न्य
स्यावयवै र्बलावल विशेषणं अ
त्रापि व्याधे रित्यनुवर्त्तते हे
त्वादेः हेतुरूपाणां कार्त्स्न्येन सा
कल्येन अवयवैः एकदेशेन ।
व्याधे र्बलाबलयो विशेषणं वि
शेषबोधः । कालं विवृणो
ति नक्तं दिनर्त्तु भुक्तांशै र्व्या
धिकालो यथा वलं नक्तमेवा
मयंशाधिवाचकं एतेनेतदुक्तं यस्मि
न्नक्तादे रंशे यस्य दोषस्य प्रको
प उक्तोस्ति सोंश स्तद्दोषजस्य व्या
धेः काल इत्यर्थः नक्तादे रंशे
षु वातादि प्रकोप उक्तो वाग्भटे
न तेव्यापिनोपि हृन्नाभ्यो रधोम
ध्योर्द्ध संश्रयाः वयोऽहो रात्रि
भुक्तानां मन्त मध्यादिगाः क्रमादि
ति ते वात पित्त कफाः ऋतुषु वा

तादिकोपो यथा वर्षासु शिशि
रे वायुः पित्तं शरदि उष्मके वसंते
तु कफः कुप्यते एषा प्रकृति र्रावी
संप्राप्ति र्व्याधीनां ज्ञानाय हेतु र्य
था । मिथ्याहार विहार कु
पित वातादयामाशय गमन रसदू
षणकोष्ठाग्नि र्बहि र्निरसनद्रूपं ज्व
रोत्पत्तिप्रकारं बोधयति तथा व्या
धीनां संख्या दोषांशांश कल्पना
प्राधान्य बलकालांश्च बोधयति
तेषु ज्ञानेषु चिकित्साविशेषः
स्यात् अथ पूर्वरूपस्य लक्षणमाह
पूर्वरूपन्तु तद्येन विद्याद्व्याधिन
मागतं सामान्यं च विशिष्टं च द्वि
विधं तदुदाहृतं सामान्यं तद्दो
षाणां विशेषे त्वनधिष्ठितं ।
विशिष्ट मौषध्याक्तं स्यात् विशेषश्च
समन्वितं दोषाणां विशेषाः ज्व
भातिशय नेत्रदाहादि मान्द्यादयः
तत्र पूर्वरूपं व्याधीनां ज्ञानायहे
तु यथा श्रमादयो भाविनं ज्वरं ।
बोधयन्ति अथ च तदेव श्रमा
दयोऽतिशयित जृम्भायुक्ता भावि
नं वातज्वरं नेत्र दाहयुक्ता भाविनं
पित्तज्वरं वह्निमान्द्ययुक्ता भावि
नं श्लेष्मज्वरं बोधयन्ति अथ
लक्षणस्य लक्षण माह पूर्वरूपं

विशिष्टं यद्व्यक्तं तल्लक्षणं स्मृतं
संस्थानं लिंगं चिह्नं व्यंजनं रू
पमाकृतिः विशिष्टं पूर्वरूपं रूप
व्यक्तं रूपं तदेव सम्यग्व्यक्तं ल
क्षणं स्मृतं तन्त्रशास्त्रे व्यवहाराय
पर्य्यायानाह संस्थान मित्यादि
लक्षणं व्याधे र्ज्ञानाय हेतुर्यथा
स्वरावरोधः सन्तापः सर्वांगग्रह
णं च युगपदेतल्लक्षणं ज्वरं बोध
यति अथोपशयलक्षण
माह औषधान्न विहाराणा मुपयो
गं सुखावहं तच्चोपशयं विद्यात्स
द्धि सात्म्यमिति स्मृतः तत्र
वातस्योपशय माह मधुरलवण
साम्लस्निग्धनस्योष्ण निद्रागुरुहवि
कर वस्ति स्वेद संमर्द्दनानि दहन
तैल शोषाभ्यंग सन्तर्पणानि प्रकुपि
तपवमाणं शान्तमेतानि कुर्युः ।
अथ पित्तस्योपशय माह तिक्त
स्वादु कषाय शीत पवन च्छाया
निशावीजन ज्योत्स्ना भूतट यन्त्र
वारिजल द स्त्रीगात्रसंपर्शनं स
र्पिः क्षीर विरेक सेकरुधिरस्राव
प्रदेहाधिकं पानाहार विहारभे
षजमिदं पित्तं प्रशान्ति मयेत्
अथ कफस्योपशाय माह रूक्षता
र कषाय तिक्त कटुक व्यायाम

निष्ठीवनं धूमात्ययशिरो विरेक
वमनं स्वेदोपवासादिकं त्वड्वाता
ध निशुद्ध जागर जलक्रीडाङ्गना
सेवनं पानाहार विहा भेषज
मिदं श्लेष्माण मुग्रं हरेत् ।
जलक्रीडा कथं कफं हरति त
दाह जलक्रीडा जनित शैत्येनाव
रुद्धदेहोष्मा पंकलिप्त पाकाग्नि वि
वोग्रो भूत्वा कफं शोषयति इति
समाधि उपशयो व्याधेरभ्याय
हेतु यदुक्तं चरकेण । गूढ
लिंगं संकीर्णलक्षणं च व्याधि
मुपशयानुपशयाभ्यां परीक्षेतेति
तथा च सुश्रुते अत्यंत स्वेदन
स्नेहे विकारो वातिकोनयः शा
मेत्तत्र तु विज्ञेयं रक्तमात्राति
दूषिते सर्वेषा मेवैषा मेव रोगा
णां निदानं कुपिता मलाः त
त्प्रकोपस्य तूक्तं विविधाहित
सेवनं सर्वेषां रोगाणां निदानं
सन्निकृष्टं कारणं कुपितास्त
द्धेतुकृष्णाः मलाः वात पित्तक
फा एवेत्यन्वयः तथाच वाग्भ
टः दोषा एवहि सर्वेषां रोगाणा
मेककारणमिति नत्वागन्तुव्या
धिषु व्यभिचारः स्यात् तत्रनव्यु
[illegible]नन्तरं दोष प्रकोपस्यावश्यंभावि

5075

त्वात् उत्सन्न द्रव्येषु गुणेषो
गस्येव इति भावप्रकाशः ॥
पापजरोगा यथा शातातपीय
कर्मविपाके कुष्ठं च राजयक्ष्मा च
प्रमेहो ग्रहणी तथा मूत्रकृच्छ्रा
श्मरी कासा अतिसारभगन्दरौ ।
दुष्टव्रणं गंडमाला पक्षाघातो ।
क्षिनाशनं इत्येव मादयो रोगाम
हापापोद्भवाः स्मृताः ॥ जलो
दरयकृत्प्लीह शूलरोग व्रणानि
च श्वासाजीर्णज्वर च्छर्दि भ्रममो
ह गलग्रहा रक्तार्बुद विसर्पाद्या
उपपापोद्भवा गदाः दंडापतानक
श्चित्र वपुः कंप विचर्चिकाः व
ल्मीक पुंडरीकाद्या रोगाः पाप
समुद्भवाः तथा अर्शआद्यान
णां रोगा अतिपापाद्भवन्तिहि
अन्येच बहवो रोगा जायन्ते वर्ण
संकराः उच्यंते हि निदानानि प्रा
यश्चित्तानि च क्रमात् सर्वरो
गनाशक दानं यथा हेमाद्रि
व्रतदानखंडे भगवद्वाक्यं स्वर्ण
दानं सर्वेषां रोगाणां नाशकारणं
तस्मात्सर्वं प्रयत्नेन कर्तव्यकम् ।
रोगोद्भव इति मलमासतत्त्वे ।
अथा रोगस्नानदिनं । तत्र
तिथयो रिक्ताः प्रशस्ताः दशमी

प्रतिपद्द्वितीया त्रयोदशी पंचमी
भिन्ना मध्यमा तन्नक्षत्राणि ।
स्वाती श्रवणा धनिष्ठा शतभि
षाज्येष्ठा हस्ता पुष्य पूर्वाषाढापूर्व
फल्गुनी पूर्वभाद्रपत् मघा भरणी
मृगशिरांसि तत्रवाराः क्रूराः ।
तत्रयोगो व्यतीपातः अशोभन
श्चंद्रः लग्नापेक्षा केंद्रेषु पापग्रहः
। इति ज्योतिस्तत्वं
अपिच । चंद्राच्युतो व्यतीपा
ते भौमार्कशनि वासरे व्रण
मुक्तो व्याधि मुक्तः कृशः स्नानं स
माचरेत् पूर्वात्रय मघाश्लेषा भर
णी कृत्तिका तथा आर्द्रायां च ति
थौ रिक्ते चारोग्यस्नान माचरेत्
इति ज्योतिःसारसंग्रहः ।
रोगघ्नं क्ली औषधं इति वैद्यकं
रोगनाशके त्रि
रोगभूः स्त्री शरीरं इति शब्द
चंद्रिका ॥
रोगराजः पुं राजयक्ष्मा । इति
राजनिर्घंटः
रोगलक्षणं क्ली निदानं इति
राजनिर्घंटः ॥
रोगशान्तकः पुं वैद्यः इतिश
ब्दचंद्रिका ।
रोगशिला स्त्री मनः शिला

इतिराजनिर्घण्टः
रोगशिल्पी पुं वृक्षविशेषः श
वाल्व इति भाषा इतिजटाधरः
रोगश्रेष्ठः पुं ज्वरः इति राज
निर्घण्टः
रोगहं क्ली औषधं इतिशब्द
चंद्रिका
रोगहरद्रव्यं क्ली रोगनाशक
वस्तु यथा धन्वन्तरि रुवाच द्रव्या
णिमधुरादीनि वक्ष्ये रोगहराणि
हे शालिषष्टिक गोधूमश्चैवेव न
यामधु मज्जा शृंगाटक यवकशे
रुक गोक्षुरं गंभारी पौष्क
रं बीजं द्राक्षा खर्जूरकं बला
नारिकेलत्वालमज्जा विदारी च
पियालकं मधुकं ताल कूष्मांडं
मुख्योऽयंमधुरोगणः । मूर्च्छा
दाह प्रशमनः षडिंद्रिय प्रसादनः
कृमिश्लेष्मकफकृद्गुरु पक्वो
ऽत्यर्थनिषेवितः श्वास कासास्यमा
धुर्य स्वरभंगार्बुदा निच गल
गंड श्लीपदानि गुरुलेपादि कारये
त् दाडिमामलकाश्चैव कपित्थ
करमर्दको । मातुलुंगाम्रा
तकं च बदरं तिन्तिडीफलं द
धि तक्रं कांजिकं च लकुचं चाम्ल
वेतसं अम्लो दंतशठकौ जा

णाः पाचनो रसः क्लेदनो वा
तहृत्तृष्णा विदाही वातलोमनः
अभ्यासर्पिसेव्यमानः ऊष्मा हि रक्त
हर्षकं शरीरस्य च शोथिल्यं स्वर
कंठनकृद्भवेत् छिन्न भिन्न व्रणा
दीनि पाचयत्यग्नि भावतः लवणा
दि यवक्षारः सर्जिकादिश्च लावणः
शोधनः पाचनः क्लेदी विश्लेष स
र्पणादिकृत् मार्गशोधी मार्दवकृत्स
पक्वः परिषेवितः गात्रकंडू को
ठ शोफ वैवर्ण्य जनयेद्रसः रक्त
वातं रक्तपित्तं पुंस्त्वेंद्रिय रुजा
दिकं व्योष शिग्रु मूलकंच दे
वदारु च कुष्ठकं लवणंजन्तुज
फलं मुस्ता गुग्गुलु लांगली कटु
को दीपनः शोधी कुष्ठ कंडूकफा
न्तकृत् स्थौल्यालस्य कृमिहरः शुक्र
मेदोविरोधनः पक्वो ऽत्यर्थं सेव्य
मानो भ्रम दाहादिकृद्भवेत्
कृतमालः करीराणि हरिद्रेन्द्रय
वाल्हया साइ कंटक वेत्राणि
बृहतीद्वय शंखिनी गुडूची च द्रव
न्ती त्रिवृन्मंडूकपर्ण्यपि कारवेल
वार्ताकु करवीरक वासकाः रो
हिणीशंख पुष्पी च कर्कोटी वैज
यंतिका जाती वरुणार्क निम्बोज्यो
तिष्मती पुनर्नवा तिक्तो रस

छेदनः साद्रोचनो दीपनस्त।
था शोधनो ज्वर तृष्णाग्निमूर्च्छा
कंडूतिकादिजित् क्लिन्नमूत्र क्लेदसे
शोषेष्वत्यर्थं स च सेवितः मन्या
स्तंभत्वेपकार्त्ति शिरःशूलव्रणा
दिकृत् त्रिफला शाल्मकी नम्र
आम्राम्रातवटादिकं तिन्दुकं वकु
लं शाकं निष्पावं मुद्गचिल्लिका नि
ष्पावस्याने पालंका इतिकृचिस्ता
ढः कषायो ग्राहको रोपी स्तंभनः
क्लेद शोषणः पक्वोऽत्यर्थसेव्य
मानो हृत्पादश्च पीडकृत् मुख
शोष ज्वराध्मान मन्यास्तंभादिका
रकः हरिद्रा कुष्ठ लवण मेषशृं
गी बलाकृतं कच्छपी शालकीप
त्री पुनर्नवा शतावरी अग्निमं।
थो ब्रह्मदंडी स्वदंष्ट्रेरंडके तथा
यवकोल कुलत्थादिकषीसीर
समूलकं पृथक्समस्तो वातान्तो
वह पित्तहरस्तथा शतावरी विदा
री च वाल्ककाशी चंदनं हर्वी
वेरः पिप्पली च बदरी शाल्मकी
तथा कदली चोत्पलंपद्म मुञ्जेर्वर
परोलकं अथ श्लेष्महरो वर्गो हरि
द्रा गुडूच्यकं शतपुष्पी च जाती
वचोषणसवधनाकुली सर्पिस्तैलव
सा मज्जा स्नेहश्चवरं घृतं तथापी
स्यति

मेधाग्नि कांतिशतं शास्त्रे घृतं
केवलं पैत्तिके सर्पिर्वातिके लव
णान्वितं देयं बहुकफे वापि
व्योषक्षार समन्वितं ग्रन्थीनाडी
कृमि श्लेष्ममेदो मारुतरोगिषु
तैलंलाघव दार्ढ्यार्थ क्रूरकोष्ठेषु
देहिषु वातातपा स्वभावातिव्या
याम क्षीणाद्व च पुरुषक्लेशव
यान्नित्यवातरक्त पथ्येषु च तथा
दग्धा हृतभ्रष्टायोनिकर्मा शिरो
रुजि उत्तमस्य पलं मात्रा त्रिभिश्च
तैश्च मध्यमे जघन्यस्य पलार्द्धेन
स्नेह काथौषधेषु च जलमुसं
घृते देयं प्रच्छेले नशास्यते
स्नेहे स्नेहे पीते तत्सायां पिव
उष्णोदकं नरः वातानुलोम दी
प्ताग्नि वर्चो स्निग्ध समेमतेऽत्तस्व
स्नेहनं कार्यं मति स्निग्धसत्त्वतां
पपामाक कोरदूषात्र तक्र पिण्या
क षष्टिभिः वातश्लेष्मणि वाते
वा कफे वा स्वेद इष्यते नसदेय
दतिसूल रक्तदुर्बल मूर्छितान रे
स्वादि महापुराणे गारुडे योगसारे ९०
अध्यायः धन्वन्तरिरुवाच हृतलेना
दिवसानि षष्ठाउ सम्भूतरोगनु
त. खेगपुष्पी तथा सोमा ब्राह्मीच
ह्लासवर्चला अभया गुडूची चैव अ

टङ्कणकवाकुची एतै रसमैर्भा
गैर्घृतप्रस्थं विपाचयेत् कण्टका।
र्य्यारसप्रस्थः क्षीरप्रस्थसमन्वितः
एतद्ब्राह्मी घृतंनाम स्मृतिमेधा
करं परं त्रिफला चित्रक बलानि
र्गुडीनिम्ब वासकाः पुनर्णवाश्व
दृचीच बृहतीच शतावरी एतै
र्घृतं यथालाभं सर्वरोगविषम
र्द्दनं बला शतकषायेन तैलस्या
ढकं पचेत् कल्कै मधुक मंजि
ष्ठा चंदनोत्पल पद्मकैः सूक्ष्मैला
पिप्पली कुष्ठ त्वगेलागुरुकेशरैः
गंधाश्व जीवनीयैश्च चोरटकस
मान्वितं एतत् दृढग्निना पक्वं
स्थापयेद्राजते शुभे सर्ववात वि
कारांस्तत्सर्वेषात्क्षत्रराग्र्याप्नुयात् तै
लमेतत् प्रशमयेद्बलाख्यंराजव।
हृभं शतावरी रसप्रस्थं क्षीरप्र।
स्थ तथैवच शतपुष्पा देवदारु
मांसीशैलेयकं बला चंदनं भग
रं कुष्ठं मांसा चांशुमती तथा प
तैः कर्षसमैः कल्कैः तैलप्रस्थं
विपाचयेत् कुब्ज वामन पंगूनां
बधिरव्यंग कुष्ठिनो वायुनाभग्न
गात्राणां येच सीदन्ति मैथुनेज
राजर्जरगात्राणां वाध्मानमुपशा
म्यंति त्वगताश्चापि ये वाताःशि
रास्था

पुगतास्थ्य ये सवन्ति नाशयस्या
शु तैश्चैव स्याद्दशांगकः नारायण
मिदं तैलं विस्तनोक्तं रुगर्दनं
। पृथक्कैलं घृतं कुर्य्यात्समस्तै
रौषधैः पृथक् शतावर्य्यागुडू
च्या वा चित्रके रोचनाघृतः
निर्गुण्ड्या वा प्रसारण्या केस्का
र्य्यारसादिभिः वैर्या वानलया
वापिवासकेन फलत्रिकैः ब्राह्म्या
वैरङ्केनापि भृंगराजेनमुण्डिना मु
सल्या दशमूलेन खदिरेण वरादि
भिः वटिका मोदको वापि चूर्णं
स्यात्सर्वरोगनुत् घृतेन मधुना
वापि मुक्तं खंड गुडादिभिः लव
णैः कट्वके युक्तं यथा भार्गव रो
गनुत् चित्र कर्काय त्रिवृता म
लञ्च हयमारकं तथा च वालाग
णिका सप्तपर्णं सुवर्चिकां ज्योति
ष्मतीसंसृज्य तैलं धीरो विपा
चयेत् एतन्निष्पन्दनं तैलंश्यशं
दुष्टव्रणभगन्दरे शोधनं रोचनं।
चैव सर्ववर्णकरं परं चित्रकाद्यं
महातैलं सर्वरोगप्रभंजनं ।
अजमोदः ससिन्दूरो हरितालनि
शाद्वयं क्षारद्वयं फेनयुतमारुष्कं
सत्योद्भवं इन्द्रवारुणपामार्ग
कदलैः कन्दैः समैः कंदलैः

4079

स्थाने सन्दैने इतिच पाठः प
भिः शार्षपजं तैलं मत्ताश्मूत्रैश्च
योजितं मृद्वग्निना पचेद्ततत्
अर्कक्षीरेण संयुतं अजमोदा
दिकं तैलं गण्डमालां व्यपोह
ति विदुपस्त्र पचेत्पक्वं पक्वेवे
व विशोधयेत् रोपणं मृदुभा
वंच तैलेनानेन कारयेत् अ
जमोदादिकं तैलं महावीर्य्यव
रोगहृत् इति गारुडे ७८ ।
अध्यायः ।
रोगहारी न पुं वैद्यः इत्यमरः
रोगनाशकेत्रि ।
रोगितरुः पुं अशोकवृक्षः
इतिराजनिर्घंटः ॥
रोगिवल्लभं क्ली औषधं इति
शब्दचंद्रिका रोगिप्रिये त्रि।
रोगी न त्रि रोगयुक्तः तत्पर्य्या
यः व्याधितः २ विकृतः ३ ग्ला
नः ४ म्लानः ५ मंदः ६ आतुरः ७
अभ्यान्तः ८ अभ्यमितः ९ रुग्नः १०
आमयः ११ अपटः १२ इतिराज
निर्घंटः आमयावी १३ सालुः
१४ इत्यमरः अथ चिकित्सार्थं रो
गिणः परीक्षा तत्र वाग्भटः ।
दर्शन स्पर्शन प्रश्नैः परीक्षेद
च रोगिणं आयुरादि हृष्टासपर्श

क्षीणादे प्रश्नतोऽपरं आयु।
रादि आदि शब्दात्साध्यत्वासाध्य
त्वादि दृशा दर्शनेन अत्रस
न्मदादिभ्यश्चेति भावे क्विप् स
र्शात्पीलादेः पीलोस्तु मृड क
ठिनत्वादिना परीक्षणांच प्रश्नतः
उदर लाघव गौरव तृषा वुभु
क्षावलावलादिना मिथ्याष्टश
विकारादिङ्गाख्याता स्तथैवच त
था दृष्परिशष्टाश्च मोहयेयुश्चि
कित्सकान् तत्र दर्शनं नेत्र जि
का मूत्रादेःकर्त्तव्यं तत्रनेत्रपरी
क्षा यथा नेत्रंस्याम्पवनादृक्तं धू
म्रवर्णं तथारुणं कोटरान्तःप्रवि
ष्टंच तथास्तंच विलोकनं हरिद्रा
खंडवर्णंच रक्तंवा हरितं तथा
दीपद्वेषि सदा इंच नेत्रं स्यात्पि
त्तकोपतः चक्षुर्बलाश्रु वजस्रात्
स्निग्धं स्यात्सलिलप्लुतं तथा ध
वलवर्णंच ज्योतिर्हीनं बलान्वि
तं नेत्रं द्विदोष वाक्स्यात्सांद्वो
षदृष्य लक्षणं त्रिदोष लिंगसेवत
तन्मारयति रोगिणं त्रिदोष दूषि
ते नेत्र मन्तर्गतं भृशं भवेत् त्रि
लिंगं सलिलस्रावि प्रान्तेनोन्मील
यत्पपि अथ जिह्वा परीक्षा
शाकपत्रप्रभा रुक्षा स्फुटिता

रसनानिल रक्ताश्यामाभवे·
त्पित्तालिमाद्द धवला कफात्
परिदग्धाखरस्पर्शा क्लमादोष
"अधिकेपिके से व देहद्वयापि क्य रोष" ह्नितयलक्षणा अथ मूत्रपरी
क्षा वातेन पांडुरं मूत्र रक्तंनीलं·
च पित्ततः रक्तमेव भवेद्रक्ताद्व
लंफेनिलंकफात् अथशरी।
रस्य उस्मत्वादि ज्ञानार्थ्यस्पर्शानं
कार्य्यं तत्रनाडीपरीक्षा मार
पुंसो दक्षिण हस्तस्य स्त्रियोवा
मकरस्य तु अंगुष्ठ मूलगानाडी
परीक्षेत भिषग्वरैः अंगुलीभि·
स्तिसृभि र्नाडी मवहितःस्प
शेत् तच्चेष्टया सुखंदुःखंजानी
यात्कुशलोःवित्तं सद्यःस्नात
स्यसुप्तस्य क्षुत्तृष्णातपशीलिनः
व्यायामश्रान्त देहस्य सम्यक्नाडी
नबुध्यते वातःधिके भवेन्नाडीप्र
व्यक्ता तर्जनीतले पित्ते व्यक्ता
मध्यमायां तृतीयांगुलिगा कफे
तर्जनी मध्यमा मध्ये वातपित्ते
ऽधिकेस्फुटा अनामिकायांतर्ज
न्यां व्यक्ता वात कफे भवेत्
मध्यमानामिका मध्ये स्फुटा
पित्तकफेःधिके ।
अंगुलि त्रितयेपिस्यात्व्यक्ता।
क्ता सन्निपातिनः ॥ वा

तास्वक्रगति र्नाडीपित्ताडम्लुत
गामिनी कफान्मन्दगति र्ज्ञेया
सन्निपातादतिद्रुता वक्रमुत्लु
त्य चलति धमनी वातपित्ततः
वहेद्वक्रंच मन्दंच वात श्लेष्माधि
केततः उत्प्लुत्य मन्दं चलति
नाडी पित्त कफेःधिके का
मात्क्रोधात्वेगवहा क्षीणाचि
न्ता भयाप्लुता स्थित्वा स्थित्वा
चलेद्यासा हन्ति स्थानच्युता त
था अतिक्षीणाच सीताच प्रा·
णान्हन्ति नसंशयः ज्वरकोपे
न धमनी सोस्मा वेगवतीभवेत्
मन्दाग्नेः क्षीणधातोश्च सैव म
न्दतरा मता चपला क्षुधित
स्यात्तृप्तस्य भवति स्थिरा सु
खिनोपि स्थिरा ज्ञेया तथा
बलवती मता इतिभावप्रका
शः रोगंघ त्रि अपथ्य अहिते
इति शब्दचंद्रिका रोगसंब
न्धिनिच ॥
रोचकः पुं क्षुधा तत्पर्य्यायः
बुभुक्षा २ अशाना ३ जिघत्सा ४
रुचिः ५ इतिहेमचंद्रः कदली
इतिशब्दरत्नावली राजपला
ण्डुः अवदंशः इति राजनिर्घंटः
ग्रन्थिपर्णीभेदः भेरिउर इति

4081

नेपालदेशोख्यातः तत्पर्य्यायः
निशाचरः २ धनहरः ३ कित
वः ४ गणहासकः ५ अस्यगुणाः
मरत्वं तिक्तत्वं कटुत्वं पाके।
कटुत्वं लघुत्वं तीक्ष्णत्वं हृद्यत्वं
हिमत्वं कुष्ठ कंडू कफानिलर
क्षोःश्री स्वेद मेदो ज्वर गन्ध वि
षव्रण नाशित्वच इतिभावप्र
काशः रुचिकारके त्रि
रोचनः पुं कूटशाल्मलिः इत्य
मरः श्वेतशिग्रुः ॥ पलाडुः
आरग्वधः करंजः अंकोटः ।
दाडिमः इतिराजनिर्घंटः रो
चके त्रि इतिमेदिनी ॥
रोचनकः पुं जंवीरः इतिराज
निर्घंटः ॥
रोचनफलः पुं वीजपूरकः
इतिराजनिर्घंटः ॥
रोचनफला स्त्री विर्भिटा इति
राजनिर्घंटः
रोचना [illegible] स्त्री रक्तकल्हारं
गोपित्तं गोरोचना इतिख्याते
वरयोषित् इतिमेदिनी ।
रोचनिका स्त्री वंश रोचना इ
तिराजनिर्घंटः अंजरोचनी इ
तिरत्नमाला ॥
रोचनी स्त्री आमलकी गोरो

चना इति राजनिर्घंटः मनः
शिला इति हेमचन्द्रः श्वेत
त्रिवृता अंजरोचनीतिख्यात व
णिक्द्रव्यं तत्पर्य्यायः काम्पि
ल्लः २ कर्कशः ३ चन्द्रं ४ रक्तांगः ५
इत्यमरः कम्पिल्लः ६ कंपीलः
७ काम्पिलः ८ काम्पिल्यः ९ रे
चनी १० इति भरतः पर्य्यायान्त
रंगुणाश्च कंपिल्लक शब्दे द्रष्टव्याः
रोचमानः पुं अश्वग्रीवास्थारोमा
वर्त्तः यथा अश्वस्तो हृस्योवर्णो
रोचमानो गलोद्भवः इतिका
उशोषः ॥
रोचिः स स्त्री प्रभा इत्यमरः
रोचिष्णुः त्रि अलंकारादिनादी
प्तिशीलः तत्पर्य्यायः विभ्रा
ट् २ भ्राजिष्णुः ३ इत्यमरः ।
रोची स्त्री हिलमोचिका इति
शब्दरत्नावली ॥
रोची न त्रि रोचिष्णुः इतिहे
मचंद्रः
रोच्यं त्रि प्रकाश्यं प्रीति
विषयः रुचधातोः कर्मणिय
प्रत्ययेन निष्पन्नाऽयं
रोट् ष त्रि हिंस्रः वधकः रो
षतीति. विचि गुणः इतिमुग्ध
वोधटीकायां दुर्गादासः

रोटिका स्त्री पिष्टकविशेषः
रोटी इतिरुटा इतिचभाषा त
त्करणप्रकारमाह शुष्कगोधूम
चूर्णेन किंचित्सृष्टांच पोलिका
नम्रकेस्वेदयेत्कृत्वा भूयोंगारोपि
तांपचेत् सिद्धेषा रोटिका प्रो
क्ता गुणानस्याः प्रचक्ष्महे रो
टिका बलकृद्रुच्या बृंहणी धा
तुवर्द्धनी वातघ्नी कफकृद्गुर्वी
दीप्ताग्नीनांप्रपूजिता अथलेटी
शुद्धगोधूमचूर्णेन साम्बुगाढं
विमर्द्दयेत् विधाय वटकाका
रं निर्धूमेग्नौशनैःपचेत् अंगार
कर्कटीह्येषा बृंहणी शुक्रलालघुः
दीपनी कफकृद्बल्या पीनसश्वा
सकासजित् अथ यवरोटिका
यवजा रोटिका रुच्या मधुरा
विषदा लघुः मलशुक्रानिलकरी
बल्याहन्ति कफामयान् पीनस
श्वासकासांश्च मेदो मेहगलाम
यान् अथमाषरोटिका चूर्णं
यहुष्कमाषाणां चमसीसाभि।
धीयते चमसी रचिता रोटीक
थ्यते बलभद्रिका रूक्षोसावात
ला बल्यादीप्ताग्नीनां प्रपूजिता
माषाणांराजय स्नोपे स्थापिता
त्वाकंडुकाः आतपशोषिता यंत्रे

पिष्टा सा धूमसीस्मृता धूमसी
रचितासैव प्रोक्ता फर्फरिका बुधैः
फर्फरिका स्थाने भर्जरिका इति
गर्गरिका इतिवा पाठः फर्फरी
कफपित्तघ्नी किंचिद्वातकरीस्मृता
अथ चणकरोटिका चणकारो
टिका रूक्षा श्लेष्म पित्तास्रनु
द्गुरुः विष्टम्भिनी चक्षुष्या तद्गुणा
तिलशष्कुली इतिभावप्रकाशः
रोट स्म अनादरे इतिकविक
ल्पद्रुमः स्म अरुरोटत् इति
दुर्गादासः ॥
रोदः स क्ली स्वर्गः भूमिः इति
मेदिनी ॥
रोदनं क्ली क्रन्दनं अस्रु इति
मेदिनी तस्य शुभाशुभं यथा
अनश्रु स्निग्ध रुदितं सदीनं
शुभदं स्मृतं सत्वरादीनं रुत
च रुदितं नशुभावहं इतिगा
रुडे ९८ अध्यायः कपिलायेन्
तांनेत्राश्रुणा रत्नसमूहोजातः
यथा पुष्टे मुनिं मृतं दृष्ट्वा रु
रोद कपिला भृशं सप्रकम्पा
तदश्रुबिन्दुनामस्मेरत्नसंबभूवह
रोदनाश्रुपतनेन मृतानां नरके
यथा ज्ञातिनो मारुदन्तेवसा
रोदीः पुत्र साम्प्रतं रोदना

श्रुपतनान्मृतानां नरकं ध्रुवं।
इतिब्रह्मवैवर्त्ते गणपतिखंडे २०
अध्यायः मृत शुद्धिप रो
दन निषेधो यथा श्लेष्माश्रु बा
न्धवै र्मुक्तं प्रेतो भुंक्ते यतोऽ
वशः अतो न रोदितव्यं हि।
क्रियाकार्य्या विधानतः इति
शुद्धितत्त्वं
रोदनिका स्त्री यवासः इति
राजनिर्घण्टः
रोदनी स्त्री दुरालभा इत्यमरः
रोदसी स्त्री स्वर्गः भूमिः इत्य
मरः ॥
रोदसी व्य स्वर्गः भूमिः यथा
द्यावापृथिव्यौ रोदस्यौ रो
दसी रोदसीति च इति भरत
धृतकोषः ॥
रोदस्यौ स्त्री भूमिस्वर्गौ यथा
प्रहरस्यापि भूद्यावौ रोदस्यौ।
रोदसी चेते इत्यमरः भूर्भूमिः
द्यौराकाशं एते सहिते विग्र
हीते च रोदसी रोदः शब्दयो
र्वाच्येते इति भूद्यावौ परास्पृश्येते
पतेन ईवन्त सान्त शब्द द्वयेन
एक वचनान्तेनापि भूद्यावौसम
दिते उच्येते रोदश्च रोदसी चा
पि दिवि भूमौ पृथक् पृथक्

सहप्रयोगेप्यनयो रोदः स्याद
पि रोदसीति विश्वः रोदसी
रोदसा सार्द्धं पृथ्वीस्वर्गे दिवि
क्षितौ इत्यजयः ॥ रोदसी
मव्यय मप्यस्ति यथा द्यावापृ
थिव्यो रोदस्यौ रोदसी रोदसी
तिचेति इतिभट्टीकायांभरतः
रोधः पुं नदीतीरं इत्यमर
रोधः स भरतौ ॥
रोधनः त्रि रोधकर्त्ता रोधेक्ली
इतिव्याकरणं
रोधवक्रा स्त्री नदी यथा निम्न
गारोधवक्रा चस्रवन्ती सिन्धुराप
गेतिनदीपर्य्याये माधुरिः इति
भरतः ॥
रोधोवक्रा स्त्री नदी इति त्रि
काण्डशेषः
रोधोवती स्त्री नदी इतिराज
निर्घण्टः ।
रोध्रं क्ली अपराधः पापं ।
इतिमेदिनी ॥
रोध्रः पुं लोध्रः इति मेदिनी
राजनिर्घण्टश्च ॥
रोध्रपुष्पः पुं मधूकवृक्षः इति
राजनिर्घण्टः रोध्रपुष्पिणी स्त्री धा
तकीवृक्षः इतिराजनिर्घण्टः

रोपः पुं बाणः इत्यमरः
रोपणं इतिमेदिनी छिद्रेक्ली॰
इतिहेमचंद्रः रोपणं क्ली विमो
हनं रुपधातो भावे॰नट्प्रत्यये
नेनिष्पन्नं जननं प्रादुर्भावः
न्यस्त रुहधातोः पत्तदेशे अन
ट् प्रत्ययेननिष्पन्नं इतिव्याकर
णे अंजनविशेषः यथा रोपणं
रसकं पिष्ट्वा सम्यक्संस्नाप्यवारि
णा रक्षीयाजलं सर्वं त्यजेच्चू
र्णमथोगतं शुष्कंच तज्जलं।
सर्वं पर्पटीसन्निभं भवेत् वि
चूर्णितावयेत्सम्यक त्रिवेलं त्रि
फला रसैः कर्पूरस्य रसस्तत्र
दशमांशेननिक्षिपेत् अंजये॰
न्नयने तेन नेत्राखिलगंधुछि
दः इतिभावप्रकाशः ।
रोपणाचूर्णं क्ली नयनांजनवि
शेषः यथा अथरोपणचूर्णं शि
लाया रसकंपिष्ट्वा सम्यगास्नाप्य
वारिणा रक्षीयातजलं सर्वंत्य॰
जेच्चूर्णमथो गतं शुष्कं तत्रजलं
सर्वंपर्पटी सन्निभं भवेत् विचू॰
र्णभावयेत्सम्यक त्रिवेलं त्रिफला
रसैः कर्पूरस्यरजस्तत्र दशमां
शेन निक्षिपेत् अंजयेन्नयनं
तेन सर्वदोषोपशांतये समस्त
नेत्र रोगघ्नं चूर्णं मेतन्नसंशयः
इतिभावप्रकाशः रोपणीवर्तिः
स्त्री नेत्रांजनभेदः यथा अथरो
पणीवर्तिः अशीतिस्तिलपुष्पा
णि षष्टिः पिप्पलि तंडुलाः जाती
पुष्पाणि पंचाशन्मरिचानिचषो
डश सूक्ष्मं पिष्ट्वाम्बुनावर्तिः कृता
कुसुमिकाभिधा तिमिरार्जुनशु
क्रानांनाशिनी मांसवृद्धिनुत्
पनस्या अंजने मोक्तामासाद्यह
रेणुका कुसुमिकावर्ती रोपणी इ
तिभावप्रकाशः ॥
रोप्यातिरोप्यः पुं धान्यविशेषः
अस्यगुणाः रोप्यातिरोप्यालघवःशी
घ्रपाकागुणोत्तराः अदाहिनो दो
षहरावल्याम्रत्रविवर्द्धनाः इतिराज
वल्लभः रोमं क्ली जलं इतिशब्द
चंद्रिका ॥ ७
रोमन् क्ली शरीरजातांकुरः रो
आ इति भाषा तत्पर्यायः ।
लोम २ अंगजं ३ त्वग्जं ४ चर्म
जं ५ तनूरुहं ६ इतिराजनिर्घंटः
स्थानविशेषे तस्यशुभाशुभं य
था सूक्ष्मरोमशुता श्लक्ष्णा जंघा ह
स्तिकरोपमा रोमैकैकंकूपकेस्या

रूपानान्तु महात्मनां द्वे द्वे
रोमे पंडितानां श्रोत्रियाणांत
थैवच रोमत्रयं दरिद्राणां रोगी
निर्मांसजानुकः ॥ इतिगारु
डे ६३ अध्यायः रहस्यरोम्नो
ऽस्पर्शत्व यथा नसर्प शास्त्रैः
क्रीडेत स्थानि खानि नसंस्पृशे
त् रोमाणिच रहस्यानिनाशि
ष्टेनसदा व्रजेत् इतिकौर्मे उपरि
भागे १५ अध्यायः ।
रोमकं क्ली पांशुलवणं अय
स्कान्तभेदः इतिराजनिर्घंटः ।
रोमकंदः पुं पिंडालुः इति
राजनिर्घंटः ॥
रोमकपत्तनं क्ली देशविशेषः
रूम् इतिपारस्य भाषा यथा लं
का कुमध्ये यमकोटि रस्याःप्रा
क्पश्चिमे रोमकपत्तनंच अथ
स्ततः सिद्धपुरं सुमेरुः सौम्ये ।
ऽथ याम्ये वडवानलश्च कुवृत्त॰
पादान्तरितानि तानि स्थानानि
षड्गोलविदो वदन्ति इतिसिद्धा
न्तशिरोमणौ गोलाध्यायः ।
रोमकूपः पुं लोमविवरं यथा
प्रजापतिश्चाक्षमालां ददौ ब्र
ह्मा कमंडलुं समस्तरोमकूपे
षुनिज रश्मीन्दिवाकरः इतिमार्क
ण्डेय पुराणे देवीमाहात्म्ये ॥
रोमकेशरं क्ली चामर इति
त्रिकांडशेषः ॥
रोमगुच्छं | क्ली चामरं इतिहेम
रोमगुच्छकं | चंद्रजटाधरौ ।
रोमन्थः पुं उद्गीर्य्यचर्वणे जा
डेरकाटा इति भाषा इत्यमरः
रोमभूमिः स्त्री चर्म इति राज
निर्घंटः ॥
रोमलता स्त्री लोमावलिः इति
हेमचंद्रः ॥
रोमवान् त्रि लोमविशिष्टः रोम
शब्दादस्त्यर्थेवतुप्रत्ययेननिष्पन्नः
रोमविकारः पुं रोमांचः इति
हलायुधः ॥
रोमशः पुं मेषः इति हेम
चंद्रः पिंडालुः कुंभी शूकरः
इतिराजनिर्घंटः अतिशयलोम
विशिष्टे त्रि ॥
रोमशफलः पुं टिंडिशवृक्षः
इतिराजनिर्घंटः
रोमशा स्त्री दुग्धावृक्षः इति
राजनिर्घंटः लोमशाच ॥
रोमशुकं क्ली स्थौणेयकं इ
इतिभावप्रकाशः
रोमहर्षः पुं रोमांचः इतिह॰
लायुधः ॥

रोमहर्षणं क्ली रोमांचः इत्यमरः ॥

रोमहर्षणः पुं सूतः विभीतकवृक्षः इतिमेदिनी आयस्य तस्यैव यथा प्रसूते सर्वरोमाणि वचसा हर्षितानि यत् हैपायनस्य भगवं स्ततो वे रोमहर्षणः भवन्तमेव भगवानुव्या जहार स्वयंप्रभुः इतिकौर्मे १ अध्यायः ॥

रोमांचः पुं रोमहर्षणं इत्यमरः पुलक कंटक रोमविक्रिया रोमोद्गम रोमहर्षाश्चात्र इतिभरतः ॥

रोमांचिका स्त्री रुदन्तीवृक्षः इतिराजनिर्घंटः ॥

रोमांचितः त्रि जातपुलकः रोमांचविशिष्टः तत्पर्यायः हृष्टरोमा २ इतित्रिकांडशेषः

रोमाली स्त्री वयःसंधिः इतिशब्दमाला रोमावलीव । इतिहेमचन्द्रः रोमाली ३ इतिशब्दमाला लोमराजी ४ यथा तस्याः प्रविष्टा नतनाभिरंध्रं रराज तन्वीनवलोमराजीनीवी मतिक्रम्य सितेतरस्य तन्मेखला मध्यमणे रिवार्चिः इतिकुमारसंभवः सावयौवना स्मेभवति अज्ञातयौवना यथा नीरानीर मुपागता अवणयोः सीम्नि स्फुरन्नेत्रयो श्रोत्रे लग्नमिदं किमुत्पल मितिसातंकरं न्यस्यति सेवालांकुर शंकया शिमुवी रोमावली प्रोंछति श्रान्तास्मीति मुहुः सखी मविदित श्रोणीभरा पृच्छति इतिरसमंजरी

रोमालुः पुं पिंडालुः इतिराजनिर्घंटः ।

रोमाश्रयफला स्त्री किक्किरिशात्तपः इतिराजनिर्घंटः

रोमशवल्लिविटपी ? पुं कुंभीवृक्षः इतिराजनिर्घंटः ।

रोमावली स्त्री नाभेरूर्द्ध्वलोमश्रेणी तत्पर्यायः रोमलता २

रोमोद्गमः पुं रोमांचः इतिहलायुधः ।

रोमोद्भेदः पुं रोमांचः इतित्रिकांडशेषः ॥

रोलः पुं पानीयामलकः इतिशब्दचंद्रिका ॥

रोलम्बः पुं भ्रमरः इतित्रिकांडशेषः

रोषः पुं क्रोधः इत्यमरः

रोषणः पुं पारदः हेमघर्षणोपलः इति मेदिनी कषरश्मिः । क्रोधने त्रि इतिहेमचंद्रः ॥

4087

रोहः पुं अंकुरः इतिहेमचंद्रः ॥

रोहकः पुं प्रेतभेदः रोपस्थिरि त्रि इतिमेदिनी ।

रोहणं क्ली मुकुं इतिराजनिर्घंटः जन्म प्रादुर्भावः इति रुहधातोः भावे ल्युट् प्रत्ययेन निष्पन्नं ।

रोहणः पुं पर्वतविशेषः तत्पर्यायः विहाद्रिः २ इतिजटाधरः ॥

रोहन्तः पुं वृक्षभेदः इत्यमरादिकोषः वृक्षमात्रे इति संक्षिप्तसारोणादिवृत्तिः ॥

रोहन्ती स्त्री लताभेदः इत्यमरादिकोषः लतामात्रे इतिसंक्षिप्तसारोणादिवृत्तिः ।

रोहिः पुं बीजं वृक्षः इत्युणादिकोषः धार्मिकः इतिसिद्धान्तकोमुद्यामुणादिवृत्तिः ।

रोहिणं क्ली कालभेदः इत्युणादिकोषः सत दिवसीयनवमहूर्त्तः पूर्वाह्नश्राद्धस्यगौणकालत्वेनान्तरावधिः अपराह्नश्राद्धस्य पूर्वावधिः एकोद्दिष्टश्राद्धस्य समापनकालः रोहिणंचास्य नामान्तरं यथा अत्र पूर्वाह्ने श्राद्ध मभिधाय रोहिणन्तु न लंघयेदित्यभिधानेन पूर्वाह्णश्राद्धस्य संगवान्तरो रोहिणपर्य्यन्त गौणपूर्वाह्णकालः प्रतीयते तेनरोहिणं पूर्वाह्ण श्राद्धस्यगौणकालत्वेनान्तरावधिः अपराह्णश्राद्धस्य पूर्वावधि रितिवक्ष्यते । रोहिणन्तु दिवसस्य नवम मुहूर्त्तः तस्यज्योतिषोक्त रोहिणी दैवतत्वात् रोहिणत्व मिति व्यासः आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणंबुधः विधिज्ञो विधिमास्थाय रोहिणन्तु न लंघयेत् इति श्राद्धतत्वं ॥

रोहिणः पुं भूस्तृणः वटवृक्षः रोहितकवृक्षः इतिराजनिर्घंटः

रोहिणिः स्त्री रोहिणीनक्षत्रं इतिशब्दरत्नावली ॥

रोहिणिका स्त्री कोपादिनारक्तवर्णा स्त्री इतिजटाधरः

रोहिणी स्त्री स्त्रीगवी इत्यमरः तडित् कटुम्भरा सोमवल्कः लोहिता इतिमेदिनी जिनानां विद्यादेवीविशेषः । इति

हेमचन्द्रः काश्मरी हरीतकी मञ्जिष्ठा इति राजनिर्घण्टः कपिलवर्णा वर्त्तुलाकारा विवेचनेषु शस्ता हरीतकी इति राजवल्लभः बलदेवमाता सा वसुदेवभार्य्या कश्यपपत्नी सुरभ्यंशा जाता यथा देवकी रोहिणी चेमे वसुदेवस्य धीमतः रोहिणी सुरभिर्देवी अदितिर्देवकी ह्यभूत् इति महाभारते हरिवंशः सुरभिकन्या यथा श्रीमार्कण्डेयउवाच दक्षस्य तनया याभूत्सुरभिर्नामनामतः गवां माता महाभागा सर्वलोकोपकारिणी तस्मात्तु तनया जज्ञे कश्यपात्प्रजापतेः नाम्नासा रोहिणी शुभ्रा सर्वकामदुघा नृणां तस्यां जज्ञे शूरसेनाद्रोहिति तपो ज्वलात् कामधेनुरिति ख्याता सर्वलक्षणसंयुता इति कालिकापुराणे ४ अध्यायः नववर्षीया कन्या यथा अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी दशमे कन्यका प्रोक्ता अत ऊर्द्ध्वं रजस्वला इत्युद्वाहतत्वे । अश्विन्यादि सप्तविंशति नक्षत्रान्तर्गत चतुर्थ नक्षत्रं तत्पर्य्यायः रोहिणिः २ इति शब्दरत्नावली ब्राह्मी ३ इति हेमचन्द्रः तन्नक्षत्रं शकटाकृति पंचतारात्मकं तस्याधिष्ठात्री देवता ब्रह्मा गगणमध्ये उदिते सति सिंहलग्नस्य अष्टत्रिंशत्पलाधिकदण्डत्रितयं गतं भवति यथा कम्बुकण्ठि शकटाकृतौ नभोमध्यमागतवति प्रजापतौ पंचभे गजऊपतलिप्तिकानिःसृताः सुभगि सिंहलग्नतः इति कालिदासकृतरात्रिलग्ननिरूपणं तज्जातफलं यथा साधुकर्मकार्य्ये कुशलः कुलीनः सुचारुदेहो विलसत्कलेवरः सुरागिनाकुलिताविलाशयो रोहिणीजः सधनी समानी इति कोष्ठीप्रदीपः गलरोगविशेषः । यथा रोहिणीनामक गलरोगाणां नामानि संख्यांचाह रोहिणी पंचधा प्रोक्ता कंठशालूकमेव च अधिजिह्वश्च वलयोऽलासनामैकवृन्दकः ततो वृन्दः शतघ्नीच गिलायुः कंठविद्रधिः गलौघःस्वरघ्नश्च मांसतानस्तथैव च विदारी कंठदेशे तु रोगा अष्टादशस्मृताः तत्र पंचानामपि रोहिणीनां सामान्यसंप्राप्तिमाह । गलेऽनिलः पित्तकफौ च मूर्च्छितौ प्रदूष्य

मांसंच तथैव शोणितं गलोपसंरोधकरैस्तथांकुरैः निहन्त्यसून् व्याधिरियं हि रोहिणी अनिलः मूर्च्छितः प्रवृद्धः कफपित्ते च मूर्च्छिते पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः तत्र त्रयोपि मूर्च्छिताः पृथग्दोषजाया अविवक्षमानत्वात् तस्या वातजाया लक्षणमाह जिह्वासमन्तात्भृश वेदनास्तु मांसांकुराःकंठ विरोधनास्तु सा रोहिणी वातकृता प्रदिष्टा वातात्मकोपद्रवगाढ युक्ता जिह्वासमन्तात्जिह्वायाः सर्वतः वातात्मकोपद्रवगाढयुक्ता स्तंभादिभिः रतिशयेन युक्ता पित्तजामाह क्षिप्रोद्गमा क्षिप्रविदाह पाका तीव्रज्वरा पित्तनिमित्तजाता श्लेष्मजामाह स्रोतो निरोधिन्यपि मन्दपाका गुर्वी स्थिरा सा कफसंभवा तु स्रोतोऽत्र कंठस्रोतः सन्निपातजामाह गंभीर पाकिन्यनिवार्य्यवीर्य्या त्रिदोष लिंगा त्रिभवा भवेत्सा रक्तजामाह स्फोटैश्चिता पित्त समान लिंगासाध्या प्रदिष्टा रुधिरात्मिका तु रक्तजेतरासंहारकत्वावधिमाह सद्यस्त्रिदोषजा हन्ति त्र्यहात्कफसमुद्भवा पंचाहात्पित्तसंभूता सप्ताहात्पवनोत्थिता ॥ कंठशालूकमाह कोलास्थिमात्रः कफसंभवो यो ग्रन्थिर्गले कंटकशूकभूतः खरःस्थिरःशस्त्रनिपातसाध्यस्तंकंठशालूकमिति ब्रुवंति कंटकशूक भूतः कंटकवच्छूकवद्वेदनाजनकः अधिजिह्वमाह जिह्वाग्ररूपः श्वयथुःकफात्तु जिह्वोपरिष्टादपि रक्तमिश्रात् ज्ञेयोऽधिजिह्वः खलु रोग एष विवर्ज्जयेदागतपाकमेनं अस्तनामिप्रादेवमन्वयः वलमाह बलाश एवायतमुन्नतंच शोथं करोत्यन्नगतिं निवार्य्य तं सर्वथैवाप्रतिवार्य्यवीर्य्यं विवर्ज्जनीयं वलयं वदन्ति अलासमाह गले तु शोथं कुरुतः प्रवृद्धौ श्लेष्मानिलौ श्वासरुजोपपन्नं मर्मच्छिदं दुस्तरमेनमाहुः वलाससंज्ञं भिषजो विकारं मर्मच्छिदं हृदयमर्मणि छेदेनेव वेदनाजनकं एकवृन्दमाह वृत्तोन्नतोन्तः श्वयथुः सदाहः सकंडुरोऽपाक्यमृदुर्गुरुश्च नाम्नैकवृन्दः परिकीर्त्तितोऽसौ व्याधिर्वलासक्षतजप्रसूतः अन्तः गलमध्ये अपाकी ईषत्पाकी ।

अस्तब्धः ईषत्स्तब्धः । वृन्दमाह समुन्नतं वृत्तममन्ददाहं तीव्रज्वरं वृन्दमुदाहरन्ति तच्चापि पित्तक्षतजप्रकोपाद्विद्यात्सतोदं पवनात्मकन्तु । शतघ्नीमाह वर्त्तिर्घना कण्ठनिरोधिनी या चितातिमात्रं पिशितप्ररोहैः अनेकरुक्प्राणहरी त्रिदोषा ज्ञेया शतघ्नी सदृशी शतघ्न्या । शतघ्नी सदृशी शतघ्नी घनाकृतिना अनेकरुक्कान्त पित्तकफजतोददाहकण्ठादियुक्ता शतघ्नी सदृशी लोहकण्टकसंछन्ना शतघ्नी महती शिला तत्तुल्या यतः प्राणहरी । गिलायुमाह । ग्रन्थिर्गले त्वामलकास्थिमात्रः स्थिरोऽल्परुक् स्यात्कफरक्तमूर्त्तिः संलक्ष्यते सक्तमिवाशितञ्च स शस्त्रसाध्यस्तु गिलायुसंज्ञः । गलविद्रधिमाह सर्व्वं गलं व्याप्य समुत्थितो यः शोफो रुजः सन्ति च यत्र सर्व्वाः स सर्व्वदोषैर्गलविद्रधिस्तु तस्यैव तुल्यः खलु सर्व्वजस्य । गलौघमाह शोफो महानन्नजलावरोधी तीव्रज्वरो वायुगतेर्निहन्ता कफेन जातो रुधिरान्वितेन गले गलौघः परिकीर्त्यतेऽसौ । वायुगतेर्निहन्ता उदानवायुगतिरोधकः । स्वरघ्नमाह यस्ताम्यमानः श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविमुक्तकण्ठः कफोपदिग्धेष्वनिलायनेषु ज्ञेयः स रोगः श्वसनात्स्वरघ्नः । ताम्यमानः तमःप्रपन्नः शुष्कविमुक्तकण्ठः शुष्को विमुक्तोऽस्वाधीनः कण्ठो यस्य सः अस्वाधीनता शुष्कत्वादिति अप्रकाशत्वात् अनिलायनेषु वायुवर्त्मसु श्वसनात् वातात् । मांसतानमाह प्रतानवान्यः श्वयथुः सुकष्टो गलोपरोधं कुरुते क्रमेण स मांसतानः कथितोऽवलम्बी प्राणप्रणुत्सर्व्वकृतो विकारः प्रतानवान् विस्तारवान् सुकष्टः अतिशयितं कष्टं यत्र सः । विदारीमाह सदाहतोदं श्वयथुं सुताम्रमन्तर्गले पूतिविशीर्णमांसम् पित्तेन विद्याद्वदने विदारीं पार्श्वे विशेषात्स तु येन शेते । पार्श्वे विशेषात्स तु येन शेते स श्वयथुर्येन पार्श्वेन विशेषाद्रोगी तेन शेते तस्मिन् पार्श्वे सा विदारी भवति इत्यर्थः । अथ गलरोगाणां चिकित्सा रोहिणीनान्तु साध्यानां हितं शोणितमोक्षणम् । वमनं धूमपानञ्च गण्डूषो नस्यकर्म च वातजान्तु हृते रक्ते लवणैः

प्रतिसारयेत् सुखोष्णांस्तैल गण्डूषान्धारयेच्चाप्यभीक्ष्णशः । विस्राव्य पित्तसम्भूतां सिताक्षौद्रप्रियङ्गुभिः घर्षयेत्कवलांश्चात्र द्राक्षापरूषकैः क्वथितो हितः । आगारधूमकटुकैः कफजां प्रतिसारयेत् आगारधूमः इति लोके । कटुकानि शुण्ठीपिप्पलीमरिचानि श्वेता विडङ्गदन्ती सिद्धं तैलं ससैन्धवं नस्यकर्म्मणि दातव्यं कवलञ्च कफात्मके । श्वेता अपराजिता पित्तवत्साधयेद्वैद्यो रोहिणीं रक्तसम्भवां विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत् एककालं यवान्नञ्च भुञ्जीत स्निग्धमल्पशः उपजिह्विकवच्चापि साधयेदधिजिह्विकं एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत् एकवृन्दविधानेन वृन्दञ्च समुपाचरेत् गिलायुश्चापि यो व्याधिस्तञ्च शस्त्रेण साधयेत् अमर्म्मस्थं सुसंपक्वं छेदयेद्गलविद्रधिं इति भावप्रकाशः ॥

रोहिणीपतिः पुं चन्द्रः इति हेमचन्द्रः ॥

रोहिणीरमणः पुं वृषभः इति राजनिर्घण्टः वसुदेवश्च ॥

रोहिणीवल्लभः पुं चन्द्रः इति हलायुधः वसुदेवश्च ॥

रोहिणीशः पुं चन्द्रः इति हेमचन्द्रः वसुदेवश्च ॥

रोहिण्यष्टमी स्त्री रोहिणीनक्षत्रयुक्तभाद्रकृष्णाष्टमी यथा कृष्णाष्टम्याञ्च रोहिण्यामर्द्धरात्रेऽर्चनं हरेः । कार्य्या विद्धापि सप्तम्या हन्ति पापं त्रिजन्मजं उपोषितोऽर्चयेन्मन्त्रैस्तिथिभान्ते च पारणं योगाय योगपतये योगेश्वराय योगसम्भवाय गोविन्दाय नमो नमः स्नानमन्त्रः यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः । अर्चनस्य विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः शयनस्य सर्व्वाय सर्व्वेश्वराय सर्व्वपतये सर्व्वसम्भवाय गोविन्दाय नमो नमः पारणस्य स्थण्डिले पूजयेद्देवं सचन्द्रां रोहिणीं तथा शङ्खे तोयं समादाय सपुष्पफलचन्दनं जानुभ्यामवनीं गत्वा चन्द्रायार्घ्यं निवेदयेत् क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव गृहाणार्घ्यं शशाङ्केदं

रोहिण्या सहितो मम प्रियै
वसुदेवाय वलदेवाय नन्दाय
यशोदायै अनघं वामनं शौरिं
वैकुण्ठं पुरुषोत्तमं वासुदेवं हृ
षीकेशं नृसिंहं दैत्यसूदनं ।
वराहं पुण्डरीकाक्षं श्रीकान्त मज
मव्ययं दामोदरं पद्मनाभं के
शवं गरुडध्वजं गोविन्द मच्युतं
देवमनन्तमपराजितं अधोक्षजं
जगद्बीजं सर्गस्थित्यन्तकारकं अ
नादि निधनं विष्णुं त्रिलोकेशं त्रि
विक्रमं नारायणं चतुर्बाहुं शङ्ख
चक्रगदाधरं पीताम्बरधरं दिव्यं व
नमालाविभूषितं श्रीवत्साङ्कं जग
द्धाम श्रीपतिं श्रीधरं हरिं यं
देवं देवकी देवी वसुदेवादजीज
नत् भौमस्य ब्रह्मणो गुप्त्यै तस्मै
ब्रह्मात्मने नमः नामान्येतानि सं
कीर्त्य गत्वर्थं प्रार्थयेत्पुनः ।
त्राहि मां सर्वपापघ्न दुःखशोका
र्णवात्प्रभो देवकीनन्दन श्रीश
हरे संसारसागरात् दुर्वृत्तां
स्त्रायसे विष्णो ये स्मरन्ति सकृ
त् सोऽहं देवातिदुर्वृत्त स्त्राहि मां
शोकसागरात् पुष्कराक्ष नि
मग्नोऽहं महत्यज्ञानसागरे त्रा
हि मां देवदेवेश त्वामृतेऽन्यो
न रक्षिता स्वजन्म वासुदेवा
य गोब्राह्मणहिताय च जगद्धि
ताय कृष्णाय गोविन्दाय नमो नमः
शान्तिरस्तु शिवं चास्तु धनाढ्यो
ख्याति राज्यभाक् इति गारुडे
१३२ अध्यायः ॥
रोहित पुं सूर्य्यः इति मेदि
नी वर्णभेदः मत्स्यभेदः इति
संक्षिप्तसारोणादिवृत्तिः
रोहित स्त्री मृगी लताभेदः
इति मेदिनी ॥
रोहितं क्ली कुङ्कुमं रक्तं ।
ऋजुशक्रधनुः इति मेदिनी
रोहितः पुं मीनविशेषः मृग
भेदः रोहितकवृक्षः इति
मेदिनी रक्तवर्णः रक्तवर्णवि
शिष्टे त्रि इत्यमरः रोहि ।
तमत्स्यस्य गुणाश्च यथा
हृस्वः शल्कीस्थितकृतिस्तु मत्स्या
यः श्रेष्ठोऽसौ लोहितो वृत्त
वक्त्रः कोलं वस्य रोहितस्या
पि मांसं वातं हन्ति स्निग्ध स्वभा
तिवीर्य्यं इति राजनिर्घण्टः अपि
च रक्तोदरो रक्तमुखो रक्ता
क्षो रक्तपक्षति कृशपक्षो क
स्मश्रेष्ठो रोहितः कथितो बुधैः
रोहितः सर्वमत्स्यानां वरो

वृष्योऽर्दितानिलजित् कषायानु
रसः स्वादुर्वातघ्नो नातिपित्तकृत्
ऊर्द्धजत्रु गताश्रोगान्हन्याद्रोहितमत्
स्यकं । इति भा
वप्रकाशः ॥ ।
रोहितकः पुं वृक्षविशेषः ।
रोहडा इति भाषा तत्पर्य्या
यः रोही २ प्लीहशत्रुः ३ दाडि
मपुष्पकः ४ इत्यमरः रो
हीतकः ५ रोहितः ६ रोहि
णः ७ कूटशाल्मलिः ८ दाडिमपु
ष्पः ९ सदाप्रसूनः १० कूटशाल्म
लिः ११ विरोचनः १२ शाल्मलिकः
१३ अस्य गुणाः कटुत्वं स्निग्धत्वं
कषायत्वं सुशीतलत्वं कृमि ।
दोषव्रणप्लीहरक्तनेत्रामयापहत्वंच
हत्वं च इति राजनिर्घण्टः अपि च
रोहितो लोहितो रोही लो
ही दाडिमपुष्पकः रोहीतकः ।
प्लीहघाती रुच्यो रक्तप्रसादनः
इति भावप्रकाशः अन्यच्च रो
हीतको यकृत्प्लीहगुल्मोदरहरः
स्मृतः इति राजवल्लभः ॥
रोहिता स्त्री रोगादिना रक्तव
र्णा यथा रोहिणी रोहिताव
र्णा लोहिनी लोहिता च सा इ
ति जटाधरः ॥
रोहिताश्वः पुं अग्निः इत्यमरः
हरिश्चन्द्रराजपुत्रः इति मेदिनी ।
रोहितिका स्त्री रोगादिना रक्तव
र्णा इति जटाधरः ॥
रोहितेयः पुं रोहितवृक्षः ।
यथा प्लीहारी रोहितेयः स्या
द्रक्तपुष्पश्च रोहितः इति भर
तधृत रत्नकोषः
रोही न पुं रोहितकवृक्षः ।
अश्वत्थवृक्षः वटवृक्षः इति
मेदिनी ॥
रोहीतकः पुं रोहितकवृक्षः ।
इति राजनिर्घण्टः ॥
रौच्यः पुं मनुविशेषः यथा
रौच्यादयस्तथान्येऽपि मनवः
संप्रकीर्त्तिताः रुचेः प्रजापतेः
पुत्रो रौच्यो नाम भविष्यति ।
इति मात्स्ये ९ अध्यायः तन्म
न्वन्तरे देवादयो यथा त्रयोदश
मपर्य्याये ये रौच्यस्य मनोः सुराः
सप्तर्षीश्च नृपांश्चैव वदतो मे
निशामय सुपर्वाणः सुरा स्तत्र
सुकर्माणस्तथा परे सुशर्माण
स्तथा ह्येते समस्ता मुनिसत्तम म
हाबला महावीर्य्या स्तेषामिन्द्रो दिव
स्पतिः भविष्यत्य सप्तर्षीनादतो
मे निशामय । इति मार्

अयञ्चैव तत्त्वदर्शी निरुत्सुकः
निर्मोहः सुतपा आसीत् निष्प्रकंप
प्रसमः । चित्रसेनो विचित्र
श्च नयकृन्निर्भयो दृढः सुनेत्रस्त
नुद्धिश्च सुरतश्चैव तत्सुताः ।
इति मार्कण्डेयपुराणे ॥ अन्यद्धि
वरांगु विशद्ध इष्टव्यं ॥ बिल्व
काष्ठदण्डः तत्पर्य्यायः वैल्वः २
इतिहेमचन्द्रः ॥
रौट ञ नादे इति कविकल्प
लाविद्रुमः चतुर्दशस्वरी ञ अ
रुरौटत् नादरोऽनादरः रौटनि
त्वलंलोकः इति दुर्गादासः ।
रौड ञ अनादरे इति कविक०
ल्पद्रुमः ञ अरुरौडत् इति दु
र्गादासः ॥
रौद्रं क्ली शृंगाराद्यष्टरसान्तर्ग
तोरसः तत्पर्य्यायः उग्रं २
इत्यमरः हेक्रोधस्याश्रये रुद्रो
देवता यस्य रौद्रं । यदाह
भरतः शृङ्गारो विष्णुदेवः स्या ।
द्धासः प्रमथदैवतः करुणोयम
देवः स्याद्रौद्रो रुद्राधिदैवतः ।
इति हेक्रोधस्याश्रये उग्रातिक्रो
धा समवैति उग्रः उत्विर्यसम
वायने नाम्नीति रक्त निपातनात्
त्वसगाः सर्व्वाभिभाविता रौद्रः य
था

रावणचरितादि प्रभृतीभत्सरौद्रे
क्लीवे नृपभेदात् अन्ये पुंसि वीभत्स
रौद्रौ चेति पुंलिंग पाठदृष्ट
श्लक्ष्णः इतिभरतः ॥ अपिच
अथरौद्रः रौद्रः क्रोधस्थायिभावो
रक्तो रुद्राधिदैवतः आलम्ब ।
नमरिपुस्तत्र उद्दीपनं मतं ।
मुष्टिप्रहार पातन विकृत छेदा
वदारणैश्चैव संग्राम संभ्रमाद्यैरस्या
दीप्तिर्भवेत्प्रौढा ॥ भ्रुवि
भंगोष्ठ निर्दशबाहुस्फोटन तर्जनाः
आत्मावदानकथन मायुधोत्क्षे
पणानिच अनुभावास्तथाक्षेपक्रू
र सन्दर्शनादयः उग्रता वेग रो
मांच स्वेद वेपथवो मदः मोह
हर्षोदयश्चात्र भावाः स्युर्व्यभिचा
रिणः यथा कृत मनुमतं दृष्टंवा
यैरिदं गुरुपातकं मनुजपशुभि
र्निर्मर्य्यादैर्भवद्भिरुदायुधैः नरक
रिपुणा सार्द्धं तेषां सभीमकि
रीटिनामयमहमसृङ्मेदो मांसैः
करोमि दिशां बलिं अस्यकुरु
वीराद्रेरमाह रक्तास्य नेत्रताचा
त्र मेदिनी युद्धवीरतः इति
साहित्यदर्पणे ३ परिच्छेदः ।
रौद्रः पुं सूर्य्यतेजः तत्पर्य्यायः
घर्मः २ इतिमेदिनी प्रकाशः ३

द्योतः ४ आतपः ५ इत्यमरः
तस्य गुणाः आतपः कटकोष्ण
तः स्वेदमूर्च्छातृषावहः दाहवै
वर्ण्यजननो नेत्ररोगप्रकोपनः
इतिराजवल्लभः सप्तरौद्रा यथा
ज्वरः पिङ्गलो रौद्रो घोरा
ख्यः कालसंज्ञितः अग्निनामा
हुतोरौद्रः सप्तरौद्राः प्रकीर्तिताः
ग्रन्थान्तरे सप्तमो रौद्रः प्राणा
हः तेषां फलानि यथा पिंग ।
लोरौद्रनामाच कालरूपः प्रजात
यां स्पर्शने वज्ररोगः स्यात्सर्व्वजी
वसमुद्भवः ज्वरो रौद्रनामाच
घोरश्चैव कारयेत् व्रणादिपि
त्तरोगंच नानाक्लेशकरो त्वणा
अग्नि नाम्ना यदा वर्षे रौद्रोभ
वतिनान्यथा उत्तापेन दिलिङ्गु
घ्नतरालां रोगदो भवेत् रौद्र
नामा महारौद्रो यत्राब्दे च भवे
द्ध्रुवं विलोहेरगव्रणा ऊर्याना
नारोग समन्वितं घोरनामाम
हारौद्रो घोरश्चैव कारयेत् उ
त्तापेन सदा दग्धं नानारोगस
मन्वितं कालनामा महारौद्र उ
त्तापे पीडनं सदा नानारोग
समाकुलं व्रणादि कण्डुकं भवेत्
इतिज्योतिषे ॥ रसविशे

षः इति मेदिनी तद्विवरणं
क्लीवलिंग रौद्रशब्दे द्रष्टव्यं हे
मन्तस्त्वः इतिहेमचन्द्रः यमः
इति धरणिः ॥
रौद्रः त्रि तीव्रः भीषणः इति
मेदिनी रुद्रसम्बन्धिनिच ।
रौद्री स्त्री चेडी इतिमेदिनी ।
रुद्रजटा इतिराजनिर्घण्टः रु
द्रदेवत्कृतमहारौद्रोमाया महा
रौद्रीनाम्नीचामुण्डा च यथा प
कञ्च महादेवो रुरु स्तथ्यापम
हामृधे स च माया महारौद्री
रौद्रथी विससर्ज ह सा माया
वह्नधे भीमा सर्व्वदेवप्रमोहिनी
तया ते मोहिता देवाः सद्यो
निद्रां न भेजिरे देवीच त्रि
शिखिनाजौ तं दैत्यं समता-
डयत् तया तु ताडितं तस्यदेत्य
स्य शुभलोचने चर्म मुण्डउभे
सम्यक्पृथक् भूते बभूवतुः
रुरोस्तु दानवेन्द्रस्य चर्ममुण्डे ।
हृतारणाग्रतः अपहृत्य हरेद्देवी
चामुण्डा तेन साभवत् सर्व्वभूत
महारौद्री यादेवी परमेश्वरी ।
संहारिणी तु या चैव कालरात्रिः
प्रकीर्तिता इति वाराहे त्रिश
क्तिमाहात्म्ये ॥

रौप्यं क्ली रूप्यं इतिराज
निर्घंटः तत्करणं यथा मध्या
ह्नगुरु ताम्रचकरेणमातृकंरा
संपमनाव भवेद्रौप्यस्वर्णकर
णोऽपुण इतिगारुडे १९८ अध्यायः
रौमंक्ली शाम्भविलवणं इत्यम
रटीकायांरामाश्रमः ॥
रौमकं क्ली शाम्भरिलवणं त
त्पर्यायः वसुकं इत्यमरः
रुमानामनदीलवणाकरःतत्र
भवंरौमकं ट ह्येकादितिसःरौमं
ततःस्वार्थे कःरौमकं इति त
ट्टीकायांभरतः ॥
रौमलवणं क्ली शांभरिलवणं
इतिरत्नमाला ॥
रौरवः पुं नरकविशेषः घो
रः इतिमेदिनी अस्यविवरणं
यथा रौरवे कूटसाक्षीत्व याति
यश्चान्टतीनरः तस्य स्वरूपंवद
तो रौरवस्य निशामय योजनानां
सहस्त्रे द्वे रौरवो हि प्र
माणतः जानुमात्र प्रमाणन्तत
श्वभ्रं सुदुस्तरं तत्राङ्गार चयो
येन कृतं तद्धरणी समं तन्मध्य
स्ततातितीव्रेण तापितास्वरभू
मिना तन्मध्ये पापकर्माणं वि
मुंचंतियमानुगाः सदह्यमानस्तीव्रे
णाव

ह्निना तेन धावति पदे पदेच
पादोस्य शीर्य्यते जायते पुनः
अहोरात्रेणोद्धरणं पादन्यासेस
गच्छति एवंसहस्रं विस्तीर्णंयो
योजनानां विमुच्यते इतिमार्कंडे
यपुराणे पितापुत्रसम्बादनामा
ध्यायः ॥
रौरवः त्रि चंचलः धूर्त्तः घोरः
इतिशब्दरत्नावली ॥
रौहिष पुं रोहिषमृगः यथा
पथ रौहिषांमध्ये चरतीति भ
वभूतिः इत्यमरटीकायांभरतः
रौहिणं क्ली दिवसनवममुहूर्त्तः
यथा अत्र पूर्वाह्ने श्राद्ध मभि
धाय रौहिणन्तु न लंघयेदित्य
भिधानेन पूर्वाह्नश्राद्धस्य संगवा
न्तो रौहिणा पर्य्यन्त गौण पू
र्वाह्नकालः प्रतीयते तेन रौ
हिणं पूर्वाह्न श्राद्धस्य गौणका
लत्वेनोत्तरावधिः अपराह्नश्राद्ध
स पूर्वावधि रित्यवगम्यते तत
श्च पूर्वदिने संगवात्परं रौहि
णपर्य्यन्तं तिथि लाभे परदिने
मुहूर्त्तत्रयमात्रे तत्तिथिलाभे पू
र्वदिनेश्राद्धं रौहिणान्तरूप गौ
ण पूर्वाह्नलाभात् परदिने त
स्यालाभावात् उभयदिनसंगवलाभे

परदिने शुक्लपक्षे तिथिर्ग्राह्या
इतिवचनात् रौहिणन्तु दिवस
स्यनवममुहूर्त्तं तस्य ज्योतिषे।
तत्रोहिणी दैवतत्वाद्रौहिणत्व
मिति इतिश्राद्धतत्वं ॥ ।
रौहिणः पुं चंदनवृक्षः इति
त्रिकांडशेषः ॥
रौहिणेयं क्ली मरकतमणिः इ
तिराजनिर्घंटः ॥
रौहिणेयः पुं बलदेवः बुध
ग्रहः इत्यमरः ॥
रौहिणेयः त्रि गोवत्सः इति
मेदिनी ॥
रौहिषं क्ली कत्टणं इतिमे
दिनी रौहिषः पुं मृगविशेषः
इत्यमरः रोहितमत्स्यः इत्यजय
पालः ।
रौहिषी स्त्री मृगी दूर्वा इ
तिसंक्षिप्तसारोणादिवृत्तिः ।
रौल्यं क्ली रुक्षता रूक्षस्यभाव
इत्यर्थेष्यप्रत्ययेननिष्पन्नं त
थाहि तैलं यद्दोत्स दोषघ्नं
तैलं पद्मादिकस्यतं तेनत्वां।
स्नापयाम्यद्य जगन्मातरमम्बि।
का इतिदुर्गापूजायां महाष्टमीम
हानवम्या महास्नान प्रकरणेदे
वीपुराणं ।

ल लकारः सत्व यवर्गस्य तृती
योवर्णो व्यंजनस्याष्टाविंश वर्णश्च
अस्योच्चारण स्थानं दन्तः इति
व्याकरणं तस्य स्वरूपं यथा
लकारं चंचलापांगि कुंडलीत्रय
संयुतं पीत विद्युल्लताकारंसर्व
रत्नप्रदायकं ॥ पंचदेवमयं
वर्णं पंचप्राणमयं स त्रिशक्ति
सहितं वर्णं त्रिबिंदु सहितं सदा
आत्मादि तत्व सहितं हृदिभा
वय पार्वति इतिकामधेनुतंत्रं
अस्यलेखनप्रकारो यथा
कुंडलीत्रय संयुक्ता वामादृत्त
गता त्वधः पुनरूर्ध्व गतारेखा
तासु नारायणः शिवः ब्रह्मश
क्तिश्च सन्निवेश्यान मस्य प्रवर्त्त
ते इतिवर्णोद्धारतन्त्रं ॥
तत्पर्य्याया यथा ल अनन्दःपू
तनापृथ्वी माधवः शक्रवाचकः
बलानुजः पिनाकीशा व्यापको
मांससंज्ञकः पृथ्वी नादोऽमृतंदे
वीलवणं वारुणीपतिः शिखा
वाणीक्रिया माता भामिनी का
मिनीप्रिया ज्वालिनी वेगिनीना
दःप्रद्युम्नः प्लोषणः हविः विया
त्म मंत्रावली चेता मेरु गिरिः
कलावसः इतितंत्रे अस्यध्यानं

यथा चतुर्भुजांपीतवस्त्रांरक्त। पंकजलोचनां सर्वदा वरदां तीमां सर्वालंकारभूषितां यो गीन्द्रसेवितां नित्यां योगिनीं योगरूपिणीं चतुर्वर्गप्रदां दे वीनागहारोपशोभितां। एवं ध्यात्वालकारन्तु तन्मन्त्रंदशधा जपेत् इति वर्णोद्धारतंत्रं। लं क्ली पृथ्वीवीजं इति तंत्रं। लः पुं इंद्रः। इतिमेदिनी

लक क स्वादप्रापने इतिक विकल्पद्रुमः स्वादो रसोपादान क लाकयति मोदकं वालकः इतिदुर्गादासः॥

लकचः पुं लकुचवृक्षः इतिश ब्दरत्नावली॥

लकुचः पुं वृक्षविशेषः डेऊया इतिमादार इतिच भाषा तत्प र्य्यायः लिकुचः २ शालः ३ क षायी ४ दृढवल्कलः ५ डुडः ६ कार्ष्य ७ शूरः ८ स्थूलस्कंधः ९ अस्य गुणाः तिक्तरसत्वं कषाय त्वं उष्णत्वं लघुत्वं कंठदोषहर त्वं दाहित्वं मलसंग्रहदायकत्वं च इतिराजनिर्घंटः अपिच ल कुचः तद्रूपनसो लिकुचोडहुरित्य पि आमं लकुच मुसंच गुरुविष्ट भ्यतया मधुरंच तथाम्लंचदोष त्रितयरक्तकृत् शुक्राग्निनाशनेत्रा पिनेत्रायारहितंस्रतं सुपक्वं तत्तु मधु मन्त्र वातिल पित्तकृत् कफवन्हिकरंरुच्यंवृष्यं विष्टंभकं ततः इतिभावप्रकाशः। अन्यच्च लकुचं गुरुविष्टम्भिस्वा दम्लं रक्तपित्तकं श्लेष्मकारिसमी रघ्नं मुख्यं शुक्राग्निनाशनं इति वैद्यकं।

लक्तकः पुं अलक्तकः इतिश ब्दरत्नावली जीर्णवस्त्रखंडं नेक डा इति भाषा तत्पर्य्यायः कर्पटः २ इत्यमरः। नक्तकः ३ इति भरतः हे मलिनत्वाद्दिष्टजी र्णवस्त्रखंडे नेकडा इतिख्याते। लक्तकाद्यष्टकं वस्त्रमात्रे इतिके चित् पटोऽस्त्री कर्पटः शाटः क्षिचय प्रोत लक्तकाः इतिरभ सः लक्यते हीनै राख्यायते अन्न भूयते लक्तः रक लक केस्ता दप्रापने चुर्भ्यान्निर्वर्ति विभाषि तत्वात् जिः कर्मनि क्तः ततः स्वार्थेकः लक्तकोऽन्तस्थादिः अ न्यातेस्म अक्तं व्यक्तं अन्नोः तत्त न अक्तं कंठखं यस्मादिति पि परवदुग्रीहो मनीषादित्वात् अकस

पूर्वालोपे नक्तक स्तवर्गपंचमा दिरपि इतितट्टीकायां भरतः। लक्तकर्मा न पुं रक्तवर्णलोप इतिशब्दचंद्रिका।

लख सृपि इति कविकल्पद्रुमः लखति सृपि गतौ इतिदुर्गादा सः॥

लख इ सृपि इतिकविक ल्पद्रुमः इ लंख्यते सृपि गतौ इतिदुर्गादासः॥

लग इ खंजे गतौ इतिकवि कल्पद्रुमः इ लंग्यते। खंजो गतिवैकल्पं इतिदुर्गादासः।

लग म प संगे। इतिकविकल्प द्रुमः मलगयति प अलगीत्। लगति अपरउप्रे इतिदुर्गा दासः॥

लगक रुके इतिकविकल्पद्रुमः कलागयति रुके स्वादाप्ताः। रुके इति रक्तक्वादप्रापने। इत्यस्मिन् रनित्यत्वे भावे अप्राप्ति रूपं इतिदुर्गादासः॥

लगडं त्रि चारु इति[illegible] त्रिकांडशेषः

लगितं त्रि संगयुक्तं लागा इ तिभाषा इतिलगधातोः कर्मणि क्तप्रत्यये ननिष्पन्नं॥

लगुडः पुं दंडः लाठी इति भाषा इत्यमरः लगुड वंशा दिमयो दंडः लोहमयोऽस्त्र भेदः इति सुभूतिः लगुडो लोहमयी यष्टिः वस्त्रोपचारा दित्यन्ये इतिभट्टीकायांभरतः

लग्नं क्ली राशीनामुदयः इत्यम रः राति फलं राशि स्लाल यशाकारः अहोरात्रमध्ये द्वादश राशय उदयन्ति उदयः पूर्वाचल संयोगः तेषां क्रमेण उदयाचल संयोगो लग्नं डानस्त्री बीडेग दित्वान्निपातनात्तस्य गः इतित ट्टीकायां भरतः तेषां भून्याय नांशपरिमाणं यथा रामोगवे दे ३।४७ नेलधिमैन्ने ४।५ वाणाग रसैः ५ ६ पंच स्व सा स्त्रैस्त्र ५।४०। वाणाऊवेदे ५।४९ वि षयोंकयुग्मैः ५।२९ क्रमोत्क्रमा न्मेष तुलादि मानं तथाहि।

१।३ ४०॥ ७।५।२९॥
२।४।२४॥ ८।५।४९॥
३।५ ।६॥ ९।५।४०॥
४।५। ५॥ १०।५। ६॥
५।५। ४९॥ ११।४। २४
६।५। २९॥ १२।३ ।४०॥

इतिदीपिका। दशाव्यंगुलाधिक

पंचांगलग्ने कलिकाताख्यदेशे
वर्त्तमानोनविंशांशप्रमाणि
ककारिका यथा वेदांगैः ४।६
सोन्नवेदे ४।४८ विंशगनवमैः ५।
२७ सोऽन्तरीत्तामुनाग्नैः ५।४० पा
दावाराग्नयासैः ५।३४ गगनग
नयनैः ५।२९ षट्त्रिंभि ५।३६ स
द्वेदे ५।४१ अंकल्पाभिः ५।१९
सप्तदशोऽस्त्रविभि ४।३५ दन्तो
ऽष्टभिः ३।५८ सोता वेदे ३।४७ मे
षादेकोनविंशे गणित परिगते
मान मत्रायनांशे । उदयलग्ना
स्तलग्नयो दिनं प्रति रविभोग्यय
या लग्न दंड पलं छिन्नंतत्संख्ये
क्रमतः पलं विपलंच रवेर्भो
ग्य मेवं कल्पन मस्तुभे ॥ इति
ज्योतिषे पलयो र्विवरणं यथा ।

तत्रप्रवीनलग्नमानं । ।

लग्नाः दिनभुक्तं ।मासभुक्तं।
यथा पलं। विपलं।दंडः।पलं
१ मेषः । ७। ३४॥३।४७॥
२ वृषः । ८। ३०॥३।४७॥
३ मिथुनं । १९।१२॥५।६॥
४ कर्कटः । ११। २०॥५।४०॥
५ सिंहः । १९।२२॥५।४९॥
६ कन्या । १९। ५४॥५।३९
७ तुला । १९।५८॥५।३९
८ वृश्चिकः ।१९।२२॥५।४९॥
९ धनुः ।१९।२०॥५।४०॥
१० मकरः ।१९।१२॥५।६॥
११ कुंभ । ८।३४॥४।१७॥
१२ मीनः । ७। ३४॥३।४७॥

तत्रस्वदेशाधुनिकलग्नमानं ।

लग्नाः दिनभुक्तं । मासभु
क्तं यथा पलं।विपलं।दंडः।पलं
१ मेषः । ८।१२॥४।६॥
२ वृषः । ९।३६॥४।४८॥
३ मिथुनं ।१९।५४॥५।२७॥
४ कर्कटः ।११।२०॥५।४०॥
५ सिंहः ।११।८॥५।३४॥
६ कन्या ।१०।५८॥५।२९॥
७ तुला ।११।१२॥५।३६॥
८ वृश्चिकः।११।२२॥५।४१॥
९ धनुः ।१०।३४॥५।१९॥
१० मकरः ।९।१०॥४।३५॥
११ कुंभः ।७।५६॥३।५८॥
१२ मीनः ।७।३४॥३।४७॥

अथ जन्मकालीन लग्नस्थग्रहस्य
वितफलं लग्ने सूर्य्ये ऽतिरोगीशा
शिनि वलयुतो रूपवान्विनयुक्तोभौ
मेऽङ्गः सुवाग्मी शशधरतनयेसर्व
शास्त्रार्थवेत्ता जीवे दातापवित्रःसु
कवि रथ गते भार्गवे मंडलेशः
सौरे कंडूतिगात्रस्तमसिचनियतं।

वंचितो धर्म्महीनः इतिज्योतिस्तत्त्वं
॥ अपिच । रविरुपा
व उदयन्त समारभ्य राशौ भानुः
स्थितो हर स्वराशपादे व्रजेदक्षि
षड्भिः षड्भिस्तथा निशा मीने मेषे
च पंच सु स्मृतस्ता वृष कुंभयोः ।
मकरे मिथुने तिस्रः पंच चापे च
कर्कटे सिंहे चवृश्चिके षट्च सप्त
कन्यातुले तथा पला लग्नप्रमा
णानघटिकाः परिकीर्त्तिताः शरएव
वशानेषु रसाब्धीषुधिसागराः ल
ङ्कोदया द्वि हे वत्स लग्ना मेषाद्।
योऽथवा मेषलग्ने भवेद्धन्या वृषे
भवति कामिनी मिथुने सुभगा
कन्या वेश्या भवति कर्कटे सिंहे
वैवात्स्यश्चाच कन्यायां रूपसे।
युता तुलायां रूपैश्वर्य्य वृश्चिके
कर्कशा भवेत् सौभाग्यं धनुषि।
साव मकरे नीचगामिनी । कुं।
भे वैवात्स्यश्चास्यान्मीने वैराग्यसं
युता तुला कर्कटको मेषो
मकरश्चैव सुखापः चरकार्य्या।
णिजर्य्याश्च स्थिरकार्य्याणि चैवहि
पंचाननो वृषः कुम्भो वृश्चिकःस्मृः
स्थिराणि हि कन्या धनुश्चमीन
श्चमिथुनं द्विस्वभावतः द्विस्वभा।
वानि कर्म्माणि कुर्य्यादेषु विचक्षणः
यात्रा चैरणा कर्त्तव्याप्रवेशश्च
स्थिरेणतु देवस्थापन वैवाहं
द्विस्वभावेन कारयेत् इतिगा
रुडे ६२ अध्यायः

लग्नं पुं स्तुतिपाठकः तत्पर्य्या
यः प्रातर्गेयः २ स्तुतिव्रतः ३
इतिचिकांडशेषः स्तुतः ।
इतिजटाधरः ॥

लग्नः त्रि सक्तः लज्जितः इति
मेदिनी ॥

लग्नकः पुं प्रतिभूः इत्यमरः ।
हेलागा इति जामिन इतिवाख्या
ते तत्कार्य्ये लग्नकः उलस्त्री
त्रीडेकः स्वार्थेकः प्रतिनिधिर्भव
ति प्रतिभूः क्षिप इति भट्टी
कायां भरतः ।

लग्निका स्त्री नग्निका इत्यम
रटीकायां

लघ इ उ अभुग्गात्योः इति
कविकल्पद्रुमः इलंघ्यते उ०ल
घते अभ्यकोजननाभावः तथाच
ये गुणा लंघने प्रोक्ता स्ते गुणा
लघुभोजने इतिवैद्यके लंघ
ने उपवासे इत्यर्थः इतिदुर्गा
दासः ॥

लघ इ शोषे इतिकविकल्पद्रु
मः इ लंघ्यते शोष इत्यस्मी

करणं । यं व्याधि इतिदीर्घां
गंकदाचित्रन लंघति इतिरत्ना
पुषः गतावप्यन्ये अन्येचानंघि
षुः शैलान् इतिदुर्गादासः ।
लघ इक स्विषि इतिकविकल्प
द्रुमः इकलंघयति स्विषिदीर्घोऽ इ
तिदुर्गादासः ॥
लघट् पुं वायुः इत्युणादिकोषः
लघटिः पुं वायुः इत्युणादि
कोषः लघिमा (न) पुं लघुत्वं त
त्तु शिवस्याष्टैश्वर्यान्तर्गत ऐश्व
र्यविशेषः यथा लघिमा वशि
तेशित्वं प्राकाम्यंमहिमाणिमा य
त्र कामावसायित्वंप्राप्तिरैश्वर्यम
ष्टधाइति हेमचंद्रः ॥
लघिष्ठः त्रि अयमनयोरेषामेषा
तिशयेन लघुः इत्यर्थे इष्ठप्र
त्ययेन निष्पन्नः इतिव्याकरणं
लघीयान् (स्) त्रि अयमनयो रेषा
म्वाअतिशयेन लघुःइत्यर्थेईयस
प्रत्ययेन निष्पन्नः इतिव्याकरणं
लघु क्ली शीघ्रं इत्यमरः कृष्णा
गुरु इतिमेदिनी लामज्जकं ।
इतिराजनिर्घंटः ॥ ।
लघुःस्त्री पृक्कानामऔषधिः इ
तिमेदिनी ॥
लघुः त्रि अगुरुः मनोज्ञः ॥
निःसारः इतिमेदिनी ॥ ह्रस्वः
इतिहेमचंद्रः । व्याकरणोक्त ल
घुसंज्ञा यथा ह्रस्वो लघुः
दीर्घो गुरु रित्युच्चारणवशाद्ध्रस्वेन
तथा संयोगे सति ह्रस्वोपि गुरुर्ग
ह्यतेऽन्यच्छइति वर्णबोध ।
इति दुर्गसिंहकृतकलापवृत्तिः ।
छंदःशास्त्रोक्ते लघुलक्ष
णं यथा म स्त्रिगुरु स्त्रिलघुश्च
नकारो भादिगुरुः पुन रादि लघु
र्यः जो गुरुमध्यो रो लघुमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ।
गुरु रेकोगकारस्तु लकारो लघु
रेककः इतिछन्दोमंजरी ॥
लघुकायः पुं छागः इति त्रिकां
डशेषः तद्वशरीरस्य ॥
लघुकाश्मर्यः पुं कट्फलवृक्षः ।
इतिराजनिर्घंटः ॥
लघुखट्विका स्त्री क्षुद्रखट्वा तत्प
र्यायः आसन्दी २ इति हारा
वली ।
लघुगणः पुं अश्विनी पुष्य हस्त
नक्षत्राणि यथा उग्रः पूर्वमघान्त
काध्रुवगण स्त्रीण्युत्तराणि स्वभूर्वा
मादित्य हरित्रयं चरगणः पुष्या
श्विहस्तालघुः इतिदीपिका ॥
लघुगर्गः पुं त्रिकंटकमत्स्यः ।

इतिहारावली ।
लघुचिर्भिटा स्त्री मृगेर्वारु इ
तिराजनिर्घंटः ॥
लघुजंगलः पुं लावकपक्षी इति
त्रिकांडशेषः ॥
लघुदन्ती स्त्री क्षुद्रदन्तीवृक्षः य
था लघ्वी दन्ती विशल्या चस्या
दुदुम्बरपर्ण्यपि तथैरंडफलाशी
घ्रा श्येनघंटा घुनप्रिया वराहांगी
वकथितो निकुंभश्च मकूलकः ।
अस्या गुणाः दंती हयं सरंपा
केरसे च कटु दीपनं गुदांकुरा
श्मसूलास्र कंडू कुष्ठ विदाहनु
त् तीक्ष्णोस्नं हन्ति पित्तास्रक
फशोथोदर क्रिमीन् इतिभावप्रका
शः तत्फलगुणाः । लघुदंती
फलन्तुस्यान्मधुरं रसपाकयोः ।
शीतलं स्रष्टविन्मूत्रं गलशोथक
फापहं इतिभावप्रकाशः ।
लघुडुंडुभिः पुं क्षुद्रवाद्यं इति
शब्दरत्नावली ॥
लघुद्राक्षा स्त्री काकली द्राक्षा
इति राजनिर्घंटः ॥
लघुनामन् क्ली अगुरु इतिश
ब्दचंद्रिका ॥
लघुपंचमूलं क्ली क्षुद्रपंचमूलग
णं तत्र शालपर्णी पृश्निपर्णी
बृहती कंटकारी गोक्षुरसंयुक्त
यथा शालपर्णी पृश्निपर्णी वा
र्त्ताकी कंटकारिका गोक्षुरः पं
चभिश्चैतैः कनिष्ठं पंचमूलकं
अस्य गुणाः पंचमूलं लघु स्वा
द्वल्पं पित्तानिलापहं नात्युष्णं
बृंहणं ग्राहि ज्वर श्वासाश्मरी प्र
णुत् इतिभावप्रकाशः
लघुपत्रकः पुं रोचनी क्षुद्रा
रोचनी इतिख्यातः इति शब्द
चंद्रिका ।
लघुपत्री स्त्री अश्वत्थीवृक्षः इ
तिराजनिर्घंटः
लघुपिच्छिलः पुं भूकर्बुदारकः
इति राजनिर्घण्टः ॥
लघुपुष्पः पुं भूमिकदम्बः इति
राजनिर्घंटः ।
लघुबदरः पुं क्षुद्रकोलिः तत्प
र्यायः सूक्ष्मफलः २ बकुरः ३
सूक्ष्मपत्रः ४ दुस्पर्शः मधुरः ६
दद्रहरः ७ शिखिप्रियः ८ अस्य
पक्वफल गुणाः मधुराम्लत्वं
कफवातनाशित्वं रुच्यत्वं स्नि
ग्धत्वं जलकारकत्वं ईषत्पित्ता
र्त्ति दाहशोषघ्नत्वंच इतिराजनि
र्घंटः लघुबदरी स्त्री भूबदरी इति
राजनिर्घंटः ॥

लाज्जयति वंडं मेघः इतिदु।
र्गादासः
लज्ज इ क भाषणार्थे इतिक
विकल्पद्रुमः इकलंज्जयति।
भासीप्तिःषष्ठार्थो निकेतन हिंसा
बलदानानि इतिदुर्गादासः॥
लज्ज त क भासने इतिकवि
कल्पद्रुमः क लज्जयति भास
ते दीप्तिः इतिदुर्गादासः ।
लज्जकारिका स्त्री लज्जालुल
ता । इतिशब्दमाला ।
लज्जा स्त्री अन्तःकरणवृत्तिवि
शेषः इतिनागोजीभट्टः अक
र्तव्यकर्माणि परज्ञानभयं ला
ज इति भाषा तत्पर्य्यायः मंदा
क्षं २ ह्रीः ३ त्रपा ४ व्रीडा ५ सा
अप्यत्रश्वेतअपत्रपा ६ इत्यमरः
मन्दास्य ७ लज्या ८ व्रीडः ९ व्री
डनं १० इतिशब्दरत्नावली लज्जा
लुः इतिराजनिर्घण्टः ॥
लज्जालुः पुंस्त्री क्षुपविशेषः
तत्पर्य्यायः रक्तपादी २ शमी
पत्रा ३ स्पृक्का ४ खदिरपत्रि
का ५ संकोचिनी ६ समंगा
७ नमस्कारी ८ प्रसारिणी ९ सप्त
पर्णी १० खदिरी ११ गण्डमालि
का १२ लज्जा १३ लज्जिरी १४ स्पर्श
लज्जा १५ अस्ररोधिनी १६
रक्तमूला १७ स्वगुप्ता १८
अंजलिकारिका १९ । इति
राजनिर्घण्टः महाभीता २१ व
शिनी २२ महौषधिः २३ इति
शब्दचंद्रिका अस्या गुणाः क
टुत्वं शीतत्वं पित्तातिसारशोक
दाह श्रम श्वास व्रण कुष्ठक
फार्त्तिनाशित्वंच ॥ तद्भेदा
यथा लज्जालु विपरीताख्याश्च
लत्तप वृहता वैपरीत्याच
लज्जालु स्त्रीभिधाने प्रयोजयेत्
लज्जालुर्वैपरीत्याऽऽः कटु रुमः
कफापहत् रसे नियामकश्चै
वनाना विज्ञानकारकः इतिरा
जनिर्घण्टः अन्या हंसपादीशब्दे
द्रष्टव्या अपिच लज्जालुःस्या
त्शमीपत्रा समंगाञ्जलिकारिका
रक्तपादीनमस्कारी नाम्ना खा
दिरकेत्यपि लज्जालुःशीतला
तिक्ता कषाया कफपित्तजित् र
क्तपित्त मतीसारं योनिरोगान्
विनाशयेत् अथ लज्जालुभे
दः अलम्बुषा खरत्वक तथा
मेदोगला स्मृता अलम्बुषा ल
घुःस्वाद्वःकृमि पित्त कफापहा इति
भावप्रकाशः अस्याद्गपिकाशब्दे
द्रष्टव्या ।

लज्जाशीलः त्रि लज्जाविशिष्टः
तत्पर्य्यायः अपत्रपिष्णुः २
इत्यमरः लज्जितः ३ इति
शब्दरत्नावली ॥
लज्जितः त्रि लज्जायुक्तः तत्प
र्य्यायः ह्रीणः २ ह्रीतः ३
इत्यमरः ॥
लज्जिरी स्त्री लज्जालुः इतिरा
जनिर्घण्टः ।
लज्या स्त्री लज्जा इतिशब्दर
त्नावली
लंज त क भासने इतिकवि
कल्पद्रुमः क लंजयति लंजाप
यति भासनं दीप्तिः इतिदुर्गादा
सः लंजः पुं पदः कच्छः इति
हेमचंद्रः पुच्छः इतिजटाधरः ।
लंजिका स्त्री वेश्या इतिहेम
चंद्रः ॥
लट वाल्योक्त्याः इतिकवि
कल्पद्रुमः वालोऽन्तः तस्य भा
वो वाल्यव्यामोह इतियावत्
लटति लोकः शिशुःस्यात् किं
विदद्व्यलितेत्यर्थः इतिदुर्गादासः
लटः पुं प्रमादवचने दोषः ।
इति विश्वः ॥
लटकः पुं दुर्जनः इत्युणादि
कोषः
लटपर्णी स्त्री त्वचं इतिरा
जनिराजनिर्घण्टः ॥
लट्टः पुं दुर्जनः इतिशब्दरत्ना
वली ॥
लड्डः पुं जातिविशेषः नेटुया
इतिभाषा रागभेदः तुरंगमः
इत्युणादिकोषः
लड्डा स्त्री करंजभेदः नाटाकरं
जा इति भाषा वाद्यभेदः पक्षि
विशेषः ग्रामचटक इतिख्यातः
इतिमेदिनी ऊसंभे । इतिरे
मचंद्रः भ्रमरकः । भोउरी
इतिख्यातः इत्यमरभरतौ ।
लड विलासे इतिकविकल्प
द्रुमः लडति वाला इतिदुर्गादासः
लडति स उन्मन्थनजिह्वयोः इति
कविकल्पद्रुमः उन्मन्थने पीडितो
भावः डलति मीभावश्च लडति
लता वायुना पीडिता डलति मा
वा स्यादित्यर्थः जिह्वा तद्विष
यक्रिया लडति जिह्वा स्पन्द
तीत्यादित्यर्थः स लडयति ल
डयति त्वच स्वलतयत्यमूनिति।
श्रीहर्षः पीडयतीत्यर्थः कवाटभ्री
मिन्दुः किरणा लहरी मुहुर्लय
तीति स्फारिः डलिपतीत्यर्थः डभ
यत्र डलयो रेकत्वात्तत्वं केचिज्जि

कोन्मथने इति पदित्वान्निका
या उन्मथने उत्क्षेपन मितिखा
ख्यायस्तदति जिक्का सर्प इत्येवो
दाहरन्ति इतिदुर्गादासः ॥
लटक उपसेवे इतिकविक
ल्पद्रुमः उपसेव इह प्रसन्नपा
लनं कलालयेत्यंत्रवर्षाणिषुत्र
मिति श्रत्र उत्तयो रेकत्वात्लत्व।
कल्पनाया मम प्रयोगः इति
रमानाथः लाटयति लतांवायुः
इतिदुर्गादासः
लट क उ॰ दीप्ते इतिकविक
ल्पद्रुमः क उ॰ लाटयते लाभय
वद्त्वमेते विशेषेण श्रात्मानमि।
ख्रावीप्सा इतिदुर्गादासः ।
लट इ कि भाषणे इतिकवि
कल्पद्रुमः इ लंटते किलंटय
ति लंटति भाषणं कथनं श्रयं
केचित्र मन्यते इतिदुर्गादासः
लट आ इ कि उत्क्षेपणे इति
कविकल्पद्रुमः आ लंठितःश्रत्र
वम्य वलादिस्ववधानेपिनिषा
नस्पनत्वं श्रत्स्मानिष्ठाया मिन्नसा
दिस्पेके लट्ट इति इ लंटते।
किलंटयति लंटति लंटते लो
कः इतिदुर्गादासः ॥
लट न क क्षेपे इतिकविकल्प
द्रुमः लंटयति श्रलल्लाटत् इति
दुर्गादासः ।
लटहः त्रि मनोज्ञः इति त्रि
कांडशेषः
लट्टु त्रि दुर्जनः इतिशब्दरत्ना
वली
लट्टुकः पुं पिष्टविशेषः लाट्टु (with कृ interlined)
इतिभाषा यथा लट्टुको ड॰
जंगे गुरुः इतिराज वल्लभः
श्रपिच तैलेन हविषा पक्वंभ
वेत्तचूर्णंच लट्टुकः इतिशब्द
चंद्रिका ।
लंटं क्ली विषा स्यात् इति
भाषा इतिकेचित्
लंटुनः त्रि लंटुदेशजातः यथा
पूर्वाम्नाये नवशतं षडशीतिः
प्रकीर्तिताः फिरंगभाषया ते
श्रास्तेषां संसाधनात्सुवि श्रधि
पा मंडलानांच संग्रामेष्वपरा
जिताः इंरेजा नव षट् पंचलंटु
जा श्चापि भाविनः इति मे
रुतंत्रे २३ प्रकाशः लंटुस्तु
श्रधुना लंडन् इतिख्यातः इरे
जानां राजधानीच ॥
लत ज्ञाने सौत्रधातुरयं इति
कविकल्पद्रुमः लता इतिदुर्गा
दासः ॥

लता स्त्री लतति वेष्टयतेया।
शाखाशाखादिरहिता गुडूच्यादिः
तत्पर्य्यायः वल्ली २ व्रतति ३
इत्यमरः वल्लिः ४ वेल्लिः ५श्र
ततिः ६ शाखाशाखापत्रसमागुल्माच
त्यतानिनी इतिशब्दरत्नावली।
तत्पर्य्यायः वीरुत् २ गुल्मिनी
३ उलपः ४ इत्यमरः श्रामायां।
वीरुधां छेदकर्त्तु निन्दा यथा
श्रप्स तस्मिन्नरोराजे प्रविशति
चंद्रमाः ततो वीरुत्स्ववस
ति श्रपात्यर्के ततः क्रमात्।
छिनत्ति वीरुधो यस्तु वीरुत्सं
स्थे निशाकरे पत्रं वा पातय
त्येकं ब्रह्महत्या स विन्दति ।
इतिविष्णुपुराणे २ श्रंशे १२।
श्रध्यायः श्राश्रमे रोपणीया
शुभदा लतादि यथा माल्ला
त्वश्चापि क्रूष्मांडं मायाम्बुस्स
कार्मकः खर्ज्जूरी कर्कटोचापि
शिविरे मंगलप्रदा वास्तूकःका
रवेलश्च वार्त्ताकुश्च शुभप्रदा ल
भाफलंच शुभदं सर्वं सर्वत्र नि
श्चितं इति ब्रह्मवैवर्त्ते श्रीकृष्ण
जन्मखंडे १०२ श्रध्यायः ॥
शाखा प्रियंगुः स्पृक्का श्रतान
पर्णी इत्यमरः ज्योतिष्मती ।
लताकस्तूरिका माधवी दूर्वा
इति मेदिनी केवर्त्तिका । सा
रिवा इतिराजनिर्घंटः ।
लताकरंजः पुं करंजविशेषः।
कंटककरंज इति हिन्दीभाषा।
तत्पर्य्यायः दुःस्पर्शः २ वीराख्यः ३
वज्रवीजकः ४ धनदाक्षी ५ कंटफ
लः ६ कुवेराक्षी ७ श्रस्यपत्रगुणाः
कटुत्वं उष्णत्वं कफ वात ना
शित्वंच तद्बीज गुणाः दीपन
त्वं पथ्यत्वं शूल गुल्म विषह
त्वंच इतिराजनिर्घंटः
लताकस्तूरिका स्त्री लताकस्तूरी
तत्पर्य्यायः कटुः २ हस्तिरणदेशा।
जा ३ श्रस्या गुणा तिक्तत्वं ।
स्वादुत्वं वृष्यत्वं हिमत्वं लघुत्वं
चक्षुष्यत्वं छेदनीत्वं श्लेष्म ।
तृष्णा वस्त्यास्यरोग नाशित्वञ्च।
च इतिपथ्यापथ्यविवेकः श्रपिच
लताकस्तूरिका तिक्ता स्वाद्वी
तीस्परोगजित् इतिराजवल्लभः ।
लताजिह्वः पुं सर्पः इति शब्द
माला ॥
लतातरुः पुं नारंगवृक्षः ताल
वृक्षः इति शब्दमाला शाल
वृक्षः इतित्रिकांडशेषः
लताद्रुमः पुं लताशालः तत्

पर्य्यायः भार्त्तः २ अश्वकर्णः ३ ऊशिकः ४ वन्यः ५ दीर्घः ६ इ तिरत्नमाला ।
लतापनसः पुं फललताविशेषः तरमुज इतिख्यातः तत्पर्य्यायः । चेलालः २ चित्रफलः ३ स्वावाश ४ रागतेमिषः ५ नाटाम्रः ६ सेडः ७ इति त्रिकांडशेषः ।
लताएक्का स्त्री सप्तइाम्ना पिटि ङ्गशाकइति भाषा इतिशब्द रत्नावली ॥
लताप्रतानिनी स्त्री शाखाप्रव यवतीलता तत्पर्यायः वीरुत् २ गुल्मिनी ३ उलपः ४ इत्यमरश्च रत्नो वीरुधा ५ व्रतत् ६ इतिश ब्दरत्नावली ॥
लताफलं क्ली पटोलः यथा वास्तूकः काबवेलश्च वार्त्ताकुश्च श्रुभप्रदा लताफलं च श्रुभदं सर्वं सर्वत्र निश्चितं इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ९२ अध्यायः
लताभद्रा स्त्री भद्रालीवृत्तः इति शब्दमाला ॥
लतामणिः पुं प्रवालः इति त्रिकांडशेषः राजनिर्घण्टश्च ।
लतामरुत् स्त्री शृक्का इतिश ब्दरत्नावली ।
लतामाधवी स्त्री माधवीलता इतिशब्दरत्नावली
लतायष्टिः स्त्री मंजिष्ठा इति शब्दमाला ॥
लतायावकं स्त्री प्रवालं इति हारावली ॥
लतारसनः पुं सर्पः इतिहारा वली ॥
लतार्कः पुं हरितपलांडुः तत्प र्यायः डुडुमः २ इत्यमरः
लतालकः पुं हस्ती इतित्रिकां डशेषः ॥
लतावेष्टः पुं षोडशरतिबंधा न्तर्गतदृतीयबन्धः यथा बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत् लघुलिंग ताडनं योनौ लतावेष्टाय मुच्यते इतिरति मंजरी देशविशेषः यथा अश्लेषेण निरुद्धसंचरात्यादिश्च बान्नदा अभ्यन्तरेव मार्गश्च वा झातश्च समन्ततः रेणुमतंत तावेष्टं तथा रैवतकं गिरिं अ स्ववन्तं गिरिंचैव मार्गंधं त्वरिता हयैः इतिहरिवंशे वाणयुद्धे ।
लतावेष्टितकं क्ली आलिंगनभेदः यथा। उद्धृत्कपीरितकं लता वेष्टितकं तथा इतिशब्दमाला

लताशंखः पुं शालवृत्तः इति शब्दरत्नावली ॥
लतिका स्त्री लता इतिलता शब्दात्स्वार्थे कप्रत्ययेन स्त्रिक प्रत्ययेन वा निष्पन्नं ॥
लतिका स्त्री गोधा इतिसिद्धान्त कौमुद्यामुणादिवृत्तिः ॥
लप अ भाषे इतिकविकल्पद्रु मः अ अलीलपत् अललापत् भाषः कथनं इतिदुर्गादासः ।
लपनं क्ली मुखं इत्यमरः । भाषणं इतिलपधात्वर्थदर्शना त्तलपितं क्ली वचनं कथितं त्रि इत्यमरः ॥
लप्सिका स्त्री खाद्यविशेषः ल प्सी इतिख्याता यथा समितां सर्पिषा भृष्टां शार्करं पयसिति पेत् तस्मिन्घनीकृते न्यसेत् । लवंग मरिचादिकं सिद्धैषाल प्सिकाख्याताशुणानस्या वदाम्य हं लप्सिका वृंहणी हृष्याव सापितानिलापहा स्निग्धा श्ले ष्म करी गुर्वी रोचनी तर्पणी परं इतिभावप्रकाशः लब । ३ ङ. संसने शब्दे । इति कविकल्पद्रुमः इलम्बते ङ. ल म्बते संसन शिलावलम्बनमिति
गोविन्दभट्टः ननाद चरणायुध यल्लदपिमोन मालम्बे इतिदुर्गा दासः ।
लभः त्रि प्राप्तः इत्यमरः ।
लब्धवर्णः पुं पंडितः इत्यमरः
लब्धा स्त्री नायिकाभेदः यथा खंडितोत्कंठिता लब्धा तथा प्रोषितभर्त्तृका कलहान्तरिता वासकसज्जा स्वाधीनभर्त्तृका इतिज टाधरः ॥
लभ ३ ङ. शब्दे इति कविक ल्पद्रुमः ३ लंभते ङ. लभते । इतिदुर्गादासः ॥
लभ ङु ओ ङ. ष प्राप्तौ इति कविकल्पद्रुमः ङु लब्धिम ओ लब्धा ङ. लभते ष लभा लभ न्ति भ्रमरुत्पान मिति गणकृता नित्यत्वादिति रमानाथः वस्तुत स्तलभतेलभः पचादित्वादन्ततो लभ इवाचरतीति क्वौ साध्यं इतिदुर्गादासः
लभसः पुं वाजिबंधनरज्जुः ३ मुणादिकोषः धनं याचकः इतिसिद्धान्तकौमुद्यामुणादिवृत्तिः
लभ्यं त्रि न्याय्यं इत्यमरः । लब्धव्यं इतिमेदिनी ।
लमकः पुं षिङ्गः इति सिद्धांत

कोमुघामुगणादिवृत्तिः ।
लंपटः पुं षिङ्गः इतिलंपा।
कृशाद्वार्थे मेदिनी आसक्तः ।
यथा यथैरिकामुष्मिककामल
म्पटःसुतेषु दारेषु धनेषु विनय
न् शोकेन विहायकलेवरमप्या
य स्तस्य यत्नःश्रम एव केवलं
इति श्रीभागवते ५ स्कंधे १९
अध्यायः ॥
लम्पाकः पुं लंपटः देशभेदः
इतिमेदिनी ॥
लंपादरः पुं परद्वार्थे इति
हारावली ॥
लम्फः पुं प्लुतगतिः लाफइति
भाषा इतिलोकप्रसिद्धः उ
त्लम्फनं प्रलम्फनेचात्र ॥
लम्बः पुं नर्त्तकः अंगं कान्तः
इतिसंक्षिप्तसारोणादिवृत्तिः ॥
उत्कोचः यथा प्राप्तेन लोकने
लंबोत्कोचः कोशलिकामिषे उ
पाह्वारःप्रदानेरा हारोग्राह्या
ग्रने अपि इति हेमचंद्रः ॥
अंशभेदः यथा चर लम्बग
माभेदाः पाटकोऽन्तादिवालने
इतिशब्दमाला दोलादौ लम्ब।
मानेदोवा हस्ते वा यथात्रिभु
जे भुजयो योग स्तदन्तराग
णो

भुवाहतो लब्धा ह्रिस्या भूर्न
युता दलितावाधे उभ्याः स्याल्ता
वावाधा भूजकृत्यो रन्तर् मूलं
प्रजायते लम्बः लम्बगुणा भुम
हुंस्यहुं त्रिभुजे फलं भवति उ
दाहरणं लेखे महो मनुमिता
त्रिभुजे भुजौ तु यत्र त्रयोदशाति
थि प्रमितौ हि यस्य तत्रावलम्ब
कमथो कथयावबाधे तिप्रं तथा
च समकोष्ठ मितिं फलाख्यां।
न्यासः भूः १४ भुजौ १३। १५
लब्धे आवाधे ५। ९ लब्धोलम्ब
श्च १२ क्षेत्रफलच ८४ इतिली
लावती दीर्घे लम्बा इतिभाषा
यथा हरतः शोभते मूर्ध्वोल
म्बशाट पराहतः तावच्च शोभ
ते मूर्खो यावत्किंचिन्न भाषते
इतिचाणक्यं ॥
लम्बकर्णः पुं अंकोठवृक्षः छा
गः इति मेदिनी राक्षसः हस्ती
इतिशब्दरत्नावली श्येनपक्षीइ
ति राजनिर्घंटः ॥ दीर्घश्रोत्रे ।
तद्युक्तेत्रि ॥
लम्बकेशः पुं विष्टरः सभवि
वाहकाले वरोपवेशनार्थसा
र्द्धहितयवामावर्त्तवलिताधोमुखा
ग्रसंख्यातदर्भाः यथा उर्द्धकेशा

4113

भवेत् ब्रह्मा लम्बकेशस्तु विश्व
रः दक्षिणावर्तको ब्रह्मा वामाव
र्त्तस्तुविष्टरः इतिसंस्कारतत्व के
शोऽन्वार्थं इतिप्रायश्चित्ततत्वे गंगा।
माहात्म्ये प्रतिनिहितद्रव्यदुस्नान
प्रकरणे लिखितं ॥
दीर्घकेशयुक्ते त्रि ॥
लम्बदन्ता स्त्री सैंहलीपिप्पली इ
तिराजनिर्घंटः वृहद्दर्शनविशिष्टे
त्रिलम्बनं क्ली नाभिलम्बितकंठि
कादि: तत्पर्य्यायः ललन्तिका २
इत्यमरः लम्बते लम्बनं गंधादि
त्वाद्धनः इतितद्टीकायां भरतः।
लम्बशाखायोऽप्यत्र ।
लम्बनः पुं कफः इतिशब्द
चंद्रिका ।
लम्बमाणं त्रि लंबायमानवस्त
लवधातोःकर्त्तरि शान प्रत्ययेन
निष्पन्नं ।
लम्बबीजा स्त्री सैंहलीपिप्पली।
इतिराजनिर्घंटः
लम्बा स्त्री लक्ष्मीः गौरी तिक्त
तुम्बी इति मेदिनी ॥ रुद्रकन्या
विशेषः यथा अरुन्धती वसु
यामी लम्बा भानु मरुत्वती ।
संकल्पाच मुहूर्त्ताच साध्यांविश्वांच
भारत मनवे दत्तवानाय दत्त

पतादहो प्रभुः इति हरिवंशो
अधिपतिस्थापनं हिमालयकन्या
विशेषः यथा तत स्तस्तवचः
श्रुत्वा देवी लम्बा मथाब्रवीत्
गच्छत्वलम्बे शीघ्रं त्वं वाणासुर
तपोऽरुत नतोयोगं समाधायपुर
श्पाहिमवत्सुता कुम्भैकस त
द्रूपं दर्शयत्पार्श्वमागता । सा
न्तर्द्धान मुपागम्य सख्या साबासमी
पुनः परित्राणाय वाणस्य विजया
पिहिता ततः प्रमुखे वासदेव
सादिग्वासाःकोहवीस्थिता इति
महाभारते हरिवंशे वाणयुद्धे।
लम्बिका स्त्री तालुहस्तम्भिका
तत्पर्य्यायः घंटिका २ इतिराज
निर्घंटः सुधास्रवा ३ गलशुंडि
का ४ इति हेमचंद्रः अलिजिका
५ अलिजिह्विका ६ इतिशब्द
रत्नावली
लम्बितः त्रि संसितः शाखितः
इतिलव धातोःकर्मणिक्तप्रत्यय
ननिष्पन्नं लम्बमानमात्यादिश्च लं
म्बोदरः पुं गणेशः इत्यमरः
औदरिके त्रि इतिहेमचंद्रः ।
लंबोष्ठः पुं उष्ट्रः इति राज।
निर्घंटः लम्बमानोष्ठयुक्ते त्रि
लम्बोष्ठः पुं उष्ट्रः इति त्रिकांड

शेषः दीर्घोष्ठविशिष्टेति ॥
लम्भनं क्ली प्रतिलम्भः इतिहे
मचंद्रः ध्वनिः लभि उ॰ प्राद्वेश्म
स्मान्भावेऽनट् प्रत्ययेन निष्पन्न
मिति ॥
लंभा स्त्री वारस्त्रैरवला इतिहा
रावलीलय उ॰ गम्भा इतिकविक
ल्पद्रुमः उ॰ लयते इतिदुर्गादा
सः॥लयः पुं विनाशः संश्लेषः।
तौर्य्यत्रिकस्य साम्यं इति मे
दिनी प्रलयः इतिशब्दरत्नाव
ली गीतवाद्यपादन्यासानांक्रिया
कालयोः परस्परंसमतालयः ली
यन्ते श्लिष्यन्तेऽनेन तिलयति
प्रजेति साम्यंगीतादयोऽत्रेतिवा
लयः । लीङ॰ य उाश्लि
षिलयगत्या वा अल् इत्यमरटी।
कायां भरतः ॥ लयस्थान।
विवर्जितं गायकस्य चतदेशादौ
षान्तर्गतदोषविशेषो यथा ल
ज्जितं भीतमुद्वेगं अव्यक्तमनु
नासिकं काकस्वरं शिरःकपोल
यस्थानविवर्जितं विस्वरं विरस
चैव विश्लिष्टं विषमाहतं आकुलं
तालहीनंच गातु दोषा अतर्दश
सूत्रलयाः हादिस्थितिः कंठस्थि
तिः कपालस्थिति रितिलयत्रयं

अपरे त द्विपदीस्याद्दलतिका॰
फलिका छिन्नखंडिका वामभु
वलन छिन्ना खेदयावा फड्का
कः जंभट्टिका कलतिकः खुड्कः
खुरिकलया कथितश्चलरेखा
हे स्वतस्तोय नर्त्तकः अतः ष
ड्नान्तलनाद्दकृष्टा मन्दघटीत्यपि
कादम्बश्चर्वरी चहा मिश्राद्दवलि
तालनः प्रतिविद्रः समयश्च वलि
तोद्दलेलया आविद्धस्खटकवक
लन विन्न विविध्रेको आन्नी वि
कलयावाचपऊलाय विलोलकः
रमणीय लनश्चैव करकंटकसंत
कः चत्वारिंशादिम प्रोक्ता लयाल
यविशारदैः लयेन वश्यो भगवा
ल्लये लीनो जनार्दनः इतिसंगी
तदामोदरः ॥
लयपुत्री स्त्री नर्त्तकी इतिशब्द
रत्नावली ॥
लयारंभः पुं नटः इतित्रिकांड
शेषः ॥
लयालम्बः पुं नटः इतिशब्दर॰
त्नावली ॥
लर्व गतौ लर्वति इति सिद्धान्त
कौमुदी ॥
लल उ॰ क ईप्सायां इतिक
विकल्पद्रुमः क॰ उ॰ लालयते ईप्सा

आप्तमिच्छा इतिदुर्गादासः।
लल न क ईप्से इतिकविक
ल्पद्रुमः ईप्सा इति आपधातोः
सन्नन्तस्य रूपं शल्पाद इत्य।
कारेण सद्रूपोऽपि अल्कषो।
न बाध्यते इति चेन्न स्त्रीवि।
हितप्रत्ययैः क्वचित्सद्रूपोपिनवा
ध्यते इत्यस्य वाच्यत्वात् अस्य।
थाकारणाकारण मित्यादयो
पि नस्तः पर्वतस्माणेऽजीड।
लते इत्यादिष्वपि बोध्यं ललय
ति धनेलोकः इतिदुर्गादासः
ललज्जिक पुं उड्डः जक्कुरः
हिंस्रेत्रि इति मेदिनी ॥
ललत् त्रि विलासयुक्तः उत्स
न्यनविशिष्टः जिह्वाभक्रियावि
शिष्टः लेपविशिष्टः वीप्सावि
शिष्टः उपसेवाविशिष्टः भा॰
षणविशिष्टः उत्क्षेपविशिष्टः
इतिलड्धातोः कर्त्तरिशतृप्रत्य
येनडस्यलकारादेशेन च निष्प
न्नं ललदम्बुः पुं लिम्पाकः इ
तिजटाधरः
ललनं क्ली केलिः इतिहेमचं
द्रः चालनं इतिनागोजीभट्टः
यथा कालीकरालवदना वि
निष्क्रान्तासिपाशिनी विचित्रख
ट्वांग

धरा नरमालाविभूषणा द्वीपिच
र्मपरीधाना शुष्कमांसातिभैरवा
अतिविस्तारवदना जिह्वाललन
भीषणा इतिदेवीमाहात्म्यं ॥
ललनः पुं वातः सालः प्रि
यालः इतिराजनिर्घण्टः
ललना स्त्री कामिनी नारीभेदः
जिह्वा इतिमेदिनी
ललनाप्रियं क्ली ह्रीवेरं इति
राजनिर्घण्टः ॥
ललनाप्रियः पुं कदम्बः इति
राजनिर्घण्टः कामिनीवल्लभश्च
ललन्तिका स्त्री नाभिलम्बकंठ
कादिः तत्पर्य्यायः लम्बनं २ इ
त्यमरः गोथा इतिशब्दमाला
ललाकः पुं मेहनं इतिशब्द
चंद्रिका ॥
ललाटं क्ली अवयवविशेषः
कपालं इतिख्यातं तत्पर्य्यायः
अलिकं २ गोधिः ३ इत्यमरः
महाशङ्खः ४ भालः ५ कपा
लकः ६ अलीकं ७ इतिशब्दर
त्नावली ललाटकं ८ इतिधनञ्ज
यः तस्य शुभाशुभ लक्षणं यथा
उन्नतैर्विपुलैः शंखैर्ललाटैर्वि
षमैस्तथा निर्द्धना धनवन्तश्च
अर्द्धेन्दुसदृशो नराः आचार्याः

शुक्तिविशाले शिरावेः पापका
रिणः उन्नताभिः शिराभिस्तु
स्वस्तिकाभिर्धनेश्वराः निम्नैर्लला
टे वधार्हाः क्रूरकर्मरता स्तथा
संहतैश्च ललाटैश्च कृपणाउन्न
तैर्नृपाः ललाटोपस्तृता स्ति
स्रो रेखाश्च शतवर्षिणां नृपत्वं
साद्भुतस्तभिश्चः पंचनवमथ
श्रेरेखणाश्चनवति विच्छिन्नाभि
श्च पुंश्चलाः केशान्तोपगताभिश्च
अशीत्यायुर्नरो भवेत् ।
पंचभिः सप्तभिः षड्भिः पंचाश
द्रूभि स्तथा चत्वारिंशच्च वक्रा
भिस्त्रिंशद्भुलग्नगामिभिः विंशः ।
तिर्यामवक्राभि रायुः स्त्रुद्रामिर ।
लकं न पृथु बालेन्दुनिभभ्रुवोचा
यल्ललाटकं शुभमर्हैन्द संस्थान
मतं सा स्तोमशं इति गारुडे
६५ अध्यायः

ललाटकं क्ली प्रशस्तललाटे
इतिशब्दरत्नावली ललाटयाके ।
इतिधनंजयः

ललाटन्तपः पुं सूर्यः इति सि
द्धान्तकौमुदी ॥

ललाटिका स्त्री स्वर्णादिरचित-
ललाटाभरणं टिका इतिख्याता
तत्पर्यायः पत्त्रपाश्या २ इत्य-
मरः ललाटस्थचंदनं । तत्प
र्यायः शंखचर्ची २ इतिशब्द
रत्नावली ॥

ललाम न क्ली ललामं यथा
प्रधानध्वजशृङ्गेषु पुंड्रवालधिल
म्नभूषावाजिप्रभावेषु ललामं
स्याल्ललामच इतिरुद्रः ॥

ललामं क्ली चिह्नं ध्वजः शृङ्गं
प्रधानं भूषा रम्यं बालधिः
पुंड्रं तुरंगः प्रभावः इति
मेदिनी ॥ अश्वललाटे श्वेत
वर्णचिह्नं गवादीनां ललाटवि
न्यस्तभूषा इत्यमरटीका
यां भरतः ॥

ललामकं क्ली पुरोन्यस्तमाल्यं
इत्यमरः तदेवमाल्यं पुरः
संमुखभागे न्यस्तं ललाटपर्यन्त
मागते ललामकं ललामे तिल
कमिव इति इवार्थकः इति
भरतः

ललामी स्त्री कर्णभूषणविशे
षः तत्पर्यायः उत्तंसिका २
इतिशब्दमाला ॥

ललितं क्ली शृंगारभावजक्रि
याविशेषः इत्यमरः सुकुमार
विधानेन भ्रुनेत्रादि क्रियास
विवकर चरणाङ्गविन्यासाल्ललितं

भ्रुवाव सुकुमाराङ्ग विन्यासे म
सृणा ललितं भवेत् यथा सभ्रु
भंगं करकिशलयावर्त्तै नैर्वागत
न्ती सा लिम्पन्ती ललितललित
लोचनस्यांजनेन विन्यस्यन्तीचरण
कमले लीलया स्वैरपाते निशं ।
कांचशथमवयसा नर्त्तिता पंकजा
ही भ्रुनेत्रादि क्रियाशालि सुकुमा
रविधानतः हस्त पादाङ्गविन्यास
स्तस्माल्ललितं विड रित्यन्येपि ।
अनाचार्योपदिष्टंस्यात् ललितंरति
चेष्टितं इत्यन्ये । ललत्के
प्सेभावेक्तः लडविलासे इत्यस्य
मनीषादित्वात्तडस्य लत्वं वा
इति भरतः अपिच विन्यास
भंगि रंगानां भ्रुविलासमनोहरा
सुकुमारा भवेद्यत्र ललितंतदु
दीरितं इत्युज्वलनीलमणिः ।

ललितः पुं रागविशेषः तस्य
स्वरूपं यथा प्रफुल्लसप्तच्छदमा
ल्यधारी युवातिगौराः लसल्लोच
नश्रीः विनिःश्वसन् वासगृहाल्य ।
भाते विलासिवेशो ललितःप्र
दिष्टः तस्यगानसमयो यथा
प्रातर्गेयास्तु देशाख्यो ललितः
पाठमंजरी विभाषा भैरवीचैव
कामोदो गौडकीर्यपि ॥ इति
संगीतदामोदरः ।

ललितः त्रि सुंदरः ईप्सितः
इति मेदिनी चलितः इति
विश्व शब्दरत्नावल्यौ ॥

ललितकान्ता स्त्री मंगलचण्डि-
का तस्याध्यानं यथा ये साल
लितकान्ताख्या देवी मंगलचंडि
कावरदा भयहस्ता च द्विभुजा
गौरदेहिका रक्तकौषेयवस्त्रा च
स्मितवक्त्रा शुभानना नवयौव
नसंपन्ना चार्वंगी ललितप्रभा इति
तिथ्यादितत्त्वं ॥

ललिता स्त्री कस्तूरी नारी इ
तिराजनिर्घण्टः नदीविशेषः य
यानिमित्तात्तस्य राजर्षेः शापा
दुद्धतः पुरा वशिष्ठो ह्यशरी
रोऽभूत्तापात्त निमित्त स्तथा
ततो ब्रह्मोपदेशेन निर्जने का
मरूपके संध्याचले तपस्तेपे त
स्य विश्व रभूत्तदा प्रसन्न स्तस्य
देवस्य वरदानान्महामुनिः श्री
स्तनाच्च वतार्थाय शुंकेत्वा गिरे
स्तटे तत्र स्नात्वा च पीत्वा वशि
ष्ठेर पाप हूरितं तस्मादस्तत
कृतात् संध्या नाम नदी वरा निः
सृता तत्र चास्तस्य चिराशु ग
ग्राहतवेत तस्मात्सर्वत कूटात

ललिताख्या सरिद्वरा सागरा
द्दक्षिणात्पूर्व्वे महादेवावतारि-
ता वैशाखशुक्लपक्षस्य तृतीया
यां नरस्तत्र यः कुर्य्यात् ललितास्ना
नं स शंभुसदनं व्रजेत् ललि-
तायाः पूर्ब्बतीरे भगवान्नामपर्व्व
तः स्वयं विष्णु र्लिङ्गरूपी तत्रैव
भगवान्हरिः ललितायां नरः
स्नात्वा द्वादश्यां शुक्लपक्षके भ
गवन्तं समारुह्य यो यजेत्तत्र मे
रुं स याति विष्णुभवनं शरी
रेण विराजता इति कालि-
कापुराणे ८१ अध्यायः गो
पीविशेषः यथा अविलरसा
मृत मूर्त्तिः प्रसर रुचि रुद्धता
रकापालिः कलित श्यामाल
लितो राधाप्रेयान्विधुर्जयति ।
इति भक्तिरसामृतसिन्धुः ललि
ताश्यामला शैव्या पद्माभद्राश्च
प्रयत्ने इति नटीकायां जीव
गोस्वामी तस्याः स्वरूपं यथा ।
या दुर्गा सैव ललिता ललिता
सैव राधिका यतास्या मन्तरं-
नास्ति सत्यं सत्यं हि नारद ।
इति पाद्मे पातालखण्डे रामती
तायां नारदं प्रति श्रीकृष्ण
वाक्यं ॥

ललितासप्तमी स्त्री भाद्रशुक्लस
प्तमी तत्र कुक्कुटीव्रतं कार्य्यं यथा
भविष्ये भाद्रे मासि सिते पक्षे
सप्तम्यां नियमेन या स्नात्वा शिवं
लेखयित्वा मण्डले च महाम्बिके
पूजयेच्च तदा तस्यां दुःखापं नैव
विद्यते इदं कुक्कुटीव्रतं तेन ख्या
तं इति मिथ्यादितत्त्वं ॥ त
थिर्यथा तत्रादौ स्वस्तिवाचन पूर्व्व
कं संकल्पं कुर्य्यात् ॐ अद्येत्यादि भा
द्रे मासि शुक्ले पक्षे सप्तम्यां तिथौ
यावज्जीवनपर्य्यन्तं अमुक गोत्रा
श्रीमदमुकी शिवदुर्गाप्रीतिकामा
प्रतिवर्षीय भाद्रशुक्ल सप्तम्यां
गणेशादिदेवता पूजा पूर्ब्बक शि
वपार्व्वती पूजा यावज्जीवन डोर
धारण भविष्यपुराणोक्त व्रतक
थाश्रवणरूप ललितासप्तमी व्रतम
हं करिष्ये ततः संकल्पसूक्तं पठित्वा
सामान्यार्घ्यं विधाय गणेशादीन्सं
पूज्य भूतशुद्ध्यादिकं विधाय
मण्डलादिषु पूजा मारभेत् ततो
ध्यात्वा स्वशिरसि पुष्पं दत्वा मा
नसोपचारैः संपूज्य अर्घ्यं संस्था
प्य पुनर्ध्यात्वा आवाहयेत् ।
शिवपूजाविधिना शिवं दुर्गापू
जाविधिना दुर्गां च यथाशक्त्युपचारैः

संपूज्य आवरणदेवान्सम्पूजयेत् ।
ततः षड्ग्रन्थियुक्तडोरकं दुग्धे
न सिक्तं शिवदुर्गाभ्यां समर्पयित्वा
तत् डोरकं वामकरे बद्ध्वा भोज्य
मुत्सृज्य कथा मशृणुयात् अष्टफ
लानि दद्यात् ततो दक्षिणां द
द्यात् अथ कथा श्रीकृष्ण उवाच ।
लोमशो नाम देवर्षिर्मथुरा मागतः
पुरा सोऽर्चितो वसुदेवेन देव
क्या च युधिष्ठिर उपविष्टः कथाः
प्राप्ताः कथयामास वै तदा ततः
कथयितं भूयः कथा मेताः प्रच
क्रमे कंसेन निहताः पुत्रा जाता
जाताः पुनः पुनः मृतवत्सा देव
कि त्वं पुत्र दुःखेन दुःखिता यथा
चन्द्रमुखी दीना बभूव नहुषप्रि
या तथा त्वं देवकी भद्रे पुत्रदुःखे
न दुःखिता पश्चाच्चीर्णव्रता सात
बभूवात्तपुत्रिका त्वमेव देवकी
देवि भविष्यसि न संशयः देव
क्युवाच कासा चन्द्रमुखी दीना बभू
व नहुषप्रिया कथं चीर्णव्रतेषम्य
क्तस्याः सन्ततिकारणं सपत्नी
दर्पदलनं सौभाग्यारोग्यवर्द्धनं ।
लोमश उवाच अयोध्यायां पुरा-
राजा नहुषो नाम विश्रुतः तस्य
राज्ञी महादेवी नाम्ना चन्द्रमुखी

प्रिया पुरोहितस्य तस्यैव पत्नी
माला च नामिका तयो र्वासी
द्दृढप्रीतिः स्पृहणीया परस्परं प्र
यातेपि च मिथिलायां स्नानार्थं स
रयूतटे मासे माघाख्ये तत्रैव
बहु शानगरांगनाः स्नाता स्तामे
कूले चक्रुस्तन्मध्ये व्यक्तरूपिणां ले
खयित्वा शिवं शान्तं उमया स
ह शंकरं गन्धपुष्पाक्षतैर्भक्त्याम्पू
जयित्वा यथाविधि प्रणम्य शि
रसा भक्त्या दृष्टास्ताभ्यां ववदि
यः किमिदं क्रियते साध्व्यः कथ्य
तां यदि वोचते कदा वा क्रिय
ते किं वा फलं सम्यक् कुड्यतां
स्त्रियः कुद्युः शृणुतां स्वामिरतस्मिं
पार्व्वत्या सह शङ्करः बद्धा सूत्र मिदं
शुभ्रं शिवसात्मा निवेदितः या
वज्जीवं मिदं तावद्यावत् प्राणास
धारणे तासां तु तद्वचः श्रुत्वा
ते कृत्वा मानसं तथा कृत्वा च
सम्मतिं तत्र बद्धा दोरभ्यां सडोरकं
ततस्ताः स्वगृहं जग्मुः सखीभिः प
रिवारिताः कालेन महता तत्रैवि
स्मृते तद्व्रतं स्वप्न प्रमत्तया चन्द्रमु
ख्या विस्मृते च सडोरकं मृता केषि
रहोरात्रैः सा बभूव प्लवंगमी सा
लीच कुक्कुटी जाता त्वसम्यक्कृत

पालनात् तथैव तेन मिथिएपो
जाते जातिस्मरे कुले संभूयसा
सैव पात्मश्च समयः पुनः तद्दि
ने तद्दिने प्राप्ते पुनः कालेन तेन
ते तदैव मात्रके देशे जायते गो
कुलसंकुले यत्तो नाया बभूवा
पपृथ्वीनाथस्य सा पुनः ईश्वरी
नामविख्याता सा तु राज्ञोऽभि
वल्लभा पाग्निमीलद्विजस्यासीद्भा
र्याभूषणानामिका पुरोहितस्य
कालेन कुक्कुटी वक्रपुत्रिणी
जातिस्मरा चाष्ट पुत्रा तथैव वा
स्तनपना पुन निरन्तरा मीति व
भूवाथ तयोर्द्विज तनेश्वरी पुत्र
मेकं प्रसूताथ च रोगिणं नवव
र्षेण पंचत्वमगात्तत्सुपिष्टिर त
तो भूषणाद्दुष्ट मातृगत्वा तिडः
खिता सविभावादतिस्नेहाद
ष्टपुत्र समन्विता ममुकाभरणा
भिर्व सभावेनैव भूषिता ताद्दृष्ट्वा
पुत्रिणीं भयोपजन्वाले स्वरी कथा
ततो गरस्प्रेषयित्वा तांसंवीतीव
मत्सरा चिन्तयामास सा राज्ञी त
स्याः पुत्र वधं प्रति हता हताश्चापे
पुत्राः पुनर्जीवन्नम्नाम्याः वक्रपुत्रा
जीववत्सा पपुत्रा भवणा कृथं
शोभसे स्वापि के मदे तदिनो।

दामिनी यथा भूषणोवाच भद्रे
मासि सितेपक्षे सप्तम्यां ललिता
लये सत्वाशिवं लेखयित्वा मे र
लेन सहाम्बिकं संपूज्य विधिवत्ता
मे त्रैलोक्ये यत्र विद्यते । त
देवं हि व्रतं पूर्वं त्वया सह मयाकृतं
तन्मयाचरितं भक्त्या तेनाहं सखि
ए सखि तया नाचरितंसम्यक्
पश्चात् शरीरया तेन तेस
न्तति छिन्ना राज्येऽपि सति दुः
खिता प्रभाव यथः कथितो व्रत
स्यास्य मया सखि ग्रंहे तथा
प्रदास्यामि तस्य धर्मस्य सद्व्रत ।
सविभावान्मतीच्छत्व नात्र कार्या
विचारणा संपूज्य शंकरं भक्त्या
करे बद्ध्वा सडोरकं यावज्जीव
मया तावत्शिवस्यात्मा निवेदितः
इत्येवं समयं कृत्वा ततः प्रभृ
ति डोरकं स्वर्णरूप्यमयं वापिक
दृषारवा कथारणं शंकरे चोमया सा
र्द्धं सौवर्णं राजतं तथा ताम्रपा
त्रे प्रतिष्ठाप्य ब्राह्मणायोपपादयेत्
पायसं पिष्टकं चैव भक्ष्यभो
ज्यं प्रयत्नतः सगोत्राम्भोज यित्वा
तु स्वयं भुंजीत तत्पर ॥
मंडले सोमसद्यां शिवस्यात्म नि
वेदितं इत्येव प्रतिज्ञयार व्रत

दान फलं ततः बभूव सप्त।
जासाध्वी ईश्वरी भुवनेश्वरी व्रत
स्यास्य प्रभावेन सपुत्रा त्वं च देव
कि भविष्यसि त्रिलोकेशं पुत्रं च
जनयिष्यसि इत्येवं श्रावयित्वा च
विरराम मुनिसत्तम जगाम स्वपुर
पार्थ मयाप्येवं तवोदितं याः
स्त्रियः साचरिष्यन्ति व्रतमेतच्च।
युधिष्ठिर कुक्कुटीमर्कटीसंवादे
व्रतकथा चरितं शुभं तासां संतति
विच्छेदो न कदा भविष्यति । स्त्रि
यश्चैवाचरिष्यंति व्रतमेतत्सुरवन्दे
अस्मिंल्लोके सत्व भक्तायास
न्ति शिवमंदिरे । याकुक्कु
टीव्रतमिदं सवगी समेते देवं
विभाव्य हृदयेव गुरुं नियाय।
भक्त्या करोति कलधौत विधान
दत्ते साध्वी सदा भवति शोभन
जीववत्सा इति भविष्यपुराणोक्त
कुक्कुटीव्रतकथा समाप्ता ॥
मेघरागस्य रागिणी यथा ल
लिता मालसी गौडी नाटी देव
किरी तथा मेघरागस्य रागिणी।
ण्या भजेतीमाः समध्यमाः इति
संगीतदामोदरः
लवं स्त्री जातीफले इति शा।
इचंद्रिका लवंग लामज्जके

ईषत् इति राजनिर्घंटः ॥
लवः पुं लेशः विनाशः ।
छेदनं रामपुत्रः इति मेदिनी
अत्र विनाशस्थाने विलासः
इति विश्वः हेमचंद्रश्च कालभेदः
यथा अष्टादशनिमेषास्तु काष्ठा
काष्ठाद्वयं लवः इति हेमचंद्रः
लावानामाप्ती इति राजनिर्घंटः
लवंग क्ली स्वनामख्यातवनिक
द्रव्यभेदः तत्पर्यायः देवकुसुम २
श्रीसंज्ञं २ इत्यमरः । श्रीप्रस
नं ४ इति भावप्रकाशः लवं
गकं ५ इति शब्दरत्नावली ल
वंगकलिका ६ दिव्यं ७ शाख
रं ८ लवं ९ श्रीपुष्पं १० रुचिरं ११
वारिसंभवं ११ तीक्ष्णपुष्पं १२ भ
ङ्गारं १३ गीर्वाणकुसुमं १४ चन्दन
पुष्पं १५ अस्य गुणाः शीतलत्व
तिक्तत्व चक्षुष्यत्व भुक्तरोचनत्व
वात पित्त कफनाशित्वं ।
तीक्ष्णत्वं मूर्च्छनाशकत्वं च इति
राजनिर्घंटः आध्मानानाहशूल
घ्नत्वं दीपनत्वं लघुत्वं च इति
राजवल्लभः अपि च लवंगं कटु
कं तिक्तं लघु नेत्रहितं हिमं
दीपनं पाचनं रुच्यं कफपित्तास्र
नाशकृत् तृष्णां छर्दि तथाध्मानं

शूलमाशु विनाशयेत् कासं
श्वासंच हिक्कांच क्षयं क्षपयति ध्रु
वं इति भावप्रकाशः ॥
लवंगकं क्ली लवंगं इतिशब्द
रत्नावली
लवंगकलिका स्त्री लवंगं इ
ति राजनिर्घण्टः ॥
लवंगलता स्त्री पुष्पविशेषः य
थाललितलवंगलतापरिशीलन
कोमलमलयसमीरे मधुकरनि
करकरम्बितकोकिलकूजितकुं
जकुटीरे विहरति हरि रिह सर
सवसन्ते नृत्यति युवतिजनेन
समं सखि विरहिजनस्य दुरन्ते
इतिजयदेवः राधायाः सखीवि
शेषश्च लवणं क्ली क्षाररसयुक्त
द्रव्यं तत्पञ्चविधं यथा सौवर्चलं
१ सैन्धवं २ विडं ३ औद्भिदं ४ सा
मुद्रं ५ तथाहि सामुद्रं यत्तु लव
णमक्षीबं वसिरं च तत् सैन्धवो
ऽस्त्री शीतशिवं माणिमन्थंच सिं
धुजे रौमकं वसुकं पाक्यं विडं
च कृतके द्वयं सौवर्चले ऽक्ष
रुचके इत्यमरः छेदने यथा
लवो ऽभिलावो लवणं इत्य
मरः
लवणः पुं सिन्धुभेदः राक्षस

विशेषः रसविशेषः इति मे
दिनी पृथिव्यग्निगुणबाहुल्याल्ल
वणः इति चक्रपाणिदत्तकृत द्र
व्यगुणोपरि शिवदासीयटीका ॥
तत्पर्य्यायः पटुः २ तस्यगुणाः
लवणो रुचिकृद्रसोऽग्निदायी प
चनः स्वादुकरश्च सारकश्च रसि
तो नितरां जरांच पित्तं शिति
मानंच ददाति कुष्ठकारी इति
राजनिर्घण्टः अपिच लवणः क्ले
दन स्तीक्ष्णः पाचनो दीपनः सरः
स्निग्धो रुचिकरः स्यन्दी दृष्टिशु
क्रहो लघुः अम्लश्च लवणः
शोषणो रूक्षः पाचनः कफपित्त
दः पुंस्त्व वातहरः कायशैथिल्य
मृदुताकरः सोऽतियुक्तो ऽति
पाकास्त्रपित्तकोष्ठतयापहृत्
इतिराजवल्लभः । लवणासुरस्य
विवरणं यथा पूर्वं कृतयुगेरा
मन् दैतेयः समहानासीत् लोलापुत्रो
ऽभवज्ज्येष्ठो मधुर्नाममहासुरः स
मधुर्वीर्य्यसंपन्नो धर्मेच सुसमाहितः
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो
वरः ॥ शूलंशूला
द्विनिष्कृष्य महावीर्य्यं महाप्रभं
मे देवो महात्मा सुप्रीतो वाक्य
चैतदुवाच ह यावत्सुरैश्च वि

प्रैश्च न विरुध्येर्महासुरः ताव
च्छूलं तवेदं स्यादन्यथा नाशमे
ष्यति यश्च त्वामभियुञ्जीत युद्धा
य विगतज्वरः तं शूलो भस्मसात्
कृत्वा पुनरेष्यति ते करं एवं रु
द्राद्वरं लब्ध्वा भूय एव महासुरः
प्रणिपत्य महादेवं वाक्यमेतदुवाच
ह भगवन्मम वंशस्य शूलमेतद
नुत्तमं भवेत्तु सततं देव सुराणा
मीश्वरो ह्यसि तं ब्रुवाणं मधुं
देवः सर्वभूतपतिः शिवः प्रत्यु ।
वाच महादेवो नैतदेवं भविष्य।
ति माभूत्ते विफला वाणीमत्प्र
साद कृता शुभा भवतः पुत्रमे
कं तु शूलमेतद्भविष्यति याव
त्करस्थः शूलोऽयं भविष्यति सुत
स्य ते अवध्यः सर्वभूतानां शूल।
हस्तो भविष्यति एवं मधुर्वरं
लब्ध्वा देवात्सुमहदद्भुतं भवनं
सोऽसुरश्रेष्ठः कारयामास सुप्र
भं तस्य पत्नी महाभागा प्रिया कु।
म्भीनसीति या विश्वावसोरपत्यंसा
ह्यनलायां महाप्रभा ॥ तस्याः
पुत्रो महावीर्य्यो लवणो नाम दारु
णः बाल्यात्प्रभृति दुष्टात्मा पा
पान्येव समाचरेत् तं पुत्रं दु
र्विनीतं तु दृष्ट्वा क्रोध समन्वितः

मधुः शोकमापेदे नचैनं किंचिद
ब्रवीत् स विहाय इमं लोकं
प्रविष्टो वरुणालयं शूलं निवे
श्य लवणे वरं तस्मै न्यवेदयत्
सप्रभावेण शूलस्य दौरात्म्येनात्म
नस्तथा सन्तापयति लोकांस्त्री
न्विशेषेण च तापसान् आहारः
सर्वसत्त्वानि विशेषेण च तापसाः
आचारो रौद्रता नित्यं वासो म
धुवने तथा हत्वा बहुसहस्रा
णि सिंहव्याघ्रमृगद्विपान् मानुषां
श्चैव कुरुते नित्यमाहारमाह्नि
कं तच्छ्रुत्वा राघवो वाक्यमुवाच
स महामुनीन् घातयिष्यामि तद्र
क्षो व्यपगच्छतु वो भयं प्रतिज्ञा
य तदा तेषां मुनीनामुग्रतेजसां सभ्रा
तॄन् सहितान्सर्वानुवाच रघुनन्दनः
को हन्ता लवणं वीरः कस्यांशः
स विधीयतां भरतस्य महाबाहो
शत्रुघ्नस्य च धीमतः राघवेणैवमु
क्तस्तु भरतो वाक्यमब्रवीत् अह
मेनं वधिष्यामि ममांशः स वि
धीयतां भरतस्य वचः श्रुत्वा धैर्य्य
शौर्य्य समन्वितं लक्ष्मणावरजस्त
स्थौ हित्वा सौवर्णमासनं शत्रुघ्न
स्त्वब्रवीद्वाक्यं प्रणिपत्य नराधिप
कृतकर्मा महाबाहुर्मध्यमो रघुनन्द

न ह्यार्य्येण हि पुरा शून्या त्व
योध्या परिपालिता सन्तापं हृ
दये कृत्वा आर्य्यस्यागमनं प्रति
प्रोष्ये मयि स्थिते राजन्न भूयः
क्लेशमाप्नुयात् तथाब्रुवति श
त्रुघ्ने राघवः पुनरब्रवीत् एवंभवतु
काकुत्स्थ क्रियतां मम शासनं
स त्वं हत्वा मधुसुतं लवणं पाप
निश्चयं राज्यं प्रशाधि धर्म्मेण वाक्यं
मे यद्यवेक्षसे यदा न युद्धमाकां
क्षेत् यदि कश्चित्समाह्वयेत् त
दा शूलं गृहीत्वा तं भस्म ततः करो
ति हि सत्त्वं पुरुष शार्दूल तमा
युधविनाकृतं अप्रविष्टं पुरं पूर्वं।
द्वारि तिष्ठ धृतायुधः अप्रयाति
यमाणात् अवध्यः स भविष्यति
ततः प्रभाते विमले तस्मिन्काले
स राक्षसः निर्गतस्तु पुराद्वीरो भ
क्ष्याहार प्रचोदितः एतस्मिन्नन्त
रे वीर उत्तीर्य्य यमुनां नदीं
तीर्त्वा मधुपुर द्वारि धनुष्पाणि
रतिष्ठत ततो ऽर्द्धदिवसे प्राप्ते।
क्रूरकर्मा स राक्षसः आगच्छद्ब
हुसाहस्रं प्राणिनां भारमुद्वहन् त
तो ददर्श शत्रुघ्नं स्थितं द्वारि धृता
युधं तमुवाच ततो रक्षः किमनेन
करिष्यसि तस्यैवं भाषमाणस्य

हसतश्च क्रुद्धः शत्रुघ्नो वीर्य्य
सम्मतो रोषादश्रूण्यवासृजत् उ
वाच च सुसंक्रुद्धः शत्रुघ्नः स निशाचरं
योद्धुमिच्छामि दुर्बुद्धे द्वन्द्वयुद्धं
त्वयासह तच्छ्रुत्वा भाषितं तस्य
शत्रुघ्नस्य महात्मनः क्रोधमाहार
यतीन्द्रं तिष्ठ तिष्ठेति चाब्रवीत्
आहूतस्तु पुनस्तेन शत्रुघ्नेन महा
त्मना लवणः क्रोधसंयुक्तो युद्धाय
समुपस्थितः आकर्णात्स विकृष्याथ
तद्धनुर्धन्विनां वरः स मुमोच महा
बाणं लवणस्य महोरसि उरस्तस्य
विदार्याशु प्रविवेश रसातलं पु
नरेवागमत् तूर्णं इक्ष्वाकुकुलनन्दनं।
शत्रुघ्नशरनिर्भिन्नो लवणः स निशा
चरः पपात सहसा भूमौ वज्राहत
इवाचलः तच्च शूलं महद्दिव्यं हत
ते लवणे राक्षसे पश्यतां सर्वदेवा
नां रुद्रस्य वशमन्वगात्
हते तु लवणे देवाः सेन्द्राः साग्निपु
रोगमाः ऊचुः सुमधुरां वाणीं
शत्रुघ्नं शत्रुतापनं वरदास्तु महा
बाहो सर्व एव समागताः विजया
कांक्षिणस्तुभ्यममोघदर्शनं हि नः
देवानां भाषितं श्रुत्वा शूरो मू
र्ध्नि कृताञ्जलिः प्रत्युवाच महाबा
हुः शत्रुघ्नः प्रयतात्मवान् इयं मधुपुरी

4125

रम्या मधुरा देव निर्म्मिता निवेशं
प्राप्नुयाच्छीघ्रमेष मे मतो वरः प
रः ते देवाः प्रीतमनसो बाढमित्य
ब्रुवन्नेवं भविष्यति पुरी रम्या शू
रसेना न संशयः ते तथोक्त्वा म
हात्मानो दिवमारुरुहुस्तदा श
त्रुघ्नोऽपि महातेजाः तां सेनां सम
पानयत् सा सेना शीघ्रमागम्य
च्छ्रुत्वा शत्रुघ्नशासनं निवेश
नं च शत्रुघ्नः श्रावणेन समारभत्
तां पुरीं दिव्यसंकाशां नानापण्यो
पशोभितां निरीक्ष्य परमप्रीतः प
रं हर्षमुपागमत् तस्य बुद्धिः सम
त्पन्ना निवेश्य मधुरां पुरीं राम
पादौ निरीक्षेऽहं वर्षे द्वादशमा
गते इति श्रीरामायणे उत्तरकां
डे एकषष्ट्यादिसप्तत्यध्यायेभ्यः
संकलितं लवणसमुद्रस्योत्पत्ति
र्यथा विरजा सम्भजो पुत्रान्धन्वा
तीर्थमेवोचके सद्यो बभूव तत्रै
व धन्या गर्भवती सती तस्यास्तत्र
सुखासीना सार्द्धं पुत्रैश्च सप्तभिः
एकदा हरिणा सार्द्धं वृन्दावने
सुनिर्ज्जने विजहार पुनः साध्वी
गा सक्तमानसा एतस्मिन्नन्तरे त
स्मात्तु क्रीडं जगाम ह कनिष्ठ
स्तस्याश्च भ्रातृभिः पीडितो भिया

भीते स्वतनये दृष्ट्वा तत्रागतो
कृपानिधिः क्रोडे चकार बालं
सा कृष्णो राधागृहं ययौ प्रबो
ध्य बालं सा साध्वी नदरूपान्तिके
प्रियं विललाप भृशं तत्र शृङ्गा
रात्समानात्मप्राणाधिकं स्वसुत
कोपात् लवणोदो भविष्यति क
दापि ते जलं के चित्स्वादिष्यन्ति
जीविनः शशाप सर्वान्बालांश्च
यान्तूर्णं महीतलं गच्छध्वं च म
हीमूढा जम्बुद्वीपमनोहरे स्थितिर्न
वः पुष्पाकं भविष्यति पृथक् पृथक्
द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठन्तु
स्त्रिनः सुताः द्वीपस्थाभिर्नदी
भिश्च सह क्रीडन्तु निर्जने कनि
ष्ठो मातृशापाच्च लवणोदो बभू
व ह कनिष्ठः कथयामास मातृशा
पं च बालकान् प्राजग्मुर्दुःखिताः
सर्वे मातृस्थानं च बालकाः श्रुत्वा
विवरणं सर्वं प्रजग्मुर्धरणीत
ले प्रणम्य मातृचरणं भक्तिन
म्रात्मकन्धराः सप्तद्वीपे समुद्राश्च
सप्त तस्थुर्विभागशः कनिष्ठाद्
द्रूपर्यन्तं द्विगुणं द्विगुणात्मने
लवणेक्षुरा सर्पिर्दधि दुग्ध जला
र्णवाः एतेषां च जले पुष्पाश्च
सार्थं च भविष्यति ।

ख्याताः समुद्राः सप्तैव सप्तद्वीपांश्च
संस्थिताः इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खण्डे ९ अध्यायः लवणः त्रि लव
णरसयुक्तः इति मेदिनी लावण्य
युक्तश्च लवणाकिंशुका स्त्री महा
ज्योतिष्मती इति राजनिर्घण्टः ।
लवणाख्यानिः स्त्री सांभरिलवणो
त्पत्तिस्थानं तत्पर्यायः रुमा २
इति हेमचन्द्रः लवणाकरश्चापि च
लवणतृणं क्ली तृणविशेषः त
त्पर्यायः लोणातृणं २ तृणाम्लं ३
पटुतृणकं ४ अम्लकाण्डं ५ अस्य
गुणाः सतीक्ष्णत्वं अम्लत्वं क
षायत्वं अत्यम्लत्वं अग्निवृद्धिक
रत्वंच इति राजनिर्घण्टः ।
लवणत्रयं क्ली सैन्धवं विडं रुच
कंच इति राजनिर्घण्टः ॥
लवणधेनुः स्त्री दानार्थलवणा
दिनिर्मितधेनुः तद्विवरणं यथा
होतोवाच लवणधेनुं वक्ष्यामि
तां निबोध महीपते अनुलिप्ते म
हीपृष्ठे कृष्णाजिन कुशोत्तरे ॥
धेनुं लवणमयीं कृत्वा षोडशाप्र
स्थसंयुतां वत्सं चतुर्भी राजेन्द्र
हस्तपादांश्च कारयेत् सौवर्णा
मुख शृङ्गाणि खुरा रौप्यमयास्त
था मांस गुडमयं तस्मात् ताफ
ल

मया त्वच निष्का शर्करया घ्राणं
घ्राणं मणिमया नेत्रे रत्नमयेऽ
पीत्कीर्णौ पत्रमयौ तथा ।
श्रीखण्ड शृङ्गकोटौ च नवनीत
मयाः स्तनाः सूत्रपुच्छं ताम्रपृष्ठं
दर्भरोमी पयस्विनी । कांस्यो
पदोहं राजेन्द्र घण्टाभरण भूषि
तां सवत्सचष्प अपेक्ष्य पूजयित्वा
विधानतः आच्छाद्य वस्त्रयुग्मेन
ब्राह्मणाय निवेदयेत् ग्रहणेवा
थ संक्रान्तौ व्यतीपाते तथानये
नक्षत्र ग्रहपीडासु सर्वकालं प्रदा
पयेत् द्विजाय साधुवृत्ताय कु
लीनाय च धीमते वेद वेदाङ्गवि
दुषे श्रोत्रियायाहिताग्नये इद
शाय प्रदातव्या न यामत्सरिणे
नृप जन्मप्रमेव मन्त्रेण पुच्छदे
शोपविश्य च छत्रकोपानहौ देया
मुद्रिका कार्णपत्रके आच्छाद्य वस्त्र
युग्मेन दक्षिणा कनकं ददेत् ।
पूर्वोक्तेन विधानेन स्वशक्त्या कन
केन तु इमां ग्रहाण भो विप्र
रुद्ररूपे नमोस्तु ते रससत्वासर्वभू
तानां सर्वदेवनमस्कृता कामं
कामदुघे कामा तारयेत्वा नमो
स्तुते दत्त्वा धेनुं लवणेन प्रका
रेणैव निष्कृति स्वयं त्रिरात्र ।

विशेण तथैव लवणाशिना स
हस्रेणशतेनाथ स्वशक्त्या कृते।
केनतु स्वर्वंमां स्वर्गमाप्नोति यत्रदे
वो वृषध्वजः य इदं शृणुयाद्भक्त्या
श्रावयेद्वापि मानवः मुच्यते
सर्वपापेभ्यो रुद्रलोकं च गच्छति
इत्यादि वाराहपुराणे श्वेतो
पाख्याने लवणधेनुमाहात्म्यं ।
लवणमदः पुं लोणारक्षारः इति
राजनिर्घण्टः
लवणक्षारः पुं लोणारक्षारः
राजनिर्घण्टः
लवणा स्त्री नदीभेदः दीप्ति
इति मेदिनी शब्दरत्नावल्यौ महा।
ज्योतिष्मती इति राजनिर्घण्टः ।
लवणाचलः पुं दानार्थलवणा
दिनिर्मितपर्वतः यथा अथातः
संप्रवक्ष्यामि लवणाचलमुत्तमं
यत्प्रदाता नरो लोकं आप्नोति ।
शिवसंयुतं उत्तमः षोडश द्रो
णः कर्त्तव्यो लवणाचलः मध्यमः
स्यात्तदर्द्धेन चतुर्भि रधमः स्मृतः
वित्तहीनो यथा शक्त्या द्रोणा
दूर्द्धन्तु कारयेत् चतुर्थांशेन वि
ष्कम्भान् पर्वतान्कारयेत् पृथक् ।
विधानं पूर्ववत्कुर्यात् ब्रह्मादी
नांच सर्वदा तद्वद्धेमतरुस्सर्वा ।

न् लोकपालान्निवेशयेत् सरो
सिकामदेवादीन्तद्वद्वात्र निवे
शयेत् कुर्याज्जागरं मत्रापि
दानमन्त्रं निबोधत । सौभाग्यर
ससंभूतो यतोऽयं लवणो
रसः तदात्मकत्वेनच मां पाहि पा
पान्नगोत्तम यस्मादन्नरसाः स
र्वे नोत्कटा लवणं विना प्रिय
श्च शिवयो नित्यं तस्मात्त्वां तिष्ठ
रो भव विष्णुदेह समुद्भूते
यस्मादारोग्य वर्द्धनं तस्मात्पर्वत
रूपेण पाहि संसारसागरा त् ।
अनेन विधिना यस्तु दद्या
ल्लवणपर्वतं उमालोके वसेत्
कल्पं ततो याति परां गतिं ।
इति मात्स्ये ७१ अध्यायः ॥
लवणाब्धिजं क्ली सामुद्रलवणं
इति राजनिर्घण्टः ॥
लवणाख्यं क्ली लोणारक्षारः
इति राजनिर्घण्टः ॥
लवणोत्तमं क्ली सैन्धवं इति
रत्नमाला ॥
लवणोत्थं क्ली लोणाक्षारः इति
राजनिर्घण्टः
लवणोदः पुं लवणसमुद्रः इत्य
मरः ॥
लवनं क्ली छेदनं इत्यमरः ।

लवणी स्त्री फलवृक्षविशेषः लो
ना इतिभाषा तत्पर्य्यायः ग्रीष्म
जा १ अग्निमा २ इतिशब्दचंद्रि
का लवली स्त्री फलवृक्षविशेषः
नोपाडि इति भाषा तत्पर्य्यायः
सुगंधमूला १ शडः २ कामलव
ल्कला ४ इतिराजनिर्घंटः तत्फ
लगुणाः हृद्यत्वं सुगंधित्वं क
फवातनाशित्वंच इति राजवल्ल
भः लवलीफल मस्त्रोष्णं वातपि
त्तहरं लघु इतिकेचित् ॥
लवाकः पुं छेदनद्रव्यं इत्युणा
दिकोषः छेदनं इतिसंक्षिप्तसा
रोणादिवृत्तिः ॥
लवाणकः पुं दात्रादिः इत्युणा
दिकोषः ॥
लविः त्रि छिद्रः इत्युणादि
कोषः ॥
लवित्रं क्ली दात्रं इत्यमरः।
लशक शिल्पयोगे इति कविक
ल्पद्रुमः क लाशयति ऊशालो
न्त्स शिल्पं पुनक्तीत्यर्थः इति
दुर्गादासः ॥
लशुनं क्ली रसुनः तत्पर्य्यायः
महौषधं २ गृंजनः ३ अरिष्टः ४
महाकन्दः ५ रसोनकः ६ इत्य
मरः रसोनः ७ म्लेच्छकन्दः ८
भूतघ्नः ९ उग्रगंधः १० अमृतगुणाः
अम्लवसेवकत्वं गुरुत्वं उष्णत्वं
कफ वात नाशित्वं अम्लवित्वं
कृमि हृद्रोग शोफघ्नत्वं रसा
यनत्वंच इति राजनिर्घंटः
अपिच लशुनस्तु रसोनः स्यादु
ग्रगंधो महौषधं अरिष्टो म्ले
च्छकंदश्च यवनेष्टो रसोनकः य
दाम्रतं वैनतेयो नह्रार सरस
त्तमात् तदा ततोऽपतद्विन्दुः
स रसोनोऽपतद्भुवि पंचभिश्च
रसै युक्तो रसेनाम्लेन वर्जितः
तस्माद्रसोन इत्युक्तो द्रव्याणां गु
णावेदिभिः कटुकश्चापि मूलेषु
तिक्तः पत्रेषु संस्थितः नाले क
षाय उद्दिष्टा नालाग्रे लवणः स्मृ
तीने तु मधुरः प्रोक्ता रस स्तद्गु
णावेदिभिः रसोनो वृंहणो
वृष्या स्निग्धोष्णः पाचनः सरः
रसे पाके च कटुक स्तीक्ष्णो म
धुरको मतः भग्नसंधानकृत्कंठ्यो गु
रुः पित्तास्र वृद्धिदः बलवर्ण
करो मेधा हितो नेत्र्यो रसायनः
हृद्रोग जीर्णज्वर कुक्षिशूल वि
बन्धगुल्मारुचि कास शोफान् दु
र्णामकुष्ठानलसा जन्तु समीरणा
श्वासकफांश्च हन्ति मद्यं मांसं

तथाम्लंच हितं लशुनसेविं।
नां व्यायाम मातपं रोष मतिनीरं
पयो गुडं रसोन मश्न स्तुरु।
धत्सजे देत न्निरस्तरं इति भा
वप्रकाशः अन्यच्च लशुनः
तारसधुरः कंठ्यो वृष्यो गुरुः
सरः भग्नसंधानकृद्बल्योरक्तपित्त
प्रदूषणः इति राजवल्लभः ॥
लशूनः पुं लशुनः इतिशब्दर
त्नावली ॥
लष क शिल्पयोगे इतिकवि
कल्पद्रुमः कलाषयति ऊशालोन्त्स
शिल्पं पुनक्तीत्यर्थः इतिदुर्गादा
सः ॥
लष य ञ स्पृहि इतिकविक
ल्पद्रुमः य ञ लष्यति लष्यते
इतिदुर्गादासः ॥
लष ञ स्पृहि इति कविकल्प
द्रुमः ञ लषति लषते इति
दुर्गादासः ।
लषः पुं नर्त्तकः इत्युणादिको
षः लस क शिल्पयोगे इतिक
विकल्पद्रुमः क लासयति ऊशा
लोन्त्स शिल्पं पुनक्तीत्यर्थः इ
तिदुर्गादासः ॥
लस श्लिषि क्रीडे इतिकविक
ल्पद्रुमः लसति इतिदुर्गादासः ।
लसा स्त्री हरिद्रा इतिहारावली
लसिका स्त्री लाला यथा लाला
यां पिच्छला ख्याता लसिकाला
सिका तथा इतिशब्दचंद्रिका ।
लसीका स्त्री इक्षुरसः त्वंमांस
मध्यगरसः इतिकेचित् ॥
लस्ज ई ञ उ॰ व्रीडे इति
कविकल्पद्रुमः ॥ क्विपि संयोगा
दिलोपेलक् ई ञ लग्नः उ॰ लज्ज
ते इतिदुर्गादासः
लसितः त्रि श्लिष्टः क्रीडितः शिल
उक्तः लसधातोः क्त प्रत्ययेन
निष्पन्नः इति लल्लकशब्दस्यात्प
न्नो भरतश्च
लल्लकः पुं यन्तुषामध्यभागः।
इत्यमरः ॥
लल्लकी ने पुं यन्तुः इतिशब्दमा
ला लहरिः } स्त्री महातरंगः त
लहरी } त्पर्य्यायः उल्लोलः २
कल्लोलः २ इतिहेमचन्द्रः शब्द
रत्नावली च ।
लत्त क उ॰ दर्शने अंके इति
कविकल्पद्रुमः क उ॰ लत्तयति
लत्तमेके करोतीत्यर्थो वा ।
यते अंकं लोकः पश्यति चिह्नयुक्तं
करोतीत्यर्थो वा इतिदुर्गादासः
लत्ते क्ली व्याजः शाठ्यं इति

मेदिनी
लक्तं क्ली स्त्री रक्तांशुकसंख्या। आ
लाक इति भाषा इतिमेदिनी
लक्तकं क्ली लक्षयति यत् य
था लक्तकं नाम लक्षयति याद
शार्थस्य सम्बन्धवति शक्तन्तु य
द्भवेत् तत्र तल्लक्तकंनाम तच्छक्ति
विधुरं यदि यादृशार्थसम्बन्धव
ति यन्नाम शंकेतितं तदेव तादृ
शार्थेलक्तकं यदि तदृशार्थे शा
क्यमुक्तं भवेत् सैन्धवादयस्तश
द्वातरशादि सम्बधिनि लक्ष्याद्य
विवक्षरगादावपि शक्ता एव गंगा
दयस्तु तीरादावसंकेतिताः तत्र
संवधि नीरादिशक्तत्वेन गृहीता
एव तीराद्यन्वयं वोधयंति तत्र
लक्तका एव अपिच तदेवंविधि
थ लक्षणावृत्त्यालक्तकं नामा
पि जहत्स्वार्थादिभेदादनेक विध
मित्यर्थः स्यादेतद्यदि तीरादिलक्ष
कतया गंगादिपदस्य तानेकी
यद्यनुभवे भवेद्वेतस्तदोक्तक्रमेणा
लक्तकानां विभागो नत्वेतद
स्ति तीराद्यन्वय वोधं प्रति
तीरादिशक्तत्वेनैव पदज्ञानस्य
लाघवेन हेतुतया लक्तकानाम
ननुभावकत्वात्तरुणा मयो शेसं

स्पर्शेदिस्यादौ शाक्येन दहना
दिनेव गंगायां घोष इत्यादौल
क्षितेन तीरादिना सार्द्धमगृहीता
संसर्गकस्यैव समभ्यर्थाधेयत्वान्व
यवोध प्रविष्टत्वादिति चेन्न प्र
कृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य
धर्मान्तरेऽन्वयवद्धे कृतन्तया ती
राद्यविशेषितस्य स्वर्थाधेयता
दे र्थोषादावन्वय वोधायोगात्
नव शक्तस्यैव पदस्य स्वसाकांक्ष
पदान्तरो पस्थाप्यार्थान्वित स्वार्थ
धर्मिकान्वय वोधं प्रति हेतुत्वाद
न्वयवद्धे लक्षार्थस्य प्रवेशः कुन्ताः
प्रविशन्तीत्यादौ लक्ष्यस्य कुन्तध
रादे रन्वय विशेष्यत्वानुपपत्तेः
कुमतिः पक्षुरित्यदौ लक्षार्थयो
र्मिथोऽन्वयवोधस्याप्यनु भविकत्वा
च्च तस्माच्छक्ते विव भक्ते रपि
ज्ञान मनुभावकं भवत्येव कार्य
तावच्छेदकस्य संकोचाच्च नव्याभि
चारः इतिशब्दशक्तिप्रकाशिका ॥
लक्षणं क्ली चिह्नं नाम इतिमे
दिनी दर्शनं इति लक्षधात्व
र्थदर्शनात् लक्ष्यते ज्ञायतेऽने
नेति लक्षणं । तद्विविधं ।
इतरभेदानुमापकं व्यवहारप्रयो
जकंच इति न्यायमतं ॥

व्याकरणमते तु कृत्तद्धितस
मासानामभिधानं नियामकं ल
क्षणान्वनभिज्ञानांतदभिज्ञानस्तव
कं इतिवोपदेवः ।
लक्षणः पुं सौमित्रिः सारस
पक्षी इतिशब्दरत्नावली ॥
लक्षणा स्त्री सारसी इतिमेदि।
नीहंसी इति सिद्धान्तकौमुदी।
गुणादिहानिः शक्यसंवन्धः य
था लक्षणा शक्यसंवन्ध स्तात्पर्या
नुपपत्तितः इतिभाषापरिच्छेदः।
गंगायां घोष इत्यादौ गंगाप
दस्य शक्यार्थे प्रवाहरूपे घो
षस्यान्वयानुपपत्तिस्तात्पर्यानुप
पत्ति र्वा यत्र प्रतिसंधीयतेतत्र
लक्षणया तीरस्य वोधः सावश
क्यसंवन्धरूपा तथाहि प्रवाहरू
पशक्यार्थसंवन्धस्य तीरे गृहीत
त्वात्तीरस्य स्मरणं ततः शाब्दवोधः
इति सिद्धान्तमुक्तावली । अ
पिच जहत्स्वार्थाजहत्स्वार्था नि
रूढाधुनिकादिकाः लक्षणावि
विधा स्तासि र्लक्तकंस्यादनेकधा
कश्चिल्लक्षणा शक्यावृत्तिरूपेण
वोधकतया जहत्स्वार्थेत्युच्यते ।
य तीरत्वादिना गंगादिपदस्य ।
काचिच्छक्य लक्ष्योभयवृत्तिना शा

क्यवृत्तिनैव वा रूपेणानुभावक
त्वादजहत्स्वार्था यथा छत्रित्वादि
ना नीलघटत्वादिना च घटादिप
दस्य काचिल्लक्ष्यतावच्छेदकीभूत
तत्तद्रूपेण पूर्वं पूर्वं प्रत्यायकत्वा
न्निरूढा यथा आरण्यादिप्रका
रेणत्वग्श्रय इत्यनुभावकत्वाद
रुणादिपदस्य काचिच्च पूर्व पूर्वं
तादृरूपेणाप्रत्यायकत्वादाधुनिकी
यथाघटत्वादिना पटादिपदस्य आ
दिना शक्यसदृशत्व प्रकारेण वो
धकतया गौणीत्युपगम्यते यथा
अग्नि र्माणवक इत्यादावग्निसदृ
शत्वादिना अग्न्यादिपदस्य इतिश
ब्दशक्तिप्रकाशिका अन्यच्च ।
मुख्यार्थवाधे तद्युक्तो ययान्योऽर्थः
प्रतीयते रूढेः प्रयोजनाद्वासौल
क्षणाशक्ति रर्पिता । कलिङ्गः
साहसिक इत्यादौ कलिङ्गादिशब्दो
देशविशेषादिरूपे स्वार्थे असंभ
वन्यया शब्दस्य शक्यास्यसंयुक्तान्पु
रुषादीन्प्रत्याययति यया च ग
गायां घोष इत्यादौ गंगादिश
ब्दो जलमयाद्यर्थवाचकत्वात्प्रकृते
ऽसंभवन्स्वस्य सामीप्यादि सम्बन्ध
संवंधिनं तटादिं वोधयति सा
शब्दस्यार्पिता स्वाभाविकेतरा ईश

राद्धाविनावा शक्ति र्लक्षणा·
नाम पूर्वत्र हेतू रूढि प्रसिद्धिरे
व उत्तरत्र गंगातटे घोष इतिप्र
तिपादनादलभ्यस्य शीतत्व पाव
नत्वातिशयस्य बोधनरूपंप्रयोजनं
हेतुं विनापि यस्य कस्यचित्सम्ब
न्धिनो लक्षणेऽतिप्रसंगः स्यात्
तदुक्तं रूढः प्रयोजनाद्वेति ॥
तद्भेदानाह मुख्यार्थस्येतराक्षेपो·
वाक्यार्थेऽन्वय सिद्धये स्या
दात्मनो प्युपादानादेषापादानल
क्षणा २ श्वेतो धावति प्र
योजने यथा कुन्ताः प्रविश·
ति अनयो र्हि श्वेतादिभिः कुन्ता
दिभिश्च अचेतनतया केवलै र्धा
वनप्रवेशन क्रिययो कर्तृतया॰
न्वयमलभमानै रेतत्सिद्धये आत्म
सम्बन्धिनोऽश्वादयः पुरुषादयश्च·
आक्षिप्यन्ते पूर्वत्र प्रयोजनाभा
वाद्रूढिः उत्तरत्र कुन्तादीनामति
गहनत्वं प्रयोजनं अत्रच मुख्या
र्थस्यात्मनोऽप्युपादानं । लक्षणा
लक्षणायांतु परस्यैवोपलक्षणमि
त्यनयो र्भेदः इय मेवाजहत्स्वा
र्थेत्युच्यते । अर्पणं स्वस्यवा
क्यार्थे परस्यान्वय सिद्धये उपल
क्षणा हेतुत्वादेषा लक्षणलक्षणा

३ इति प्रयोजनयो र्लक्षणा लक्ष
णा यथा कलिंगः साहसिकः गं
गायांघोष इति च अनयो र्हि पु
रुषतटयो र्वाक्यार्थे ऽन्वयसिद्धये
कलिंग गंगा शब्दावात्मान मर्पयतः
यथा वा उपकृतं बहु तत्र कि
मुच्यते सुजनता प्रथिता भवता
परं विदधदीदृश मेव सदा सखे
सुखित मास्स्व ततःशरदांशतं अ
त्रापकारादीनां वाक्यार्थेऽन्वय
सिद्धये उपकृतादयः शब्दाः आत्मा
नमर्पयंति अत्रापकारिणं प्रति उ
पकारादि प्रतिपादनान्मुख्यार्थबा
धः वैपरीत्यलक्षणः सम्बन्धः फलम
पकाराद्यतिशयः इय मेव जह
त्स्वार्थेत्युच्यते आरोपाध्यवसानाभ्यां
प्रत्येकं ता अपि द्विधा ताः
पूर्वोक्ता अन्तर्भेदा लक्षणाः
विषयस्यानिगीर्णस्यान्यतादात्म्य
प्रतीतिकृत् सारोपास्यान्निगी
र्णस्य मता साध्यवसानिका ॥
४ रूढावुपादानलक्षणा सारो·
पा यथा अश्वः श्वेतो धावति अ
त्र हि श्वेतगुणवान् अश्वोऽनिगी
र्णः स्वरूपः स्वसमवेत श्वेतगुण
तादात्म्येन प्रतीयते प्रयोजने यथा
एतेकुन्ताःप्रविशंति अत्रसर्वनाम्नाकु
न्तधारि

पुरुषनिर्देशात्सारोपात्वं रूढौ
लक्षणलक्षणा यथा कलिंगः
पुरुषो युध्यति अत्र पुरुषकलिं
गयोराधाराधेयता संबंधः प्रयोज
ने यथा आयुर्घृतं अत्रायुष्कार
ण मपिघृतं कार्य्य कारणभा
व सम्बन्धसम्बन्ध्यायुस्तादात्म्ये
न प्रतीयते अन्यवैलक्षण्येनाव्य
भिचारिणायुष्करणं प्रयोजनं य
थावराजकीये पुरुषेगच्छतिरा
जासौगच्छति इत्यत्र स्वस्वामिभा
वलक्षण संबंधः यथा वा अग्र·
मात्रेऽवयवे हस्तोयं अत्रावय
वावयविभावलक्षणःसंबंधः ।
इंद्रार्थासुस्थूणासु अमी इंद्राः
अत्र भादर्थ्यरूपः एव मन्यत्रा
पि निगीर्णस्य पुनर्विषयस्यान्य
तादात्म्यप्रतीतिकृत्साध्यवसाना
अस्याश्चतुर्षु भेदेषु पूर्वोदाह
रणान्येव साहचर्येतर संबंधाः शु
द्धास्ताः सकला अपि सादृश्यात्तु
मता गौण्य स्तेन षोडश भेदिताः
५ ताः पूर्वोक्ता अष्ट भेदा ल
क्षणाः सादृश्येतर संबंधाः ।
कार्यकारण भावादयः अत्रशु
द्धानां पूर्वोदाहरणान्येव रूढावु
पादानलक्षणा सारोपा गौणीय
था प

तानि तैलानि हेमन्ते सुखानिअ
त्रैतैल शब्द स्तिल भव स्नेहरूपं
मुख्यार्थ मुपादायैव सार्षपादिस्ने
हेषु वर्त्तते प्रयोजने यथा राज
कुमारेषु तत्सदृशेषु च गच्छत्सु
एते राजकुमारा गच्छंति रूढावु
पादानलक्षणा साध्यवसाना गौणी
यथा तैलानि हेमन्ते सुखानि प्र
योजने यथा राजकुमारा गच्छंति
रूढौ लक्षणलक्षणा सारोपा गौणी
यथा राजा गौडेन्द्रः कण्टकंशोधय
ति प्रयोजने गौर्वाहीकः रूढौलक्ष
णलक्षणा साध्यवसाना गौणी यथा
राजा कण्टकं शोधयति प्रयोजने य
था गौर्जल्पति अंगस्य गूढागूढ
त्वाद्द्विधाश्च फललक्षणाः ८ प्रयो
जने या अष्टभेदा लक्षणाः दर्शि
ता स्ताः प्रयोजनरूप व्यंग्यस्य गूढागू
ढतयाप्रत्येकं द्विधा भूत्वा षोडशभे
दाः तत्र गूढः वाक्यार्थभावनाप
रिपक्वबुद्धि विभव मात्र वेद्यः य
था उपकृतं बहुतत्रेत्यादि अगू
ढोऽतिस्फुटतया सर्वजन वेद्यः य
था उपदिशति कामिनीनां यौव
न मदएव ललितानि अत्रोपदिश
तीत्यनेनआविष्करोतीति लक्ष्यते
आविष्कारातिशयश्चाभिधेयवत्स्फु

ह्रंप्रतीयते धर्मि धर्मगतत्वेन फ
लस्यैता अपि द्विधा ७ एता अ
नन्तरोक्ताः षोडश भेदा लक्षणाः
फलस्य धर्मगतत्वेन धर्मिगतत्वेन
च प्रत्येकं द्विधा भूत्वा द्वात्रिंश
द्भेदाः क्रमेणोदाहरति स्निग्धश्या
मलकान्तिलिप्तवियतो वेल्लद्ब
लाका घना वाताःशीकरिणः प
योद सुहृदा मानंदकेकाः कलाः
कामं सन्तु दृढं कठोर हृदयो रा
मोऽस्मि सर्वं सहे वैदेही तु
कथं भविष्यति ह हा हा देवि
धीरा भव अत्रात्यन्त दुःखस
हिष्णुरूपे रामे धर्मिणि लक्ष्यैतस्य
व्यातिशयः फलं गंगायां घोषः
अत्र तटादिषु लक्ष्येषु शीतत्व
पावनत्वादिरूप धर्मस्यातिशयः
फलं तदेवं लक्षणा भे
दाश्चत्वारिंशन्मता बुधैः रूढाव
ष्टौ फलेद्वात्रिंशादितिचत्वारिंशल्ल
क्षणाभेदा किंच -- । पद
वाक्य गतत्वेन प्रत्येकंता अपि
द्विधा ८ ता अनन्तरोक्ताः अत्र
पदगतत्वेन यथा गंगायां घोषः
वाक्यगतत्वेन यथा उपकृतंबहुत
त्रेति एव मशीति प्रकारोलक्षणा
इति साहित्यदर्पणः ॥

लक्षा स्त्री लक्षं दशायुतसं
ख्या इतिमेदिनी
लक्षितः त्रि आलोचितः दृष्टः
अंकितः अपि लक्षधातोः ।
कर्मणि क्त प्रत्ययेन निष्पन्ने
लक्षणाश्रयश्च ॥
लक्षितलक्षणा स्त्री लक्षितेल
क्षणा यथा द्विरेफ पदेन वक्र
द्वीरि लक्षणयोपस्थापिताद्रेफ
द्वययुक्त भ्रमरपदादभिधयैव भ्र
मरोपस्थितिः अत्र वृत्ति लक्षि भ
क्षते तु वृत्तिप्रयोजनाभावान्नेया
र्यंतं इयमेव लक्षित लक्षणासंख्या
ते न च लक्षणाद्वयाभावात्कथ
मियं लक्षितलक्षणेति वाच्यं य
च लक्षिताद्वाद्यर्थाभिधानं तेनैव
लक्षितलक्षणायाः परिभाषितत्वा
त् इति साहित्यदर्पण टीकाकृ
तः श्रीरामचरण तर्कवागीशः ॥
लक्षिता स्त्री परकीयान्तर्गतना
यिकाभेदः अस्या लक्षणं अ
लीभावनिगुणा उदाहरणं यथा
यद्भूतं तद्भूतं यद्भूतानदपि वा
भूयात् यद्भवतु तद्भवतु वापि
फल स्व गोपनोपायः इति
रसमंजरी ॥
लक्ष्म क्ली चिन्हं प्रधाने इत्यमरः

लक्ष्मणं क्ली चिन्हं इतिशब्दरत्ना
वली नाम इत्यमरटीकायां भर
तः श्रीविशिष्टे त्रि इति।
मेदिनी ॥
लक्ष्मणः पुं सारसः सुमित्रेमपत्यं
पुं श्रीरामभ्राता इति मे
दिनी स च त्रेतायुगे अयो
ध्यायां सुमित्रागर्भे दशरथाज्जा
तः इंद्रजिद्वधार्थं तस्य चतुर्दश
वर्षपर्यंतं आहार निद्रादि रहि
तत्वं यथा एकदा रघुनाथस्वामी
तया लक्ष्मणेन च स्नातः सरसि
तत्रैस्य स्म पंचवटी तटे ।
उवाच सीतां हेमन्ते जलं सुस्वा
दुनिर्मलं तथान्नव्यजनं रम्यं सर्वं
वस्त्र सुशीतलं फलंचयनंचक्रे ।
सीतायै प्रददौ पुरः ततो ददौ ।
लक्ष्मणाय पश्चाद्भुंक्ते स्वयं प्रभुः
लक्ष्मणस्तु गृहीत्वा च नैवभुंक्ते
फलं जलं सेवना वधार्थेव सौ
तोद्धारण कारणात् निद्रां न
याति न भुंक्ते वर्षाणांच चत
र्दश य एव पुरुषो योगी तद्वधो
रावणात्मजः इति ब्रह्मवैवर्ते
श्रीकृष्णजन्मखंडे ११५ अध्यायः
लक्ष्मणप्रसूः स्त्री सुमित्रा इति
शब्दरत्नावली

लक्ष्मणा स्त्री श्वेतकंटकारी इति
राजनिर्घण्टः सारसी औषधिभे
दः इति मेदिनी शेषस्य लक्ष्म
णाकंद इतिनाम्ना ख्यातः तस्याः
पर्य्यायः पुत्रकंदा २ पुत्रदा ३
नागिनी ४ नागाह्वा ५ नागपत्री ६
तुलिनी ७ मंजिका ८ अस्रबिंदु
च्छदा ९ पुत्रदा १० अस्या गुणाः
मधुरत्वं शीतत्वं स्त्रीवध्यत्वनाशि
त्वं रसायनकरत्वं बल्यत्वं ।
त्रिदोषशमनत्वंच इति राज
निर्घण्टः अपिच पुत्रकाकार र
क्तास्य विन्दुभिर्लांछिता सदा
लक्ष्मणा पुत्रजननी वस्तगंधाकृ
तिर्भवेत् इतिभावप्रकाशः ।
दुर्योधनकन्या सालक्ष्मीकृष्णपुत्रे
ण सांबेन विवाहिता इतिम
हाभारते ॥
लक्ष्मीः स्त्री विष्णुपत्नी तत्पर्यायः
पद्मालया २ पद्मा ३ कमला ४
श्रीः ५ हरिप्रिया ६ इंदिरा ७
लोकमाता ८ मा ९ क्षीराब्धितन
या १० रमा ११ इत्यमरः जल
धिजा १२ भार्गवी १३ इतिशब्द
रत्नावली हरिवल्लभा १४ दुग्धा
ब्धितनया १५ क्षीरसागरसुता १६
इतिकविकल्पलता । अथ लक्ष्मी

मंत्राः वान्ते वह्नि समारूढंवा
मनेन्द्रेंड संयुतं बीज मेतत्श्रियः
प्रोक्तं सर्वकाम फलप्रदं ।
अस्यपूजाप्रयोगः प्रातः कृत्या-
दि पीठन्यासान्तं कर्म विधायस्व
समस्य पूर्वादि केशरेषु मध्येच
पीठशक्तीः पीठमन्त्रेण न्यसेत् ॐ
विभूत्यैनमः एवं उन्नत्यै कान्त्यै-
सृष्ट्यै कीर्त्यै सन्नत्यै व्युष्ट्यै उत्कृ
ष्ट्यै ऋद्ध्यै ततः श्रीकमलासना
यनमः इत्यासनं विन्यस्यर्ष्यादि
न्यासं कुर्यात् शिरसि भृगुऋ
षयेनमः मुखे निचृच्छन्दसे नमःहृ
श्रियेदेवतायै नमः ततः करांग
न्यासौ कुर्यात् श्रां अंगुष्ठाभ्यां।
नमः श्रीं तर्जनीभ्यां स्वाहा श्रूं
मध्यमाभ्यां वषट् इत्यादि एवं
श्रांहृदयाय नमः इत्यादिनाचन्य
सेत् तथा च निबन्धे श्रुगानिदी
र्घयुक्तेन रमाबीजेन कल्पयेत्।
ततो ध्यानं कांस्या कांचनसन्निभां
हिमगिरिप्रख्यै श्चतुर्भि र्गं
जै र्हस्तोत्क्षिप्त हिरण्मयामृतघ
टैरासिच्यमानां श्रियं बिभ्राणांवर
मब्जयुगम भयं हस्तैः किरीटोज्ज्व
लां क्षौमाबद्धनितम्बविम्बललितां
वन्देऽरविन्दस्थितां एवं ध्यात्वा-
समान्यैः संपूज्य शंख स्थापनं कु
र्यात् ततःपीठ पूजां विधाय-
केशरेषु मध्ये च विभूत्यादि पीठ
मन्त्रान्त पूजांविधाय पुनर्ध्यात्वा वा
हनादि पंच पुष्पांजलि दान पर्य
न्तंविधाय आवरण पूजा मारभेत्
अग्न्यादि केशरेषु मध्ये दिक्षुचश्रां
हृदयाय नमः इत्यादिना संपूज्य
दिग्दलेषु पूर्वादि ॐवासुदेवाय
नमः एवं संकर्षणाय प्रद्युम्नायअ
निरुद्धाय- विदिग्दलेषु ॐ दमका
य ॐ सलिलाय ॐ गुग्गुलवे ॐ
कुरुंटकाय ततो देव्या दक्षिणे
ॐ शंखनिधयेनमः एवं वसुधारा
यै वामे ॐपद्मनिधये वसुमत्यैय
ग्न्यग्रेषु पूर्वादि ॐ बलाकेनमः
एवं विमलायै कमलायै वनमा
लिकायै विभीषिकायै शांकर्यैव
सुमालिकायै तद्बहि रिन्द्रादीन्वज्रा
दींश्च पूजयेत् ततो धूपादि विस
र्जनांतं कर्म समापयेत् अस्यपुरश्च
रणं द्वादशलक्षजपः तथाचभानु
लक्षं जपेन्मंत्रं दीक्षितो विजिते
न्द्रियः तद्दशांशं च जुहुयात्कम
लै र्मधु राप्लुतैः जपान्ते जुहुया
न्मंत्री त्रिते र्वामधुराप्लुतैः बिल्वैः
फलै र्वा जुहुयात्त्रिभि र्वासाधको

4137

नमः वाग्भवंवनिता विष्णो
माया मकरकेतनः चतुर्बीजात्म
को मंत्र श्चतुर्वर्गफलप्रदः वाग्भ
वं ऐं विष्णुवनिता श्रीं अस्यपूजा
दिकं पूर्ववद्बोध्यं तथा च रमा।

माया क्लीं म- करकेतनः क्लीं

यांकल्पिते पीठे तद्विधानेनपूज
येत् कुर्यात्पयोमान्नजुह्या नतेन-
साधकोत्तमः निधिभिः सेव्यते
नित्यं मूर्तिमद्भिरुपस्थितैः ध्या।
नेत विशेषः माणिक्य प्रतिमप्र
भां हिमनिभै स्तुंगै श्चतुर्भि र्गजै
र्हस्तग्राहित रत्नकुम्भसलिलैरासि
च्यमानां सदा हस्ताब्जै र्वरदानम
म्बुजयुगाभीती र्दधानां हरेःकान्तां
कांक्षित पारिजात लतिकां वन्दे
सरोजासनां अस्य पुरश्चरणं
द्वादश लक्षजपः तथाच भानु-
लक्षं हविष्याशी जपेदन्ते सरो
रुहैः जुहुयादरुणैःपुष्पैस्त्रिमध्व
क्तैर्निपैर्द्विपः मंत्रान्तरं ।
नमःकमलान्त वासिन्यै ठद्वयमि
ति प्रोक्तो दशाक्षरः तथाच
निबन्धे दीर्घो यादि विसर्गान्तो
ब्रह्मा भानु र्वसुन्धरा वान्तेसिन्यै
प्रिया वह्नि मनुःप्रोक्तो दशाक्षरः
दीर्घो नकारः यादि र्मः ब्रह्मा
कः भानु र्मः वसुंधराल: वा
न्तेसिन्यै वासिन्यै वह्निप्रिया स्वाहा
अस्यपूजाप्रयोगः पूर्ववत्पी-
ठमन्वन्तं विधाय ऋष्यादिन्यासं
कुर्यात् शिरसि दक्ष ऋषये नमः
मुखे विराट्छन्दसे नमः हृदि
श्रियै देवतायै नमः तथा च
शारदायां ऋषि र्दक्षो विराट्छ
न्दो देवता श्रीःप्रकीर्तिता ततः
करांगन्यासौ ॐ देव्यैनमोऽङ्गुष्ठा
भ्यांनमः ॐ पद्मिन्यै नम स्तर्ज-
नीभ्यां स्वाहा ॐ विष्णुपत्न्यै नमो
मध्यमाभ्यां वषट् ॐवरदायैनमो
ऽनामिकाभ्यां हुं ॐकमलरूपायै
नमः कनिष्ठाभ्यां फट् एवं
एवंहृदयादिषु ॐ देव्यै नमोहृ
दयायनम इत्यादि तथाच निबन्धे
देव्याहृदय माख्याते पद्मिन्यै शिर ई
रितं विष्णुपत्न्यै शिखाप्रोक्ता व
रदायै तनुच्छदं अस्त्रं कमलरूपायै
नमोन्ताःप्रणवादिकाः ततो-
ध्यानं आसीना सरसीरुहे स्मित
मुखी हस्ताम्बुजै र्बिभ्रती दानं प
द्मयुगाभये च वपुषा सौदामिनीस
न्निभा मुक्ताहार विराजमान पृथु
लोत्तुंग स्तनोद्भासिनी पायाद्वःक
मला कराक्ष विभवै रानन्दयन्ती

हृदी एवं ध्यात्वा मानसैः सं
पूज्य शंखस्थापनं कृत्वा पूर्वोक्त
पीठशक्ति सहित पीठमन्त्रतो ए
जोविधाय पुन ध्यात्वा वाहनादि
पंचपुष्पांजलि दान पर्यंतं विधा।
यावरणपूजा मारभेत अग्न्यादि च
तुष्कोदिक्षु च ऐं देव्यै नमो हृदया
य नमः ऐं पद्मिन्यै नमः शिरसे
स्वाहा ऐं विष्णुपत्न्यै नमः शिखायै
वषट् ऐं वरदायै नमः कवचाय ऐं
कमलरूपायै नमो ऽस्त्राय फट्।
ततः पूर्वादिदलेषु पूर्ववत्तल्लक्ष्म्या
दि पूजयेत् तद्बहि रिन्द्रादीन्व
ज्रादींश्च पूजयेत् ततो धूपादि
विसर्जनान्तं कर्म समापयेत् अस्य
पुरश्चरणं दशलक्षजपः तथा च।
दशलक्षं जपेन्मंत्रं मंत्र विद्विजि
तेंद्रियः दशांशं जुहुयान्मंत्री म
धुराक्तैः सरोरुहैः अथ लक्ष्मी
स्तोत्रं ईश्वर उवाच त्रैलोक्य
पूजिते देवि कमले विष्णु
वल्लभे यथा त्वं सुस्थिरा कृष्णे तथा
भव मयि स्थिरा ईश्वरी कमला
लक्ष्मी श्चला भूति र्हरिप्रिया पद्मा
पद्मालया संपदुत्कृष्टिः श्रीः पद्म
धारिणी द्वादशैतानि नामानि
लक्ष्मी संपूज्य यः पठेत् स्थिरा।

लक्ष्मी र्भवेत्तस्य पुत्र दारादिभिः
सह इति तंत्रसारः विष्णुपुराणो
क्त लक्ष्मीस्तोत्रं तत्रैव १ ग्रंथे ९
अध्याये द्रष्टव्यं १ अथ लक्ष्मी
पूजानिरूपणं स्कन्दपुराणे पौषे
चैत्रे तथा भाद्रे पूजयेत्तु श्रियः
प्रियं सिंहे धनुषि मीने च स्थि
ते सप्ततुरंगमे प्रमदे पूजयेल्लक्ष्मीं
शुक्लपक्षे गुरो दिने ना परा
क्के नवांशे च नास्ते नक्षत्रेपि
द्वादश्यां चैव नन्दायां रिक्तायां च
निशिके त्रयोदश्यां तथाष्टम्यां
कमलां नैव पूजयेत्॥
न पूजयेत्सा नो भौमे न बुधे नैव
भार्गवे पूजयेत् गुरौ वीरे चाष्ट
मे रवि सोमयोः गुरुवारे दिष्टु
र्णा च यत्नेन यदि लभ्यते तत्र
पूज्या तु कमला धन पुत्र विवर्द्धि
नी न कुर्यात् प्रथमे मासि नैवकु
र्याद्विसर्जनं न घंटां वादयेत्तत्र नैव
किंकिणी सदा पयेत् पौषे चर
शमी प्रोक्ता चैत्रके पंचमी तथा
नभस्ये पूर्णिमा ज्ञेया गुरुवारे वि
शेषतः आरके धान्य संपूर्णे
नानाभरण भूषिते सुगंधि शुक्ल
पुष्पेन शुक्लपक्षे प्रपूजयेत् पौषे
तु पिष्टकं दद्यात्परमान्नं च चैत्रा

4139

के पिष्टकं परमान्नं च नभस्य त
विशेषतः गुरुवार समायुक्ता न
भस्य पूर्णिमा शुभा कमलां पूज
येत्तत्र पुनर्जन्मनविद्यते पद्मेन
कमलैव कमलां पूजयेद्यदि।
इह लोके सर्वं प्राप्य परत्र केशा
वं व्रजेत् प्राङ्मुखी पूजयेल्लक्ष्मीं
पश्चिमानन संस्थितां गंधपु
ष्पधूपदीपनैवेद्याद्युपचारकैः। ग
न्धद्वारेति मंत्रेण गंधनावाहयेद्दुमी
श्रिये जात इति द्वाभ्यां पुष्प
दावाहयेत्ततः ततो ध्यानं।
हिरण्यवर्णां हरिणीं सुवर्णरज
तस्रजां चंद्रां हिरण्मयीं लक्ष्मीं जा
तवेदसमावहं गौरवर्णान्त द्विभु
जांसितपद्मोपविष्टितां विष्णो र्वं
क्षःस्थलस्थां च जगच्छोभा प्रकाशि
नीं ध्यायेदाद्यां सदा देवीं पूजा
काले विशेषतः ततः पूजादिकं
कुर्यात् श्री लक्ष्मी नम इत्यृचा।
लक्ष्मीः पद्मालया पद्मा कमला श्री
र्धृतिः क्षमा तुष्टिः पुष्टि स्तथा
कान्ति र्मेधा विद्या रसा स्मृतिः हरि
प्रिया तथा विष्णो प्रिया नारायणा
स्य च पत्नीभिः सप्तदशाभि र्लक्ष्मीं
जादिनार्चयेत् लक्ष्मी नारायणाभ्या
च नमान्तेन प्रपूजयेत् विषाणे च
ॐ

वेदं च पूजयेत्तदनन्तरं लक्ष्मी
चरित्रे न कुम्भपक्षे रिक्तायां र
शमी द्वादशीषु च श्रवणादि।
वर्तर्क्षते लक्ष्मीपूजां न कारयेत्
इति कालचन्द्रिका। दीपा।
न्विताऽमावस्यायां लक्ष्मीपूजा
विधिर्यथा तुलाराशि गते भा
नौ अमावस्या नराधिपः स्नात्वा दे
वान्पितॄन्भक्त्या संपूज्याथ प्रण
म्य च कृत्वा तु पार्वणश्राद्धं दधि
क्षीर घृतादिभिः ततो ऽपराह्ण
समये घोषयेन्नगरे नृपः लक्ष्मीः
संपूज्यतां लोकाउल्काभि श्चाभिवेष्ट
तो अमावास्या यदा रात्रौ।
दिवाभागे चतुर्दशी पूजनीया त
दा लक्ष्मी र्विज्ञेया सुखरात्रिका
अमावास्यां यदा देवाः कार्तिके
मासि केशवात् अभयं प्राप्य
सुप्ताश्च क्षीरोदार्णवसानुषु ल
क्ष्मी र्दैत्यभयान्मुक्ता सुखं सुप्ताम्बु
जोदरे चतुर्युगसहस्रान्ते ब्रह्मा स्व
पिति पंकजे अतोऽत्र विधिवत्का
र्या मनुष्यैः सुखसुप्तिका दिवा तत्र
न भोक्तव्यं ऋते बालातुराज्जना।
प्रदोष समये लक्ष्मीं पूजयित्वा
यथा क्रमं दीपवृक्षा स्तथा का
र्या भक्त्या देवगृहेष्वपि चतुष्पथ

श्मशानेषु नदी पर्वत मानेषु वृ
तमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च
वस्त्रैः पुष्पैः शोभितव्याः कृष वि।
कृय भूमयः दीपमाला परितिमिश्र
दोषे तदनन्तरं ब्राह्मणान्भोजयि
त्वादौ विभज्य च वुभुक्षितान् अलंकृ
तेनभोक्तव्यंनववस्त्रोपशोभिना स्त्रि
यै मुग्धै विदेशेप्स्व बांधवे भक्त
कैःसह अत्रलक्ष्मीपूजायां पु
ष्पदानकाले नमस्ते सर्वदेवा।
नांवरदासि हरिप्रिये या गतिस्त्व
त्प्रपन्नानां सामे भूयात्त्वदर्चनात्
लक्ष्म्यै नम इत्यनेन वारत्रयं पू
जयेत् स्वावरात्र्यां प्रदोषेत्त कुवे
रं पूजयंति ये इति रुद्रयरयुं
ताकुवेर मपि पूज यंति धनदाय
नमस्तुभ्यं निधि पद्माधिपाय च
भवन्तुत्वत्प्रसादान्मे धनधान्यादि
संपदः इति पठित्वा कुवेरायनम
इति त्रिः पूजयेत् ततो देवगृहादि
षुदीपान्दद्यात् तत्र मंत्रः अग्नि
ज्योती रविर्ज्योति श्चन्द्रज्योतिस्त
थैवच उत्तमः सर्वज्योतीनांदी
पोऽयं प्रतिगृह्यतां ततोब्राह्म
ब्राह्मणान्वपूज्य भोजयित्वास्व
यंभुक्त्वा सर्वं सभा प्रत्यये भवि
ष्याकं कर्म कुर्यात् यथा स्वावरा

त्रः कालेऽप्रदीपोज्ज्वलितालये।
वेषु वैष्णवंवेश्म वाचा कुशलया
र्चयेत् प्रदीप वदने कार्ये लक्ष्मीम
कूल हेतवे गोरोचनातत्तैवर दद्या
दङ्गेषु सर्वतः ॥ लक्ष्मी
पूजा मंत्रः विश्वरूपस्य भार्यासि
पद्मे पद्मालये शुभे महालक्ष्मि न
मस्तुभ्यं सुरात्रिं कुरुष्व मे वर्षा
कालमहाघोरे यन्मया दुष्कृतं कृ
तं सुरात्रिप्रभातेऽद्य तन्मे
लक्ष्मी र्व्यपोहतु या रात्रिः सर्व
भूतानां या च देवेष्ववस्थिता स
म्वत्सरप्रियायाच सा ममास्तुसुमंग
ला मातात्वं सर्वभूतानां देवानां
सृष्टि संभवा आख्याता भूतले
देवि स्वावरात्रिनमोऽस्तु ते ॥
लक्ष्म्यै नम इति त्रिः पूजयेत् इति
तिथ्यादितत्त्वं तस्या उपा
ख्यानं यथा नारद उवाच श्री
कृष्णस्यात्मन श्चैव निर्गुणस्य नि
राकृते सावित्री यमसंवादे श्रुतं
सुनिर्मलं यशः तद्गुणात्कीर्तनंस
त्यं मंगलानांच मंगलं अधुना
श्रोतुमिच्छामि लक्ष्म्युपाख्यानमेवच
कोनादौ पूजिता साधि किंभूता
केन वा पुरा तद्गुणोत्कीर्तनं स
मं वदवेदविदाम्वर श्रीनारायण

ख

4141

उवाच सृष्टेः रादौ परा ब्रह्मन्
कृष्णस्य परमात्मनः देवी वामांश
संभूता वभूव रासमंडले अतीव
सुंदरी रामा न्यग्रोधपरिमंडला।
यथा द्वादशवर्षीया शश्वत्सुस्थि
रयौवना श्वेतचंपकवर्णाभा सुख
दृश्या मनोहरा शरत्पार्वण।
कोटीन्दुप्रभाप्रच्छादिताननाश
रन्मध्याह्नपद्मानां शोभा मोचन
लोचना साच देवी द्विधा भूता
सहसैवेश्वरेच्छया समा रूपेणव
र्णेन तेजसा वयसा त्विषा यशसा
वाससा सृष्ट्या भूषणेन गुणेन।
च स्मितेन वीक्षितेनैव वचसाग
मनेनच मधुरेण स्वरेणैव नयेना
नुनयेनच तद्वामांशा महालक्ष्मीर्द
क्षिणांशाच राधिका राधादौवरया
मास द्विभुजंच परात्परं महा।
लक्ष्मीश्च तत्पश्चात्तत्कमे कमनीयकं
कृष्णस्तद्गौरवेणैव द्विधा रूपो वभू
वह दक्षिणांशश्च द्विभुजो वामां
शश्च चतुर्भुजः चतुर्भुजाय द्विभुजो
महालक्ष्मीर्ददौ पुरा लक्ष्यते दृ
श्यते विश्वं स्निग्ध दृष्ट्यायपान्निशं
देवीच्छाया च महती महालक्ष्मीश्च
सा स्मृता द्विभुजो राधिकाकान्तोल
क्ष्मीकांतश्चतुर्भुजः शुद्ध सत्त्वस्वरूपाच

गोपै गोपीभि रावृतं चत्तुर्भु
जश्च वैकुंठं प्रययौ पद्मयासह
सर्वांशेन समौ द्वौ तौ कृष्ण नारा
यणौ परौ महा लक्ष्मीश्च योगेन
नानारूपा वभूव सा वैकुंठेच म
हालक्ष्मीः परिपूर्णतमा रमा शुद्ध
सत्व स्वरूपा च सर्वसौभाग्य संयु
ताप्रेम्णा साच प्रधानाच सर्वासुर
मणीषु च स्वर्ग लक्ष्मीश्च शक्रसं
पत्स्वरूपिणी पाताले षु च मर्त्ये
षु राजलक्ष्मीश्च राजसु गृहलक्ष्मी
र्गृहेष्वेव गृहिणी च कलांशया।
संपत्स्वरूपा गृहिणां सर्वमंगल
मंगला गवां प्रसूता सुरभी द
क्षिणा यज्ञकामिनी क्षीरोदसिन्धु
कन्या साश्रीरूपा पद्मिनीषुच शो
भास्वरूपाचन्द्रेच सूर्यमंडल मंडि
ता विभूषणेषु रत्नेषु फलेषु च
जलेषुच सर्वशास्त्रेषु वेदेषु व्या
नेषु संस्कृतेषुच प्रतिमासु च दे
वानां मंगलेषुघटेषु च माणिक्ये
षुच मुक्तासुमाल्येषु च मनोहरा
मनीन्द्रेषुच हीरेषु क्षीरेषु चंदनेषु
च वृक्षशाखासुरम्यासु नवमेघेषु
वस्तुषु वैकुंठे पूजिता सादौ दे
वी नारायणे न च द्वितीये ब्रह्म

रूपेषु रूपपत्नीषु दिव्यस्त्रीषु गृहेषु च

णाभक्त्या तृतीये शंकरेणाच वि
ष्णुनाऽर्चिता साच क्षीरोदे भारतेषु
ने स्वायंभुवेन मनुना मानवेन्द्रैश्च
सर्वतः ऋषीन्द्रैश्च मुनीन्द्रैश्च स
द्भिश्च गृहिभिर्भवे गन्धर्वाद्यैश्च ना
गाद्यैः पातालेषु च पूजिता ।
शुक्लाष्टम्यां भाद्रभद्रे कृता पूजा
च ब्रह्मणा भक्त्याच पक्षपर्यन्तं त्रिषु
लोकेषु नारद चैत्रे पौषेच भा
द्रेच पुण्ये मंगलवासरे विष्णु
ना निर्मिता पूजा त्रिषु लोकेषु
भक्तितः वर्षान्ते पौषसंक्रान्त्यां
मेध्या मावाह्य प्रांगने मनुस्तां
पूजयामास सा भूता भुवनत्रये
राजेन्द्रेण पूजिता सा मंगलेनैव ।
मंगला केदारेणैव नीलेन नले
न सुबलेन च ध्रुवेणोत्तानपादेन
शक्रेण बलिना तथा कश्यपे
न दक्षेण कर्दमेन विवस्वता
प्रियव्रतेन चन्द्रेण कुवेरेणैव वायुना
यमेन वह्निना चैव वरुणेनैव पू
जिता एवं सर्वत्र सर्वैश्च वंदिता
पूजिता सदा सर्वैश्वर्याधिदेवी सा
सर्वसंपत्स्वरूपिणी अपिच ॥
नारद उवाच नारायणप्रिया साच
वरा वैकुंठवासिनी वैकुंठाधिष्ठा
तृदेवी महालक्ष्मीः सनातनी कथं
बभूव सा देवी पृथिव्यां सिंधुक
न्यका किं तद्ध्यानंच स्तवनं सर्वं
पूजाविधिक्रमं पुरा केन स्तुता
दौ सा तन्मां व्याख्यातुमर्हसि श्री
नारायण उवाच पुरा दुर्वाससः
शापात् भ्रष्टश्रीश्च पुरंदरः । ब
भूव देवसंघश्च मर्त्यलोकश्च नारद
लक्ष्मीः स्वर्गादिकं त्यक्त्वा रुष्टा प
रमदुःखिता गत्वा लीना च वैकुंठे
महालक्ष्म्याञ्च नारद तदा शोका
द्ययु देवा दुःखिता ब्रह्मणः सभां
ब्रह्माणंच पुरस्कृत्य ययुर्वैकुंठमेव
च वैकुंठे शरणापन्ना देवा नाराय
णे परे अतीवदैन्ययुक्ताश्च शुष्क
कंठोष्ठ तालुकाः तदा लक्ष्मीश्च
कलया पुरा नारायणाज्ञया बभू
व सिंधुकन्या सा शक्रसंपत्स्वरूपिणी
तथा मथित्वा क्षीरोदं देवा दै
त्यगणैः सह संप्रापुश्च वरं
लक्ष्या ददृशुस्तांच तत्र हि सुरा
दिभ्यो वरं दत्त्वा वरमालांच वि
ष्णवे ददौ प्रसन्नवदना तुष्टा क्षीरोद
शायिने देवा आप्युः स्वराज्यं स्वराज्ये
प्रापुश्च तद्गतान्तां संपूज्य च संभ
य सर्वत्र च निरापदः ।
इति ब्रह्मवैवर्त्ते प्रकृति खंडे
३२ । ३३ अध्यायौ ॥ लक्ष्या

अगस्य गृहाणि यथा यं येरु
श्रेयुरु देवो माता नार्तश्चवोध
वः अतिथिः पितृलोकाश्च नया
मि तस्य मंदिरं मिथ्यावादी च यः
शश्वन्नास्तीति वाचकः सदा सत्त्व
हीनश्च दुःशीलो न गेहं तस्य या
मि सत्यहीनः स्थाप्यहारी मि
थ्यासाक्ष्यप्रदायकः विश्वासघ्नः ।
कृतघ्नो यो न यामि तस्य मंदिरं
चिन्ताग्रस्तो भयग्रस्तः शत्रुग्रस्ता
ऽतिपातकी ऋणग्रस्तोऽतिकृपणो ।
न गेहं यामि पापिनां दीक्षा
हीनश्च शोकार्त्तो मंदधीः स्त्रीजि
तः सदा पुंश्चली पतिपुत्रो यो
तद्गेहं नैव याम्यहं पुंश्चल्यन्नं
वाचीरात्रे यो भुंक्ते कामतः सदा ।
शूद्रान्नभोजी तद्यानी तद्गेहं नैव
याम्यहं यो दुर्वाक्कलही विप्रः
कृतिः शश्वद्यत्रालये स्त्रीप्रधाना
गृहे यस्य न यामि तस्य मंदिरं ।
यत्र नास्ति हरेः पूजा तदीय गुण
कीर्त्तनं नोत्सुकश्च प्रशंसायां न
यामि तस्य मंदिरं कन्यान्नवेदं
विक्रेता नरघाती च हिंसकः न
रकागार सदृशो न यामि तस्य म
न्दिरं स्वदत्तां परदत्तां वा ब्रह्म
वृत्तिं सुरस्य च योहरेद्द्यानहो ।
तस्य न यामि तस्य मंदिरं यत्क
र्म्मे दक्षिणाहीनं मूढधीः कुरुते
शठः सपापी पुण्यहीनश्च न यामि
तस्य मंदिरं मातरं पितरं भार्य्यां
गुरुपत्नीं गुरुंच ते । अना
थां भगिनीं कन्यामनन्याश्रयवा
न्धवान् कार्पण्याद्यो न पुष्णाति
संचयं कुरुते सदा तद्गृहान्नरका
कारान्न यामि तान्मुनीश्वरः शु
न्ने पुरीषं मूत्रं च यस्तत्प्रपति
मंदधीः यः शेते ह्रिर्यपादेनन
यामि तस्य मंदिरं अधौतपा
दशायी यो नग्नः शेते ऽतिनि
द्रितः संध्याशायी दिवाशायी न
यामि तस्य मंदिरं मूर्द्ध्नि तैलं
पुरो दत्त्वा योऽन्यदंगमुपस्पृशेत्
स्नाति पश्चाद्गात्रेवा न यामि तस्य
मंदिरं दत्त्वा तैलं मूर्द्ध्नि गात्रे
विण्मूत्रे यः समुत्सृजेत् प्रणाम
दाद्वेत्तुष्णे न यामि तस्य मंदिरं
तृणं छिनत्ति नखैर्नखैर्विलि
खेन्महीं गात्रे पादे मलं यस्य
न यामि तस्य मंदिरं ॥ स्थाने ।
वसने यस्य समले रूक्ष मस्तके
विकृतो ग्रासहासौ च न यामि त
स्य मंदिरं मंत्रविधौ पत्नीवीच
ग्रामयाजी चिकित्सकः सूपकृद्दे

वत्सश्चैव न यामि तस्य मंदिरं । विवाहे धर्मकार्येवा योनिहस्तिवको पतः दिवा मैथुनकारी यो न-यामि तस्यमंदिरं इत्यादि ब्रह्मवैवर्त्ते गणेशखंडे लक्ष्मीचरित्रना म २२ अध्यायः अपिच कुचेलि नं दन्तमलोपधारिणं बुभुक्षितं निष्ठुरवाक्यभाषिणं सूर्योदये चा स्तमये चशायिनं विमुञ्चति श्रीरपि चक्रपाणिनं नित्यं छेद नखानां धरणीविलिखनं पादयो रत्यमा-र्जिदेन्तानामल्पशौचं वसनमलिन ता रूक्षता मूर्द्धजानां द्वे संध्येचा पिनिद्रा विवसनशयनं ग्रामहासा तिरेकः स्वाङ्गे पीठे च वाद्यं नि-धनमुपनयेत्केशवस्यापि लक्ष्मी । शिरःस्नपोतं चरणे कुमानितो वरांगणासेवन मल्पभोजनं अनग्न शायित्व मपर्व मैथुनं चिरप्रणा ष्टां श्रिय मानयंति षट् पञ्चकः स्नानयुष्यस्य पांडुरस्य विशेषतः पि रस्ता धार्यमाणस्य अलक्ष्मीः प्रति-हन्यते दीपस्य पश्चिमाच्छाया । छायाशय्यासनस्यच रजकस्तलय तीर्थमलक्ष्मी स्तत्र तिष्ठति इत्या दिगणहडे ९९ अध्यायः क्षेत्रविशे षे तस्याः स्थिति फल यथा । देवा ऊचुः कथयस्व जगन्नाथ केषु स्थानेषुवस्थिता ग्रुरुयाणां फलं-किंवा प्रयच्छति वद नमस्यति हे गाङ्गेय उवाच नराणां पादस्थिता लक्ष्मी निलयं संप्रयच्छति सक्थि नीसंस्थिता वस्त्रं रत्नं नानाविधं धनं कलत्रदा गुह्यसंस्था क्रोडस्था पत्यदायिनी मनोरथान्पूरयति पुरु षाणां हृदिस्थिता लक्ष्मी लक्ष्मी वतां श्रेष्ठं कंठस्था कंठभूषणं अभीष्ट बंधुदारैश्च तथाश्लेषप्रवा सिभिः सहाप्तं वाक्यलावण्यमाज्ञा मवितथा स्तथा मुखसंस्थाकवि त्वंच यच्छत्यपिसंभवा शिरोगता संत्यजति ततो ऽन्यं याति संश्रयं सेयं शिरोगता देहमान्यमित्यजतिसा स्मृते इति मार्कंडेयपुराणे दत्ता त्रेयचरिताध्यायः ॥ अथ लक्ष्मीचरित्रं श्रीसूतउवाच मेरुपृष्ठे सुखासीनां लक्ष्मी पृच्छति केशवः केनोपायेन देविन्वं नराणां भवसि निश्चला श्रीरुवाच श्लोकाः पारावता यत्र गृहिणी यत्र चोज्ज्व ला अकलहावसति यत्र तत्राहम वसाम्यहं धान्यं सुवर्णसदृशं तंडु लारजतोपमाः अन्नंचैवातुषं यत्र तत्र कृष्ण वसाम्यहं यःसंविभागी प्रियवाक्यभाषी वृद्धोपसेवीपि यदर्शनश्च अल्पभलाधीनचरीर्च सुशीलस्तस्मिन्सदाहं पुरुषे वसामि । योधर्मशीलो विजितेंद्रियश्च वि द्याविनीतो न परोपतापी अगर्वि तो यश्च जनानुरागी तस्मिन्सदाहं पुरुषे वसामि चिरं स्नाति हुतं भुंक्ते पुष्पमाघ्य न जिघ्रति यो । नपश्येत्स्त्रियं नग्नां नियतं सच । मे प्रियः त्यागः सत्यंच शौचंच अपप्लेमहागुणाः यःप्राप्नोति गु णानेतान्युष्टावान्सचमे प्रियः ॥ सर्व लक्षणमध्ये तु त्याग एवचि शिष्यते काले देशे च पात्रेचस च त्यागः प्रशस्यते नित्यमामल के लक्ष्मी र्नित्यं वसति गोमये नित्यं शंखे च पद्मे च नित्यं श्रीः शुक्लवाससि वसामि पद्मोत्प लशंख मध्ये वसामि चंद्रे च महे-श्वरेच नारायणे चैव वसुंधरायां वसामि नित्योत्सवमंदिरेषु वस त्यराया नित्यश्च वसो धरायामि तिवापाठः यथोपदिष्टा गुरुभक्ति युक्ता पत्युर्वचो नाक्रमते चनित्यं नित्यंच भुंक्ते पतिभक्तशेषं त स्याः शरीरे नियतं वसामि तुष्टा च धीरा प्रियवादिनीच सौभाग्य युक्ताच सुशोभना च लावण्ययुक्ता प्रियदर्शना याप ति व्रता या च वसामि तासु ष्णा माम्लगात्री कृशमध्यभागा सुभ्रूः सुकेशी सुगतिःसुशीला गभीर नाभिः समदन्तपंक्ति स्तस्याः शरी रे नियतं वसामि यापापसक्तापि सुनस्वभावा स्वाधीनकान्ते परिभू तये च अमर्षकामा ऊचरित्रशीला तामेयनो प्रेतभवी त्यजामि पुष्प पर्युषितेष्वपि शायणं बहुभिः सह भग्नासने कुनारीच दूरतः परिवर्जयेत् चिताङ्गारक मस्थीनि वह्निं भस्म द्विजंच गां न पादेन स्पृशेत् पादे कार्पासास्थि तथै गुरुं नखं केशोदकं चैव मैथुनं पर्वसंध्ययोः वर्जयेन्नग्नशायित्वमे काकी मिष्टभोजने शिरः सप्त घंचरणौ सुप्रजितो विनागतासेव नमस्यभोजनं अनग्नशायित्व मप र्वमैथुनं चिरप्रणष्टां श्रिय मानयं ति षट् सम्मार्जनीरजोवाते निर्मुक्ते कपित्थं वर्जयद्दपि सुगात्रासन नक्तं चेतथा रात्रौ विल्व पलाशंच यो वीघ्र भस्मजा मूर्द्धपादयोः उच्छिष्टस्पर्शनं मूर्द्धि स्नानाभ्यंगंच वर्जयेत् शयनेचान्धकारे च रात्रि

वासो दिने तथा स्नानं वरं।
कुवेशञ्च वर्जयेत्शुष्कभोजनं प
रेणाहर्त्तितं वस्त्रः स्वयं माल्याप
कर्षणं आलस्य मवसादञ्च नकु
र्य्यादोष्ठमर्दनं शुक्रवारे च यत्नेन
शिलापिष्टञ्च दर्शके स्वयं वामेन
मूर्द्धानं पाणिना नैव संस्पृशेत् तथा
रक्ताः पुष्पवंतो च न पश्येत् स्त्रुवि
प्रमान् दलेत्तद्रुं परस्त्रीणांनाशं
यान्ते दिवाकरे कुर्य्याज्जाम्पत्नाकं
वो परस्त्रीणां तथैवच परेषाश्वति
कूलंच उदितार्के प्रबोधनं माव
कंटक रकैश्च स्वल्मिकागार वारि
भिः वृथा विलेखनं भूमेर्न कुर्या
न्नमकांत्तया स्वयं दोहं स्वयं मा
त्स्यं स्वयं कृष्टंच छेदनं नापितस्य गृह
हेतोर्वै शक्रादपि हरेत्श्रियं स्वयं
दोहमित्यत्र पथितं चेतिवापाठः ॥
नविन्द्यो गणके विप्रे पादयोर्नखेन
स्तथा प्रतिकूलंचयस्त्रीणांभक्ता
चरन्न्धारणं अच्युतं मांसमूर्पंच
नग्नाचे स्त्रियन्तथा भक्षणादर्शना
सैव शक्रादपि हरेत् श्रियं मत्रैः
रघुकुः परदारसेवी आचारहीनः प
रसेवकश्च संकीर्णाचारी परिस्वादधी
लज्जं निष्ठुरं दंभयं त्यजा मि।
शयनं चार्द्र पादेन रात्रिवासोदिने

तथा नोत्तरीय मथः कुर्य्यात्पुष्क
पादेन भोजनं अशाचिज्ञानवस्त्रा
न्न इर्गथा मल्लावरां अभूषणा
मपथ्यांच नकुर्यादात्मन स्तनं क
र्णौच वदने घ्राणे तथा करतलेऽपि
च पादे पृष्ठे तथानेत्रे नकुर्यात्दन्तुले
दन्तलेपनं चतुर्लग्ने हतं श्रेयो मु
खलग्ने धनक्षयः दरिद्रः कालमेव
पादे पृष्ठे तथापुत्रः गन्ते पुष्प
तथा लोपं रत्नचैव महोदपि।
ग्रहीतं प्रथमं वस्त्रं वर्जयेन्न कदाच
न अजरजःखररज स्तथा सम्मार्ज
नीरजः स्त्रीणां पादरजो राजन्शक्रा
दपि हरेत्श्रियं कुचेलिनं दन्त
मलप्रधारिणंमहाशठं निष्ठुरवाक
भाषिणं सूर्योदये चास्तमिते न
शायिणं विमुञ्चति श्रीरपि चक्रपा
णिनं महाशठ मित्यत्र वक्राशि
नमितिवा पाठः नित्यं छेदस्तृ
णानांहिति नखलिखनं पादयोर
स्पर्शोच पक्वांगे तैलहीने वसनमलि
नताः वन्धनंमूर्द्धजानां हे संध्येवापि
निद्रा विवसनशयनं ग्रास हासाति
रेकः स्वांगे पीठे च वाद्यं हरति
धनपदः केशवस्यापि लक्ष्मी म
वत्यन मित्यत्र हस्तजा इति वापाठः
एवं यःकुरुते नित्यं मयोक्तानि

च केशव तस्य तवामितसारं
तवैषा निश्चला यथा श्रीभा
षित मिदं स्तोत्रं प्रातरुत्थाय
यः पठेत् तद्गृहं विपुलं रम्यं
नित्यं भवति नान्यथा व्याधि।
तो मुच्यते रोगी बद्धो मुच्येत
बंधनात् आपद स्तस्य नश्यन्ति
तितमः सूर्योदये यथा इतिस्क
न्दपुराणे लक्ष्मीकेशवसम्वादेल
क्ष्मीचरित्रं समाप्तं ॥ ।
लक्ष्मीः स्त्री दुर्गा यथा स्तुतिः
सिद्धिरितिख्याता श्रिया संश्रय
णाच्च वा लक्ष्मी र्वा लल्लनाद्वा
पि क्रमात्साकांति रुच्यते इतिदे
वीपुराणे ४५ अध्यायः संपत्तिः।
शोभा ऋद्ध्यौषधं वृद्धिनामौ
षधं फलिनीवृक्षः इतिमेदिनी
सीता वीरयोषित् ॥ इति
शब्दरत्नावली स्थलपद्मिनी ह
रिद्रा शमी इत्यं मुक्ता।
इतिराजनिर्घंटः मोक्षप्राप्तिः।
इतिचंडीटीकायां नागभट्टः ॥
लक्ष्मीकांतः पुं नारायणः यथा
नमः कमलनेत्राय हरये पद्मा
लने जगतः पालयित्रे च लक्ष्मी
कांत नमोस्तु ते इतिजन्माष्टमी
व्रतकथा ॥

लक्ष्मीगृहं क्ली रक्तोत्पलं इति
त्रिकांडशेषः लक्ष्मीवेश्म च।
लक्ष्मीजनार्दनः पुं शालग्रामवि
शेषः तस्य लक्षणं यथा एक
द्वारे चतुश्चक्रं नवी ननीरदोपमं
लक्ष्मीजनार्दनं ज्ञेयं रहितंवन
मालया इतिब्रह्मवैवर्त्ते प्रकृ
तिखंडे ॥
लक्ष्मीतालः पुं श्रीतालवृक्षः।
इति राजनिर्घंटः तौर्य्यत्रिकस्य
परिच्छेदविशेषः तस्य द्रुत लघु
एव विराम क्रमो यथा दौ लौ एव
दौ विरामान्तौ दलौ एव द विरा
मकः विरामान्तौ द्रुतौ लश्च द्रुतौ
लघुविरामकः इतिसंगीतरत्नाक
रे लक्ष्मीतालः ॥
लक्ष्मीनारायणः पुं शालग्रामवि
शेषः तस्यलक्षणं यथा एक
द्वारे चतुश्चक्रं वनमालाविभूषितं
नवीननीरदाकारं लक्ष्मीनारायणा
भिधं इतिब्रह्मवैवर्त्तपुराणं ॥
लक्ष्मीनृसिंहः पुं शालग्रामवि
शेषः तस्यलक्षणं यथा द्विचक्रं
विस्तृतास्यञ्च वनमालासमन्वितं
लक्ष्मीनृसिंहं विज्ञेयं गृहिणां
चसुखप्रदं इतिब्रह्मवैवर्त्तपुराणं
लक्ष्मीपतिः पुं वासुदेवः नरः

पतिः इतिमेदिनी लवंगवृक्षः
पुगः इति विश्वः ॥
लक्ष्मीपुत्रः पुं कामदेवः घो
टकः इति मेदिनी कुशः ॥
लवः इतिशब्दरत्नावली ॥
लक्ष्मीपुष्पः पुं पद्मरागमणिः।
इतिहेमचंद्रः ॥
लक्ष्मीफलः पुं विल्ववृक्षः इति
राजनिर्घंटः
लक्ष्मीवान्त् पुं पनसवृक्षः इति
शब्दमाला श्वेतरोहितवृक्षः ।
इतिराजनिर्घंटः ॥ ।
लक्ष्मीवान्त् त्रि श्रीयुक्तः धनवा
न् तत्पर्यायः लक्ष्मणः २ श्रीलः
३ श्रीमान् ४ इत्यमरः ॥
लक्ष्मीवेष्टः पुं श्रीवेष्टः इति
राजनिर्घंटः ॥
लक्ष्मीशः पुं विष्णुः इति मुग्ध
बोधव्याकरणं ।
लक्ष्मीसमाह्वया स्त्री सीता इति
शब्दरत्नावली ॥
लक्ष्मीसहजः पुं चंद्रः इतिश
ब्दरत्नावली ॥
लक्ष्म्यारामः पुं वनभेदः इति
शब्दमाला ॥
लक्ष्मं क्ली पार्श्वेपश्यानं तत्प
र्यायः लक्ष्म २ शारव्यं ३ इत्य ।
मरः प्रतिकायः ४ वेध्यं ५
इतिजटाधरः वेधं ६ इतिरत्ना
वली ।
लक्ष्यः त्रि लक्षणायावोध्यः इति
साहित्यदर्पणः दर्शनीयः इतिल
क्षणात्वर्णदर्शनात् ॥
लाग ग्रहे इति कविकल्पद्रुमः
लगाति ग्रहे ग्रहणं इतिदु
र्गादासः ॥
ला स्त्री ग्रहणं दानं इतिमे
दिनी ॥
लाख ऋ शोषालमर्थयोः इति
कविकल्पद्रुमः ऋ अललाखत्
इतिदुर्गादासः ॥
लाच ऋ ङ. शोको इतिकवि
कल्पद्रुमः ऋ अललाचत् ङ.
लाचते शक्तिः सामर्थ्यं इति
दुर्गादासः ॥
लाघवं क्ली आरोग्यं इति राज
निर्घंटः लघुत्वं लघो भाव
इत्यर्थे स्म प्रत्ययेन निष्पन्नं
लांगलं क्ली स्वनामख्यातभूमि
कर्षणायंत्रं तत्पर्यायः हलं २
गोदारणं सीरः ४ इत्यमरः ।
हलः ५ हालं ६ हाल ७ सीरः ८
इति भरतः लिंगः इतित्रिकां
डशेषः पुष्पविशेषः ॥

५१५९

तालवृक्षः गृहदारु । इति।
मेदिनी ॥
लांगलग्रहः पुं कृषकः लांगलं
गृह्णाति यद्वत्पर्थे अस्यत्प येननि।
प्पन्नः ॥
लांगलचक्रं क्ली कृषिकर्मनिहला
कारचक्रविशेषः यथा अथ
लांगलचक्रं स्वरोदये लाङ्गल.
दंडिका युग योक्त्रद्वय समन्वितं
दंडिकादि लिखेत्मानि दिनेशा ।
क्रांतभादितं दंडिका इलयुग्मा।
नां हि हिस्थाने त्रिकं त्रिकं ।
योक्त्रयोश्च त्रिकंचैव मध्ये पंचाग्र
के द्विकं दंडस्थ च गवांहानिर्नि
पस्थे स्वामिना भयं । लक्ष्मी
लांगल योक्त्रेस्यात्तत्रा रंध्रदि।
नर्तके इति ज्योतिस्तत्वं ॥



लाङ्गलदंडः पुं लांगलमध्य
स्थकाष्ठं लांगलेरईशाइति भाषा
तत्पर्यायः ईशा २ इत्यमरः ।
ईषा ३ इति शब्दरत्नावली ॥
लांगलपद्धतिः स्त्री लांगलरेखा
सिराल इति भाषा तत्पर्यायः
शीता २ इत्यमरः सीता ३
इतिशब्दरत्नावली ॥
लांगलिकः पुं स्थावरविषभेदः
इतिहेमचंद्रः ॥
लांगलिका स्त्री लांगलीवृक्षः ।
इतिशब्दरत्नावली ॥
लांगलिकी स्त्री वृक्षविशेषः
लांगलिया इति विषलांगलिया
इतिचभाषा तत्पर्यायः अग्नि
शिखा २ इत्यमरः अग्निज्वला ३
लांगलिका ४ लांगली ५ इति
शब्दरत्नाली गौरी ६ दीप्ता ७ह
लिनी ८ गर्भघातिनी ९ अग्नि
जिका १० इन्द्रपुष्पा ११ अग्निमुखी १२
वह्निशिखा १३ इतिरत्नमाला
अस्यागुणाः उष्ठ कुष्ठव्रणनाशि
त्वं इति राजवल्लभः राजनिर्घंटः
क गुणा पर्यायाः कलिकारी शब्दे
द्रष्टव्याः लांगली न पुं वलरामः इति
शब्दरत्नावली नारिकेलः इत्यमरः

सर्पः इतिशब्दचंद्रिका ॥
लांगली स्त्री लांगलाकारपुष्पज
लजपत्रकविशेषः कोंचडा इति
भाषा तत्पर्यायः शारदी २
तोयपिप्पली ३ शकुलादनी ४
इत्यमरः जलाली ५ जलपिप्प
लिः ६ इतिशब्दरत्नावली पि
लता ७ प्रणामासनी ८ मत्स्यगे।
धा ९ इतिजटाधरः कलिकारी१०
इतिराजनिर्घंटः
लांगुलं क्ली पुच्छं इत्यमरटी
कासारसुंदरी ॥
लांगूलं क्ली पशुपश्चाद्वर्तिल
म्बमानलोमाद्यावयवविशेषः
लाज इति भाषा तत्पर्यायः
पुच्छ २ लूम ३ वालहस्तः ४ वा
इत्यमरः लंगूलं ६ लांगूलं ७
ललाम ८ आवालः ९ इतिश
ब्दरत्नावली लंजः १० पिच्छः ११
वालः १२ इतिजटाधरः गो
लांगूलजलमाहात्म्यं यथा लांगू
लेनोद्धृतं तोयं मूर्द्ध्ना गृह्णाति
यो नरः सर्वतीर्थ फलं प्राप्य
सर्वपापैः प्रमुच्यते इतिवाराहपु
राणे शोफः इति मेदिनी ऊरुमूलः इ
ति सिद्धांतकौमुद्यामुणादिवृत्तिः ।

लांगूलिका स्त्री पृश्निपर्णी इति
राजनिर्घंटः ।
लांगूली न पुं वानरः इतिशब्दचं
द्रिका ऋषभनामौषधं । इति
राजनिर्घंटः ॥
लाछ इ लक्षणे इतिकविकल्पद्रु
मः इ लांछ्यते लांछति ।
इतिदुर्गादासः ॥
लाज {भर्त्सने भर्गे इति क
लाज इ} विकल्पद्रुमः द्वौ द्वितीय
स्वरिणौ लाजयति इलांजते ।
भर्त्सन एवकेचिन्मन्यते । भ
र्गो भर्जनं इतिदुर्गादासः
लाजं क्ली उशीरं इतिमेदिनी ॥
लाजः पुं आर्द्रतंडुलः इतिमे
दिनी ॥
लाजा स्त्री अक्षतः इतिमेदिनी
लाजाः पुं भृष्टव्रीहि धान्ये लौ
आ इति खइ इति च भाषा ।
तत्पर्यायः अक्षतं २ इत्यमरः ।
लाजा ३ अक्षताः ४ इति भरतः
अस्य गुणाः तृष्णा छर्द्यतीसारप्रमे
ह मेदःकफ नाशित्वं ।
कास पित्तोपशमनत्वं अग्निकारि
त्वं लघुत्वं शीतलत्वंच अस्य मंडगुणाः
अग्निकारित्वं दाह तृष्णा ज्वरातीसारनाशित्वं

श्लेष्म दोषामपाचनत्वंच तस्य
पेया गुणा ल्लामकंठस्य श्रमघ्नतं ।
तथा तृष्णा विदोषत्वकुक्षिरोग ।
नाशित्वंच इतिराजवल्लभः
अपिच यते च व्रीहयो भृष्टा स्ते
लाजा इति संज्ञिताः यवाद
यश्च ये भृष्टा स्ते धानाः परिकीर्ति
ताः लाजाश्च यवधानाश्च तर्प
णाः पित्तनाशनाः गोधूमयाव
नालोत्थाः किंचिद्रूक्षाश्च दीपनाः
तृष्णातीसारशमनो धात्वशास्य
करःपरः मंदाग्नि विषमाग्नीनां ।
वालस्थविरयोषितां देयश्च स
कुमाराणांलाजमंडः सुसंस्कृतः ।
इतिराजनिर्घंटः ॥ तस्यचूर्ण
गुणाः ज्ञाता दाडिम खर्जूर मदि
ताम्बु सशर्करं लाजचूर्णं समधा
ज्यं संतर्पणं मुदाहृतं । लाज
चूर्णं ज्ञातादि जलशर्करा मधाम्ल
सहितं तर्पणं मुक्त मिसर्थः ।
लाजशक्तुगुणाश्च गुणाश्चाथ ला
जानां शक्तवः सौद्र शिताभुक्तादि
शोषतः छर्द्यतीसार हद्रू दाह
विष मूर्च्छा ज्वरापहा चकश्च ।
तत्र तर्पणं मेषादौ प्रदेयं लाज
शक्तुभिः ज्वरापहैः फलर से
र्युक्तं समधु शार्करं इति भाव

प्रकाशः
लाञ्छनं क्ली नाम चिह्नं इति
इतिमेदिनी ।
लांछनः पुं राशीधान्यं इति
राजनिर्घंटः क्वचित्पुस्तके लांछ
नीतिच पाठः ।
लाटः पुं देशांतरं वस्त्रं ।
इति मेदिनी जीर्णभूषणादि ।
इति शब्दरत्नावली ॥
लाड उत्क्षेपे इति कविक
ल्पद्रुमः लाडयति अललाडत् ।
इतिदुर्गादासः ॥
लापः पुं कथनं लपधातोर्भावे
घञ् प्रत्ययेनेति निष्पन्नं ।
लाप्य त्रि कथनीयं लपधातोः
कर्मणि ण्यण प्रत्ययेनेतिनिष्पन्नं
इतिमुग्धबोधव्याकरणं ॥
लाभः पुं मूलधनादधिकं वाणि
ज्योपार्जितं धनं तत्पर्यायः
फलं २ इत्यमर भरतौ लभ्यं
३ वृद्धिः ४ इति शब्दरत्नावली ।
प्राप्तिः इतिलभ्यत्वात्वर्थदर्शनात्
लाभ्यं क्ली लाभः इतिशब्दर
त्नावली ॥
लामज्जकं क्ली वीरणमूलं इत्य
मरः अस्य पर्याय गुणाउशीर
शब्दे द्रष्टव्यो उशीरवत्पीत १

क्लवि तृणविशेषः तत्पर्यायः
स्रनाले २ ग्रमृणाल ३ लवं ४ ल
घु ५ इष्टिकापथिकं दशीरं ७
दीर्घमूलं ८ जलाशयं ९ ग्रस्य ग·
णाः हिमत्वं तिक्तत्वं मधुरत्वं ।
वात पित्त तृट् दाह भ्रम मूर्छा
विरक्तमूत्र ज्वरापहत्वंच इतिरा
जनिर्घंटः

लालनं क्ली ग्रपत्यस्नेहकरणं
प्रेमपूर्वकबालकादीनां मोहाग
इति भाषा लड़कोपसेवे उप·
सेव इह ग्रपत्यपालने कला
लयेत् पंचवर्षाणि पुत्र मिति ग्र
नडलयो रेकत्वाल्लुत्वं इतिकवि
कल्पद्रुमः टीकायां दुर्गादासः त
थाहि लालने बहवो दोषास्ता
डने बहवो गुणाः तस्मात्पुत्रं
च शिष्यंच ताडयेन्नतु लालयेत्
ग्रपिच लालयेत्पंचवर्षाणि द
शवर्षाणि ताडयेत् प्राप्तेतु षो
डशे वर्षे पुत्रं मित्र वदाचरेत्
इतिचाणक्यं ॥

लालसा पुं स्त्री महाभिलाषः
इत्यमरः ओत्सुक्यं याञ्चा ।
इति मेदिनी दोहदं यथा
दोहदं दौर्हृदं श्रद्धा लालसा
स्पृहा मासित इतिहेमचंद्रः

लोलः इतिनानार्थे सपव ।

लालसीकं क्ली पिच्छलं इतिशब्द
रत्नावली ॥

लाला स्त्री मुखभवजलं लाल
इतिभाषा तत्पर्यायः स्रणिका
१ स्यंदिनी २ इत्यमरः द्राविका
४ स्रणीका ५ इतिशब्दरत्नावली
मुखस्रावः इति राजनिर्घंटः

लालाटिकः त्रि प्रभोर्भालदर्शी ।
कार्याक्षमः इत्यमरः यः सेव
कः क्रोध प्रसाद चिह्न ज्ञानाय प्र
भो र्ललाट मेव पश्यति यश्च
प्रभोः कार्येऽक्षमोऽशक्त स्तो·
लालाटिको पूर्ववत्स्मिकः । के
चित्त कार्याक्षम इति भालदर्शि
नपव विशेषणं मत्वा एकमेव
लालाटिकमाहु नैत द्वाविति भाव
दर्शीति चपाठः लालाटिकः सदा
लसे प्रभुभावनिदर्शिनि इत्य
जयः इति तट्टीकायां भरतः
ग्राभूषणविशेष पुं इति मे
दिनी ललाटसंबंधिनि त्रि यथा
प्रास्मिस्त लालाटिकीत्यादि ॥

लालामेहः पुं प्रमेहविशेषः ।
यथा लालातन्तुयुतं मूत्रं लाला
मेहेन पिच्छिलं प्रमेहतीतिशेषः
ग्रस्यौषधं गुडूच्याः स्वरसः ।

पेयो मधुना सर्वमेहजित हरिद्रा
चूर्णं युक्तो वा रसो रात्रा समा
तिकः ग्रपिच चंद्र प्रभा वचा
मुस्ता भूनिंब सुरदारुच हरिद्रा
तिविषा दार्वी पिप्पलीमूल चित्रकं
हवदन्ती पत्रकंच त्वगेला वंश
लोचना प्रत्येकं कर्षमात्राणि ऊ
र्ध्वानि दुहिमान् धान्यकं ।
त्रिफला चव्यं विडंगं गजपिप्प
ली स्वर्णमाक्षिकं व्योषं द्वौ क्षारो·
लवणत्रय एतानि टंकमात्रा ।
णि संग्रहणीयात्पृथक्पृथक् द्विकर्ष
हतलोहंस्याच्चतः कर्षा सिता भ
वेत् शिलाजत्वष्टकर्षं स्यादष्टौ ।
कर्षाश्च गुग्गुलोः विधिना यो ।
जिते रेतैः कर्तव्या गुटिकाशुभा ।
भा चंद्रप्रभाति विख्याता सर्वरोग
प्रणाशिनी निहंति विंशतिमेहा
न्कृच्छ्र मष्टविधं तथा इत्यादि ।
प्रभावप्रकाशः

लालाविषः पुं लूतादिः इति
हेमचंद्रः ॥

लालास्रावः पुं ऊर्णनाभः इति
हेमचंद्रः ॥

लालिकः पुं महिषः इति हे
मचंद्रः ॥

लालित्यं क्ली ललितस्यभावः ।
यथा प्रीतिं भक्तजनस्य पोजन
यते विघ्नं विनिघ्नन्स्वत स्तं वृन्दा
रक वृन्द वंदित पदं नत्वा मत
ङ्गाननं पाटीं सद्गणितस्य वच्मि
चतुर प्रीतिप्रदां प्रस्फुटां सं·
क्षिप्ताक्षर कोमलामलपदै र्ला
लित्य लीलावतीं इतिलीला·
वती ॥

लावः पुं स्त्री पक्षिविशेषः ।
लावया इतिभाषा इत्यमरभर·
तौ ग्रस्यमांसगुणा लघुत्वं
कटुत्वं मलवद्धकारित्वं स्वादुत्वं·
शीतत्वं त्रिदोषनाशित्वंच इतिरा
जवल्लभः ॥

लावकः पुं लावपक्षी । तत्प
र्यायः लघुजंगलः २ इति त्रि
कांडशेषः ॥

लावणं त्रि लवणेसंस्कृतं यथा
सार्पिष्कं दाधिकं सर्पि र्दधिभ्यां
संस्कृतं क्रमात् लवणोदकाभ्या·
मुदकं लावणिकमुदश्वितं ओद
श्वित मौदश्वित्कं लवणं स्यात
लावणं इतिहेमचंद्रः लवण·
सम्बंधि च नसे क्ली इति रत्न
माला ॥

लावणिकं त्रि लवणेनसंस्कृतं ।
इतिहेमचंद्रः लवणसम्बंधि च ।

लवणविक्रेतरि पुं लवणपात्रे क्ली इतिकेचित् ।

लावण्यं क्ली लवणत्वं लवणस्य भाव इत्यर्थे ष्य प्रत्ययेन निष्पन्नं सौन्दर्यविशेषः तल्लक्षणं यथा मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते इत्युज्ज्वलनीलमणिः तथाहि नीतिः । भूमिभर्त्तानति र्गुणवतां श्रीरङ्गनानां धृति र्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिरां लावण्यं वपुषः स्मृति स्तु मनसः शान्ति र्द्विजस्य क्षमा शक्तस्याद्रविणं गृहाश्रमवतो स्वास्थ्यं सतां मण्डनं इति नवरत्नान्तर्गतामरसिंहः

लावण्यार्जितं क्ली विवाहकालीनं श्वशुराभ्यां दत्तं धनं यथा प्रीत्या दत्तंच यत्किञ्चित्श्वश्र्वा वा श्वशुरेण वा पादवन्दनिकं यत्तु लावण्यार्जितमुच्यते इति विवादचिन्तामणिधृत कात्यायन वचनं लावण्यं शीलत्वेप्रणापादि तथाच पारस्करतायै शीलादिमत्त्वे वाक्षिये स्य श्वशुरादिना दत्ते तृतीयं स्त्रीधनमित्यर्थ इतितद्व्याख्यानं ।

लावा स्त्री पक्षिविशेषः तत्पर्यायः लावकः २ लावः ३ लवः ४ अस्या मांस गुणाः पथ्यत्वं । ग्राहित्वं लघुत्वंच इति राजनिर्घण्टः ॥

लाडुः } स्त्री अलाबुः इति शब्द
लाडूः } रत्नावली

लासः पुं नृत्यमात्रे स्त्रीणां नृत्ये इतिशब्दरत्नावली यूषः इतिशब्दचन्द्रिका ॥

लासकं क्ली मटुकं मटका इति भाषा इतिहारावली ॥

लासकः पुं लास्यकारी मयूरः नर्त्तकः इतिमेदिनी । वेष्टः इति धरणिः ।

लासकी } स्त्री नर्त्तकी इत्यमरः
लासिका }

लास्फोटनी स्त्री आस्फोटनी वेधनिका इत्यमरटीकायां रायमुकुटः ॥

लास्यं क्ली नृत्यं इत्यमरः । तौर्य्यत्रिकं इतिमेदिनी । भावाश्रयं नृत्यं तालल्याश्रयं नृत्तं इति भरतः । पुंनृत्यं तांडवं प्राहुः स्त्रीनृत्यं लास्यमुच्यते इति संगीतनारायणे नारदसंहिता ॥

लासः पुं नर्त्तकः इति शब्दरत्नावली

लासकं क्ली नृत्यं इतिशब्दरत्नावली ॥

लास्या स्त्री नर्त्तकी । इति शब्दरत्नावली ॥

लाक्षकी स्त्री सीता यथा रामवने इयं सीता हारकेशस्य रुक्मिणी विस्रोऽवतार मात्रस्य । लक्ष्मी र्या कमलालया वाराणस्यां विशालाक्षी विमलापुरुषोत्तमे वैकुण्ठे तु महालक्ष्मी राधा वृन्दावने वने ॥ लक्षणाः कमलादास्या यस्याः सा लाक्षकी मता एवं शतसहस्राणा मीश्वरीरूपिकापिका इति पाद्मोत्तरखंडे ५५ अध्यायः ॥

लाक्षणिकः पुं लक्षणाप्रतिपादकः इति साहित्यदर्पणः लक्षणात्मक इति समरत्व लाक्षणिकत्वं इति सारमंजरी ।

लाक्षा स्त्री रक्तवर्णरसनिर्यासविशेषः लाहा इतिभाषा तत्पर्यायः राक्षा २ जतु ३ यावः ४ अलक्तः ५ द्रुमामयः ६ इत्यमरः खदिरिका ७ रक्ता ८ रंगमाता ९ पलंकषा १० क्रिमिहा ११ द्रुमव्याधिः १२ अलक्तकः १३ पलाशी १४ शृङ्गिणी १५ दीप्तिः १६ जतुका १७
गंधमादिनी १८ नीला १९ द्रवरसा २०
पित्तारिः २१ अस्या गुणाः । कटुत्वं तिक्तत्वं कषायत्वं श्लेष्मपित्तार्शिशोफ विष रक्त विषमज्वर नाशित्वंच इति राजनिर्घण्टः भग्नविसर्प त्वग्दोषनाशित्वं बल्यत्वंच इतिराजवल्लभः अपिच लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः अनुष्णा कफ पित्तास्रहिक्का कास ज्वर प्रणुत् व्रणोरःक्षत वीसर्प कृमि कुष्ठगदापहा अलक्तको गुणै स्तद्वद्विशेषाद्व्यंगनाशनः इतिभावप्रकाशः ॥

लाक्षातरुः पुं पलाशवृक्षः इति शब्दमाला ॥

लाक्षातैलं क्ली पक्वतैलविशेषः लाक्षादितैलमिति ख्यातं तद्द्विविधं स्वल्पं वृहच्च यथाक्रमं तत्प्रकारं तद्गुणांचाह । लाक्षाहरिद्रा मंजिष्ठा कल्कै स्तैलं विपाचितं षड्गुणेनारनालेन दाहशीतज्वरापहं इति स्वल्पलाक्षातैलं वृहद्यथा लाक्षारसाढके प्रस्थं तैलस्य विपचेद्भिषक् । मस्त्वाढक समायुक्तं पिष्ट्वाचात्र

समावपेत् शतपुष्पां हरिद्रांच मूर्वां
ऊषं हरेणुकां कटुकां मधुकां।
रास्ना मश्वगंधांच दारुच मुस्तकः
चंदनंचैव पुण्यगन्ध समानकैः द्र
व्यैरेतैश्च तल्लिहं ग्रभ्यंगान्माहता
परं । विषमाख्यान् ज्वरान्।
सर्वानाश्वेव प्रशमं नयेत् कासं
श्वासं प्रतिश्यायं कंडूं दौर्गन्ध्य
गौरवं त्रिकपृष्ठ ग्रहं शूलं गा
त्राणां स्फुटनन्तथा । पापाल।
क्ष्मीप्रशमंसर्वग्रहनिवारणं ग्रश्वि
भ्यां निर्म्मितं सम्यक्तैलं ला
क्षादिकं महत् इति बृहल्लाक्षा
तैलं इतिसारावबोधः ।
लाक्षाप्रसादः पुं पट्टिकालोध्रः
इतिराजनिर्घंटः ।
लाक्षाप्रसादनः पुं रक्तलोध्रः ।
तत्पर्यायः क्रमुकः २ पट्टिका ३
पट्टा ४ इत्यमरः ॥
लाक्षावृक्षः पुं कोष्ठाम्रः इति
राजनिराजनिर्घंटः पलाशवृक्षः
इतिहारावली ॥
लिकुचंक्ली चुक्रं इतिराज
निर्घंटः
लिकुचः पुं लकुचः इत्यमरः ।
लिक्का स्त्री लिक्षा इतिशब्दर
त्नावली ॥

लिख ग लेखने इतिकविक
ल्पद्रुमः श लिखति पुस्तकंलेख
कः ग्रयं विभाषया ऊकारि दिति
केचित् तेन लिखितं विश्वस्तो
ऽपि शाक्तिस्तानि विति लिखि
तव्यं लेखितव्यं लिखनं इत्यादि
सिद्धं इतिदुर्गादासः ।
लिख ह कुपि इतिकविकल्पद्रुमः
ह लिख्यते स्पपि गतौ इतिदु
र्गादासः
लिखः पुं लेखनं इति लिख
धातोः क प्रत्ययेन निष्पन्नं ॥
लिखनं क्ली लेखनं लिपिः ।
इत्यमरटीकायां सारसुन्दरी ॥
विधिलिपिरखंडनीया यथा य
स्ययल्लिखनं एवं यत्र काले नि
रूपितं तदेव खंडितं वाथे स्त
मेनाहंच का विधिः विधात्रस्त
विधानाहं येषां येल्लिखनंकृतं
ब्रह्मादीनांच रुद्राणां नखंडो तत
कदाचन इतिब्रह्मवैवर्त्ते श्रीकृ
ष्णजन्मखंडे ९५ ग्रध्यायः ॥
लिखितं क्ली लिपि इत्यमरः
लेखने इति भरतः लिखित
पत्रादौ त्रि यथा प्रमाणं लि
खितं भुक्तिः साक्षिण इति
कीर्त्तितं इति मिताक्षरायांयाज्ञ

वल्क्यः मुनिविशेषे पुं यथा
पराशर व्यास शंख लिखिताद
क्षगौतमौ शातातपो वशिष्ठश्च
धर्मशास्त्रप्रयोजकाः इतिभ्याद
तत्त्वयाज्ञवल्क्यः ॥
लिख्या स्त्री परिमाणविशेषः।
यथा जालान्तरगते भानौयच्चा
णु दृश्यते रजः तै श्चतुर्भि र्भवे
ल्लिख्या लिख्या षड्भिश्च सर्षपः
इतिशब्दचंद्रिका ॥
लिग इ गतौ इति कविकल्प
द्रुमः इ लिंग्यते इतिदुर्गादासः
लिग इ क चित्रे इतिकविक
ल्पद्रुमः इ क लिंगयति प्राहुं।
क्लीनपुंसकैः शाब्दिकः चित्रंकरो।
तीत्यर्थः इतिदुर्गादासः ।
लिग क्ली मनः इति सिद्धान्त
कौमुद्यामुणादिवृत्तिः ॥ ।
लिगः पुं मूर्खः इति सिद्धान्त
कौमुद्यामुणादिवृत्तिः भूप्रदेशः
मृगः इतिनानार्थरत्नमाला ॥
लिंगं क्ली चिह्नं शेफः इत्य
मरः ग्रनुमाने सांख्योक्तप्र
कृतिः शिवमूर्त्तिविशेषः इति।
मेदिनी व्याप्य धर्मं ।
पुंस्त्वादिः इति त्रिकांडशेषः
सामर्थ्य यथा यावता मेव।

यावन्नो लिंग शुद्धिगतं भवेत्
ग्रर्थ श्चैवाभिधेयस्त तावद्धि गुणा
विग्रहः इतितिथ्यादितत्त्वे पतत्का
रिका व्याख्यायां रघुनंदनः
ग्रथ शेफार्थस्य लिंगस्य पर्यायः
शिश्नः २ स्मरस्तंभः ३ उपस्थः ४
मदनांकुशः ५ कंदर्पमुषलः ६
शेफः ७ मेहनं ८ शेफः ९ मेढ्रः १०
लांगः ११ ध्वजः १२ रागलता १३
वंगः १४ इति शब्दरत्नावली ॥
लांगूलं १५ साधनं १६ सेफः २०
कामांकुशः १७ इति जटाधरः
लिंगमूले वादि लान्त वर्णेषु
स्वाधिष्ठान नामक षड्दलप
द्ममस्ति यथा मूलाधारे त्रिकोणे
खे इच्छा ज्ञान क्रियात्मके मध्येस्व
यंभूलिंगन्त्र कोटिसूर्य्य समप्रभं
तदूर्ध्वे हेमवर्णाभं वस वर्ण चत
र्दलं तदूर्द्ध्वेग्निसमप्रख्यं षड्दलं
हीरकप्रभं वादि लान्त षड्वर्णेनयु
क्तंचाधिष्ठान संज्ञकं मूलमेतन्न पु
रं लिंगं स्वाधिष्ठानं ततो विदुः इ
तितंत्रे ग्रस्याधिष्ठातृदेवतादि
र्यथा प्रजनःसर्वभूताना मुपस्था
ध्यात्म मुच्यते ग्रधिभूतं तथा
शुक्रं दैवतंच प्रजापतिः इति
महाभारते ग्राश्वमेधिकपर्व ।

असस्तुभाशुभ लक्षणं यथा।
स्वल्पे लिंगे च धनवान्स्यादपुत्रा
श्रिवर्जितः स्थूललिंगो दरिद्रः
स्यादुःखोक दुषणी भवेत् इति गा
रुडे ८३ अध्यायः अपिच महद्वि
रादुर्गाख्याते स्वल्पलिंगो धनीश्वरः
अपत्यरहितश्चैव स्थूललिंगो ध
नोज्झितः महद्विजानुभि शिति
शोषः मेढ्रे वामनते चैव सुता
न्नरहितो भवेत् वक्रेऽन्यथापु
त्रवान्स्याद्दारिद्र्यं विनते त्वधः
अल्पैस्तु तनयो लिंगे शिरालेऽ
थसुखी नरः स्थूलग्रन्थियुतेलि
ङ्गे भवेत्तन्नारि संयुतः इति गारु
डे ८८ अध्यायः अन्यच्च दीर्घ
लिंगेन दारिद्र्यं स्थूललिंगेन निर्ध
नः कृशलिंगेन सौभाग्यं कृस्वति
ङ्गेन भूपतिः कर्कशैः कठिनैःलिं
गैःपरदाररतःसदा रमतेचस्वदारा
सौ निर्धनो भवति ध्रुवं कृश
लिंगेन सुस्निग्धा रक्तलिंगेनभू
पतिः परस्त्री रमते नित्यं नारीणां
वल्लभो भवेत् कृशलिंगेन रक्ते
नलभते वोलभोगानां राज्य स्त्रव
त्त्व दिव्यांगनाःकन्याकायाःपतिर्भ
वेत् इति सामुद्रके । शिव
स्य लिंगरूपस्य तन्निर्माल्याग्राह्यत

स्य कारणं यथा दिलीपउवाच
वेदसिस्मादं द्विजश्रेष्ठ रुद्र त्रिपुर
हन्तकः कस्माद्विगर्हितं रूपमाप
वान्सर भार्यया योनि लिंगस्वरू
पंच कृथं स्यात्तमहात्मनः पंचवक्त्र
स्तुलेबाहुः शूलपाणि स्त्रिलोचनः
कथं विगर्हितं रूपं प्राप्तवान्द्विज
पुंगव एवं सर्वं समाचक्ष्व मि
त्रावरुणानंदन वशिष्ठ उवाच
शृणुराजन्प्रवक्ष्यामि यन्मा पृच्छ
स्तिगौरवात् स्वायंभुवोमनुः पूर्वं
मंदरे पर्वतोत्तमे इयाज मुनि
भिः सार्द्धं दीर्घं सत्र मन्तमं त
स्मिन्समागताःसर्वे मुनयःसंशित
व्रताः अन्योन्यं देवतातत्त्व मिथः
प्रोचुस्तपोधनाः विप्राणां वेद
विदुषां कःपूज्यो देवता वरः
इतितस्ववचःश्रुत्वा सर्वएवमह
र्षयः भृगुं तपोनिधिं विप्रं प्रो
चुः प्रांजलयस्तदा अस्यपृच्छः
अस्माकं संशयं छेत्तुं समर्थो
सि भृगुरंत ब्रह्मविष्णुमहेशाना
मंतिकंव्रज सत्वर गत्वा तेषांस
मीपन्तु तथा दृष्ट्वा च विग्रहान्
भृगु सत्वगुणा स्तेषां यस्मिन्संवि
द्यते मुने स एव पूज्यो विप्राणां
नेतस्तुकदाचन तस्मात्वद्विमुनिश्रेष्ठ

41.59

विद्यया निरासनं ॥ त्रिपंक्त्
दमुनिश्रेष्ठ सर्वलोकहितं प्रभो
एव भृगु स्तवतस्तूर्णं कैलासंप्र
तिसत्तमः जगाम वामदेवेनयत्रा
स्तेवृषभध्वजः गत्वाहारमुपागम्यशं
करस्यमहात्मनः शूलहस्त महारौ
द्रं नंदिं दृष्ट्वाब्रवीद्द्विजः संप्राप्तो
हि भृगु विप्रो हरं दृष्टुं सुरोत्त
मं निवेदयस्वमां शीघ्रं शंकरा
यमहात्मने तस्य तद्वचनं श्रु।
त्वानंदी सर्वगणेश्वरः उवाचपरुषं
वाक्यं महर्षि ममितौजसं असा
न्निध्यःप्रभो स्तस्य देव्या क्रीडति
स्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहार निर्णयः कार्यः यथाह नारदः लेख्ये देशान्तरन्यस्ते शीर्णे दुर्लिखिते हृते सतस्तत्काल करणमसतो दृष्ट दर्शन मिति सतोविद्यमानपत्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिर्दातव्यः असतः पुनरविद्यमानस्य पत्रस्य पूर्वं ये दृष्टवः साक्षिणस्ते दर्शनं व्यवहार परिसमापनं कार्यं। यदात साक्षिणो न संति तदादिव्येन निर्णयः कार्यः अलेख्यसाक्षिके दैवी व्यवहारे विनिर्दिशेदिति स्मरणात् एतच्च जानपदं व्यवस्थापत्रं राजकीय मपि व्यवस्थापत्रमीदृश मेव भवति इयांस्तुविशेषः राज्ञः स्वहस्तसंयुक्तं स्वमुद्रा चिह्नितन्तथा राजकीयं स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमदिति तथान्यदपि राजकीयं जयपत्रं बृहद्वशिष्ठेनोक्तं यथोपन्यस्त साध्यार्थ संयुक्तं सोत्तरक्रियं सावधारणकं चैव जयपत्रकं। लिख्यते माड्विवाकादि हस्तांकमद्रितं राजमुद्रया सिद्धे ऽर्थे वादिने दद्याज्जयिने जयपत्रक मिति तथा सभासदोपि मतंमेऽमुक

पुत्रस्येति स्वहस्तं दद्युः सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः यथा लेख्य विधौ तद्वत्स्वहस्तं दद्यु रेवत इतिमनुस्मरणात् सभासदां च परस्परानुमतिव्यतिरेकेण व्यवहारो निःशल्यो भवति यथाह नारदः यत्र सम्योजनः सर्वः साध्यते इति मन्यते सभिः शल्यो विवादः स्यात्सशल्यस्त्वन्यथा भवेदिति एतच्चतुर्थव्यवहारपदसाधयेत्साध्य मर्थं यश्चतुष्पादान्वितं चयत् राजमुद्रांकितं चैव जयपत्रकमिष्यते इति स्मरणात् यत्र तद्धीनता यथा अल्पवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः आहूतप्रपलायी चहीनः पंचविधः स्मृत इति तत्र न जयपत्र मस्ति अपितु हीनपत्रमेव तत्र कालान्तरे दंड प्राप्यर्थं जयपत्रं न प्राड्न्याय विधिसिद्ध्यर्थमिति विशेषः लेख्य सन्देहे निर्णय निमित्तान्याह संदिग्ध लेख्य शुद्धिः स्यात्स्वहस्त लिखितादिभिः युक्ति प्राप्ति क्रिया चिह्न सम्बन्धागमहेतुभिः स्पष्ट मशुद्धं चेति संदिग्धस्य लेख्यस्य शुद्धिः स्वहस्तलिखितादिभिः स्यात् स्वहस्तेन लिखितं यल्लेख्यान्तरं तेन शुद्धिः यदिसह

शास्त्रराणि भवंति तदाशुद्धिः
स्यादित्यर्थः आदि शब्दात्सात्तिले
खक स्वहस्त लिखितान्तरसंवा
दाच्छुद्धिरिति युक्त्या प्राप्तिर्युक्तिः
प्राप्तिः देश काल पुरुषाणां इ
त्येणासह संबंधः प्राप्तिः अस्मिन्दे
शे अस्मिंकाले अस्य पुरुषस्येदंद्र
व्यं घटत इति युक्तिः प्राप्तिः
क्रिया तत्सात्त्युपन्यासः चिह्नम
साधारणं श्रीकारादि सम्बंधः
अर्थि प्रत्यर्थिनोः पूर्वमपि परस्पर
विश्वासेन दान ग्रहणादिसंबंधः
आगमोऽस्येतावतोऽर्थस्य संभावि
तः प्राप्त्युपायः एव एवहेतवः
एभिर्हेतुभिः संदिग्ध लेख्य शुद्धिः
स्यादित्यन्वयः यदात लेख्यस्य
संदेहनिर्णयो नजायते तदासाक्षि
भि निर्णयः कार्यः यथाहकात्या
यनः दूषिते पत्रके वादी तदा
रूढांस्तु निर्दिशेदिति साक्षिस
म्भवविषय निरम्भवनं सातासं
भवविषयन्तु हारीतवचनं नमवे
त कृतं पत्रं कूट मेतेन कारितं
अधरीकृत्य तत्पत्रमथ्यदिव्येननि
र्णय इति एवं शोधिते पत्रे
ऋणे च दातव्य प्राप्तेयदाकृत्स्न
मेवार्पितात मसमर्थस्तदाकिंक

मित्यत आह लेख्यस्य पृष्ठेऽभि
लिखेद्दत्वा दत्वर्णिकोधनं धनी
चोप गतं दद्यात्स्वहस्त परिचिह्नि
तं यदापमर्णिकः सकल मृणंदा
तुमसमर्थ स्तदा शक्त्यनुसारेणद
त्वा दत्वाशर्वकृतस्य लेख्यस्य पृष्ठेऽभि
लिखेदेतावन्मयादत्तमिति उत्तम
र्णोवा उपगतंप्राप्तंधनंतत्सैव ले
ख्यस्य पृष्ठे दद्यादभिलिखेदेताव
न्मयालब्ध मिति कथं स्वहस्तप
रिचिह्नितं स्वहस्त लिखितात्तर वि
हितं यद्वोपगतं प्रवेशपत्रं स्वहस्त
लिखित चिह्नितमधमर्णायोत्तम
र्णो दद्यात ऋणे तु कृत्स्ने दत्ते
लेख्यं किंकर्तव्यमित्यतआह दत्वर्णं
पाटयेल्लेख्यंशुद्ध्यै वान्यत्तु कारये
त क्रमेण सकृदेव वाकृत्स्नमृ
णंदत्वा पूर्वं कृतं लेख्यपाटयेत
यदातु दूर्गदेशावस्थितं लेख्यंन
ष्टंवा तदा शुद्ध्यै अधमर्णात्व नि
दूत्तमर्थमन्यलेख्यं कारयेदुत्तमर्णा
मधमर्णः सर्वोक्त क्रमेणोत्तमर्णा
विशुद्धिपत्रं अधमर्णाय दद्या
दित्यर्थः ससाक्षिके ऋणे कृत्स्ने
दातव्ये किंकर्तव्य मित्यत आह
साक्षिमच्चभवेद्यद्वा तद्दातव्यंससा
क्षिकं यत्र ससाक्षिक मृणंत

र्तव्य

समस्तमेव दद्यात इति लेख्य
प्रकरणं इति मिताक्षरायांव्य
वहाराध्यायः
लेख्यचूर्णिका स्त्री तूलिका इ
तिशब्दरत्नावली ॥
लेख्यपत्रः पुं तालवृक्षः इति
भावप्रकाशः लेखनीपत्रेस्त्री
लेख्यस्थानं क्ली लिख्यतेयत्र।
आफिस इति दफ्तरखाना इति
वम्लेच्छभाषा तत्पर्यायः ग्रन्थकु
टी २ इतिशब्दरत्नावली ।
लेण्डं क्ली दूषं न्याड इतिभा
षा यथा उत्ससर्ज पुरोलेण्डम
वंच भयमापह इति ब्रह्मवैव
र्ते श्रीकृष्णजन्मखण्डे धेनुकासुर
वधे २२ अध्यायः ॥
लेप ऋ उ गमने इतिकवि
कल्पद्रुमः ऋ अलिलेपत उ ले
पतेलिलेपे इतिदुर्गादासः ॥
लेपः पुं लेपनं भोजनं ।
इतिमेदिनी यथा चुन इति
भाषा इतिविश्वः ॥
लेपकः पुं जातिविशेषः राज
इतियेकर इति च भाषा तत्प
र्यायः पलगंडः २ इत्यमरः ।
लेपी ३ इतिशब्दरत्नी ॥
लेप्यकृत ४ इतिहेमचंद्रः ॥

लेपनं क्ली लेपः लेपा इति
भाषा यथा वेशावस्य सिलेप
ने तृतीयाद्यय संज्ञिता ।
तत्रमां लेपयेद्यस्तु लेपनेनातिशोभि
तं इति तिथ्यादितत्वं ॥
विष्णुगृहलेपन फलं यथा ।
वाराहउवाच शृणु तत्वेन मेदे
विलिप्यमानस्य यत्फलं सर्वं ते
कथयिष्यामि यथा प्राप्नोतिमा
नवः गोमयं गृह्य वै भूमे मम
वेश्मोपलेपयेत् यस्तानि तत्र
यावन्ति पदानिच विलिम्पतः ।
तावद्वर्ष सहस्राणि दिव्यानि दि
विमोदते यदि द्वादशवर्षाणि
लिम्पेत मम कर्मस्तु जायते वि
पुले गृहे धन धान्य समाकुले ।
दिव्ये नमस्कृतो देवि कुशद्वीपा
यगच्छति कुशद्वीप मनुप्राप्य सहस्रं
जीवते दश मद्भक्तश्चैव जायते
महिम्ना गुणवान्शुचिः कुशद्वी
पात्परिभ्रष्टो मम कर्म परायणः
राजावै जायते सद्गु सर्व धर्मेषु
निष्ठितः लेपनस्य प्रभावेण मम
कर्म परायणः भक्त्या व्यवहित
श्चापि सर्वशास्त्राणि गच्छति
देविकारयेते सर्वं मम चायत
नानिच कारयित्वा यथान्याये

मम लोकाय गच्छति गोमयस्य
तु वक्ष्यामि तच्छृणुष्व वसुन्धरे
गोमयेन समासाद्य यावल्लोको
नुगच्छति समीपे यदि वा दूरे ग
त्वानयति गोमयं यावति तस्य
दाससहस्रवर्षं सहस्रकं गोमया
नयिताचैव स्वर्गलोके महीयते
एकादश सहस्राणि एकादश
शतानि च ततः स्वर्गात्परिभ्रष्टः पर
मतेव मुदायुतः शाल्मल्यां परि
भ्रष्टो राजा भवति धार्मिकः मद्
भक्तश्चैव जायेत सर्व धर्मविदांवरः
अथ द्वादशवर्षाणि मत्क्लिन्नः स
हस्रकः वहते गोमयं स भूम
मलोकाय गच्छति इति वराह
पुराणे देवीगृहलेपनफले
यथा देव्या गृहन्तु यः शुक्ल गो
मयेनानुलेपयेत् स्त्रियो वा य
दि वा पुंसः षण्मासन्तु निरन्तरं।
स लभेदीप्सितान् कामान् दे
व्यालोकञ्च गच्छति इति देवीपु
राणे ४२ अध्यायः ॥
लेपनः पुं तुरुष्कनामगन्धद्रव्यं
इति राजनिर्घण्टः ॥
लेपी न पुं लेपकः पोकर इति
भाषा इति शब्दरत्नावली ले
पकर्त्तरि लेपविशिष्टे च त्रि ॥

लेप्यं त्रि लेपनीयं लेप्तव्यं ।
लिपधातोः कर्मणि य प्रत्ययेन
निष्पन्नं ॥
लेप्यकृत् पुं लेपकः इतिहे
मचन्द्रः ॥
लेप्यमयी स्त्री काष्ठादिघटितपु
त्तलिका तत्पर्यायः अञ्जलिका
रिका २ इतिहेमचन्द्रः ॥
लेप्यस्त्री स्त्री सुगन्धद्रव्यलिप्ता
स्त्री इतिशब्दरत्नावली ॥
लेयः पुं सिंहराशिः इतिज्योति
स्तत्त्वं ॥
लेलिहानः पुं शिवः इति शब्द
रत्नावली सर्पः इति हेमचन्द्रः
पुनः पुनर्लेहनकर्त्तरि त्रि
लेलिहाना स्त्री मुद्राविशेषः ।
यथा वक्त्रे विस्तारिते कृत्वाप्य
धो जिह्वाञ्च चालयेत् पार्श्वयो
मुष्टि युगलं लेलिहानेति कीर्
र्त्तिता यथा नारायणे अन्या
लेलिहाना वक्तव्या योनिमोपा
परः सेन्द्रं वेधः कूर्चं क्रमाद्वि
दुः बीजानि चाङ्गुल्यो मुद्राव
न्यानमावृत्य तर्जनी मध्यमाना
माः समं कुर्यादधोमुखं अनामा
यां क्षिपेद्वृद्धां ऋज्वीं कृत्वा कनि
ष्ठिकां लेलिहा नाम मुद्रेयं जीव

न्यासे प्रकीर्त्तिता इतितन्त्रसारः
लेशः पुं कणा इत्यमरः ॥
लेष्टुः पुं लोष्ट्र इत्यमरः ॥
लेष्टुघ्नः पुं लेष्टुभेदनः इतिश
ब्दरत्नावली ॥
लेष्टुभेदनः पुं लोष्टभङ्गसाधन
मुद्गरः मद्दे इति ख्यातः इति
केचित् इति भरतः तत्पर्यायः
कोटिशः २ इत्यमरः ॥
कोटीशः ३ इति रत्नकोषः ।
लेष्टुघ्नः ४ लेष्टुभेदी ५ चूर्णदण्डः
६ इति शब्दरत्नावली ॥
लेष्टिकः पुं हस्त्यारोहकः तत्प
र्यायः कटिरोहकः २ इतिश
ब्दमाला ॥
लेहः पुं आहारः भक्षणं ।
इतिहेमचन्द्रः तत्पर्यायः ।
स्वादनं २ रसनं ३ स्वदनं ४ स्व
दिः ५ इतिराजनिर्घण्टः ॥
लेहनं क्ली जिह्वयारसग्रहणं
चाटन इति भाषा तत्पर्यायः ।
जिह्वास्वादः २ इतिहेमचन्द्रः ॥
लेहिनः पुं टङ्कणे इतिहेम।
चन्द्रः ॥
लेह्यं क्ली अमृतं इति शब्द
माला लेहनीये त्रि ॥
लैंगं क्ली लिंगपुराणं यथा

मात्स्यं कौर्म्मं तथा लैंगं शैवं
स्कान्दं तथैव च इत्यादि पाद्मो
त्तरखण्डे ७४ अध्यायः ॥
लैंगी स्त्री लिंगिनी इतिराज
निर्घण्टः लिंगसम्बन्धिनि त्रि ॥
लोक ऋ क दीप्तौ इतिक
विकल्पद्रुमः ऋ अललोकत् क
लोकयति इतिदुर्गादासः ॥
लोक ऋ ङ ईक्षे इतिकवि
कल्पद्रुमः ऋ अलुलोकत ङ
लोकते विलोकयेम्भो वपुः राघ
रेहंगाभकाम विस्तार फलं हरि
एषः इत्यादौ विलोकने विलोकः
पश्चात्तं करोतीति ज्ञो साध्ये ।
इतिदुर्गादासः ॥
लोकः पुं भुवने जनः इत्य
मरः सप्तलोक नामानि यथा
भूर्भुवः स्व मेहश्चैव जनश्च त
पएव च सप्तलोकश्च सप्तैते लो
कास्तु परिकीर्त्तिताः इत्यग्निपु
राणं अपि च भूर्लोको भुवः
स्वर्लोक सैलोका मिद मुच्यते
महर्जन स्तपः सत्यः सप्तलोकाः
प्रकीर्त्तिताः भूर्लोकः पार्थिवो
लोको ऽन्तरीक्ष भुवः स्मृतः
भाव्यो लोको दिवि ह्येतल्लेषा
उर्ध्वे यथा क्रमे भूतस्याधिप

तिर्य्यग्नि स्ततो भूतपतिस्ततः
वायुर्नभसोऽधिपति स्तेन वायु
र्नभःपतिः भावस्य सूर्य्योऽधिप
तिस्तेन सूर्य्यो दिवस्पतिः यक्ष-
विद्याधरश्चैव गुह्यकाः सहवास
वः भूर्लोक वासिनःसर्वे अन्त
रीक्षचरान् शृणु मरुतः सप्तभिः
स्कंधैरुद्रा स्तथैव वासिनो आ
दित्यावसवः सर्वे तथैवच गवां।
गणाः चतुर्थे तु महर्लोके तिष्ठ
ते कल्पवासिनः प्रजानांपतिभिः
सर्वैः सेव्यते पंचमो महान् मनुः
सनत्कुमाराद्या वैराजश्च सुताः
स्तयः षष्ठे तु संस्थिता ह्येतेदेवा
देवविरोधकाः सत्यस्तु सप्तमो
लोको ह्यपुनर्भववासिनो ब्रह्म
लोकः समाख्यातोह्यप्रतीघातल
क्षणः महीतलात्सहस्राणां शतात
ऊर्द्ध्वे दिवाकरः दश तानिध्रुवे
यावद्द्विगुणे द्विगुणान्तरे दशायो
जन कोट्यस्तु मेरु र्न्द्रध्रुवकः
स्ततः त्रयोविंशति लक्षाणि
लोकोऽलोक उच्यते द्विगुणेषु स
हस्रेषु योजनानां शतेषु च लो।
कान्तरमथैवैकं भुवाहर्द्विथी
यते देव दानव गंधर्व यक्षराक्ष
स पन्नगाः भूत विद्याधराश्चैव अ
श

ते देवयोनयः ते ब्रह्मांडस्य म
ध्यस्थाः परत स्तमसाहृतं ततो
ऽग्नि वायु राकाशं ततो भूतादि
रुच्यते ततो महान् प्रधानश्च
प्रकृतिः पुरुषस्ततः पुरुषादीश्व
रोयो यस्य शक्त्याहृतं जगत्
शिवोमा भानु देवानां परापरत
रामताः इति देवी पुराणे दे
लोकाभ्युदये ग्रहगति नामाध्या
यः दिक्पालानां लोकाः यथा
प्रजा पतिस्तु भगवाननुज्ञातः प्र
भु देवता आधिपत्येषु सु
रेषु न्ययोजयत योगवित् यथा
णामपि लोकानां देवतानां हि
ओजसाः वव्रुः शक्रं राजानं
दैत्यानां दितिपूर्वजं पूर्वस्यां
कौशिको राजा दक्षिणास्यां यमो
दिशि वरुणः पश्चिमायां तु उत्त
रस्यां सदा धनी पुण्यवतांलो
का यथा पदं विभज्य राज्या
निप्रभुः प्रोक्तानि यानिच लोका
स्त्रिविदये दिव्यान्दरावथ पृथक्
पृथक् कस्यचित्सूर्य्यसंकाशान् क
स्यचिद्वह्निनिर्मलान् कस्यचिद्वि
स्यविद्युत्तान्कस्यचिच्चन्द्रनिर्मलान्
नानावर्णान्काममयाननेक शतयो
जनान् सतान् सुकृतिनां लोकान्

4197

पावनायच संस्थितान् भान्द्रेष्व
ये तपसंति सौम्या स्तारागणाः
सदा एते सुकृतिनां लोकाये
शान्ताः पुण्यकर्मभिः ये यजंति
मखैः पुण्यैः समास वर दक्षिणैः
स्वदम् निरता दान्ता ऋजवःस
त्यवादिनः दीनानुग्रहकर्त्तारो ।
ब्रह्मण्या लोकपूजिताः योग
युक्ता महात्मानो यान्ति तत्र तपो
ज्वलाः सर्वमहाः तथाप्यलोकोपि
ता ये तमोजिताः । एवं।
नियोज्य तनयान्स्वयं लोकपि।
तामहः पौष्करे ब्रह्मसदन मारु।
रोह प्रजापतिः सर्वैस्वयंभूद
तेषु पावनेषु दिवौकसः रेमि
रे स्वेषु लोकेषु महेन्द्रप्रमुखाभिपा
लिताः इति वह्निपुराणे वारा
हप्रादुर्भावनामाध्यायः ॥
लोककांता स्त्री ऋद्धिनामौषधं
इति राजनिर्घण्टः ॥
लोकचक्षुः स पुं सूर्य्यः इतिश
ब्दमाला जनस्यलोचनंच ॥
लोकजित् पुं बुद्धः इत्यमरः
लोकधारः पुं कर्स्वरः इति
राजनिर्घण्टः ॥
लोकनाथः पुं बुद्धः इति।
त्रिकांडशेषः ब्रह्मा इतिशब्दर
त्ना

वली विष्णुः इति तस्य सहस्र
नाम स्तोत्रं शिवः यथा अ
किंचनः सन्भवःस संपदामी
लोकनाथः पितृसद्मगोचरः ।
सभीमरूपः शिव इत्युदीर्यतेन
संति याथार्थ्यविदः पिनाकि
नः इतिकुमारसंभवः ॥
लोकपालः पुं राजा इतिह
लायुधः दिक्पालः यथा इंद्रो
वह्निः पितृपतिर्नैर्ऋतिर्वरुणो
ऽनिलः धनदः शंकरश्चैवलोक
पालाः पुरातनाः इतिवह्निपुरा
णं ॥
लोकबांधवः पुं सूर्य्यः इतिज
टाधरः ॥
लोकमाता स्त्री लक्ष्मीः इत्यमरः
लोकलोचनः पुं सूर्य्यः इति
शब्दरत्नावली ॥
लोकवाह्यः पुं सर्वाचारवर्जि-
तः यथा लोकवाह्यस्तु योवा
जिगवाद्यपाचारवर्जितः इतिजटा
धरः ॥
लोकविनायकः पुं शरीरविशे
षः यथा स्कन्दग्रहादयोपेच
आर्य्यक ग्रासकादयः कौमारा
स्ते भुवि ज्ञेया येच लोकवि
नायकाः सहस्र शत संख्या

ता मर्त्त्यलोकविचारिणः इति
वह्निपुराणं लोकविश्रुतिः
स्त्री जनश्रुतिः किम्वदन्ती इ
ति केचित् लोकायतं क्ली त
र्कभेदः चार्वाकशास्त्रं इत्यमरभ
रतौ लोकायतिकः पुं चार्वाकः
इति हेमचन्द्रः ॥
लोकालोकः पुं स्वनामख्या
तपर्वतः तत्पर्यायः चक्रवाडः
२ इत्यमरः हेमाद्रिद्वीपाम्
होमावद्य प्राकारवत् स्थितोगि
रौ लोकालोक इति स्वनामख्या
ते सन्ततं लोक्यते सूर्यरश्मिभिः
स्पृश्यमानत्वात् इति लोकः म
ध्यावहिः सूर्यकिरणाप्रवेशात् ।
लोक्यते इति अलोकः लो
क्यते कर्मणि घञ् लोका
श्चासौ अलोकश्चेति लोकालोकः
चक्रं महीचक्रं वडते वेष्टयति
चक्रवाडः वडि उ० वेष्टने घञ्
व्यापकसिद्धत्वात् त्वनुणत्
इति भरतः ॥
लोकेशः पुं ब्रह्मा इत्यमरः
बुद्धभेदः इति त्रिकाण्डशेषः ।
पारदः इति राजनिर्घण्टः ॥
लोकेश्वरः पुं बुद्धभेदः इति
त्रिकाण्डशेषः भुवनानां जना

नां च प्रभुश्च ॥
लोकेश्वरात्मजा स्त्री बुद्धशक्तिभे
दः तत्पर्यायः तारा २ महाश्रीः ३
ओंकारा ४ स्वाहा ५ श्रीः ६ मनोर
मा ७ तारिणी ८ जया ९ अनन्ता
१० शिवा ११ खदिरवासिनी १२
भद्रा १३ वैश्या १४ नीलसरस्वती
१५ शंखिनी १६ महातारा १७ व
सुधारा १८ धनदा १९ त्रिलोचना
२० लोचना २१ इति हेमचन्द्रः ॥
लोच ऋ क भासि इति कविक
ल्पद्रुमः ऋ अललोचत् भासिरी
मो किंतु पुरुषोत्तम प्रणादे
वौ भाष इति मूर्द्धन्य षकारेम
ध्यावचनार्थं माहतः इति दुर्गादा
~~सः ईक्षः पर्यालोचनं प्रणिधा~~
लोच ऋ उ० इति दुर्गादासः
ईक्षः पर्यालोचनं प्रणिधान
मिति यावत् ऋ अललोचत्
उ० लोचते कार्यं सुधीः इति
दुर्गादासः ॥
लोचं क्ली अश्रु इति जटाधरः
लोचकः पुं मांसपिंडं अक्षितारका
कज्जलं स्त्रीणां ललाटाभरणं कदली
नीलवस्त्रं निर्बुद्धिः कर्णाभरः मूर्वी
भ्रूश्लथचर्म इति मेदिनी नि
र्म्मोकः इति शब्दरत्नावली ॥

लोचनं क्ली चक्षुः इत्यमरः त
स्य शुभाशुभलक्षणं यथा वक्रा
न्तैः पद्मपत्राभैर्लोचनैः सुखभागि
नः मार्जारलोचनैः पापो महात्मा
मधुपिंगलैः क्रूराः केकरनेत्रा
श्चहरिणाक्षाः सकल्मषाः जिह्मै
श्च लोचनैः गंभीराक्षा ईश्वराः स्यु
र्मन्त्रिणः स्थूलचक्षुषः नीलोत्प
लाक्षा विद्वांसः सौभाग्यं श्यावचक्षु
षां स्यात् सुमतारकाक्षाणा म
त्ता मुत्पाटने किल । मं
डलाक्षाश्च पापाः स्युर्निःस्वाः स्यु
र्दीर्घलोचनाः हस्तिनेत्राः विड
ला भोगे अत्याप्नुवन्ति चोन्न
ता विशालोन्नताक्षा ये तिनि दरिद्रा
विषमभ्रुवः इति गारुडे ६६ ।
अध्यायः ॥
लोचनहिता स्त्री तम्पांजनं इति
राजनिर्घण्टः ॥
लोचना स्त्री बुद्धशक्तिभेदः अ
स्याः प्रमाणं पर्यायाश्च लोकेश्वरा
त्मजा शब्दे द्रष्टव्याः ॥
लोचनामयः पुं चक्षुरोगविशे
षः तत्पर्यायः अभिमन्युः २
इति त्रिकाण्डशेषः ॥
लोचनी स्त्री महाश्रावणिका इ
ति

× नेः क्रूराः से नाक्षो गज लोच ×

राजनिर्घण्टः ॥
लोचमर्कटः पुं लोचमस्तकः इ
त्यमरटीकायां स्वामी
लोचमस्तकः पुं मयूरशिखौष
धं रुद्रजटा इति ख्यातः दैव
जयमानिकेति केचित् तत्पर्यायः
प्रपाट्या २ कारवी ३ दीप्यः ४
मयूरः ५ इत्यमरः लोचमर्क
टः ६ इति भरतः ॥
लोट ऋ उन्मादे इतिकविक
ल्पद्रुमः ऋ अललोटत् लोट
ति लोकः उन्मादयतीत्यर्थः इति
दुर्गादासः ॥
लोट्टलः पुं अभिलाटकः इति
संक्षिप्तसारोणादिवृत्तिः
लोड ऋ उन्मादे इतिकवि
कल्पद्रुमः ऋ अललोडत्
इतिदुर्गादासः ॥
लोणलवणं क्ली लवणाक्तं
इति राजनिर्घण्टः ॥
लोणा स्त्री चुक्राम्लिका इति
राजनिर्घण्टः ॥
लोणारं क्ली लवणविशेषः
तत्पर्यायः लवणोत्थं २ लव
णाकरजं ३ लवणामदः ४ ज
लजं ५ लवणासारः ६ लव
णावणः ७ अस्य गुणाः मत्स्य
सत्वं तीक्ष्णत्वं पित्तहारि

कारित्वं सारत्वं इक्षुत्व‧
वात गुल्मादि शूलनाशित्वं
च इति राजनिर्घण्टः ॥
लोणाम्ला स्त्री लवणाम्लिका ।
इति राजनिर्घण्टः ॥
लोतं क्ली लोपत्रं तत्पर्यायः
लोप्त्रं २ इति जटाधरः ॥
लोप्त्री ३ लोत्रं ४ लप्त्रं ५ इ
ति शब्दरत्नावली ॥
लोतः पुं क्ली नेत्राम्बु इति
त्रिकाण्डशेषः चिह्नं इति सिद्धा
न्तकौमुद्यामुणादिवृत्तिः लवणं
अश्रुपातः इति संक्षिप्तसारो
णादिवृत्तिः ॥
लोत्रं क्ली लोतं इति शब्द‧
रत्नावली नेत्रजलं इति सं
क्षिप्तसारोणादिवृत्तिः ॥
लोधः पुं स्वनामख्यातवृक्षः
वृक्षविशेषः तस्य पर्यायः ति‧
रीटः २ मार्जनः ३ वृक्षः ४ लो
ध्रः ५ तिल्वकः ६ श्वेतस्यतस्य
पर्यायः शुक्लः १ शाबरलोध्रः
२ महालोध्रः ३ शाबरः ४ इ
ति रत्नमाला अस्य गुणाः अ
स्य गुणाः अस्रकफवातना‧
शित्वं चक्षुष्यत्वं शोथजित्वं स
त्वं च इति राजवल्लभः ॥
लोध्रः पुं लोधवृक्षः तत्पर्यायः

वः गालवः २ शाबरः ३ तिरीटः ८
तिल्वः ५ मार्जनः ६ इत्यमरः ॥
षट् लोध्रमात्रे लोध इति ख्या
ते षट्श्वेतलोध्र इति सुभूतिः
लाघ पादः श्वेतलोध्र शाबर‧
कलोध्र इति स्वामी । तत्प‧
र्यायान्तरं यथा रोध्रः ७ भिल्लत
रुः ८ भिल्लकः ९ काण्डकीलकः ९
लोध्रकद्रुमः १० शम्बरः ११ हस्ति
रोध्रकः १२ तिलकः १३ कोटनील
कः १४ हेमपुष्पकः १६ भिल्ली १५
शाबरकः १८ अस्य गुणाः कषा
यत्वं शीतलत्वं वात कफास्रनाशि
त्वं चक्षुष्यत्वं विषघ्नत्वं तत्र‧
विशिष्टो वल्कलाध्रकः इति राज
निर्घण्टः अपि च लोध्र स्तिल्वस्ति
रीटश्च शाबरो गालवस्तथा द्वि
तीयः पट्टिकालोध्रः क्रमुकः स्थू
लवल्कलः जीर्णपत्रो बृहत्पत्रः
पट्टी लाक्षाप्रसादनः लोध्रो ग्राही
लघुः शीत श्चक्षुष्यः कफपित्तनु
त् कषायो रक्तपित्तास्रग्ज्वरातीसार शोथहृत् इति भाव‧
प्रकाशः ॥
लोध्रकद्रुमः पुं लोध्रः इति रा
जनिर्घण्टः ॥
लोपः पुं छेदः आकुलीभावः

लुप्धातो भावे घञ् प्रत्यये
निष्पन्नोऽयं व्याकरणमते व
र्णनाशः तथाहि नाशविधिर्य
थालोपोऽस्मो माङ्गे सितादि
अपि च सकलेभ्यो विधिभ्यः
साहली लोपविधि स्तथा लो
लोपस्वरादेशयोस्तु स्वरादेशो वि
धिर्बली इति दुर्गादासः ॥
लोपा स्त्री अगस्त्यमुनिपत्नी ।
इति जटाधरः ॥
लोपाकः पुं शृगालः इति
त्रिकाण्डशेषः ॥
लोपापकः पुं शृगालः इति
शब्दमाला ॥
लोपापिका स्त्री शृगाली इति
शब्दमाला ॥
लोपामुद्रा स्त्री अगस्त्यमुनि ।
भार्या इत्यमरः लोपयति योषि
तां रूपाभिमानमिति लोपा एवा
मुद् आमुद्रयति स्वस्थः स्त्रीमि
ति आमुद्रा अनन्ततः कर्मधारयः
किं वा नमुदं राति अमुद्रापति
रूपाया लोपे अमुद्रा लोपामु
द्रा लोपा च लोपामुद्रा तु वैदर्भी
लोपा स्त्री कुम्भजन्मनः इति
कण्ठभूषणे इति भरतः अस्या
अर्घ्यदान प्रसंगेन अगस्त्यार्घ्य
दानं

लिख्यते अगस्त्यार्घ्यदानन्तु सौ
रेण सिंहस्थे विधानात् यथा
असम्पेवर्ने अप्राप्ते भास्करे क
न्या शेषभूते त्रिभिर्दिनैः
अर्घ्यंदद्युरगस्त्याय गौडदेशनिवा
सिनः नारसिंहे शाले लोपं वि
लिख्य सितपुष्पाक्षतैः युतं
मन्त्रेणानेन वै दद्यादक्षिणाशा
मुखस्थितः काशपुष्प प्रतीका
शाग्निमारुतसम्भव मित्रावरुण
योः पुत्र कुम्भयोने नमोऽस्तु
ते प्रार्थनन्तु आतापि भक्षितो
येन वातापिश्च महासुरः समुद्रः
शोषितो येन समेऽगस्त्यः प्र
सीदतु गंधादिकन्तु अगस्त्याय
नम इत्यनेन देयं विशेषानुद्देशे
सामान्यतः प्राप्तत्वात् इति णाशा
मुखस्थित इति गंधादावपि प्रयो
गाग कर्तृ धर्मत्वादिति रत्नाकरः
तत्पत्न्यर्घ्यदान मन्त्रस्तु लोपामु
द्रे महाभागे राजपुत्रि पतिव्रते
गृहाणार्घ्यं मया दत्तं मैत्रावरुणि
वल्लभे इति मलमासतत्त्वे ॥
लोपामुद्रापतिः पुं अगस्त्यमुनिः
इति पुराणं ॥
लोपाशकः पुं शृगालः इति
हारावली ॥

लोपाशिका स्त्री शृगाली इति
हारावली ॥
लोप्त्रं क्ली स्तेयधनं लोत्रं।
इत्यमरः ॥
लोप्त्री स्त्री लोप्त्रं इति शब्द
रत्नावली ॥
लोभः पुं आकांक्षा परद्रव्याभि
लाषः तत्पर्यायः तृष्णा २।
लिप्सा ३ वशः ४ स्पृहा ५ कांक्षा
६ शंसा ७ गर्द्धः ८ वाञ्छा ९ इ
च्छा ११ तृट् १२ मनोरथः १३ कामः
१४ अभिलाषः १५ इति हेमचंद्रः।
तस्य लक्षणं यथा । पर
वित्तादिकं दृष्ट्वा नेतुं यो हृदि
जायते अभिलाषो द्विजश्रेष्ठ स
लोभः परिकीर्त्तितः इति पा
द्मे क्रियायोगसारे ९ अध्यायः
॥ स च ब्रह्मणोः धराज्जातः।
यथा भ्रुमध्य सम्भवेत् क्रोधो।
लोभ श्चाधर सम्भवः इति मा
त्स्ये सृष्टिवोत्पत्तिर्नाम ३ अध्यायः
॥ मत्त नाश कारणं यथा
लोभ प्रमाद विश्वासैः पुरुषो
नश्यते त्रिभिः तस्माल्लोभो न
कर्त्तव्यः प्रमादो नन विश्वसेत्।
इति गारुडे नीतिसारे ११५ अ
ध्यायः अपिच त्रिविधं नरक
स्येदं द्वारं नाशनमात्मनः कामः
क्रोधस्तथा लोभ स्तस्मादेतत्त्रयं
त्यजेत् इतिश्रीभगवद्गीतायां १६
अध्यायः ॥
लोभी न त्रि लोभयुक्तः तत्प
र्यायः गृध्नुः २ गर्द्धनः ३ लुब्धः ४
अभिलाषुकः ५ तृष्णकः ६ लोलु
पः ७ लोलुभः ८ इतिजटाधरः
लिप्सुः ९ इतिहेमचंद्रः ॥
लोभ्यः पुं मुद्गः इतिहेमचंद्रः
लोभनीये त्रि
लोमं क्ली लांगूलं इति जटा
धरः ॥
लोम न क्ली शरीरस्थकेशः त
त्पर्यायः तनूरुहं २ रोम ३
इत्यमरः तनुरुहं ४ तनुरुट् ५
इति शब्दरत्नावली तत्तगर्भस्य
साषष्ठमासि भवति इतिसुश्रुतः
अपिच षष्ठमासि च नारीणांवै
दिके नापिकारिता उदरस्थस्य
बालस्य नख लोम प्रवर्त्तनात्
इति स्मृतिः ॥
लोमकरणी स्त्री मांसच्छदा इ
तिराजनिर्घंटः ॥
लोमकर्णः पुं शशकः इतिहेम
चंद्रः लोमयुक्त कर्णविशिष्टेत्रि
लोमघ्नं क्ली इंद्रलुप्तकं रोक इति

भाषा इति भूरिप्रयोगः लो
मध्यातके त्रि ॥
लोमपादः पुं अंगदेशीयराज
विशेषः सतु ऋष्यशृंगमुनिश्व
शुरः इतिरामायणे ॥
लोमपादपूः स्त्री पुरीविशेषः
अधुनाभागलपुर इति ख्याता।
तत्पर्यायः चंपा २ मालिनी ३
कर्णपूः ४ इति हेमचंद्रः ॥
लोमफलं क्ली भव्यं इतिराज
निर्घंटः ॥
लोमविषः पुं व्याघ्रादिः इति
हेमचंद्रः
लोमशः पुं मुनिविशेषः मेषः
अतिलोमान्विते त्रि । इति मे
दिनी कदाचिद्दन्ततो मूर्खः।
कदाचिल्लोमशः सखी इतिसा
मुद्रकं ॥
लोमशकांडा स्त्री कर्कटी इ
तिराजनिर्घंटः ॥
लोमशपर्णिनी स्त्री माषपर्णी
इतिशब्दचंद्रिका ॥
लोमशपुष्पकः पुं शिरीषवृक्षः
इतिराजनिर्घंटः ॥
लोमशमार्जारः पुं मार्जारविशे
षः गंधगकुला इतिभाषा त
त्पर्यायः शूतिकः २ मारजातकः
३ सुगंधी ४ मूत्रपातनः ५ गं
धमार्जारकः ६ इतिराजनिर्घंटः
अस्यमुष्कशणाः गंधमार्जारवीर्य्य
न्तु वीर्यकृत्कफवातहृत् कंडुको
ष्ठहरं नेत्र्यं सुगंधं स्वेदगंधनुत् ।
इतिभावप्रकाशः ॥
लोमशा स्त्री काकजंघा मांसी
वचा शूकशिम्बिः महामेदा।
कासीसं शाकिनीभेदः इतिमे
दिनी अतिबला इति विश्वः
शणपुष्पी एर्वारुः गंधमांसी
इतिराजनिर्घंटः ॥
लोमसातनं क्ली लोमपातनं
तस्यौषधानि यथा हरितालं
शंखचूर्णं कदलीदलभस्मना
पतद्द्रवेण चोद्वर्त्तं लोमशात
नमुत्तमं लवणं हरितालंच तेउ
त्याम्रफलानिच लाक्षारस स
माकं लोमसातन मुत्तमं यथा
च हरितालंच शंखचैव मनःशि
ला सैंधवेन सहैकत्र छाग
मूत्रेण पेषयेत् तत्क्षणोद्धर्त्त
नादेव लोमसातन मुत्तमं इति
गारुडे १८५ अध्यायः ॥
लोमहर्षणं क्ली रोमांचः इ
त्यमरः
लोमहर्षणः पुं सूतः यथा

पुराणसंहितांचक्रे पुराणार्थ
विशारदः प्रख्यातो व्यासशि-
ष्योऽभूत्सूतो वै लोमहर्षणः
पुराणसंहितां तस्मै ददौ व्या
सो महामुनिः इति विष्णुपुरा
णे ३ अंशे ६ अध्यायः सच
बलरामेण हतः यथा तथाहि
प्रेक्षितप्रेक्षा निरस्तो लोमहर्षणः
बलरामास्त्राद्भक्तात्मा नैमिषेऽभू
त्सर्वोत्तया इति कल्किपुराणे
२७ अध्यायः ॥

लोमहृत् पुं हरिताले इति
हेमचन्द्रः

लोमालिका स्त्री शृगालिकाया
या लोमालिका रोमालिका ।
किंचिरुल्कामुखीच सा इति त्रि
काण्डशेषः ॥

लोलः त्रि चञ्चलः सतृष्णः
इत्यमरः ॥

लोला स्त्री जिह्वा लक्ष्मीः इ
तिमेदिनी चञ्चलास्त्रीच ॥

लोलार्कः पुं सूर्यः यथा स्क
न्द उवाच ततः सुकेशि व
चनात्सर्वएव निशाचराः तेना
दितेन तेधर्मं चक्रु र्दिवितमा
नसा ततः प्रवृद्धिं सततामगच्छ
न्निशाचराः उग्रपोवार्धसंग
ताः सदाचार

समन्विताः तत्प्रोतिस्निग्धमसा ते
षां राक्षसानां महात्मनां गतेः
नाशङ्कवन्तोर्या नक्षत्राणि च
इमाः ततस्त्रिभुवनं ब्रह्मनिशा
चरपुरोऽभवत् दिवा सूर्यस्य स
दृशः तणाद्रायांचन्द्रवत् ततः क्रो
धाभिभूतेन भानुना विप्रभेदिभिः
भानुभी राक्षस पुरं ततश्चैव य
थेच्छया तद्भानुना ततस्ते क्रो
धाध्मातेन वक्षसा निपपाताम्बरा
दृष्टः क्षीणपुण्य इव ग्रहः पत
मानं समालोक्य पुरं शालकटङ्क
टः नमो भवाय सर्वाय इत्युच्चै
रुच्चैरपत तेषां क्रन्दित माकर्ण्य
चारणगणोचराः हरेर्भक्तकृष्णः
सर्वदेव भक्तः पतत्यसौ तत्त्वा
रण वचः पार्वः श्रुत्वा नस्वतो
ऽव्ययः श्रुत्वास चिन्तयामासके
नासौ पात्यतेऽभवि ज्ञातवान्देव
पतिनास सहस्रकिरणेन तत् पाति
तं राक्षस पुरं ततः क्रुद्धस्त्रिलो
चनः क्रुद्धस्तु भगवान् हरिभि भा
नुमन्तं समपश्यत दृष्टमात्रस्त्रिनेत्रे
ण निपपात ततोऽम्बरात् ततो
ब्रह्मा स्वर पतिः सुरैः सार्द्धं सम
भ्ययात् रम्यंमहेश्वरावासं मन्दरं
रवि कारणात् गत्वा दृष्ट्वा चेदेवं मायाकरं

4205

शूलपाणिनं प्रसाद्य भास्क
रार्थाय वाराणस्या मुपानयेत्
ततो दिवाकरं भूयः पाणिना
द्यघशंकरः कृत्वा नामास्य लो
लेति रथ मारोपयत्ततः आरो
पिते दिनकरे ब्रह्माभ्येत्य सुके
शिनं सबान्धवं सनगरं पुन रा
रोपयद्दिवि इति श्रीवामन पु
राणे सुकेशि चरिते लोलार्क
जननंनाम १५ अध्यायः ।

लोलिका स्त्री चांगरी यथा
तद्वत् दन्त शठाम्लष्ठा चांगेरीलो
लिकाच सा इतिजटाधरः ।

लोलितः त्रि श्लथः फोलाइ
ति भाषा लुलविमर्दे अस्माद्भावे
क्तनि लोलः सोऽस्यजातः इत्य
र्थे इतप्रत्ययेन निष्पन्नः ॥

लोलुपः त्रि अतिलुब्धः इत्य-
मरः लोलुभः त्रि लोलुपः इत्य
मरः लोष्ठ उ. संहतौ इतिक
विकल्पद्रुमः उ. लोष्टते धान्यं ।
लोकः इतिदुर्गादासः ॥

लोष्टं क्ली लोहमलं इतिराज
निर्घण्टः लोष्टुः इत्यमरः ॥

लोष्टः पुं क्ली मृत्तिकाखण्डं ढे
ला इति भाषा तत्पर्यायः लोष्टुः
२ इति शब्दरत्नावलीअमरश्च ।

लोष्टुः ३ दलिः ४ इतिहेमचं
द्रः ॥

लोष्टघ्नः पुं लेष्टुभेदनः इत्यम
रटीकायां भरतः ॥

लोष्टभेदनः पुं लोष्टभंगसाधन
मुद्गरः मरे इति ख्याते इति
केचित् तत्पर्यायः लेष्टुभेदनः
२ लोष्टघ्नः ३ लेष्टुघ्नः ४ को
टिशः ५ कोटीशः ६ इत्यमरटी
का लोष्टुः पुं लोष्टः इति हेम
चन्द्रः ॥

लोह क्ली अगुरु इत्यमरः ।

लोहः पुं क्ली लोहं जोगकं
सर्व तैजसं इतिमेदिनी ॥
रुधिरं इतिराजनिर्घण्टः
अथ मुण्डलोहस्य पर्यायः मुण्डं
१ मुण्डायसं २ दृषत्सारं ४ शि
लात्मजं ५ अश्मजं ६ कृषिलो
हं ७ आरं ८ कृष्णायसं ९ अथ
तीक्ष्णलोहस्य पर्यायः तीक्ष्णं १
शस्त्रायसं २ शास्त्रं ४ पिण्डं ५
पिण्डायसं ६ शठं ७ आयसं ८
निशितं ९ तीव्रं १० खड्गं ११
मुण्डजं १२ अयः १३ चित्रायसं १४
चीनजं १५ अस्यगुणाः रूक्षत्व
उष्णत्वं तिक्तत्वं वात पित्तक
फ प्रमेह पाण्डु शूल नाशित्वं

तीक्ष्णत्वं मुंडादिकगुणास्त्वेच उ
तिराजनिर्घंटः अथ लोह।
स्रोत्पत्ति नाम लक्षण गुणाः
पुरा लोमिल दैत्यानां निहता।
नां हरे र्देपि उत्पन्नानिशरी
रेभ्यो लोहानि विविधानि च।
लोहेऽस्त्री शस्त्रकं तीक्ष्णंपिंडं
कालायसमायसी गुरुताद्दृढता
क्लेद कफ दाहस्य कारिता अ
श्मदोषः सद्रव्यो दोषाःसमाप
सस्मात लोहं तिक्तरसंशीतंम
धुरं तुवरं गुरु रुक्षं वयस्य
चक्षुष्य लेखनं वातलं जयेत्
कफं पित्तं गरं शूलं शोथार्शः
प्लीह पांडुताः मेदो मेह कृ
मीन्कुष्ठं तत्किट्टं तद्वदेव हि
षंटत्व कुष्ठामय मृत्युदं भवेत्
हृद्रोग शूलौ कुरुतेऽश्मरी
च्चै नाना रुजाश्चापि तथा प्र
कोपं करोति हृल्लास मष्टद।
लोहं नीवहारि मदकारि वा यसे
वेत् शुद्धिमदसंस्कृतं ध्रुवं पा
टवं न तनुते शरीरके दारुणा
ह्रादिरुजांच यच्छति तन्नसार
लोहस्य लक्षणं गुणाश्च ते
माम्लक्लिवराकारापगमान्वेल
नलोपितं लोहे स यंत्र सत्त्वाणि
नत्

सार मभिधीयते लोहं सा
रकृतं हन्याद्ग्रहणी मभिसारकं
अर्द्ध सर्वांगजं वातं शूलंच
परिणामजं छर्दिंच पीनसंपि
त्तं श्वास माशु व्यपोहति ॥
अथ कान्तलोहस्य लक्षणं गुणाश्च
यत्पात्रेन प्रसरति जले तैलबिंदुः
प्रतप्ते हिंगु गंधं त्यजतिच नि
जं तिक्ततां निम्बकल्कः। तप्त
दुग्धं भवति शिखराकारकं नै
तिभूमिं कृष्णांगः स्यात्सजलचणा
कः कान्तलोहं तदुक्तं गुल्मोदरा
र्शः शूलाम मामवातं भगन्दरं
कामलाशोथ कुष्ठानि क्षयं का
त मेयाजयेत् प्लीहान मम्लपि
त्तंच यकृच्चापि शिरोरुजं सर्वाग्रो
गान्विजयते कांतलोहं नसंशयः
बलं वीर्यं वपुःपुष्टिं कुरुते
ग्निविवर्द्धयेत् अथ किट्टं।
ध्मायमानस्य लोहस्य मलं मंडूर
मुच्यते लोह सिंहानिका कि
ट्टी सिंहानंच निगद्यते यल्लोहं
यद्गुणं प्रोक्तं तत्किट्टमपि त
द्गुणं अथ लोहस्या शुद्धस्य
दोष माह षण्डत्व कुष्ठामय
मृत्युकारि हृद्रोग शूलौ कुरु
तेऽश्मरींच नानारुजानाह तथाप्रको

यं कुर्याच्च हृल्लास मष्टद्वलोहं
॥ अथ लोहस्य दोष शान्तये
शोधन मभिधीयते पत्तलीकृत
पत्राणि लोहस्याग्नौ प्रतापयेत्
निषिंचेत्तप्त तप्तानि तैले तक्रेच
कांजिके गोमूत्रे चकुलत्थानां।
कषाये च त्रिधा त्रिधा एवंलोह
स पत्राणां विशुद्धिः संप्रजाय
ते अथ लोहस्य मारण विधिः
शुद्धलोह भवं चूर्णं पातालगरु
डीरसैः मर्द्दयित्वा पुटेद्वह्नौ दद्या
देवंपुटद्वयं पुटत्रयंकुमार्याश्च।
कुठारच्छिन्निकारसैः पुट षट्कं
ततो दद्यादेवं तीक्ष्णमृति र्भ
वेत् अन्यच्च तिपेह्वादशमाषे
न दरदं तीक्ष्ण चूर्णतः मर्द
येत् कन्यकाद्रावे यामयुग्मंततः
पुटेत् एवंसप्तपुटै र्मृत्युःलोह
चूर्णं मवाप्नुयात् सम्भोऽनुभूतो
योगीद्रैः क्रमोऽन्यो लोहमारणे
॥ कथ्यते रामराजेन कौतुह
लधियाधुना सूतकाद्विगुणं
गंधं दत्वा कुर्याच्च कज्जली द्वयोः
समं लोहचूर्णं मर्द्दयेत्कन्यका
द्रवैः यामयुग्मं ततःपिंडं कृत्वा
ताम्रस्य पात्रके घर्म धृत्वारुबु
कस्य पत्रैराच्छादयेद्बुधः यामद्व
या

द्रवेत्सम्यं धान्य राशौ न्यसेत्त
तः दत्वोपरि शरावंच त्रिदिना
न्ते समुद्धरेत् पिष्ट्वाच गालयेद्
वस्त्रादेवं वारितरं भवेत् दाडिम
सदलं पिष्टा तत्तुल्यगुणं वारि
णा तद्रसेनायसचूर्णं सम्यक्पा
त्रावेष्टितपि आतपे शोषयेत्त
च पुटेदेव पुनःपुनः एकवि
शतिवारे लम्रियतेनात्र संशयः
एवं सर्वाणि लोहानि स्वर्णादीन्य
पि मारयेत् एवंमारित लोहस्य गु
णाः लोहं तिक्तं सरं शीतं कषायं
मधुरं गुरु रुक्षं वयस्य चक्षुष्यं ले
खनं वातलं जयेत् कफं पित्तं ग
रं शूलं शोथार्शः प्लीह पांडुताः
मेदो मेह कृमीन्कुष्ठं तत्किट्टं
तद्वदेव हि गुणा मेकांसमार
भ्य यावन्नवैव रत्तिकाः ।
तावल्लोहं समश्नीया घ्याद्दोषा
नलेनरः कूष्मांडं तिलतैलंच
माषान्नं राजिकान्तथा मद्यमम्ल
रसंचैव वर्जयेल्लोहसेवकः इति
भावप्रकाशः लोहपात्रे भक्षण
निषेधो यथा यदाह आयसे
पात्रे पक्वं मश्नाति वै द्विजः स
पापिष्ठोऽपि भुंक्तेऽन्नं रौरवेप
रिपच्यते इतिमत्स्यसूक्तं १

तंत्रे अपिच अयः पात्रे पयः
पानं गव्यं सिद्धान्नमेव च ॥ २
शादिकं मधु गुडं नारिकेलो
दकन्तथा फलं मूलंच यत्किं
चिद्भक्ष्यं मुनि र ब्रवीत् इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।
लोहकण्टकः पुं मदनवृक्षः इ
तिशब्दचंद्रिका लोहमयकण्टक
श्च लोहकान्तं क्ली अयस्कान्त
इतिराजनिर्घण्टः ॥
लोहकारः पुं लोहकारकः।
इति हलायुधः ॥
लोहकारकः पुं वर्णसंकरजा·
तिविशेषः कामार इति भाषा
तत्पर्यायः व्योकारः २ इत्य
मरः लोहकारः ३ अयस्कारः ४
कर्मकारः ५ कर्मारः ६ इति भ
रत स्वस्वैषा तस्योत्पत्ति र्यथा।
गोपालात्तन्तुवाय्यां वै कर्मका
रोऽप्यभूत्सुतः । इति परा
शरपद्धतिः ॥
लोहकिट्टं क्ली लोहमलं तत्प
र्यायः किट्टं २ लोहचूर्णं ३
अयोमलं ४ लोहजं ५ कृष्णचू
र्णं ६ लोहं ७ लोहमलं ८ अस्य
गुणाः मधुरत्वं उष्णत्वं कृमि।
वात शूलक्षिप्त मदकुष्ठमेह
गुल्म

प्लीह नाशित्वंच इति राज
निर्घण्टः अपिच ध्मायमानस्य लो
हस्य मलं मंडूर मुच्यते ।
लोहसिंहानिका किट्टो सिंहाणं
च निगद्यते यल्लोहं यद्गुणं।
प्रोक्तं तत्किट्ट मपि तद्गुणं।
इतिभावप्रकाशः ॥
लोहचूर्णं क्ली लोहकिट्टं इति
राजनिर्घण्टः ॥
लोहजं क्ली लोहकिट्टं इति
राजनिर्घण्टः कांस्य इति हे
मचन्द्रः ॥
लोहद्रावी न पुं टंकणः इतिरा
जनिर्घण्टः ॥
लोहनालः पुं नाराचः इति
त्रिकाण्डशेषः ॥
लोहपृष्ठः पुं कंकपक्षी इत्य
मरः लोहमयपृष्ठयुक्तेऽपि त्रि ॥
लोहप्रतिमा स्त्री लोहमयीप्रति
मा तत्पर्यायः सूर्मी १ स्थूणा २
इत्यमरः ऊर्मी ४ सूर्मिः ५ शू
र्मः ६ इति भरतः सूर्मिका ७
इतिशब्दरत्नावली ॥
लोहमयं त्रि लोहात्मकं लो
हनिर्मितं लोहशब्दात्तद्रूपार्थम
यट् प्रत्ययेन निष्पन्नं ॥
लोहमारकः पुं शालिंचशाकः

4209

इतित्रिकाण्डशेषराजनिर्घण्टौ ॥
लोहलः पुं शृंखलाचार्यः इति
मेदिनी ॥
लोहलः त्रि अव्यक्तवाक् इत्य
मरः लोहग्राहकश्च ॥
लोहवरं क्ली स्वर्णं इतित्रिकां
डशेषः ॥
लोहश्लेषणः पुं टंकणः इतिहे
मचन्द्रः ॥
लोहसंकरं क्ली वर्तलोहं इति
राजनिर्घण्टः मिश्रितलोहसंच।
लोहाख्यं क्ली अगुरु इतिरत्न
माला
लोहाभिसारः पुं लोहाभिहारः
इत्यमरटीकायां भरतः ॥
लोहाभिहारः पुं शस्त्रभृतां रा
ज्ञां नीराजनाविधिः इत्यमरः ॥
महानवमी दीप्तायां अश्वादी।
नांनीराजने सति पश्चाच्छस्त्र।
धारिणां राज्ञां यःशास्त्रोक्तोनि
र्मंछन प्रधानो विधिःप्रस्थानात्म
कः लोहाभिहारः लोहस्य श
स्त्रस्य अभिहारः सर्वलोहरणाम
त्रेति बहुव्रीहिः लोहाभिहारइत्य
क्तो विधि र्नी राजनोत्तर इ।
त्यमरमाला लोहो ऽस्त्री शस्त्र
केलोहे इति मेदिनी लोहा

भिसार इतिपठन्त्यन्ये तत्र लो
हं शस्त्रं अभिसार्यते प्रस्थाप्यते
ऽनेति यंवारत्नायुधादे र्निःशो
षेण राजनं यत्र सा नीराजना
नीरस्य शान्त्युदकस्य अजनेते
पो यत्र सा नीराजना वा इतिभ
रतः लोहार्गलः पुं तीर्थविशे
षः यथा वराह उवाच शृणु
देविच तत्त्वेन यन्मांत्वं परिपृ
च्छसि रहस्यमन्पत्त्व वसामि म
हतः कर्मणो गतिः ततःसिद्धव
टे गत्वा विशाखेजन हरतःम्ले
च्छ मध्ये वरारोहे हिमवन्तं
समाश्रितं तत्रलोहार्गलं नामनि
वासं मे विधीयते उग्रा पंचद
शा यत्र समन्तात्पंचयोजनं
स्थलभे शुण्पयुक्तानां मम कर्मा
नुसारिणां तत्रतिष्ठाम्यहं भद्रेउदी
चीं दिशमाश्रितः तत्रब्रह्माच
रुद्रश्च रूपेन्द्रश्च मरुद्गणाः
आदित्या वसवो रुद्रा अश्विणौ
च महौजसः सोमो हरस्पतिश्चै
व ये चान्येच दिवौकसः तेषा
चैवार्गलं दत्वा चक्र हस्त म
होत्सवं ततो मे रानधाः सर्वेक्ष
मन्तो लोकभ्रमं मयाचैवान्त
रे कृत्वाकृत्वा मायांच वैसंबी श

नकोटिसहस्राणि शीघ्रमेव निपातितं एवं लोहार्गलेत्यासीन्नाम मेतत्प्रकारितं एकधारापतनत्र इंद्रगोपकसंनिभा यत्र कृते स्नाने समराज्ञोषितो नरः ब्रह्मलोकं समासाद्य ब्रह्मणासहमोदते अथात्रमुसते प्राणानहंकार विवर्जितः ब्रह्मलोकं परित्यज्य मम लोकं प्रपद्यते गुह्याख्याने महाभागे हेत्रे लोहार्गले मम सिद्धि कामेन मर्त्येन गन्तव्यं नात्र संशयः एतत्ते कथितं भद्रे लोहार्गल निवासिनः माहात्म्यं प्रपद्यान्ति गुह्यं पंच महोजसं मंगल्यंच पवित्रंच मम भक्तसुखावहं इत्यादि वराहपुराणे। लोहार्गलमाहात्म्य वर्णनंनाम अध्यायः लोहकीलके क्लीं ॥ लोहि क्लीं खेतटंकसत्त्व इति कश्चिद्राजनिर्घंटः ॥

लोहिका स्त्री लोहपात्रे तस्य पर्यायः लोहखंदः २ खरपात्रे। ३ इतित्रिकांडशेषः ॥

लोहितं क्लीं रक्तगोशीर्ष कुंकुमे रक्तचंदने इतिमेदिनी पत्तंगे इतिचन्दने रत्न। कुंकुमं रुधिरं इतिराजनिर्घंटः ॥ युद्धे इति हेमचंद्रः ॥

लोहितः पुं नदविशेषः भौमः रक्तवर्णः इति मेदिनी। रोहितमत्स्यः मृगविशेषः इतिशब्दरत्नावली सर्पः स्यान्तरः। इति धरणिः मत्सरः इतिशब्दचंद्रिका रक्तालुः रक्तशालिः इति राजनिर्घंटः बलभद्रः इतिहेमचंद्रः ॥

लोहितः त्रि रक्तवर्णयुक्तः इत्यमरः ॥

लोहितकं क्लीं रीतिः इतिराजनिर्घंटः ॥

लोहितकः पुं मंगलग्रहः इति शब्दमाला पद्मरागमणिः इति हेमचंद्रः ॥

लोहितचंदनं क्लीं कुंकुमे इतिहेमचंद्रः रक्तचंदनेच

लोहितपुष्पकः पुं दाडिमवृक्षः इतिभावप्रकाशः ॥

लोहितमृत्तिका स्त्री गैरिकं। इतिरत्नमाला रक्तवर्णमृत्तिका च लोहिता स्त्री रागादिनारक्तवर्णा इतिजटाधरः क्वारकांता इतिशब्दचंद्रिका रक्तपुनर्नवा इतिराजनिर्घंटः ॥

लोहितांगः पुं मंगलग्रहः इत्यमरः कम्पिल्लकः इतिराजनिर्घंटः ॥

लोहितान्नः पुं नकुलः इति राजनिर्घंटः रक्तवर्णमुखेत्रि।

लोहितायः स क्लीं ताम्रं इतित्रिकांडशेषः ॥

लोहितायसं क्लीं रक्तवर्णलोहजातिः इतिमुग्धबोधव्याकरणं

लोहिताक्षः पुं विष्णुः इति शब्दमाला कोकिलः इतिशब्दचंद्रिका रक्तवर्णचक्षुयुक्ते त्रि।

लोहिनी स्त्री रक्तवर्णास्त्री यथा रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा इतिजटाधरः ॥

लोहोत्तमं क्लीं स्वर्णं इतिहेमचंद्रः ॥

लोकायतिकः पुं तार्किकभेदः चार्वाकशास्त्रवेत्ता लोकायतं वेत्ति इत्यर्थे लिकप्रत्ययेन निष्पन्नोऽयं ॥

लौकिकः त्रि लोकव्यवहारसिद्धः यथा वैदिका लौकिकास्तेषु मध्ये यथोक्ता स्तथैव ते निर्णीतार्थास्तु विज्ञेया शास्त्रान्ते षा मसंग्रहः इतिकलापव्याकरणे संधिवृत्तौ प्रथमप्रकरणं। लोकायतिर इत्यर्थेच लिक प्रत्यय निष्पन्नः इतिमुग्धबोधव्याकरणं

लौकिकता स्त्री लोकव्यवहारसिद्धत्वं शिष्टाचारेऽस्य शब्दस्य भूरिप्रयोगः ॥

लौकिकाग्निः पुं असंस्कृताग्निः यथा न पैत्र्य यज्ञियो होमो लौकिकोऽग्नौ विधीयते इतिश्राद्धतत्वं ॥

लोड ऋ उन्मादे इतिकविकल्पद्रुमः चतुर्दशस्वरी ऋ अलोलुडत् इतिदुर्गादासः ॥

लोहः पुं लोहः इत्यमरटीकायां भरतः सच पंचविधः यथा कान्तिः १ पांडिः २ कांतः ३ कालिंगः ४ वज्रकः ५ अस्यत्रयोदशविधसंस्काराः यथा शालिवर्षणं १ उद्धर्तनं २ अभ्यावनं ३ आतपशोषः ४ निषेकः ५ मारणं ६ मर्दनं ७ तालनं ८ सूर्यपाकः ९ स्थालीपाकः १० चूर्णनं ११ पुटपाकः १२ पाकनिष्पन्नः १३ अस्यगुणाः आयुर्बलवीर्य्य कामदातृत्वं रोगनाशित्वं श्रेष्ठतस्य गुणाः प्रोच्य मूत्रार्शः कुष्ठ पांडु प्रमेहमेदवायु नाशित्वं। वयःस्थैर्यंच

तत्तेजःकारित्वं मारकत्वं। गुरुत्वंच शोधितस्यास्य गुणे सर्वरोगनाशित्वं मरणनाशित्वंच अशुद्धस्य तस्य गुणाः। जारणायोग्यत्वं आयुर्नाशकत्वं रोगकारित्वं तथा जडत्वकारित्वंच इति रत्नावल्यादयः अन्यल्लोहशब्दे द्रष्टव्यं॥

लोहचारकः पुं नरकभेदः यत्र निगडे बध्यन्ते इति पुराणं॥

लोहजं क्ली मण्डूरं इति रत्नमाला॥

लोहभाण्डः पुं अश्मभाण्डं हामन्दिस्ता इति भाषा इति शब्दचन्द्रिका लोहनिर्मितभाण्डे क्ली।

लोहभूः स्त्री कठिनी स्यात् लोहपात्रविशेषः यथा लोहात्यापुगालोहा लोहभूः कठिन्यपि इति शब्दचन्द्रिका॥

लोहमलं क्ली लोहमलं इति राजनिर्घण्टः॥

लोहशङ्कुः पुं नरकविशेषः यत्र सूचीभिर्भिद्यते इति पुराणं लोहनिर्मितकीलकश्च॥

लोहा स्त्री लोहभूः इति शब्दचन्द्रिका॥

लोहात्मा स्त्री लोहभूः इति शब्दचन्द्रिका॥

लौहितः पुं लोहितः। इति लोहितशब्दात्स्वार्थेष्य प्रत्ययेन निष्पन्नं लोहितसम्बन्धिनि त्रि

लौहितीकः त्रि लोहितवर्णेन रक्तः इति लोहितशब्दात् स्वार्थे ईकक् प्रत्ययेन निष्पन्नं इति सिद्धान्तकौमुदी॥

लौहित्यं क्ली लोहितत्वं इति मेदिनी॥

लौहित्यः पुं नदभेदः स च ब्रह्मपुत्रः इति मेदिनी सागर इति शब्दमाला तस्य नदविशेषस्य उत्पत्तिर्यथा सगर उवाच अमोघायां कथं जज्ञे लौहित्यो ब्रह्मणः सुतः कथं शान्तनुभार्यायां रतः सुकमला सनः पार्वतेयेय पुत्रो वा कथं जज्ञे पितामहात् तत्सर्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम और्व उवाच शृणु त्वं नृपशार्दूल कथयामि महत्तरं आख्यानं ब्रह्मपुत्रस्य लौहित्यस्य महात्मनः हरिवर्षे महावर्षे शान्तनुर्नाम नामतः मुनिरासीन्महाभागो ज्ञानवान् सुतपोधनः तस्य भार्या महाभागा अमोघाख्या।

महासती हिरण्यगर्भस्य मुनेस्तौ हृदाश्रमोद्भवा तया सार्द्धं स कैलाससमर्यादापर्वते वसत्। लोहिताख्यस्य सरस्य तीरे वै गन्धमादने एकदास्य उपोतिष्ठो निजपुष्पादिगोचरे जगाम वनमध्यन्तु चिन्वन् बहूनि च तस्मिन्नवसरे ब्रह्मा सर्वलोकपितामहः तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया तां दृष्ट्वा देवगर्भाभां युवतीं मतिस्थरां मोहितो मदनेनाशु तया भूहर्षितेन्द्रियः उदीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महासतीं अथ्या। यावत्तदा ब्रह्मा संस्थितो मदनार्द्दितः यावमानं विधातारं दृष्ट्वा मोघा महासती मैवं मैव क्षितिश्च कापर्णशालां व्यलीयत इत्युवाच। वाचयातार ममोघा कुपिता तदा पर्णशालान्तरं गता द्वारमावृत्य तन्मागात् अकार्यन्न मया कार्यं मुनिपत्न्या विगर्हितं बलात्स्वम। छिचाहं त्वया त्वां च शापाम्यहं अमोघया चैव मुक्ते विधातुस्म तदात्यप रेतश्चस्कन्दचतेदेवाश्रमे शान्तनो मुनेः च्युते रेतासि धातापि हंसयानं समास्थितः तेजो

यातिपरीतात्मा हुतं वै स्वाश्रमं पयो गते वेयसि शान्तनुर्निजमाश्रमं आगतः आगत्य दृष्ट्वा हंसानां पदलोभं तथा भुवि तेजः पतितं भूमौ विधातुर्ज्वलनोपमं अमोघां परिपप्रच्छ पर्णशालान्तरस्थितां किमेतत्ते शुभगे अत्रैव दृश्यते तथा पतितां च पदलोभं तेन अत्रैव कीदृश सातस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमं अमर्षितेवन्यगद्गदाकुला विकलानना हंसयुक्तस्यन्दनेन कोप्यागतः चतुर्मुखः कमण्डलुकरोतीव रतिं मांसमयाचत ततो मया भर्त्सितं तस्य उद्गतान्तर लीनया प्रख्याय तेनः स्यातो मया शापभयार्द्दितः कृतत्र प्रतीकारं यदि शक्तोसि शान्तनो नहि मायर्षणा सोऽहं कश्चित् शक्नोति मीवष्टत् सतस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः इति निश्चितमनसा तत्र ध्यानपरो भवेत् स्वध्यानेन तज्ज्ञात्वा देवकार्यमुपस्थितं तीर्थावताराणाचापि हिताय जगतां मुनिः ध्यात्वोदर्के चिन्तयित्वा स्वभार्यामिदमब्रवीत् इदंतेमो ब्रह्मणः त्वं पिबामो

खे समास्तया हिताय सर्वज
गतो देव कार्यार्थ सिद्धये भव
त्या निकटं ब्रह्मास्वयमेवस-
मागतः त्वामप्राप्यमहाकुलसमा
वयोः ससमर्प्य च गतो निजांपदं
तत्र कर्त्तुं मह स्मितहवः ततस्त्व।
त्वा पंगातनो वीक्षममोघातीव
लज्जिता प्रपन्नपन्तीवतं प्राहय
तिंनत्वा महासती नाम्मस्य तेजो
धास्यामि न वेलविमनस्कता य
वमुपं यदि कर्त्तव्यंपीत्वात्वम
पिबोत्सृजा ततस्तस्यावचः श्रु।
त्वा युक्तं तथ्यंच शान्तनुःस्व।
यं पीत्वा च तत्तेज स्तस्यागर्भेप्यसेच
यत् संक्रामितैः सातनुनातेजो
भि ब्रह्मणः सती गर्भेदधानामो
घाख्या हिताय जगतो ततः
तस्यां काले तसंग्रामतसंजातोजल
संचयः तन्मध्ये ततघव्यापिनी
लवासाः किरीटधृक रत्नमाला
समायुक्तो रक्तगौरश्चब्रह्मवत्
चतुर्भुजः पद्मविद्याधर शक्तिध
रस्तथा शिशुमारशिरः स्कन्ध
तल्पकायो जलोत्करैः तं
ज्ञातेच तथाभूतं शान्तनुर्लो
कशान्तनुः चतुर्णां पर्वतानांच
मध्येशन्यवेशयत् कैलासश्चोत्तरे
पार्श्वे दक्षिणे गंधमादनःजारुधिः
पश्चिमे शैलः पूर्वे सम्वर्त्तकाह्व
यः तेषां मध्येस्वयं कुंडेपर्वतानां
विधेःसुतः कृत्वातिवर्द्धये नित्ये
शारदीव निशाकरः ततोप म
ध्यंप्राप्य पुत्र मासाद्य द्रुहिणःस्वयं
क्रमत् तस्य संस्कारानकरोद्
हस्पुद्धये प्रथकाले वऊतिथ्य
तीते ब्रह्मणः सुतः तोयराशि
स्वरूपेण वर्द्धये पंचयोजनान्
तस्मिन्देवाः पयः सन्तर्हितीय
इवसागरे शीतामलजले तद्ध
देव्यश्चाप्सरसो गणाः तस्मिन्नव
सरे रामो जामदग्न्यः प्रतापवान्
चक्रे मातृवधं घोरं मत्स्या पितृ
राज्ञया तस्य पापस्य मोक्षाय स्व
पितुश्चोपदेशतः स जगाम महा
कुंडं ब्रह्माख्यं स्नात्वा मिन्नूपा
तत्र स्नात्वा च पीत्वा च मातृहत्या
व्यपानयेत् वीर्थी परशुना कृत्वा
तस्य लामवतारयत् इतिकालि
कापुराणे जामदग्न्योपाख्याने ८६
अध्यायः अपि च ज्ञातं संभ्रम
यः सो ऽप्यतीर्थ मासाद्यतेवरं
वीर्थीपरशुना कृत्वा ब्रह्मपुत्र
मवाहयत् ब्रह्मकुंडात् सुतः सो
ऽयकासारे लौहिताख्ये कैला
सोपत्यकायान्तु न्यपतद्ब्रह्मणःसुतः

तस्यापि सरस स्तीरं समुत्पा
द्य महाबलः शातारेण दिशं प्र
वीमनयद्ब्रह्मणः सुतं ततोऽपर
गापि गिरिं हेमशृंगं विभिद्य च।
कामरूपान्तरं पीठमवाहयत्समंत्र
रिः तस्य नाम विधि श्चक्रे स्वयं
लोहितगंगकं लोहितात्सरसो।
जातो लौहित्याख्य स्ततो ऽ
ऽभवत् स कामरूप मखिलं
पीठमाप्लाव्य वारिणा गोपय।
न्सर्वतीर्थानि दक्षिणं याति सा
गरं प्रागेव दिव्य यमुनां संप्लवा
ब्रह्मणःसुतः पुनः पतति लौ
हित्ये गत्वा द्वादशयोजनं चै
त्रेमासि सिताष्टम्यां यो नरो नि
यतेन्द्रियः स्नाति लौहित्यतोये
षु स याति ब्रह्मणः पदं चैत्र
न्तु सकलं मासं शुचिः प्रयतमा
नसः लौहित्य तोये यःस्नाति
सकैवल्य मवाप्नुयात् इति का
पुराणे ८५ अध्यायः ॥
ल्वी गि श्लिषि इतिकविक।
ल्पद्रुमः ओष्ठ वर्गाद्योपधःल्पि
नाति ल्पीनः ल्पीनिः अन्तस्था।
द्योपध इतिरमानाथः लिनाति इ
तिदुर्गादासः ल्वी गिरा गत्या इति
कविकल्पद्रुमः वकारोपधःगल्वी
नाति।
ल्वीतः ल्वीतिः गि ल्विनाति
ल्वीनः ल्वीनिः गिनैव क्त्यादिन
सिद्धो गकरणं घ्वादित्व विक
लार्थं इतिदुर्गादासः ॥
व वकारः सच व्यञ्जनस्य ऊन
त्रिंशवर्णः यवर्गस्य चतुर्थव
र्णश्च अस्योच्चारणस्थानं दन्तः
ओष्ठश्च इतिव्याकरणं यवरली
यवकारस्यपफव समवा इत्येक
परोत्पाउत्पत्तिस्थान मोष्ठमन्ता
दन्त्यकार्यार्थं दन्त्यमध्येपि तथार
धनलसाव इतिभिन्नपदे पठि
तवान् यथासंकुहूर्षति इत्यादौ
वकारस्य ओष्ठ्यत्वात् उर इत्य
त्वात् अनुस्वारस्य मकारो न
स्यात् वैदिकास्तु अस्योत्पत्तिस्था
नं दन्त एवेत्याहुः अतएव त
द्विलोःपरमं पदं इत्यादौ तथै
वोच्चारयन्ति इति मुग्धबोधटी
कायां दुर्गादासः ॥ तस्य
पर्यायः वो वाणो वाहणोहृ
स्ववरुणो देवसंज्ञकः तोयला
तस्य वामांशः इतिबीजवर्णा
भिधानं अपिच वकारो व
रुणो वाणः खेदः खड्गीस्वरोत्त
रः इतिरुद्रयामले मेत्रकोषः
तस्य स्वरूपं यथा वकार चंच

तापेणि ॐ ह्रीं मोतमध्य
यं पंच प्राणमयं वर्णं त्रिश
क्ति सहितं सदा त्रिविंदुसहितं
वर्णमात्मादितत्त्वसंयुतं पंचदेव
मयं वर्णं पीतविद्युल्लताभामयं
चतुर्वर्ग प्रदं वर्णं सर्वसिद्धिप्र
दायकं त्रिशक्ति सहितं देवि
त्रिविंदु सहितं सदा इतिकाम
धेनुतंत्रे कोणत्रय युतो बालो
ब्रह्मविष्णुशिवात्मिका माया
शक्तिः परानित्या ध्यान मस्य
प्रवक्ष्यते इति वर्णोद्धारतंत्रं
अस्य ध्यानं कुन्दपुष्पप्रभां देवीं
द्विभुजां पंकजेक्षणां शुक्लः
माल्याम्बरधरां रत्नहारोज्ज्वलां
परां साधकाभीष्टदां सिद्धां
सिद्धिदां सिद्धसेवितां एवं
ध्यात्वा वकारन्तु तन्मन्त्रं दश
धाजपेत् इति वर्णोद्धारतंत्रं
वच्य इवार्थः मेदिनी ॥
वं क्ली प्रचेताः इतिमेदिनी
ग वरुणबीजं इति तंत्रं ॥
वः पुं सान्त्वने वायुः वरु
णः इति मेदिनी वाऊः मंत्र
णे कल्याणे बलवान् वक्षतिः
वरुणालयः इति शब्दरत्नाव-
ली शार्दूलः वस्त्रे शाल्वकः वे
द

नं इतिनानेकार्थकोषः ॥
वृः स त्रि पुष्पात् पुष्पभ्यं पुष्पा
कं पुष्पद्रृशब्दस्य द्वितीया चतु
र्थी षष्ठी बहुवचनान्तरूपोऽयं
इतिव्याकरणं ॥
वंशः पुं अन्वयो ज्ञातिः । तत्प
र्यायः संततिः २ गोत्रं ३ जननं
४ कुलं ५ अभिजनः ६ अन्व
यः ७ अन्ववायः ८ संतानः ९ इ
त्यमरः निह्नवं ९ ज्ञातिः ११ इ
तिजटाधरः कुलेच विद्यया ज
न्मना वा प्राणिना मेकलक्षणः
सन्तानो वंश इति जयादित्यः
धनेन विद्यया वा ख्यातस्यापत्य
धारा वंश इति सुभः वसति
उद्गिरति पूर्वपुरुषान् वंशः ता
लीतिशः इत्यमरटीकायां भरतः
तृणजाति विशेषः बांश इति
भाषा तत्पर्यायः त्वक्सारः २ क
र्मारः ३ त्वचिसारः ४ तृणध्वजः ५
शतपर्वा ६ यवफलः ७ वेणुः ८
मस्करः ९ तेजनः १० इत्यमरः कि
कुपर्वा ११ इतिजटाधरः वेभः १२
इतिशब्दरत्नावली तृणकेतुकः
१३ कंटालुः १४ कंटकी १५ महा
बलः १६ दृढग्रन्थिः १७ दृढ
पत्रः १८ धनुर्द्रुमः १९ धानुष्यः २० दृढकांडः

४२१७

२१ अस्य गुणाः अम्लत्वं कषा
यत्वं किंचित्तिक्तत्वं शीतलत्वं ।
मूत्रकृच्छ्र प्रमेहार्शः पित्तदाह
नाशित्वंच इतिराजनिर्घंटः ।
अपिच वंशः सरो हिमः स्वादुः
कषायो वस्तिशोधनः छेदनः क
फपित्तघ्नः कुष्ठास्रव्रण शोथजित् ।
तत्करीरः कटुः पाके रसेरू
क्षो गुरुः सरः कषायः कफकृत् ।
स्वादुर्विदाही वात पित्तलः त
द्यवास्तु सरा रूक्षाः कषायाः क
टुपाकिनः वात पित्तकराउष्णा
बद्धमूत्राः कफापहाः इति भाव
प्रकाशः दृश्यावयवः । पि ।
हेरदाऊ इति भाषा वर्गः इति
मेदिनी वाद्यभांडविशेषः ।
बांशी इति भाषा इतिधर ।
णिः इक्षुः सालवृक्षः इतिराज
निर्घंटः ॥
वंशकः पुं मत्स्यविशेषः बांश
पातामाछ इति भाषा इतिश
ब्दमाला इक्षुविशेषः बांशाइ इ
ति सोमशाड़ा इतिच भाषा ।
इतिरत्नमाला अस्य गुणाः
वंशक स्त्वनभिष्यन्दी लघुर्दोष
घ्नपापहः इतिराजवल्लभः ॥
वंशकं क्ली अगुरु इतिहारा

वली ॥
वंशकर्फं क्ली आकाशोद्भीयमा
नंमूत्रं यथा हृदमत्रकमित्या
ऊरिन्दत्तूलं मनीषिणः ग्रीष्मह
सं वंशकफ वात तूलं मरुद्भवं
इतिहारावली ॥
वंशकर्करोचना स्त्री वंशरोच
ना इतिराजनिर्घंटः ॥
वंशजः पुं वेणुयवः इतिराज
निर्घंटः ॥
वंशजः त्रि सद्वंशजातः तत्प
र्यायः बीज्यः २ वंश्यः ३ इति
हेमचंद्रः ॥
वंशजा स्त्री वंशरोचना इतिश
ब्दरत्नावली ॥
वंशतंडुलः पुं वेणुयवः इति
राजनिर्घंटः ॥
वंशधान्यं क्ली वेणुयवः इति
राजनिर्घंटः ॥
वंशनालिका स्त्री वंशी इतिश
ब्दरत्नावली ॥
वंशनेत्रं क्ली इक्षुमूलं इतिरा
जनिर्घंटः ॥
वंशपत्रः पुं नलः इति राज
निर्घंटः वंशदलं क्ली ॥
वंशपत्रकं क्ली हरितालं इति
हेमचंद्रः ॥

वंशपत्रकः पुं स्तृणमत्स्यविशे
षः वाँशपातासाव इतिभाषा
इतिशब्दमाला नलः पोनेत्तुः
इतिराजनिर्घण्टः ॥
वंशपत्रपतितं क्ली समदशा
क्षरपादछन्दोविशेषः यथादि
ग्मुनि वंशपत्रपतितं भरनभ
नलगैः नूतन वंशपत्रपतिते
रजनि जललवं पश्य सखे
रमौक्तिक मिवोत्तम मरक
तगं पयसं तं चकोरनिकरः
प्रपिवतिमुदितो वान्त मवेत्य चे
न्दुकिरणोरमृतकणामिव वंशप
त्रपतितमितिकेचित् वंशदलमि
ति शंभौ इतिछन्दोमञ्जरी ॥
वंशपत्री स्त्री नाडीहिङ्गुः तृ
णविशेषः तत्पर्यायः वंशद
ला २ जीरिका ३ जीर्णपत्रिका
४ अस्यागुणाः समधुरत्वं शि।
शिरत्वं पित्तरक्तदोषनाशित्वञ्च
ज्वरत्वं पथ्य्नो दूरपदाधित्वञ्च इ
तिराजनिर्घण्टः
वंशपीतः पुं कणगुग्गुलुः
इतिराजनिर्घण्टः ॥
वंशपुष्पा स्त्री सहदेवीलता
इतिराजनिर्घण्टः
वंशमूलके क्ली दत्तमूले इ
ति

राजनिर्घण्टः ॥
वंशरोचना स्त्री स्वनामख्यात
वंशपर्वस्थितश्वेतवर्णौषधवि
शेषः वंशलोचन इति भाषा
तत्पर्यायः त्वक्क्षीरा इत्यमरः
वंशलोचना ३ इतिभरतः ॥
तवक्षीरी ४ शुभा ५ वांशी ६
वंशजा ७ इति रत्नमाला सी
रिका ८ इतिशब्दरत्नावली ॥
तुगा ९ त्वक्क्षीरी १० शुभा ११
वंशक्षीरी १२ वैणवी १३ त्वक्सा
रा १४ कर्मरी १५ श्वेता १६ वंशक
र्पूररोचना १७ तुंगा १८ रोचनि
का १९ पिंगा २० वंशशर्करा २१
अस्यागुणाः रूक्षत्वं कषायत्वं
मधुरत्वं हिमत्वं रक्तशुद्धिकारि
त्वं ताप पित्तोद्रेकहरत्वञ्च ॥
इति राजनिर्घण्टः अपिच वंश
जा बृंहणी वृष्या बल्या स्वाद्वी
च शीतला तृष्णा कासज्वरश्वास
क्षय पित्तास्र कामलाः हरेत्
कुष्ठं व्रणं पाण्डुकषाया वातकृ
च्छ्रजित् इति भावप्रकाशः ॥
वंशलोचना स्त्री वंशरोचना
इति हेमचन्द्रः अस्या गुणाः
कषाय मधुरा रूक्षा वातघ्नी वं
शलोचना त्वक्क्षीरी तथ श्वास

कासघ्नी मधुरा हिमा इतिरा
जवल्लभः ॥
वंशशर्करा स्त्री वंशलोच
ना इतिराजनिर्घण्टः
वंशशलाका स्त्री वीणामूले।
इतिहेमचन्द्रः वंशनिर्मितशला
का वंशस्तनितं क्ली द्वादशा
वंशस्थविलं क्षरपादछन्दोवि
विशेषः यथा वदन्ति वंशस्थ
विलं जतौ जरौ विलासवंशस्थ
विलं मुरवानिलैः प्रपर्यायः पञ्च
मरागमुद्गिरन् व्रजाङ्गनानामपि
गानशालिनां जहाररमानंसहरिः
पुनात्वरः वंशस्तनित मपिक्वा
पि इतिछन्दोमञ्जरी ॥
वंशक्षीरी स्त्री वंशरोचना इति
राजनिर्घण्टः ॥
वंशाग्रं क्ली वंशांकुरः इति
राजनिर्घण्टः ॥
वंशानुचरितं क्ली वंशचरित्र
वर्णनं तत्तु पुराणस्य पंचलक्ष।
णान्तर्गतलक्षणविशेषः यथा
सर्गश्च प्रतिसर्गश्च वंशो मन्व
न्तराणिच वंशानुचरितंचेतिपु।
राणं पंचलक्षणं इतिशब्दरत्ना
वली वंशांकुरः पुं वंशस्यांकुरः।
वाँशेरकोंडा इतिभाषा त तू।

पर्यायः करीरं २ वंशाग्रं ३
यवफलांकुरः ४ अस्यगुणाः।
कटुत्वं तिक्तत्वं अम्लत्वं कषा
यत्वं लघुत्वं शीतलत्वं पित्ता
स्रदाहकृच्छ्रघ्नत्वं रुचिकारित्वं
तत्पर्वणो निर्गुणो निर्गुणत्वञ्च
इतिराजनिर्घण्टः ॥
वंशिकं क्ली अगुरु इत्यमरः
वंशिका स्त्री अगुरु इत्यमरटी
कायां भरतः वंशी । इति
शब्दरत्नावली ॥
वंशी स्त्री मुरली बाँशी इति
भाषा इति शब्दरत्नावली कर्ष
चतुष्टयं इतिराजनिर्घण्टः ॥
वंशीवाद्यस्य विवरणं यथा ना
लेन राजते गीते तालो वादि
त्रसंभवः गरीयस्तेन वादित्रं त
च्चतुर्विधं मुच्यते ततं शुषिरमा
नद्धं घनमित्थं चतुर्विधं ततं
तंत्री गतं वाद्यं वंशाद्यं शुषि
रं तथा चर्मावनद्धं मानद्धं च
नंतालादिकं मतं शुषिरं यथा
वंशोथ पारी मधुरी तित्तिरी
शंख काहलाः भोडरी मुरली
बुक्का शृंगिका स्वरनाभयः शृंग
कापालिके वंशा अमवंशस्तथा
परः एते शुषिर भेदास्तुकथि

ताः सूर्य्यमितिभिः वर्त्तुलः सरल
श्चैव पर्व्वदोषविवर्ज्जितः वेण
वः खादिरो वापि रक्तचंदनजो
ऽथवा श्रीखंडजोऽथसौवर्णोद
न्तिदन्तमयोऽपिवा राजतस्ताम्र
जोवापि लौहजः स्फाटिकोऽथवा
कनिष्ठांगुलि तुल्येन गर्भरंध्रेण
शोभितः शिल्पविद्याप्रवीणेन
वंशः कार्य्योमनोहरः वंशेनैव
मतोऽपीति मतंगमुनिनोदितं
ततोऽन्येपि तदाकारा वंशा एव
प्रकीर्त्तिताः तत्रत्यक्त्वा शिरोदे
शाद्‌द्व्यो द्विमित मंगुलं फुत्का
ररंध्रं कुर्वीत मित मंगुलिपर्व·
णा पंचांगुलानि संत्यज्य तारंं।
ध्राणि कारयेत् कुर्य्यात्‌थान्तरे
भाणि सप्तसंख्यानि कोशलात्
वदरीवीजतुल्यानि संत्यज्याद्‌दाद्‌
मंगुलं प्रान्तयोर्वद्धनं कार्य्यं स्वरा
ऐर्नीद देतवे सिक्थकेन कलादे
या तेन सम्वरतान्तरेत् पंचांगुला
लोऽयं वंशः स्यादेकैकांगुलिव
द्धितः षडंगुलानि नाम्ना स्यात्
यावदष्टादशांगुलं फुत्कारतार
रंध्रस्य यावदंगुलिमन्तरं तदेव नाम
वंशस्य वांशिकैः परिकीर्त्तितं प
कांगुलोऽष्टांगुलश्च मंगलस्त्रयमंग
लः

श्चतितारतरत्वेन वांशिकैःमत्त्
पेक्षितः त्रयोदशांगुलोवंशोऽप्य
रः निन्दितो वंशतत्त्वैस्तथा
सप्तदशांगुलः महानंदस्तथानं
दो विजयोऽथ जयस्तथा चत्वार
उत्तमा वंशा मतंगमुनि सम्म
ताः दशांगुलो महानंदो नंद ए
कादशांगुलः द्वादशांगुलमानस्तु
विजयः परिकीर्त्तितः चतुर्दशा
ङ्गुलमितो जय इत्यभिधीयते व
ह्वारुद्वौ रवि विंशः क्रमादत्र
व्यवस्थिताः नेविंसे प्रोदता चापि
सुस्वरत्वं च सौक्ष्मता माधुर्यमिति
पंचामी फुत्कृते च गुणाः स्मृताः
शीत्कारवहुलः स्तद्धो विस्वरः
स्फुटितो लघुः अमधुरश्च विज्ञे
याः षड्‌दोषाः फुत्कृते क्रमात्
इत्याप्रयोगवाहुल्य मत्स्वागी
तवादने पतिर्दोषे युतोऽतीव
निंदितो वंशिकोमतः स्थानका
दिनयाभिज्ञोगमकादः स्फुटा
क्षरः शीघ्रहस्तः कलाभिज्ञो वां
शिको वक उच्यते प्रसुक्तिर्वेत्
मुक्तिश्च [redacted] मुक्तिश्चेत्यंगुल
गुणाः स्मृताः समसंतत्वं प्रसु
ती. सारणा क्रिया समस्तगमक
ज्ञानं रागरागणवेदिता क्रिया

भाषा विभाषास्वदत्तता गीत।
वादने स्वस्थानेचापि ऽर्धस्थाने
नादनिर्माणकौशलं गान्धेण
स्थानदास्त्वं तद्दोषाच्छादनं तथा
वांशिकस्य गुणा एते मया संति
प्रदर्शिताः इति संगीतदामोदरः
वंशपः त्रि सहंशजातः तत्पर्य्या
यः कृत्यः २ वीज्यः ३ इति
त्रिकाण्डशेषः वक र इ. कौटि
ल्ये गतो इति कविकल्पद्रुमः
कौटिल्य मिह कुटिलीभावः।
कुटिलीकरणंच इवंकते इ.
वंकते काष्ठं कुटिलंस्यादित्यर्थः
वंकते काष्ठं कुटिलं करोतीत्य·
र्थः इति दुर्गादासः वकः पुं स्वना
मख्यातपक्षिविशेषः तत्पर्य्यायः
कह्नः २ इत्यमरः द्वारबलिभुक्
३ कलेरुः ४ शुक्लवायसः ५ दी
र्घजंघः ६ वकोटः ७ स्हद्ववलि
प्रियः ८ इतिशब्दरत्नावली नि
श्चलः ९ शिखी १० चंद्रविहंगमः
११ इतित्रिकाण्डशेषः तीर्थसेवी
१२ तापसः १३ मीनघाती १४
मृषाध्यायी १५ निश्चलांगः १६
दांभिकः १७ इतिराजनिर्घण्टः
अस्य मांसस्य गुणाः पारावतवक
काकाश्वदात्यूहाः पवनापहाः
इतिरत्ना

वली अपि च हंस सारस· ॥
काचाक्ष वक क्रौंच सरारिकाः
नंदीमुखी सकारण्डा वलाकाद्या ३
प्लवाः स्मृताः प्लवन्ते सलिले य
स्मात् एते तस्मात्प्लवाः स्मृताः कु
लेचराः प्लवाश्चापि कोशस्थाः
पादिन स्तथा मत्स्या एते समा
ख्याताः पंचाधानूपजातयः आ
नूपा मधुराः स्निग्धा गुरवोवा
तनाशनाः श्लेष्मलाः पिच्छिला
श्चापि मांसपुष्टिप्रदा भृशं तथा
भिष्यंदिन स्ते हि प्रायो पथ्यतमाः
स्मृताः इति भावप्रकाशः
स्वनामख्यातपुष्पवृक्षः तत्पर्य्यायः
शिववल्ली २ पाशुपतः ३ एका
ष्ठीलः ४ वसुः ५ इत्यमरः
एकाष्ठीला ६ वुकः ७ वसुकः ८
वसुकः ९ तनि तहीका वक
पुष्पः १० शिवमल्ली ११ इतिशब्दर
त्नावली काकशीर्षः १२ स्थूल
पुष्पः १३ शिवप्रियः १४ काक
नामा १५ वसुरुद्रः १६ स्वपुरकः १७
वकपुष्पः १८ मुनितरुः १९ अगस्तिः २०
वंगसेनकः २१ इतिरत्नमाला अग
स्त्यः २२ शीघ्रपुष्पः २३ मुनिद्रुमः २४
व्रणारिः २५ दीर्घफलकः २६ वकपु
ष्पः २७ हरप्रियः २८ सितपीतनील

लोहितकुसुममेतास्त्वर्वियोऽग्न
स्तिः मधुर शिशिर दोषश्रम
कास विनाशनश्च भूतघ्नः तथा
च अगस्तिशिवं गोल्यं त्रिदोषघ्नं
श्रमापहं वलासकासवैवर्ण्यभूत
घ्नं च बलावहं इति राजनिर्घण्टः अ
पिच अगस्ति कुसुमं शीतं वात
र्थक निवारकं नक्तांध्यनाशनं
तिक्तं कषाय वातघ्नं मुनिभिर्मतं
इति भावप्रकाशः अन्यञ्च वास
कस्य च पुष्पाणि वंगसेनस्य चैव।
हि कटुपाकानि तिक्तानि का
सक्षयकराणि च इति राजवल्लभः
वकः पाशुपतश्चैव शिवापीडश्च
सुव्रतः वसुकश्च शिवाकश्च शि
वेष्टः कमण्डकः शिवमल्लिः शि
वाह्लादः शाम्भवो रविसंस्मितः
वकोऽतिशिशिरस्तिक्तो मधुरो म
धुराम्लकः पित्तदाह कफश्वास
श्रमहारी च दीपनः इति वराज
निर्घंटः शिवमल्ली पाशुपत
एकाष्ठीला वुकोवसुः वुको
ऽसुरः कटु स्तिक्तः कफपित्त
विषापहः योनिशूल तथा
दाह कुष्ठ शोथास्त्रनाशनः इ
त्यपि भावप्रकाशः तालव्यसा
कारः यथा शोवान्तो वयरावकः
इति

वीजवर्णाभिधानं कुवेरः ॥
रक्षोविशेषः स च भीमसेन
हतः इति मेदिनी अत्रकोषेषु
पवर्गीय वकारादौ पठितोऽस्य
शब्दः किन्तु अमरटीकायां भ
रतेन अन्तस्थवकारादि वव
वक धातुभ्यां क्रमेण च अ
न्यायेन अन् प्रत्यये न चसाधितः
यंत्रविशेषः । यथा जलक
च्छप पातालदोला भूधरवा
लुकाः वकाख्या यंत्र मेलाः
सु वंज्राणाश्च मूषिकाः इति
शाक्वचंद्रिका अस्य विवरणं य
था दीर्घकंठ काचकूप्यां गि
लयेत्खलसंभाण्डकं तीर्यक्कृत्वा
पचेत्तचुल्यां वकयंत्र मितिस्मृ
तं इति वैद्यके असुरविशेषः
स चश्रीकृष्णेन हतः यथाऽसं
स्कवत्सकुले सर्वे पाययिष्यन्तप
करा गत्वाकूलाशयाभ्यासे पाय
यित्वा पपुर्जलं ते तत्र ददृशु
र्वीला महासत्त्वमवस्थितं तत्रस
वज्रनिर्भिन्नं गिरेः शृङ्गमिवच्युतं
स वैवकोनाममहानसुरो वकरूपधृ
क् आगत्य तरसा कृष्णं तीक्ष्णतुंडोऽग्र
सद्वली कृष्णं महावकग्रस्तं दृष्ट्वा
गार्द्याऽर्भकाः वभूवुरिन्द्रियाणी
व विनाप्राणं विचेतसः तं तालुमूलं

प्रदहन्त मग्निवद्गोपालसूनुंपि
तरंजगद्गुरोः चच्छर्द सद्योऽति
रुषाक्षतं वक स्तुण्डेन हन्तुं पु
नरभ्यपद्यत तमापतन्तं सनि
गृह्य तुंडयो दोर्भ्यां वकं कंस
सखं सतां गतिः पश्यत्सु वालेषु
ददार लीलया मुदावहो वीरणा
वदिवौकसां इति श्रीभागवते
१० स्कंधे ११ अध्यायः ॥
वकचिंचिका स्त्री मत्स्यविशे
षः तत्पर्यायः वकाची २ इति
हारावली ॥
वकजित् पुं भीमसेनः इतित्रि
काण्डशेषः श्रीकृष्णश्च ॥
वकधूपः पुं वृकधूपः इत्यमर
टीका
वकनिसूदनः पुं भीमसेनः इ
तिहेमचंद्रः श्रीकृष्णश्च ॥
वकपुष्पः पुं वकवृक्षः इति
शब्दरत्नावली अगस्तिकुसुम
श्ची वकवृत्तिः पुं वकस्येव व
र्तनविशिष्टः यथा पाषंडिनो
विकर्मस्थान् वैडालव्रतिकान्श
ठान् हैतुकान् वकवृत्तींश्च वाङ्मा
त्रेणापिनार्च्चयेत् इति विष्णुपुरा
णे ३ अंशे १८ अध्यायः तस्य ल
क्षणं यथा अधोदृष्टिर्नैकृतिकः
स्वार्थ

साधनतत्परः शठो मिथ्या
विनीतश्च वकव्रति रुदाहृत :
इति तट्टीकायां श्रीधरस्वामी
अपिच अधोदृष्टिर्वैकृतिकः
स्वार्थसाधनतत्परः शठः मि
थ्याविनीतश्च वकव्रति रुदा
हृतः इति पाद्मोत्तरखंडे ११५ अध्या
यः वकवैरी पुं भीमसेनः इति
जटाधरः श्रीकृष्णश्च ॥
वकव्रती पुं मिथ्याविनीतःव
कवृत्तिः इति जटाधरः तस्य
लक्षणं यथा अधोदृष्टिर्नैक
तिकः स्वार्थसाधनतत्परः शठो
मिथ्याविनीतश्च वकव्रत चरो
द्विजः इति राजमार्तण्डे मनुः ॥
वकाची स्त्री वकचिंचिकाम
त्स्यः इति हारावली ॥
वकारिः पुं श्रीकृष्णः यथात
दावकारिं सुरलोकवासिनः
समाकिरंन्नंदनमल्लिकादिभिः
समीडिरे चानकशंखसंस्त
वै स्तद्धीसगोपालसुता विसि
स्मिरे इति श्रीभागवते १० स्कंधे ॥
११ अध्यायः वकुलः पुं स्वनामख्या
तपुष्पवृक्षः तत्पर्यायः केसरः २
इत्यमरः केशवः ३ इति भरतः
वकुलः ४ सिंहकेसरः ५ वर

तरुः ६ सीधुगंधः ७ मुकुलः
८ मुकुलः ९ इतिशब्दरत्नावली
स्त्रीमुखमधु १० दोहलः ११ मधु
पुष्पः १२ सुरभिः १३ भ्रमरानंदः
१४ स्थिरकुसुमः १५ शारदिकः
१६ करकः १७ सीसंज्ञः १८ वि
शारदः १९ गूढपुष्पकः २० ध
न्वी २१ मदनः २२ मधामोदः २३
चिरपुष्पः २४ अस्य गुणाः शीत
लत्वं हृद्यत्वं विषदोषनाशि
त्वं मधुरत्वं कषायत्वं मदा
ढ्यत्वं हर्षदायकत्वंच तत्कुसु
मगुणाः रूक्षत्वं शीतकारित्वं
सुरभित्वं शीतलत्वं मधुरत्वं
स्निग्धत्वं कषायत्वं मलसंग्रह
कारकत्वंच इति राजनिर्घंटः
अपिच वकुलो मधुगन्धश्च सिं
हकेसरकस्तथा वकुलस्तुवरो
ऽनुष्णः कटुः पाके रसे गुरुः क
फपित्त विष श्वित्र कृमि दन्त
गदापहः इतिभावप्रकाशः तत्
फलगुणाः वकुलं मधुरंशिशिर
न्तुस्थैर्यकारं परं तत्पुष्पगुणाः
पक्वं कषाय मधुरं शीतंपि
त्तकफास्त्रनुत् तद्वत्वकुलपु
ष्पाग कल्हारोत्पल पाटलं इति
राजवल्लभः अस्योत्पत्तिर्यथा वि
वस्वन्ते तदा भूयो महेश ।

कुसुमायुधः आरात्स्थित्वाग्रतो
धन्वी सन्तापयित मधनः तत
स्तमग्रतो दृष्ट्वा क्रोधाध्मात दृ
शा हरः सरस्मालोकयामास
शिखाग्राच्चरणान्तिकं आलो
कित स्त्रिनेत्रेण मदनो द्युतिमा
नपि प्रादह्यत तदा ब्रह्मन्नूपा
दादारभ्यकस्तवत प्रदह्यमानो
चरणोदह्यमासा कुसुमायुधः उ
त्ससर्ज धनुः श्रेष्ठं तज्जगामाथ
पंचधा यदासीन्मुष्टिबन्ध स्तद्
रुक्मपृष्ठं महाप्रभं सचम्पकतरु
र्जातः सुगंधाढ्यो गुणाकृतिः
नाहस्थानं शुभाकारं यदासीद
भगवानाजगामासुरांतिके ततश्च
द प्रतीकाश मापत्काञ्चनमनु
त्तमं सहस्राक्षं ततश्चक्रं सूर्यवह्नि
समप्रभं यो वैकुंठः सुरेंद्राणामन
न्तो भोगिनामपि विष्णुर्योगोब
विदुषां यो यज्ञो यज्ञकर्मिणां ।
विश्वे यस्य प्रसादेन मवनस्थादिवौ

कसः प्राप्ते महर्षिभि र्दत्तमाश्र
वंति सुधाकृतं ततो दैत्यद्रवकरं
पुराणं शंख मनुत्तमं वक्त्रेणाद
ध्मौ वेगेन विद्रावयन् दैत्यजीवितं ॥
ततः संरक्तनयनो हिरण्याक्षो म
हासुरः कोयमिति वदन्नोघान्ना
रायणमुदैक्षत वाराहरूपिणंदे
वं स्थितं पुरुषविग्रहं । शंख
चक्रोद्यतकरं देवानामर्तिनाशनं
वराह शंख चक्राभ्यां ताभ्याम
सुरसूदनः सूर्याचंद्रमसोर्मध्ये
पौर्णमास्या मिवाम्बुदः ततोहि
रण्याक्षमुख्याश्च सर्वे समाद्रवन् दे
त्यगणाः सुरेशं निहंतुकामाः स
हसा वराहं गृहीत शस्त्रावृत
गर्वदर्पाः न वध्यमानोभिप्रायेन
शस्त्रै दैत्यस्त्रैर् दीनवक्रांगवेश्च ।
नाशो चचालासुरहंदेहा वै मेघैः
सवृष्ट्या इव मंदराद्रिः दैत्यस्त
तोऽसौ स्वराह मात्वे निपातया
मास रुषा ज्वलन्ती शक्तिं यथा
विद्युतमाम्बु ऊर्जे प्रवर्षमानोपि
गिरिन्महेन्द्रः स हन्यमानो गदया
प्रमेयः प्रोवाच दैत्य स्ववराहमू
र्त्तिः प्रजापतेःसेत्तमिमं निहन्यव
नेखक्तो स्वस्ति यथा सुरेंद्राः वंत
समासाद्य परे रजेयं विनाशयि

मह मेव मन्तो दैत्यं त्वयास्मा
कमतो ह्निदेवान् हतस्वकीयांस्तु
नवोपपन्नान् संस्थापयिष्यामि न
संशयोऽत्र दैत्येन्द्रदर्पः कनुमतस्य
मीपे एवं ब्रुवति वाक्यं त वि
ष्णो वं स्वपानयत् सवाऊपात
शुद्यम्य सर्वमहरणं रणे दानवा
श्चापि समरे मय तार पुरोगमाः
उद्यतायुध निस्त्रिंशाः सर्वे तंसमु
पाद्रवन् स ताड्यमानो निवलै
दैत्यैः सन्नायुधोद्यतैः नचचाल
वराहस्तु मैनाक इव पर्वतः ॥
क्रोधसंरक्तनयनः शंखचक्रधरो
हरिः व्यवर्द्धत सवेगेन व्याप्नुवन्स
र्वतो दिशं ते नघावास्थैर्दर्णावह
माने नभस्तले ऋरवयः सदगंधर्वै
स्तुष्टुवुर्मधुसूदनं दीप्ताग्निसह
शाक्षोरं दर्शनीयसुदर्शनं सुव
र्णकेशपर्यंतं वज्रनाभं भयावहं मे
दोऽस्थि मज्जा रुधिरैः सिक्तं दानव
संभवैः अद्वितीयं प्रदीपेस्तु त्वर
पर्यंत मंडलं स्वाराम मालाश्वित
तं कामगं कामरूपिणं चक्रमुद्य
म्य समरे वाराहः स्वेन तेजसा ।
चिच्छेद वाहूं चक्रेण हिरण्या
क्षस्य च तथा स च्छिन्नवाहुर्विधि
दानशाकंपन्दानवः कबंधवत्स्थितः

संख्ये विशाख इव पादपः ततः
स्थितस्यैव शिरस्तस्य भूमावपात
यत् हिरण्मयं रुक्मचित्रं मेरोः
शृंग मिवोत्तमं हिरण्याक्षे हते
दैत्या येशेषा ये दानवाः सर्वेत
स भयात्त्यक्त्वा जग्मुर्रसातलं दिशोद
शा इति वकिरणं ॥ अथ
वराहावतारकारणं सरभूपि म
हादेवकर्तृकतच्छरीरनाशश्च त्रै
लोक्य मखिलं दग्धं यदा काला
ग्निना तदा अनंतः पृथिवीं त्यक्त्वा विमो गतः
तत्पृथिवी तलमभ्यादधोगता । त
तो वराहरूपेण निमग्नां पृथिवीं ज
ले मग्नां समुद्धाराम्बुसम्पातस्तं
लिलोपरि वराहोपि स्वयं गत्वा
लोकालोकाकरूयं गिरिं ॥ वारा
ह्या सह रेमे स पृथिव्या वाहरूप
या सतया रममाणस्तु सचिरंपर्व
तोत्तमे नावाप तोषं लोकेशः पो
त्री परमकामुकः पृथिव्याः पोत्रि
रूपाया रमयन्त्यास्ततः सुताः
त्रयो जाता हिमश्रेष्ठा तेषां ना
मानि वै शृणु वृकः कनकोद्वो
रः सर्व एव महाबला स तैः पुत्रै
परिवृतो वाराहो भार्यया स्वया
रममाणा स्तदा कायमागं देवगणा

द्विया इव तनस्य शिशुभिः क्रीड
द्भिः पोत्रिभिस्तदा जगति तत्र
भग्नानि नदीः कल्पनदस्तथा ततो
देवगणाः सर्वे सहिता देवयोनि
भिः शक्रेण सहिता मंत्रं चक्रुः स
मकुगह्वितं ततो निश्चितस्ते सर्वे
शक्राद्या मुनिभिः सह ॥
अवएष शरणं जग्मु नीरायणम
जं विभुं तं समासाद्य गोविंदेवा·
महदेवं जगत्पतिं प्रणम्य सर्वे वि
दशा स्तुष्टुवु गरुडध्वजं देवाऊचुः
॥ नमस्तेदेव देवेश जगत्का
रणकारण कालस्वरूपिन्भगवन्प्र·
धानपुरुषात्मक ॥ इति स्तुतो
देवदेवो भूत भावनभावनः सेंद्रै
देवगणै रुचे तान्सर्वान्मेघनिस्वनः
॥ श्रीभगवानुवाच यदर्थं मा
गता यूयं यद्वो भय मुपस्थितं य
च यद्वा मया कार्यं तद्देवा स्त्वरेण
मुच्यतां देवाऊचुः पीड्यते वसुधा
नित्यं क्रीडया यत्र पोत्रिणः लोका
श्च सर्वे संत्रस्ता नाशवन्त्यपशांतितां
इति तेषां निगदतांश्रुत्वा वाक्यं ज
नार्दनः उवाच शंकरं देवं ब्रह्मा
णंच विशेषतः यत्कृते देवताः
सर्वाः प्रजाश्च सकलाइमाः प्राप्नु
वंति महद्दुःखं पीड्यते सकलं ज

गत् वाराहं तदहं कार्यं तत्कृति
च्छामि शंकर निदेशात्के तस्य
क स्वेच्छया नहि शक्यते ॥ त्वं
त्वाजयस्व तत्कार्यं यत्रात्मा शंक
राभुना त्वमाप्यायस्व तेजोभिर्ब्रह्मन्
स्मवहरे मुडः आप्यायेत तदोद
वाः शंकरो हन्तुं पोत्रिणं रज
स्वलायाः संसर्गात्विप्राणांमारणात्
च्या कायः पापकरो भूत सत्य
क्तो मुच्यते पुना ॥ प्रायश्चित्तैर्न
पैतैर्यः प्रायश्चित्त महं ततः
चरिष्यामि तदर्थं मे तनुर्यत्नेन पा
त्यतां अज्ञापाल्या मम सदा यादि
सीदति नित्यशः मत्कृते प्रत्य
हं तस्मात्त्यजे काये प्रजाहते ।
श्रीमार्कंडेयउवाच इत्युक्तो वा
सुदेवेन तदाच ब्रह्मशंकरौ तपा
यथोक्तं तत्कार्यमिति गोविंद
मूचतुः वासुदेवोऽपि तान्सर्वान्वि
सृज्य त्रिदशां स्तदा वाराहं तेज
सा दृष्ट्वा स्वयं ध्यानपरो तवत्
॥ शनैः शनै र्यदा तेज आहर
त्येष माधवः तदा देहस्तु वा
राह सत्वहीनं व्यजायत ब्रह्मा
त्रिदशाः सर्वे महादेव मुमापतिं
अनुजग्मु स्तथा तेज आधात्वं स
र्वनाशने ततः सर्वे देवगणाः सं

सं तेनो वृषध्वजे ग्रादये तेन
वलवान् सोतीव समजायत ततः
सरभरूपी सतत्त्वगाङ्क्षिशिरोऽभ
वत् ऊर्ध्वायो भावत ग्राशु पादे
युक्तः सभैरवः द्विलक्षयोजनो।
च्छायः साईलक्षैक विस्तृतः ऊ
लक्षाई विस्तृतः पार्श्वे वर्द्धमान
स्तदा भवत् तमायांतं ततोदृष्ट्वा
क्रोधाद्धावंत मंजसा लुहृतः क
नकोद्वोर ग्रासेद: क्रोधमूर्छितः
उद्विक्तिपु सं युगपत्पोत्रद्यातेर्म
हावलाः तत संडमहारेणासरतः
कंठ मध्यतः। भित्वा वपुर्व
राहस्य पातयामास तत्तले ॥
तेपातविषा प्रथमं सत्त्वं कनके
तथा चोरंच कंठदेशेष भित्वा
भित्वा जघानह त्यक्तप्राणास्त
ते सर्वे पेत तोये महार्णवे
जलप्लावे वितन्वानाः काला
नलसमार्चिषः पतितेषु वराहेषु
व्रह्माविस्ष्टरस्तथा स्सर्वर्थवि
न्नयामासः पुनरेव समागताः
इति कालिकापुराणीयाद्वा विंश
तनतिंशाध्यायौ संकलितः ॥
वराहः पुं विस्तुः मानभेदः ॥
पर्वतभेदः मुस्ता इतिमेदिनी ॥

(margin: द्विवराहस्कापसृत्ततयो ततविस्तृतः)

शिशुमारः वाराहीकंदः।
इति राजनिर्घंटः शूकराह्वी
पांतर्गत तडही प्रविशेषः यथा
गंभर्वैर्वरुणः सौम्यो वराहः केक
पवच ऊम्रदस्य कशेरुस्ताम्रगो
भद्राकरूणा चंद्रेन्द्रमलराजश्च
सवर्णांगक गभस्तिमान् ताम्रक
श्रुकुमारी च नवद्वीपादशाष्टभिः
इतिशब्दमाला ॥
वराहकंदः पुं वाराही इति रा
जनिर्घंटः ॥
वराहकांता स्त्री वाराही इतः
इति शब्दरत्नावली ॥
वराहकाली [ग] पुं सूर्यमणिपुष्प
वृत्तः तत्पर्यायः सूर्यावर्तः २
इतिरत्नावली ॥
वराहक्रांता स्त्री क्षुपविशेषः
इति शब्दमाला तत्पर्यायः ॥
लज्जालुः २ समंगा ३ लजकारिका
४ वराहनामा ५ वदरा ६ शुकरी
भिक्त गंपिका ८ नमस्कारी ९ गंड
काली १० खदिरी ११ इति रत्नमा
ला लज्जालुका १२ अंजलिका
रिका १३ कृतांजलिः १४ गंड
कारी १५ समीच्छदा १६ इतिश
व्दांतरे वाराही चामरात इति
ख्याते इति सम्मृतिः इत्यमरः ॥

टीकायां भरतः ॥
वराहनामा [ने] पुं वाराहीकंदः।
इतिशब्दमाला
वराहिका स्त्री कपिकच्छुः इ
तिराजनिर्घंटः ॥
वराही स्त्री भद्रमुस्ता शूकर
कंदः इतिराजनिर्घंटः ॥
~~वराही स्त्री भद्रमुस्ता शूकरक~~
वसितः त्रि उपासितः इत्यमरः।
वरिवस्या स्त्री शुश्रूषा इत्यम
रः वरिवसितः त्रि उपासितः
इत्यमरः ॥
वरिशी स्त्री वडिशी इतिशब्द
रत्नावली ॥
वरिषं क्ली वत्सरः इतिशब्द
रत्नावली ॥
वरिषाः स्त्रीभूम्नि वर्षा इतिभरत
द्विरूपकोषः ॥
वरिषाप्रियः पुं चातकपक्षी।
इतिशब्दरत्नावली ॥
वरिष्टं क्ली ताम्रे इत्यमरः।
मरिचं इति मेदिनी ॥
वरिष्ठः त्रि अयमनयोरतिशयेन
उरुः इति व्याकरणं वरतमः
उरुतमः इतिमेदिनी वलः इ
सतमः वरिष्ठः पुं तित्तिरिपक्षी।

मेदिनी नारंगवृक्षः इति राज
निर्घंटः ॥
वरिष्ठा स्त्री आदित्यभक्ता इति
राजनिर्घंटः ॥
वरी स्त्री शतावरी इत्यमरः
सूर्यपत्नी इति त्रिकांडशेषः
वरीयान् [स] त्रि श्रेष्ठः वरिष्ठः
ग्रतिप्रवा इति मेदिनी
वरीयान् पुं विष्कंभादिसप्तविंश
तियोगान्तर्गताष्टादशयोगः तत्र
जातफले दाता दयालुः सतत
सवेशः सत्कर्मकर्त्ता मधुर स
भावः नरो वलीयान्पनवान्नना
प्त्रोयोगो वरीयान्यदि जन्मका
ले इतिकोष्ठीप्रदीपः ॥
वरीवर्दः पुं वलीवर्दः इत्यम
रटीकायां रमानाथः ॥
वरीशः पुं कामः इतिकांडशे
षः ॥
वरुडः पुं म्लेच्छजातिविशेषः।
यथा पुलिन्दा नाहला निष्ठाः
शवरावरुडा भटाः माला भिल्लाः
किरातास्च सर्वेपि म्लेच्छजातयः
इति हेमचंद्रः वरुडः पुं अंत्यजजा
तिविशेषः यथा रजकश्चर्मका
रश्च नटो वरुड एवच कैवर्त्तमेद

शिलाश्वसमेते चोपजाःस्मृताः
मांसीमम्मनादौ शेषो यथा प
तेषांत स्त्रियो गत्वा शुक्लाचम
ति गर्हश्च पतत्यज्ञानतो विप्रो
ज्ञानात्साम्यंतु गच्छति इतिप्रा
यश्चित्ततत्त्वधृत यमवचने अ
स्योत्पत्ति र्यथा कैवर्त्तस्यवक।
मायां पौण्ड्रिकादेव सौचिकःसो
चिकात् पौण्ड्रिकाज्जातो वटेव
वरुड एवच इति पराशरप।
द्धतिः ॥

वरुणः पुं देवताविशेषः सच
कश्यपस्य अदितिनाम्निपत्न्यां जा
तः तस्य चर्षणीनाम्नि पत्न्यां भृगु।
वाल्मीकी पुत्रौ जातौ इति।
श्रीभागवतमतं सच जलाधिप
तिः पश्चिमदिक्पालश्च तस्य
पर्यायः प्रचेताः २ पाशी ३
यादसांपतिः ४ अप्पतिः ५ इ
त्यमरः यादःपतिः ६ अपांपतिः
७ इति तट्टीकायां भरतः
जम्बुकः ८ मेघनादः ९ जलेश्व
रः १० परंजयः ११ दैत्यदेवः १२ जी
वनावासः १३ नंदपालः १४ इतिप्रा
द्धरत्नावली वारिलोमः १५ कुंडली
१६ रामः १७ सुखाशः १८ इतिजटा
धरः जलाधिपास्तारी

सो ग्रस्य पूजाविधि र्यथा । हय
शीर्षपंचरात्रे अथ सम्प्रवक्ष्यामिः
जर्ण्यत्तस्य रत्नादि निर्मितं हि
भूत्वं हंसपृष्ठस्थं दक्षिणेनाभय
प्रदं वामेन नागपाशेन धार
यंतं सुभोगिनं सलिलं वामसा
भोगं कारयेद्यादसांपतिं ॥
वामेन कारयेदृद्धिं दक्षिणे पुष्क
रंशुभं नागै र्नदीभि र्यादोभिःस
मुद्रैः परिवारितं कृत्वैवं वरुणं
देवं प्रतिष्ठाविधिनार्चयेत् पुष्क
रंतस्तते ततो ध्यानं प्रसन्नवद
नंसौम्यं हिमकुन्देन्दुसन्निभं स
र्वाभरणसंयुक्तं सर्वलक्षणल
क्षितं किरीटी शीतलैः सौम्यैःपी
णयंतं सदाश्रितं लावण्यामृतधा
राभिस्तर्पयंतं सितप्रजाः राजरे
समासीनं पाशहस्तकरं शुभं पु
ष्कराद्यै र्गणैः सर्वै समन्तात्प
रिवारितं गौर्य्या कांत्या वामग
तं नदीभिः परिवारितं नागै र्या
दोगणैः युक्तं ब्रह्मणः शिववा
पं सृष्टि संहारकर्त्तारं नाशाय
णं शिवापरं इतिध्यात्वा प्रजये
वरुणमंत्रोद्धारस्तु तैवेव अष्टाविं
शांतवीजेन बलदंडास्वरेण वा
हेन्दुविन्दुयुक्तेन प्रणवोद्दीपितेनव

तेन ओंवंइति मंत्रः प्रतिमाया
स्थितिं कृत्वा प्रणवेन निवेशयेत्
पूजयेद्गंधपुष्पाद्यैः सान्निध्यं पाश
मुद्रया स्थितिं प्रतिष्ठां निवेश
येत् अन्तर्गतोगुप्तमुष्टिभ्यां निवे
धमुद्रां दर्शयेत् नमस्कारमंत्र
स्तु वरुणो यवनो निम्नःपुरुषो
निम्नगाधिपः पाशहस्तोमहाबाहु
स्तस्मै नित्यं नमो नमः इति जला
प्लावोत्सर्गनत्वं दृष्ट्वार्थप्रसजप
नीयमंत्रो यथा पुष्करावर्त्तकैर्मे
घैःप्लावयंत वसुंधरां । विद्युद्ग
र्जितसन्नद्ध तोयात्मानं नमाम्यहं
यस्य केशेषु जीमूतो नद्यः स
र्वाङ्गसंधिषु कुक्षौ समुद्राश्चत्वा
रस्तस्मै तोयात्मने नमः इति
ध्यात्वा मानसै रुपचारैर्वरुणमा
राध्य मूलमंत्रं जपेत् प्रजापति
र्ऋ षिस्त्रिष्टुप्छन्दो वरुणो देवता
पत्र वद्राष्ट्र मभिव्याप्य सहस्रार्थ
जपे विनियोगः मंत्रस्तु गुरुमुखा
त्तेजयः स यथा ओं वृष्टिसिद्धावा
रुन्नस्मै वरुणास्प्राशीर्गच्छवशा
पत्निदेत्वा दिवं गच्छत तेनो वृष्टि
मावह इतिमंत्रस्य सहस्रजपान्तर
वृष्टिमती वसुमती भवति अत्र स
ंदेहो नकार्यः ॥ मंत्रान्तरं तूर्च

लक्ष्मी तथामायां तेन हूं श्रीं क्लीं
इति मन्त्रमंत्रं नाभिमात्रजल
मध्ये प्रविश्य यदि जपतितदा
अनावृष्टि हरति महावृष्टिर्भवति
अष्टसहस्रजपः संख्या चतुर्गुणा
तेन द्वात्रिंशत्सहस्रजपः दिन
त्रयानन्तरं चतुर्दिने जपसमाप्तिः
नाभिमात्रजले स्थित्वा जपेन्मंत्रं
प्रसन्नधीः दशसहस्रं जपेन्मंत्रं
त्रिदिनं व्याप्य यत्नतः अथवा ष
ट्सहस्रजपेन्नित्यं तदावृष्टिर्भवेत्
ध्रुवं इति षट्कर्मदीपिका ॥
पुस्तकान्तरे वं इतिप्रकारान्तर मंत्रो
पि जप्यत्वेन लिखितः ॥ महा
पातकिनो देहयत्नं गृहीत्वा राजा
वरुणाय प्रतिपादयेत् यथा ना
रदीये नृपःसाधुर्महापातकिनो
धनं आस्वादनस्य तल्लोभात्तेनदो
षेण लिप्यते अप्सु प्रवेश्य तं
दंडं वरुणायोपपादयेत् श्रुत
वृत्तोपपन्ने वा ब्राह्मणे प्रतिपाद
येत् ईशो दंडस्य वरुणो राज्ञां
दंडधरो हि सः ईशः सर्वस्य जग
तो ब्राह्मणो वेदपारगः इतिमा
नवे ९ अध्यायः स्वनामख्यात
वृक्षः तत्पर्य्यायः वरणः २
सेतुः ३ तिक्तशाकः ४ कुमारकः ५

इत्यमरः अम्लरीच्छ्रः ९ सेतकः
१ वरुणः ८ शिखिमंडनः १३
निशाहृद्रत्नावली सेतवृन्तः १०से
तद्रुमः ११ साधुवृक्षः १२ तमलः
१३ मारुतापहः १४ अस्य गुणाः ।
कटुत्वं उष्णत्वं रक्तदोषशीत
वातहरत्वं स्निग्धत्वं दीपनत्वं ।
विद्रधिरोगजित्वंच इति राजनि
र्घण्टः अपिच वरुणः पित्त
लो भेदी श्लेष्मकृच्छ्राश्म मा
रुतान् निहन्ति गुल्म वाताश्र
क्रिमींश्चोष्णोग्निदीपनः कषायो
मधुरस्तिक्तः कटुको रूक्षकोल
घुः इतिभावप्रकाशः अन्यच्च व
रुणोःनिल शूलघ्नो भेदी चोष्णो
ऽश्मरीहरः पुष्पं वरुणजे ग्राहि
पित्तघ्नं आमवातजित् इतिरा
जवल्लभः जलं इति मदि।
नी सूर्यः इति विश्वः॥
वरुणात्मजा स्त्री मद्यं इत्यमरः
वरुणानी स्त्री वरुणपत्नी इत्यज
याधरः॥
वरूथं क्ली उत्तरीयवस्त्रं वृणोतो
रूथं प्रत्ययेन निष्पन्नं इति सि।
द्धांतकौमुद्यामुणादिवृत्तिः॥
वरुलः पुं संभक्तः इतिमेदि
नसारोणादिवृत्तिः॥

वरूथं क्ली तनुत्राणं इति हेम
चंद्रः चर्म इति मेदिनी॥
तत्र पवर्गी पवकारादौ गणितो
ऽयंशब्दः॥
वरूथः पुं परप्रहरणाभिघातत्
त्रार्थं रथस्य सन्नाहवदावरणाका
दिद्रव्यंतत् तत्पर्यायः॥
रथगुप्तिः २ इत्यमर भरतौ॥
रथस्य वृत्तिः ७ इति जटाधरः॥
वरूथिनी स्त्री सेना इत्यमरः॥
वरेण्यं क्ली कुंकुमं इति राजनि
र्घण्टः॥
वरेण्यः त्रि प्रधानः इत्यमरः॥
वरेंद्री स्त्री गौडदेशः इति त्रिको
डशेषः॥
वरेश्वरः पुं शिवः इति शब्द
रत्नावली॥
वरोटं क्ली मरुवकपुष्पं इति
शब्दमाला वरोलः पुंसी भ्रमरः त्रिकांडशेषः
वर्करः पुं युवपशुः इत्यमरः
मेषशावकः इति तट्टीकायां
भवतः परिहासः छागः।
इति मेदिनी॥
वर्करादः पुं कटाक्षः तरुणादि
इरोविः । नारीपयोधरोत्स

दुः कांतदंतनखक्षतः॥ इतिमेदि
नीवर्गः पुं सजातीयसमूहः समा
नधर्मिभिः प्राणिभिरप्राणिभिरूप
लक्षितं वृंदं यथा कवर्गः अत्र
कत्वखत्वादिना विजातीयत्वेपिस्था
नसाम्यमस्ति इत्यमरभरतौ ग्रंथप
विच्छेदः यथा सर्गो वर्ग परिच्छे
दोद्धातध्यायांकसंग्रहाः उच्छ्वासः
परिवर्तश्च पटलः कांडमस्त्रियां॥
स्थानंप्रकरणं पर्वाह्निकेचेत्यसं
चयः इति त्रिकांडशेषः समाना
ङ्कद्वयसंवरणं तत्पर्यायः कृतिः
२ यथा समद्विघातः कृतिरुच्यते
ऽथ स्थाप्योन्त्यवर्गो द्विगुणान्त्यनिघ्नः
स्वस्वोपरिष्टाच्च तथापरेका त्य
क्त्वान्त्य मुत्सार्य पुनश्च राशिं॥
खंडवर्गैक्ययुता कृतिर्वा इष्टो।
खंडद्वयस्याभिहति द्विनिघ्नी तत्
नयुग्राशि वधः कृतिः स्यादिष्टस्य
वर्गेण समन्वितो वा उदाहरणं।
सखे नवानांच चतुर्दशानां ब्रूहि
त्रिहीनस्य शतत्रयस्य पंचोत्त
रस्याप्ययुतस्य वर्गं जानासि चेद्वर्ग
विधानमार्गं इति लीलावती॥
वर्गोत्तमः पुं चराणां राशीनांमेष
कर्कट तुला मकर राशीनांप्रथ
मो ऽंशः॥ स्थिराणां अर्थात्

वृष सिंह वृश्चिक कुंभराशीनां
पंचमोंशः द्व्यात्मकानां अ
र्थान्मिथुन कन्या धनुर्मीन राशी
नांनवमोंशश्च यथा चराणां
प्रथमे चांशे स्थिराणां पंचमे
तथा नवमे द्व्यात्मकानांच वर्गो
त्तम इति स्मृतः अपिच राशी
नां स्वकीयनवांशाः। यथा स्वन
वांशास्ते राशीनां वर्गोत्तम इति
स्मृतः इतिज्योतिस्तत्वं॥
वर्च ङ. दीप्तौ इति कविकल्प
द्रुमः ङ वर्चते॥
इतिकविकल्पद्रुमः॥
वर्चः क्ली रूपं विष्ठा तेजः इ
तिमेदिनी वर्चस्कः पुं क्ली विष्ठा इत्यमरः
वर्चस्वी ने पुं चंद्रः यथा रोहि
ण्यास भवद्वर्चा वर्चस्वी येन चंद्रमाः
इतिवह्निपुराणं॥
वर्चा पुं चंद्रपुत्रः इति मेदिनी
अस्य रोहिण्यामभवद्वर्चा व
र्चस्वी येन चंद्रमाः इत्याद्येवह्नि
पुराणे सर्वानुकीर्तने सतीदेह
त्यागनामाध्यायः॥
वर्जनं क्ली हिंसा त्यागः इति
मेदिनी मारणं। इति हेमचंद्रः
वर्जितः त्रि त्यक्तः वृजधातोः क्त
प्रत्ययेन निष्पन्नः यथा प्रवज्ञा

तस्मादन्नं सदोषं विस्मयान्वि
तं गुरो रपि नभोक्तव्य मन्नंस
त्कार वर्जितं इतिकौर्मे उ
परिभागे १८ अध्यायः
वर्जनीयं त्रि वर्जनयोग्यं त्यक्त
व्यं वर्जनीयान्नंयथा राजान्नंन
र्त्तकान्नंच तक्ष्णोऽन्नंचकृतकारि
णः गजान्नं गणिकान्नंचषंढा
न्नंचैववर्जयेत् चक्रोपजीविरज
क तस्कर ध्वजिनांतथा गांधर्व
लोहकारान्नंसूतकान्नं विवर्जये
त् कुलालचित्रकर्मान्नं वार्द्धुषेःप
तितस्यच पौनर्भवछात्रिकयोर
भिशस्तस्यचैवहि स्वर्णकारशै
लूषव्याधितस्यातुरस्यच चिकि
त्सकस्यचैवान्नं पुंश्चल्यादंडिक
स्यच स्तेननास्तिकयोरन्नंदेवता
निंदकस्यच सोमविक्रयिनश्चा
न्नंश्वपाकस्यविशेषतः भार्याजि
तस्यवान्नं यस्यचोपपतिर्गृहे उ
त्सृष्टस्य कदर्यस तथैवोच्छिष्ट
भोजिनः अपांक्त्यान्नंच संघान्नंश
स्त्राजीवस्य चैव हि क्लीवसंन्या
सिनश्चान्नं मत्तोन्मत्तस्य चैवहि ॥
भीतस्य रुदितस्यान्नमवक्रुष्टं प
रिक्षितं ब्रह्मद्विषःपापरुचेः श्रा
द्धान्नं सूतकस्यच वृथापाकस्य
चैवान्नं शवान्नं श्वशुरस्यच अ
प्रजानांतु नारीणां कृतघ्नस्य तथै
वहि कंडकान्नं विशेषेण शस्त्र
विक्रयिण स्तथा शौण्डान्नं घंटका
न्नंच भिषजामन्न मेवच विद्धप्र
जननस्यान्नं परिविन्न मेवच
पुनर्भुवो विशेषेण तथैवहि दिधिषु
पतेः अवज्ञातंचावधूतं सरोषं वि
स्मयान्वितं ॥ गुरो रपि न
भोक्तव्यं अन्नं सत्कारवर्जितं ॥
दुष्कृतं हि मनुष्यस्य सर्व मन्नेषु
व्यवस्थितं यो यस्यान्नं समश्नाति स
तस्याश्नाति किल्बिषं इतिश्रीकूर्म
पुराणे उपरिभागे १८
अध्यायः
वर्ज्यः त्रि वर्जनीयः यथा अतः
परंप्रवक्ष्यामिवर्ज्यावर्ज्यं प्रतिक्रिया
भोज्य मन्नंपर्युषितं स्नेहाक्तं चिरसं
स्थितं अस्नेहाश्चापिगोधूम यव गो
रसविक्रियाः । शशकः क
च्छपो गोधा सेधा मत्स्याः श
ल्लकः भक्ष्या होते सदा वर्ज्याः
ग्रामशूकर कुक्कुटौ ।
पितृदेवादिशेषंच श्राद्धे ब्राह्मण
काम्यया प्रोक्षितं चौषधार्थंच
खादन्मांसं नदोषभाक । इति
मार्कंडेयपुराणे सदाचाराध्यायः ॥

वर्णतक स्तुति विस्तारशुक्लाद्युक्ति
दीपने इतिकविकल्पद्रुमः ॥ वर्ण
यति वर्णयति कवि र्लीलां स्त।
र्थः वर्णयति तन्त्रं विस्तारयतीत्य
र्थः वर्णयति प्रतिमांशुक्लादिवर्णा
करोतीत्यर्थः वर्णयति उद्योक्तरोप्य
तेवेत्यर्थः शुक्लाद्यन्तक्ति दीपमेऽत्य
पि पाठः इति कविकल्पद्रुमः ॥
कवर्णयति अयंकस्मिन्नमनस्तो व
र्णः शुक्लादिक्रिया इतिदुर्गादासः
वर्णाक्री कुंकुमं इति हेमचंद्रः ॥
वर्णः पुं जातिः साच ब्राह्मणः
क्षत्रियो वैश्यः शूद्रश्च । यथाश्रुत
यादि युगा यदा भगवान्पुरुषरूपे
ण सृष्टिं कृतवान् तदास्य पारी
राद्व्यावर्णा उत्पन्नाः ।
मुखतो ब्राह्मणाः बाहुतः क्षत्रियाः
ऊरुतो वैश्याः पादतःशूद्रा जाताः
। एतेषां वर्णानां धर्माः शास्त्रे
ष निरूपिताः सन्ति तत्रब्राह्मण
धर्मा उच्यंते अध्ययनं यजनंदा
नंचेति जीविकास्त्रयः अध्यापनं
याजनं प्रतिग्रहश्चेति १ ॥
क्षत्रियस्य त्रयो धर्माः । अध्याय
नं यजनं दानंच प्रजानां रक्ष
णंजीविका २ वैश्यस्यत्रयोधर्माः
अध्यायनं यजनं दानंच चतस्रो
जीविकाः कृषिः गोरक्षणं वाणि
ज्यं कुसीदंचेति ३ शूद्रस्यत्वस्य
त्रवर्णानां शुश्रूषा धर्मो जीवि
काच ४ ब्राह्मणआश्रम चत
ष्टयवंतोभवति ब्रह्मचारी गृह
स्थः वानप्रस्थःसंन्यासीच तत्रउप
नयनानंतरंनियमेन कृत्वायो गुरोः
सन्निधौस्थित्वा सांगवेदाध्ययनं
करोतिसब्रह्मचारीत्युच्यते १ सांग
वेदाध्ययनं समाप्ययो दारपरिग्र
हंकृत्वा स्वधर्माचरणं करोतिसगृ
हस्थउच्यते २ पुत्रमुत्पाद्ययोवन
वासं कृत्वा अकृष्टपच्य फलादि
भक्षयित्वा ईश्वराराधनं करोतिस
वानप्रस्थ उच्यते ३ यःसर्वगृ
हादिकं त्यक्त्वा मुंडितमुंडो गैरि
ककौपीनाच्छादनं दंडं कमंडलुं
चबिभ्रतभिक्षाहारी निर्जने तीर्थे
वासित्वा केवल मीश्वराराधनंक
रोति स संन्यासीत्युच्यते ४ क्षत्रिय
वैश्ययोस्तु प्रथमाश्रमत्रयं विहि
तं शूद्रस्यैक एव गृहाश्रमः ई
श्वराराधनंतु सर्वेषां वर्णानामाश्र
माणांचसाधारणो धर्मः तन्मध्येय
स्तु विष्णूपासकः स वैष्णव उच्यते
शिवोपासकः शैवः दुर्गादि शाक्त

५ दुर्गादासः
वर्णकवर्णः

पासकः शाक्तः सूर्योपासकः
सौरः गणेशोपासको गाणपत्य
उच्यते इति पुराणार्थप्रकाशः
अपिच ब्रह्मोवाच सर्गादिकृद्ध
रिश्चैव पूज्यः स्वायंभुवादिभिः
विप्राद्यैस्त्विन धर्मेण उक्तं धर्मं व्या
सवेष्णुण यजनं याजनं दानं
ब्राह्मणस्य प्रतिग्रहः अध्याप
नं चाध्ययनं षट्कर्माणि द्विजो
त्तमे दानमध्ययनं यज्ञो धर्मः
क्षत्रिय वैश्ययोः । दंड
स्तथा क्षत्रियस्य कृषिर्वैश्यस्य शास्य
ते शुश्रूषैव द्विजातीनां शूद्राणां
धर्मसाधनं कारुकर्म तथाजीवः
पाकयज्ञोऽपि धर्मतः भिक्षाचर्याथ
शुश्रूषा गुरोः स्वाध्याय एवच
संध्याकर्माग्निकार्यंच धर्मोऽयं ब्रह्म
चारिणः सर्वेषां माश्रमाणां तु
द्वैविध्यंतु चतुर्विधं ब्रह्मचार्युप
कुर्वाणो नैष्ठिको ब्रह्मतत्परः ॥
योऽधीत्य विधिवद्वेदान् गृहस्था
श्रम माव्रजेत् उपकुर्वाणको
ज्ञेयो नैष्ठिको मरणांतिकः अ
ग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरा
र्चनं गृहस्थस्य समासेन धर्मोयं द्वि
जसत्तमाः उदासीनः साधकश्च गृ
हस्थो द्विविधो भवेत् कुटुम्बभरणे
युक्तः साधकोऽसौ गृही भवेत् ॥

ऋणानि त्रीण्यपाकृत्य त्यक्त्वा भार्या
धनादिकं एककीयस्तु विचरेत्
उदासीनः समौत्तिकः भूमौ मूल
फलाशित्वं स्वाध्याय स्तप एवच
संविभागो यथान्यायं धर्मोऽयं वन
वासिनः तपस्तप्यति योऽरण्येय
जेद्देवान्जुहोतिच । स्वाध्यायेचै
व निरतो वनस्थ स्तापसो मतः ॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यान
परो भवेत् सन्यासीह स विज्ञेयो
वानप्रस्थाश्रमे स्थितः योगाभ्यास
रतो नित्यमारुरुक्षु र्जितेंद्रियः ज्ञा
नाय वर्त्तते भिक्षुः प्रोच्यते पार
मेष्ठिकः यस्त्वात्मरतिरेव स्यान्नि
त्यतृप्तो महामुनिः ॥
सम्यक् च दमसंपन्नः स योगी भिक्षु
रुच्यते भैक्ष्यं श्रुतंच मौनित्वं
तपो ध्यानं विशेषतः सम्यक् ज्ञा
नं च वैराग्यं धर्मोऽयं भिक्षुके मतः ॥
ज्ञानसन्यासिनः केचिद्वेदसन्यासि
नोऽपरे धर्मसन्यासिनः केचित्त्रिवि
धः पारमेष्ठिकः योगीच त्रिविधो ज्ञेयो
भौतिको मोक्ष एवच तृतीयोऽन्त्याश्र
मी प्रोक्तो योगमूर्त्तिसमाश्रितः ॥
प्रथमा भावना पूर्वे मोक्षे
त्वक्षरभावना तृतीये चांतिमा प्रोक्ता

भावना पारमेश्वरी धर्मात्संजायते
मोक्षो अर्थात्कामोऽभिजायते ।
प्रवृत्तंच निवृत्तंच निवृत्तंच द्विवि
धं कर्म वैदिकं ज्ञान पूर्वं निवृत्तं
स्यात्प्रवृत्तंचाग्नि देवकृत् क्षमा
मो दया दान मलोभोऽभ्यास ए
वच आर्जवं चानसूयाच तीर्थानु
सरणं तथा सत्यं संतोष आस्ति
क्यं तथा चेंद्रियनिग्रहः देवताभ्य
र्चनं पूजा ब्राह्मणानां विशेषतः
अहिंसा प्रियवादित्व मपैशुन्यम
रूक्षता एत आश्रमका धर्माश्चा
तुर्वर्ण्ये ब्रवीम्यतः प्राजापत्यं ब्रा
ह्मणानांस्मृतं स्थानं क्रियावतां ॥
स्थान मैंद्रं क्षत्रियाणां संग्रामे
ष्वपलायिनां वैश्यानां मारुतं
स्थानं स्वधर्म मनुवर्त्ततां गांधर्वं
शूद्रजातीनां परिचारे च वर्त्ततां ।
इति गारुडे ४९ अध्यायः ॥
अनस्त्र ब्राह्मणस्त्वत्र सात्विकश्च
ण्ड कर्म वसुंधरे योनि कर्माणि
कुर्वीत मम भक्तिपरायणः षट्
कर्मणिरतो भूत्वा अहंकारविव
र्जितः लाभालाभे परित्यज्य जिता
त्मा जितेंद्रियः मम कर्म समायु
क्तः पैशुन्येन विवर्जितः शास्त्रानुसा
रीमत्स्या नरक्तः शिशुचेतनः एत

द्वै ब्राह्मणः कर्म एकचित्तो जितें
द्रियः इत्यादींश्च कुरुते स मामे
ति वसुंधरे क्षत्रियाणां प्रवक्ष्यामि
मम कर्मसु निश्चितो यानि कर्मा
णि कुर्वंति क्षत्रिया मध्यसंस्थिताः
दानशूरश्च कर्मज्ञो यज्ञेषु कुशलः
शुचिः मम कर्मसु मेधावी अहं
कारविवर्जितः अल्पभाषी गुणा
न्वितं नित्यं भागवतप्रियः गृह वि
धानसूयात्मा गुरुकर्मेषु तं हितः
अलुब्ध्यानादि कुशलः पैशुन्येन
विवर्जितः एतै र्गुणैः समायुक्तो
योमां व्रजति क्षत्रियः भजते मम
यो नित्यं मम लोकाय गच्छति
वैश्यानांतु प्रवक्ष्यामि मम कर्मसु
निश्चितो यानि कर्माणि कुरुते मम
भक्तिपथे स्थितः एतै र्गुणैः स्व
धर्मेण लाभालाभविवर्जितः ॥
ऋतुकालाभिगामीच शांतात्माकौ
ध्यवर्जितः शुचि र्दक्षो निरहं
कारो मम कर्मरतः सदा गुरुसेवाप्र
को नित्यं युक्तो भक्तानुवत्सलः
वैश्यस्त्वेवंतु संयुक्तो योनुकर्मा
णि कारयेत् तस्मात्ते नचिरात्स्वपा
मि सच मे न प्रणश्यति अथ
शूद्रस्य वक्ष्यामि कर्माणि शृणु मा
धवि यानि कृत्वा तु शूद्रो महा

4303

व्यवस्थितः दंपती मम भक्तौ यौ
मम कर्मपरायणौ उभौ भागव
तौ भक्तौ मत्स्यौ कर्मनिष्ठितौ।
देशकालौ च जानाति स्वसात
मसोन्वितः निरहंकारयुक्तात्मा
सातिथेयो विनीतवान् श्र
द्दधानोतिथ्यतात्मा लोभ मोह
विवर्जितः नमस्कारप्रियो नित्यं
मम चिंताव्यवस्थितः शूद्रकर्मा
णिमे देवि य एवं स समाचरेत
त्यक्त्वा ऋषिसहस्राणि शूद्रमेव
भजाम्यहं इति वाराहे विधिक
र्मोत्पत्तिनामाध्यायः अपरंच
सुकेशिरुवाच । विप्राणां चा
तुराश्रम्यं विस्तरान्मे तपोधनाः
आचक्षध्वं न मे तृप्तिः शृण्वतः
प्रतिविद्यते ऋषय ऊचुः कृतोप
नयनः सम्यग्ब्रह्मचारी गुरौ वसन्
तत्र धर्मोऽस्य यस्तं च कथ्यमानं
निशामय स्वाध्यायोथाग्निशु
श्रूषास्नानं भिक्षाटनं तथा गुरौ
निवेद्य तच्चाद्य मनुज्ञातेन नित्यशः
धर्मार्थकाम मोक्षाणां सम्यक्प्र
उपपादने तेनाहूतः पठेच्चैव त
त्परीभूय नित्यशः । एवं प्रसक
लान्वेदांस्तत्प्राप्य गुरोर्मुखा
त्. ततो वरान्गुदा दद्याद्गु

रवे दक्षिणास्ततः गार्हस्थ्याश्रमका
मस्तु गार्हस्थ्याश्रममाश्रयेत् वान
प्रस्थाश्रमं वापि चतुर्थं स्वेच्छयाव
सेत् तथैव च गुरोर्गेहे द्विजो नि
ष्ठामवाप्नुयात् गुरोरभावे तत्पु
त्रे तद्वदेव निषेवयेत् । एवं
जयति मतं स द्विजः शालंकटं
कट उपावृत्तस्ततस्तस्मात् गृहस्था
श्रमकाम्यया असमानर्षिकुलां कन्या
मुद्वहेत निजाचर स्वकर्मा धनं
लब्ध्वा पितृदेवातिथीनपि सम्यक्सं
प्रीणयेच्छक्त्या सदाचाररतो द्विजः
गार्हस्थ्यं ब्रह्मचर्यं च वानप्रस्थं त्र
य आश्रमाः क्षत्रियस्यापि गदिता
य आचारा द्विजस्य हि वैखानसत्वं
गार्हस्थ्यमाश्रमद्वितयं विशः।
गार्हस्थ्यमुत्तमं त्वेकं शूद्रस्य त्वा
दाचर स्थानि वर्णाश्रमोक्तानि ध
र्माणीह न हापयेत् यो हापयति
तस्यासौ परिकुप्यति भास्करः
इति वामनपुराणे ४ अध्यायः
पुनश्च । श्रीउर्वउवाच ब्राह्म
णक्षत्रियविशां शूद्राणां च यथा
क्रमं त्वमेकाग्रमना भूत्वा शृणु ध
र्मानुपादितान् दानं देयायजेद्दे
वान् यज्ञैः स्वाध्यायतत्परः ॥
नित्योदकी भवेद्विप्रः कुर्याच्चाग्नि

परिग्रहं धर्मार्थं याजयेच्चाप्यत्
यान्याध्यापयेत्तथा कुर्यात्प्रतिग्र
हादानं गुर्वर्थं न्याय्यतो द्विजः
गुर्वर्थासक्तः सर्वोपायोपार्जि
तोऽर्थो यस्य तस्मात् इति तद्धी
का सर्वलोकहितं कुर्यान्नाहितं
कस्यचिद्द्विजः मैत्री समस्तसत्वे
षु ब्राह्मणस्योत्तमं धनं ग्रावे
रत्ने च पारक्ये समबुद्धिर्भवेत्
द्विजः ऋतावभिगमः पत्न्यां शस्यते
चास्य पार्थिव १ दानानि दद्याद्
च्छातो द्विजेभ्यः क्षत्रियोपि द्विय
जेच्च विविधैर्यज्ञैरधीयीत च पा
र्थिव शस्त्राजीवो महीरक्षा प्रव
रा तस्य जीविका तस्यापि प्रथमे
कल्पे पृथिवीपरिपालनं धरित्री
पालनेनैव कृतकृत्या नराधिपः
भवन्ति नृपते रंशा यतो यज्ञादि
कर्मणां दुष्टानां शासनाद्राजा शि
ष्टानां परिपालनात् । प्राप्नोत्य
भिमताल्लोकान् वर्णसंस्कारको
नृपः २ पाशुपाल्यं वाणिज्यं च
कृषिं च मनुजेश्वर वैश्याय जीवि
कां ब्रह्मा ददौ लोकपितामहः॥
तस्याप्यध्ययनं यज्ञो दानधर्मश्च
शस्यते नित्य नैमित्तिकादीना
मनुष्ठानं च कर्मणां ३ द्विजाति

संश्रयं कर्म तादर्थ्यं तेन पोषणं
क्रयविक्रयजैर्वापि धनैः कारु
द्भवेन वा दानं च दद्याच्छूद्रोपि
पाकयज्ञैर्यजेदपि पित्र्यादिकं च
सर्वं वै शूद्रः कुर्वीत तेन च ४
तस्यादिभिरणार्थाय सर्वेषां च प
रिग्रहः ऋतुकालाभिगमनं स्वदा
रेषु महीपते दया समस्तभूतेषु
तितिक्षा नाभिमानिता । सत्यं
शौचमनायासो मंगलं प्रियवादि
ता मैत्र्यस्पृहा तथा तद्वदकार्पण्यं ।
एवं नरेश्वर अनसूया च सामान्या
वर्णानां कथिता गुणा आश्रमा
णां च सर्वेषामेते सामान्यलक्षणाः
गुणास्तथा पद्धर्मांश्च विप्रादीनां
मिमाञ्छृणु क्षात्रं कर्म द्विजस्यो
क्तं वैश्यकर्म तथापदि राजन्य
स्य च वैश्योक्तं शौद्रं कर्म न चैतयोः
सामर्थ्ये सति तत्त्यागमुभाभ्याम
पि पार्थिव तदेवापदि कर्तव्यं
न कुर्यात्कर्मसंकरं ॥ इत्ये
ते कथिता राजन्वर्णकर्मा मया तव
धर्मानाश्रमिणां सम्यग्ब्रुवतो ये नि
शामय श्रीऊर्वउवाच ॥ बालः
कृतोपनयनो वेदाहरणतत्परः
गुरुगेहे वसेद्भूप ब्रह्मचारी समा
हितः शौचाचाररता तत्र का

मुक्रमयणां गुरो व्रतानि चरता
ग्राह्या वेदाश्च कृतबुद्धिना उभेस
न्ध्ये रविं भूप तथैवाग्निं समाहि
तः उपतिष्ठेत्तथा कुर्याद्गुरोरप्यभि
भिवादनं स्थिते तिष्ठेद्व्रजे याति
नीचैरासीत चासति शिष्यो गु
रो त्पश्चेष्ट प्रतिकूलं न संभ
जेत तेनैवोक्तः पठेद्वेदं नान्य।
चित्तः पुरस्थितः अनुज्ञातेच भि
क्षान्न मश्नीयाद्गुरुणा ततः अव
गाहेदपः पूर्वमाचार्य्येणावगाहि
ताः समिज्जलादिकं चास्य कल्यं
कल्य मुपानयेत गृहीतग्राह्यवेद
स्य ततोऽनुज्ञामवाप्यवै ॥ गार्ह
स्थ्यमावसेत्प्राज्ञो निष्पन्नगुरु नि
ष्कृतिः १ विधिनावाप्तदारस्तु धन
प्राप्य स्वकर्मणा गृहस्थकार्यमखि
लं कुर्यान्नृपाल शक्तितः निर्वापे
णापितॄनर्च्चयेत्तैर्देवांस्तथाति
थीन् अन्नैर्मुनींश्च स्वाध्यायैरप
त्येन प्रजापतिं बलिकर्मणाभू
तानि वात्सल्येनाखिलं जगत् प्राप्नो
ति लोकान्पुरुषो निजकर्मसम
र्जितान् भिक्षाभुजश्च ये केचित्
परिव्राड् ब्रह्मचारिणः तेप्यत्रैव
प्रतिष्ठन्ते गार्हस्थ्यं तेन वै परं
वेदाहरणकार्येण तीर्थस्नानाय
च

प्रभो अटंति वसुधां विप्राः पृथि
वीदर्शनाय च अनिकेता ह्यनाहा
रा यत्र सायं गृहास्तु ये तेषां
गृहस्थः सर्वेषां प्रतिष्ठा योनिरेव च
तेषां स्वागतदानादि वक्तव्यं मधु
रं वचः गृहागतानां दद्याच्च शय
नासन भोजनं । अतिथिर्यस्य
भग्नाशो गृहात्प्रतिनिवर्तते ।
स दत्वा दुष्कृतं तस्मै पुण्यमादाय
गच्छति अवज्ञानमहंकारो दंभ
श्चैव गृहे सतः परितापोपघा
तौ च पारुष्यं च न शस्यते यस्तु
सम्यक्करोत्येवं गृहस्थः परमं
विधिं सर्वबंधविनिर्मुक्तो लोका
नाप्नोत्यनुत्तमान् वयः परिणा
तौ राजन्कृतकृत्यो गृहाश्रमी पुत्रे
षु भार्यां निक्षिप्य वनं गच्छेत्सहै
व वा १२ पर्णमूलफलाहारः केश
श्मश्रुजटाधरः भूमिशायी भवे
त्तत्र मुनिः सर्वातिथिर्नृप चर्मका
शकुशैः कुर्यात्परिधानोत्तरीयके
तद्वत्त्रिषवणं स्नानं शस्तमस्य नरे
श्वर देवताभ्यर्चनं होमः सर्वाभ्या
गताभ्यर्चनं भिक्षा बलिप्रदानं च श
स्तमस्य नरेश्वर वन्यस्नेहेन गात्रा
णामभ्यंगश्चास्य शस्यते तपस
श्च राजेंद्र शीतोष्णादि सहि

4307

ष्णुता यस्त्वेतां नियतश्चर्य्यां वान
प्रस्थश्चरेन्मुनिः स दहत्यग्निवद्दो
षान् जयेल्लोकांश्च शाश्वतान् ३
चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो
मनीषिभिः तस्य स्वरूपं गदतो
मम श्रोतुं त्वमर्हसि पुत्रद्रव्यक
लत्रेषु त्यक्तस्नेहो नराधिप ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतम
त्सरः त्रैवर्णिकांस्त्यजेत्सर्वानारं
भानवनीपते मित्रादिषु समो मै
त्रः समस्तेष्वेव जंतुषु जराजुजा
ण्डजादीनां वाङ्मनः कर्मभिः क्वचित
युक्तः कुर्वीत न द्रोहं सर्वसंगांश्च व
र्जयेत् एकरात्रस्थिति ग्रामे पंच
रात्रस्थितिः पुरे तथा तिष्ठेद्य
था प्रीति र्द्वेषो वा नास्य जायते
प्राणयात्रानिमित्तं च व्यंगारे भुक्त
वज्जने काले प्रशस्तवर्णानां भि
क्षार्थं पर्यटेद्गृहान् ॥ कामः
क्रोधस्तथा दर्पो मोहलोभादय
श्च ये तांस्तु दोषान्परित्यज्य परि
व्राट् परिग्रहे निर्ममो भवेत् अभ
यं सर्वसत्त्वेभ्यो दत्वा यश्चरते मुनिः
तस्य सर्वभूतेभ्यो भयमुत्पद्यते ।
कृत्वाग्निहोत्रं स्वशरीरसं
स्थं शारीरमग्निं च मुखे जुहोति
विप्रस्तु भैक्षोपगतैर्हविर्भिश्चिता

ग्निनां स व्रजतिस्म लोकान् चि
ताग्निनां अग्निचिता मिलर्षः वि
ताग्निना इति वा पाठः इति तद्टी
का मोक्षाश्रमं यश्चरते यथोक्तं शु
चिः सुसंकल्पित बुद्धियुक्तः अनि
न्धनं ज्योति रिव प्रशांतं स ब्रह्मलो
कं श्रयति द्विजातिः ४ इति विष्णुपु
राणे ३ अंशे ८ ९ अध्यायौ ॥
प्रकारान्तरेण तेषामुत्पत्ति
र्यथा तमस्तेनाभ्यपद्यत्पद्मस
म्भवस्यभुवा तस्मात्स्वयाम्भसंभव
द्रुह्मा वेदमयो विधिः प्रजाविस
र्गं विविधं मानसो मनसाऽसृजत
असृजद्ब्राह्मणानेव एवं ब्रह्माप्र
जापति याम्यतेजोभिनिर्दिष्टान्भा
स्कराग्नि समप्रभान् ततः सत्यं च
धर्मं च तपो ब्रह्म च पश्चते ॥ आ
चारं चैव शौचं च स्वर्गाय विदधे विभुः
देव दानव गंधर्वा दैत्यासुर महो
रगाः यक्ष राक्षस नागाश्च पिशा
चा मनुजास्तथा ब्राह्मणाः क्षत्रि
या वैश्याः शूद्राश्च द्विपसत्तम ।
पेचाना भूतसङ्घानां वर्णांस्तांश्च
विनिर्मसे ब्राह्मणानां सितो वर्णः
क्षत्रियाणां च लोहितः । वैश्यस्य
पीतको वर्णः शूद्राणामसितस्त
था मांसास्थाला च चातुर्वर्ण्यस्य वर्णेन

यदि वर्णो विभज्यते सर्वेषांख
ल्ववर्णानां दृश्यते वर्णसंकरः
कामः क्रोधो भयं लोभः शोकश्चिंता
क्षुधा श्रमः सर्वेषां न प्रभवति
कर्माद्वर्णो विभज्यते स्वेदमूत्र
पुरीषाणि श्लेष्मापित्तं सशोणितं
तनुः क्षरति सर्वेषां कर्माद्वर्णो
विभज्यते जंगमानामसंख्येयाः
स्थावराणां च जातयः तेषां विवि
धवर्णानां कुतो वर्णविनिश्चयः
नारदउवाच नविशेषोस्ति वर्णानां
सर्वंब्रह्ममयंजगत् ब्रह्मणापूर्व
सृष्टंहि कर्मभिर्वर्णतांगतं का
मभोगप्रिया स्तीक्ष्णाः क्रोधनाः
प्रियसाहसाः त्यक्तस्वधर्मा रक्ता
ङ्गास्ते द्विजाः क्षत्रतां गताः गो
भ्यो वृत्तिं समास्थाय पीताः कृष्य
नुजीविनः स्वधर्मान्नानुतिष्ठंति
ते द्विजा वैश्यतां गताः हिंसानृ
तप्रिया लुब्धाः सर्वकर्मोपजीवि
नः कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः
शूद्रतां गताः ~~इत्येतैः कर्मभिर्व्य~~
~~स्ता द्विजा वर्णान्तरं गताः~~ इत्येतैः
कर्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः
इत्येते चतुरो वर्णा येषां ब्राह्मी
सरस्वती विहिता ब्रह्मणापूर्वंलो
भादज्ञानतां गताः ब्राह्मणा धर्म
तंत्रस्थास्तत्र तेषां न नश्यति ॥

ब्रह्मधारयतां नित्यं व्रतानि नि
यमांस्तथा ब्रह्मचैव परं सृष्टं येन
जानंति नद्विजाः ऋषिभिः स्तेन
तपसा सृज्यंते चापरे परैः आ
दिदेवसमुद्भूता ब्रह्ममूलाक्षयाः अ
याः सास्मृतिः मानसी नाम धर्म
तंत्रपरायणाः ॥ भारद्वाजउवाच
ब्राह्मणः केन भवति क्षत्रियो वा
द्विजोत्तम वैश्यः शूद्रश्च देवर्षे
तद्ब्रूहि वदतां वर नारदउवाच
जातकर्मादिभिर्यस्तु संस्कारैः सं
स्कृतः शुचिः वेदाध्ययनसंपन्नः
षट्सु कर्मस्ववस्थितः शौचाचार स्थितं विघसा[illegible]
[illegible] नित्यव्रती सत्यपरः सवै ब्राह्मण
उच्यते सत्यं दानमथोद्रोह आनृ
शंस्यं त्रपा घृणा तपश्च दृश्यते यत्र
स ब्राह्मण इति स्मृतः क्षत्रजं सेव
ते कर्म वेदाध्ययनसंयुतः दाना
दानरतिर्यस्तु स वै क्षत्रिय उच्यते
विशत्याशु पशुभ्यश्च कृष्यादानर
तिः शुचिः वेदाध्ययनसंपन्नः स
वैश्य इति संज्ञितः ॥ सर्वभक्ष
रतिर्नित्यं सर्वकर्मकरोऽशुचिः
त्यक्तवेद स्त्वनाचारः सवै शूद्र इ
ति स्मृतः शूद्रे चैव भवेल्लक्ष्म
द्विजे तच्च न विद्यते नवै शूद्रो ।
भवेच्छूद्रो ॥ ॥

ब्राह्मणो न च ब्राह्मणः मांधातो
वाच के धर्माः सर्ववर्णानां चातु
र्वर्ण्यस्य के पृथक् चातुर्वर्ण्या
श्रमाणां च राजधर्माश्च के मताः
नारदउवाच अक्रोधः सत्यवचनं
संविभागः क्षमा तथा प्रजनः स्वे
षु दारेषु शौचमद्रोह एव च ।
आर्जवं भृत्यभरणं नवैते सार्ववर्णि
काः ब्राह्मणस्य तु यो धर्मस्तं ते व
क्ष्यामि केवलं दममेव महाराज
धर्ममाहुः पुरातनं स्वाध्यायाभ्या
सनं चैव तत्र कर्म समाप्यते तं
चेद्वित्त मुपागच्छेद्वर्तमानं स्वकर्म
णि अकुर्वाणं विकर्माणि शांतं
प्रज्ञानतर्पितं कुर्वीतापत्य संतान
मथो दद्याद्यजेत च संविभज्यापि भो
क्तव्यं धनं सद्भिरितीष्यते ॥
परिनिष्ठितकार्यस्तु स्वाध्यायेनै
व ब्राह्मणः कुर्यादन्यन्नवा कुर्या
न्मैत्रो ब्राह्मण उच्यते ॥ क्षत्रिय।
स्यापि यो धर्मस्तं ते वक्ष्यामि पा
र्थिव दद्याद्राजा न याचेत यजे
त नच याजयेत् नाध्यापयेदधी
यीत प्रजाश्च परिपालयेत् नि
त्योद्युक्तो दस्युवधे रणे कुर्यात्परा
क्रमं ये तु क्रतुभिरीजानाः श्रु
तवंतश्च पार्थिवाः येनु युद्धे ।

विजेतारस्ते ते लोकजितोत्तमाः
अविक्षतेन शरीरेण संग्रामाद्यो निव
र्तते क्षत्रियस्तत्र तत्कर्मनोभय
च पशस्यते ॥ क्षत्रियाणाम
यं धर्मो विर्णीतो मुनिभिः परः
नास्य कृत्यतमं किंचिद्विद्यते दस्यु
निनिग्रहात् दानमध्ययनं यज्ञो
राज्ञां क्षेमोऽभिधीयते तस्माद्राज्ञा
महाराज योद्धव्यं धर्मशीलि
ना ॥ प्रजाः स्वेषु च धर्मेषु स्था
पयेन्महीपतिः धर्माणि वदिको
मणि कारयेत्सततं प्रजाः ॥ प
रमां सिद्धिमाप्नोति नृपतिः प
रिपालनात् कुर्यादन्यन्नवा कुर्या
न्मैत्रो राजन्य उच्यते ॥ वै
श्यस्य च प्रवक्ष्यामि यो धर्मो वेद
संमतः दानमध्ययनं शौचं यज्ञ
श्च धनसंचयः पालयेच्च पशून्
वैश्यः पितृवद्धर्ममन्वयन् विकर्म
तद्भवेदन्यत्कर्म यत्स समाचरेत्
रक्षया स हि तेषां वै महत्सुख
मवाप्नुयात् प्रजापतिर्हि वैश्या
य सृष्ट्वा परिददे प्रजाः ब्राह्मणा
य च राज्ञे च सर्वाः परिददे प्रजाः
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजी
वनं षण्णामेकां पिबेद्धेनुं शताच्च
मिथुनं भवेत् । लब्धाच्च स

प्रमं भागं तथा स्पेगेकलत्तरे ॥ शास्नानांसर्वबीजानि पथा सांवत्स री भूतिः नच वैश्यस्य कामःस्या न्नरक्षेयं पशूनिति ॥ वैश्यप वृत्तति नाम्नेव वृत्तिलब्धाः कथंच न शूद्रस्यापिहि यो धर्म स्तेनैव स्वामि भूपते । प्रजा पति र्हि वर्णानां दासं शूद्र मकल्पयत् त स्माच्छूद्रस्य वर्णानां परिचर्या वि धीयते तेषां शुश्रूषणेनैव महत् स्सुखमवाप्नुयात् शूद्र पतान्परि चरेत्त्रीन् वर्णाननुपूर्वशः संचया श्चनकुर्वीतजातशूद्रः कथंचन पा पीयान्हिधनं लब्ध्वा वशेकुर्यान्नु रीयसः राज्ञा वा समनुज्ञातःकामं कुर्वीतधार्मिकः तस्य वृत्तिप्रवक्ष्या मियच्च तस्योपजीवनं अवश्यंभर णीयोहि वर्णानांशूद्र उच्यते ध च्छत्रं वेष्टन मौशीर मुपानद्व्यज नानिच यातयामानिदेयानि शू द्रायपरिचारिणे अधार्याणिविशी र्णानि वसनानि द्विजातिभिः शूद्रा येवप्रदेयानि तस्य धर्मधनं हितत् यश्च कश्चिद्द्विजातीनां शूद्रःशुश्रू षु राव्रजेत् कल्पन्तेऽस्य त तेनाऽ हुर्नि धर्मविदो जनाः देयः पि ण्डोऽनपत्याय भर्त्तव्यौ वृद्ध दुर्व लौ शूद्रेण च महानतो भर्त्ताकु

स्यांचिदापदि यतिकेण भर्त्तव्यो भर्त्ता द्रव्यपरिक्षये नहि स्वमस्ति शूद्रस्य भर्तृहार्यधनो हिसः ॥ उक्तस्त्रयाणांवर्णानां यज्ञ स्तस्य चपार्थिव स्वाहाकार वषट्कारौ मंत्रः शूद्रेण विद्यते तस्माच्छूद्रः पाकयज्ञैर्यजेत नच स्वयं । पूर्णपात्रमयी माहुः पाकयज्ञ स्यदक्षिणां श्रीनारदउवाच इदानी माश्रमाणांच धर्मं वक्ष्यामि भूमिप ब्रह्मचर्याश्रमं तावत्पूर्ण सर्वाधिवासन गत्वा गुरुगृहंशि ष्यो नमस्कृत्य गुरुं शुचिः श्रुषा दश्येत मायातः शिष्योऽहं तव मारिष ततस्तस्याज्ञया नित्यमधी तवंनराधिप । सदाचारःशा स्त्रस्य गुरुपादाभिवादने । त दाज्ञापालनंचापि ध्याने देवत भावना लाभेन येन केनापितु ष्टिः सद्भिःसमागमः । समाप विद्या गुरवे दक्षिणा प्रतिपाद्य च गृहाश्रमं ततो गच्छेद्गुरो रा ज्ञा मधिव्रजन् उद्वहेत्कुलजां कन्यां सुशीलां धर्मचारिणीं ॥ अनहं वादिनी सौम्यां सचरि त्रां प्रियस्वदां गृहिणीं प्रथमे

४३१

धर्मोऽतिथिपूजैव पार्थिव ॥ अ प्राप्य पूजा मतिथि र्यस्य गेहान्नि वर्त्तते सयाति नरकं घोरं प्राणे तस्मै प्रदाय च प्रथमं स्वागतं पृच्छेदासनंचापि संदिशेत् । पा द्यंच मधुपर्कंच दद्यात्प्रणतिपूर्व कं संवादंच प्रियालापं कुर्यात्तेन सहाततः भोजनंच यथाशक्ति कारयेदतिथिं नृप देवाश्चापितरे श्चापि प्रीयंते ऽतिथिपूजने । आतिथ्यसदृशंकर्म गृहस्थानां न विद्यते यस्य नित्यं स्थिति र्ना। स्तिसोऽतिथिः परिकीर्त्तितः सर्वा श्रमाणामधिको गृहाश्रम उदाहृ तः यस्मात्तस्मिन्समायांति भिक्षार्थ माश्रमा स्त्रयः पितृदेवार्चनं का र्यं गृहिणाक्ष्यविभूतो ॥ वनप्र स्थाश्रमे वसेत् तृतीयं जगतीपते वाणप्रस्थाश्रमं गच्छेत्कृतकृत्यो। गृहाश्रमात् तदारण्यकशास्त्राणि यमधीत्य सधर्मवित् उर्द्धरेताःप्र व्रजित्वा गच्छत्तत्तरसात्मतो ॥ सुते भार्यांपरिणाप्य वने गच्छे त्सहैववा शांतः स्पृहांतरात्माव सर्वभूतहितेरतः ॥ चरितब्रह्मच र्यस्य ब्राह्मणस्य विशाम्पते कर्त्त व्यानीह राजेंद्र कथ्यंते मुनिपुंग

वैः भैक्ष्यचर्यास्वधीकारः प्रशस्त इह मोक्षिणः यत्रास्तमितशायी स्यान्निरग्नि रनिकेतनः यथोपल ब्धजीवीस्यान्मुनि र्दान्तो जितेंद्रि यः निराशीःस्यात्सर्वसमो निर्योगो निर्विकारवान् विवेकी धनपुत्रा दौविलृप्तः करुणःसदा संसारं स्वप्नवदीक्ष्य शांतः संवसमानसः पत्रमूलफलाहारी जलाशी वायु भोजनः निराहारोऽथवा शुद्धो हृन्निष्ठः तप आचरेत् एवंकुर्व न्महाभाग ब्राह्मणः सिद्धिमाप्नु यात् चतुर्थं नाश्रमं वसेत्तु क्तिसोपान मेवहि गुरोः प्रतोष मासाद्य भिक्षुः संन्यासधर्मवित् विचरेत्सकलां पृथ्वीं लब्धाशी शांत उत्सुकः योगाभ्यासरतोनि त्यं धर्मसंचयतत्परः ॥ धर्माधर्म विहीनो वा भिक्षुकः सिद्धिमाप्नु यात् इति पाद्मे स्वर्गखंडे २५ २६ २७ अध्यायाः ॥ अस्यत्वार सिद्धपुराणे ५९ अध्याये मार्कंडे यपुराणे मदालसोपाख्याने कूर्म पुराणे २ ३ अध्याये च द्रष्टव्यं वर्णः पुं गजचित्रकम्बलः झारि रकुल् इति भाषा तत्पर्यायः प्रवेणी २ आस्तरणं ३ परिस्तारः

४ ऊष्मः ५ ऊष्मा ६ इत्यमरः
प्रवेणिः ७ परिष्टोमः ८ ऊर्णं ९
इति भरतः प्रुक्कादिः । रंग
इतिख्यातः सच बहुविधो यथा
श्वेतः १ पाण्डुः २ धूसरः ३ कृष्णः
४ पीतः ५ हरितः ६ रक्तः ७ शोण
णः ८ अरुणः ९ पाटलः १० श्यावः
११ धूम्रः १२ पिंगलः १३ कर्बुरः १४
इति चामरः गर्भस्थबालकस्य
षष्ठे मासि वर्णो भवति इति
सुखबोधः यशः गुणः स्तुतिः
इति मेदिनी स्वर्णं व्रतं ॥
रूपं अक्षरं भेदः गीतक्रमः
चित्रं तालविशेषः ॥
अंगरागः इति हेमचंद्रः ॥
वर्णाः पुं स्त्री भेदः रूपं अ
क्षरं विलेपने इति मेदिनी ॥
वर्णश्च द्विविधः ध्वन्यात्मकोऽ
क्षरात्मकश्च अस्योत्पत्तिप्रकारं
यथा अवेषयानुरव प्रोक्तमा
णस्याविषदात्तरं । अव्यक्तं
प्रलपति यदा सा कुंडलीतदा
मूलाधारे विशति हसन्ती
वेष्टते मरुः इति प्रपंचसारः
अस्यार्थः भुजंगीरूपमास्थायावे
यथा अनेकजन्माहितो यदासा
कुंडली अविशदात्तरं अविष्पष्ट

अक्षरं यथा व्यक्ते ध्वनौ तं प्रलप
ति अर्थात्कलभाषणादिकं करो
ति तदा मूलाधारे विशतीति श
ब्दायते सभत्राच मरुर्वेष्टते इति
तट्टीका ॥ अस्य कुंडलीस्वरू
पत्वं यथा कुंडलीभूतसर्पाणा
मंगश्रिय मुपेयुषी त्रिधामजन
नीदेवी शब्दब्रह्मस्वरूपिणी द्विच
त्वारिंशद्वर्णात्मा पंचाशद्वर्णरूपि
णी गुणिता सर्वगात्रेण कुंडली
परदेवता विश्वात्मना प्रबुद्धा सा
तेजोमयं जगत् एकधा गुणिता
शक्तिः सर्वविश्वप्रवर्त्तिनी त्रिपुरु
रत्वाग देवी ब्रह्मादीनां त्रयं वपुः
इति सारदातिलके अस्यार्थः ।
त्रिधामेति चंद्रसूर्याग्निरूपा द्विच
त्वारिंशदिति भूतलिपि मंत्रमयी
पंचाशदिति मातृकामयीत्यर्थः ।
सर्वगात्रेण सर्ववर्णेन गुणिता पर
स्पर मिलिता सती मंत्रमयं जगत्स
ते प्रकाशयति इत्यर्थः । मूलाधा
रे सर्पवत्कुंडलीभूता नाडीवर्त्तते त
स्मादस्याभिधानमिदं कुंडली ।
सर्वविश्वस्य प्रभवोपादानत्वाद्रू
पोभयप्रतिपादिकेति सूचितं
त्रिपुष्कर मिति त्रयं मध्यम
कनिष्ठतोत्तम तीर्थत्रयं स्वरानिति

उदात्तानुदात्त समाहारान् इति
तट्टीका अपिच द्विचत्वारिंशा ।
तान्मूलं गुणिता विश्वनायिका सा
प्रसूते कुंडलिनी शब्दब्रह्ममयीवि
भुः शक्तिं ततो ध्वनि स्तस्मान्नादस्त
स्मान्निबोधिका ततोऽर्द्धेन्दु स्ततो
विंदु स्तस्मात्परा ततः इति
सारदाया माचार्य्याः मूले मूला
धारे द्विचत्वारिंशता गुणिता वि
श्वनायिका कुंडलिनी अनेन क्रमे
ण अकारादि सकारांतां द्विचत्वा
रिंशदात्मिकां भूतलिपि मंत्रात्मि
कां वर्णमालिकां सूते इत्यन्वयः
क्रम माह शक्ति मिति सा कुंडलि
नीशक्तिं सूते ततः शक्ते ध्वनिरा
सीदिति योजना ततो ध्वने रि
त्यादि ज्ञेयं अयंच क्रमः सर्वा
त्मकोऽत्रज्ञेयः तत्र सत्व प्र
विष्टा चिच्छक्तिशब्दवाच्या पुनराका
शक्त्या सैव सत्त्वप्रविष्टा रजोनुवि
द्धा सती ध्वनिशब्दवाच्या अक्षराव
स्थासेव तमोऽनुविद्धा नादशब्दवा
च्याऽव्यक्तावस्था सैव तमःप्राचुर्यो
न्निबोधिकाशब्दवाच्या सैव तदुभ
यप्राचुर्यादर्द्धेन्दुशब्दवाच्या उक्ताव
पदार्थादर्शी इच्छाशक्तिबलाह्
शो ज्ञानशक्तिप्रदीपकः चंद्ररूपि

णीच सा शक्तिः क्रियाख्याऽह
न्नतिप्रभुः अस्यामेव विंदुःस्थानं
तद्गतः पराख्या भवति पश्यं
तीमध्यमा वाची वैखरी शब्द
जन्मभुः तत्र परा मूले पश्यंती स्वा
धिष्ठाने मध्यमा हृदये वैखरीमु
खे तदुक्तं पदार्थादर्शी मूलाकु
ण्डलिनी मध्येऽग्याति मंत्रास्वरू
पिणी अशोकविषया तस्मादूर्द्ध
कण्ठगामिनी स्वयं प्रकाशाप
श्यंती सुषुम्नामाश्रिता भवेत् से
व हृत्पंकजे प्राप्य मध्यमानादरूपि
णी ततः संजल्पमाना स्यादविभ
क्तोर्द्ध्व गामिनी सैवोरःकंठ ता
ल्वस्था शिरो घ्राण दंतस्थिता जि
ह्वामूलौष्ठनिष्यूत सर्ववर्णपरिग्र
हा शब्दप्रपंचजननी श्रोत्रग्राह्या
तु वैखरी इच्छाज्ञानक्रियात्मासौ
तेजोरूपा गुणात्मिका क्रमेणा
नेन सृजति कुंडली वर्णमालि
कां अकारादिसकारान्तां द्विचत्वा
रिंशद्वात्मिकां पंचाशद्वारगुणि
तां पंचाशद्वर्णमालिकां सूते त
द्वर्णितो भिन्नाःकला रुद्रादिकान्
क्रमात् इति तट्टीका अष्टौस्थाना
नि वर्णानां उरः कंठः शिरस्तथा
जिह्वामूलंच दंतश्च नासिकोष्ठौ च
तालुका इति शिक्षासूत्रं किंचा

पथा भवंति देहांत रमीपंचा
शदत्तरा भेदा येन प्रकारेणात
थावत्सामि नत्वतः समीरितास्स
मीरणा सहस्रारंध्रनिर्गताः व्य
क्तिंप्रयाति वदने कंठादिस्थानय
हिताः तन्द्रेरुन्मार्गणो वायुरुदा
त्तं उच्यते स्वरं नीचैर्गतोऽनुदात्त
च स्वरितं तिर्यगागतः अईकहि
त्रिसंख्याभि र्मात्राभि र्लिपयःक्र
मात् सव्यंजन ह्रस्व दीर्घप्लुत
संज्ञा भवंतिताः अकारेकारयोर्यो
गादेकारो वर्ण इष्यते तस्यैवा
कारयोगेन स्यादैकारात्तरं तथा
उकारयोगात्तस्यैव स्यादोकारा
ख्यः स्वरः तस्यैवोकारयोगेन।
स्यादौकाराख्यः स्वरः संध्यक्ष
राःस्युश्चत्वारो संज्ञा सवर्णश्च सा
ख्याः ऌवर्ण र्वर्णयो र्व्यक्तिर्नवै
सम्यक् प्रदर्शिते विंदु सर्गान्त
मों व्यक्तिं मनसा रञ्जया वदेत्।
कंठात् निःसरन्सर्गःप्राप्योऽष्ठा
त्सकतःपरः नपरः सर्गप्रवेशा
त्सोऽन्यासः प्राणकस्तरः सर्गा
प्रेषितः कंठे वायुना कादिभीर
येत् वर्गस्पर्शान् माञ्जेणा कंस्वर
स्पर्शात्ताव लोक गभीरं संस्प
र्शात्तावो उंच बहिर्गतं विसर्ग
स्तात्ततः

सोष्मा शो चवर्गेच यं तथा।
ऋटु रेफ सकारंच मूर्द्धगो दंतग
स्तथा लृ तवर्ग लसान्नोष्ठानुप
प्रध्मान संज्ञकान् दंतोष्ठाभ्यां व
च ततस्थानगोऽर्णान्समीरयेत्
इति प्रपंचसारे २ पटलः ॥
सर्गो विसर्ग एव तस्यैरो विक्र
तः सोष्मासः सकाररूपः उष्मा
सोऽस्तःप्रवेशशाली वायुःस्यादि
त्यन्वयः एवंप्राणाको वहिर्निर्गम
नशाली वायुरहःस्यात्सएव उष्मा
सः सोष्मासः प्राणाख्यासोऽकोवायुश्चे
ति प्राणाकः इति तट्टीका अवर्ण
कवर्गह विसर्जनीयाः कंठ्याः १
इवर्णाचवर्ग यशास्तालव्याः २ ऋ
वर्णाटवर्ग रषा मूर्द्धन्याः ३ लृवर्ण
तवर्गलसा दंत्याः ४ उवर्ण पवर्ग
पध्मानीया ओष्ठ्याः ५ वोदंत्योष्ठ्याः
६ एपे कंठ्य तालव्यौ ७ ओ औ
कंठौष्ठौ ८ इति शिक्षासंग्रह ॥
अपिच यदुक्तं सर्वतंत्रेषु वर्णो
च्चार विधिं शिवे तव स्नेहान्महे
शानि तदद्य कथयामिते पंचा
शन्मातृका वर्णोच्चारणो गुरुतोऽ
भ्यसेत् अऋचुटुतपयशप्रशेव
र्गाः प्रकीर्तिताः अऋहाः कंठतो
ज्ञेया १ स्तात्त अशुयशाः स्मृताः

२ ऋटुरसास्तु मूर्द्धन्याः ३ दंताः
लृतलसा मताः ४ उपर ओष्ठसं
भूताः ५ स्थानानि कथितानि ते
विशेषं कथयाम्यद्य प्रोच्चार्याः क
एठतःस्वराः । ऋहयं जिह्वयास्
ष्टौ ए हयं जिह्व दंतजं मूलस्थाना
हलोवाच्याःऌकारःकाएठतालजः।
व्यंजनद्वयसंयोगे भवेत् पूर्व स्वरोग
रुः पदांतादिम वर्णस्य संयोगेप्र
कृति र्ह्रयोः अपदांतादि संयोगे
योरत्र तथेष्यते । द्योः
प्रकृतिस्तु तिरोभूय स्वरवत्प्रकृतिता
व्रजेत् श्रियावीजेशकारस्यच्छप्रक
तिःपरमेश्वरि छप्रकृतिश्च शादि
भागो तथादिस्येतुच प्रकृति सहस्र
इत्याद्यौ नम स्तस्मै आस्या इत्या
दौच रेफादिके तदन्ते वा हकारे
समवाच्यता वर्द्धः रूद इत्यादौ
किंत वैजात्य माश्रित्य स्फुटेनात्रा
स वाच्यता वृत्तयथधनि मामोति
यादिश्य परमेश्वरि वाद्य इत्या
दौ पुवतथ ध्वनि याति वादिश्य
तविशेषतः आकान मित्यादौ
लादिश्येप्यथ नादिश्य वैजात्येस्व
स वाच्यता मन्दार अकाय ३
त्यादौ मादिश्य भेव मस्यापिना
सिकामूलवाच्यता उऊ. ए न मा

विंदु र्नासिकामूलजाः स्मृताः य
कारं श्च तृतीयत्वे पदादौ सर्वदा
व्रजेत् केयूरादावपि तथा अत्र
नुकंठमाञ्जगः नादिस्य यासयोश्च
त्वे स्वरयोगो तवर्गके प्रश्नःस्या
न इत्यादौ वर्णान्तरेषु इ क्ष्यया
वेक्ष्णिकादिवाच्यतो वैजात्यम
पितेज्ञात्मि गुरो रेव समभ्यसेत्
आदिरेस्तु संयोक्ताः इष्ट शापा
व्रजेद्धतो एवं ज्ञात्वा महेशानि
पठेल्स्तोत्रं जपेन्मन्त्रं कवचंचम
हेशानि नाम्यथा फलमाप्नुयात्
इति प्रपंचसारे ३ पटलः अपि
च ह्रस्वाःस्वरेषु पूर्वोक्ताः परोदीर्घाः
क्रमादिमे शिवशक्तिमयो स्तेस्य
विन्दु सर्गावसानकाः विन्दुःप्र
मात्रविः प्रोक्तः सर्गः शक्तिर्निशा
करः स्वराणां मध्यगं यत्तद्व
तुष्कं नपुंसकं विना स्वरैस्तुनान्ये
षां जायते व्यक्तिं रंजसा शिव
शक्तिमयान्याद्ध तस्माद्वर्णात्म
नीश्वराः कारणात्मकभूतानां मु
इता मातृका यतः ततोस्तकाव भूता
र्णाः पंच पंच विभागतः वाय्वग्नि
भूजलाकाशाः पंचाशल्लिपयः
क्रमात् पंचह्रस्वाःपंचदीर्घा वि
न्दंताः संधि संभवाः पंचशःका

रयः य त न महांताः समीरिताः
इति सारदा ग्रन्थरत्नटिकारणीय
या षाण्मासिकेपि समये भ्रांतिः
संजायते यतः थाचास्यापि स्व
ष्टानि यत्नात्रूपाम्यतः ध्रुवः इति
ज्योतिस्तत्वेष्टहस्ततिः वर्णालेख
नप्रकारस्तु तन्तदृर्णे द्रष्टव्यः व
र्णानामानि यथा तंत्रसंकेतवा।
धार्य्यमाहात्म्य तंत्रशास्त्रतः वर्णना
मानि कतिविन्यसामि विदुषाम्
दे ॐकारो वर्तुलस्तारो वामस्सहं
मकारणं मंत्राद्यः प्रणवः सत्य विं
दुशक्तिस्त्रिदैवतं सर्वजीवोमाद
कश्चपंचदेवो ध्रुवस्त्रिकः सावित्री
त्रिशिखो ब्रह्म त्रिगुणो गुणजीव
कः आदिवीजवेदसारो वेदवी
जमतःपर पंचरस्मि त्रिकुटेचत्रि
भवेभवनाशनः गायत्री वीजपंचा
ग्नौमन्त्रविद्याप्रसूःप्रभुः अक्षरमा
त्वकास्तथानादिरहैत मोक्षदो॥
ॐम् अः श्रीकंठः सदेशश्च ल
लाटंचैकमात्रिकः पार्णादीरस्
छिमेधा सारस्वतः प्रियंवदः महा
ब्राह्मी वासुदेवो धनेशः केश
वोऽमृतं कीर्त्तिर्निवृत्तिवीनीशो
नरकारि हरो मरुत् ब्रह्मा वामाघ
नो रुक्षः करतः प्रणावाचकः ब
ह्मा

णी कामरूपश्च कामेशी वाशिनी
वियत् विघ्नेशः श्रीविसर्केतोम
त्रिपत्तिथि वशिनी अर्कमंडलवर्णा
घो आस्यगः कामकर्षिणी अः
आकारो विजयानंतो दीर्घच्छायोवि
नायकः क्षीरोदधिः पयोदश्च पाशोदी
र्घोस्य हृतको ॥ प्रचंडपको
रुद्रो नारायणा इभेश्वरः ।
प्रतिष्ठा मानदा कांतो विश्वांतकग
जांतकः पितामहो द्विठान्तोः भूः
क्रिया कांतिश्च संभवः द्वितीयामा
नसा काशी विघ्नराजः ऊणो वियत्
सरान्तकश्च हृदय मंगुष्ठो भगमा
लिनी आ इः सूक्ष्मा शाल्मली
विद्याचंद्रः पूषा सुगंधकः सुमित्र
सुंदरो वीरः कोटरः कादरः पयः
भुमध्या माधव तुष्टि दंतनेत्रं चना
त्रिका शांतः कांतः कामिनी च
कामा विघ्नविनायकः नेपालोभव
णी रुद्रो निया क्लिन्नाच पावकः
उः ई त्रिमूर्त्ति महामाया लोला
क्षी वामलोचनं । गोविंदः शे
खरः पुष्टिः सुभद्रा रत्नसत्तकः
विष्णुलक्ष्मीः महासञ्च वामविश्वकः
पशापवः कलोत्तरीया भेरुंडाराति
श्च पौंडवर्द्धनः शिवोत्तमः शि
वा तुष्टिश्चतुर्थी विंडमालिनी

वैसवी चैन्दवी जिह्वा कामकला
मनास्का पावकः कोटरः कीर्त्ति
र्मोहनी कालकारिका ऊचहंन्हं त
र्जनीच शांति त्रिपुरसुंदरी ॥ ईः
उः शंकरी वर्त्तु लाक्षी भूतःकल्या
णवाचकः अमरेशो दत्तकर्णः षट्
वक्त्रो मोहनः शिवः उग्रः प्रभूर्धृ।
ति विश्वर्विश्वकर्मा महेश्वरः । शा
मन्न श्रेरिका पुष्टिः पंचमी वह्नि
वासिनी चेटिकास्थाने चेतिका इति
वा पाठः कामघ्नः कामना चेशोमो
हिनी विघ्नहृन्महो उटसः ऊटिला
श्रोत्रं पारद्दीपो वृषो हरः॥
उटस इति ऊवचित्पाठः ॥ ऊः
ऊः कंठको रतिः शांति क्रोधनोम
धुसूदनः कामराजः कुजेशश्चमहे।
शो वामकर्णकः कुंठकस्थानेकं
ठक इति वापाठः अर्द्धीशो भैरवः
सूक्ष्मा दीर्घघोणा सरस्वती।
विलासिनी विघ्नकर्त्ता लक्ष्मणोरूप
कर्षिणी महाविद्येश्वरी षष्ठी षंडो
भूकाम्मऊज्जकः ऊः ऋः एकदीर्घ्ने
त्रीरुद्रो देवमाला त्रिविक्रमः भा
वभूतिः क्रिया क्रूरा रेचिकानासि
काऽमृतः एकपादशिरो माला मंड
ला शांतिनी जले कर्णः कमल
भामेयो निवृत्ति र्गणनायकः रौद्रि
णी

शिवदूतीच पूर्णगिरिस्त्रसम
मीमपःस्थाने मेष इति च पाठः
ऋः ॠः क्रोधोऽतिथिशोवा
णी वामनोऽगोऽश्वश्रीधृतिः ऊर्द्ध्व
मुखीनिशानाथः पद्ममाला विन
दृष्टीः शाशिनी मोचिका श्रेष्ठा
दैत्यमातृप्रतिष्ठिता एकदंतात्म
यो माता हरिता मिथुनोदया मा
ता स्थानेमाया इति वा पाठः
कोमलः श्यामला मेधी प्रति
ष्ठा पति रष्टमी ब्रह्मणप शिव
कीलाले पावको गंधकर्षिणी
मिवस्थाने मेवनि वा पाठः
ऌः ॡः स्थाणुः श्रीधरः शु
द्धोमधा धूम्रो वको वियत् देव
यानिर्दत्तगंडो वरेशः कौतरुद
को वरेश स्थाने वारुग इति
वा पाठः विश्वेश्वरी दीर्घजि
का महेन्द्रो लांगलिः परा चंद्रिका
पार्थिवो धूम्रा द्विदंतः कामवर्द्धनः
शुचिस्मिताच नवमी कांति राषा
तकेश्वरः चिंताकर्षिणी स्थाने चिं
ताकर्षिणी इति वा पाठः लृः लृ
कारः कमला हर्षा हृषीकेशो मधु
व्रतः सत्याकांति र्वामगंडो रुद्रः
कामोदरी सुरा शांतिकृत्कलिका
शाक्तोमायावी लोलुपो वियत्

ऊशमीस्त्वस्थिरो माता नीलपी
तो गजाननः कामिनी विश्वषा
कालो नित्यासुद्रः सुचिः क्लीं वि
श्वपास्थाने विस्मया इतिवापा
ठः स्तर्यो धैर्याकर्षणीचपकाकी
टनुजमस्तः लं पकारोवालवः
शाक्तिफिल्लीशाक्षो भगमरुत
स्तस्या भृतोऽस्त्केशी वज्रोत्का
श्रद्धा प्रमर्द्दनः भूतस्थाने स्तन इ
तिवापाठः भयंस्थाने क्षुधाथीरा
नंद्दा सर्वसमुद्भवः वह्निर्विस्स
भगवती कुंडली मोहिनी वसः
योषिदाधारशक्तिश्चत्रिकोणा
ईश्वसंज्ञकः संधिरेकादशी भद्रा
पद्मनाभःकुलाचलः पः पेलज्ञा
भौतिकःकालवायवीमोहिनीवि
भुः दत्ता दामोदरः मत्तोःपरो वि
कृतमुखो पितमालकोत्नगधा
निः परःपरनिवोधकृतत्तानाम
ताकपर्दीश्रीः पीठेशोऽस्मिःसमा
स्तकः त्रिपुरा लोहिता रात्री वा
मभवाभौतिकासनःमहेश्वरोह्रा
दशीच विमलश्च सरस्वती काम
कोटोवामनानुरेणुमा न्विनयान
टा पे ओंकारः सप्त पीयुषापशि
मासः स्फातिःस्थिरा सद्योजातो
वासुदेवो गायत्री दीर्घजंघकः ॥

आप्यायनी चोर्द्धे दंतो लक्ष्मी वीणी
मुखी छिन्नः उद्देशपदर्शक स्त्रीत्रःके
लाशो वसुधान्तरः भगवंशोऽत्रश्च
सूत्र मनेशः सर्वमंगला । ज्योद
शी दीर्घनासा रतिनाथा दिगंबरा
त्रैलोक्यविजया प्रस्ता प्रीतिबीजादि
कर्षिणी ठः ऐकारःशाक्तिको ना
द स्तेनसो वामजंकः ।
मनुवद्ध ग्रहेशश्च शक्रकर्णाःसदाशि
वः अधोदंतश्च केदोहो संकर्षणः
सरस्वती आज्ञा चोर्द्धमुखी शांतो
व्यापिनी प्रकृतःपयः अनंतो ज्वा
लामालिनी व्योमा च [illegible] त्रिपुरः
नेत्रमामाकर्षिणी कवाला [illegible] मा
लि [illegible] त्रिपुरा [illegible]
व्योमास्थाने रोमा इतिवापाठः ओः
अंकारश्चत्वधोदंतो चटिका समरुहा
कः मधुत्रः श्रीमुखी प्रीति वीजयोषि
देवध्वजः दंतस्थाने देभ इतिवापाठः
परेशासी प्रमाणीशःसोमविंदुः ।
कलानिधिः अक्रूरश्चेतना नादरूपिणी
ङःखद्वरः शिवः शिवः शंभुर्नेशा
श्च खलदुःखप्रवर्तकः शशिमारेव
ती श्रुद्धः कन्याचर विय इविः ॥
अमृताकर्षिणी श्रुच्य विचित्राधो
मन्त्ररूपिणी केदारो रात्रिनाशश्च
कुब्जिका चैव दुर्द्दरः ग्रं ग्रः कंदको

महासेनः कलः कला पूर्णामृता
हरिः इच्छा भद्रा गणेशश्च रति
र्विद्यामुखीसावं हिर्विंदु रसनासो
मोऽनिरुद्धो ङःखस्तचकः हिजि
कः कुंडलं वक्तः सर्गःशक्ति निशा
करः सुंदरी स्वयशानंता गणना
थो महेश्वरः श्रः कः क्रोधीशाम
हाकाली कामदेवः प्रकाशकः कथा
लीतेजसः शांति वीमदेवो जया
ऽनंता चक्री प्रजापतिः स्वरित्दे
दस्कंधो विशांपतिः अनंतःपार्थि
वो विंदु स्त्रापिनी पद्मात्मकः दत्त
स्कंध स्थाने दत्तकेतो इतिवापा
ठः वर्गाद्यश्च मुखी ब्रह्मा सखाद्यो
भः शिवो जलं माहेश्वरी तलापुः
श्यामंगलश्चरणी करः नित्याकामे
श्वरी सुखः कामरूपो गजेंद्रकः
श्रीगुरं वमणो वेगः कुलमापर
मात्मकः कः खः प्रचंडः कामरू
पीश्रद्धि र्वह्निः सरस्वती आका
शामिंद्रियं दुर्गा चंडीशा स्त्रापिनी
गुरुः शिखंडी दंजानीशःकफो
णिर्गरुतो यदि स्पर्शं कपाली
कल्याणी सूर्पकोणःजरामरःश्रु
श्रामेयाचंद्रलिंगो जनाश्चांगारख
दंकोरवः गो गौरी गौरवो गंगा
गणेशो गोकुलेश्वरः । शार्ङ्गी

पंचांतको गाथा गंधर्वः सर्वगः
स्त्रतिः सर्वसिद्धिः प्रभा श्रुशाद्धि
जावः शिवदर्शनः विश्वात्मागो :
एयशूपा वालवाय त्रिलोचनः
गीतं सरस्वती विद्या भोगिनी ने
दनो धरा भोगवती च हृदयस्थाने
जालधरो लवः लवस्थाने नर
इतिवा पाठः गः वः स्वर्ही हु
ढेरो षंडी षंटीपा त्रिपुरांतकः
वायुः शिवोत्तमः सत्या किंकि
णीचोरनायकः मरीचि वेहणा
मेधा कालरूपी च डांभिकः लंवो
दराज्वालमूल नेदषेणा हृनंध
निः त्रैलोक्य विद्या संहता का
माख्यमनवामपः चः ङः स्वर्ही
भैरवसंज्ञे विद्वुमसः शिश्रुप्रियः
पकरुद्रा दत्तनरवः खर्परोविष
यस्पर्द्धा कांति सेनाकया धीरोहि
जालाज्वालिनी वियत मंत्रशक्ति
श्च मदनो विघ्नेशी चालनायकः
पकनेत्रो महानंदो दुर्द्दर स्मस्माय
तिः शिवयोषा नीलकंठः कामेशी
चमयो मुकौ ङः उष्करो हलीवा
णी वाल्मशक्तिः सुदर्शनः चर्मभु
उपरो भल्वा महिषाचारसेविनी
भूता स्थाने भौम इतिच पादः
एकरूपो रुविः कूर्मश्चामुंडा दीर्घ

वालकः वामवाहुर्मूलमायावतं
मूर्त्तिस्वरूपिणी दयितश्च हिनेत्रश्च
लेलीहितयलोचनः चेदनं चेद
माद्देव श्वेतनाहृष्विकोवुपः ॥
देवी केटभविध्वाला कौमारीपूर्वं
फल्गुनी श्रनेग मेखला वायुमें
दिनीच मुलावती चः॥छुक्लदनं
हपुन्नाच पशुः पशुपतिर्भृतिःनि
र्मलंतरले वह्नि भूतमात्रा विलासि
नी एकनेत्रश्च हषली द्विशिरा वा
मऊपरः गोकर्णोलांगलीवामका
ममता सदा शिवः माता निशाच
रःपाशु वित्ततः क्षितिशाहूकः छुः
जः शरो वानरः शूली भोगदा वि
जया क्षिरा ललदेवा जयो जेता
यातकी सुमुखी विभुः लम्बोद
रीस्त्वतिः शाखा सुप्रभा कर्दका
यरा दीर्घवाहु रुचि हंसो नंदीतेजाः
स्वरापिपः नवनोवगिनी वामामा
नवात्तः सदात्मकः हात्मानलेश्वरो
वेगी चामोदा मदविह्वलः ॥
जः फो फंकारी गहरो फणावा
पुःमसः षड्वनतः । अनेशो हावि
नीनादः पाशी जिका मूले क्षितिः
विराजेन्द्रो धनुर्हस्तः ककेषो नाद
नाःकजः दीर्घवाहू वलो रूपमा
केदिलःसचंचलः दुर्मखोवनष्ट श्रा

लावान् विकटाऊचमंडलः कलहं
सप्रिया वामा अंगुलीमध्यपर्वकः
दहहाहाहहहासश्च पाथाल्मा वे
जनःखरः कः मकारो वोधनीवि
ष्णा कंडली मत्तदो विषत् कौ
मारी नाग विज्ञानी सर्वांगुलनख
रो वकः कंडली स्थाने कुंडलीम
त्तदस्थाने मख इतिवा पाठः ॥
सर्वेश हर्षिता वुद्धिः स्वर्गात्मा य
चरश्मुनिः धर्मैकपादो मृगवो वि
रजाचदनेश्वरी वुद्धिस्थाने सिद्धिः
स्वर्गस्थाने सर्ग इति वापाठः गा
यनः पुष्पधन्वाच पद्मालाच वरा
लिणी नः टष्टंकारः कपालीच
सोमवाःखेचरी ध्वनिः मंकंतो वि
नदा पृथ्वी वैसुवी वारुणी नवः
सोमवा स्थानेसोमेश इति क्वचिमा
ठः दलागकार्हचेदश्च जरा भूतिः
पुनर्भवः वृहस्पति धनु श्चिनाश्मा
हाविमलाकटिः राजा गिरिर्महा
धनुर्ध्राणनत्मासरुवो मरुत् टः
ठःपूर्णा मंजरीवीजः पाणिनीलो
गलीस्तथा वनजो नंदनो जिह्वास
वंज चूर्णकःसथा वर्त्तुलःकुंडलो
वह्निरस्ते चन्द्रमंडलः दत्तजानुरु
भावश्च देवभक्तो वृहद्ध्वनिः एक
पादो विभूतिश्च ललाटं सर्वमित्रकःवृषभो

4321

नलिनी विस्व मे हे शो श्रामणीःश
शीठः उः स्मरति दोरुको नेदि
नूपिणी योगिनी प्रियः कौमारी
शंकर स्वाधा स्विवको नदकोध्वनिः
डमृहो जटिली भीमा द्विजिह्वः
पृथिवी सती कोरगिरिः क्षमाका
ति र्नाभिः स्वातीच लोचनं जटि
ली स्थाने जटिल इति कांतिस्था
नेशांति रितिवापाठः ढः
टो टक्कानिर्णयः सर्वो यक्षेशादन
देश्वरः अर्द्धनारीश्वर स्तोय मीश्वरी
त्रिशिखी नरः यक्षेशा दनदेश्वर
इत्यत्र यक्षेशो धनदेश्वर इत्यपि
पाठः दक्षपादांगुले मूलं सिद्धिदं
डो विनायकः प्रहासा त्रिवेराङ्क
द्वि निर्गुणो नियतो ध्वनिः ॥ प्रहा
सा स्थाने प्रहास इति वा पाठः
विघ्नेशः पालिनी स्वक्रु धारिणी
क्रोडपुच्छकः धत्तापरे तगात्माच
विशाखा श्रीर्मनो रतिः नक्रुस्थाने
स्वक्रु इतिवा पाठः टः णो
निर्गुणं रतिर्ज्ञानं जंभनः पत्तिवा
हनः जया शंभो नरकजित् निष्क
ला योगिनी प्रियः द्विमुखं कोट
वी श्रोत्रं समृद्धिवोधनी मता ।
विनेत्रो मानुषी व्योम दक्षपादांगु
ले शेखं माधवः शंखिनी वीरो

नारायणश्च निर्णयः मुखस्थाने
नखं इति वा पाठः णः तः स्वत
नाहरिः शुद्धिः शाक्ती शक्ति जरा
ध्वजा वामस्फिक्कामकसोचका
मिनीमध्यकर्णिकः हरि स्थाने हरिः
इतिवापाठः आषाढी तंड तस्त
श्च कामिका पुष्टच्छकः रत्नकश्च
पपामग्रावी वाराही मकरीऽरुणा
आषाढी तंड तस्तश्च स्थाने आषा
ढाप्रांत मद्रश्च इति रत्नकश्चस्था
नेरत्नकंठ इति वापाठः ॥ स्वगतो
ऽ हेमश्वा वुद्ध जानुश्च क्रोड पुच्छ
कः गंधो विस्वा मरुच्छत्र स्थान
राधा चसौरकः वुद्धस्थाने वृद्ध इति
सौरक स्थाने सैविक इति वापाठः
जयंति पुलको भ्रांति रणग मदना
श्मा नः थः स्थिरामी महाग्रंथि
र्गुणिग्राहो भयानकः । शिली
शिरस्तिजो दंडी भद्रकाली शिला
श्चयः क्रमा वुद्धि विकर्माच हत
नाशाधिपोऽमरः वदरा भोगदाके
शा वामजानु रक्षोऽनलः ॥
क्रमा वुद्धिर्विकर्मास्थाने क्रमा
वह्निविकर्णा इति वापाठः लो
लोजज्ञायिनी गुह्यःशारवन्दोविदा
रकः लोलो इत्यादि स्थाने लोलो
जयिनीसुगुह्य शारवंददिवाकरो

इतिवा पाठः घः दो ऽङ्गीशो। धातकि धाता दाता दलं कलत्र कं दीनं दानेच दानेञ्च भक्तिरा हवनीयरा दाताद्दल स्थाने दा नाद्र इति वा पाठः सङ्गद्वायो गिनी सघःऊंडलो वामगुल्फकः कात्यायनीशिवा दुर्गा लंचना ना त्रि कंडकी लंचना स्थाने संचना कंडकी स्थानेकंटकी इतिवापाठः स्वस्तिकः ऊरिला नृपःकुलम्बो मानितेंद्रियः धर्मसहाम देवम्ब भ्रमा वड सुंचला धर्मसस्थानेय मेहल्वऊस्थाने वह इति वापाठः हरिज्ञाध्वर मञोच दत्तपाणि सि देवकः दः धी धनाध्यो रुवि स्यानुशाम्बतो योगिनी प्रियः मी नेशःशंखिनी तोयं नागेशा विश्व पावनी धनार्य स्थाने धनाख्य इ तिवापाठः विषरा धरता चिंता वेग्रसुगमे प्रियो मतिःपीतवासावि वर्णा च धाता धर्मसुवेगमः धर णाश्चिंता स्थाने धरणी चिंता इति वापाठः संदर्पो मोहनो लज्जाव चतेडा धरं धरा वामपादांगुलेर्मू ले ज्येष्ठा स्वरपुरं भवः सर्पात्मा दीर्घजंघा चधनेशो धनसंचयः धः नोगर्जिनी लमा सोरि।

वीरुपणी विश्वपावनी मेघश्च सवि ता नेत्रं देवरो नारदो ऽजनः॥ वारुणी स्थाने वरुणा इतिवापा ठः ऊर्द्धगामी धिरश्च वामपादांगु लेर्मूलः वैनतेय स्तुति वर्त्म तरणि वीति रागमः वामणो ज्वालिनी दीर्घो निरीहः स्मराति विंय शा शात्मा दीर्घघोणा च हस्तिनापुरेश चक्रो गिरिनायकजीवोच पिदो नादि महामति नः॥ पः प्ररषियला तीक्ष्णा लोहितः पंच मो रमा गुह्यकर्ता निधिः शेषः कालरात्रिर्विबाहिता॥ तपनःपा लनः पाता पद्मरेणु निरंजनः। सावित्री पालिनी पानं वीर तत्वो धनुर्धरः पालन स्थाने पावन इति तत्व स्थाने तेज इति वा पाठः दत्तपार्श्वश्च सेनानी मरीचिःपवनः शान्तिः ऊर्द्धशो नयनी ऊंभोऽलस रेषा च मोहकः ऊभ स्थानेका ता इति रेखा स्थाने रेषा इति वा पाठः मूला द्वितीय मिंद्राणी लोकाक्षी मन आत्मनः आत्मनः स्थानेआत्मक इति वा पाठः फः फः सती दुर्गिनी धूम्रा वामपा र्श्वोजनार्द्दनः जयापादः शिखारो हीफेत्कारः शाखिनी प्रियः उमा

विहंगमः काल ऊञ्जिनीप्रियपा वकोमलयामिनीलपादोऽक्षरःपशु पतिःशशी फत्कारो यामिनी वक्रा प्रावनो मोहवर्द्धनः निष्फ लवागहकारः प्रयागो ग्रामनीःफ लं वक्रा स्थाने कंफा इतिप्र याग स्थाने प्रयाण इतिवापाठः फः वो वनी भूधरो मार्गो ग्रद्धे रीलोचनप्रियः। प्रचेताः कलसः पक्षी स्थलगडःकपर्दिनी पृष्ठव शो भया मातः शिखिवाहोगुग मरः हाखविड्वली ग्रंटा योद्धा त्रिलोचनप्रियः हाखविड स्थाने सुखविड रितिवा पाठः कौमुदिनी तापिता भूमि स्वपनिंदु वलिप्रि यः सरभि र्मदविस्मृतसंहारोवस धाधिपः स्वपनिन्दु स्थाने सुगंधि रितिवा पाठः षष्ठी धुरंश्च पेरी चमोदको गगनं प्राति पूर्वाषा ढामध्यलिंगौ शान्तिःऊंभस्तीय कोवः भः क्लिन्ना भ्रमरो भीमोवि श्वमूर्ति निशातवे द्विवेदो भूष णेमूलं पत्तसत्तरस वाचकः निशातव स्थाने निशाभयं इतिवा पाठः नत्तवं भ्रमणा दीप्ति वैषो भूमिः पर्यानभः नाभि भद्र महावा डविश्वमूर्ति विताडकः वधस्थाने

भय इति वितांडक स्थाने विमूर्त क इति वापाठः माणात्मातापि वेत्रा विश्वरूपीच चंडिका भीम सेनः सुधासेनःसेवा माया पुरंहरः वत्रस्थाने रुद्रा इति सखस्थाने सुख इति वा पाठः भः मःकाली कौशितःकालो महाका लो महांतकः वैकुंठो वसुधाचं द्रो रविः पुरुषरानकः वसथा स्थानेवसुदा इतिवापाठः काल भद्रान्वया मेधा विश्वदा दीप्तमन्त कः ऊदरश्च भ्रमामाले लक्ष्मीमा तोयबंधनो दीप्त स्थाने दीप्र इति वापाठः विषं शिरो महावीरःप्र शिप्रभा जनेश्वरः प्रमतः प्रिय सुहृदः सर्वांगो वह्निमडलं मातं गमालिनी विन्दुः श्रवणाभरेथा वियत् रथस्थाने मथ इतिवा पाठः मः योवानीवसुधावासुवि कृतिः पुरुषोत्तमः युगांतःस्थास नःशीघ्रो धूम्रार्चिःप्राणिसेवकः युगांत स्थाने युगाभ इति वापाठः शावा भ्रमा जटी लोला वासुदे वीयशंकरी संकर्षणःतपावाला हृदयं कपिला प्रभा आग्नेयो व्या पकास्त्यागो होमो यानं ममाहवं चंडः सर्वेश्वरीभूत्र चामुंडा सम

खेचरी प्रमा स्थाने प्रभा इति
वापाठः त्वगात्मा मल्लयो माता
हंसिनी भंगिनायकः नेनमः।
शेषको मीनो धनिष्ठानंगवेदि
नी त्वगात्मा स्थाने विगात्मा इति
नेनमस्थाने येमन इतिवापाठः
मेष्ठः सोमः शाकिनामा पापहाम्रा
णसंज्ञकः मेष्ठ स्थाने मेष्ठ इति
वापाठः यः रो रक्तः क्रोधिनी
रेफः पावकस्त्वोजसो मतः प्रका
शा दर्शनो दीपो रक्तकुसापरं
बली स्त्वोजस स्थानेत्वोजन इ
तिरत कुस्मा स्थाने रक्तकुस इ
तिवा पाठः भुजगेशो मतिः स्व
र्योधात्वरक्तः प्रकाशकः व्याप
को रवती दासं कुसो पोतवाकिमं
इलंदासस्थाने दान मितिकुसं
शस्थाने दत्तांश इतिवापाठः ३
ग्ररेखा स्थूलदंडो वेदकंठ पाता
पुरा प्रकृतिः मंगलो ब्रह्मशाद्य
गायको धनं वेदकंठपालोह
स्थाने वेदकम्पपाला इतिवापाठः
श्रीकंठ उष्माहृदयं सुंदरी त्रिपुर
सुंदरी सविंदुर्योनिजो ज्वालाग्नी
शोत्तो विश्वतोमुखी श्रीपोतस्था
नेश्रीशोणा इतिवा पाठः वः ल
ष्टंदः एतना पृथ्वी माधवः शाकवा

चकः वलासुनः पिनाकीशेखा
पको मांससंज्ञकः माधव स्थाने
माधवी इति वा पाठः खंसीना
दोमतं देवी लवणं वारुणीपतिः
शिखा वाणी क्रिया माला भा
मिनी कामिनी प्रिया मत स्थानेस
इमिति लवण स्थाने मरणमिति
वापाठः ज्वालिनी वेगिनी नादः
प्रद्युम्नः पोपणी हरिः किस्थाने
वौ वली चेतो मेरुगिरिः कला
वसः मंत्रस्थाने मंद इति कला
स्थाने करणा इतिवापाठः लः
वो वालो वारुणी सत्या वृहणो
मेदसंज्ञकः खंगीशो ज्वालिनी वंकः
कुलस्वधनि वाचकः वंकस्थाने रंक
इति कलसधनि स्थाने कलसरवि
इति वापाठः उल्कारेशस्तु नावी
तो वज्रा स्फिकसागरः शुचिः।
त्रिधातुः शंकरः श्रेष्ठो विशेषो य
मसादनं वः शः सव्यस्त्रकामरूपी
कामरूपा महामतिः । सोख
नामा कुरोष्मि श्रीकंठो वृषके
ननः वृषघ्नः शयनेशोना सक्षमा
निष्कुलिंगिनी मन्तु देवो महा
लक्ष्मी महेंद्रः कुलकौलिनी वाकु
हंसो वियद्वक्तं हृदनंगाकुशःख

कल्याण वाचकः हंसस्थाने हिं
मा इति वापाठः शः षः
श्वेतो वासुदेवश्च पीता मत्ता
विनायकः परमेष्ठी वामबाहुश्च
श्रेगर्भविमोचनः पीता स्थाने
प्रीता इति मत्ता स्थाने श्रद्धा
इति वा पाठः लम्बोदरो यमो
नेशः कामधुक् कामधूमकः
लक्ष्मी रुक्मा कपोलज्वा मरुद्रसः
प्रियः शिवः कामधूमक स्था
ने कालधूमक इति वा पाठः
सूर्यात्मा ज्वरः कोषो मताव
हो विदारिणी कलकंठो मध्य
मित्रा कुहात्मा मलहः शिवः
षः सोऽहमः स्वयशा विस्वभावी
शब्दसंज्ञकः नगहीजे शाकि
नामा मोहं वेशवती भगः स्वप
शास्थाने स्वजन इति मोहस्थाने
सोहं इति वा पाठः प्रकृतिरीश
रः शुद्धो प्रभा श्वेता कुलोज्वलः र
सपादो मतं ब्राह्मी परमात्मापरो
ऽन्तरः सहपाव गुणेशो योक
लकंठो वृकोदरी प्राणायाम्भुपुराद
वी लक्ष्मीसोमो हिरण्यपुः इर्षेणतारि
ति सम्मोहात्मा वामूर्तिर्मनोहरः इ
र्मैनारिणी स्थानेइर्षोतारिणी इ
तिसम्मोहात्स्थाने सम्मोहा इतिमुनो
हस्थानेम

नोपव इति वापाठः सः
हः शिवो गगनं हंसो नागलोको
ऽस्विकापतिः नकुलीशो नगत्मा
णः प्राणेशः कपिला मलः मल
स्थाने मत इति वा पाठः परमा
त्मात्मनो जीवो यवाकः शांतिदो
ऽनुणः स्वगो भयो कृणो स्थानुः
कूटकूपविरावणः यवाकस्था
ने वराक इति ऽगन स्थाने ऽनुन
इति कूटकूपविरावण स्थाने कूट
को परिवारण इति वापाठः लक्ष्मी
र्मविहरः शंभुः श्मशानिकिर्ललाट
नः स्वकोपवारणः शूली चेतन्यपा
दशणः मविहरस्थाने हरिहर इति
स्वकोपस्थाने सकोप इतिवा पाठः
महालक्ष्मीः परं नादो मेघनादो
हरि सेतः विंदुवर्गा प्रिया देवी
मेघश्यामेश्वरः पुमान् दत्तपा
दः सदा शंभुः शाखोटः सोमेश्वर
ले हः लः पृथ्वी विमलामे
घोऽनन्तो हव्यवहा सिता व्या
पिनी शिवदा केतुर्जगत्सारतदे
हटः ज्योतिर्मंडलनी च वेदार्थः सारो
नारायणः स्वयं नंदरो नकुलिः
पीता शिवेशा ऽनगमालिनीलः
लः कोप सम्भुकः कालानलः सं
वर्तकः परः नृसिंहो वि ॥

युता माया महातेजा मुगांतकः
स्तंबुकस्थाने स्तबुक इतिवृत्तस्था
नेव्यस्तमिति पद स्थाने पृथ इति
वापाठः परात्मा क्रोध संहारौ।
वलांतो मेरुवाचकः । सर्वांगःसा
गरः कामःसंयोगांस स्त्रिष्टरकः ॥
वलांत स्थाने नलांत इति स
र्वांग स्थाने सर्वांग इति वा
पाठः तेजपालो महातोभो।
मालकांतानलतयः । मुखंक
व्यवहानंता कालजिका गाणे
स्वरः छाया पुत्रश्च संघातोमल
यःश्रीलिलाटकः इतिनंदन भ
ट्टाचार्य विरचितं वर्णाभिधान
समाप्तं ॥
वर्णकं स्त्री हरितालं इतिरत्न
माला गात्रानुलेपनयोग्यं पि
ष्टं चूर्णंवा सुगंधिद्रव्यं इत्यमरः
चंदनं इतिशब्दरत्नावली ॥
वर्णकं पुं स्त्री विलेपनं चंदनं
मेदिनी ॥
वर्णकः पुं स्त्री हिंगुल हरिता
लकाचनीलोकादिः इत्यमरभर
तोवर्णकः पुं चारणः इतिमेदि
नी मंडले इति शब्दरत्नावली
वर्णकविः पुं कुवेरपुत्रः इति
त्रिकांडशेषः ॥

वर्णकूपिका स्त्री मस्याधारः यथा
मसीधानी मसिमणि र्मेलांधुकूपी
कूपिका इति त्रिकांडशेषः ॥
वर्णचारकः त्रि चित्रकारः इति
शब्दमाला ॥
वर्णज्येष्ठः पुं ब्राह्मणः इतित्रि
कांडशेषः
वर्णज्येष्ठः त्रि सवर्णापेतोत्तम
वर्णः पारिभाषिक हीनवर्णक
न्यकपारिभाषिकवर्णज्येष्ठकन्या
विवाहनिषेधो यथा मीन कर्क
ट वृश्चिक विप्राः सिंह तुला ध
नुः क्षत्रियउक्तः कुंभ नरद्वय मे
ष विशः सुर्मकर वृषस्त्री काष्ठि
ऽ वज्जातिः वर्णज्येष्ठा चया नारी
वर्णहीनश्च यः पुमान् तयो र्विवा
हे स्वस्तः स्यात्मरणात्माणात्र संशयः
ज्योतिस्तत्त्वेवर्णजोटनं ॥
वर्णतूलिः स्त्री लेखनी इति शब्द
रत्नावली ॥
वर्णतूलिका स्त्री लेखनी इति
हारावली ॥
वर्णतूली स्त्री लेखनी इति त्रि
कांडशेषः ॥
वर्णदं स्त्री कालीयकं । इति
मदापरः वर्णदातरीत्रि ॥
वर्णदात्री स्त्री हरिद्रा इति राज

4327

निर्घंटः वर्णदातरि त्रि ॥
वर्णदूतः पुं लिपिः तत्पर्यायः
लेखः २ वाचिकहारकः ३ स्व।
स्तिमुखः ४ इति त्रिकांडशेषः ॥
वर्णधर्मः पुं स्त्री ब्राह्मणक्षत्रिय
वैश्यशूद्राणां कर्तव्यं कर्म तद्य
था यजनं याजनं दानं ब्राह्मण
स्य प्रतिग्रहः अध्यापनं चाध्यय
नं षट् कर्माणि द्विजोत्तमाः दान
मध्ययनं यज्ञो धर्म क्षत्रिय वैश्य
योः दंडो युद्धं क्षत्रियस्य कृषिर्वैश्य
स्य शस्यते शुश्रूषैव द्विजाती
नां शूद्राणां वर्णसाधनं कारु
कर्म तथा जीवः पाकयज्ञोऽपिध
र्मतः क्षमा दमो दया दानं म
लोभ स्त्याग एवच आर्जवंचा
नसूयाच तीर्थानुसरणं तथा ॥
सत्यं संतोष आस्तिक्यं श्राद्धं चे
न्द्रियनिग्रहः देवता अर्चनं पूजा
ब्राह्मणानां विशेषतः अहिंसा
प्रिय वादित्व मपैशुन्य मकल्क
ता समासिक मिमं धर्मं चातुर्व
र्ण्येऽब्रवीन्मुनिः प्राजापत्यं ब्राह्म
णानां स्मृतं स्थानं क्रियावतां।
स्थान मैंद्रं क्षत्रियाणां संग्रामे
ष्वपलायिनां वैश्यानां मारुतं
स्थानं स्वधर्म मनुवर्ततां गांधर्व

शूद्रजातीनां परिचारे तुवर्ततां
इति कौर्मे २ अध्यायः ॥
अपिच मार्कंडेयउवाच हारीत
स्यानुवाचाथ तैरेवं चोदितोमु
निः शृण्वंतु मुनयः सर्वे धर्मा
न्वक्ष्यामि शाश्वतान् वर्णानामा
श्रमाणांच योगशास्त्रंच सत्तमाः
यज्ज्ञात्वा मुनयो नित्यं मुच्यंते
जन्मबंधनात् ब्रह्मणो ब्राह्म
णेनैव उत्पन्नो ब्राह्मणः स्मृतः
तस्य धर्मं प्रवक्ष्यामि तद्योग्यंदे
श मेवच कृष्णसारो मृगो यत्र
स्वभावाद्व प्रवर्तते तस्मिन्देशेव
सन्धर्मं कुरुते ब्राह्मणोत्तमः अ
ध्यापनं चाध्ययनं यजनं याजनं
तथा दानं प्रतिग्रहश्चैव कर्मषट्
कमितीरितं अध्यापनंच त्रिवि
धं धर्मार्थं काम्यकारणं शुश्रूषा
कारणंचेति त्रिविधं परिकीर्तितं
तं तेषां मस तमो वापि दृश्य
ते यत्रमानवे तत्र विद्या नदात
व्या पुरुषेण हितैषिणा योग्यान
ध्यापयेच्छिष्यानन्यानपिच योजयेत्
विदितान्प्रतिग्रहानिच्छेद्गृहधर्म
प्रसिद्धये वेद मेवाभ्यसेन्नित्यं शु
चौ देशे समाहितः धर्मशास्त्रं यथा
शक्त्या इत्याहितानुसारतः ॥

नित्यं नैमित्तिकं धर्मं कर्मकुर्यात्
प्रयत्नतः गुरुशुश्रूषणंचैव य
थान्यायमतंद्रितः सायंप्रातरुपा
सीत विधिनाग्निं द्विजोत्तमः हुत
त्वानःप्रकुर्वीत वैश्वदेवं दिने दि
ने अतिथिंचागतं भक्त्या पूजयद्भ
क्तितो गृही अन्नानप्यागतान्वि
प्रान् पूजयेदविरोधतः स्वदारनि
रतो नित्यं परदार विवर्जितः
सत्यवादी जितक्रोधः स्वधर्मनि
रतो भवेत् अकर्माणिच संप्राप्ते
प्रमादे नैव रोचयेत् प्रियांहि
तां वदेद्वाचं परलोकाविरोधि
नीं एष धर्मःसमुद्दिष्टो ब्राह्मणा
स्यसमासतः धर्ममेवंत यःकुर्या
त्स याति ब्रह्मणःपदं हारीतउ
वाच तत्रादीनांप्रवक्ष्यामि यथा
वदनुपूर्वशः येन ये न प्रवर्तंते
विधिना तत्प्रियादयः राजावत्त
त्रियश्चैव प्रजा धर्मेण पालयेत्
कुर्यादध्ययनं सम्यक्गुरुतोय
थाविधि दद्यादानं द्विजाग्रेभ्यो
धर्मबुद्धि समन्वितः देव ब्राह्मण
भक्तश्च पितृकार्यपरस्तथा धर्मं
णैव जयाकांक्षी अधर्मस्य विवर्ज
येत् उत्तमां गतिं मामोति क्षत्रियो
ह्येव माचरन् ॥ गोरक्षं कृषि ।

वाणिज्यं कुर्याद्वैश्यो यथाविधि
दानं धर्मं यथाशक्त्या द्विजशुश्रू
षणं तथा लोभ दंभ विनिर्मुक्तः
सत्यवागनसूयकः स्वदारनिरतो
दान्तः परदारविवर्जितः ॥ धनै
र्विप्रान्समभ्यर्च्य यज्ञकाले तथा
चितः अप्रमत्तः स्वधर्मेषु वर्तेतदे
हपातनात् यज्ञाध्ययन दानानि
कुर्यान्नित्य मतंद्रितः । पितृका
र्यंच तत्काले नारसिंहार्चनं तथा
एतद्वैश्यस्य कर्मोक्तं स्वधर्म म
नुतिष्ठतः । एतदासेवमानस्तु
शुक्लःस्यात्नात्र संशयः ॥ वर्ण
त्रयस्य शुश्रूषां कुर्यात्शूद्रः प्रयत्न
तः दासवत्ब्राह्मणानांच विशेषे
णसमाचरेत् अयाचितः प्रदाता
स्यात्कृषिं वृत्यर्थं माश्रयेत् पाक
यज्ञ विधानेनयजेद्देवानतंद्रितः
शूद्राणां मासिकं कार्यं वपनंन्या
य वर्तिनां । धावणं जीर्णव
स्त्रस्य विप्रस्योच्छिष्टभोजनं स्वदारे
ष्वरतिश्चैव परदार विवर्जितः पु
राणश्रवणं विप्रान्नारसिंहस्य पूज
नं तथा विप्रनमस्कारस्तथा मंत्र
दिने दिने सत्यं संभाषणं चैव
राग द्वेष विवर्जनं इत्थं कुर्व
स्तथा शूद्रो मनोवाक्कायकर्मभिः

स्थान मैंद्र मवाप्नोति त्यक्तपापः
प्रशुण्यकृत् इति नारसिंहे ५०
५४ अध्यायो अन्यच्च । मदा
लसोवाच दान मध्ययनं यज्ञो
ब्राह्मणस्य त्रिधोदितः धर्मोनान्य
स्तृतीयोस्ति धर्म स्तस्यापदंविना
याजनाध्ययने यज्ञ स्तथा शुद्धप्रति
ग्रहः एतत्सम्यक्समाख्यातं त्रित
यं चास्य जीविका ॥ दान मध्य
यनं यज्ञः क्षत्रियस्याप्ययं त्रिधा
धर्मःप्रोक्तःक्षिते रक्षा शस्त्राजी
वश्च जीविका दान मध्ययनं यज्ञो
वैश्यस्यापि त्रिधैवसः वाणिज्यं ।
पाशुपाल्यंच कृषिश्चैवास्य जीवि ।
का दानं यज्ञो ऽथ शुश्रूषाद्वि
जातीनां त्रिधा मया व्याख्यातः
शूद्रधर्मोऽपि जीविका कारुक
र्मणा तद्वद्विजातिशुश्रूषा पोषणं
क्रयविक्रयैः वर्णधर्मास्त्विमे प्रो
क्ताः श्रूयतां माश्रमा स्तथा इति
मार्कंडेयपुराणे मदालसानुशास
नाध्यायः अपरंच ब्राह्मणा ब्र
ह्मयोनिस्था ये स्वकर्मण्यवस्थिताः
तेसम्यगुपजीवेयुः षट्कर्माणिय
थाक्रमं अध्यापनमध्ययनं यजनं
याजनं तथा दानं प्रतिग्रह श्चैव
षट्कर्माण्यग्रजन्मनः षण्णांतुकर्म

णा मस्य त्रीणि जीविका या
जनाध्यापने चैव विशुद्धाञ्च प्र
तिग्रहः त्रयो धर्मा निवर्तंते ब्रा
ह्मणात्क्षत्रियं प्रति अध्यापनं या
जनंच तृतीयश्च प्रतिग्रहः
वैश्यंप्रति तथैवैते निवर्तेरन्नि
ति स्थितिः मनो प्रति हितान्य
र्मान्मनु राहप्रजापतिः शा
स्त्रा स्वभृत्वं हेतुस्ववणिक
कृषिविशः आजीवनार्थं धर्म
स्तु दान मध्ययनं यजिः वेदा
भ्यासो ब्राह्मणस्य क्षत्रियस्यचरक्ष
णं वार्ताकर्मैववैश्यस्यविशिष्टानि
स्वकर्मसु अजीवंस्तु यथोक्तेनब्रा
ह्मणःस्वेनकर्मणा जीवेत्क्षत्रिय
धर्मेणसस्य ह्यनंतरः उभाभ्याम
प्यजीवंस्तु कथंस्यादितिचेद्भवेत्
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्यजी
विकां वैश्यवृत्यापिजीवंस्तु ब्राह्मणः
क्षत्रियोपि वा हिंसाप्रायां पराधीनां
कृषिं यत्नेन वर्जयेत् कृषिंसाधि
तिमन्यंते सावृत्तिः सद्विगर्हिता भू
मिं भूमिशयांश्चैव हंति काष्ठमयो
मुखं इदंतु वृत्तिवैकल्यात्त्यजतोध
र्मनैपुणं विट्पण्य मुद्धृतोद्धारं
विक्रेयं वित्तवर्द्धनं सर्वान्रसान
पोहेत कृतान्नंच तिले

सह अश्मनो लवणंश्चैवप
शवोयेच मानुषाः सर्व्वचतांत
वं रक्तंशान क्षौमाविकानिच अ
पिचेत्स्युरक्तानि फलमूलेत
थौषधीः अपःशस्त्रं विषंमांसं
सोमंगंधांश्चसर्वशः क्षीरंक्षौद्रं
दधिघृतं तैलं मधुगुडं कुशान्
आरण्यांश्च पशून्सर्वान् दंष्ट्रि
णश्चवयांसिच मद्यंनीलिंच॥
लाक्षांच सर्वांश्चैकशफांस्तथा
काममुत्पाद्य कृष्यांतु स्वयमेव
कृषीवलः विक्रीणीत तिलान्
शुद्धान्धर्मार्थमचिरस्थितान् भो
जनाभ्यंजनाद्दानाद्यदन्यत्कुरुते
तिलैः कृमिभूतः श्वविष्ठायांपि
तृभिः सहमज्जति सद्यःपतति।
मांसेनलाक्षया लवणेनच त्र्य
हेन शूद्रीभवति ब्राह्मणःक्षीरवि
क्रयात् इतरेषांतु पण्यानां वि
क्रयादिहकामतः ब्राह्मणःसप्त
रात्रेण वैश्यभावं नियच्छति
रसा रसैर्निमातव्या नत्वेवलव
णं रसैः कृतान्नंचाकृतान्नेन ति
लाधान्येनतत्समाः जीवेदेन राजन्यः
सर्वेणाप्यनयंगतः नत्वेव ज्याय
सीं वृत्तिमभिमन्येत कर्हिचित्
योलोभादधमोजात्याजीवेदुत्कृष्टक
र्मभिः

तं राजा निर्द्धनं कृत्वा क्षिप्र मेव
प्रवासयेत् वरं स्वधर्मो विगुणो
न पारक्यः स्वनुष्ठितः परधर्मेणजीव
न्हि सद्यः पति जातितः ॥ वै
श्योऽजीवन्स्वधर्मेण शूद्रवृत्त्यापिव
र्त्तयेत् अनाचरन्नकार्याणि निव
र्त्तेत च शक्तिमान् ॥ अशक्नुवंस्तु
शुश्रूषां शूद्रः कर्त्तुं द्विजन्मनां पु
त्रदारात्ययंप्राप्तो जीवेत् कारुक
र्मभिः यैःकर्मभिः प्रचरितैः शु
श्रूष्यंते द्विजातयः तानि कारुक
कर्माणि शिल्पानि विविधानिच
वैश्यवृत्तिमनातिष्ठन् ब्राह्मणःस्वे
पथिस्थितः अवृत्तिकर्षितःसीद
न्निदं धर्मंसमाचरेत् सर्वतःप्रतिगृ
ह्णीयाद्ब्राह्मणस्त्वनयंगतः पवित्रं
दुष्यतीत्येतद्धर्मतो नोपपद्यते ॥
नाध्यापनाद्याजनाद्वा गर्हिता द्वा
प्रतिग्रहात् दोषो भवति विप्रा
णां ज्वलनांबु समाहिते ॥ जी
वितात्ययमापन्नो योऽन्नमत्ति यत
स्ततः आकाशमिव पंकेन नस
पापेन लिप्यते अजीगर्त्तः सुतंहंत
मुपासर्पद्बुभुक्षितः नचालिप्यत
पापेन क्षुत्प्रतीकारमाचरन् श्वमां
समिच्छन्नार्तोऽत्तुं धर्माधर्मविच
क्षणः प्राणानां परिरक्षार्थं ।

4331

वामदेवो न लिप्तवान् ॥ भरद्वाजः
क्षुधार्तस्तु सपुत्रो विजने वने ब
ह्वीर्गाः प्रतिजग्राह वृधो स्तक्ष्णो
महातपाः क्षुधार्तश्चात्तुमभ्यागाद्वि
श्वामित्रःश्वजाघनीं चंडालहस्ता
दादाय धर्माधर्म विचक्षणः प्रति
ग्रहाद्याजनाद्वा तथैवाध्यापनाद
पि प्रतिग्रहः प्रत्यवरः प्रेत्य विप्र
स्य गर्हितः याजनाध्यापने नित्यंक्रि
येते संस्कृतात्मनां प्रतिग्रहस्तु क्रि
यते शूद्रादप्यंत्यजन्मनः जपहो
मैरपैत्येनो याजनाध्यापनैः कृ
तं प्रतिग्रहनिमित्तंतु त्यागेन त
पसैवच शिलोंछमप्यादधीत वि
प्रो जीवन्यतस्ततः प्रतिग्रहाच्छि
लःश्रेयां स्ततो प्युंछः प्रशस्यते ॥
सीदद्भिः कुप्य मिच्छद्भिर्धने वा पृ
थिवी पतिः याच्यःस्यात्स्नातकै
र्विप्रैरदित्संस्त्यागमर्हति । अ
कृतंच कृतात्क्षेत्राद्गौरजाविकमे
वच हिरण्यं धान्यमन्नंच पूर्वं
पूर्व मदोषवत् सप्तवित्तागमाध
र्म्यादायो लाभः क्रयोजयः प्रयोगः
कर्मयोगश्चसत्प्रतिग्रह एवच ॥
विद्या शिल्पं भृति सेवा गोरक्षं
विपणिः कृषिः धृतिर्भैक्षं कुसीदं
च दशजीवनहेतवः ब्राह्मणः

क्षत्रियो वापि वृद्धिं नैव प्रयोज
येत् कामं खलु धर्मार्थं दद्या
त्पापीयसेऽल्पिकां चतुर्थ माद
दानोपि क्षत्रियो भाग मापदि
प्रजारक्षन्परं शक्त्या किल्बिषात्प्र
तिमुच्यते स्वधर्मो विजय स्तस्य
नाहवे स्यात्पराङ्मुखः शस्त्रेणवै
श्यान्रक्षित्वा धर्म्य माहारयेद्बलिं
धान्येऽष्टमं विशां शुल्कं विंश
कार्षापणावरं कर्मोपकरणाः
शूद्राःकारवः शिल्पिन स्तथा शू
द्रस्तुवृत्तिमाकांक्षन्क्षत्रमाराधये
द्यदि धनिनं वाप्युपाराध्य वैश्यं
शूद्रो जिजीविषेत् स्वर्गार्थमुभया
र्थंवाविप्रानाराधयेत्तुसः जातब्रा
ह्मणशब्दस्य साह्यस्य कृतकृत्यता
विप्रसेवैव शूद्रस्य विशिष्टं कर्म
कीर्त्यते यदतोऽन्यद्धिकुरुते त
द्भवत्यस्य निष्फलं प्रकल्प्या तस्य
तैर्वृत्तिः स्वकुटुंबाद्यथार्हतः श
क्तिंचावेक्ष्य दाक्ष्यंच भृत्यानांच
परिग्रहं उच्छिष्ट मन्नं दातव्यंजी
र्णानि वसनानिच पुलाकाश्चैव
धान्यानां जीर्णाश्चैव परिच्छदाः
नशूद्रे पातकं किंचित् नचसं
स्कारमर्हति नास्याधिकारो ध
र्मेस्ति नधर्मात्प्रतिषेधनं । ध

मैथुन स्त्यर्मज्ञाः सतां वृत्तिम
नुष्ठिताः मंत्रवर्जेनङ्घोतिप्रशंसां
प्राप्नुवंतिच यथा तथाहि सह
त्मानिष्ठत्मनस्सूयकः तथा तथे
मंचामुंच लोकं प्राप्नोत्यनिंदितः
शक्तेनापि हि शूद्रेण न कार्यो
धनसंचयः शूद्रो हि धनमासाद्य
ब्राह्मणानेव बाधते पते चत्वर्णा
वर्णाना माप्तधर्मा प्रकीर्तिताः
यान्सम्यगनुतिष्ठंतो व्रजंति पर
मांगतिं एष धर्मविधिः कृत्स्न ।
श्चातुर्वर्ण्यस्य कीर्तितः अतःप
रंप्रवक्ष्यामि प्रायश्चित्तविधिंशुभं
इति मानवे धर्मशास्त्रे भृगुप्रो
क्तायांसंहितायां दशमोऽध्या
यः अस्यवर्णशब्दे द्रष्टव्यं ॥
वर्णनं क्ली स्तवनं विस्तरेण
शुक्लादिवर्णयोजनं दीपनं इ
तिवर्णधातो र्भावेऽनट् प्रत्यये
ननिष्पन्नं ॥
र्णना स्त्री गुणकथनं तत्पर्या
यः इडा २ स्तवः ३ स्तोत्रं ४ स्तुतिः
५ नुतिः ६ श्लाघा ७ प्रशंसा ८ अ
र्थवादः ९ इति हेमचंद्रः ॥
वर्णनीयं त्रि वर्णं वर्णितव्यं इ
तिवर्णधातोः कर्मणि अनीयप्र
त्ययेननिष्पन्नं वर्णानिपदार्थानिय
था अथ वर्णानि कथ्यंते तानि या
निकवीश्वरैः महाकाव्यप्रभृतिषु प्र
बंधेषु ववर्णिरे राजाराजवधूरोहि
त कुमारामात्य सेनाधिपाः देश ग्राम
पुरी सरित्समुद्र सरिदुद्यानाद्यरण्याश्र
माः मंत्रोद्दूत रण प्रयाण मृगयाश्च
भक्तिनेन्दूदया वीरादो विरहः स्वयंवर
सुरतपुष्पावचयेन खेला रतं इतिकवि
कल्पलतायां १ स्तवके ३ कुसुमे
वर्णपात्रं क्ली चित्रकारस्यनीत्यादि
रागस्याधारः यथा मल्लिका वर्ण
पात्रं स्यात्तुलिका लेख्यकूर्चिका इ
तिशब्दमाला वर्णपुष्पकः पुं राज
तरुणीपुष्पवृक्षः इति राजनिर्घंटः
वर्णपुष्पी स्त्री अट्टकांटीपुष्पवृक्षः
इतिराजनिर्घंटः वर्णप्रसादनं क्ली
अगुरु इति राजनिर्घंटः वर्णमा
ता स्त्री लेखनी इति हाराव
ली वर्णमातृका स्त्री सरस्वती
इतिशब्दरत्नावली
वर्णमाला स्त्री जातिमाला अ
क्षरश्रेणी तत्र संस्कृतवर्णाः ५०
जपमालायां ५१ इङ्गलेजीयव
र्णाः २६ ॥ ॥

४३३३

फरासीयाः २३ हिब्रु अर्थात् इ
ऊदीयाः २२ । आरबीयाः २८ ।
पारसीयाः ३१ तर्कीयाः ३३ ।
रूशीयाः ४१ ग्रिक् अर्थात् इयु
नानीयाः २४ लाटिन्देशीयाः २२
डच् अर्थात् ओलन्दाजीयाः २६
स्पान्देशीयाः २७ इटेलिदेशीयाः
२० तातारीयाः २०२ ब्रह्म
देशीयाः १९ चीनदेशीयवर्णाः
शब्दात्मकाः तत्संख्या ८....
अकारादिक्षकारान्तवर्णरूपैक
पंचाशज्जपमाला । यथा ।
सनत्कुमारसंहितायां । क्र
मोत्क्रमगतैर्मीला मातृकार्णैः
स्तमेरुकैः सविंदुकैः साष्टवर्गैर
न्त्यजनकर्मणि आदिक्षं कुड्रत
पश्चा चोऽष्टौ वर्णाः प्रकीर्तिताः
अकारादिवर्णान्सविंदून्प्रत्येकं ।
कृत्वा प्राते सेनप्य अकारादी
नां कवर्गादीनांच वर्णानां अ
ष्टिमवर्णं मातृसारं कृत्वा एवं
अष्टार्थ्यं मंत्रजपः कार्यः अनेन
प्रकारेणाष्टोत्तरशतसंख्यो ज
पो भवति अंतर्यजन मित्यस्य
लक्षणं सविंदुं वर्णमुच्चार्य प
श्चान्मंत्रं जपेत्सुधीः अकारादि
क्षकारान्तं विंदुयुक्तं विभाव्य
च वर्णमाला समाख्याता अ
नुलोम विलोमिका क्षकारं मे
रुमेवात्र तत्र मंत्रं जपेत्सुधीः ॥
इतिनारदीयवचनात् अकारांत
रं विश्रुतेहृत्ये अनुलोमविलो
मेन वर्णाष्टकविभेदतः मंत्रेणा
न्तरितान् वर्णान्तान् वर्णानांत
रितान्मनून् कुर्यान्मणिमयीमाला
सर्वतंत्रप्रकाशिनी चरमार्णमेरु
रूपं लंघनं नैवकारयेत् इति
तंत्रसारः अपिच अनुलोमवि
लोमेन क्लृप्तया वर्णमालया ।
आदिलान्तलादि आन्तं क्रमेण
परमेश्वरि क्षकारं मेरुरूपंचन
लंघयेन्न कदाचन इति मुंडमा
लातंत्रे ॥
वर्णरेखा स्त्री कठिनी इतित्रि
कांडशेषः ॥ वर्णलेखा
वर्णलेखिका स्त्री कठिनी इति
रत्नमाला ॥
वर्णवती स्त्री हरिद्रा इतिजटा
धरः वर्णविशिष्टे त्रि ॥
वर्णविलोडकः पुं श्लोकस्तेनः
संधिचौरः इति मेदिनी ॥
वर्णसंकरः पुं मिश्रितजातिः
तद्विवरणं यथा वभुवु र्हि ब्राह्मणा
वंशोदन्या ब्राह्मणाज्जातयः ब्राह्म

णो बाहुदेशाच्च जाताः क्षत्रियजातयः
ऊरुदेशाश्च पादतः शूद्रजात
यः तासां संकरजातेन बभू
वुर्वर्णसंकराः ॥ गोपनापि
तल्लीलाश्च तथा मोदककूवर।
वौ ताम्बुलि पर्णकारौ च तथा व
णिकजातयः लीलास्थाने भा
ला इतिमूलवस्यायें कूवर इति
च पाठः इत्येव माद्या विप्रेन्द्र सत
शूद्राः परिकीर्त्तिताः शूद्राविशो
स्तु करणोऽम्बष्ठो वैश्या द्विजन्म
नाः विश्वकर्माच शूद्रायां वीर्याधा
नं चकारसः ततो बभूवुः पुत्राश्च
नवैते शिल्पचारिणः मालाका
रः कर्मकारः शंखकारः कुविंद
कः कुम्भकारः कंसकारः षडेते
शिल्पिनांवराः सूत्रधारश्चित्रक
रः स्वर्णकारस्तथैव च पतिता
स्तेब्रह्मशापादजात्या वर्णसंक
राः अजात्या इत्यत्र अयाज्या इ
त्यपिपाठः स्वर्णकारः स्वर्णचौ
र्याद्ब्राह्मणानां द्विजोत्तम बभू
व सद्यः पतितो ब्रह्मशापेणकर्म
णा सूत्रधारो द्विजातीनां शा
पेन पतितोभुवि शीघ्रंच यज्ञका
ष्ठंच नददौ तेन हेतुना व्यतिक्र
मेणचित्राणांसद्य चित्रकरस्तथा
पति

तो ब्रह्मशापेनब्राह्मणानांच को
पतः कश्चिद्वणिकविशेषश्च सं
सर्गात्स्वर्णकारिणः स्वर्णचौर्यादि
दोषेण पतितो ब्रह्मशापतः ॥
कुलटायांच शूद्रायां चित्रकारस्य
वीर्यतः बभूवाट्टालिकाकारः प
तितो जारदोषतः अट्टालिका
कार वीर्यात्कुम्भकारस्ययोषिति ।
बभूवकोटिकः सद्यः पतितो गृह
कारकः कुम्भकारस्य वीर्येण स
द्यः कोटिक योषिति बभूव तैल
कारश्च कुटिलः पतितो भुवि ॥
सद्यः क्षत्रियवीर्येण राजपुत्रस्य
योषिति बभूव तीवर श्चैव पति
तो जारदोषतः तीवरस्तत्ववीर्ये
ण तैलकारस्य योषिति बभूव
पतितो दस्युर्लेटश्च परिकीर्त्तितः
लेट स्तीवरकन्यायां जनयामास
षण्नरान् मालं मल्लं मातरंश्च
भड्डं कोलंच कंदरं कंदरस्यानेक
न्दर इतिवापाठः ब्राह्मणा
च्छूद्रवीर्येण पतितो जारदोषतः
सद्यो बभूव चांडालः सर्वस्मादध
मोऽशुचिः तीवरेणैव चांडाल्याच
र्मकारो बभूवह चर्मकार्यांच चांडा
लात् मांसच्छेदी बभूवह मांसच्छे
द्यं तीवरेण कोंचश्चपरिकीर्त्ति-

4335

र्त्तितः कौंचस्त्रियांत कैवर्त्तात्कारा
रः परिकीर्त्तितः सद्यश्चांडाल
कन्यायां लेटवीर्येण शौनक ब
भूवतस्तौ द्वौ पुत्रौ हड्डिकशोंडि
कौ तथा ᐩहड्डिडमौ इत्यपि पाठः
ᐩहड्डिकशौं डिकाविमा इति॰
क्रमेण हड्डिकन्यायां सद्यश्चांडा
लवीर्यतः बभूवुः पंचपुत्राश्चदुष्टा
वनचराश्चते लेटात्तीवरकन्यायां
गंगातीरे च शौनक बभूव सद्यो
यो बालो गंगापुत्रः प्रकीर्त्तितः ॥
गंगापुत्रस्यकन्यायांवीर्येण वेश
धारिणः बभूव वेशधारीच पुत्रो
युंगी प्रकीर्त्तितः वैश्यात्तीवरक
न्यायां सद्यः शुंडी बभूवह शुंडी
योषिति वैश्यात पौंड्रकश्चप्रकी
र्त्तितः क्षत्रात्करणकन्यायां रा
जपुत्रो बभूवह राजपुत्र्यांतु कर
णादागरीति प्रकीर्त्तितः क्षत्रवी
र्येण वैश्यायां कैवर्त्तः परिकीर्त्तितः
कलौ तीवरसंसर्गाद्धीवरश्च प्रकी
र्त्तितः प्रकीर्त्तित इत्यत्र पतितो
भुवि इतिवापाठः । तीवर्य्यां
धीवरात्पुत्रो बभूव रजकः स्मृतः
रजक्यां तीवराच्चापि कोदालीच
बभूव ह नापिताद्गोपकन्यायां
सर्वस्वी तस्य योषिति क्षत्राद्बभू

व्याधश्च बलवान् मृगहिंसकः
तीवरात्शुंडीकन्यायां बभूवुःसप्त
पुत्रकाः ते कलौ हड्डि संसर्गाद्ब
भूवुर्दस्यवः सदा ब्राह्मण्यामृ
षिवीर्येण ऋतोः प्रथमवासरे कु
त्सित श्चोदरे जातः कुदरस्तेनकी
र्त्तितः तदशौचं विप्रतुल्यं पति
तो ऋतुदोषतः सद्यः कोटिकसं
सर्गादधमो जगतीतले क्षत्रवी
र्येण वैश्यायां ऋतोःप्रथमवासरे
जातः पुत्रो महादस्युर्बलवांश्च
धनुर्द्धरः चकार वागतीतंच क्षत्रि
यो वारितस्तया तेन जात्या स
पुत्रश्च वागतीतः प्रकीर्त्तितः क्ष
त्रवीर्येण शूद्रायां ऋतुदोषेणपाप
तः बलवन्तो दुरन्ताश्च बभूवु
र्म्लेच्छजातयः अविद्धकर्णाःक्रूराश्च
निर्भया रणदुर्जयाः शौचाचारवि
हीनाश्च दुर्द्धर्षा धर्मवर्जिताः म्लेच्छा
त्कुविंदकन्यायां जोलाजाति र्बभू
वह जोलात्कुविन्दकन्यायांशराकः
परिकीर्त्तितः ॥ वर्णसंकरदो
षेण बह्व्यश्च शठजातयः ता
सांनामानि संख्याश्च कोवा वक्तुं
द्विज क्षमः वैद्यो ऽश्विनीकुमारेण
जातश्च विप्रयोषिति वैद्यवीर्ये
ण शूद्रायां बभूवु र्बहवो जनाः

ते च ग्रामगुणाश्च मंत्रौषधि
परायणाः तेभ्यश्च जाताः शूद्रा
या ते व्यालग्राहिणो भुवि इति
ब्रह्मवैवर्त्ते ब्रह्मखंडे १० अध्यायः
अपिच अयं द्विजै र्विद्व
द्भिः पशुधर्मो विगर्हितः मनु
ष्याणा मपिप्रोक्तो वेणे राज्यं
प्रशासति समहीमखिलां भुंजं
राजर्षिप्रवरः पुराः वर्णानां संक
रंचक्रे कामोपहतचेतसः ततः
प्रभृति यो मोहात्प्रमीतपतिकां
स्त्रियं नियोजयत्यपत्यार्थं तं
विगर्हन्ति साधवः ब्राह्मणाः क्ष
त्रियो वैश्य स्त्रयो वर्णा द्विजात
यः चतुर्थ एकजातिस्तु शूद्रो ना
स्तितु पंचमः सर्ववर्णेषु तुल्यासु
पत्नीष्वक्षतयोनिषु आनुलोम्येन
संभूता जात्या ज्ञेया स्त एव ते स्त्री
ष्वनंतरजातासु द्विजै रुत्पादिता
न् सुतान् सदृशानेव तानाहु
र्मातृदोषविगर्हितान् अनंतरा
सु जातानां विधिरेष सनातनः
द्व्येकांतरासु जातानां धर्म्यं विद्या
दिमं विधिं ब्राह्मणाद्वैश्यकन्या
यामम्बष्ठो नाम जायते निषादः
शूद्रकन्यायां यः पारशव उच्यते क्ष
त्रियाच्छूद्र कन्यायां क्रूराचारवि
हारवान् क्ष

त्रशूद्रवपुर्जंतु रुग्रो नाम प्रजायते
विप्रस्य त्रिषु वर्णेषु नृपते र्वर्ण
यो र्द्वयोः वैश्यस्य वर्णे चैकस्मि
न्षडेतेऽपसदाः स्मृताः क्षत्रिया
द्विप्रकन्यायां सूतो भवति जाति
तः वैश्यान्मागधवैदेहौ राजवि
प्रांगनासुतौ शूद्रादायोगवः क्ष
त्ता चंडाल श्चाधमो नृणां वैश्य
राजन्य विप्रासु जायंते वर्णसं
कराः एकान्तरे त्वानुलोम्यादं
बष्ठोग्रौ यथा स्मृतौ क्षत्तृवैदेह
कौ तद्वत् प्रातिलोम्येपि जन्मनि
पुत्रायेऽनंतरस्त्रीजाः क्रमेणोक्ता द्वि
जन्मनां ताननंतरनाम्न स्तु मातृ
दोषात्प्रचक्षते ब्राह्मणादुग्रकन्या
यां आवृतो नाम जायते आभी
रोऽम्बष्ठकन्यायां आयोगव्यां तु धि
ग्वनः आयोगवश्च क्षत्ता च चंडा
लश्चाधमो नृणां प्रातिलोम्येन
जायंते शूद्रादपसदा स्त्रयः वैश्या
न्मागध वैदेहौ क्षत्रियात्सूत एव
तु प्रतीप मेते जायंते परेप्यप
सदा स्त्रयः जातो निषादाच्छूद्रायां
जात्या भवति पुक्कसः शूद्राज्जा
तो निषाद्यां तु स वै कुक्कुटकः स्मृ
तः क्षत्तुर्जात स्तथोग्रायां श्वपाक
इति कीर्त्यते । वैदे

हकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते
द्विजातयः सवर्णासु जनयंत्यव्रतां
स्तु यान् तान्सावित्रीपरिभ्रष्टान् व्रा
त्या इति विनिर्दिशेत् व्रात्यात्तु जा
यते विप्रात्पापात्मा भूर्जकंट
कः आवन्त्यवाटधानौ च पुष्पधः
शैख एवच क्षत्रो मल्लश्च राज
न्याद्व्रात्या न्निच्छिविरेवच नटश्च
करणश्चैव खशो द्रविड एवच।
वैश्यात्तु जायते व्रात्यात्सुधन्वाचा
र्य एवच कारुषश्च विजन्मा च मैत्रः
सात्वत एवच व्यभिचारेण वर्णा
नामवेद्यावेदनेन च स्वकर्मणां च
त्यागेन जायंते वर्णसंकराः संकी
र्णयोनयो येतु प्रतिलोमानुलोमजाः
अन्योन्य व्यतिषक्ताश्च तान्प्रवक्ष्या
म्यशेषतः सूतो वैदेहकश्चैव चं
डालश्च नराधमः । मागधः
क्षत्तृजातिश्च तथायोगव एवच
एते षट् सदृशान्वर्णान् जनयंति
स्वयोनिषु मातृजात्यां प्रसूयंते प्रव
रासु च योनिषु यथा त्रयाणां व
र्णानां द्वयोरात्मास्य जायते आनंत
र्यात्स्वयोन्यां तु तथा बाह्येष्वपि क्र
मात् ते चापि बाह्यान्सुबहूं स्ततो
प्यधिकदूषितान् परस्परस्य दारेषु
जनयंति विगर्हितान् यथैव

शूद्रो ब्राह्मण्यां बाह्यंजंतुं प्रसूयते
तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्र
सूयते प्रतिकूलं वर्त्तमाना बा
ह्या बाह्यतरान् पुनः हीना ही
नान्प्रसूयंते वर्णान् पंचदशैव
तु प्रसाधनोपचारज्ञ मदासं दास
जीवनं सैरिंध्रं वागुरावृत्तिं सूते
दस्युरयोगवे मैत्रेयकंतु वैदेहो मा
धूकं संप्रसूयते नॄन्प्रशंसत्यज
स्रं यो घंटाताड़ोऽरुणोदये ॥
निषादो मार्गवं सूते दासं नौक
र्मजीविनं कैवर्तमितियंप्राहु रा
र्यावर्तनिवासिनः मृतवस्त्रभृत्स्व
नारीषु गर्हितान्नाशनासु च भ
वन्त्यायोगवीष्वेते जातिहीनाः पृ
थक्त्रयः कारावरो निषादात्तु
चर्मकारः प्रसूयते वैदेहकादं
ध्रमेदौ बहिर्ग्राम प्रतिश्रयौ चं
डालात्पांडुसोपाकस्त्वक्सारव्यव
हारवान् आहिंडिको निषादेन
वैदेह्या मेवजायते चंडालेन तु सो
पाको मूल व्यसन वृत्तिमान् पुक्क
स्यां जायते पापः सदा सज्जनगर्हि
तः निषादस्त्री तु चंडालात्पुत्रम
न्त्यावसायिनं श्मशानगोचरं सू
ते बाह्यानामपि गर्हितं संकरे जा
तय स्त्वेताः पितृ मातृ प्रदर्शिताः

प्रच्छन्ना वा प्रकाशा वा वेदितः
स्वकर्मभिः सुतिजानंतरजाः ष
ट्सुता द्विजधर्मिणः शूद्राणां तु
सधर्माणः सर्वेपध्वंसजाः स्मृताः
तपोवीजप्रभावैस्तु ते गच्छंति
युगेयुगे उत्कर्षं चापकर्षं च मनु
ष्येष्विह जन्मतः शनकैस्तु क्रिया
लोपादिमाः क्षत्रियजातयः वृष
लत्वंगता लोके ब्राह्मणादर्श
नेनच पौंड्रका श्चोड्र द्रविडाः
कांबोजा जवनाः शकाः पारदाः
पह्नवाश्चीनाः किराता दरदाः
खशाः मुखबाहूरुपज्जानां या
लोके जातयो बहिः म्लेच्छवाच
श्चार्यवाचः सर्वे ते दस्यवः स्मृ
ताः ये द्विजानामपसदा ये चापध्वंस
जाः स्मृताः ते निंदितैर्वर्त्तयेयुर्द्विजा
नामेव कर्मभिः सूतानामश्वसार
थ्यमंबष्ठानां चिकित्सितं वैदेह
कानां स्त्रीकार्यं मागधानां वणि
क्पथः मत्स्यघातो निषादानां तष्टि
स्त्वायोगवस्य च मेदांध्रचुंचुमद्गू
नामारण्यपशुहिंसनं क्षत्तुग्रपु
क्कसानां तु विलोकोवधबंधनं
धिग्वणानां चर्मकार्यं वेणानां
भांडवादनं चैत्यद्रुमश्मशानेषु शै
लेषूपवनेषु च वसेयुरेते विज्ञा
ना वर्त्तयंतः

स्वकर्मभिः चंडालश्वपचानां तु बहि
र्ग्रामात् प्रतिश्रयः । अपपात्रा
श्च कर्तव्या धनमेषां श्वगर्दभं
वासांसि मृतचेलानि भिन्नभांडेषु
भोजनं कार्ष्णायसमलंकारः प
रिव्रज्या च नित्यशः ॥ न तैः समय
मन्विच्छेत्पुरुषो धर्ममाचरन् व्य
वहारो मिथस्तेषां विवाहः सदृशैः
सह अन्नमेषां पराधीनं देयं
स्याद्भिन्नभाजने रात्रौ न विच
रेयुस्ते ग्रामेषु नगरेषु च दिवा
चरेयुः कार्यार्थं चिह्निता राजशा
सनैः अबांधवं शवं चैव निर्हरेयु
रिति स्थितिः वध्यांश्च हन्युः स
ततं यथाशास्त्रं नृपाज्ञया वध्य
वासांसि गृह्णीयुः शय्याश्चाभरणानि
च वर्णापेतमविज्ञातं नरं क
लुषयोनिजं आर्यरूपमिवानार्यं
कर्मभिः स्वैर्विभावयेत् अनार्य
ता निष्ठुरता क्रूरता निष्क्रियात्मता
पुरुषं व्यंजयंतीह लोके कलुष
योनिजं पित्र्यं वा भजते शीलं
मातुर्वोभयमेव वा नकथंचनदु
र्योनिः प्रकृतिं स्वां नियच्छति
कुले मुख्येपि जातस्य यस्य स्याद्यो
निसंकरः संश्रयत्येव तच्छीलं न
रोऽल्पमपि वा बहु यत्र त्वेते

ऽपध्वंसा जायंते वर्णदूषकाः
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव वि
नश्यति ब्राह्मणार्थे गवार्थे वा दे
हत्यागोऽनुपस्कृतः स्त्रीबालाभ्यु
पपत्तौ च बाह्यानां सिद्धिकारणं
अहिंसा सत्यमस्तेयं शौचमिंद्रि
यनिग्रहः एतं सामासिकं धर्मं चा
तुर्वर्ण्येऽब्रवीन्मनुः ॥ शूद्रायां ब्रा
ह्मणाज्जातः श्रेयसा चेत्प्रजायते
अश्रेयान् श्रेयसीं जातिं गच्छत्या
सप्तमाद्युगात् शूद्रो ब्राह्मणता
मेति ब्राह्मणश्चैति शूद्रतां क्षत्रि
याज्जातमेवं तु विद्याद्वैश्यात्तथै
व च अनार्यायां समुत्पन्नो ब्राह्म
णात्तु यदृच्छया ब्राह्मण्यामप्यना
र्यात्तु श्रेयस्त्वं क्वेति चेद्भवेत्
जातो नार्यामनार्यायामार्यादा
र्यो भवेद्गुणैः जातोप्यनार्यादार्या
यामनार्य इति निश्चयः ताबु
भावप्यसंस्कार्याविति धर्मो व्यव
स्थितः वैगुण्याज्जन्मनः पूर्व उत्तरः
प्रतिलोमतः सुबीजं चैव सुक्षेत्रे
जातं संपद्यते यथा तथार्या
ज्जात आर्यायां सर्वं संस्कारम
र्हति बीजमेके प्रशंसंति क्षेत्र
मन्ये मनीषिणः बीजक्षेत्रे तथै
वान्ये तत्रेयं तु व्यवस्थितिः यत्ते

इतिमानवे १० अध्यायो ॥
वर्णसिः पुं जलं इत्युणादि
कोषः
वर्णा स्त्री आढकी इति हेमचंद्रः
वर्णिका स्त्री लेखनी इतिश
ब्दरत्नावली ॥
वर्णाटः पुं गायनः चित्रकरः
स्त्रीकृतजीवनः इतिमेदिनी
वर्णोत्माने पुं शब्दः इतिजटाध
रः वर्णार्हः पुं मुद्गः इतिराजनि
र्घंटः वर्णिका स्त्री स्वर्णा इति सि
द्धांतकौमुदी ॥
वर्णिकः पुं लेखक यथा ले
खकैः त्वरस्वोऽस्पृष्टा जीवक
वंचकः वर्णिको लिपिकर स्यात्
वर्णन्यासे लिपि लिबिः ॥ इति
हेमचंद्रः ॥
वर्णिका स्त्री कठिनी यथा लेख
एपी वर्णिकापि स्यात्कठिन्या

शस्तः ३ प
णायितः ४ प यायतः ५ प्रग
तः ६ पणितः ७ पनितः ८ मी।
र्गानः ९ प्रतिष्ठतः १० इडितः ११
स्तुतः १२ इत्यमरः वर्णिनी स्त्री
हरिद्रा इतिराजनिर्घंटः वनिता
इति हेमचंद्रः
वर्णीन पुं लेखकः चित्रकरः
ब्रह्मचारी यथा वर्णीस्याल्लेख
के चित्रकरेपि ब्रह्म चारिणि
इति मेदिनी वर्णास्वधिनि त्रि
वर्णुः पुं नदविशेषः इत्युणादि
कोषः आदित्यः इति संक्षिप्तसा
रोणादिवृत्तिः ॥
वर्त्तकं क्ली वर्त्तलोहं विद्धि इति
भाषा इति हेमचंद्रः ॥
वर्त्तकः पुं पक्षिविशेषः भार
इति भाषा अश्वखुरः इत्य
मरः
वर्त्तका स्त्री वर्त्तकपक्षी इत्यमरः

टीकायां रायमुकुटः
वर्तजन्मा पुं मेघः इति शब्द
रत्नमाला ॥
वर्त्तनं क्ली वृत्तिः इत्यमरः ॥
साधारणवर्त्तनं इतिशब्दरत्ना
वली ॥
वर्त्तनं क्ली स्त्री तूलनाला तर्कु
पीठः जीवनं इतिमेदिनी
वर्त्तनः पुं वामनः इति मेदिनी
वर्त्तिष्णु त्रि इत्यमरः ॥
वर्त्तिः पुं पूर्वदेशः इति त्रिका
ण्डशेषः ॥
वर्त्तनी स्त्री पेषणं पंथाः इति
शब्दरत्नावली ॥
वर्त्तमानः पुं प्रयोगाधिकरणीभू
तकालः इति नैयायिकाः ॥
तत्कालवृत्ते त्रि तयोः पर्यायौ
अद्यतनः २ अधुनातनः ३ इति
राजनिर्घंटः वैयाकरणमतेत्वा
रब्धापरिसमाप्ति वर्त्तमानः कालः
। यथा महाभारते पठति।
सत्त चतुर्विधः यथा । प्र
वृत्तोपरतश्चैव वृत्ताविरत एव च
नित्यप्रवृत्तः सामीप्ये वर्त्तमान
श्चतुर्विधः क्रमेणोदाहरणानि
मांसं न खादति आदौ प्रवृत्तेमा
सभोजने निवर्त्तयति इत्यर्थः

इह कुमाराः क्रीडंति तदानीन्त
न क्रीडनाभावेऽपि पूर्व क्रीडानां
वृद्धौ वर्त्तमानत्वात् पर्वता स्ति
ष्ठंति नित्यप्रवृत्तत्वात् किंच पव
तानां स्थितत्वे वर्त्तमानत्वेपि भू
तभविष्यत्कालाभ्यां संबंधविवक्षे
या पर्वता स्तस्थुः स्थास्यंतिश्च
त्यपिस्यात् सामीप्ये द्विविधः भूत
सामीप्ये यथा कदा आगतोसि
इति प्रश्ने अयमागच्छामि इति
वर्त्तमान
त्वात् पक्षेऽहं मागच्छामि इति
आगतोपि वदति भविष्यत्सामी
प्ये यथा कदा गमिष्यसि इति
प्रश्ने पक्षेऽहं गच्छामि इति गमन
क्रियमाणोपमोऽपिवदति इति
मुग्धबोधटीकायां दुर्गादासः ॥
वर्त्तरूकः पुं नदीभेदः काकनीड
जलावर्त्तः इति मेदिनी द्वारपा
लः यथा मंत्री श्रेष्ठिहरोऽस्मा
त्सो द्वाःस्थितो वेत्रधारकः ॥
दौःसाधिको वर्त्तरूको गर्व्वाटो
दंडवासिनि इति त्रिकांडशेषः
वर्त्तलोहं क्ली लोहविशेषः वि
रि इति भाषा इति केचित् तत्
पर्यायः वर्त्तलोहं २ वर्त्तकं ३
लोहसंकरं ४ नीलकं ५ नीलल्लो
हं ६ नीलजं ७ वर्त्तलोहकं ॥

८ अस्य गुणाः कटुत्वं तिक्तत्वं
शिशिरत्वं कफदाह पित्तना
शित्वं मधुरत्वं पित्त दाह शमन
त्वंच इतिराज निर्घंटः ॥
वर्त्तिः स्त्री भेषजनिर्माणं नयना
ञ्जनं लेखः गात्रानुलेपनीदीप
दशा दीपः । इति मेदिनी
वर्त्तिविशेषो यथा कतकस्य
फलं शंखः सैंधवं त्र्यूषणं व
चा फेनो रसांजनं क्षौद्रं विडंगा
नि मनःशिला पक्षो वर्त्ति र्हंति
काचं तिमिरं पटलं तथा ।
इति गारुडे १९४ अध्यायः ॥
वर्त्तिकः पुं पक्षिविशेषः वटेर
इति हिन्दीभाषा तत्पर्यायः ।
वार्त्तिकाः २ वर्त्ती ३ गांजिकायः ४
अस्य मांसगुणाः तद्वच्च वार्त्तिकं
मांसं निर्दोषं वीर्य पुष्टिदं त
द्वत् तित्तिरवत् इति राज
निर्घंटः ॥
वर्त्तिका स्त्री वर्त्तकपक्षी इत्यमरः
वर्त्तंति वर्त्तेत इत्यच् वर्त्तः
स्वार्थे कः वर्त्तकः । भार इति
ख्यातः वृत्ति ततिभ्यां तिकः
वर्त्तिका स्त्रीलिंगा बाटभार इति
ख्याता नामद्वय मिद मित्यमर
दीपिका वर्त्तिकेति स्त्रियां मीव

८ प्रतिषेधार्थं द्वयोरुपादान मिति
माधवी रूपभेद प्रदर्शनार्थमि
तिरायमुकुटः इति तट्टीकासार
सुंदरी साच वटेरपक्षी इतिना
म्ना ख्याता अस्या मांस गुणाः
वर्त्तिका मधुरा वृष्या कफमारु
तनाशिनी इतिराजवल्लभः अ
जश्रृंगी इतिराजनिर्घंटः वर्त्तिः
वाति इति शालिता इति पलि
ता इतिचभाषा । इत्युणादिको
षः सा पंचविधा यथा ।
पद्मसूत्रभवा दर्भगर्भसूत्रभवा।
यवा शणलजा बादरी वापि फ
लकोषोद्भवाथवा वर्त्तिका स्त्री
पञ्चसंख्या सदा पंचविधा स्मृता
इति कालिकापुराणे ६८ अध्यायः
वर्त्तिष्णुः त्रि वर्त्तनशीलः त
त्पर्यायः । वर्त्तनः इत्यमरः ॥
वर्त्ती इति हेमचंद्रः ॥
वर्त्तिष्यमाणः त्रि भविष्यत्काला
दिः वर्त्तनप्रागभावाश्रयः इति
राजनिर्घंटः ॥
वर्त्ती[१] स्त्री वर्त्तिका इतिहेमचं
मदीका ॥
वर्त्ती[२] त्रि वर्त्तिष्णुः हेति हेमचं
द्रः वर्त्तुले त्रि गोलवस्तु तत्पर्या
यः निस्तलं १ वृत्तं २ इत्यमरः ॥

मंडलायितं ४ इति शब्दवली
संपूर्णगर्भवृत्तानि यथा संपूर्ण
गर्भवृत्तानि मुद्ग पद्मेंदु दर्पणाः
चक्रावर्त्त तिलक मृदंगपट पा
यकाः आवर्त्तः कर्मठो लूतागर्त्त
छत्र मस्पके आलवाल मल्लीजा
ल चर्मकं शाणकादयः ॥
वृत्तानि यथा वृत्तानि वाङ्नारंग
स्कंध धम्मिल मोदकाः रथांगला
वक कंज त्वंग्मि कुंभांडकादयः
कर्णपाश भुजापाशाकृष्टचाप
घटाननं मुद्रिका परिखायोगप
योगपट्ट हार स्रगादयः इति
कविकल्पलतायां २ स्तवकं
कुसुमं ॥ ३
वर्त्तुलं क्ली गृंजनं इति राज
निर्घंटः ॥
वर्त्तुलः पुं कलायविशेषः वाटु
ला इति भाषा यथा कलाय
स्त्रयो भेदा स्त्रिपुटो वर्त्तुलोक
टी इति शब्दमाला ॥
वर्त्तुला स्त्री तर्कुपाटी टेकोर
वाडल इति भाषा इतिहारा
वली ॥
वर्त्तुली स्त्री गजपिप्पली इति
राजनिर्घंटः ॥
वर्त्म[१] क्ली पंथाः इत्यमरः नेत्र

4343

च्छदः इति मेदिनी ॥
वर्त्मनिः स्त्री पंथाः इत्युणादि
कोषः ॥
वर्द्ध क छेदनच्छिदाः इतिकवि
कल्पद्रुमः कवर्द्धयति हृथकर्दी
प्राविसमैव इतिच्छिदोऽत्रपूर्व्वादि
षु सिद्धावस्य पाठश्चुरादिष्वपीत्ये।
इतिस्तत्वं बोधयति तेन कदा
चित् ने रघामौ यगादौ हृथक
इत्यस्य हृथ्यते इत्यादि असत्व
वर्द्धते इत्यादि भेदः इति दुर्गा।
दासः ॥
वर्द्धं क्ली सीसकं इति हेमचंद्रः
वर्द्धः पुं वाम्लागयष्टिका । इति
जटाधरः पूर्त्तिः छेदः । इतिव
र्द्धधात्वर्थदर्शनात् ॥
वर्द्धकः पुं वाम्लागयष्टिका इत्य
मरः पूरके छेदके च त्रि ॥
वर्द्धकिः पुं त्वष्टा इत्यमरः ॥
वर्द्धकी[१] पुं वर्णसंकरजातिवि
शेषः बढई इति हिन्दीभाषा । त
त्पर्यायः त्वष्टा २ वर्द्धकिः ३ त
ता ४ सूत्रधारः ५ रथकारः ६
रथकरः ७ काष्ठतट् ८ काष्ठत
ट् ८ काष्ठतक्षकः ९ । इतिशा
ब्दरत्नावली वर्द्धनं क्ली छेदनं वृ
द्धिः इति मेदिनी ॥

वर्द्धनः त्रि वर्द्धिष्णुः इत्यमरः
वर्द्धनी स्त्री खटी इति मेदिनी
संमार्ज्जनी ॥ इति हेमचंद्रः ॥
सनालपात्रविशेषः बदना इति
भाषा यथा आल्हुः स्त्री कर्क
रीपात्री वर्द्धनीच ललंतिका इति
जटाधरः प्रतिष्ठादिकर्मणित
त्प्रयोजनं यथा प्रतिष्ठा यस्य
देवस्य तदाख्य कलसन्न्यसेत्
ऐशान्यांपूजयेद्याम्ये अस्त्रेणैवतु
वर्द्धनी कलसं वर्द्धनीचैव यस्मा
त्वालोच्यति तथा आसनेतानि
सर्वाणि प्रणवाद्यं जपेद्गुरुः
सूत्रग्रीवं रत्नगर्भवस्त्रयुग्मेनवे
ष्टितं सर्वौषधी गंधलिप्तंपूजये
कलसं गुरुः देवन्तु कलसेए
न्यवर्द्धन्या वस्य मुत्तमं वर्द्धन्या
तस्मादायुक्ते कलसं भ्रामयेदनु
वर्द्धनी धारया सिंचन्नग्रतो धार
येन्नरः अभ्यर्च्य वर्द्धनी कुंभस्थं
डिले देव मर्चयेत् इति गारु
डे ४८ अध्यायः ॥
वर्द्धमानः पुं पंचवृत्तः इत्य
मरः पशुभेदः शरारः ॥
विष्णुः इति मेदिनी जिनवि
शेषः तत्पर्यायः वीरः २ चरम
तीर्थकृत् ३ महावीरः देवार्यः ५

अज्ञातनंदनः ६ इतिहेमचंद्रः ॥
यनिर्लोगरद्दविशेषः । यथा
स्वतिको वर्द्धमानश्च नंद्यावर्त्तादि
योऽपिच इति हलायुधः स्व
नामख्यातदेशः यथा प्राच्यां
मागध शोणौ च वारेंद्री गौड
राढकाः वर्द्धमान तमोलिप्त प्रा
ग्ज्योतिषोदयाद्रयः इति ज्यो
तिस्तत्वेकूर्म्मचक्रं ॥
वर्द्धमानः पुं शरावः इतिधर
णिः वर्द्धमानकः त्रि वृद्धिवि
शिष्टः शरावः इत्यमरः स्वार्थेक
प्रत्यये पोड्वृत्तश्च ॥
वर्द्धीपनं क्ली नाडीछेदनं य
था अर्द्धरात्रे वसोर्धारांपातयो
हुड सर्पिषा ततो वर्द्धीपनंषष्ठी
नामादेः करणं मम कर्त्तव्यं त
त्वाणाशौ प्रभाते नवमीदिने ।
यथा मम तथा कार्यो भगवत्या
महोत्सवः वर्द्धीपनं नाडीछेदनं
इति तिथ्यादितत्वं ॥
वर्द्धितं त्रि प्रस्तं छिन्नं ॥
पूरितं इतिमेदिनी ॥
वर्द्धिष्णुः त्रि वर्द्धनशीलः तत्प
र्यायः वर्द्धनः २ इत्यमरः ॥
वर्द्ध्र क्ली चर्म इत्यमरादिकोषः ॥
वर्द्ध्री स्त्री चर्म्मरज्जुः वरी इति
भाषा तत्पर्यायः नद्ध्री २ वरत्रा ३
इत्यमरः वद्ध्री ४ इति भ
रतः ॥
वर्षः ^ष क्ली रूपं इत्युणादिकोषः ॥
वर्फ गतौ वधे इति कविकल्पद्रु
मः वर्फति इतिदुर्गादासः ॥
वर्म ^न तनुत्रे इत्यमरः ॥
वर्मकंटकः पुं पर्पटः इति राज
निर्घंटः ॥
वर्मकषा स्त्री समन्ता लामारकषा
इति भाषा इतिशब्दरत्नावली ॥
वर्मा ^न पुं क्षत्रियस्य पद्धतिः यथा
शर्मान्तं ब्राह्मणस्य स्याद्वर्मान्तं क्ष
त्रियस्य च गुप्त दासांतकं नामध
शस्तं वैश्य शूद्रयोः ॥ इतिश्रा
द्धतत्वधृतशातातपवचनं ॥
वर्म्मिः पुं मत्स्यविशेषः वानि ।
इति भाषा अस्य मांस गुणाः
गुरुत्वं वृष्यत्वं कषायत्वं । रक्त
पित्तनाशित्वंच इति राजवल्लभः
वर्मितः त्रि वर्मयुक्तः कृतसन्नाहः
तत्पर्यायः सन्नद्धः २ सज्जः ३
दंशितः ४ व्यूढकंकटः ५ इत्यमरः
ऊढकंकटः ६ इति सुभूतिः
वर्म्मूष पुं मत्स्यविशेषः । वा
मिनूष इति भाषा अस्य मांसगु
णाः । वातनाशित्वं स्निग्धत्वं ।

श्रद्दोष नाशित्वंच इति राज
वल्लभः ॥
वर्य्य त्रि प्रधाने इत्यमरः ॥
श्रेष्ठे इतिमुग्धबोधव्याकरणं ॥
वर्य्यः पुं कामदेवः इतिमेदिनी
वर्य्या स्त्री पतिम्वरा । इत्यमरः
कन्या इति मुग्धबोधव्याकरणं
वर्वणा स्त्री नीलमक्षिका इत्य।
मरः नीलाकारवर्णमक्षिकावर्व
णा भरभणिया इतिख्याता म
क्षिकाख्याया इत्येके वरीति व
णातिवर्णा ब्रणवाण भणाशक्षेप
वादित्वादन् याप् किम्वा ब्रूणी
ते प्रतिइत्वं भजते इति वृद्धावि
चि वर् वणाते रणि वणा ततःक
र्म्मधारये वर्वणा इतिटीकायांभ
रतः वर्व्वरं क्ली हिंगलं पीतचंदनं
वोलं इति राजनिर्घंटः ॥
वर्व्वरः पुं पामरः सुचनीवज्रा
ति केशः वावरी इति भाषा ॥
चक्रलः देशविशेषः फंजिका
इति मेदिनी । वृक्षविशेषः ।
कालवाबुर इति भाषा । तत्प
र्य्यायः सुमुखः २ गवज्रः ३ कृष्ण
वर्व्वरकः ४ सुकंदजः ५ गंधपत्रः ६
सुतगंधः ७ सवाहकः ८ अस्यगु
णाः कटुत्वं उसत्वं सुगंधित्वं
वांति विसर्प विष त्वग्दोष ना
शित्वंच इति राजनिर्घंटः
वर्व्वरकं क्ली चंदनभेदः तत्प
र्य्यायः वर्व्वरोत्थं २ श्वेतवर्व्वरकं
३ शीतं ४ सुगंधिः ५ पित्तारिः ६
सुरभिः ७ अस्यगुणाः शीतलत्वं
तिक्तत्वंकफ मारुत पित्त कुष्ट
कंडू ब्रण नाशित्वं विशेषाद्र
क्तदोषजित्वंच इति राजनिर्घंटः
वर्व्वरा स्त्री पुष्पभेदः शाकभेदः
इति मेदिनी मक्षिकाभेदः ।
इतिशब्दरत्नावली ॥
वर्व्वरी ६ स्त्री क्षुद्रवृक्षविशेषः वाउ
वर्व्वरी ३ इति भाषा तत्पर्य्यायः
कवरी ३ भृंगी ४ खरपुष्पा ५
अजगंधिका ६ अजगंधा ७ कव
रा ८ खरभाष्पिका ९ इत्यमरशब्दा
रत्नावल्यौ तस्याःप्रकाराःगुणाः
वर्व्वरी कवरी भृंगी खरडगाज
गंधिका पर्णास स्तच क्षुले त
ठिंजर कुठेरको कालमारः करा
लश्च मल्लकः कृसममल्लिका तत्र
प्राक्लोऽनेकः प्रोक्तो वटपत्र स्त
तोऽपरः वर्व्वरी त्रितयं तूक्तंशी
तं कटु विदा हिच तीक्ष्णं रुचि
करं हृद्यं दीपनं लघुपाकिच
पित्तलं कफ वातास्र दद्रु कृमि

विषापहं इति भावप्रकाशः ॥
वर्व्वरीकः पुं श्राह्मणयष्टिकावृ
तः ऊटिलकुंतलः इत्यमरादि।
कोषः अजगंधिका वाउइतुलसी
इति भाषा इति शब्दचंद्रिका म
हाकालः इति हेमचंद्रः तत्र
पवर्गी यवकाराशो पठितोऽयं।
किंतु मेदिन्यां वर्व्वरीकशब्दस्या
यमर्थः ॥
वर्वा स्त्री वर्व्वरी इतिशब्दचंद्रि
का वर्विः पुं चर्म्मरः इत्यमरादिको
षः वर्व्वरः पुं वृत्तविशेषः वाव
ला इति भाषा तत्पर्यायः युग
लाक्षः २ कंटालुः ३ तीक्ष्णकंटक
४ गोशृंगः ५ पक्तिवीजः ६ दीर्घ
कंटः ७ कफान्तकः ८ दृढवीजः
९ अजभक्षः १० अस्य गुणाः कषा
यत्वं उष्णत्वं कफकासामयरक्ता
तिसार पित्त दाहार्शो नाशित्वंच
इति राजनिर्घंटः ॥
वर्षं पुं क्ली वृष्टिः जंबुद्वीपांशः
वत्सरः इत्यमरः जंबुद्वीपः ।
इति मेदिनी भरतः इति हेम
चंद्रः अथसप्तद्वीपानां वर्ष
विभागो यथा यत्र प्रवृत्तास्तः स
प्तसुवोद्वीपा जंबुप्लक्षशाल्मलिकु
श

वर्षाणि नवजंबुद्वीप नववर्ष

क्रौंच शाक पुष्कर संज्ञाः । ते
षां परिमाणं पूर्वस्मात्पूर्वस्मादुत्त
रोत्तरो यथासंख्यं द्विगुणेन व
हिः समंतत उपक्लृप्ताः ।
क्षारोदेक्षुरसोद सुरोद घृतोदक्षी
रोद दधिमंडोद शुद्धोदाः सप्तजल
धयः सप्तद्वीपपरिखा इवाभ्यंतर
द्वीपसमाना एकैकश्येन यथानु
पूर्वं सप्तस्वपि वहिर्द्वीपेषु पृथ
क् परित उपकल्पिताः तेषु
न जंबूप्लक्षादिषु वर्हिष्मतीपति र
नुव्रतानात्मजानाग्नीध्रेध्मजिह्व यज्ञ
वाहु हिरण्यरेता घृतपृष्ठ मेधा
तिथि वीतिहोत्र संज्ञान् यथा
संख्येनैकैकस्मिन्नेक मेक मेवाधि
पतिं विदधे तस्महत्वा एतेश्लोकाः
प्रियव्रतकृतं कर्म कोऽनुकुर्या
द्विनेश्वरं यो नेमिनिम्नैरकरोच्छा
यां घ्नन्सप्तवारिधीन् ॥
भूतानां प्रभवो निरसनं भूसंस्था
नं कृतं येन सरिद्गिरि वनादिभिः
सीमा च भूतनिर्वृत्त्यै द्वीपे द्वीपे विभा
गशः एवं पितरिसंप्रवृत्ते तदनु
शासने वर्त्तमानआग्नीध्रो जंबुद्वीपौ
कसः प्रजा औरसवद्धर्मावेक्षमाणः पर्यगो
गोपायत् तदुपलभ्य भगवानादिपुरुषःसर

सि गायंती पूर्वचित्तिं नामाप्सरस
मभियापयामास तस्या मुद्भवा
त्मजान् राजवर्ये आग्नीध्रोनाभि
किंपुरुष हरिवर्षेलावृत रम्यक
हिरण्मय कुरु भद्राश्व केतुमा
लसंज्ञान् नवपुत्रानजनयत् आ
ग्नीध्रसुता स्ते मातुरनुग्रहादौत्प
त्तिकेनैव संहननवलोपेताः पित्रा
विभक्ता आत्मतुल्यनामानि यथा
विभागं जंबुद्वीपवर्षाणि बुभुजुः
यस्मिन्नव वर्षाणि नवयोजनसह
स्रायामानि अष्टभि र्मर्यादागिरि
भिः सुविभक्तानि भवंति एषां मध्ये
इलावृतं नामाभ्यंतरवर्षं यस्यना
भ्यामवस्थितः सर्वतः सौवर्णः कुल
गिरिराजो मेरुर्द्वीपायाम समुन्ना
हः कर्णिकाभूतः कुवलय कमल
स्य मूर्द्धनिद्वात्रिंशत्सहस्रयोजन
विततो मूले षोडशसाहस्रं तत्ता
वदंतर्भूम्यां प्रविष्टः उत्तरोत्त
रेणेलावृतं नीलः श्वेतः शृंग
वान् इतित्रयो रम्यक हिरण्मय
कुरूणां वर्षाणां मर्यादागिरयः प्रा
गायता उभयतः क्षारोदावधयोद्वि
सहस्रयोजन पृथव एकैकशः प
र्वस्मात्पूर्वस्मादुत्तरोत्तरो दशांशाधिका
क्षेन दैर्घ्य एवाह्रसंति एवं दक्षिणे

नेलावृतं निषधो हेमकूटो हिमा
लय इति प्रागायता यथानीला
दयः अयुतयोजनोत्सेधा हरिवर्ष
किंपुरुष भारतानां यथासंख्यं
तथैवेलावृत मपरेण पूर्वेणच
माल्यवद्गंधमादनावानीलनिष
धायतौ द्विसहस्रं पप्रथतुः केतु
माल भद्राश्वयोः सीमानं विदधा
ते भारतेप्यस्मिन्वर्षे सरिच्छैलाः
संति वहवः मलयो मंगलप्रस्थो
मैनाक त्रिकूट ऋषभः कूटकः
कोल्लकःसह्यो देव गिरिर्ऋष्यमू
कःश्रीशैलोवेंकटो महेंद्रो वारि
धारो विंध्यः शुक्तिमान्ऋक्षगिरिः
पारियात्रो द्रोण श्चित्रकूटो गोव
र्द्धनो रैवतकः ककुभोनीलो गो
कामुख इंद्रकीलः कामगिरि
रिति चान्ये शतसहस्रशःशैला
स्तेषां नितम्वप्रभवा नदानद्य
श्च संत्यसंख्याताः एतासामपो
भारताः प्रजा नामभिरेव पुनं
तीनामात्मना चोपस्पृशंति चंद्र
वशा ताम्रपर्णी अवटोदा कृत
माला वैहायसी कावेरी वेणापय
स्विनीशर्करावर्त्ता तुंगभद्रा कृष्ण
वेण्णा भीमरथी गोदावरी निर्विन्ध्या
पयोष्णीतापी रेवा सुरसा नर्मदाच

मैरावतीश्चंधः शोणश्च नदौ महानदी
वेदस्मृति र्ऋषिकुल्या त्रिसामा कौशि
की मंदाकिनी यमुना सरस्वती दृशद्व
ती गोमती सरयु रोधवती सप्तवती
सुषोमा शतद्रु श्चंद्रभागा
मरुद्वृधा वितस्ता असिक्नी विश्वेति
महानद्यः अस्मिन्नेव वर्षे पुरुषै
र्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णे
न स्वारब्धेन कर्मणा दिव्यमानुष
नारकगतयो बह्व्य आत्मन आनु
पूर्व्येण सर्वा ह्येव सर्वेषां विधीयं
ते यथा वर्णविधान मपवर्गश्चभ
वति १ अतः परं प्लक्षादीनां प्रमा
णलक्षण संस्थानतो वर्षविभाग
उपवर्ण्यते लक्षो जंबु प्रमाणो द्वी
पाख्यातिकरो हिरण्मय उत्थितो
यत्राग्नि रुपास्ते सप्तजिह्वः तस्या
धिपतिः प्रियव्रतात्मज इध्मजि
ह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य
सप्तवर्षनामभ्य आत्मजेभ्य आक
लय्य स्वयमात्मयोगेनोपरराम
शिवं वयसं सुभद्रं शांतं क्षेम
ममृत मभयमिति वर्षाणि तेषु गि
रयो नद्यश्च सप्तैवाभिज्ञाताः मणि
कूटो वज्रकूट इंद्रसेनो ज्योतिष्मा
न्सुवर्णो हिरण्यष्ठीवो मेघमाल इ
ति सेतुशैलाः अरुणा नृम्णा

ङ्गीरसी सावित्री सुप्तभाता ऋतंभरा
सत्यंभरेति महानद्यः २ प्लक्षस्तु स्वस
मानेनेक्षुरसोदेनावृतो यथा तथा द्वी
पोपि शाल्मलो द्विगुणविशालः
समानेन सुरोदेनावृतः परिवृंक्ते य
त्र ह वै शाल्मली प्लक्षायामा तद्वी
पाधिपतिः प्रियव्रतात्मजो यज्ञवाहुः
स्वसुतेभ्यः सप्तभ्य स्तन्नामानि सप्तव
र्षाणि व्यभजत् सुरोचनं सौमन
स्यं रमनकं देववर्हं पारिभद्रमाप्या
यन मविज्ञात मिति तेषु वर्षाद्रयो
नद्यश्च सप्तैवाभिज्ञाताः स्वरसः शत
शृंगो वामदेवः कुंदः कुमुदः पुष्पव
सहस्रश्रुतिरिति अनुमती सिनी
वाली सरस्वती कुहू रजनी नंदाराके
ति ३ एवं सुरोदाद्बहि स्तद्विगुणः
समानेनावृतो घृतोदेन यथा पूर्वः
कुशद्वीपो यस्मिन्कुशस्तम्बो देव
कृत स्तद्वीपाख्याकरो ज्वलन इवा
परः स्वशष्परोचिषा दिशो विराज
यति तद्वीपपतिः प्रैयव्रतो राजन्
हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः
स्वपुत्रेभ्यो यथाभागं विभज्य स्व
यं तप आतिष्ठत् वसु वसु
दान दृढरुचि नाभिगुप्त स्तुत्यव्र
त विविक्त वामदेवनामभ्य स्तेषां वर्षे
षु सीमागिरयो नद्यश्चाभिज्ञाताः

सप्तैवा चक्रश्चतुः शृंगः कपिलश्चि
त्रकूटो देवानीक ऊर्द्ध्वरोमा द्रवि
ण इति रसकुल्या मधुकुल्या मित्र
विंदा श्रुतविंदा देवगर्भा घृतच्यु
तामंत्रमालेति ॥ तथा बहिः
क्रौंचद्वीपो द्विगुणः समानेनक्षी
रोदेन परित उपक्लृप्तः वृतो
यथा कुशद्वीपो घृतोदेन यस्मिन्
क्रौंचनामा पर्वतराजो द्वीपनाम
निर्वर्तकस्तो तस्मिन्नपि प्रैयव्रतो
घृतपृष्ठो नामाधिपतिः स्वद्वीपे व
र्षाणि सप्त विभज्य तेषु पुत्रनाम
सु सप्त रिक्थादान् वर्षपान्निवेश्य
स्वयं भगवान् भगवतः परममंगल्य
यशस आत्मभूतस्य हरेश्चरणा
रविंद मुपजगाम आमो मधुरुहो
मेघपृष्ठः सुधामा भ्राजिष्ठो लोहि
तार्णो वनस्पति रिति घृतपृष्ठसु
ताः तेषां वर्षगिरयः सप्तैव नद्य
श्चाभिख्याताः शुक्लो वर्द्धमानो भो
जन उपवर्हणो नंदो नंदनः सर्व
तोभद्र इति अभया अमृतौघा आ
र्यका तीर्थवती रूपवती पवित्रव
ती शुक्लेति ५ एवं पुरस्तात् क्षी
रोदात्परित उपवेशितः शा
कद्वीपो द्वात्रिंशल्लक्षयोजनाया
मः समानेन दधिमंडोदेन परी
तः

यस्मिन् हि शाको नाम महीरुहः
स्वक्षेत्रव्यपदेशकः यस्य हि महासु
रभिगंध स्तद्वीप मनुवासयति।
तस्यापि प्रैयव्रत एवाधिपति र्नाम्ना
मेधातिथिः सोपि विभज्य सप्त
वर्षाणि पुत्रनामानि तेषु स्वात्म
जान् पुरोजव मनोजव वेपमानधू
म्रानीक चित्ररेफ बहुरूप विश्वा
धारसंज्ञान् निधाप्याधिपतीन्स्व
यंभगवत्यनंत आवेशितमतिस्तपो
वनं प्रविवेश । एतेषां वर्षमर्या
दागिरयो नद्यश्च सप्त सप्तैव ईशा
न उरुशृंगो बलभद्रः शतकेशरः
सहस्रस्रोतो देवपालो महानस
इति अनघा आयुर्दा उभयस्पृष्टि
रपराजिता पंचपदी सहस्रश्रु
तिर्निजधृति रिति ६ एव मेवद
धिमंडोदात्परतः पुष्करद्वीपस्ततो
द्विगुणायामः समंतत उपकल्पितः
समानेन स्वादूदकेन समुद्रेण
बहिरावृतः तद्वीपमध्ये मानसोत्त
रनामैक एवार्वाचीन पराचीनव
र्षयो र्मर्यादाचलोऽयुतयोजनोच्छ्रा
यायामः यत्रतु चतसृषु दिक्षु च
त्वारि पुराणि लोकपालानां य
दुपरिष्टात्सूर्यरथस्य मेरुं परिभ्र
मतः संवत्सरात्मकं चक्रं देवा

द्दोराबाभ्या परिभ्रमति तद्वीपस्याधि
पतिः प्रियव्रतो वीतिहोत्रो नाम तस्या-
त्मजौ रमणक धातक नामानौ व
र्षवर्त्तीनि युक्त स्वयं पूर्व्ववद्भगव
त्कर्मशील आस्ते तद्वर्षपुरुषा भ
गवन्तं ब्रह्मरूपिणं सकर्म्मकेणाकर्म
णाराधयंति ७ इतिश्रीभागवते ५
स्कंधे १ अ।८।१९।२०अध्यायाः ॥
अपिच कल्पेह्येश्च पुत्रास्त्रयस्त्रा
ह ऊर्त्तिष्ठ ते उते नेदष्टे भ्रातरः
स्मृताः प्रजापति समा दश आग्नी
ध्रश्चाग्निबाहुश्च मेधा मेधातिथि
र्वपुः ज्योतिष्मान्द्युतिमान्हव्यःस
वनो मित्र एववा मेधाग्निबाहु-
मित्रास्त्रयो योगपरायणाः
जातिस्मरा महाभागा न राज्याय
मनो दधुः प्रियव्रतोऽभ्यषिंचत्ता
न्सप्त सप्तस्वपार्थिवान् द्वीपेषुते
षु धर्म्मेण द्वीपांस्तांश्च निबोधमे
जंबुद्वीपेतथाग्नीध्रं राजानं कृत
वान्पिता प्लक्षद्वीपेश्वरश्चापि तेन
मेधातिथिः कृतः शाल्मलेतु वपु
ष्मंतं ज्योतिष्मंतं कुशाह्वये क्रौंच
द्वीपेद्युतिमंतं हव्यं शाकाह्वयेस
ते पुष्कराधिपतिंचैव सवनं कृ
तवान्सुतं सप्तवीतो धातकिश्च
पुष्कराधिपतेः सुतौ द्विधा कृत्वात
तो वर्षं पुष्करे स न्यवेशयत् ह
व्यस्य पुत्राः सप्तासन्नामतस्तान्निबो
ध मे जलदश्च कुमारश्च सुकुमारो
मणीवकः कुशोत्तरो ऽथ मोदा-
की सप्तमस्तु महाद्रुमः तन्नामांका
नि वर्षाणि शाकद्वीपे चकारसः ।
तथा द्युतिमतः सप्त पुत्रांश्चापि नि
बोधमे कुशलोमनोनुग श्चोष्णः प्र
धान श्चांधकारकः मुनिश्च दुंदुभि
श्चैव सप्तमस्तु तथावरः तेषांस्व
नामधेयानि क्रौंचद्वीपे तथाभव
न् ज्योतिष्मतः कुशद्वीपे पुत्रनामा
ङ्कितानि वै । तत्रापि सप्तवर्षाणि
तेषां नामानि मे शृणु ।
उद्भिन्नं वेणुमच्चैव द्वैरथं लम्बने
वच धृतिमत्प्रभाकरंचैव कापिल
श्चापि सप्तमे वपुष्मतः सुताः सप्त
शाल्मलेशास्तु चाभवन् ॥ श्वेत-
श्च हरितश्चैव जीमूतो रोहितस्त
था वैद्युतो मानसश्चैव महोशः
सुप्रभ स्तथा तथैव शाल्मले त
था स्वनामानि तु सप्तवै सप्त
मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य
च तेषां नामांकिते द्वीपेस्तह
र्षे सप्तधि हूते पूर्वं शान्तभयंव
र्षं शिशिरंतु सुखोदयं आन
न्दंच शिवंचैव क्षेमकंच तथा

ध्रुवं सप्तद्वीपादिषु तेषु शाक
द्वीपान्तिकेषु च ज्ञेयः पंचस्वथ
मैत्र वर्णाश्रम विभागजः यानि
किंपुरुषाद्यानि वर्जयित्वा हिमा
ह्वयं स्वाव माभुञ्ज तूपंच वतेथ
र्मश्चनित्यशः पंचस्वेतेषु वर्षेषु स
र्वसाधारणं स्मृतं आग्नीध्राय।
पिता पूर्व्वं जंबुद्वीपं ददौ द्विज
तस्य पुत्रा बभूवु र्हि प्रजापति
समानव ऽष्टौ नाभिरितिख्यातस्त
स्य किंपुरुषोऽनुजः हरिवर्ष स्तृती
यस्तु चतुर्थोऽभूदिलावृतः रम्य।
श्च पंचमः पुत्रो हिरण्यः षष्ठ उच्य
ते कुरुस्तु सप्तमस्तेषां भद्राश्व।
श्चाष्टमः स्मृतः नवमः केतुमाल
श्च तन्नाम्नावर्षसंस्थितिः यानि
किंपुरुषाद्यानि वर्जयित्वा हिमा
ह्वयं तेषां स्वभावतः सिद्धिः स्व
ल्पायासप्रयत्नतः विपर्ययो नते
षु जरा मृत्यु भयं नच धर्मा
धर्मौ नतेषास्तां नोत्तमाधममध्य
मा: नवैचतुर्युगावस्थास्वास्वामाः
न्ततदोनच आग्नीध्र सुतो नाभेश्च
ऋषभोऽभूत्सुतो द्विज ऋषभाद्
रतोजज्ञे वीरः पुत्रशताद्वरः सो
भिषिच्यर्षभः पुत्रं महाप्रव्रज्यमा
स्थितः तपस्तेपे महाभागः पुलहा
श्रमसंश्रयः हिमाह्वं दक्षिणं
वर्षं भरताय ददौ पिता तस्माच्च
भारतं वर्षं तस्य नाम्ना महात्मनः
भरतस्याप्यभूत्पुत्रः सुमति र्नाम
धार्मिकः तस्मिन्राज्यं समावेश्य
भरतोपिवनं ययौ एतेषां पुत्रपौ
त्रैश्च सप्तद्वीपन वसुन्धरा ।
प्रियव्रतस्य पुत्रैस्तु भुक्ता स्वायंभ
वेऽन्तरे एष स्वायंभुवः सर्गः क
थितस्ते द्विजोत्तम पूर्वमन्वन्तरेश्वा
स्य किमन्यत् कथयामिते इतिमा
र्कंडेयपुराणे स्वायंभुवमन्वन्तरेभु
वनकोषः अध्यायश्च सूत उवाच
केतुमाले नराकालाः सर्वे पनसभो स
जनाः स्त्रियश्चोत्पल पत्राभ्जी
वंति च वर्षायुतं भद्राश्वे पुरु
षा शुक्लाः स्त्रियश्चंद्रांशु सन्नि
भाः दशवर्ष सहस्राणि जीवं
ति चाम्रभोजनाः रम्यके पुरुषा
नार्यो रमंते रजतप्रभाः दशव
र्षसहस्राणि शतानि दशपंच च
जीवंति तत्र सत्वस्था न्यग्रोधफ
लभोजनाः हिरण्मये हिरण्या
भाः सर्वे च लकुचाशनाः एका
दशसहस्राणि शतानि दशपंच
च जीवंति कुरुवर्षे तु श्रृंगाभाषाः
क्षीरभोजनाः सर्वे मिथुनजातास्त्र

नित्यं स्तवनिषेविनः चंद्रद्वीपे
महेवं यजंति शाश्वतं शिवं ॥
तथा किंपुरुषे विप्रा मानवा हेम
सन्निभा दशवर्षसहस्राणि जीव
वंति सत्वभोजनाः यजंति सततं
देवं चतुर्मूर्तिं चतुर्मुखं ध्यानेन म
नः समाधाय सदा वा भक्तिसंयु
ताः तथा च हरिवर्षेऽपि महा
रजत सन्निभाः दशवर्षसहस्रा
णि जीवंतीक्षुरसाशिनः तत्र ना
रायणं देवं विश्वयोनिं सनातनं
उपासते सदा विष्णुं मानवा वि
ष्णुभाविताः तत्र चंद्रप्रभं शुभ्रं
शुद्धस्फटिकनिर्मलं विमानं वा
सुदेवस्य पारिजातवनाश्रितं चतु
र्द्वारमनोपमं चतुस्तोरणसंयु
तं प्राकारैर्दशभिर्युक्तं स्वर्गंयेच
समुद्भवं स्फाटिके मंडपे युक्तं दे
वराजगृहोपमं स्वर्णस्तंभसह
स्रैश्च सर्वतः समलंकृतं। हेमसो
पानसंयुक्तं नानारत्नोपशोभितं।
दिव्यसिंहासनोपेतं सर्वशोभासं
मन्वितं सरोभिः स्वादुपानीयै
र्नदीभिश्चोपशोभितं नारायण
परैः शुद्धैर्वेदाध्ययन तत्परैः
योगिभिश्च समाकीर्णं ध्यायद्भिः
पुरुषं हरिं स्तवद्भिः सततं मंत्रै
र्नमस्यद्भिश्च माधवं तत्र देवादि
देवस्य विष्णो रमिततेजसः गा
ज्ञानः सर्वकालस्तु महिमानं प्रकु
र्वंति गायंति चैव नृत्यंति विलासि
न्यो मनोरमाः स्त्रियो यौवनशा
लिन्यः सदा मंडनतत्पराः ॥
इलावृते पद्मवर्णा जंबुफलरसा
शिनः त्रयोदशसहस्राणि वर्षा
णां वै स्थिरायुषः भारते तु स्त्रियः
पुंसो नाना वर्णाः प्रकीर्तिताः
नानादेवार्चने युक्ता नानाकर्माणि
कुर्वते परमायुर्मतं तेषां शतवर्षा
णि सुव्रताः नवयोजनसाहस्रं व
र्षमेतत्प्रकीर्तितं कर्मभूमिरियं
विप्रा नराणामधिकारिणां म
हेन्द्रो मलयः सह्यः शुक्तिमांस्त
पर्वतः विन्ध्यश्च पारिपात्रश्च सप्तात्र
कुलपर्वताः इंद्रद्वीपः कशेरुमां
स्ताम्रवर्णो गभस्तिमान् नागद्वी
पस्तथा सौम्यो गंधर्वस्त्वथ वारुणः
अयं तु नवमस्तेषां द्वीपश्च सागरा
वृतः योजनानां सहस्रं तु द्वीपोऽ
यं दक्षिणोत्तरः पूर्वे किरातास्त
स्यांते पश्चिमे यवनास्तथा ब्रा
ह्मणाः क्षत्रिया वैश्या मध्ये शू
द्राश्च भागशः इज्यायुध वणिज्याभि
र्वर्तयंत्यत्र मानवा स्रवंते पावनानद्यः

पर्वतेभ्यो विनिःसृताः । शतद्रु
श्चंद्रभागा च सरयु यमुना तथा
इरावती वितस्ता च विपाशा देवि
का कुहूः गोमती धूतपापा च
बाहुदा च दृषद्वती कौशिकी लो
हिता चैव हिमवत्पादनिःसृताः
वेदस्मृति र्वेदवती वृत्रघ्नी त्रिदिवा
तथा पर्णाशा वंदना चैव सदा
नीरा मनोरमा चर्मण्वती तथा
नूपा विदिशा वेत्रवत्यपि शिप्रा
ह्यवन्त्यपि तथा पारियात्राश्रया
स्तथा नर्मदा सुरसा शोणा दशार्णा
च महानदी मंदाकिनी चित्रकूटा
तामसा च पिशाचिका चित्रोत्पला
विपाशा च मंजुला वालुवाहिनी हि
मवत्पादजा नद्यः सर्वपापहरान्दोणा
तापी पयोष्णी निर्विन्ध्या शीघ्रो
दा च महानदी वेण्या वैतरणी चैव
वलाका च कुमुद्वती तोया चैव म
हागौरी दुर्गान्तःशिला तथा वि
न्ध्यपादप्रसूतास्तु नद्यः पुण्यज
लाः शुभाः ऋषिकुल्या त्रिसामा च
मंदगा मंदगामिनी कृपा पलाशि
नी चैव ऋषिका वंशकारिणी
शुक्तिमत्पादसंजाताः सर्वपापहरा
नृणां आसां नद्युपनद्यश्च शतशो
द्विजपुंगवाः सर्वाः पापहराः पु
ण्याः स्नानदानादि कर्मसु तास्वि
मे कुरुपंचाला मध्यदेशादयो जनाः
पूर्वे देशादिकाश्चैव कामरूपनि
वासिनः पुंड्राः कलिंग मगधा
दाक्षिणात्याश्च सर्वशः तथापरा
न्ताः सौराष्ट्राः शूद्राभीरास्तथार्बु
दाः मालका मालवाश्चैव पारिपा
त्रनिवासिनः सौवीराः सैन्धवा हूणाः
शाल्वाः कल्पनिवासिनः मद्रावा
सास्तथाम्बष्ठाः पारसीकास्तथैव च
आसां पिबंति सलिलं वसंति स
रितां सदा चत्वारि भारते वर्षेषु
गानि कवयोऽब्रुवन् कृतं त्रेता
द्वापरश्च कलिश्चान्यत्र न क्वचित्
यानि किंपुरुषाद्यानि वर्षाण्यष्टौ
महर्षयः नतेषु शोको नायासो नो
द्वेगः क्षुद्भयं च सत्तमाः प्रजा नि
रातंकाः सर्वदुःखविवर्जिताः रम
न्ते विविधै र्भावैः सर्वाश्च स्थिरयौ
वनाः इति कूर्मपुराणे ४८ अध्या
यः अथ वामनपुराणे १३ अध्या
ये इष्टं प्रभवादि षष्टिवर्षाणि
वत्सराद्ये दृष्टानि । तत्र
षष्टिधा कृत्वा देवो यथा संवत्स
र प्रमाणेन देवाः कृत्वा पुरोहि
ताः यष्टव्या विधिना तान स
वेकामप्रसिद्धिदाः महाभय वि

नाशाय महारिपुवधाय च महास्त
दयकामाय महासिद्धिफलाय च
पूजयेल्लघ्नेदेवी षष्ठिधा परमे
श्वरी ग्रस्त नाग कृता पीडा पु
त्रवत्स ग्रहोद्भवा संवत्सर महादे
ष जन्मर्क्ष मुपमर्दना केतूत्का
शनि राहुत्थ भौमार्क सित भानु
जाः ग्रामयेद्यजमानस्य देवीहो
ततस्तस्याश्च मंत्रादि विधानेन
महास्नानाभिषेचनैः चंद्र सूर्य
गुरुभौमार्क फलरत्नाभिपूजनैः म
हत्तामंगले यत्ने विधिना पूजि
ता मुने उत्पात क्षोभ निर्घात वि
कृतानां प्रमाथ कथयामि महा
भाग श्रृणुष्वैकमनाधुना मंगला
विजया भद्रा शिवा शांति धृतिः क्ष
मा ऋद्धिवृद्धिरुन्नतिः सिद्धिस्तुष्टिः पु
ष्टिः श्रियाउमा दीप्तिः कांतिः य
शो लक्ष्मीरीश्वरीति प्रकीर्तिता विं
शतास्वेतमा देव्यः सत्वभावव्यव
स्थिताः प्रथमं संस्थिता वत्सरे
सिद्धिप्रदायिकाः २ ब्राह्मी ज
यावती शाक्री अजिता चापरा
जिता जयंती मानसी मायादिभिः
श्वेताः विमोहनी शारणा कौशि
की गौरी विमला ललितालसा।
ग्रहंधनी क्रिया दुर्गा राजसा इति
वायुना मध्यभागे स्थिता देव्यो यु
गानामशुभापहाः २ काली
रौद्री कपाली च घंटाकर्णा मधू
दिका वज्ररूपा सर्पाच त्रिनेत्रा
त्रिशूलाम्बिका माहेश्वरी कुमारी च
वैष्णवी स्वरप्रजिताः । वै
वस्वती तथा घोरा कराली विक
टादिभिः चर्चिका चैव यातस्था
देव्या त्रैलोक्यविक्षताः पूजित
या मुनिश्रेष्ठ सर्वकामप्रसादिकाः
२ त्रिदशाहर गंधर्व यक्षरक्षो
गणो द्भूताः । भावकालाश्र
याः कार्य द्रव्य रूप फल प्रदाः
प्रत्येकशः समस्ता वा कर्मण्यामुनि
सत्तम अथवा युगभेदेन पंच
पंच प्रपूजिताः ॥ इति देवी
पुराणे संवत्सरदेवता विंशति
विधिनामाध्यायः ॥
वर्षकरी स्त्री झिल्लिका इति हे
मचंद्रः ॥
वर्षकेतुः पुं रक्तपुनर्नवा इति रा
जनिर्घंटः ॥
वर्षकोषः पुं दैवज्ञः । इति
शब्दरत्नावली मासः इति शब्द
माला ॥
वर्षजं त्रि वृष्टिजाते वत्सरजा
ते जंबुद्वीपजाते द्वीपांश ॥

जातं मेघजातं । इति शब्द
र्वजनतयातो ईषत्स्येन निष्पन्ने ॥
वर्षणं क्ली वृष्टिः इति शब्दरत्नाव
ली वर्षणिः स्त्री वर्तने कृतिः इत्यु
णादिकोषः ऋतः वर्षणं इति
संक्षिप्तसारोणादिवृत्तिः ॥
वर्षपर्वतः पुं वर्षविभाजकगिरिः
यथा हिमवान्हेमकूटश्च निष
धो मेरुरेव च चैत्रः कर्णीच
शृंगीच सप्तैते वर्षपर्वताः इति
हारावली
वर्षपाकीन पुं आम्रातकः इति
हेमचंद्रः ॥
वर्षपुष्पा स्त्री सहदेवीलता इति
राजनिर्घंटः ॥
वर्षप्रियः पुं चातकपक्षी इति
त्रिकांडशेषः ॥
वर्षवरः पुं षंटः खोजा इति
भाषा इत्यमरः ॥
वर्षवृद्धिः स्त्री जन्मतिथिः इति
स्मार्तव्याख्या दर्शनात् अथ ज
न्मतिथि कृत्यं तन्मलमासेन कर्त
व्यं चांद्रमासीयत्वेन सावकाश
त्वात् नच तस्य सौरमासीयत्वं त
थात्वे तन्मासे तत्तिथेः कदा।
चिदप्राप्तेः तद्वर्षे तत्कृत्य लो
पापत्तेः नचेष्टापत्तिः प्रतिव।
त्सरं तद्विधानात् यथा ब्रह्मपुरा
णे गर्गेश्च सर्वेषां जन्मदिवसे स्ना
तै मंगलपाणिभिः गुरुदेवाग्निवि
प्राश्च पूजनीयाः प्रयत्नतः । स्व
नक्षत्रंच पितरौ तथादेवप्रजापतिः
प्रतिसंवत्सरंचैव कर्तव्यश्च महो
त्सवः स्नाते तिलस्नानैः प्रलाप
तिवेद्या तथाच तत्र स्मिमधि
कृत्य तिलोद्वर्ती तिलस्नायी ति
लहोमी तिलप्रदः तिलभक्षित
ापीच षट्तिली नावसीदति
मंगलपाणिभिः अभिप्रेतार्थसि
द्धिमंगलं तद्हेतुतया गोरोचनादि
कमपि मंगलं तेन घृतगुग्गुल्वादि
पाणिभि रित्यर्थः तथाच कृत्य
चिंतामणौ गुडगुग्गुल तिलानद्याज
न्यग्रन्थेश्च वह्नेन गुग्गुलं तिम्व
सिद्धार्थ दूर्वा गोरोचनायुतं संपूज्य
भाव विंजेशो महर्षि प्रार्थयेदिदं
चिरजीवी यथात्वं भो भविष्यामि
तथा मुने रूपवान्वित्तवांश्चैव श्रिया
युक्तश्च सर्वदा मार्कंडेय महाभा
ग सप्तकल्पांतजीवन । आयु
विप्रार्थ सिद्धार्थ मस्माकं वरदो भव
स्वनक्षत्रंचेति स्वनक्षत्रं अश्विन्या
द्यन्यतम जन्मकालीन नक्षत्रं नाम
करेण तथा दर्शनात्वत्समासाग्रस्

पुराणोक्त प्रणवादि नमोंतेन ना
मैव पूजाविधानात् । तदन्ते स्व
नक्षत्राय नम इत्युल्लेख्य पूजयाम
र्घ्यानंतरं पाद्यमाह मत्स्यपुराणे
अर्घ्यं पाद्यादिकं तत्र मधुपर्कं प्र
योजयेत् पाद्यानंतरं मर्घ्यमा
ह नरसिंहपुराणे पाद्यं चैव ततो
यया चतुर्थार्घ्यं प्रदापयेत् तृ
तीयया पुरुषसूक्तीय तृतीयया ऋ
चा अभयक्रमदर्शनादित्याविक
ल्पः इतिश्रीदत्तः श्रीपतिव्यवहार
निर्णये नवाम्बरधरो भूत्वा पूजये
च्च चिरायुषं तथा द्विभुजं जटिलं
सौम्यं सुवृद्धं चिरजीविनं मार्कण्डेयं
नरो भक्त्या पूजयेत्प्रयत स्तथा ॥
ततो द्रौणिं कृपं व्यासं रामं द्रौणिं कृ
पं बलिं प्रह्लादं च हनूमंतं वि
भीषणं मथार्चयेत् रामोत्र परशु
रामः चिरजीवि साहचर्यात् द्रौ
णिरश्वत्थामा तथा स्वनक्षत्रं जन्म
तिथिं प्राप्य संपूजयेन्नरः षष्ठीं च
दधिभक्तेन वर्षे वर्षे पुनः पुनः
योगि याज्ञवल्क्यः ध्यायेन्नाराय
णं नित्यं स्नानादिषु च कर्मसु
तद्विष्णो रिति मंत्रेण स्नायादप्सु
पुनःपुनः गायत्रीं वैष्णवीं ह्येषा वि
ष्णोः संस्मरणाय वै ध्यायेत्स्मरेत् स
च मंत्रः

तद्विष्णोः परमं पदं सदा पश्यंति
सूरयः दिवीव चक्षुराततम् वाम
नपुराणे सर्वमंगल मंगल्यं वरे
ण्यं वरदं शुभं नारायणं नमस्कृ
त्य सर्वकर्माणि कारयेत् ॥ संकल्पा
करणे निंदामाह भविष्यपुराणे
संकल्पेन विना राजन्यत्किंचित्
कुरुते नरः फलं चाल्पाल्पकं तस्य
धर्मस्यार्द्धक्षयो भवेत् ब्रह्मपुरा
णे प्रणवादि समायुक्तं नमस्का
रांतकीर्तितं स्वनाम सर्वसत्वानां
मंत्र इत्यभिधीयते अनेनैव विधा
नेन गंधपुष्पे निवेदयेत् एकैक
स्य कुर्वीत यथोद्दिष्टं क्रमेण त
गंधपुष्पमात्रं पंचोपचाराद्यसंभ
वे मंत्रात्कृतं ब्रह्मणे प्रोक्तं भक्त्या
लक्षगुणोत्तरं भक्ति मंत्र समेतेन
कोटि कोटिगुणोत्तरं सर्वत्र क
र्मोपदेशकं दक्षिणादिभि रर्च
येत् तथोपदेष्टारमपि पूजयेत्
ततो गुरुं दक्षिणाभिः गुरु यत्र
नैवेद्यताफला क्रिया इतिमत्स्य
पुराणवचनात् ततः कर्मा
नंतरं तिलहोमस्तु पूजितदेवता
नामभिः कार्यः एकैकां देवतां
राम समुद्दिश्य यथा विधि वत
र्यन्तेन धर्मेण नाम्ना च प्रणवादिना

होम द्रव्य मष्टैकैकं शतसंख्येन
होमयेत् इति विष्णुधर्मोत्तरदर्श
नात् एवं होमे स्वाहांतता च म
न्त्रस्य स्वाहा वमाने जुहुयात्प्राय
न्ते मंत्रदेवतां । इतिस्मृतः । अ
प्रशक्तो ब्रह्मवैवर्तपुराणे होमोत्र
ह्यादि पूजायां शतमष्टोत्तरं भ
वेत् अष्टाविंशति रष्टौ वा यथा
शक्ति विधीयते स्कांदे त्विदं।
नखकेशानां मैथुनाधान मेव च
आमिषं कलहं हिंसा वर्षवृद्धौ
विवर्जयेत् अध्वानं अध्वगमनं।
कलह मित्यत्र संगर मितिक्वचि
त्पाठः संगरं युद्धं वर्षवृद्धौ जन्म
दिने हवमत्स्यः स्नाने जन्मनि सं
क्रांतौ श्राद्धे जन्मदिने तथा अस्पृ
श्यस्पर्शने चैव न स्नायादुष्णवारि
णा जन्मनि पुत्रजन्मनि ज्योतिष
स्नात्वा जन्मदिने स्त्रियं परिहरन्
प्राप्नोत्यभीष्टं श्रियमत्स्यान्नोच्च
यतो हिंसाया दूरतःप्रायुषश्चि
रं वर्धते प्राकृत स्त्वादति यस्तु
संरिपवो नाशं प्रयांति ध्रुवं सं
कैयस्तु निरामिषं सहिभवेज्जन्म
न्तरे पठितः दीपिकायां जन्मर्क्षे
युक्ता यदि जन्ममासे यस्य भवं ज
न्मतिथि भवेच्च भवंतितद्दस्तस्ये
व

यावन्नैरुज्य सम्मान सुखानि तस्य
कृतांत कुजयो वारे यस्य जन्मति
थि भवेत् जन्मतोयोगसंप्राप्नोः
विघ्नं तस्य पदे पदे कृतांत कु
जयोः शनिमंगलयोः । तस्य स
र्वौषधि स्नानं ग्रह विप्रसुराचनं
ग्रहानुद्दिश्य होमो वा ग्रहाणां
प्रीतिमिच्छता सौरारयो दिनेषु
क्ता देया त्वत्ते त काचनं मुरा
मांसी वचा कुष्ठं शैलेयं रजनीद्व
यं शटी चंपकस्तथा सर्वौषधिग
णः स्मृतः रजनीद्वयं हरिद्रा दारु
हरिद्रेति एतेषां एतादीनां ग्रहाणां
कषायावयव ग्रहणे मत्स्यपुराणे
विष्णुधर्मोत्तरयो स्तथा दर्शनात् त
यथा एषां पत्राणि साराणिमू
लानि कुसुमानि च एवमादीनि चा
न्यानि कषायाख्या गणाःस्मृतः आ
युर्वेदोक्त परिभाषा अंगेषु न्युक्ते
विहितेव मूलं भागेष्वनुक्ते सम
तादियेषा तत्क्रमः तिलोद्वर्त
ने तिलयुक्तजलेन स्नानं नववस्त्र
परीधानं गुग्गुल निम्ब सिद्धार्थ दूर्वा
गोरोचनात्मक जन्मग्रन्थिं दक्षिण
पाणौ बध्नीयात् गुरुदेवाग्निविप्रा
श्च पूजनीयाः स्वनक्षत्रं पूजनीयं श्री
मंच हत्वा स्नानी श्रवणा यक्तौ

वे मृगशिरो नपुंसि स्यात् पुंसि च
पुनर्वसू पुष्यो मूलं तेषां स्त्रियां शे
षास्तु इत्यनेन लिङ्गनिर्णयः ॥
जन्मनक्षत्रादीनां गोपनमाह विष्णु
धर्मोत्तरे गोपयेज्जन्मनक्षत्रं धनसा
रं गृहे मलं प्रभो रूप्यमानं च
तस्य दुश्चरितं च यत् ॥ ध
नसारं धनश्रेष्ठं मलं छिद्रं पि
तरौ प्रजापतिः सूर्यो गणपति
र्मार्कण्डेयश्च पूजनीयः तत्र पार्थ
नमन्त्रौ चिरजीवी यथा त्वं भोः
विष्यामि तथा मुने रूपवान् वि
त्तवांश्चैव श्रियायुक्तश्च सर्वदा मा
र्कण्डेय महाभाग सप्तकल्पान्तजी
वन आयुरिष्टार्थसिद्ध्यर्थमस्माकं
वरदो भव ततो व्यास परशुरामा
श्वत्थाम कृप बलि प्रह्लादह
नूमद्विभीषणाः पूजनीयाः षष्ठ्य
पि पूजनीया येन लोके यानि भू
तानि स्थावराणि चराणि च ब्रह्मवि
ष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे
इति मत्स्यपुराणीयं रक्षार्थं पठेत्
पितृ मातृ पादग्रहण कर्मस्तु।
विष्णुपुराणाद्बोध्यः यथा कृतोपि
वसुदेवस्य पादौ जग्राह सत्वरः
देवक्याश्च महाबाहु बलदेवस्य ।
हायनान् पञ्च सहस्रैन्त पितृमाता

गौरवेणातिरिच्यते इति मनुव
चने पितृ शेषतया यत्सहस्रं मातृ
गौरव मुक्तं तन्मोषणरूपार्थं
अत्र एव मनुः मृते भर्त्तरि पुत्र
स्तु वाच्यो मातृ रक्षिता इति
वाच्यो गर्हणीयः गुड तुषभि
तपाले तिमंत्रः सतिलं गुडसंमि
श्रं मंजल्यर्द्धमितं पयः मार्कण्डेय
वरं लब्ध्वा पिवाम्यायुष्यहेतवे ॥
अत्र वैदिकेतर मन्त्रपाठे शूद्रादे
रप्यधिकारः जन्मतिथेः प्रोक्त
ब्रह्मपुराणीयपत्नात्तरणीमासतमा
सादरः जन्मतिथे हर्षयस्मिल्लाभे
तु देवी पुराणं पुराद्या वर्षवृद्धि
श्च सप्तमी पार्वतीप्रिया ।
देव हृदय मीसंतेन तत्र तिथि
र्यदि स्यात्तस्या तदा जन्मभसंयुते
व अस्तगता भेन दिनद्वेषपि पू
र्व्यापराया भवतीह यत्नात् भेन
रुतं परवचनं वृद्धजन्मार्कं देपि
सूर्वाह्न तिथि नक्षत्र लाभ पवे
दुलत्सने नक्षत्रे खंडिते येन मा
सः कालस्तु कर्मणः नक्षत्र क
र्मणयेव तिथिकर्म तथैव च इ
ति हृद् स्मृतिवचनात् खंडिते
खंडद्वय युक्ते येन नक्षत्र ।
खंडेन विहितकालः प्राप्तः

नक्षत्र द्वैधे तु बौधायन मार्क
ण्डेयौ तत्रतत्र मदोराज्ञं यस्मि
न्नक्षे गतो रविः । यस्मिन्नु
देति सविता नक्षत्रं दिनेस्मृ
तं इति तिथ्यादितत्त्वं ॥
वर्षाः स्त्रीभूम्नि स्वनामख्यातऋ
तुः तत्पर्यायः प्रावृट् २ इत्यमरः
घनकालः ३ जलार्णवः ४ प्रवृट्
५ मेघागमः ६ घनाकरः ७ इति
शब्दरत्नावली प्रावृषा ८ इति
त्रिकाण्डशेषः सच ऋतुः सौर
श्रावणभाद्रमासद्वयात्मकः श्रा
द्धस्य प्रमाणं। यथा। तपस्तप
आषाढादिमासचतुष्टयात्मकश्च
स्यौ शैशिरावृतुः मधुश्च माधवश्च
वासन्तिकावृतुः शुक्रश्च शुचि
श्च ग्रैष्मावृतुः अयनैतदुत्तरायणं दे
वानां दिनं नभाश्च नभस्यश्च
वार्षिकावृतुः इषश्च ऊर्जश्च शा
रदावृतुः सहाश्च सहस्यश्च हैम
न्तिकावृतुः अयनैतद्दक्षिणायनं दे
वानां रात्रिः इति मलमासतत्त्व
धृतास्मृतिः शेषस्य प्रमाणं त
त्रचातुर्मास्यव्रतनियमश्च यथा
वराहे आषाढ शुक्लद्वादश्यां यो
गामासान् यथापि वा चातुर्मास्य
व्रतारंभ कुर्यात्कर्कटे संक्रमे ॥

अभावे तु तत्रोकेपि मंत्रेण
नियमं व्रती कार्त्तिके शुक्ल
द्वादश्यां विधिवत्तत्समापयेत् च
तुर्थ्यापि हि तद्वीर्णं चातुर्मास्यव्र
तं नरः कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां
तत्समापयेत् ॥ मासे च
तरे वार्षिकान्मासान् देवस्यो
त्थापनावधि मधुस्वरो भवेत्त्रिं
न्नरो गुड विवर्ज्जनात् तैलस्य व
र्जनादेव सुन्दराङ्गः प्रजायते ॥
कटुतैलपरित्यागे शत्रुनाशः प्र
जायते लभते सन्ततिं दीर्घां
स्थालीपाक मभक्षयन् सदा मुनिः
सदा योगी मधुमांसस्य वर्जनात्
निष्पापि नीरुगोजस्वी विमुक्त
श्च जायेत एकान्तरोपवासेन वि
ष्णुलोक मवाप्नुयात् धारणान्न
खलोम्नोश्च गंगास्नाने दिने दिने
ताम्बूलवर्ज्जनाद्भोगी रक्तकंठश्च
जायते घृतत्यागात्सुलावण्यम
वै स्निग्ध वपु भवेत् फलत्या
गात् मतिमान्बहुपुत्रश्च जायते
नमो नारायणायेति नक्तान्नपान
जं फलं पादाभिवन्दनाद्विसो र्ल
भेद्गोदानजं फलं एवमादि
व्रतैः पार्थ तुष्टिमायाति केशवः
सनत्कुमारः । इदं व्रतं

मया देव गृहीतं व्रतमेव
निर्विघ्नां सिद्धि माप्नोतु प्रसन्ने
त्वयि केशव गृहीतेस्मिन्व्रते दे
व यद्यपूर्णे त्वहं म्रिये तन्मे भ
वतु संपूर्णं त्वत्प्रसादाज्जनार्द
न समाप्तोच इदं व्रतं म
या देव कृतं प्रीत्यै तव प्रभो
न्यूनं संपूर्णतां यातु त्वत्प्र
सादाज्जनार्दन अत्रैव यति
मधिकृत्य कात्यायनगृह्ये पक्
वान्नं वसेद्ग्रामे नगरे पंचरात्रकं
वर्षाभ्योन्यत्र वर्षासु मासांश्च
चतुरो वसेत् एतदशक्त वि
षयं ऊर्ध्वं वार्षिकाभ्यां मासाभ्यां
नैकस्मिन्वसेत् इति शांखोक्तेः
इति तिथ्यादितत्त्वं वर्षासु च।
एतानीयानि यथा वर्षासु घन
शिखिसमय हंसगमाः पंककंद
लोद्भेदौ जाती कदम्ब केतकं च
फानिल शिम्बगा इतिप्रीतिः इ
ति कविकल्पलतायां ५स्तवके
३ कुसुमं ॥
वर्षांशः पुं मासः इति त्रिकां
डशेषः ॥
वर्षाघोषः पुं महामंडूकः इति
राजनिर्घंटः
वर्षांगः पुं मासः इति हारा।
वली ॥
वर्षांगी स्त्री पुनर्नवा । इतिशब्द
रत्नावली ॥
वर्षाभवः पुं रक्तपुनर्नवा इति
राजनिर्घंटः वर्षाजातेत्रि ॥
वर्षाभूः पुं भेकः इत्यमरः ॥
इंद्रगोपः इतिराजनिर्घंटः ॥
भूलता इति मेदिनी ॥
वर्षाभूः स्त्री पुनर्नवा इति मेदि
नी भेकी इति भरतधृतरूपरत्ना
करः वर्षाभवे त्रि ॥
वर्षाभ्वी स्त्री भेकी इत्यमरः ॥
पुनर्नवा इत्यमरमाला भानुदीक्षि
वर्षामदः पुं मयूरः इति केचित्
वर्षाभःपारणात्रलः पुं चातकपक्षी
इतिकेचित् ॥
वर्षारात्रः पुं वर्षाकालीनरात्रिः
इति पुंलिंगसंग्रहटीकायां भ
रतः ॥
वर्षार्चिः[स] पुं मंगलग्रहः इतिश
ब्दरत्नावली ॥
वर्षालंकायिका स्त्री एक्का इत्य
मरटीकायां भरतः
वर्षावसानः पुं शरत्कालः इति
राजनिर्घंटः
वर्षिकं त्रि वर्षासंवपि वर्षसंव
धि वर्षाशब्दात् वर्षशब्दाच्च परेण

4361

सिक प्रत्ययेन निष्पन्नं ॥
वर्षिष्ठः त्रि अतिशयवृद्धः अय
मयोरतिशयेन वृद्धः इत्यर्थे वृद्ध
स्यानेव र्षादेशे इष्ट प्रत्ययेन नि
ष्पन्नः ॥
वर्षीयान्[स] त्रि अतिवृद्धः त
त्पर्यायः देशमी २ ज्यायान् ३
इत्यमरः ॥
वर्षुकः त्रि वर्षणकर्त्ता वृषधा
तोरुकञ् प्रत्ययेन निष्पन्नः ॥
वर्षुकाब्दः पुं वर्षणशीलमेघः
इतिजटाधरः ॥
वर्षेजः त्रि वर्षाकालजातः वा
स्तरजातः सप्तम्यंत वर्षशब्दपूर्वक
जनधातो डप्रत्ययेन निष्पन्नः ।
वर्षोपलः पुं मेघभवशिला ।
करका इत्यमरः ॥
वर्ष्मन् क्ली शरीरं प्रमाणं इत्य
मरः प्रमाणमेवोन्नति रिति
स्वामी इयता इति भरतः अ
तिसंदराकृतिः इति मेदिनी ॥
वर्ष्म क्ली शरीरं इति द्विरूप
कोषः ॥
वर्ह क वधे दीप्तौ इति [illegible]
कविकल्पद्रुमः रेफोपधःकवर्ह
यति इति दुर्गादासः ॥
वर्ह ङ श्रैष्ठ्य इतिकविकल्पद्रु
मः
ङ वर्हते धनी श्रेष्ठः स्यादि
त्यर्थः
वर्हं क्ली मयूरपिच्छं इत्यमरः
ग्रंथिपर्णं इति भरतः पत्रं
इति शब्दरत्नावली ॥
वर्हणं क्ली पत्रं इतिशब्दर
त्नावली ॥
वर्हिः[स] पुं अग्निः इति मेदिनी
दीप्तिः इत्युणादिकोषः यज्ञः
इति हेम चंद्रः चित्रकं इत्यम
रः ॥
वर्हिः[स] पुं क्ली कुशाः इतिमे
दिनी वर्हिः[स] क्ली ग्रंथिपर्णं
इतिशब्दरत्नावली ॥
वर्हिपुष्पं क्ली ग्रंथिपर्णं इ
त्यमरटीकायां भरतः
वर्हिः शुष्माने पुं अग्निः इत्यमरः
वर्हिः ष्ठं क्ली वर्हिष्ठं ह्रीवेरं ।
इत्यमर भरतौ ॥
वर्हिकुसुमं क्ली ग्रंथिपर्णं इति
शब्दचंद्रिका ॥
वर्हिणः पुं मयूरः इत्यमरः
वर्हिणवाहनः पुं कार्त्तिकेयः
इतिहलायुधः ॥
वर्हिध्वजा स्त्री चंडी इति त्रि
कांडशेषः ॥
वर्हि पुष्पं क्ली ग्रंथिपर्णं इत्यमरः

वर्हिर्ज्योतिः पुं वह्निः इति
हेमचंद्रः ॥
वर्हिर्मुखः पुं देवता इत्यमरः
वर्हिश्शुष्मा पुं वह्निः इत्यमरः
वर्हिषदः पुं पितृगणविशेषः
यथा अयज्वानश्च यज्वनः पितरो
ब्रह्मसुताः अग्निष्वात्ता वर्हिष
दो द्विधा तेषां व्यवस्थितिः इति
कौर्मे १२ अध्यायः । अपिच
अपसव्यं ततः कृत्वा सव्यं जानु
च भूतले अग्निष्वात्तांस्तथा सो
म्यान् हविष्मन्तस्तथोष्मपान्
सुकालिनो वर्हिषद आज्यपां
स्तर्पयेत्ततः तर्पयेच्च पितृन्भक्त्या
सतिलोदकचंदनैः दर्भपाणिः ।
सुविधिना हस्ताभ्यां तर्पयेत्ततः
अत्र केचित्पितृपर्यायाभिदेवादि
त्वपितृणामपि अंजलित्रयदा
नं तदसत् कव्यवालं नलं
सोमं यम मर्यमनं तथा अ
ग्निष्वात्ताः सोमपाश्च वर्हिषदः
सकृत्सकृत् इति वृद्धदेवपरि
शिष्टे विशिष्टैकांजलिविधा
नात् इत्याह्निकतत्त्वं ॥
वर्हिष्केशः पुं अग्निः इति
प्राचिक्षपाशब्ददर्शनात् ॥
वर्हिष्ठं क्ली ह्रीवेरं इत्यमरः

वल मि ऊ संवरणे इतिकविक
ल्पद्रुमः मिवलयति वालयति
ऊ वलते धनं लोकः संवृणोतीत्य
र्थः इतिदुर्गादासः ॥
वलं क्ली सैन्यं इत्यमरटीकायांरा
यमुकुटः
वलभिः स्त्री वडभी इति शब्दर
वलभी त्नावली अमरटीकायांच
वलयः पुं क्ली स्वर्णादिरचितप्रको
ष्ठाभरणं वाला इति भाषा तत्प
र्यायः आवापकः २ परिहार्यः ३
कटकः ४ इत्यमरः ॥ पारिहा
र्यः ५ शंखकः ६ इतिशब्दरत्ना
वली कंकुः ७ कंडलं ८ इति ज
टाधरः ॥
वलयः पुं अष्टादशगलरोगांतर्ग
तगलरोगविशेषः यथा वला
सएवायतमुन्नतंच शोथं करोत्यन्न
गतिं निवार्यतं सर्वथैवाप्रतिवा
र्य वीर्यं विवर्जनीयं वलयं वद
ंति अथ गलरोगाणां चिकित्सा
कंठरोगेष्वसृङ्मोक्षस्तीक्ष्णै र्नस्या
दि कर्मभिः चिकित्सकः चिकित्सा
न्ते क्रमात्तांश्च समाचरेत् ।
क्वाथं दद्याच्च दार्वी त्वङ्निम्ब
तार्क्ष कलिंगजं ॥ हरीतकी
कषायो वा हितो माक्षिक संयुतः

4283

कटुकातिविषा दारु पाठामुस्ता
कलिंगकाः गोमूत्र क्वथिताः पी
ताः कंठ रोगविनाशनाः म्हती
का कटुका व्योषा दार्वीत्वक्त्रि
फला घनं पाठा रसांजनं दूर्वा ते
जोह्वति सच्चूर्णितं क्षौद्रयुक्तं
विधातव्यं गलरोगे महौषधं ॥
योगास्त्वेते त्रयः प्रोक्ता वात
पित्त कफापहाः जवायजे ते
जवतीं सपाठां रसांजनं दारु
निशां सकुस्तां क्षौद्रेण कुर्यात्तु
टिकां मुखेनतां धारयेत्सर्वगलामये
षु इति भावप्रकाशः ॥
वेला कंकणं ॥ इति
जटाधरः ॥
वलयितं त्रि वेष्टितं इत्यमरः
वला स्त्री स्वनामख्यातौषधवि
शेषः वाला इतिवाडियाला इ
ति भाषा तत्पर्यायः वाट्यालकः
२ वाट्यपुष्पी ३ समांशा ४ विलता
५ एताः श्वेतवलाः इत्युक्ता १ अ
तिवला २ पीतपुष्पी ३ महावला
४ एताः पीतवलाः इतिरत्नमाला
अस्या गुणाः स्निग्धत्वं आयुष्यत्वं
वृष्यत्वं ग्राहित्वं । वायु पित्त ।
नाशित्वंच इति राजवल्लभः ।
वलति संवृणोति बलवलसंवरणे

अच् वला वलमसाः साध्यत्वेना
स्तीत्यचि वा इति रायमुकुटकृत
कुलचन्द्रियेन पर्वतीयवकारा
दि रत्नस्यवकारादिरियं ॥
विद्याविशेषः यथा मंत्रग्रामं
गृहाणत्वं वला मतिवलां तथा
नश्रमो नज्वरो वा ते न रूपस्य वि
पर्ययः नच सुप्तं प्रमत्तं वा धर्ष
यिष्यन्ति नैर्ऋताः नवाह्वोः सदृ
शो वीर्ये पृथिव्यामस्ति कश्चन
त्रिषु लोकेषु वा राम नभवेत्स
दृशस्तव वला मतिवलां चैव
पठतस्तात राघव नसौभाग्येनदा
क्षिण्ये नज्ञाने बुद्धिनिश्चये नोत्तरे
प्रतिवक्तव्ये समो लोके तवानघ
एतद्विद्याद्वये लब्धे न भवेत्सदृ
शस्तव वला चातिवला चैव स
र्वज्ञानस्य मातरो क्षुत्पिपासे नते
राम भविष्येते नरोत्तम ।
वलामतिवलांचैव पठतस्तात
राघव विद्याद्वय मधीयाने य
शश्चाप्यभवेद्भुवि पितामहसु
ते ह्येते विद्ये तेजःसमन्विते ॥
प्रदातुं तव काकुत्स्थ सदृशस्त्व
हि पार्थिव कामं बहुगुणाः सर्वे
त्वय्येते नात्र संशयः तपसा संभृ
ते चैते बहुरूपे भविष्यतः ।

ततोरामो नलंस्पृष्ट्वाप्रसन्न वद
नःशुचिः प्रतिजग्राहते विद्ये
महर्षे भावितात्मनः विद्यासमु
दितो रामः शुशुभे भीमविक्रमः
इति रामायणे वाल्मीकीये वा
लकांडे २२ सर्गः ॥
वलाकः पुं } वकजातिः इति
वलाका स्त्री } भरतः क्षुद्रवक
जातिः इति सारसुंदरी ॥ त
त्पर्यायः विसकण्ठिका २ इत्यम
रः विसकंठा ३ वलाकी ४ ।
इति शब्दरत्नावली ॥ काकापि
का ५ लिंगलिका ६ इति जटा
धरः वलेन शाम्या हूर सूर्दमक
ति वलवत्तु समवर्णो वलाकाद
यश्चत्वाकन्वलाका इति रायमु
कुटकृत स्मृतिन्दियेन पवर्गी य
वकारादि रन्यवकारादिश्चापंश
हुः अस्यामांसगुणाः वायुना
शित्वं स्निग्धत्वं हृष्मलत्वं हु
ष्यत्वं वलपित्तहरत्वं हिमत्वंच
इति राजवल्लभः ॥
वलाहकः पुं मेघः मुस्तकः
इत्यमरः पर्वतः दैत्यविशेषः
नागविशेषः इति मेदिनी ॥
कौशलस्य घोटकविशेषः यथा
संदनस्य शीतानंदः साम्यपिव्वास
दारुकः भुरंगाः शैब्य सुग्रीवमे
घपुष्पवलाहकाः इति त्रिकां
डशेषः ॥
वलिरः त्रि केकरः इत्यमरः ॥
वलिशं क्ली वडिशं इतिशब्दरत्ना
वली ॥
वलिशिः } स्त्री वडिशी इतिशब्द
वलिशी } रत्नावली ॥
वलीकं क्ली पुं लम्बितरणोत्करः
छोलइच इति भाषा इत्यमरः जटा
धरो अस्यपर्यायः पटलप्रांतशब्देऽ
ष्टव्यः ॥
वल्लूकं क्ली पद्ममूलं पक्षिविशे
षे पुं इति सिद्धांतकौमुद्यामुणा
दिवृत्तिः उणादिकोषश्च ॥
वलूलः त्रि वलवान् वलशब्दात्तो
ऽस्त्येत्यादिना ऊलप्रत्ययेन निष्प
नः इति मुग्धबोधव्याकरणं ॥
अस्य वर्गीयवकारादित्वेपि तत्रा
लिखितत्वादत्रलिखनं ॥
वल्क भाषणे इतिकविकल्प
द्रुमः कवल्कयति भाषणं कथ
नं इतिदुर्गादासः ॥
वल्कं क्ली वल्कलं शल्कं इति
मेदिनी शब्दरत्नावल्यौ खंडे
इति विश्वः ॥
वल्कः पुं पट्टिकालोध्रः इति

राजनिर्घंटः ॥
वल्कतरुः पुं पूगवृक्षः इतिरा
जनिर्घंटः ॥
वल्कद्रुमः पुं भूर्जवृक्षः इतिरा
जनिर्घंटः ॥
वल्कलं क्ली त्वचं डालचिनि इ
तिभाषा इतिराजनिर्घंटः ॥
वल्कलः पुं क्ली वृक्षत्वक् वा
कल इतिभाषा तत्पर्यायः त्वक्
१ वल्कं २ इत्यमरः त्वचा ४ त्व
चं ५ चोचं ६ चोलकं ७ शल्कं ८
छल्लकं ९ छल्लिः १० छल्ली ११ चो
लकं १२ इतिशब्दरत्नावली ॥
वल्कला स्त्री शिलावल्का इति
राजनिर्घंटः ॥
वल्कलोध्रः पुं पट्टिकालोध्रः
इतिराजनिर्घंटः ॥
वल्कवान् पुं मत्स्यः इतित्रि ।
कांडशेषः वल्कयुक्ते त्रि ॥
वल्किलः पुं कंटकः इति शब्द
रत्नावली ॥
वल्कुतं क्ली वल्कलः इतिश
ब्दचंद्रिका ॥
वल्ग गतौ इति कविकल्पद्रु
मः वल्गति अयंप्लवगताविति
भट्टमल्लः इतिदुर्गादासः ॥
वल्गनं क्ली प्लुतगमने वक्रभा
षणे
वल्गाधातो र्भावे ऽनट् प्रत्यये
ननिष्पन्नं ॥
वल्गा स्त्री दंमालिका लागाम
इतिभाषा तत्पर्यायः अवक्षेपणी
२ रश्मिः ३ कशा ४ इति हेम
चंद्रः ॥
वल्गितं क्ली अश्वस्यविशेषगमनं
तत्र वेगेन विक्रिमोपरिचरणं ।
इत्यमरभरतौ ॥ गमने ॥ वक्र
भाषणेच ॥
वल्गुः पुं छागः सुंदरे त्रि
इतिमेदिनी ॥
वल्गुकं क्ली चंदनं विपिनं
पणं रुचिरे त्रि इतिजयः ॥
तत्र पवर्गी यवकारादौ लिखितो
ऽयंशब्दः अस्माभिस्तु तत्रालिखि
तत्वादत्र लिखितः ॥
वल्गुपत्रः पुं वनमुद्गः इतिशब्द
चंद्रिका ॥
वल्गुला स्त्री वाकुची पक्षिविशे
षः शेषस्यपर्यायः चक्राविद्धा २ दि
वांधा ३ निशाचरी ४ खेचरी ५
दिवास्वापा ६ मांसेष्टा ७ मातृवा
हिनी ८ इतिराजनिर्घंटः ॥
वल्गुलिका स्त्री तैलपायिका यथा
वल्गुलिका मुखविष्ठा परोष्णीतै
लपायिका इति हेमचंद्रः

वल्भ ङ भक्षणे इति कविकल्पद्रुमः वल्भते अन्नं लोकः इति दुर्गादासः ॥

वल्भनं क्ली भक्षणं इति हेमचन्द्रः वल्मिकः पुं क्ली वल्मीकः इति शब्दरत्नावली ॥

वल्मिकिः पुं क्ली वल्मीकः इत्यमरटीकायां भरतः ॥

वल्मीकः पुं क्ली उपीकाकृतमृत्तिकास्तूपः तत्पर्यायः वामलूरः २ नाकुः ३ इत्यमरः वल्मिकः ४ वाल्मीकः ५ वाल्मीकिः ६ वाल्मिकिः ७ इति तट्टीकायां भरतः उपलकः ८ शक्रमूर्द्धा ९ कृमिशैलकः १० इति शब्दरत्नावली तन्मृत्तिकया शौचनिषेधो यथा विष्णुपुराणे वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवां अन्तःप्राण्यवपन्नाच हलोत्खातां न कर्दमां इत्याह्निकाचारतत्त्वं देवप्रतिष्ठायां स्नानात्सर्वविलिदोषप्रशमनार्थे तन्मृत्तिकया स्नानं यथा वल्मीकमृत्तिकाभिस्तु गोमयेन समस्मना । स्नानयेत् शिखिसंस्पर्शदोषाणामुपशान्तये वल्मीकमृदादिस्नाने मन्त्रविशेषानुपादानात् मन्त्रानादेशे गायत्रीतिस्मृतपाणिलिखितात् गायत्र्या तन्मूलमन्त्रेण वा स्नानं कारयितव्यं तथा स्नानं यथा स्नापयेत् प्रथमं देवं तोयैः पंचविधैरपि पंचामृतैः पंचगव्यैः पंचमृत्पिंडकैरपि केऽपि मृत्तिका कथितास्तत्र पर्वताग्रात्खुरस्पर्शच कुशवल्मीक संभूतैः दन्तिचक्र मृदीरिते ॥ इति देवप्रतिष्ठातत्त्वं ॥

वल्मीकः पुं वाल्मीकिमुनि रोगविशेषः इति विश्वः अथ वल्मीकरोगस्य लक्षणं ग्रीवांसकक्षा करपाददेशे संधौ गले वा त्रिभिरेव दोषैः ग्रन्थिः सवल्मीकवदक्रियाणां जातः क्रमेणैव गतप्रवृद्धिः मुखैरनेकैस्तु तितोदवद्भिः विसर्पवत्सर्पतिचोन्नताग्रैः वल्मीकमाहुर्भिषजो विकारं निष्प्रत्यनीकं चिरजं विशेषात् ग्रीवाककक्षादिका । अंसः स्कन्धः कक्षा बाहुमूलं गलः कण्ठः वल्मीकवदित्यनेन प्रचुरशिखरत्वमुच्चत्वमवगाढमूलत्वञ्च सूच्यते निष्प्रत्यनीकं उपचारायोग्यं अथ तस्य चिकित्सा शस्त्रेणोत्कृत्य

वल्मीकं क्षाराग्निभ्यां प्रसाधयेत् विधानेनार्बुदोक्तेन शोधयित्वा च रोपयेत् वल्मीकं तु भवेद्यस्तु नातिरूढं महन्नवं तस्य संशोधनं कृत्वा शोणितं मोक्षयेत् भिषक् कुलत्थिकानां मूलेन दूर्व्या लवणेन च आरेवतसमं लेप्यं दन्तीमूले तथैव च श्यामामूले सपत्रैः शाकमिश्रैः प्रलेपयेत् स्विन्नेऽपेक्ष्य छेदं वा स्रु भिषक् तमुपनाहयेत् पक्वं तद्वा विजानीयाद्गतीः सर्वा य। था क्रमं अभिज्ञाय गतीश्छित्वा प्रदिह्यान्मतिमान्भिषक् संशोध्य दुष्टमांसानि क्षारेणाप्रतिसारयेत् व्रणं विशुद्धं विज्ञाय रोपयेन्मतिमान्भिषक् ॥ मनःशिलाल भल्लातसूक्ष्मैलागुरुचन्दनैः जातीपल्लवकल्केश्च निम्बतैलं विपाचयेत् वल्मीकनाशनं ह्येतद् बहुच्छिद्रं बहुव्रणं पाणिपादोपरिष्टाच्च छिद्रैर्बहुभिरावृतं वल्मीकं यत्नोपायं साध्यं तद्वि द्विजानता मतः शिलाद्यं तैलं इति भावप्रकाशः ॥

वल्मीकिः पुं वल्मीकः इतिश
ब्द

माला ॥

वल्मीकशीर्षं क्ली स्रोतोऽञ्जनं इति राजनिर्घण्टः

वल्मीकूटं क्ली वल्मीकः इति हेमचन्द्रः ॥

वल्ल त क लूनिसलो इति वल्ल कविकल्पद्रुमः वल्लयति अववल्लत् इति दुर्गादासः वल्ल ङ संवरणे इति कविकल्पद्रुमः ङ वल्लते स्वनं लोकः संवृणोतीत्यर्थः इति दुर्गादासः

वल्लः पुं गुञ्जात्रयपरिमाणं यथा वल्लस्त्रिगुञ्जो धरणञ्च ते द्वे। इति लीलावती द्विगुञ्जा । इति वैद्यकपरिभाषा सार्द्धगुञ्जा । यथा गोधूमद्वितयोन्मिता तु कथिता गुञ्जा तथा सार्द्धया वल्लो वल्लद्वयेन भिषजो माषो मतस्त्वन्तरितादि राजनिर्घण्टः ॥

वल्लकी स्त्री वीणा इत्यमरः ॥ सल्लकीवृक्षः इति राजनिर्घण्टः ॥

वल्लभः पुं दयितः अध्यक्षः ॥ सल्लक्षणतुरङ्गमः इति मेदिनी

वल्लभः त्रि प्रियः अध्यक्षः इत्यमरः अध्यक्षोऽत्र गवाध्यक्षः इति स्वामी ॥

वल्लभपालकः त्रि अश्वरक्षकः

इतिभूरिप्रयोगः
वल्लभा स्त्री प्रिया यथा प्रेय
सीदयिताकांता प्राणेशावल्ल
भाप्रिया हृदयेशा प्राणसमाप्रे
ष्ठाप्रणयिनीचसा इतिहेमचंद्रः
वल्लवं क्ली कृष्णागुरुः इतिराज
निर्घंटः मंजरिः इतिशब्दरत्ना
वली गह्वरे कुंजे । इति
धरणिः ॥
वल्लरिः स्त्री मंजरी इत्यमर
वल्लरी भरतो मेथिका त्रिव
मूले इति राजनिर्घंटः ।
वल्लवः पुं गोपः इत्यमरः ।
भीमसेनः इति मेदिनी ॥
वल्लभः त्रि सूपकारः इत्यमरः
वल्लवी स्त्री वल्लवजाति स्त्री वल्ल
वपत्नी तत्पर्यायः आभीरी २
गोपिका ३ गोपी ४ महाशूद्री
५ गोपालिका ६ इति शब्दरत्ना
वली ॥
वल्लि स्त्री लता इत्यमरटीका।
वाभरतः पृथिवी इतिशब्दमा
ला वल्लिकंटकारिका स्त्री अग्नि
दमनीक्षुपः इति राजनिर्घंटः
वल्लिदूर्वा स्त्री मालादूर्वा इति
राजनिर्घंटः॥
वल्लिशाकरणीति स्त्री मूलपोती

इति राजनिर्घंटः ॥
वल्लिसूरणः पुं अत्यम्लपर्णी इ
ति राजनिर्घंटः ॥
वल्ली स्त्री लता इत्यमरः सैव
भूमिप्रसारा वर्षमात्रस्थायिनी कु
ष्मांडाद्या अजमोदा । इति
मेदिनी कैवर्तिका ॥ चव्य।
इति राजनिर्घंटः ॥
वल्लीगडः पुं मत्स्यविशेषः ।
भोला इति बालिकडा इति च
भाषा अस्यगुणाः लघुत्वं ।
रूक्षत्वं अनभिष्यंदित्वं मलघ्न
त्वं स्थैर्यत्वं कफनाशनत्वंच ॥
इतिराजवल्लभः ॥
वल्लीजं क्ली मरीचं इति राज
निर्घंटः प्रावृचंद्रिके ॥
वल्लीबदरी स्त्री भूबदरी इतिरा
जनिर्घंटः ॥
वल्लीमुद्गः पुं मकुष्टकः इतिरा
जनिर्घंटः
वल्लीवृत्तः पुं सालवृत्तः इति
राजनिर्घंटः ॥
वल्लरं क्ली कुंजं मंजरी क्षेत्रं ।
निर्जलस्थाने शाद्वलः इतिहे
मचंद्रः गहनं इति मेदिनी
विस्र धरणि शब्दरत्नावलिषु
वल्लरमिति ॥

वल्लूरं त्रि आतपादिनाशुष्कमांसं
इत्यमरः शूकरमांसं । इति
मेदिनी वनक्षेत्रं ॥ वाहनं।
कुषरभूमिः इति हेमचंद्रः ॥
वल्सा स्त्री धात्रीवृक्षः इतिहारा
वली ॥
वल्वजः पुं उलपः इतिहेमचं
द्रः बाब इति ख्यातस्तृणं ।
इत्यमरः वलते भुवं वेष्टयति।
विशादित्वात्व प्रत्यये वल्वःपर्व
तः तत्र जाता वल्वजा इत्यन्ये ।
स्वभावात्बहुत्वे वल्वजाः एको
वल्वज इति भाष्यकारवचनादेक
त्वमपि अत एव समनोःस्तरोव
ल्वजादेर्वेति पाणिकबहुत्वार्थ
क्रमहीश्वरसूत्र इति तट्टीकायांभ
रतः ॥
वल्वजा स्त्री तृणविशेषः साबे
वाग इति हिंदीभाषा तत्पर्या
यः दृढपत्री २ तृणेक्षुः ३ तृण
वल्वजा ४ मौंजीपत्रा ५ दृढक्षुर
णा ६ पानीयाश्रा ७ दृढत्वरा
८ अस्यागुणाः मधुरत्वं शीतत्वं
पित्तदाहतृषापहत्वं वातप्रको
पनत्वं रूक्षत्वं कंडूकृत्कादि
त्वंच इतिराजनिर्घंटः
वक्र क त्विषि इतिकविकल्पद्रुमः

क वक्रयति त्विषि दीप्तौ इति
दुर्गादासः
वक्र ड॰ श्रेष्ठे इतिकविकल्पद्रु
मः ड॰ वक्रते धनीश्रेष्ठः स्यादि
त्यर्थः इति दुर्गादासः
वश ल स्पृहि इतिकविकल्पद्रु
मः ल वष्टि धनं लोकः इतिदु
र्गादासः ॥
वशं क्ली इच्छा प्रभुत्वं आय
त्तता इति शब्दरत्नावली ॥
वशः त्रि आयत्तः इतिशब्दरत्ना
वली ॥
वशः ~~त्रि आयत्तः इति शब्दरत्ना~~
पुं इच्छा इति संकीर्णवर्गे अमरः
वेश्यागृहे आयत्तता प्रभुत्वे इति
त्रिकांडशेषः जन्म इति हेमचंद्रः
वशका स्त्री वश्यनारी इतिश
ब्दरत्नावली ॥
वशक्रिया स्त्री वशीकरणं तत्प
र्यायः संवदनं २ इत्यमरः ॥
मणिमंत्रौषधैर्वशीकरणं संवदनं
संस्वो वदि वशीकरणे भावे
ऽनट् संवदना च इति केचित्
करणेऽनटि वशक्रियासाधने
मणिमंत्रादावपि जयप्रियः संव
दनं यत स्यादिति रखाः संवन
नं इति पाठांतरं इतितट्टीकायां

भरतः ॥
वशगा स्त्री वशीभूता इतिश
ब्दरत्नावली ॥
वशम्वदः त्रि वशंवदतियः आ
यत्तकरवाक्यवक्ता इतिमुग्धबो
धव्याकरणं ॥
वशा स्त्री वंध्या सुता योषा।
स्त्रीगवी करिणी इतिमेदिनी ॥
वंध्यागवी इत्यमरः ॥
वशात्मकः पुं शिशुमारः इति
शब्दरत्नावली ॥
वशापायी पुं कुक्कुरः इतिशब्द
माला ॥
वशि क्ली वशित्वं इति शब्द
माला ॥
वशिकः त्रि शून्यं इत्यमरः ॥
वशिका स्त्री अगुरुः इतिशब्द
चंद्रिका
वशिता स्त्री वशित्वं इति हेम
चंद्रः ॥
वशित्वं क्ली आयत्तत्वं शिवस्या
ष्टैश्वर्यांतर्गतैश्वर्यविशेषः यथा
अनिमालघिमा प्राप्तिःप्राकाम्यंम
हिमा तथा ईशित्वंच वशित्वंच
तथा कामावसायिता वशित्वं
स्वातंत्र्यं येन स्वतंत्र भवति।
इत्यमरटीकायां भरतः ॥

वशिनी स्त्री शमीवृक्षः हन्ता।
इति शब्दचंद्रिका ॥
वशिरं क्ली सामुद्रलवणं । इत्य
मरः ॥
वशिरः पुं गजपिप्पली । इत्य
मरः ॥चव्यं इति राजनिर्घंटः
अपामार्गः इति मेदिनी वचा।
इति शब्दचंद्रिका ॥
वशिष्ठः पुं स्वनामख्यातमुनि त
त्पर्यायः अरुंधतीजानिः २ इति
हेमचंद्रः अरुंधतीनाथः ३ । वा
शिष्ठः ४ इति शब्दरत्नावली स
तु ब्रह्मणः प्राणाज्जातः तस्यभार्या
कर्दमकन्या अरुंधती पुत्राः सप्तर्ष
यः इतिश्रीभागवतमतं ॥ अ
पिच वशिष्ठस्य तयोर्जयांसमु
ज्ज्वलनीजनत् कन्यांच पुंडरीकाक्षां
सर्वशोभा समन्वितां ॥
रजोगात्रोर्ध्ववाहुश्च सवनश्चानवस्य
था सुतपाःशुक्र इत्येते सप्तपु
त्रा महौजसः सर्वे तपस्विनः प्रो
क्ताः सर्वे यज्ञेषु भागिनः ।
अयमन्वानस्य यन्त्वानः पितरो ब्रह्म
णः सुताः इति कौर्म्मे १२ अध्यायः
मित्रावरुणयोः पुत्रः यथा ।
इति हृष्टा नरेंद्रेण कथ्यतामिति
भूपते वशिष्ठं चोदयामासः स

मस्ता स्ति तपोधनाः मुनिभिः
प्रेरितः सोपि यथावद्यजमान
सः योगमास्थाय सुचिरं मैत्रा
वरुणिरात्मवान् अगच्छ मित्रा
वरुणयोश्चैव कुंडिनो ये परि
क्रुता प्रकार्षया त्वयैवास्य व
शिष्ठा नाम विश्रुताः एते एता
वशिष्ठानां स्मृता ह्येकादशैवतु
अष्टावेते समाख्याताब्रह्मण्याश्च
नसाःसुताः इति वह्निपुराणे हु
तयेनुविधि [illegible] भीवा
ध्यायो ॥
वशीकरणं क्ली मनिमंत्रौषधे
रायत्तीकरणं इतिभरत नराथ
सै अस्यपर्यायः वशक्रियाश
ब्दे द्रष्टव्यः तत्साधनौषधानिय
था ब्रह्मदंडी वचा कुष्ठप्रियंगु।
नागकेशरं दद्यात्तांबूलसंयुक्तं
स्त्रीणां मंत्रेण तद्वशं ॐनारा
यणायेति स्वाहा तांबूलेद्वीय
तेयस्स वशीभावं संशयः गेह
रि हरि स्वाहा १ गोदंतहरितालं
च संयुक्तंकाकजिकया हरणेकृ
त्वा यस्य शिरोदीयते सवशीभवे
त् २ खंजरीटस्यमांसन्तु मधुना
सहपेषयेत् रक्तकालेयोतिले
पात्तु रुषोदासतामियात् ३ अगुरु
गुग्गु

लंचैव नीलोत्पलसमन्वितं गु
डेन धूपयित्वातु राजद्वारे प्रियो
भवेत् श्वेतापराजितामूलं पिष्टं
रोचनया युतं यं पश्येत्तिलकेनै
व वशीकुर्यात्नृपालये ५ ॥
काकजिका वचाकुष्ठं निम्बपत्रंस
कुंकुमं आत्मरक्तंसमायोज्य वशी
भवति मानवः ६ ॐ नमः सर्व
सत्वेभ्यो नमः सिद्धिं कुरु कुरु
स्वाहा सप्तभिर्मंत्रितं कृत्वा
करवीरस्य पुष्पकं स्त्रीणामग्र
भ्रामयेच्चत्वा आगहेसा वशाभवेत्
ब्रह्मदंडी वचा पत्रं मधुना सह पे
षयेत् अंगलेपाच्च वनिता नान्य
भर्तारमिच्छति ८ मूलं जयंत्या वक्त्र
स्थं व्यवहारे जयप्रदं ९ भंगराज
स्य मूलेन पिष्ट शुक्रेण संयुतं अ
क्षिणी चांजयित्वातु वशी कुर्यां
जगं किल १० अपराजिता शिफां
दद्यान्नीलोत्पल समन्वितां तांबू
लेन प्रदानाच्च वशीकरणमुत्तमं
चतुःषष्टिकलाः प्रोक्ताः कामशा
स्त्रे वशीकराः आलिंगनाद्यात्स्त्री
णांकुर्यादे वशीकराः ११ रोच
नानागपुष्पाणि बिल्वपुष्पं प्रियं
गवः कुंकुमं चंदनेचैव तिलकेन
जगद्वशी १२ दुरालभा वचाकुष्ठ

कुंकुमंच शतावरी तिलतैलेनसं
युक्तं योनिलेपात्वशो नरः ॥
१४ निम्बकाष्ठस्य धूपेन धूपयित्वा
भगंस्त्रियः सुभगास्यात्साच रुद्र
पति दासो भविष्यति १५ मा
हिषं नवनीतंच कुष्ठंच मधुय
ष्टिका सौभाग्यं भगलेपात्स्यात्प
तिर्दासो भवेत्तदा १६ पंच र
क्तानि पुष्पाणि पृथग्जात्या स
माहरेत् कुंकुमेन समायुक्तं काल
रक्तसमन्वितं पुष्पेण वसपिष्टा
च रोचनाया समेकृतः स्त्रिया पुं
साकृतो रुद्र तिलकोऽयं वशी।
करः १७ ब्रह्मदंडीति पुष्पेण याने
पाने वशीकरः १८ ॐ गं गणप
तयेस्वाहेति अयं गणपतेर्मंत्रोय
नविद्याप्रदायकः इम मष्ट सहस्रं
च जप्त्वा बद्धा शिखां ततः व्यव
हारेजयःस्यात्त्व शतनाप्याद्रवणं
प्रियः १९ तिलानांत घृताक्तानां
हस्तानां रुद्र होमयेत् अनेनव
सरस्तेन राजा वश्य स्त्रियैर्दिनैः
२० क्लींकारं सविसर्गंच प्रातः
सूर्यसमद्युतिं स्त्रीणां ललाटेवि
न्यस्य वश्यतां नयाति ध्रुवं २१
यस्त्व जुहुयाद्युतं सुचिःप्रयत
मानसः दृष्टिमात्रे स्वतानस्य वश
मायाति

योषितः २२ मनःशिला पत्र
कंच सगोरोचन कुंकुमं एभिः
कृतेच तिलकेसदा स्त्रीवशात्प्नि
यात् २३ सहदेवो भृंगराजः
सितापराजिता वचा तेनैव तिल
कंकृत्वा त्रैलोक्यं वशतां मियात्
२४ गोरोचना मीनपित्त माभ्या
च कृतवर्तिकां यः पुमां स्तिल
कं कुर्याद्धामहस्तकनिष्ठया ॥ स
करोति वशं सर्वं त्रैलोक्यं नात्रसं
शयः २५ गोरोचनामहादेव स्त्रत
शोणितभाविता ततः कृताच
तिलकान्नानवं यन्निरीक्षते ते
च सर्वं वशं कुर्यान्नात्र कार्याऽवि
चारणा २६ नागेश्वरंच शैलेयं
त्वकपत्रंच हरीतकी चंदनं काष्ठ
सुलेना रक्तशालीसमन्विता पते
धूपा वशकरः स्मरबाण इवेश्वर
२७ रतिकाले महादेव पार्वती
प्रियशंकर निजशुक्रं गृहीत्वा
तुवामहस्तेन यःपुमान् कामिनी
रणां वामं लिम्पेत्स्यात्स्त्रियाःप्रि
यः २८ सैंधवंच महादेव पा
रावतमलं मधु एभि र्लिप्तं
लिंग वैकामिनीवशमावहेत् २५
पुष्पाणि पंचरक्तानि गृहीत्वा
यानिकानिच तंदुलंच प्रियंगुवषेषये

4373

देकयोगतः अनेन लिप्तलिंग
सकामिनी वशतां मियात् स
इतिगारुडे १८३ १८९ १८६
अथ्याथाः अथात्संप्रवक्ष्या।
मि वशीकरणं मुत्तमं । येन
विज्ञानमात्रेण मंत्राःसिद्ध्यंतित
त्क्षणात् प्रतिमां कारयेद्देविप
त्रेन रजतस्य च पत्नाष्टेनस
हेमानि साध्यस्य प्रतिमांशिव
हरिताले पत्नार्द्धेच हरिद्राच
र्णकं तथा गंधे कृत्वा सार्द्ध
हस्ते तन्निःक्षिप्य सुंदरि र
त्ता सनं तत्र कृत्वा विशेषकु
तमानसः चतुर्दिक्ष महेशानिप
ताकाविनिवेशयेत् रक्तासने
चोपविश्य पूर्वास्यो जपमारभेत्
पूजाया नियमं देवि जानीहि
मंगनंदिनि तिलपर्णादिकं तत्र
स्थापयेत्तत्र देशिकः आणप्र
तिष्ठमंत्रेणप्राणान्संस्थापये
दुधः अथःकृत्वा सुजपित्वा स
वालमालया जपेत् दशसाहस्र
जापेन प्रयोगार्होभवेत्ततः प्रण
वंसर्वमुखाद्यं मायाबीजंद्वितीय
कं कामंवल्लाकिनीयुक्तंवामक
र्णेन्दुभूषितं ततोरक्तपदेमुयाद्या
मुंडे तदनंतरं साध्यनाम ततोत्वस्य
वशमानय

तस्यं वह्निजायावधि मंत्रोज
पेद्दशसहस्रकं दशांशादिप्रमा
णेन होमादीश्च समाचरेत्
प्रातःस्नात्वा हविष्याशीशुचिर्भू
त्वाजितेंद्रियः प्रातःकालेसमार
भ्य जपेन्मध्यदिनावधि जपेत्त
मासे देवेशि दिने दिने शुभे
मातीपुष्पस्य होमेन वशयेन्नात्र
संशयः कर्पूरं सिन्धुते स्नापयेत्त
र्पयेत्परदेवतां पूर्वप्रणव मुद्
स्त्वा मुंडाप्रवदेत्ततः तर्पयाम्यपि
नायांतं मंत्रं जानीहि सुंदरि।
अनेनैव विधानेन संतर्पयेत्परदेव
तां सिद्धिः प्रयागाद्देवेशि जाय
ते नात्रसंशयः अभिषेकं ततः
कुर्यात् शंकरि प्राणवल्लभे प्रण
वंच महेशानि चामुंडांतदनंतरं अ
भिषिंचामि तत्पश्चात् हृदंतेना
भिषिंचयेत् तद्दशांशेन देवशि
ब्राह्मणान्भोजयेत्तदा एवंकृते
महेशानि वशीकरणं मुत्तमं जा
यते नात्रसंदेहः सत्यं सत्यं नसं
शयः कामतुल्यश्च नारीणां वि
प्राणां अग्निनोपमः यावज्जीवित
पर्यंतं स्मरबाण इवेश्वरि जायते
नात्रसंदेहः सत्यंसुरगणार्चिते
श्वेतापराजितामूलं पोष .

येद्गोचयुतं । शतेनाभिमंत्रितं कृ
त्वा तिलकं कारयेत्ततः वश
येत्राच संदेहः सत्यं सत्यं महे
श्वरि चंद्रसूर्यौ यदि हृष्या त
दानिष्फलभाग्भवेत् रक्तवस्त्रेण
चामुंडां तोषयेद्धूयततः स्तव
संदिक्षिणा देवा विन्नानुसारतः।
प्रिये ग्राह्यते महती पूजां कुर्यात
स्या वरानने पंचदिनप्रयोगेणारा
जानं वशमानयेत् ॥ तव
प्रीत्ये महादेवि कथितं भुवि
दुर्लभं इति बृहन्नीलतंत्रं ॥
वशीभूतः त्रि वश्यतांप्राप्तः ग्र
वशो वशो भवति इत्यर्थे च्विप्र
त्ययेन निष्पन्नः ॥
वशीरः पुं गजपिप्पली । इति
जटाधरः ॥
वश्यं क्ली लवंगं इति शाब्दचं।
द्रिका ॥
वश्यः त्रि आयत्ततांगतः तत्प
र्यायः प्रणेयः २ इत्यमरः ॥
वशः ३ इति शब्दरत्नावली ॥
वश्यका स्त्री वशगास्त्री इतिश
ब्दरत्नावली ॥
वश्या स्त्री वशीभूतानारी तत्प
र्यायः वशगा २ वशास्त्रा ३ ।
वश्यका ४ इति शब्दरत्नावली॥

वधे इति कविकल्पद्रुमः ॥
वषति इतिदुर्गादासः ॥
वषट् अ देवोद्देशपकहविस्त्या
गमंत्रः इत्यमरः स्वाहा श्रौषट्
वौषट् वषट् स्वधा एते पंचश
ब्दादेवहविर्दाने वह्निमुखकृतौ
वर्तन्ते देवाय हविषोदानं देव
हविर्दानं तत्र देवा इंद्रादयः अत्र
पितरो देवातादेतिस्तस्ते सेपि
देवाः हविर्दान इत्यनेन पतेमं
त्रा इति सूचितं इति भरतः ॥
वषट्कारः पुं देवोद्देशपकयागः
तत्पर्यायः देवयत्तः २ आहुतिः
३ होमः ४ होत्रं ५ इति हे
मचंद्रः ॥
वषट्कृतं त्रि हुतं इत्यमरः ॥
अग्नौ हुतेन यद्दत्तं तत्साद्विषु
वषट्कृतं इति शब्दरत्नावलीच
वक्ष ङ॰ हालो इतिकविकल्पद्रु
मः क्विपि वट् ङ॰ वक्षते इति
दुर्गादासः ॥
वक्षयः पुं पूकहायनोवत्सः
इत्यमर टीकायां रायमुकुटधृत
शाकटायनः ॥
वक्षयणी } स्त्री चिरप्रसूता गौः
वक्षयिणी } इत्यमरः वक्षते प
रिक्रामति वक्षय श्चिरकालीनवत्सः

वकना इतिख्यातः वक्ष ङ॰ गतौ
नाम्नीति अयः वक्षय स्तिकहाय
नोवत्स इति कोषः तद्योगात्वक्ष
यिनी नैकात्नादिति हून वक्षय
नीति पाठे गोहणोत्पादिनापा
मादित्वात्नः नदादित्वा दीप् इ
च्छमुषती गवेषित वक्षयिणीति
मूर्द्धन्यषमध्ये गदसिंहः इतितद्दा
कायां भरतः ॥
वसकं स्नेहच्छिदोस्त्र । इतिकवि
कल्पद्रुमः स्नेह इह प्रीतिः क
वासयति बंधुः चकारात्वधे च
इतिदुर्गादासः ॥
वस य उ इर स्तंभे इतिकवि
कल्पद्रुमः यवस्यति उवसित्वाव
स्त्वा इर अवसत् अवासीत्अव
सीत् अस्मात्तृषादित्वासिस उ॰
इत्येष स्तंभ इह नम्रतारहिती
भावः यो वस्तत्वरिष्ठितिरहला
युधः इतिदुर्गादासः ॥
वस पै औ निवासे इतिकवि
कल्पद्रुमः पे उस्पात् औअवात
सीत् इतिदुर्गादासः ॥
वस ल ङ॰ स्तुतौ इतिकविक
ल्पद्रुमः स्तुतिरिह आच्छादनस
र्वकथावरणं लङ॰ वस्ते लोकः
वस्त्रं इतिदुर्गादासः

वस ल्क वासे इतिकविकल्पद्रुमः
वसयति इति दुर्गादासः ॥
वसतिः } स्त्री वासः यामिनी ॥
वसती } निकेतनं इति मेदिनी
वसनं क्ली वस्त्रं इत्यमरः ॥
छादनं इति मेदिनी ॥ निवा
सः स्त्रीकटीभूषणं इति शब्द
रत्नावली ॥
वसना स्त्री स्त्रीकटीभूषणं यथा
मारसनं सारशनं वसना वशाना
तथा वसनं वहनेचेति स्त्रीक
टीभूषणे भवेत् इति शब्दरत्ना
वली ॥
वसंतः पुं अतिसारः इति शब्दर
त्नावली ऋतुविशेषः । सच
चैत्र वैशाख मासद्वयात्मकः यथा
मधुश्च माधवश्च वासंतिकावृतः
इति मलमासतत्वधृता श्रुतिः
तत्पर्यायः पुष्पसमयः २ सुरभिः
३ इत्यमरः मधुः ४ इतिशब्द
रत्नावली माधवः ५ फल्गुः ६ इति
जटाधरः ऋतुराजः ७ पुष्पमासः
८ पिकानंदः ९ कांतः १० काम
सखः ११ तत्कालीन जलगुणाः
कषायत्व मधुरत्व रूक्षत्वंच ॥
इतिराजनिर्घंटः ॥ अस्याधिष्ठा
तृदेवतोत्पत्तिर्यथा मत्स्य ।

उवाच करिष्येऽहं तव विभो
वचनाद्धरमोहनं किन्तु योषि
न्महास्त्रं मेततः ततः कान्ता मया
कृतं मया संमोहिते शम्भौ यया
तस्यास्तु मोहनं कार्य्यां मनोरमां
कान्तां तद्विधेहि ऽयाय लोकेश सत्त्वं ता
महं तर्हि प्रयास्यामि यथा तस्यानु
मोहनं कर्त्तव्य मधुना यान्त स्ततो
पायं ततः कुरु मार्कण्डेय उवाच
एवं वादिनि कन्दर्पे धाता लोक
पितामहः कान्तासंमोहनी योऽय
मिति चिन्तां जगाम ह ॥ चिन्ता
विष्टस्य तस्याथ निःश्वासो योऽभि
निःसृतः तस्माद्वसन्तः संजातः पु
ष्पव्रात विभूषितः चूताङ्कुरास्त
कलिकां भिन्नाञ्जनचयसंहतिं किं
शुकान्तारसंरम्भैः प्रफुल्ल इव
पादपः प्रोता राजीव संकाशः
फुल्लतामरसेक्षणः संध्योदिता
खण्डशशि प्रतिमास्यः सुनासिकः
शङ्खवत्त्ववर्णावर्त्तः श्यामकुञ्चित
मूर्द्धजः संध्यांशुमालि सदृशः कुण्ड
लद्वय मण्डितः प्रमत्तवारणगति
र्विस्तीर्णहृदयस्थलः पीनस्कन्धाय
तभुजः कठिनकरयुग्मकः सहलोम
कटीजङ्घः कम्बुग्रीवोन्नतांसकः गूढ
जत्रुः पीनवक्षाः संपूर्णः सर्व्वलक्षणैः
ता

हृष्टेऽथ समुत्पन्ने वसन्ते कुसु
माकरे ववौ वायुः सुरभिः पादपा
अपि पुष्पिताः पिकाश्च नेदुः
सततं पञ्चमं मधुरस्वराः प्रफुल्ल
पद्मा अभवन्सरस्यः स्वच्छपुष्कराः
इति कालिकापुराणे ४ अध्यायः
हरमोहनकाले अस्य कर्म्माणि यथा
मदनस्य कुरुते कर्म यद्यत्तस्य वि
मोहने तन्मृणुष्व महाभाग
निम्न तस्योचितं पुनः चम्पकान्के
शरान्नागान्करुणान्पाटलां स्त
था नागकेशरकुन्दान्मल्लिकांशुकान्
केतकान् बकुलान् माधवीं मल्लि
कां पर्णासारान्कुरण्टकां स्तथा उ
त्फुल्लयति तत्रस्य यत्र तिष्ठति वेद
दः सरांस्युत्फुल्लपद्मानि वीजयन्
मलयानिलैः सुगन्धिःकुसुमवान्तता
त अतीव शङ्करास्यं लताः सर्व्वाः
सुमनसो नूतनाङ्कुर संचयाः लता
नुचिरभावेन वेष्टयन्ति स तत्र च
लास्तांश्चारुपुष्पौघा लैः सुगन्धि
समीरणैः दृष्टा कामवशं याते न
तत्र मुनिसत्तम तदा अपि लो
केशः नानाभावैः सुशोभनैः तस्य
न्नोत्स्य सुराः सिद्धा ये ये चापि त
पोधनाः ततस्य पुनरस्मात्हर्षे
मोहस्य कारणं भावेन कुहकैः

कामः कायोत्स्य मपि शंकरः ॥
इति कालिकापुराणे ७ । अध्यायः
वसन्ते वर्णनीयानि यथा । स्मर
भौ दोला कोकिल मारुत सूर्य
गति तरु पल्लोद्गिरः । जातीत
रपुष्पचयाम्रमञ्जरी भ्रमरझंकाराः
इति कविकल्पलतायां प्रथमस्तव
कः षड्रागान्तर्गतद्वितीयरागः ।
यथा रागाः षडेव तु प्रोक्ता वा
गाप हिंडोलदेव तु भैरवोऽथ व
सन्तश्च नट नारायण स्तथेत्यादि ।
तस्य पञ्चरागिण्यो यथा आन्दो
लिता च देशाख्या लोला प्रथम
ञ्जरी मन्दारी चेति रागिण्योवसं ।
तस्य सहानुगाः अस्य ध्याने ।
यथा शिखण्डिबर्होच्चयबद्धचूडः पु
ष्णन्पिकं चूतलताङ्कुरेण भ्रमन्मुदा
राममनोज्ञमूर्त्तिर्मत्तेगजः सवस
न्तरागः प्रमदाजनसमयो यथा ।
श्रीपञ्चम्याः समारभ्य यावत्स्याच्छय
नं हरेः तावद्वसन्तरागस्य काम
मुक्तं मनीषिभिः इति संगीतदा
मोदरः कलानाथमते अस्यष
ड्रागिण्यो यथा आम्बुली १ रामकी
२ पटमञ्जरी ३ गौडकरी ४ धामक
री ५ देवशाखा ६ हनुमन्मते हि
न्दोलरागपुत्रनामानो ऽस्याष्टौ ।

पुत्रा किन्तु तेषां मध्ये विभा
सस्थाने हिंडोल इति लिखितं
सोमेश्वरमते तस्य षड्रागिण्यो ।
यथा देशी १ देवगिरी २ वराटी
३ तोडिका ४ ललिता ५ हिन्दो
ली ६ तन्मते अस्य रागस्य रा
गिणी महितस्य वसन्तर्त्तुर्मानस
मयः इतिसंगीतशास्त्रं ॥
तालविशेषः यथा जयमङ्गल
गन्धर्व्व मकरन्द त्रिभङ्गमाः इति
तालो वसन्तश्च जगत्कम्पो ऽभ्रगा
लाणि रित्यादि वसन्ततालेकर्त्त
व्यो नगणो मगणो लघुः यथा न
गङ्कामे गुरुश्चैको विरामान्तेव
स्तु इयं इति संगीतदामोदरः ॥
वसन्तकः पुं श्योनाकप्रभेदः
इति राजनिर्घण्टः ॥
वसन्तकुसुमः पुं वृक्षविशेषः य
था वसन्तकुसुमः सेलुः शापितो
हिमकुञ्जितः इति शब्दमाला
वसन्तकुसुमाकरः पुं औषधविशे
षः यथा प्रवाल रस मौक्तिकं
वरसिद्धं चतुर्भागभाक्पृथक्पृथग्
यस्मृते रजत हेम तौ द्विभागके
अयो भुजग रंगकं त्रिलवकं
विमर्द्दितं शुभे हनि विभा
वयेत्तदिदं पिया सप्तशः द्वै

हर्षविशेषात्तैः कमल मालती पु
ष्पैः पयः कदलि कंदैर्मलय
जेणानाम्बुदैर्वैः वसंतकुसुमाक
रो रसपति हिंचलोऽशितः सम
स्तगदद्विरदेवकिलनिजानुपाने
रयं इति वृहद्योगतरंगिणी ॥
वसंतघोषी पुं कोकिलः इति
केचित् ॥
वसंतजा स्त्री वासंतीलता इति
राजनिर्घंटः ॥
वसंततिलकं क्ली चतुर्दशाक्षर
पादछंदोविशेषः पुष्पविशेषः
यथा ज्ञेयं वसंततिलकं तभ
जाजगौगः फुल्ल वसंततिलकं
तिलकं वनाल्या लीलापरं पिक
कुलं कलमत्र रौति वात्येष पु
ष्पसुरभिर्मलयाद्रिवातोयातो ह
रिस मधुरो विधिना हतास्मः
इति छंदोमंजरी औषधविशेषः
यथा अस्ताबल दहन सैंधव वि
ष्ण शाकु चूर्णं करंजसहितमथि
तेन पीतं नैवं प्रयोहृति पुनर्गु
दजः स्वदेतो स्त्रसे वसंतति
लकं रपि कल्पकलं इति वृंत
रत्नावल्यां गुल्मरोगचिकित्सा ॥
वसंतद्रुतः पुं आम्रवृक्षः को
किलः पंचमरागः इति विश्व
मेदिन्यौ ॥
वसंतदूती स्त्री पाटलीवृक्षः माध
वीलता इति मेदिनी गणिका
रीपिकी इति राजनिर्घंटः ॥
वसंतद्रुः पुं आम्रवृक्षः इतिशब्दमा
ला ॥
वसंतसखः पुं कामदेवः । इतिह
लायुधः ॥
वसा स्त्री मांसप्रभवधातुविशेषः
इत्यमरः मांसरोहिणी ।
इति राजनिर्घंटः अस्याविवरणंमे
दः शब्दे द्रष्टव्यं ॥
वसाढ्यः पुं शिशुमारः इतित्रिकां
डशेषः ॥
वसिः पुं वसनं इत्युणादिकोष
षः ॥
वसिरं क्ली सामुद्रलवणं ॥ गज
पिप्पली इति धरण्यमरटीके ।
वसिष्ठः पुं वसिष्ठमुनिः इतिद्विरू
पकोषः ॥
वसु क्ली रत्नं धनं इत्यमरः ॥
वृद्धौषधं श्यामं इति मेदिनी ॥
हाटकं इति विश्वः ॥ जलं ।
इति सिद्धांतकौमुद्यामुणादिवृत्तिः
वसुः पुं वकवृक्षः अनलः ॥
रश्मिः गणदेवताविशेषः ; इत्य
मरः सचाष्टसंख्यातः । यथा ।

4379

धरो ध्रुवश्च सोमश्च विष्णुश्चैवा
निलोऽनलः प्रत्यूषश्च प्रभासश्च
वसवोऽष्टौ क्रमात्स्मृताः इति
भरतः दक्षो द्वितीयजन्मनि षष्ठ
मन्वंतरे असिक्न्यां पत्न्यां षष्टिं
कन्या जनयामास ताः प्रजापति
र्मोदत्तवान् धर्माय दश तासां ना
मानि भानुर्लम्बा ककुब्जामि र्विश्वा
साध्या मरुत्वती वसुर्मुहूर्ता संक
ल्पा आसां मध्ये वसो रष्टौ वसवः
पुत्रा यथा द्रोणः प्राणः ध्रुवोऽ
र्कः अग्निः दोषः वस्तुः विभावसु
रिति द्रोणस्य अभिमत्यां पत्न्यां ह
र्षशोक भयादयः पुत्राः १ प्रा।
णस्य ऊर्ज्जस्वत्यां द्वौ पुत्रौ सहस्रा
युः पुरोजवश्च २ ध्रुवस्य धारण्यां
पुरः पुत्रः ३ अर्कस्य वासनायां त
र्षादयः पुत्राः ४ अग्ने र्वसोर्धारा
यां द्रविणकादयः पुत्राः ५ ।
दोषस्य शर्वर्यां शिशुमारो हरे
रंशः ६ वास्तो रांगिरस्यां विश्व
कर्मा विश्वकर्मणः पुत्रश्चाक्षुषो
मनुरभूत् विश्वे साध्या मनोः ।
सुताः ७ विभावसो रुषायांव्यु
ष्टः पुत्रोः व्युष्ट रोचिषातप ना
मानः ८ इति श्रीभागवतमतं
मतांतरे अष्टौ वसवो यथा
धरः १ ध्रुवः २ सोमः ३ सावित्रः
४ अनिलः ५ अनलः ६ प्रत्यूषः
प्रभासः ८ इति महाभारतेदा
नधर्मः अपिच आपो ध्रुवश्च
सोमश्च धरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ
प्रकीर्त्तिताः आपस्य पुत्रो वै
तंड्यः श्रमः शांतो ध्वनि स्तथा
ध्रुवस्य पुत्रो भगवान्कालो लोक
प्रकालनः सोमस्य भगवान्वर्चो
वर्चस्वी येन जायते धरस्य पु
त्रो द्रविणो हुतो हव्यवह स्तथा
मनोहरायाः शिवस्य प्राणोऽथ
रमण स्तथा अनिलस्य शिवा भा
र्या तस्याः पुत्रः पुरोजवः ॥
अविज्ञातगतिश्चैव द्वौ पुत्रावनि
लस्य तु अग्नि पुत्रः कुमारस्तु श
रस्तंबे व्यजायत तस्य शाखो
विशाखश्च नैगमेयश्च पृष्ठजाः
प्रत्यूषस्य विदुः पुत्रं ऋषिं नाम्ना
चदेवलं द्वौ पुत्रौ देवलस्यापि
मावंतौ मनीषिणौ बृहस्पतेश्च
भगिनी वरस्त्री ब्रह्मचारिणी
प्रभासस्य तस्य भार्या वसूनाम
ष्टमस्य च विश्वकर्मा महाभाग
स्तस्यां जज्ञे प्रजापतिः इति वह्नि
पुराणे कश्यपीय प्रजासर्ग नामाध्या

यः कौर्म्मे ४ अध्यायश्च ॥ योक्त्रं राजा इति मेदिनी ॥ धनाधिपः इति विश्वः ॥ साधुः इति शब्दरत्नावली ॥ पीतमुद्गः। वृक्षः इति हेमचन्द्रः पुष्करिणी इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ शिवः सूर्य्यः । इत्यनेकार्थकोषः कुलीनकायस्थस्य पद्धतिविशेषः यथा शूद्राणां नामकरणे। वसुघोषादिपद्धतियुक्तनामत्वञ्च बोध्यं कुलसद्धारतत्त्वं ॥ अष्टसंख्या यथा युग्माग्निकृतभूतानि षण्मुन्यो वसवोऽभयोः । इति तिथ्यादितत्त्वं ॥

वसुः स्त्री दीप्तिः वृद्ध्यौषधं इति शब्दरत्नावली ॥

वसु त्रि मधुरं शुष्कं इति हेमचन्द्रः ॥

वसुकं क्ली सांभरिलवणं इत्यमरः पांशवं वसुकं इति राजनिर्घण्टः ॥

वसुकः पुं अर्कवृक्षः इत्यमरः शिवमल्ली इति मेदिनी पुष्पविशेषः सित श्वेत रक्त भेदेन द्विविधः तत्पर्यायः । वसुः २ शैवः ३ वकः ४ शिवमल्लिका ५ पाशुपतः ६ शिवमतः ७ सुरेष्टः ८ शिवशेखरः ९ अस्य गुणाः । कटुत्वं तिक्तत्वं उष्णत्वं । पाके शीतलत्वं दीपनत्वं अजीर्णवातगुल्मनाशित्वं श्वेतस्य रसायनत्वञ्च इति राजनिर्घण्टः ॥

वसुकीटः पुं याचकः इति हारावली ॥

वसुच्छिद्रा स्त्री महामेदावृक्षः इति रत्नमाला राजनिर्घण्टश्च ॥

वसुदः पुं कुबेरः इति धनदशब्ददर्शनात् धनदातरि त्रि ॥

वसुदेवः पुं श्रीकृष्णजनकः तत्पर्यायः आनकदुन्दुभिः २ । इत्यमरः शूरः ३ कृष्णपिता ४ । इति शब्दरत्नावली अस्य विवरणं यथा नारायण उवाच कश्यपो वसुदेवश्च देवमाता च देवकी पूर्वपुण्यफलेनैव संप्राप श्रीहरिं सुतं ॥ देवमीढान्मारिषायां वसुदेवो महानभूत् तस्य जन्मनि देवाश्च वादयामासु दुन्दुभिं आनकं च महाहृष्टाः श्रीहरेर्जनकं च तं । ततः पुरातना सन्तो वदन्त्यानकदुन्दुभिं इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः वह्निपुराणे च ॥

वसुदेवता स्त्री धनिष्ठानक्षत्रं इति हेमचन्द्रः ॥

4381

वसुदेवभूः पुं श्रीकृष्णः इति हेमचन्द्रः

वसुधा स्त्री पृथिवी इत्यमरः

वसुधाखर्ज्जूरिका स्त्री भूखर्ज्जूरिका इति राजनिर्घण्टः ॥

वसुधारा स्त्री जिनशक्तिविशेषः तत्पर्यायः तारा २ महाश्रीः ३ ओंकारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरा १२ आत्मजा १३ खदिरवासिनी १४ भद्रा १५ वैश्या १६ नीलसरस्वती १७ शंखिनी १८ महातारा १९ धनन्ददा २० त्रिलोचना २१ अलोचना २२ इति हेमचन्द्रः कुबेरपुरी । इति शब्दमाला वृद्धिश्राद्धे पूर्वं कर्त्तव्यचेदिराजवसुदेश्यक कुलसम्बद्धतधारा यथा छन्दोगपरिशिष्टे कात्यायनः कुड्यलग्नां वसोर्धारां सप्तवारान्घृतेन तु कारयेत्पञ्च वा ऽत्वा नातिनीचां न चोच्छ्रितां ॥ आयुष्मानिति शान्त्यर्थं जप्त्वा तत्र समाहितः । षड्वाः पितृभ्य स्वदत्त आवदान मुपक्रमेत् वसो आदित्यजस्य वसो धारामिति वसोर्धाराविधाने तथादिदर्शनात् प्रत्युक्तमासेनैव प्रयोगः कर्त्तव्यः इति श्राद्धतत्त्वं ॥ सामगानां तत्पातन मन्त्रो यथा यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत सत्यस्य ब्राह्मणो वर्चस्तेन मासं सृजामसि यजुषां यथा वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्ष इति आह्निकयोगतत्त्वं ऋग्वेदिनां यथा । अपस्तमस्य मागच्छन्ती भूरिधारे पयस्वती घृतधारे सुकृते शुचिव्रते राजन्वयस्य यस्य भुवनस्य रोदसी आस्मरेत सिंचितं यन्मनुष्टते १ अस्मा इव वज्रतमे तवास्नेनना अभिचाकसीमि यत्र सोमः सूयते यत्र यज्ञो पठते घृतस्य धारा मधुमत्सु वर्षते २ घृतवती भुवनानामभि श्रियोर्वी पृथ्वी मधुदुघे सुपेशसा द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ३ शतधारमुत्समक्षीयमाणं विपश्चितं पितरं वक्त्वानां अभिमदन्तं पित्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचं शतधारं वायुमर्कं स्वर्विदं नृचक्षसो ऽभिचक्ष ते हविः ये च अश्नन्ति अयत्न

न्ति संगमेलिङ्कहे समधारं ५व
सोः पवित्रमसि शतधारं वसोःपवि
त्रमसिसहस्रधारं देवस्त्वा सविता
पुनातु वसोः पवित्रेण शतधारे
णासुवाकामधुक्ष्व ८ मूर्द्धानं दिवो
ऽरतिं पृथिव्या वैश्वानरमृत आ
जातमग्निं कविं सम्राजमतिथिं ज
नानां मासन्नाः पात्रं जनयन्त देवाः
स्वाहा ७ इत्येते मंत्रै वसुहुतधारां
दद्यात् इति कालेसिः ॥ वि
शेषवसुधारा यथा सूत्रा या वहते
धारा मानानस्सर्पि र्न सा शुभा।
नापिका शस्यते विघ्नहर्त्री तु कलि
कारिका भुल्यते वह्न मानाया श
स्यते च ऊलाशानं सवर्णा हेमव
र्णांचधारा राज्यविवृद्धये संततापं
तते यातु तनोति वसु पातुके ।
तनोति नपराष्ट्रं च वसोर्धारेति
संशयः सर्वांपि वस्त्र विमलेहा
सिकीट विवर्जितं शस्यते च व
सोर्धारा या सर्पि गव्य पूजिता
अश्वावालावलाजं वा होतव्यस्तु
हृषोपन्नं हुत होइ पयोधा
रा सर्वपीडा निवारिणी वसु
द्धं घृतमाज्य मस्तत हविका
लिकं तस्य धारा सदा देया वसो
र्धारा हि सा मता वसुनाम्रर्त्री
का

मेण दक्षिण च महात्मना मयाच
विष्णुना शक्र रुद्रेण च मझोमया
आत्मानंच स्वरूपेण मारयांत प्र
पादितं देवी सान्निध्य मायातासर्व
कामप्रदायिका तस्मात् मपि राजें
द्र वसोर्धारां प्रपातय ।
नातः परतरं प्राप्य विद्यते नपस
त्तम वसोर्धाराप्रदानस्य प्रकार
मपि यद्भवेत् न्यपेणायुषकामेण
पुत्र राज्य जिगीषुणा ॥ देया
धारा सदा वसुरिपुनाशाय दौर्
मनं दृव्या भावे घृताने घृताभावे
न्पपतस्करजे भये यदि नो वहते
धारा तदा छिद्रं नविद्यते महा
श्राश्विन मासे तु अष्टमी नवमीषु
च कार्तिक्यां माघ चैत्रे तु त्रिश
यां रोहिणी पुच वैशाखांहत्तरा
तथा मैत्र्यां मेषस्य सप्तम श्रा
षाढ द्वादशी होमं अष्टमी पूर्णि
मा नये नभसे रोहिणीदले च
तथ्यां द्वादशीदिने संक्रांतिषु च
सर्वासु गुरु सोविभवासेच ।
चेंद्र सूर्योपरागेषु प्रतिष्ठायज्ञकर्म
णि शाक्रोद्धये मृतानां जन्मणु
ध्या नषेचने । मार्गे वतिवेध
ते शुभे वाचे तदर्पितं ॥
ग्रहदुःस्वप्नोपसर्गेषु धारा देयाः

4383

शुभावहाः एवं यो वाहयेद्धाराः
शास्त्रदृष्टेन कर्मणा तस्य भूः
सिद्ध्यते सर्वा सप्तागरा महसागरा
इति देवीपुराणे वसोर्धारानाम
९१ अध्यायः ॥
वसुंधरा स्त्री पृथिवी इत्यमरः
वसुप्राणाः पुं अग्निः इति शब्द
रत्नावली
वसुमती स्त्री पृथिवी इत्यमरः
वसुरोचिः[स] क्ली यज्ञः वसोरुचः
संज्ञायामित्यनेन देस प्रत्ययेन
निष्पन्नं इतिसिद्धांतकौमुद्यामु
णादिवृत्तिः ॥
वसुलः पुं देवता इति त्रिकां
डशेषः ॥
वसुश्रेष्ठं क्ली रूप्यं इति राज
निर्घंटः ॥
वसुषेनः पुं कर्णराजः इतित्रि
काण्डशेषः ॥
वसुस्थली स्त्री कुबेरपुरी इति
शब्दमाला ॥
वसुहट्टः पुं बकवृक्षः इतिर
त्नमाला ॥
वसुहट्टकः पुं बकवृक्षः इति ।
माला ॥
वसुकं क्ली शोभीलवणं इति
हेमचंद्रः बकपुष्पं । इति

हिवूकोषः ॥
वस्क उ गतौ इतिकविकल्प
द्रुमः दन्त्यमध्य इति दुर्गसिंहः
ष्ठिपिवक मूर्द्धन्य मध्य इत्येके
ष्ठिपिवट् उ वस्कते इतिदुर्गादासः
वस्कः पुं अध्यवसायः इति भू
रिप्रयोगः ॥
वस्कयः पुं एकहायनोवत्सः ।
इत्यमरटीकायां रायमुकुटः ॥
वस्कयनी स्त्री चिरप्रसूतागौः ।
इत्यमरटीकायां रायमुकुटः अ
स्या उग्पगणाः वस्कयिन्यादिदो
षघ्ने तर्पणं वलकृत्परः इति
भावप्रकाशः ॥
वस्कराटिका स्त्री वृश्चिकः इति
हारावली ॥
वस्त ड क वधे इति कविकल्प
द्रुमः कड वस्तयते गतिहिंसाया
चनेष्विति रमानाथः इति दुर्गा
दासः ॥
वस्तः पुं छागः इत्यमरः ॥
वस्तकं क्ली कृत्रिमलवणं इति
हेमचंद्रः ॥
वस्तकर्णः पुं शालवृक्षः इतिरा
जनिर्घंटः ॥
वस्तगंधा स्त्री अजगंधा इतिरा
जनिर्घंटः

वस्तमोदा स्त्री अजमोदा इति
राजनिर्घण्टः
वस्तयः पुं स्त्री वस्त्रसदशाः य
था स्त्रियां वस्त्रे वस्त्रस्य दशाः
स्युर्वस्तयो द्वयोः इत्यमरः ॥
वस्ता स्त्री क्षुद्रक्षुपः तत्प
र्यायः वृषगन्धाख्या २ मेषान्त्री ३
वृषपत्रिका ४ अजान्त्री ५ बोक
ड़ी ६ अस्या गुणाः कटुरसत्वं ।
कासदोषविनाशित्वं बीजदात्व
त्वं गर्भजननकत्वंच इति राज
निर्घण्टः
वस्तिः पुं स्त्री नाभेरधोभागः ॥
वस्त्रसदशा इत्यमरः वस्ते आ
च्छादयति मूत्राशयपुटं वस्तिः व
स्त इः स्तेनो नाम्नीति तिक् मू
त्राशयपुटो वस्ति रिति रत्नमा
ला इति तट्टीकायां भरतः ॥
अथ वस्ति विधिः वस्ति र्द्विधानु
वासाख्यो निरूहश्च ततःपरः यः
स्नेहै र्दीयते सस्यादनुवासनना
मकः कषाय क्षीर तैलै र्यो
निरूहः सनिगद्यते वस्तिभि र्दीय
ते यस्मात्तस्माद्वस्ति रिति स्मृतः
वस्तिभिः स्मृगाहीनां मूत्राशयैः
तत्रानुवासनाख्योहि वस्ति र्यः सो
ऽत्र कथ्यते अनुवासन भेदश्च

मात्रा वस्ति रुदीरितः पलद्वयं
तस्यमात्रा तस्मादर्द्धापि वा भवेत्
अनुवासस्तु वृत्तः स्यात्तीव्राग्निःके
बलानिली नानुवासस्तु कुष्ठीस्या
न्मेही स्थूलस्तथोदरी नास्थाप्या
नानुवास्याःस्यु रजीर्णोन्माद तृड्
युताः शोषमूर्च्छारुचि भयश्वास
कास क्षयातुराः नेत्रंकार्य्यं सुवर्णा
दि धातुभि र्वृत्तवेणुभिः नले
र्दन्तै र्विषाणाग्रै र्मणिभि र्वा विधी
यते नेत्रं नाडी तथाच विश्वप्रका
शे नेत्रं पथि गुणे वस्त्रे तरुमूले
विलोचने नेत्र वस्ते च नाडांच ने
त्रो नेतरि भेदवदिति एकवर्षा
त्तु षड्वर्षं यावन्मानं षडङ्गुलं ततो
द्वादशाब्दं यावन्मानं स्यादष्टम्मि
तं ततःपरं द्वादशाभि रङ्गुलै र्नेत्रदीर्घ
ता मुद्गच्छिद्रं कलायाभच्छिद्रं को
लास्थि छिद्रकं मुक्ता संयं
भवेन्नेत्रं सूक्ष्मां गोपुच्छ सन्नि
भं मूले स्थूलं । ततः क्रमात्
कृशं मुद्गच्छिद्रादि प्रमाणं नेत्रं
क्रमेण षड्वर्षा द्वादशवर्षीय ।
ऽर्द्धवर्षीय योग्य आतुरांगुष्ठमा
नमूले स्थूलं विधीयते कनिष्ठि
कापरीणाह मग्रेच गुटिकामुखं
परिणाहोऽत्र स्थौल्यं तन्मूले

कर्णिके द्वे च कार्य्ये भागाच्चतुर्थ
कात् कर्णिका गवादि कर्णवत्
कर्णिकाच्छत्राकारा गुदापिधानतःप्र
वेशरोधिनी कर्णिकेति कर्णिका
कारत्वात्कर्णिकेति कथ्यते योजये
त्रवस्तिंच दंष्ट्रद्वय विधानतः मृगा
जशूकर गवां महिषस्यापि वा भ
वेत् वस्ति र्विशेषः मूत्रकोष
स वस्तिस्तु तदलाभेतु चर्मजः
कषाय रक्तःसम्बद्ध वस्तिः स्निग्धो द
ढो हितः व्रणवस्तेस्तु नेत्रं स्यात्सू
दलमष्टांगुलोन्मितं मुद्गच्छिद्रं ग्र
पक्षनालिका परिणाहि च यौ
दोषचयं वर्णं बलमरोगमायुषः
कुरुते परिवृद्धिंच वस्तिः सम्यगु
पासितः दिवा प्रतीते वसन्ते च स्ने
ह वस्तिः प्रदीयते ग्रीष्म वर्षाश
रत् काले रात्रौ स्यादनुवासनं न
चातिस्निग्ध मशनं भोजयित्वानु
वासयेत् मदं मूर्च्छांच जनयेत्
द्विधा स्नेह प्रयोजितः द्विधाभोज
नेव रूक्षेच वृत्तं भुक्तवतोऽन्नं त
बलं वर्णंच ह्रासयेत् युक्त स्नेह
मतो जन्तुं भोजयित्वानुवासयेत्
युक्त स्नेहं यथाविन्न स्नेहंभोज्यं
भोजयित्वा हत्पादः हीनमात्रा
वुभौ वस्ती नातिकार्य्यकरौस्मृतौ

अतिमात्रौ तथानाह क्लमातिसार
कारकौ उभौवस्ती अनुवासननि
रूहाख्यौ उत्तमा स्यात्पलैः षड्भि
र्मध्यमा स्यात्पलै स्त्रिभिः ॥
पलद्वयेन हीना स्याद्वक्ता मात्रानु
वासने अथ स्नेहवस्तिः ।
शताह्वा सैन्धवाभ्यांच देयं स्नेहे
च चूर्णकं तन्मानेनम मध्यमाः
षट् चत्व द्वय माषकैः विरेच
नात् सप्तरात्रे गते जातबलाय च
भुक्तान्नायानुवासाय वस्ति र्देयो
ऽनुवासनः अथानुवास्य मभ्यक्त
मुष्णाम्बुस्वेदितं शनैः भोजयित्वा
यथाशास्त्रं कृतं चङ्क्रमणं ततः
उत्सृष्टानिल विण्मूत्रं योजयेत्स्ने
हवस्तिना उष्णाम्बुस्वेदितं उत्ता
नशायिनं समस्य वामपार्श्वेन
वामजंघां प्रसारितां कुंचितां परजं
घस नेत्रं स्निग्ध गुदे न्यसेत् उ
द्धे वस्तिमुखे सूत्रै र्वामहस्तेन धा
रयेत् पीडयेद्दक्षिणेनैव मध्य
वेगेन धीरधीः जृंभा कासक्षवा
दीन् वस्तिकाले वकारयेत् त्रिं
शन्मात्रामितः कालः प्रोक्तो
बस्तेस्तु पीडने ततः प्रणिहि
ते स्नेहे उत्तानो वाक् शते भवेत्
स्फिजानुनः करावनं ऊर्ध्वोत्ति

कयाप्युक्तं यथा मात्रा भवेदेकासर्व
मेवैष निश्चयः निरूहोऽन्मेषगांपुं
सा मंसुत्सा ह्रीरिकाप्रवा ॥
गुर्वक्षरोच्चारणं वाद्यमात्रेयं स्मृता
बुधैः प्रसारितैः सर्वगात्रे यथा
वीर्यं प्रसर्पति अन्तर्वीर्यस्नेहा
दि तावद्येनत्वयो वेदां ही
ही व्यारान्नाने: पादैः स्फिचौ
चैव तथा श्रोणीं शय्यांदेवोत्
क्षिपेत्ततः स्फिचो श्चैनं स्वपा
णिभ्यां पूर्ववत्ताडयेद्बुधः शयनं
पादे ततस्त्रीन् वारानुत्क्षिपेत्त
तः जाते विधाने तु ततःकुर्या
न्निद्रां यथा सुखं सानिलः सपु
रीषश्च स्नेहः प्रत्येति यस्य तु उप
द्रवं विना शीघ्रं स सम्यगनुवा
सितः उपद्रवस्थाने उपचोषावि
ति स्नुक्रते पादः जीर्णान्नमथ
जाती पत्रेलवंगंच सूक्ष्मैलामहती
च सा

कक्कोलफलकंत्वक्पत्रकं नाग
केशरं वालकंच तथोशीरं मां
सी दारुसितापिवा मुरा कर्पूरक
श्चापि शैलेयं भद्रमुस्तकं । रे
णुकाच प्रियंगुश्च श्रीवासो गुग्
गुलस्तथा लाक्षा नखश्च रालश्च धा
तकीकुसुमं तथा ग्रंथिपर्णंच मं
जिष्ठा तगरं सिक्थकं तथा पता
निशकग्रामानानि कल्कीकृत्य श
नैःपचेत् तैलं प्रस्थमितं सम्यक्
पात्रे क्षिपेत् अनेनाभ्य
कृगात्रस्य वृद्धोशीति समोपिसः
युवा भवति शुक्राढ्यः स्त्रीणाम
त्यंत दुर्लभं वंध्यापि लभते गर्भं
षंडोपि तरुणायते अपुत्रः पुत्र
माप्नोति जीवेच्च शरदां शतं चं
दनादि महातैलं रक्तपित्तंक्ष
यं ज्वरं दाह प्रस्वेद दौर्गंध्यं कुष्ठं
कंडूं विनाशयेत् पक्षेशं वल्कम्
इति लोके कालीयं कलम्ब
क इति लोके लताकस्तूरिका
मुष्ककदाना इति लोके कक्को
लफलस्याभावे जातीपुष्पग्राह्यं
तदलाभे पि लवंगं ग्राह्यं दारु
सिता दारुचिनी शैलेयं छरं इति
लोके श्रीवासः गुग्गुवी इति लो
के ग्रंथिपर्णः गठिवन् इति लोके

अशीतिसमः अशीतिवार्षिकः
चंदनादितैलं वीजानि कौशक
स्याः कुडव मितानि खेदयेत्
तकेः प्रस्थ गोमवडगे डग्धं
पावद्वैद्यादृष्टं ॥ त्वग्रहितानि
तत्कृत्वा सूक्ष्मं संपेषयेतानि पि
ष्टिकया लघुवटिका कृत्वा गव्येष
वेदाज्ये द्विगुणित शर्करया वा
वटिकाः संपक्वया लेप्याः वटि
का मासिक मध्ये मज्जनयोग्ये
विलासा प्याप्याः पंचटंक मिता
ला सायं प्रातश्च भक्षयेत् ।
अनेन शीघ्रं द्रावी यो यश्चसा
ल्पतिनिध्वजः सोपि प्राप्नोतिस्त्री
ष्वेसामर्थ्य मिति वाजिवत् ।
नानेनसदृशं किंचिद्धृष्यं वाजी
करं परं वानरीवटिका ॥
आकारकरभा शुंठी लवणांकु
कुमंकणा जातीफलंजातिपुष्पं
चंदनं कार्षिकं पृथक् चूर्णयेद
हिफेणंत तत्र दद्यात्तोलकं
सर्वमेकीकृतं माषमात्रं क्षौद्रेण
भक्षयेत् शुक्रस्तंभकरं पुंसां ।
सिद्धमानंदकारकं नारीणां प्री
तिजनकं सेवेत निशिकामुकः
इतिभावप्रकाशः ॥
वांछा स्त्री आत्मवृत्तिगुणविशे
षः

साच द्विविधा यथा उपायविष
यिणी फलविषयिणीवा फलं
सुखंदुःखाभावश्च तत्र फलेच्छां
प्रतिफलज्ञानं कारणं उपायेच्छां
प्रति इष्टसाधनता ज्ञानं कारणं
इति सिद्धांतमुक्तावली ॥ तत्प
र्यायः इच्छा २ कांक्षा ३ स्पृहा ४
ईहा ५ तृट् ६ लिप्सा ७ मनोरथः ८
कामः ९ अभिलाषः १० तर्षः ११
इत्यमरः आकांक्षा १२ कांतिः
१३ अग्रचयः १४ दोहदः १५ आ
भिलाषः १६ इति शब्दरत्नाव
ली रुक् १७ रुचिः १८ मतिः १९
दोहलं २० छंदः २१ । इति
जटाधरः ॥
वांछितं त्रि अभिलषितं यथा
अविच्छेदं पठेद्धीमान्याला दे
वीं सरस्वती मुक्ताम्बरधरां दे
वीं मुक्ताभरणभूषितां वांछि
तं फलमाप्नोति स लोके नात्र संश
यः इति ब्रह्माण्डे आह सरस्वत्याः
स्तवं शुभं इति तंत्रसारः ॥
वांछिनी स्त्री वांछनीयानारी तत्प
र्यायः लंजिका २ कलत्रिका ३
इति त्रिकांडशेषः वांछनीय
मात्रे त्रि ॥
वाटः पुं मार्गः वृत्तिस्थानं इति

मेदिनी अपिच मुखं निःसर
णोवाटे प्राचीनावेष्टको वृतिः
इति हेम चंद्रः ॥
वाट्यंखला स्त्री पश्चरोधकर्म
गता तत्पर्यायः लंभा २ इति
हारावली ॥
वाटिका स्त्री वास्तु वासालकः
इति शब्दरत्नावली हिंगुपत्री ।
इति शब्दचंद्रिका ॥
वाटी स्त्री वासालकः इति शब्द
रत्नावली कुटी वास्तु इति मे
दिनी येषस्य पर्यायः । वास्तु
स्त्रीवेषम भूर्वाटी वाटिकागृहस्थो
लकः इति शब्दरत्नावली ॥
तस्या लक्षणादि यथा विश्वका
रुवाच के के वृक्षाः प्रशस्ताश्च
निषिद्धाश्चापि केचन भद्राभद्र
प्रदाश्चापि तान्वदस्व जगद्गुरो
केषामंत नियुक्तं च शिविरं च
शुभाशुभे दिशि ऊर्ज ऊर्ध्व भद्र
मशुभं च वद प्रभो द्वाराणां च
द्वाराणां च प्राकाराणां प्रमाण
कं भद्रप्रदस्य कोवृक्षो दिशि ऊ
प्रकर्तते किं प्रमाणं गृहा
णां च प्रांगणानां जगद्गुरो मंग
लं ऊ समेघाने दिशि कुत्र तरो
स्तथा प्राकारे किं प्रमाणं च परि

खानां सुरेश्वर द्वाराणां च गृहा
णां च प्राकाराणां प्रमाणकं कस्य
कस्य तरोः काष्ठं प्रशस्तं शिविरे
प्रभो अमंगलं वा केषांवाममे
मां वक्तुमर्हसि श्रीभगवानुवाच
आश्रमे नारिकेलस्य गृहिणां च
धनप्रदः शिविरस्य प्रदीशाने पूर्वे
पुत्रप्रदस्तरुः सर्वत्र मंगलार्हश्च
तरुराजो मनोहरः रसालवृक्षः
पूर्वस्मिन्गृहाणां संपत्प्रदस्तथा स
भप्रदस्य सर्वत्र सरकारो विश्राम
य विल्वश्च पनसश्चैव जंवीरो वद
री तथा प्रजाप्रदस्य पूर्वस्मिन्दक्षि
णे धनद स्तथा संपत्प्रदस्य सर्वत्र
वतो हि वर्द्धते गृही जम्बुवृक्षस्य
दाडिमः कदम्बश्चाम्रातकस्तथा वं
धुप्रदस्य पूर्वस्मिन्दक्षिणे मित्रद
स्तथा सर्वत्र शुभदश्चैव धनपुत्र
शुभप्रदः हर्षप्रदो गुवाकश्च दक्षि
णे पश्चिमे तथा ईशाने च स्थल
देशेवं सर्वत्रैवं विश्रामद सर्वत्र
चंपकः शुद्धो भुवि भद्रप्रदस्तथा
फलाढ्यश्चापि कुष्माण्ड मायाशुभ
सुकामुकः स्वर्जरी वर्कटीवाटिका
विरेमंगलप्रदाः वास्तुलः कारवेल
श्च वार्ताकुश्च शुभप्रदाः लताफलं च
शुभदं सर्व सर्वत्र निश्चितं प्रश

~~इतिकौर्मेश्वरीभागो एवं प्रथम~~
~~यः शुभाशुभवाक्यानि यथा~~
~~वेदव्यासेन महता न वै सर्व~~
~~सुराधिपैः प्राप्यते नानकस्य~~
~~तंत्रसेवेन समाप्तिं धर्माचय~~
स्तं कथितंकारो निषिद्धं च निशाम
य वमहत्ता निषिद्धं च शिविरेन
गरेपि च वटो निषिद्धः शिविरे नि
त्यं चौरभयं ततः नगरेषु प्रश
स्तस्य दर्शनाच्छुभप्रदस्तथा हेका
रो तिंतिडी वृक्षो यत्नात्तं परिव
र्जयेत् शारेण धनहानिः स्यात्प्रजा
हानिर्भवेद्ध्रुवं शिविरे शालि निषि
द्धस्य नगरे किंचिदेव च ननिषिद्धः
प्रशस्तस्य नगरेषु तथा पुरे वासा
मति निषिद्धस्य प्राज्ञस्तं परिवर्जये
त् खर्जूरस्य ऊखैव निषिद्धः शि
विरे तथा न निषिद्धः प्रशस्तस्य ग्रा
मेषु नगरेषु च वृक्षस्य चनकादी
नां ग्रामे च मंगलप्रदं ग्रामेषु न
गरे चापि शिविरे च तथैव च इक्षुवृ
क्षस्य शुभदः संततं शुभद स्तथा
अशोकस्य शिरीषस्य कदम्बस्य शु
भप्रदः कदली हरिद्रा शुभदाशु
भदश्चार्द्रकस्तथा हरीतकीवृक्ष
प्रदायामेषु नगरेषु च नवासांभ
द्रुहानित्य तथा चामलकी ध्रुवं
गजानामपि शुभप्रदमश्वानां
च तथैव च कल्याणं श्रुवेः श्रव

~~वामापानिः पुं उदाः इतिशब्द~~
~~रत्नावली ॥~~
~~वामीशः पुं वृहस्पतिः इति~~
~~शब्दरत्नावली~~ सीवाल्लीस्थापन
कारिणां नशुभप्रद मनेषाश्च
त्रकाराणां परे वानराणां नराणां
च गर्दभानां गवामपि कुक्कुराणां
शृगालानां मार्जाराणां मभद्रकं
भेकानां शूकराणां सर्वेषां चाशु
भप्रदं ईशाने चापि पूर्वस्मिन् प
श्चिमे च तयोस्तरे शिविरस्य जलेभ
द्र मन्यदाशुभमेव च दीर्घे प्रस्थे स
मानं च न कुर्यान्मन्दिरं बुधः चतुरस्र
गृहे कारो गृहिणां धननाशने
दीर्घप्रस्थः परिमितो नेत्रां केनापि
संहृते शून्येन रहितं भद्रं शून्यं
शून्यप्रदं नृणां पश्ये हस्तद्वया
सर्वे दीर्घे हस्तत्रयं तथा गृहि
णां शुभदं द्वारे प्राकारस्य गृहस्य
च न मध्यदेशे कर्त्तव्यं किंचिन्नू
नाधिके शुभं वनस्य चतुर्वेध शि
विरे मंगलाप्रदं अशुभं द्रव्य वेधे
वेधे शिविरं मंगलाप्रदं शुभद्
दं सूर्यवेधे आज्ञागमं तथैव च
शिविराभ्यंतरे अत्र स्थापितान्तुल
सीवृक्षाणां धन पुत्र प्रजाश्च शुभप
दा हरिभक्तिदा प्रभाते तुलसीं
दृष्ट्वा स्वर्णदानफलं लभेत् मालती
यूथिका कुंद माधवी केतकी तथा

नारीपुरंमल्लिकाचकाञ्चनं वज्र
लंपुभं अपराजिताचपुभद्रातेषा
मुद्यानमीप्सितं पूर्वेच दक्षिणेचे
वपुभद्रनात्रसंशयः ऊर्द्धेषोडशहृ
स्तेभ्योनैवंकुर्यादरहङ्गृही ऊर्द्धेविं
शतिहस्तेभ्यः प्राकारः नपुभमरं
स्तम्भारंतैलकारंस्वर्णकारंचहीन
कं वाटीमूले ग्राममध्ये नकुर्यात्स्था
पनंवुधः ब्राह्मणं क्षत्रियं वैश्यंस
त्यान्दूगणकं पुभं भट्टं वैद्यंपुष्प
कारंस्थापयेत्क्षितिविग्रानिके अस्मेच
परिखामानंशतहस्तंप्रशस्तकं
पतिनः शिविराणांच गंभीरंदश
हस्तकं संकेतपूर्वकंचैव परिखा
हारमीप्सितं शास्त्रेरम्यमित्रंसु
गम्यमेव सुखेनच शाल्मलीना
तिंतिडीनांहिन्ताला स्तथैवच नि
म्बानां सिंधुवाराणां उदुम्बराणाम
भद्रकं पुन्नागानां वटानांचाश्वत्थ
गनामवांछितं यत्नेषामतिरिक्तो
नाधिपतिरेकांच मीप्सितं हस्तेचैव
तृहत्कं हस्तं वर्जयद्बुधः सुन्दर
र यत्नं हम्मात् इत्याह कमलोद्भ
वः कथितं लोकशिक्षार्थं जरु
कांड विना पुरी प्रश्नलत्तरणां वा
पधुना गच्छ वत्स यथासुखं इ
तिब्रह्मवैवर्ते श्रीकृष्णजन्मखंडे
१०२ अध्यायः

वाटी स्त्री वेष्टितस्थलभागः इत्य
मरः यत्रवाट मुपसत्य इतिमा
मभङ्गोक्तिः वाटः पथ्या इति
वद्भवः वाटो वृद्धि रिति मधुः
वाटं वाटश्च । इतिभरतः ॥
वाटीदीर्घः पुं इत्कटवृत्तः इति
रत्नमाला ॥
वाट्टकं क्ली भ्रष्टयवः इतिश
ब्दचंद्रिका ॥
वाटपुष्पी स्त्री वाट्यालकः इति
रत्नमाला ॥
वाट्या स्त्री वाट्यालकः इतिर
त्नमाला ॥
वाट्यालः पुं वाट्यालकः इति
शब्दरत्नावली ॥
वाट्यालकः पुं क्षुपविशेषः ।
वाडियाला इतिभाषा तत्पर्यायः
पीतपाकी २ वाट्या ३ भद्रो
दनी ४ वला ५ वाटी ६ विनया
७ वाट्याली ८ वाटिका ९ इति
शब्दरत्नावली अस्यपर्यायांतरं
गुणाश्च वला शब्दे द्रष्टव्याः ॥
वाट्याली स्त्री वाट्यालकः इतिश
ब्दरत्नावली ॥
वाड ऋ उ आप्लावे इतिकवि
कल्पद्रुमः ऋ अववाडत् उ वाड
तेलोकः आप्लावः स्नानं उत्मज्जनं

नं इत्येके इति दुर्गादासः ॥
वाडः पुं वेष्टनः । इतिशब्द
माला ॥
वाढं क्ली अभिशयः प्रतिज्ञा
इत्यमरः वाढ मित्यव्ययमपी
ति वृद्धाः इति भरतः वाढं
त्रिषु दृढे क्लीव मनुमत्यामभ्यति
षु इति नानार्थरत्नमाला ॥
वाणः पुं शरः इत्यमरः गो
स्तनः दैत्यभेदः केवलः ॥
मेदिनी अग्निः इति त्रि
कांडशेषः कांडावयवः इति
विश्वः भद्रमुञ्जः इति राज।
निर्घंटः कविवरः इति धरणिः
अस्यत्यवर्गीयवकारादेरपिदृश्यं ॥
वाणदंडः पुं वापदंडः । तत्प
र्यायः वेमा २ इति हेम चं
द्रः ॥
वाणपुरं क्ली वाणराजपुरं तत्प
र्यायः देवीकोटः २ कोटीवर्षं ३
उषावनं ४ शोणितपुरं ५ ।
इति त्रिकांडशेषः ॥ आग्नेयं ६
उमावनं ७ कोटीपुरं ८ इति
शब्दरत्नावली ॥
वाणपुंखा स्त्री शरपुंखा इति
राजनिर्घंटः ॥
वाणभट्टः पुं ग्रंथकारविशेषः

यथा नत्र मंगलं कथं क्रिय
तेमंगलाद्विघ्नध्वंसः विघ्नध्वंसा
त्वाविप्सित सिद्धि रिति चेन्न
वाण भट्टादे र्मंगले सत्यपिग्र
ंथसमाप्त्यभावात्माघादौ मंगला
भावेपि समाप्ति दर्शनात् इति
मुग्धबोधटीकायां दुर्गादासः
वाणवारः पुं भटादेश्चोलाकृति
सन्नाहः तत्पर्यायः वारवाणः
२ वारणः ३ इतिशब्दरत्नावली
चोलकः ४ इति हारावली ॥
वाणसुता स्त्री ऊषा इतिशब्द
रत्नावली ॥
वाणहा पुं विष्णुः इतिहेम
चंद्रः ॥
वाणा स्त्री पुं नीलझिंटी इ
त्यमरः ॥
वाणाश्री वाणमूलं इतिमेदि
नी वाणारिः पुं विष्णुः इति
केचित् वाणाश्रयः पुं धनुः इ
तिहलायुधः ॥
वाणासनं क्ली धनुः इतिह
लायुधः ॥
वाणिः स्त्री वयनं इत्यमरः
वापदंडः इति हेमचंद्रः ॥
वाणिनी स्त्री नर्तकी छेकः
मत्तस्त्री इति हेमचंद्रः ॥

वानी ह्री सरस्वती इत्यमरः
वचनं वपनं इति शब्दरत्ना
वली ॥
वात त् क गतिसेवयोः सुखे
इतिकविकल्पद्रुमः प्रववातत्
त्रयोऽर्थाः रमानाथस्तु गतिसु
खसेवयो रिति मत्वा गतोस
स्वगतिःसुखं वातयति पाथेवा
तःयच्छते सुखयतीत्यर्थः इत्या
ह सुखसेवनयो रितिजौमराः इ
तिदुर्गादासः
वातः पुं पंचभूतान्तर्गतचतुर्थभू
तः वातास इति भाषा तत्पर्या
यः गंधवहः १ वायुः २ पवमा
नः ४ महाबलः ५ पवनः ६ स्प
र्शनः ७ गंधवाहः ८ मरुत् ९ आ
शुगः १० श्वसनः ११ मातरिश्वा
१२ नभस्वान् १३ मारुतः १४ अ
निलः १५ समीरणः १६ जगत्प्रा
णः १७ समीरः १८ सदागतिः १९
जीवनः २० पृषदश्वः २१ तरस्वी २२
प्रभंजनः २३ प्रधावनः २४ अन
वस्थानः २५ धूननः २६ मोटनः
२७ खगः २८ अस्य गुणाः खेदत्वं
लघुत्वं शीतत्वं रूक्षत्वं सूक्ष्मत्वं
संस्थानकत्वं श्लोककारित्वंच त
त्प्रकोपकारणं यथा माधवनिदा
नभाणं ।

साभ्रकालः अपराह्णकालः प्र
त्युषकालः अन्नजीर्णसमयश्च इ
तिराजनिर्घंटः रोगविशेषः ।
यथा अथ वातव्याध्यधिकारः
तत्र वातव्याधीनां सामान्यतो वि
प्रकृष्ट निदानान्याह कषाय कटु
तिक्तक प्रमित रूक्ष लङ्घनतः ।
पुरः पवनजागर प्रतरणाभिघा
तश्रमैः हिमादनशनात्तथा निशु
वनाच्च धातुक्षयात्मलादि रयथा
रणाल्मदनशोकचिंता भयैः प्रति
दिनजमोदनाणतादक्षता तिमांस
क्षयादतीव वमनात्स्रणा मतिवि
रेचनादामतः पयोदसमये दिन
रुणादयो स्त्रीयांशयो जरा मति
गतेऽपिते शिशिरवसन्तकालेऽपि
च देहे स्रोतांसि रिक्तानिपूरयि
त्वा निलो बली करोति विवि
धाञ्रोगान्सर्वांगैकांगसं श्रयानं
प्रमितंचात्रवैपरीत्ये नोपसर्गी ले
न अपरिमित मित्यर्थः ।
प्रकर्षेण मित मल्पत्वं वा लङ्घ
नं अतिधुराणि धान्यादि काति
चिदन्नानि नवामपि वातलानिय
त आह गुणरत्नमालायां नीवार
स्त्रिपुटः सतीन चणक पपाया क
गुञ्जाढकी निष्पावाश्च मकुष्टकश्चव
रटा मंगल्य

कः कोद्रवः पते वातवरा इ
तिशेषः नीवारः प्रसाधिकाली
नी इतिलोके त्रिपुटः यसारी
सतीनः कलायः निष्पावो राज
माषः बोडा इतिलोके मकुष्ट
कः मोठ इतिलोके वरटा वरटि
का वरैर इतिलोके मंगल्या
रिकाः मसूरी इतिलोके पुरः प
वनः प्राग्वातः आमतः आमेन
मार्गावरणात् यदुक्तं वायोर्द्धा
तुक्षयात्कोपो मार्गस्यावरणेनच
ति पयोदसमये वर्षासु जरा मु
निगतेऽपिते भुक्तेऽतीवजीर्णता
गते देहे स्रोतांसीत्यादिना संप्रा
प्तिरुक्ता कषायादिभि र्हेतुभि
र्वर्षादौसमये हेतुभूते वली अनि
लः प्रवृद्धो वायुः करोति विवि
धान्रोगान् ते रोगाः कथ्यन्ते शि
रोग्रहोऽल्पकत्वं जंभात्यर्थं ह
नुग्रहः जिह्वास्तंभो गद्गदत्वमि
त्मिनत्वंच मूकता वाचालता प्र
लापश्च रसाना मनभिज्ञता वापि
र्यंकर्णनादश्च स्पर्शाज्ञत्वं तथार्दि
तं मन्यास्तंभोत्र गण्यते वाऽपी
षोयवाऊकः चर्विता चैव विश्वची
ऊर्द्धवात उदीरितः आध्मानंच
प्रत्याध्मानं वाताष्ठीला प्रत्यष्ठीला

तूणीच प्रतितूनी च वक्तिवेच
ममेवच आटोपः पार्श्वशूलंच
त्रिकशूलं तथैवच मुरुश्च मूत्र
निग्रहो मलगाढता पुरीषस्या
प्रवृत्तिश्च गृध्रसीच ततः परः
कलापखंजता चापि खंडता पं
गुतातथा क्रोष्टुशीर्षक खल्लीच
वातकंटक एवच पादहर्षो पा
दहाहः आक्षेपो दंडकाभिधः वा
तपित्त कृताक्षेप आयामो द्वि
विधः स्मृतः अंतरश्च तथा वा
ह्योधनुर्वातश्च ऊर्ध्वकः अपतंत्रो
पतानश्च पक्षाघातोऽ विलांगकः
कंप स्तंभो व्यथा तोदो भेद
श्च स्फुरणं तथा रौक्षं कार्ष्ण्यश्च
कार्श्यंच सेतं लोमांचहर्षणं अ
त्रमर्द्दोऽगविभ्रंशः शिरासंकोच
एवच अंगशोषश्च भीरुत्वं मोह
श्च चलचित्तता निद्रानाशः स्वे
दनाशो बलहानि स्तथैवच शु
क्रतयोरजोनाशो गर्भनाशः परि
श्रमः एत एवाशीति संख्यारो
गा योगेन दूषितः वातव्याधी
ति नामानो मुनिभिः परि
कीर्तिताः ॥
एत एव शिरोग्रहा दय एवंयो
गेनवातेन वाताढ्याश्यापि वीतया

पिति निरुक्त्या तदा वातज्वरा
दिष्वपि प्रसंगःस्यादत आह वृद्धि
तःप्रसिद्धितः शिरोग्रहादयोऽपी
ति देव वातव्याधिसंज्ञा प्रसिद्धान
तु वातज्वरादयः ॥ अथ वा
तव्याधीनां सामान्य चिकित्सामा
ह मधुर लवण साम्ल स्निग्धन।
सोमनिद्रा गुरु रविकर वालिसे
द संतर्पणानानि दहन जलर से
काभ्यंगसंमर्दनानि प्रकुपितपव
मानं शांत मेतानिकुर्युः इति
भावप्रकाशः अपिच वलप्रष्टि
करणेपेव वायुवीजं निषाभय
भोजनानंतरं सद्यो गमने धार
नं तथा छेदनं वह्नि तापश्च श
सद्भ्रमणं मैथुनं वृद्धस्त्रीगमनं
चैव मनःसंताप एवच अतिरूक्ष
नाहारं युद्धं कलह मेवच कट्वा
दिभयं शोकः केवलं वायुकारणं
तत्त्य चैक तज्जन्म निराममयत
दोषघ्नं पक्वरंभा फलं चैवसवीजं
शार्करोदकं नारिकेलोदकंचैव
सद्यस्तक्रं सुमिष्टकं । मा
हिषं दधि मिष्टंच केवलं वास
शार्करं सद्यः पर्युषितान्नंच क्षी
रं शीतलोदकं पक्वतैल वि
शेषंच तिलतैलंच केवलं ला
गली

तान्त खर्जूर मस्त मामलकीद्र
वं । शीतलोसीदकस्नानं स्नि
ग्धचंदनद्रवं स्निग्धपद्मपत्रपत्ला
स्निग्धव्यजनानिलं एतत्तेकथि
तं कथितं वत्सेमया वातप्रणा
शनं वायवस्त्रिविधाः पुंसांक्षेप्यासे
ताप कामजाः इति श्रीब्रह्मवैवर्ते
ब्रह्मखंडे १८ अध्यायः अन्यच्च वि
ल्वाग्निमंथ श्योनाक पटला पारिभ
द्रकं प्रसारण्यश्वगंधाच हरतीक
ण्टकारिका वलाचातिवला रास्ना
श्वदंष्ट्राच पुनर्णवा एरंडपर्णिका
पर्णीगुडूची कपिकच्छुकः यवास
शाल्पर्ण्या कान्या गाल्कार्ण्यथेत्सलिले
ऽमले तेन पादावशेषेण तिलं
पादे विपाचयेत आजं वा यदि
वा गव्यं क्षीरं दत्वा चतुर्गुणं श
तावरी रसंचैव तैलतुल्यं प्रदा
पयेत् द्रव्याणि यानि पेष्याणि
तानि वक्ष्यामि तुल्यगा शतपुष्पा
देवदारुशालपर्णीवचा गुरुः कुष्ठ
मांसी सैंधवंच पलमेकं पुनर्णवा
पाने नस्ये तथाभ्यंगे तैलमेतत्प्र
दापयेत् शूलं पार्श्वशूलंचगं
डमालांच नाशयेत् । अ
पस्मारं वातरक्त मायुष्यांश्च पु
मान्भवेत गर्भमश्वतरी विंद्यात्

किं पुन मानुषी शिव अस्मानं
वातभंगानां कुंजराणां नराणां
तथा तैल मेतत्प्रदातव्यं सर्व।
वातविकारिणां । पुनश्च ।
पलद्वयं सैंधवंच शुंठी त्रिक
पंचकं पंचप्रस्थं त्वारनालेतैल
प्रस्थं पचेत्ततः शरदस्य स्रव
स्त्रीह सर्ववातविकारनुत् इति
गारुडे १९८ अध्यायः ॥
वातकः पुं अशनपर्णी इत्य
मरः ॥
वातकर्म न स्त्री मरुत्क्रिया पर्द्दनं
यथा वाराह उवाच श्रृणुमा
नेन मे भूमे वातकर्म प्रमुंचति।
एवं हि पुरुषो युक्तो वातपी।
डित मानसः मत्तिका एव व
र्षाणि त्रीणिवर्षाणि मूषकःस्या
चैवत्रीणि वर्षाणि कूर्मो वैजाय
ते नव एष वै तापने देविमेद
नं मम शंसति यो वै शास्त्रवि
जानाति ममकर्मपरायणः श्रुत्वा
वाक्यं भगवतो प्रत्युवाच वसुंध
रा धरणुवाच अतलं लभ
ते पापं तव कर्मपरायणः तस्य
देव प्रायश्चित्तं विशुद्धि वक्रम
ईसि वाराह उवाच श्रृणुकार्त्स्न्ये
नमे देवि कथ्यमानं मयानघे अ

पराध मिमं कृत्वा संतोषेन
कर्मणा यावकेन दिन त्रीणि
तक्रेनच पुन स्त्रयः कर्मचैवंततः
कृत्वा स च मे नापराध्यतिसर्व
शंकोपरित्यज्य ममलोकायगच्छ
ति एतत्ते कथितं भद्रे महत्कर्म
पराधिनः दोषंचैव गुणंचैवय
त्वया परिपृच्छितं इति वराह
पुराणे मरुत्कर्मप्रायश्चित्तं ॥
वातकी न त्रि वातरोगयुक्तः त
त्पर्यायः वातरोगी २ इत्यमरः
वातकुंभः पुं गजकुंभाधोभा
गः इति हेमचंद्रः ॥
वातकेतुः पुं धूलि इति त्रि
कांडशेषः ॥
वातकेलिः पुं कलालापः वि
ट्गदंतक्षतः इति मेदिनी ॥
वातगामी न पुं पक्षी इतिके
चित् वातगुल्मः पुं वातूलः यथा
वातूलो वातगुल्मःस्याज्झंझावायु
र्निराप्तजः झंझानिलःप्रावृषि
ज्योत्स्नासंतो मलयानिलः इति त्रि
कांडशेषः रोगविशेषः तस्य
निदानादि गुल्मशब्दे द्रष्टव्यः
वातघ्नी स्त्री शालपर्णी अस्य
गंधा शिम्बीडीक्षुपः इति राज
निर्घंटः ॥

वाततूलं क्ली आकाशोड्डीय मानसूत्रं बुडिरसूता इति भाषा तत्पर्य्यायः वृद्धसूत्रकं २ इन्द्रतूलं ३ ग्रीष्महासं ४ वंशाकफं ५ मरुद्ध्वजं ६ इतिहारावली

वातध्वजः पुं मेघः इतिशब्दमाला ॥

वातपित्तजशूलं क्ली शूलरोगविशेषः तस्यौषधं यथा मातुलुङ्गस्य निर्यासं गुडाम्भेनसमन्वितं वातपित्तजशूलानि हन्त्येव पानयोगतः इति गारुडे १९८ अध्यायः ॥

वातपुत्रः पुं महाधूर्त्तः भीमसेनः हनूमान् । इतिमेदिनी

वातपोथः पुं पलाशवृक्षः इत्यमरः ॥

वातप्रमीः पुं स्त्री वातमृगः बाडोइ इति भाषा इत्यमरः नकुलः ॥ अश्वः इतिसंक्षिप्तसाराणादिवृत्तिः ॥

वातफुल्लान्त्रं क्ली पुप्फुसः इतिभूरिप्रयोगः ॥

वातमजः पुं वातमृगः इति जटाधरः ॥

वातमण्डली स्त्री वात्या इतित्रिकाण्डशेषः ॥

वातमृगः पुं वातप्रमी इत्यमरः ॥

वातरक्तं क्ली रोगविशेषः तस्य विप्रकृष्टं निदान माह लवणाम्लकटुक्षार स्निग्धोष्णाजीर्णभोजनैः क्लिन्नशुष्काम्बुजानूप मांसपिण्याक मूलकैः कुलत्थ माष निष्पाव शाकादि पललेक्षुभिः दध्यारनालसौवीर शुक्त तक्र सुरासवैः विरुद्धाध्यशन क्रोध दिवास्वप्नातिजागरैः प्रायशःसुकुमाराणां मिथ्याहारविहारिणां स्थूलानां सुखिनां चापि प्रकुप्यतेवातशोणितं हस्त्यश्वोष्ट्रे गच्छत श्चाश्नतश्च विदाह्यन्नं सविदाह्याशनस्य ॥ क्षारो यवक्षारादिः अजीर्णाभोजनैः अजीर्णाय भोजनैः । अतिमात्र भोजनैः विपर्य्यः क्लिन्नादीनिमांसस्यविशेषणानि क्लिन्नं शटितं शुष्कमातपेशोषितं अम्बुजं मत्स्यादिमांसं आनूपं गोधादि पर्वदेशमांसं पिण्याकंतिलखलिः मूलकं प्रसिद्धमेव निष्पावः बोड़ाशाकं शाकं पत्रशाकं आदिशब्देन वेत्राकादीनि फलशाकानि गृह्यन्ते पललं शटितत्वादि दोषरहितमपि मांसं वात शोणितं प्रकोपयेत् शटितादि तु मांसं विशेषतो वातशोणितं प्रकोपयेत् आरनालं संधानभेदः । शुक्तं संधानभेदः । सौवीरं संधानभेदः तक्रं चतुर्थांश जल युक्तं वक्ष्यते दधि सुरासंधानभेदः आसवः संधानभेदः विरुद्धं क्षीर मत्स्यादि । अध्यशनं अजीर्णे भुज्यते यत् तदध्यशनमुच्यते अतिजागरो निशि प्रायशः बाहुल्येन सुकुमाराणामसहरकायव्यापाराणां अथवा । मिथ्याहारविहारिणां । अयथाहारविहाराभ्यां स्थूलानां सुखिनां चरकवृद्धा हस्त्यश्वोष्ट्रैर्गच्छतः यतो वायुर्विवर्द्धते रुधिरंचाधो गच्छति हस्त्यादय उपलक्षणानि पद्भ्यामप्यतिचलतः अश्नतः विदाह्यन्नं विदाहि निष्पाव कुलत्थ सर्षप शाकादि संविदाह्येऽशनंयस्य भुक्ते विदग्धे तदुपरि भुंजानस्येत्यर्थः अध्यशन शब्दोपेतद्वनं विदग्धाजीर्णभोजनस्य विशेषतो हेतुत्वार्थं पश्चात्वातशोणितं प्रकुप्येदित्यनेनान्वयः एतेषांकारणानां मध्ये केनचिद्वायुः केनचिदुभयमपि प्रकुप्येत् संप्राप्तिमाह कृत्स्नं रक्तं विदहत्याशुतच्च दुष्टंस्रस्तं पादयोश्चीयते तु तत्संपृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तं पूर्वोक्तै र्हेतुभिः कृत्स्नं समस्तं रक्तंविदहति अत्र दहत्यात्तु रविवर्त्तितकर्मकः तेन विदहति विदग्धं भवतीत्यर्थः तच्च दुष्टंरक्तं स्रस्तं अधोगतं पादयोश्चीयते संश्चितंभवति तद्रुधिरंदूषितेन स्वहेतुवायुना संपृक्तं मिलितं वातरक्तंउच्यते ननुचैतस्यसंप्राप्ति रुक्तास्वश्रुतेन श्रीतुं रक्तंइत्यिमायातितच्चवायो र्मार्गरुणाद्याश्चवातःक्रुद्धोऽत्यर्थं मार्गरोधात्सवायुरत्युद्रिक्तं दूषयेद्रक्तमाशु अत्रप्रथमं रक्तस्य दुष्टिरुक्ता रक्तवातमिति व्यपदेशः युचितं भवेत्तत्राह तत्प्राबल्यादिति तस्यवातस्य दोषत्वेन प्राधान्याद्वातरक्तमिति व्यपदिश्यते पूर्वरूपमाह स्वेदोऽत्यर्थंनवाकार्ष्ण्यस्पर्शाज्ञत्वं क्षतेऽतिरुक् संधिशैथिल्य मालस्यं सदनं पिडकोद्गमः जानु जंघोरु कटीशहस्त

पादागसंदिष्ठ निस्तोदः स्फुरणं
भेदो गुरुत्वं सुप्ति रेव च कंडूः
संधिषु रुक् दाह भूत्वा नश्य
तिचासकृत् वैवर्ण्यं मंडलोत्पत्ति
र्वातास्रपूर्वलक्षणं ॥ अ
थाधिकृतवातस्य वातरक्तस्य ल
क्षणमाह वातेधिके ऽधिकं तत्र
शूलस्फुरण तोदनं शोथस्य रौ
क्ष्यकृष्णत्वं श्यावता वृद्धिहान
यः धमन्यंगुलि संधीनां संको
चोऽंगग्रहोऽतिरुक् शीतद्वेषा
नुपशयौ स्तंभवेपथुसुप्तयः ।
तत्र पादयोः शूलादिकमधिकं
यत आह सुश्रुतः स्पर्शाद्विशेतो
दभेदप्रशोफस्वापोपेतो वात
रक्तेन पादाविति अत्र सुप्तिः
स्पर्शाज्ञता अधिकरक्ते वातरक्त
माह रक्ते शोथोऽतिरुक्तोदस्ता
म्र श्चिमिचिमायते स्निग्ध रूक्षैः
समं नैति कंडूक्लेदसमन्वितः
अधिके पित्ते तदाह पित्ते विदा
हः संमोहः स्वेदो मूर्छा मदस्तृ
षा स्पर्शासहत्वं रुग्दाहः शो
थ पाको भृशोष्मता विदाहश्च
पादावेव बोद्धव्यः यत आह सु
श्रुतः पित्तात्स्यात् प्रदाहो भवे
ताम्रतयोष्मा रक्तशोथो मृदुश्च पा
दाविति शेषः ॥ अधिककफे
तदाह कफे स्तैमित्य गुरुता सु
प्ति स्निग्धत्व शीतता गुरुताद
यः पादयोरेव यत आह सुश्रु
तः कंडूयुतौ श्वेतशीतौ सशोथौ
पीनस्तब्धौ श्लेष्मदुष्टे तु रक्ते ॥
अतिक्रियमाणे वातरक्तस्य उप
द्रवानाह अस्वप्नारोचकश्वासमां
सकोथ शिरोग्रहाः मूर्छा च मद
रुक् तृष्णा ज्वर मोह प्रवेपकाः
हिक्का पांगुल्य वीसर्प पाक तोद
भ्रम क्लमा अंगुलीवक्रता स्फोटदा
हमर्मग्रहार्बुदाः मांसकोथामां
सगलनं अमाध्मानादिकमाह
पतै रुपद्रवै वर्ज्यं मोहेनैकेन
वापियत् अकृत्स्नोपद्रवं याप्यं
साध्यं स्यान्निरुपद्रवं ॥
एकदोषानुगं साध्यं नवं याप्यं
द्विदोषजं त्रिदोषज मसाध्यं स्या
द्यस्य च स्युरुपद्रवाः ॥
अथ वातरक्तस्य चिकित्सामाह
वात शोणितिनो रक्तं स्निग्ध
स्य बहुशो हरेत् अल्पाल्पं रक्षये
द्वायुं यथादोषं यथाबलं शृंग
गदाह तोदेषु जलौकोभिर्विनिर्ह
रेत् शृंग तुंबै श्चिमिचिमा कंडू
रुग्वेदनान्वितं प्रच्छिन्नेन शिरा

भि र्वा देशाद्देशांतरं व्रजेत् अ
गे ग्लानेन तत्त्याज्यं रुक्षे वातोत्तरे
च यत् गंभीरं श्वयथुं स्तंभं क
पं ग्लानिं शिरामयात् । रोगान
न्यांश्च वातोत्थान् कुर्याद्वायु रर
क्तितः विविधान्वातरोगान्वा अस्रं
वा सवशोषितं ॥ रक्तं कुर्या
त्ततः स्निग्धात्तत्प्रमाणेन निर्हरेत्
विरेचयेत्तु पित्ताद्रौ स्नेहयुक्तै र्वि
रेचनैः वाह्य मालेपनाभ्यंग परिषे
कोपनाहनैः ॥ विरेकस्थाप
ना स्नेहपाने र्गंभीरं साचरेत्
दिवास्वप्नं च कोपं च व्यायामं मै
थुनं तथा कटुस्म गुर्वभिष्यंदिल
वणाम्लौ च वर्जयेत् पुराणाय
वगोधूम शालयः षष्टिका स्तथा
भोजनार्थं रसार्थे तु विष्किराप्र
तुदा हिताः आढकी चणकामुद्ग
मसूराः सकुलत्थकाः यूषार्थे ब
हुसर्पिष्काः प्रशस्ता वातशोणिते
सुनिषण्णक वेत्राग्र काकमाचीश
तावरी वास्तुकोपोदिकाशाकं शा
कं सौवर्चलं तथा घृत मांस रसै
र्सिद्धं शाकं मत्स्यांश्च दापयेत् ।
हितो गोधूम चूर्णश्च छागक्षीर
घृतमुतैः लेपस्तद्वत्तिला भृष्टा
पिष्टाः पयसि निर्वृताः क्षीरपि
ष्टात्तसीभिर्वा वर्द्धमानफलैरपि
दुग्धपिष्टैः प्रलेपैः स्याद्धितः प
वनशोणिते गुडूचीक्वाथ क
ल्काभ्यां सपयस्कं हतं स्तं वा
तरक्तं निहंत्याशु ऊर्ध्वं हरति दु
स्तरं गुडूचीघृतं तैलं पचे
द्गुडूच्याश्च जलद्रोणे चतुष्टये पा
दशेषः कषायस्तु गोरसं द्रोण
कं तथा तिलतैलाढकं ताभ्यां
पचेन्मृद्वग्निना भिषक् वक्ष्यमा
णैः स्तैः द्रव्यैः सम्यक् कल्कीकृतैः
पचेत् मंजिष्ठा मधुकं ऋषभजी
वनीयगणस्तथा एलागुरुच ह्री
बेका मांसी व्याघ्रनखा नखी हरे
णुः श्रावणीद्वयं शिरा तामल
की तथा शृंगी प्रपामा पालाका
च विष्णुक्रांता च पत्रकं नागके
शर वालत्वक्पद्मकोत्पल चेत्नं
पलानि कल्कवस्तूनि कथितानी
ह कोविदैः पानेऽभ्यंगेऽनुवासे च
तैलमेतन्निषेवितं वातरक्तं न
डुडूलो पदूवानाशु नाशयेत् ध
र्मे पुंसवनं स्त्रीणां गर्भदं वा
तपित्तजुत् स्वेद कंडू रुजायाम
शिवः कंपाहितामयान् इत्यादु
णाकृतान्दोषानुडूवी तैल मुत्तमं
इति गुडूचीतैलं इतिभावप्रकाशः

वातरक्तघ्नः पुं ऊकुरखुतः ऊऊ
रुपुडा इति भाषा इति शब्द
चंद्रिका ॥

वातरक्तारिः पुं पित्तघ्नीलता ।
गुलंच इति भाषा इति शब्द
चंद्रिका ॥

वातरंगः पुं अश्वत्थः इतिशब्द
रत्नावली ॥

वातरथः पुं मेघः इति त्रिकां
डशेषः ॥

वातरायणः पुं उन्मत्तः निष्प्र
योजनपुरुषः कांडे ॥ कर
पात्रं कूटः परसंक्रमः इति
मेदिनी सरलद्रुमः इतिशब्द
रत्नावली ॥

वातरूषः पुं वातूलः उत्कोचः
शक्रधनुः इति मेदिनी ॥

वातरोगः पुं वायुव्याधिः तत्प
र्यायः वातव्याधिः २ चलातंकः
३ अनिलामयः ४ इति राज
निर्घंटः ॥

वातरोगीन् त्रि वातरोगयुक्तः
तत्पर्यायः वातकी २ इत्य
मरः ॥

वातर्हिः पुं काष्ठलौहोभयनि
र्मितपात्रं तत्पर्यायः काष्ठ
लौही २ इति त्रिकांडशेषः ॥

वातलः पुं चणकः इति शब्द
चंद्रिका वायुकारके त्रि ॥

वातलमंडली स्त्री वात्या इति
भूरिप्रयोगः

वातवान्न् त्रि वायुयुक्तः वातो
विद्यतेऽस्य इत्यर्थे वतुप्प्रत्ययेन
निष्पन्नः ॥

वातवैरीन् पुं वाताटः । इति
राजनिर्घंटः वायुशत्रौ त्रि

वातव्याधिः पुं वातरोगः । इति
राजनिर्घंटः ॥

वातशीर्षं क्ली वस्तिः इतिरा
जनिर्घंटः ॥

वातशोणितं क्ली वातरक्तरोगः
इति भावप्रकाशः ॥

वातसहः त्रि अत्यंतवायुयुक्तः।
यथा वातासहो वातसहो वा
तूलो वातुलोऽपिच इति शब्द
रत्नावली ॥

वातसारथिः पुं अग्निः इतिके
चित् ॥

वातस्कंधः पुं आकाशस्य भाग
विशेषः यत्र वायुर्वं इति इति
केचित् ॥

वातहान् त्रि वातघ्नः वायुनाश
कौषधं इति वैद्यकं ॥

वाताटः पुं सूर्याश्वः । इति

त्रिकांडशेषः ॥ वातमृगः इति
शब्दरत्नावली ॥

वातांडः पुं मुष्करोगविशेषः।
तस्य लक्षणं यथा वृषणोवृष
येद्वायुः श्लेष्मणा यस्यसंवृतः त
स्यकक्ष्वलन्येको रोगो वातांड।
संज्ञकः इति माधवकरः ॥

वातादः पुं फलवृक्षविशेषः।
वादाम इतिख्यातः तत्पर्यायः
वातवैरी २ नेत्रोपमफलं ३।
वाताम्रः ४ अस्यगुणाः उष्णत्वं
स्निग्धत्वं वातघ्नत्वं शुक्रका
रित्वं गुरुत्वंच अस्यमज्जगुणाः
मधुरत्वं वृष्यत्वं पित्तानिलापह
त्वं स्निग्धत्वं उष्णत्वं कफकारि
त्वं रक्तपित्तविकारिणां श्रेष्ठत्वं
च इति भावप्रकाशः ॥

वातापिः पुं असुरविशेषः स
चह्रादस्यधमनीपत्न्यांजातः अ
गस्त्येनभक्षितः इतिश्रीभागवत
मतं कल्पांतरे तु विप्रचित्तेः
सिंहिकायाजातः यथा सिं।
हिकाया मथोत्पन्ना विप्रचित्ते
स्तनदंष्ट्रा ध्रुवःशवलगात्रश्चवं
गःशाल्वस्तथैवच इल्वलोनमु
चिश्चैव वातापी दुःसहो जिकः
हरकल्पःकालनाभौभौमश्च नर
क स्तथा राहुः सेहुश्च तेषां
वैवंश सूर्यप्रमर्दनः इत्येतेसिं
हिकापुत्रा देवै रपि दुरासदाः
इति वह्नि पुराणे काश्यपीयवं
शः अमस्य विप्रचित्तिः सैंहिके
यास्सिंहिकाया मजीजनत् हि
रण्यकशिपो र्ये वै भागिनेयाद्वि
योदश वत्सःशल्यश्च राजेंद्रो
तमो वापि रेव च । इल्व
लो नमुचिश्चैव खसृमः अंजा
नस्तथा नरकःकालनाभश्चसर
माणस्तथैवच कल्पवीर्यश्च विख्या
तोदनुवंशविवर्द्धनः ॥ इतिमात्स्य
६ अध्यायः ॥

वातापिद्विष् पुं अगस्त्यमुनिः
इति हेम चंद्रः ॥

वातापिसूदनः } पुं अगस्त्यः इति
वातापिहान् } त्रिकांडशेषः ॥

वातामोदा स्त्री कस्तूरी इति
शब्दमाला ॥

वातायनं क्ली गवाक्षः इत्यमरः
तेन परबाधानिषेधो यथा।
परबाधां नकुर्वीत जलवाताय
नादिभिः कारयित्वा तु कर्माणि
कारूं पश्चात्तु वंचयेत् ॥ इति
कौर्मे उपरिभागे १५ अध्यायः

वातायनः पुं घोटकः इति त्रि

त्रिकांडशेषः ॥

वातायुः पुं हरिणः इत्यमरः

वातारिः पुं एरंडवृक्षः । इति शब्दरत्नावली शतमूली इति शब्दचंद्रिका पुत्रदात्री शेफालिका यवानी ॥ भार्गी स्नुही विडंगः सूरणः भल्लातकः जतुका इति राजनिर्घंटः ॥

वाताली स्त्री वात्या ॥ इति त्रिकांडशेषः ॥

वाताश्वः पुं कुलीनाश्वः तत्पर्यायः हयोत्तमः २ जात्यः ३ आजानेयः ४ इति त्रिकांडशेषः ।

वातासहः त्रि वातुलः इतिशब्दरत्नावली ॥

वातिः पुं वायुः यथा वातिर्वायुर्मरुद्वातः श्वसनः पवनोऽनिलः इत्यमरटीकायां भरतधृतसाहसांकः सूर्यः चंद्रः यथा वातिरादित्यसोमयोः । इति रभसः ॥

वातिकः पुं वायुजव्याधिः यथा वातिकोवातजो व्याधिः पैत्तिकः पित्तसंभवः श्लैष्मिकः श्लेष्मसंभवः समूहः सान्निपातिकः ॥ इति राजनिर्घंटः ॥

वातिगः पुं भंटाकी ॥ धातुवादिनि त्रि इति मेदिनी ॥

वातिगमः पुं वार्त्ताकुः । इति शब्दरत्नावली ॥

वातिंगनः पुं वार्त्ताकुः । इति त्रिकांडशेषः ॥

वातीयं क्ली कांजिकं इतिशब्दचंद्रिका ॥

वातुलः पुं वात्या इत्यमरटीकायां भरतः ॥

वातुलः त्रि वातविकारासहः उन्मत्तः इत्यमरटीकायां भरतः

वातूलिः स्त्री तरुतूलिका वाउड इतिभाषा इति हारावली ॥

वातूलः पुं वात्या वातासहे त्रि इत्यमरः वात्या वातसमूहः अत्र जनत्वलादि गोत्रस्थवालादिति ऊलः वातासहो वातविकारासहः वाक्षा इतिख्यातः अत्र गोत्वसोत्सादिना ऊलः वातलः वाते नोम्नीति लले ङत्वे कारवानपि वातलः वातलो वातलोपि स्यादिति द्विरूपकोषः उन्मत्तेपि वातूलः इत्यमरटीकायां भरतः ॥

वातोना स्त्री गोजिकातृणः इति राजनिर्घंटः वायुरीने त्रि

वात्या स्त्री वातसमूहः यथा आसंगिनी च वाताली स्याद्वात्या वातमंडली । इति त्रिकांडशेषः ॥

वात्सकं क्ली वत्ससमूहः इत्यमरः

वात्सल्यः पुं रसविशेषः । यथा वात्सल्य शांतौ न रसौ शृंगारः कौशिकःस्मृतः । इति त्रिकांडशेषः एतद्रसाधिकारी यथा शांते ब्राह्मण एव स्यात्प्रीतिरासः प्रकीर्तितः प्रेयसि स्युः सखायो हि यशोदा वत्सले स्मृता ॥ मधुरे राधिका ज्ञेया हास्ये स्यान्मधुमंगलः सखीयूथोऽद्भुते ज्ञेयो वीरे चारणा गोदुपाः ॥ करुणे वत्सहृतादि जटिलाद्यास्तु रौद्रके गोवर्द्धनोऽभिमन्युश्च भयानक उदाहृतो तपस्विमादयो ह्यत्र वीभत्से परिकीर्तिताः प्रकस्था नियता ज्ञेया आलम्बनविभावकाः इत्युज्ज्वलनीलमणिः वत्सलस्य भावे क्ली ॥

वात्सीपुत्रः पुं नापितः इति त्रिकांडशेषः ॥

वात्स्यः पुं मुनिविशेषः यथा वात्स्य सावर्णि गोत्रयोरेव वन भार्गव यामदग्न्यानुवत्सवत् इत्युद्धारतत्वं ॥

वात्स्यायनः पुं मुनिविशेषः । तत्पर्यायः मंदनागः २ पक्षिलः ३ स्वामी ४ इति त्रिकांडशेषः ॥

वादः पुं यथार्थबोधेच्छोर्वीकी यथा विजिगीषोः कथा जल्पवादौ स्त्वद्विविदिषो इति जटाधरः अस्य लक्षणं यथा प्रमाण तर्कसाधनोपालंभः सिद्धांताविरुद्धः पंचावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः । इतिगौतमसूत्रं अपिच सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन अध्यात्मविद्या विद्यानां वादः प्रवदतामहं इति भगवद्गीतायां ए अध्यायः प्रवदतां वादिनां संबंधिन्यो वाद जल्प वितंडाख्यास्तिस्रः कथाः प्रसिद्धास्तासां मध्ये वादोहं यत्र द्वाभ्यामपि प्रमाणतस्तर्कतश्च स्वपक्षःस्थाप्यते परपक्षश्छलजाति निग्रहस्थाने दूष्यते स जल्पो नाम यत्र त्वेकः स्वपक्षं स्थापयति अपरस्तु छल जाति निग्रहस्थानैः स्वमतं दूषयति केवलस्वपक्षं स्थापयति सावितंडानाम

कथा तत्रजल्पवितंडेविजिगी
षमाणयोर्वादिनोः शक्तिपरीक्ष
मात्रफलेवादस्तुवीतरागयोःशि
ष्याचार्य्ययो रन्ययो र्वा तत्वनिर्
णयफलः अतोऽसौ श्रेष्ठत्वात्म
हिभूतिरित्यर्थः इति तट्टीकायां
श्रीधरस्वामी ॥
वादकः त्रि वाद्यकरः वक्ता।
वद्धातोः कर्त्तरि णाक प्रत्यये
ननिष्पन्नः ॥
वादनं क्ली वाद्यं ण्यंतवदधा
तोर्भावेऽनट् प्रत्ययेन निष्पन्नं
वादरं त्रि कार्पासनिर्म्मितवस्त्रा
दि वादरायाः कार्पासाज्जातं इ
त्यर्थेऽण् प्रत्ययेन निष्पन्नं ॥
वादरंगः पुं अश्वत्थवृक्षः इति
त्रिकांडशेषः ॥
वादरा स्त्री कार्पासी इतिश
ब्दरत्नावली ॥
वादरायणः पुं व्यासदेवः इति
वादरायणिः शब्दरत्नावली ॥
वादरिकः त्रि वदरचयनकर्त्ता व
दरं चिनोतीत्यर्थे ष्ठिकप्रत्ययेन
ष्पन्नः ॥
वादलं क्ली मधुयष्टिका इतिश
ब्दचंद्रिका ॥
वादवादी पुं जिन भेदः तत्प

पर्यायः आर्हतः २ इति हेमचं
द्रः ॥
वादामं क्ली स्वनामख्यातफलं
तस्य गुणाः उष्णत्वं स्त्रिग्धत्वं
वातघ्नत्वं वल शुक्रकारित्वंच।
इति राजवल्लभः ॥
वादान्यः त्रि वदान्यः वक्ता यदः
इति भरतद्विरूपकोषः ॥
वादालः पुं मत्स्यभेदः वोमालि
इति भाषा तत्पर्यायः ।
सहस्रदंष्ट्रः २ इति हेमचंद्रः
वादिः त्रि विद्वान् इत्युणादि
कोषः ॥
वादित्रं क्ली वाद्यं इत्यमरः
वादिरं क्ली वदरीसदृशस्थूल
फलवृक्षः इति शब्दरत्नावली
वादिराट् न पुं मंजुघोषः इति
त्रिकांडशेषः ॥
वादिशः त्रि साधुवादी इति
शब्दमाला ॥
वादी न त्रि वक्ता अर्थी विवाद
कर्त्ता फरियादी इति पारस्य
भाषा यथा सभापते कात्यायना
ह कात्यायनः अथ चेत्प्रति
भूर्नास्ति वादयोग्यस्तु वादिनः
सरक्षितो दिनस्यांते दद्या द्भृ
त्याय वेतनं वादिनो भाषा

4437

वादिनः उत्तरवादिनस्तु ॥स्वयं
विवादाशक्तो प्रतिनिधि माह
नारदः अर्थिनासंनियुक्तो वा
~~अर्थिनासंनियुक्तो वा~~ प्रत्यर्थि
प्रहितोपि वा यो यस्यार्थे
विवदते तयो र्जयपराजयो ॥
तयो र्वादि प्रतिवादिनोः का
त्यायनः मनुष्यमारणेस्तेयेपर
दाराभिमर्षणे । अभक्ष्यभक्षणे
चैव कन्याहरणदूषणे पारुष्ये
कूटकरणे नृपद्रोहे तथैवच
प्रतिवादीनदातव्यः कर्त्ता त वि
वदेत्स्वयं आज्ञादीतरस्यपक्षस्थि
तस्य दंडनीयत्व माह नारदः योन
भ्राता पिता वापिनपुत्रो ननियो
जितः परार्थवादी दंड्यःस्याद्व्य
वहारेषुविब्रुवन् नारदः पूर्ववादं
परित्यज्य योन्य मालम्बतेपुनः ।
वादसंक्रमणाज्ज्ञेयो हीनवादीस
वैनरः प्रत्यर्थी यदि कश्चित्का
लं प्रार्थयते सलभते अर्थी त
त्कालं प्रार्थयन् अर्थित्वमेव हन्या
दिति तेन कालो नप्रार्थनीयः त
दाह प्रत्यर्थी लभते कालं त्र्य
हं सप्ताह मेवच अर्थी न प्रा
र्थयन्कालं तत्क्षणादेव हीयते
क्वचित्प्रत्यर्थी कालं नलभते ।

यावत्तत्कः साहस स्तेय पा
रुष्यगोभिशापात्यये स्त्रियां वि
वादयेत्सद्य एव कालोन्यत्रेच्छ
यास्मृतः अथ भाषापादः ।
तत्र भाषा स्वरूप माहतः का
त्यायन् बृहस्पती । प्रतिज्ञादोष
निर्मुक्तं साध्यं सत्कारणान्वितं
निश्चितं लोकसिद्धंच पक्षं प
क्षविदो विदुः स्वल्पाक्षरः प्रभूता
र्थो निःसंदिग्धो निराकुलः ।
विरोधिकारणै र्मुक्तो विरोधिप्र
तिरोधकः यदा त्वेवंविधः प
क्षः कल्पितः पूर्ववादिना । दद्या
त्तत्पक्ष संबंधं प्रतिवादी तदो
त्तरं नारदेनापि सारस्तु व्यवहार
णां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयतेवादी तरंस्ता मु
त्तरा भवेत् ॥ तच्छोधनमाह
बृहस्पतिः न्यूनाधिकं पूर्वपक्षं
तावद्वादी विशोधयेत् । नदद्या
दुत्तरं यावत्प्रत्यर्थी सभसन्निधौ
इतिव्यवहार तत्त्वं ॥
वाद्यं क्ली वादयंति ध्वनयंति यत्
वाजा इति भाषा तत्पर्यायः
वादित्रं २ आतोद्यं ३ । तच्चतु
र्विधं यथा ततं वीणादिकं वा
द्यमानद्धं मुरजादिकं वंशादिकं

न्तशुषिरं कांस्यतालादिकंच
तं इत्यमरः इदं ततादि चतुर्वि
धंवत्तःप्रकारं वाद्यादिशब्दत्रय
वाच्यं इदं चतुर्विधं वाद्यं वा
दित्रादि द्विनामकं वाद्य मित्यस्य
मस्त्यप्रथमांतं विशेष्यपदं इति
कलिंगादयः फलतो नविशेषः
इति तट्टीकायां भरतः अथवा
यानि तालेन राजते गीतेना
लो वादित्र संभवः गरीयस्तेन
वादित्रं तच्चतुर्विध मुच्यते ततं
शुषिर मानद्धं घन मित्यं चतुर्वि
धं ततंतंत्रीगतं वाद्यं वंशाद्यं
शुषिरं तथा चर्मावनद्ध मानद्धं
घनं तालादिकं मतं तत्र त
तं यथा अलावनी ब्रह्मवीणा
किन्नरी विपंची वल्लकी ज्येष्ठा
चित्रा घोषवती जया हस्तिका
कुब्जिका कूर्मी सारंगी परिवा
दिनी त्रिशवी शतचंद्रीचनकु
लोष्ठी च ढक्सवी ओडम्बरी पिना
कीच निःबंधः शुष्कल स्तथा
गदावारण हस्तसकडो ऽथ शारमंड
लः कपिलासोमधुस्यंदीघोषोमा
द्दितनं भवेत अलाबनी यथा
कनिष्ठिकापरिधि हिमध्यच्छिद्रे
णसंयुतः द्वाषष्ठिमितो दंडःखा
दिरो वैणवो

ऽथवा अथःकरभवान्नूर्द्ध वत्रा
वस्याभिशोभितः नवांगुलादय
श्छिद्रोपरि चंद्रार्द्धसन्निभां नि
वेश्य कुंभिकां भद्रालाबुखंडंनि
वेशयेत द्वादशांगुल विस्तारंद
र्पकं मनोहरं तुंबिका वेधमध्ये
न देइच्छिद्रे न निर्मितं मला
बुमध्यगां डोरीं कृत्वा स्वत्वास्तु
काष्ठिकां तथा संवेश्य तन्मध्ये
काष्ठिकां भ्रामयेततः यथास्या
त्रिश्लालाबु वंत्यश्च करभोपरि
पंचांगुलिषु संत्यक्तालाबु स्तस्या
चंचुयेत केशांतनिर्मिता पट्ट
तंत्री सूत्रजातथ वा समाःस्यू
त्ता इच्छातत्र तंत्रदेया विचक्ष
णैः पत्रलत्ताणं सयोग्यापात्वाला
वणी प्रकीर्तिता निष्कृनानसमु
धेत तत्रैव निःतिष्य वस्त्रसिम
ध्यमानामिकाभ्यांच वाद्या दक्षिण
पाणिना तारे मद्रेच घोषे च नि
ध्याने विंदु रिष्यते तंत्रीमूलं स्पृ
शवामांगुष्ठेन धारयेत तत स्ता
भिस्तु सर्वाभिः स्वरव्यक्ति विधीय
ते त्रिस्वरे दक्षिणःपाणि वाम
स्तेत्र चतःस्वरः अलावण्यामि
ता ज्ञेयाः सप्त षड्जादयः स्वराः
रागव्यक्ति यथा रागो भवेत्षड्जा
दि भेदतः

अंश न्यास विभेदाश्च तथात्रा
पिविधीते इय मलावणीप्रो
क्ता मनःश्रवण रंजणी अन्यता
सारदा देवी वीणारूपेण संस्थि
ता इत्यलावणी अमेषांलक्षणं
विस्तरभयान्नोक्तं शुषिरं यथा व
शोऽथपारी मधुरी तित्तिरी शंख
काहलाः तोडही मुरली बुक्का
शृंगिकास्वरनाभयः शृंगं कापा
लिकं वंशश्चर्मवंश स्तथापरः
पते शुषिरभेदास्तु कथिताःपूर्व
सूरिभिः वर्तुलः सरल श्चैकपर्व
दोष विषवर्जितः वैणवःखादि
रो वापि रक्तचंदनजोऽथवा श्रीख
ण्डजोऽथ सौवर्णो दंतिदंतमयोऽ
पिवा राजत स्ताम्रजोवापि लौह
जस्फाटिकोऽथवा कनिष्ठांगुलि
तुल्येनगर्भरंध्रेन शोभितः शिल्प
विद्याप्रवीणेन वंशःकार्यो मनो
हरः वंशेनैव मतो पीति मतंगमु
निनोदितं ततोऽन्योपि तदाका
रा वंशा एव प्रकीर्तिताः तत्राप्य
स्य शिरोदेशादधो द्विमित मंगु
लं फूत्काररंध्रं कुर्वीत मित
मंगुलिपर्वणा पंचांगुलानि स
न्त्यज्य तावद्भ्याणि कारयेत कु
र्यात्तथान्यरंध्राणि सप्तसंख्यानिकौ

शला वदरीबीजतुल्यानि सं
सम्माद्यर्द्धं मंगुलं प्रांतयो र्वंश
नं कार्यं स्वराय नाद्देत्वे
सिल्लोकेन कला देया तेन सम्य
ताभवेत पंचांगुलोयं वंशःस्या
देकैकांगुलिवृद्धितः षडंगुला
न्निनाम्नासावद्वादशांगुलं कृत
कार तारंभस्य यावदंगुलिमत्तरं
तदेव नाम वंशस्य वांशिकैःप
रिकीर्त्यते एकांगुलो द्व्यंगुलश्च
त्र्यंगुलश्चतुरंगुलः अभिताररत
त्वेन वांशिकैः समुपेक्षितः त्र
योदशांगुलो वीणापरः निंदितो
वंशानत्वसौ स्तथा सप्तदशांगुलः
महानंद स्तथानंदो विजयोऽथ
जय स्तथा चत्वार उत्तमा वंशा
मतंगमुनि संमताः दशांगुलो
महानंदो नन्दएकादशांगुलःद्वा
दशांगुलमानस्तु विजयः परिकी
र्तितः चतुर्दशांगुलमितो जय इत्य
भिधीयते ब्रह्मा रुद्रो रविविष्णुः
क्रमादत्र व्यवस्थिताः नैविड्यंपो
ढता चापि सम्यक् स्वत्वंच श्लीक्षता
माधुर्य मिति पंचामी फूत्कृतेषु
गुणाःस्मृताः शीत्कार बहुलःस्त
ब्धो विस्वरःस्फुटितो लघुः अम
धुरश्च विज्ञेयाः षड्दोषाः फूत्कृ

तेकमात् यथा प्रयोगवाहुल्य
मस्तता गीत वादने पभिर्दोषैर्यु
तोऽतीव निदितो वंशिको मतः
स्थानकादि लक्षणाभिज्ञो गमका
प्याः स्फुटाक्षरः शीघ्रहस्तः क
लाभिज्ञो वांशिको रक्त उच्यते प्र
प्रलक्तिर्वर्द्धमक्तिश्च युक्तिश्च स्तंग
लेर्गुणाः स्वस्थानत्वं सुस्वरत्वं श्रे
ण्ती मावनक्रिया समस्तगमक
ज्ञानं रागरागांग वेदिता क्रियाः
भाषास्त्र दत्तता गीत वादने स्व
स्थानेचापि दुःस्थाने नादनिर्माणा
कौशलं गातॄणां स्थान दातृत्व त
द्दोषाच्छादनं तथा वांशिकस्य गु
णा एतेमया संक्षिप्य दर्शिताः इ
तिवंशः काहला स्त्री निषंगः
तोडही मुरली बुक्का इत्येतेच।
स्त्रियांसमस्वराणां नाभि विवस्व
दनाभिः स्त्रियां वर्त्तते इतरेषांवि
स्तरभयान्नोक्तं ॥ आनद्धं
यथा आनद्धे मर्द्दलः श्रेयान् इ
त्युक्तं भरतादिभिः अपिच मुर
ज पटहडक्का विश्वको दर्पवाद्य
पणाव घन सहंज्ञा लावजाकवि
वल्सः करव भेरीस्यात् कुडुक्का
डुडुक्का कनस मुरलीकलीह
कली दौंडिशाना डमरुटमुकिम
डुः कुंडली

स्तंगुनामा रणा मभिवट वाद्यंडु
भी च रंजस्य कचिदपि कुडुक्की
स्यादुड्डरं चाप्युपांगं प्रकटितम
नवन्धं वाद्यमित्यं जगत्या त्रिपु
रमथन कर्त्त तांडवे तन्मयाणा
तमथ गुशिरंचा नद्ध मित्थं धनंच
मर्द्दलः खादिरः श्रेष्ठो हीनः स्या
दन्य दारुजः रक्तचन्दनजो वाद्यो
गभीरहृत्ति रुचकैः सार्द्धहस्त प्र
माणस्तु दैर्घ्ये मस्यविधीयते त्र
योदशांगुलं वाम मथवा द्वादशा
ङ्गुलं दक्षिणंच भवेहीन मेकेना
ङ्गुलेनवा करणानद्ध वदनोभ
यैचैवहस्य भवेत् षण्मासीयोभवे
त् प्राक्त त्वचर्मे करणां मतं मति
कानिर्मितश्चैव मृदंगः परिकीर्त्ति
तः पातये खरलिं वाद्ये मादना
र्थंच मर्द्दले विधृति गेरिकं भ
क्तं केंडुकेन चसंमतं पक्वा चि
पीटकं देयं जीवनी सत्व मिश्रि
तं सर्व मेकत्र पिष्टंतत्लेपः खरलि
रुच्यते वामास्ये पूरिका क्षाने
पंदघाप्युदक्षिणे पवं मर्द्दलकः
प्रोक्तः सर्ववाद्योत्तमो मतः प्रस
संयोगमासाद्य सर्ववाद्य शोभ
ते पतदांगवीजकोष्ठ दत्तम
ङ्गुलं विज्ञः तमिथोते मिति

ज्ञेयाः पाठवर्णा मृदंगजाः थों
दं धें धिकृट स्त्रही ताकंदं दं
थोगं धिधि खर्कर्किं नं गरं दं
था कूट पाटा मता अमी तधिं
थों धं तक्कथी दों दंदं धिगा
णां ततं तधि तक्कुतं थधिदोंत
धिपाठ खंडे त्वयं क्रमः तथाव
यति माने पाठखंडः इगतथेंजां
इगतथेंजां धो धो धिक ताधि
काथोजां थोजां तक ततोधिका
थोता इगत ताधि धि धिधिकत
ताकडुना थोधिक थोजां थोताइ
गतला इगतला इगतला धि इ
तियतिमानपाठखंडः ॥ यति
रोढा प्रवच्छेदो गजरो रूपकं
ध्रुवं गलपः सारिगोणीच नाद्य
कथितं तथा प्रहरणं छन्दनंच
प्रबंधा द्वादश स्मृताः यथा
दं थात इत्येकतालमा यतिः
ओडवाद्यं यथा दां तथो त
धिकतधि कदंथादंथा थोधिथों
धितत तत थवि थवि दिथंपा
दिम्पा टडुनकि टडुनकि ततट
ऊततटक खवटक खवटक तधि
नगितगिन गिदों दों दंदंदींदीं दं
ता तथा इत्योडवाद्यं ॥
प्रवच्छेद वाद्यं यथा दंथातः

दंथातः धिक्कि धिक्किदिगां दंथा
तः इत्यवच्छेदवाद्यं ॥ गजर
वाद्यं यथा थोकटे न नेम्न धें
दें गथो गथोंक टेंक थोगत
किधिकततकि धिक टेंगन धिधि
कटतकथोक तधि कटतक्कक
तथो गतेंगी इत्येकतालमा गजरः
रूपकवाद्यं यथा तक धिकत
कधिक्क थवितकि थवितक्कि
धिक्क दंथातः इतिरूपकवाद्यं
ध्रुवकवाद्यं यथा तक्क तक्कट
धिक्कधिक्कट इति निसारुताले
ध्रुवकः गलपो यथा तधिद्धिधि
कतक तधिगल गं था था दंत
थाटेन्नन इत्येक तालमा गल
पः सारिगोणी यथा थोंग
टन्न तक्क धिक्क तकाथकत
कथोटटंगन टटंगन थोगक
कथोः इतिप्रथमखंडः टेन्नखोः
धिखोटः टंन्न टेन्न दक्क तगट
क्क धिक्क तदितक्कदं गदं
गखो गोखाक तक तकधि
कत धिकत थोदिन्न थोहेन्न
थटेगलखोग गल खोग खोदृटगं
टगं खोदृटन्न इत्यस्य छेदनं इति
सारिगाणी नादो यथादंकाश्रि
तयं एवं दोविकीति ततसयं

दांदां धिकत्रयं यत्र इतिनादः
शचीप्रियः इतिनादः द्रुतंमानस
मारव्यं श्रृंगकूट विनिर्मितं सप्त
षड्मयं वाद्यं करिभं तदिहोच्यते
द्रुतमानद्वात्प्रतिताले यथा त
ततततन्नत कक्कि तक्कि दिंदंधि
गनखोधिगणखो धिक्क धिक
धिक्क धिकनगि नगमि घोघोधि
धिधिः दांदांधिक्कथो थोथोहत्थो
ह नन्निथो नन्निथो घोह डेद्धि
डेद्धिघोह घोह नटि नटक
गी गी धगि धगि तत तथे त
थे तत तगि ट्टींमड्डी घोगघो
ग घांघोग गथो गथो ततांता
इतिसप्तपदान्याहुः कथितंवा
द्य पंडिताः प्रतितालेन तालेन
पादवर्णा समासतः गंधर्वप
त्निना पूर्वमुर्वशी लास्य नर्तने
स्वधर्मी रंजनार्थंच करिभप्रक
टीकृतं प्रहरणं यथा योगक्का
तद्दिका थागकटगणो दं घोग
दिद्दिक धिक्कधिकटेन इत्येक
तालस्या प्रहरणं वाद्यं विमुच्य
ते येनछंदनं तन्निगद्यते यथा
तद्दिधो दि न्नु ट न्न ततः इति
छंदनं कलासाविकलासप्तता
कली चार्ह टाकालीनोलाराक
लिका चैव गोमुद्दी

मुरजः यथा अलाबुधंक्रेद्धवा
द्ये मर्दलः त्रयोदशांगुलवामम
खो द्वादशांगुल दक्षिणामुखः ।
मुरज स्त्वष्टादशांगुल वाम मुखः
सप्तदशांगुल दक्षिणमुखः मर्द
ल मुरजयो रयं भेदः घनं यथा
अनुरक्तं किरक्तंच द्विविधंघन
वाद्यकं गीतानुगं मनुरक्तं वि
रक्तं तालसंश्रयं करतालः को
स्वतालो जयघंटाथ शुक्तिका क
स्त्रिका पटवाद्यंच पहातोद्यंच घर्घ
र झंफो तालश्च मंजीर कर्त्तरी
डुरइत्यपि द्वादशैते मुनीन्द्रेण
कथिताघन संज्ञकाः त्रयोदशा
ङ्गुलव्यामो शृङ्गकाष्ठविनिर्मितो
मध्यमुखो स्तनाकारो तन्मध्ये र
ज्जु गुम्फितो पद्मिणी पत्रशट
ङ्गोकराभ्यां रज्जुयंत्रितो करता
लाबुभो वाद्यो पाटे झंकारकेरिति
यद्दा त्रयोदशयवव्यामे वक्त्रव
दोन्मितं यवपंचक गंभीरं मध्ये
च यवसप्तकं विस्तृतं वर्तुलं नि
म्नं यवत्रयमितं ततः पृष्ठतो म
ध्यदेशेच शिवलिंगसमाकृतिं अ
सप्त पेष्ठी निर्दंग्य शृङ्गकांस
विनिर्मितं संरक्ताङ्गुलि स्वस्तिग्य
सुदीर्घमधुरध्वनिं घना निसाविसंरक्तं

हृद्यं शुक्लं मनोहरं काश्मीरादि
सम्भूतं ताल माहुर्मनीषिणः
स्तनांद्दक्षिणं तालं ततो द्दीनंच
वामकं कुर्वीत तद्द्वयं कार्य त
र्जन्यंगुष्ठयो र्गतः वामहस्तस्यता
लस्य मध्यमं सन्निनादितं । तिर्य
ग्दक्षिण तालस्य परिघर्षेण ताल
येत् तालादौ वादयेद्देव स्तुतरी
र्च लघु द्रुतैः । इति करताल
विशेषः कर्मरी घनविशेषः डंकु
रश्च घनविशेषोऽन्तरेफांत पुं
लिंगः अन्येषां लक्षणं विस्तर
भयान्नोक्तं रुक्मिण्याः सत्यभा
मायाः कालिंदी मित्र विन्दयोः ।
जाम्बवत्या नाग्न जित्या लक्ष्मणा भद्र
योरपि कृष्णस्याष्टमहिषीनां पुरोहा
र महोत्सवे । ततंशुषिर मा
नद्धं घनंच पुरा पज्ञेनाः ॥ अ
वारयन्नसंख्यात क्षितिपाराणिकी
कृतिः ततंवाद्यंतु देवानां गंधर्वा
णांच शौषिरं आनद्धं राक्षसाना
न्नु किन्नराणां घनं विदुः नि
जावतारे गोविंदः सर्वमेवानयत्
क्षितौ यावंति वाद्यभाण्डानि राम
रावणे पुरेपि तावंतो नाभवन्ते
नाः कुरुपांडव संगरे ॥
किंच लिलिंप ह्यकम्पन तोम

रेण बाणे स्मरारे र्मथनात्सुरे
ण अभूततावंद्यवपि सिंहनादैः
सार्धपंचशाशीति कणाद वादः पु
ष्ठेसन्मानो योःहुंकार रवः स
सिंहनादः ततोदिभि रेभि अ
तर्भि वाद्ये अमूनां सिंहनादै
अर्धपंचशाशी वाद्य मभूत् सिंहना
देन सह वाद्यंपंचविधं भवती
त्यर्थः इति संगीतदामोदरः
विष्णुगृहे वाद्यकरणं फलं य
था अन्योपहारै र्विविधै र्घृतक्षी
राभिषेचनै गीतवादित्र नृत्या
द्यै स्तोषयस्वाच्युतं नृप पुराण
रात्रिषु गोविंदं गीत नृत्य रवो
त्सवैः भूपजागरणं भक्त्या तोष
याच्युत मव्ययं येषां नृत्यंत्तै
भक्त्या मार्जनाद्युपलेपनैः तो
षितो भगवान्विष्णु र्ददात्यभिम
तंफलं देव कर्मणि सक्तानां ते
षां संस्मृति संस्तवे तोषितोभि
मतान् कामान्प्रयच्छतिजनार्द
नः इतिवह्निपुराणे क्रियायोग
नामाध्यायः देव प्रतिष्ठायांवा
द्य विधि यथा ततःप्रासादस्या
ग्रे गीतवादित्र मंगलैः सर्वगं
धैस्ततो रक्षा हेमं मंत्र मुदाह
रेत् इतिवशिष्ठे शैलार्चास्थाप

नाध्यायः देवताविशेषगृहेवा
द्यविशेष निषेधो यथा यो
गिनी गेहे शिवागारे फलकंच
सूर्यागारेच शंखकं दुर्गागारेवं
शीवाद्यं माधुरींच नवादयेत्
फलकं कांसनिर्मितकरताः
लं मत्स्यपुराणे गीत वादित्र
निर्घोषं देवस्याग्रेच कारयेत्
विरिंचेश्च गेहे पक्वावंदाल
स्त्रीगृहे त्यजेत् चेटा भवेद्दश
कस्तसर्ववाद्यमयी यतः इति
तिथ्यादितत्वं ॥
वाद्यभांडं क्ली वादनीयपा
त्रंमुरजादि यथा पुष्करं क
रिहस्ताग्रे वाद्यभांडमुखेजले
इत्यमर श्लोकटीकायांभरतः
अपिच वाद्यभांड मिदं देवि
नानास्वरसमन्विते भेरी पट
हसंयुक्तं मया भक्त्या निवेदि
ते इतिदुर्गोत्सवादिके स्कंदपुराणो
क्तदुर्गोत्सवपद्धतिः ॥
वाध ऋ इ. विहतौ । इतिक
विकल्पद्रुमः ऋ अववाधत्
इ. वाधते इतिदुर्गादासः ॥
वाधनं क्ली वाधा इतिशब्दर
त्नावली ॥
वाधा स्त्री पीडा इत्यमरः नि
षेधः इतिहेमचंद्रः ॥
वाधुक्यं क्ली विवाहः इतित्रिका
ण्डशेषः ॥
वाध्यः पुं वहित्रं इति शब्दर
त्नावली ॥
वाध्रीनसः पुं वार्ध्रीनसः खड्गी
इतिहलायुधः ॥
वानं त्रि शुष्कफलं इत्यमरः ॥
शुष्कं इति मेदिनी ॥
वानं क्ली स्युतिकर्म कटः गतिः
इति मेदिनी जलसंस्रुतवातोर्म्मिः
सुरुंगा सौरभः इतिहेमचंद्रः गो
तीरजं तवत्तीरं ।
इति राजनिर्घंटः ॥ वन
सम्बंधिनि त्रि ॥
वानप्रस्थः पुं मधुकवृक्षः । प
लाशवृक्षः तृतीयाश्रमे इतिवि
श्वमेदिन्यौ ॥ पुत्रमुत्पाद्यवन
वासं कृत्वा अकृष्ट पच्य फला
दिभक्षयित्वा ईश्वराराधनं करो
तियः सवानप्रस्थः स च द्विविधः
अपक्कःकटः दैताड्खलिकश्च इति
श्रीभागवतमते तस्य धर्मो यथा
भूमौ मूल फलाशित्वं स्वाध्याय
स्तप एवच संविभागो यथान्या
ये धर्मोऽयं वनवासिनः तप
स्तप्यति योऽरण्ये यजेद्देवान्

जुहोति च स्वाध्याये चैव नि
रतो वनस्थ स्तापसो मतः तप
साकर्षितोत्यर्थं यस्तु ध्यानपरोभ
वेत् सन्यासीहस विज्ञेयो वानप्र
स्थाश्रमेस्थितः इतिगारुडे ४९
अध्यायः अपिच याज्ञवल्क्यउवाच
वानप्रस्थाश्रमं वक्ष्ये तच्छृणुध्वं
महर्षयः पुत्रेषु भार्यां निःक्षिप्य
वनं गच्छेत्सहैव वा वानप्रस्था
ब्रह्मचारी साग्निः सोपासनः क्षमी
अफालकृष्टेनाग्नीश्च पितृदेवाति
थीं स्तथा भृत्यांस्तु तर्पयेत् श्मश्रु
जटालोमभृद्दान्तवान् दान्तः त्रिष
वणस्नायी निवृत्तश्च प्रतिग्रहात्
स्वाध्यायवान्ध्यानशीलः सर्वभूत
हिते रतः अह्नो मासस्य षण्मासा
कुर्याद्वान्नपरिग्रहं कृतं त्यजे
दाश्वयुजे नयेत्कालं नक्तादिना
पक्षे मासे तु वाश्नीयाद्दंतोलूखं
लिको भवेत् चांद्रायणी स्वपे भू
मौ कर्मकुर्यात्फलादिना ग्रीष्मे
पंचाग्निमध्यस्था वर्षासु स्थंडिले
शयः आर्द्रवासास्तु हेमन्ते यो
गाभ्यासादिनं नयेत् । इतिगा
रुडे ९२ अध्यायः पुनरपि ।
जटित्वमग्निहोत्रित्वं त्वगयाजिन
धारणं वने वासः पयो मूलं
नीवार फलवृत्तिता प्रतिस्त्रिहा
निवृत्तिश्च त्रिस्नानं व्रतधारिता
देवतातिथि पूजाच धर्मोऽयं व
नवासिनः इति गारुडे ४९ अध्या
यः अन्यच्च वानप्रस्थाश्रमं धर्मे
ते वक्ष्यामीवधारीता अपत्य संत
तिं दृष्ट्वा प्राज्ञो देहस्य चायतिवा
नप्रस्थाश्रमं गच्छेदात्मनः शुद्धि
कारणं तत्रारण्योपभोगेनतपोभि
श्चात्मदर्शनं ॥ भूमौशय्या
ब्रह्मचर्यं पितृ देवातिथि क्रि
या होम स्त्रिषवणंस्नानं जटाव
ल्कलधारणं वन्यस्नेहनिषेवित्वं
वानप्रस्थ विधि स्त्वयं इतिवामने
अध्यायः अपरेच व्यासउवाच
एवंगृहाश्रमे स्थित्वा द्वितीयं भा
गमायुषः वानप्रस्थाश्रमं गच्छे
सदारः साग्निरेवच निःक्षिप्यभा
र्यां पुत्रेषु गच्छेद्वन मथापिवा
दृष्ट्वापत्यस्य चापत्यं जर्जरीकृत
विग्रहः शुक्लपक्षस्य पूर्वाह्णे प्र
शस्ते चोत्तरायणे गत्वाऽरण्ये
नियमो स्तपः कुर्यात्समाहितः फ
लमूलानि पूतानि नित्यमाहर
माहरेत् यदाहारो भवेत्तेन पूज
येत्पितृदेवता पूजयेदतिथिंनि
त्यं स्नात्वा चाभ्यर्चयेत्सुरान् ग्रा १४

माहारनीय वाश्नीयादष्टौ ग्रासान्समाहितः जटाश्च बिभृयान्नित्यं नखरोमाणि नोत्सृजेत् स्वाध्यायं सर्वदा कुर्यान्नियच्छेद्वाचमन्यतः अग्निहोत्रञ्च जुहुयात्पञ्चयज्ञान् समाचरेत् मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन च ॥ चीरवासा भवेन्नित्यं स्नायात्त्रिषवणं शुचिः सर्वभूतानुकम्पी स्यात्प्रतिग्रहविवर्जितः दर्शेन पौर्णमासेन यजेत नियतं द्विजः पक्षेष्वाग्रयणे चैव चातुर्मास्यानि चाहरेत् उत्तरायणं क्रमशो दक्षस्यायनमेव च वासन्तैः शारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः पुरोडाशं चरूंश्चैव विधिवन्निर्वपेत्पृथक् देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हविः शेषं समुपभुञ्जीत लवणञ्च स्वयं कृतं वर्जयेन्मधुमांसादि भौमानि कवकानि च भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् न ग्रामजातान्यार्त्तो वा पुष्पाणि च फलानि च श्रावणेनैव विधिना वह्निं परिचरेत्सदा न द्रुह्येत्सर्वभूतानि निर्द्वन्द्वो निर्भयो भवेत्

न नक्तं किंचिदश्नीयाद्रात्रौ ध्यानपरो भवेत् जितेन्द्रियो जितक्रोधस्तत्त्वज्ञानविचिन्तकः ब्रह्मचारी भवेन्नित्यं न पत्नीमपि संश्रयेत् यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् तद्व्रतं तस्य लुप्येत प्रायश्चित्ती भवेत् द्विजः तत्र यो जायते गर्भो न संस्पृश्यो हि जातिभिः न हि वेदाधिकारोऽस्य तद्वंशेप्येवमेव हि अधः शयीत सततं सावित्रीजपतत्परः शरण्यः सर्वभूतानां संविभागपरः सदा परिवादं मृषावादं निद्रालस्यमपि वर्जयेत् एकाग्निरनिकेतः स्यात्प्रोक्षितां भूमिमाश्रयेत् ॥ मृगैः सह चरेद्वासं तैः सहैव च संवसेत् शिलायां शर्करायां वा शयीत सुसमाहितः सद्यः प्रक्षालको वा स्यान्माससञ्चयिकोऽपि वा षण्माससञ्चयो वा स्यात्समानिचय एव वा नक्तं चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः चतुःकालिको वा स्यात्स्याद्वा अष्टमकालिकः चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्त्तयेत् पक्षे पक्षे समश्नीयाद्यवागूं क्वथितां सकृत् पुष्पमूलफलैर्वापि केवलै

र्वर्त्तयेत्सदा स्वाभाविकैः स्वयं शीर्णैर्वैखानसमते स्थितः भूमौ वा परिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनं स्थानासनाभ्यां विहरेत् न क्वचिद्धैर्यमुत्सृजेत् ग्रीष्मे पंचतपास्तद्वर्षास्वभ्रावकाशिकः आर्द्रवासास्तु हेमन्ते क्रमशो वर्द्धयंस्तपः उपस्पृश्य त्रिषवणं पितृदेवांश्च तर्पयेत् एकपादेन तिष्ठेत मरीचीर्वा पिबेत्सदा ॥ पंचाग्निर्धूमपो वा स्यादूष्मपः सोमपोऽथवा पयः पिबेत् शुक्लपक्षे कृष्णपक्षे तु गोमयं शीर्णपर्णाशनो वा स्यात्कृच्छ्रैर्वा वर्त्तयेत्सदा योगाभ्यासरतो वा स्याद्रुद्राध्यायी भवेत्सदा अथर्वशिरसोपेतो वेदान्ताभ्यासतत्परः यमान्सेवेत सततं नियमांश्चाप्यतन्द्रितः ॥ कृष्णाजिनी सोत्तरीयः शुक्लयज्ञोपवीतवान् अथाग्नीन्समारोप्य स्वात्मनि ध्यानतत्परः ॥ अनग्निरनिकेतः स्यान्मुनिर्मोक्षपरो भवेत् तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्वने वसन् प्रतिगृह्य पुटेनैव पाणिना शकलेन वा

विविधाश्चोपनिषद आत्मसंसिद्धये जपेत् विद्याविशेषान्सावित्रीं रुद्राध्यायं तथैव च महाप्रस्थानिकं वासौ कुर्यादनशनं तथा अग्निप्रवेशमन्यद्वा ब्रह्मार्पणविधौ स्थितः ये तु सम्यगिममाश्रमं शिवमाश्रयन्त्यशिवपुंजनाशनं ते विशन्ति पदमैश्वरं परं यान्ति चैव जगतोऽस्य संस्थितिं इति कूर्मपुराणे उपरिभागे २८ अध्यायः अन्यत्तु विष्णुपुराणे ३ अंशे ९ अध्याये द्रष्टव्यं

वानरः पुं स्त्री स्वनामख्यातपशुः वाँदर इति भाषा तत्पर्यायः कपिः २ प्लवंगः ३ प्लवगः ४
शाखामृगः ५ वलीमुखः ६ मर्कटः ७ कीशः वनौकाः ९ इत्यमरः मर्कः १० प्लवः ११ प्रवंगः १२ प्रवगः १३ प्लवंगमः १४ प्रवंगमः १५ गोलांगूलः १६ कपित्थास्यः १७ दधिशोणः १८ हरिः १९ तरुमृगः २० नगाटनः २१ कंपी २२
कम्पारुः २३ कलिप्रियः २४ इतिशब्दरत्नावली किखिः २६ शालावृकः २७ इति जटाधरः वानरप्रियः पुं क्षीरिवृक्षः इतिरत्नमाला ॥

वानरप्राणः पुं लोधवृक्षः इति
शब्दचंद्रिका ॥
वानराघाटः पुं वनच्छागः इति
हारावली ॥
वानरी स्त्री मर्कटी शूकशिम्बी
इति शब्दरत्नावली ॥
वानरेंद्रः पुं सुग्रीवः इतिश
ब्दरत्नावली ॥
वानलः पुं वावयः कृष्णवाव
इ इतिख्यातः इतिशब्दचंद्रिका
वानस्पत्यः पुं पुष्पजातफलवृ
क्षः सहकाराम्रजम्ब्वादि इत्यमरः
वाना स्त्री वर्त्तिकापक्षी । इति
जटाधरः
वानायुः पुं देशविशेषः सतु
भारतवर्षस्य उत्तरपश्चिमे वर्त्त
ते इतिशब्दरत्नावली ॥
वानायुजः पुं वनायुदेशोत्पन्न
घोटकः इत्यमरः ॥
वानीरः पुं वेतसवृक्षः इत्यम
रः वांजल इति ख्यातवृक्षश्च
तत्पर्यायः वृत्तपुष्पः २ शाखा
लः ३ जलवेतसः ४ व्याधिघा
तः ५ परिव्याधः ६ नादेयः ७
जलसंभवः ८ अस्यगुणाः तिक्त
त्वं शिशिरत्वं रक्षोघ्नत्वं व्रणशो
धनत्वं पित्तास्रकफदोषनाशित्वं
संग्राहित्वं कषायत्वंच । इति
राजनिर्घंटः ॥
वानीरकः पुं मुंजतृणं । इति
राजनिर्घंटः ॥
वानीरजं क्ली कुष्ठं इति राज
निर्घंटः ॥
वानेयं क्ली कैवर्त्तीमुस्तकं इत्य
मरः ॥
वांतः त्रि वमतिवस्तु वमधातोः
कर्मणिक्त प्रत्ययेन निष्पन्नः ॥
वांतादः पुं कुक्कुरः इति त्रि
कांडशेषः ॥
वांतिः स्त्री वमनं वाँति इति
भाषा यथा वान्ति कृल्लेखने छ
र्दिर्वमनं वमथुर्वमिः इतिरत्नमा
ला वांति हृत् पुं लोहकंटकवृ
क्षः मयना इतिभाषा इति
शब्दचंद्रिका ॥
वांतिदा स्त्री कट्कीवृक्षः इति
शब्दचंद्रिका ॥
वान्या स्त्री वनसमूहः इतिशब्द
रत्नावली ॥
वापः पुं वपनं वपधातोर्घञ्
प्रत्ययेन निष्पन्नः ॥
वापकः त्रि वपनकारयिताण्यंत
वपधातोः कर्त्तरि णक प्रत्ययेन
निष्पन्नः ॥

वापदंडः पुं वपनार्थदंडः वैंध
इतिभाषा तत्पर्यायः वेमा १
इत्यमरः वेम २ वेमः ३ वा
यदंडः ५ इति भरतः ॥
वापिः स्त्री वापी इति भरत
द्विरूपकोषः ॥
वापितं त्रि वीजाकृतं मुंडितं
इति मेदिनी धान्यविशेषं क्ली
वाओयाधान इतिभाषा तस्य
गुणाः वापितं गुरु तद्वाल्पकिं
विहीनमवापितं इति राजव
ल्लभः
वापी स्त्री दीर्घिका इत्यमरः
उप्यते पद्मादिकमस्यां वाप्यांवा
पि रपि स्मृता इति द्विरूपकोषः
इति तट्टीकायां भरतः ॥
तस्यालक्षणं यथा नव्यवर्द्धमा
नधृतो वशिष्ठः शतेन धनुर्भिः
पुष्करिणी त्रिभिः शतैर्दीर्घिका
चतुर्भिर्द्रोणः पंचभिस्तडागः द्रो
णाद्दशगुणा वापी तेन चतुर्दिक्षु
पंचत्रिंशद्धस्तान्यूनतायां द्वादश
शतहस्तांतरान्यूनत्वेन दीर्घिका
चतुर्दिक्षु चत्वारिंशद्धस्तान्यूनतायां
षोडशशतहस्तांतरान्यूनत्वेन द्रो
णः चतुर्दिक्षु त्रिंशदधिकशतह
स्तान्यूनतायां षोडशसहस्रहस्तान
रान्यूनत्वेन वापी इति जलाश
योत्सर्गतत्वं ॥ तत्खननफ
लं यथा यो वापी मथवाकू
पं देशे वारिविवर्जिते खानयेत्स
दिवं याति बिन्दौ बिन्दौ शतं
समाः इतिकल्पतरौ वायुपुराणं
तज्जलगुणाः वाप्यं गुरुक
टुक्षारं पित्तलं कफवातजित्
इति राजवल्लभः ॥ तत्खनने
दिग्निषेधो यथा वापी कूपत
डागं वा प्रासादं वा निकेतनं न
कुर्यात् हृदिकामस्तु ग्नलानिल
नैर्ऋते आग्नेयामनसंतापो नैर्ऋ
ते क्रूरकर्मकृत् वायव्यां बल
वित्तंच पीयमाने जलेप्रिये स्या
तस्य पावकेभागे वापी कूप त
डागकं अग्निदाहं सदा कुर्यात्त
माशुषं चतुष्पदं नैर्ऋते पीयमा
नेतु यासना दुःखितो भवेत् क
स्यापि तज्जलंपीत्वा पतिं हंत्या
ति कामतः इतिदेवीपुराणं
दाऊइप्रवेशाध्यायः तत्करणफ
लं यथा शर्म्मिल उवाच तडा
गोदक वापीनां कृतानामिह य
त्फलं विशेषेण पितृश्रेष्ठ वक्तु
मर्हस्यशेषतः यमउवाच धर्मस्या
र्थस्य कामस्य यशसश्च द्विजोत्त

स्य तडागं स्वप्रभूतांबुपरमायत
नंस्मृतं देवताः पितरो नागा गंध
र्वा यक्षराक्षसाः पशुपति मनुष्या
श्च संश्रयंति जलाशयं कृत्स्नंता
रयते वंशं पयप्लावातेजलाशये गा
वः पिबंति पानीयं मनुष्याः पशव
स्तथा प्रारहतो तडागेषु सलि
लं यस्य तिष्ठति अग्निष्टोमफलं त
स्य प्रवदंति मनीषिणः येषां शि
शिरकाले तु पानीयं प्रतिष्ठति सा
ज्ञपेयातिरात्राभ्यां फलं विन्दति मा
नवाः वसंते चैव ग्रीष्मे तु सलिलं
यस्य तिष्ठति राजसूयाश्वमेधा-
भ्यां सफलं समुपाश्नुते तडागं स
र्वसत्वानां जीवनं तु दिवानिशां
तस्मात्सर्वात्मना वत्स तडागानि
ह्यकारयेत् कृत्स्नं इति नारयेद्वं
प्रोपुरुषस्य नसंशयः सावतीरः
कृतः कूपः संप्रभूत जल स्तथा
यस्य स्वाद जलं कूपे पिबंति सत
तं जनाः सनरो विरजो लोके
देववद्दिवि मोदते पीत्वैवेत्तर
संतीरं दधिमधुसुरासवं ताव
त्पिपासानोपैति यावत्तोयं नपी
यते जीवति वाजरहिता दिव
सानि बहून्यपि तृषितस्तोयरहि
तो दिनमेकं न जीवति तस्माद्दा
ति

योनिसं पानीयं प्राणिना मिह ।
सहस्राणि नरःप्राणान् मात्रेनेह्य
त्रसंशयः प्राणदानात्परं नाम
नास्ति दानं हि विद्यते तस्माद्वा
पीश्च कूपांश्च तडागानि न कार
येत् सहस्राणि द्व विप्रहर्षे यदी
च्छेत् श्रेयमात्मनः सुर्क्षं परनि
पानं तु यःकारयति शक्तितः ॥
संतारयति भूयोपि द्विगुणं तस्य
वैफलं इति वह्निपुराणे तडाग
हृत्सप्रसंशा नामाध्यायः ॥
वापीहः पुं चातकपक्षी इति
त्रिकांडशेषः ॥
वाप्यं क्ली कुष्ठौषधं इत्यमरः ॥
वपनीये वापीभवे च त्रि ॥
वामं क्ली धनं इतिमेदिनी ॥
वास्तुकं इतिजटाधरः ॥
वामः त्रि वल्गुः प्रतीपः सव्यः
इत्यमर मेदिकारौ अधमः
इति सिद्धांतकौमुद्यामुणादिवृत्तिः
वामहस्तेन जलपान भोजननि
षेधो यथा हारीतः । न पिबे
न्न च भुंजीत द्विजः सव्येन पा
णिना नैकहस्तेनच जलं शूद्रे
णावर्जितं पिबेत् इति आह्नि
कतत्वे अपिच न वामहस्तेनो
द्धृत्य पिबेद्वक्त्रेण वा जले नो

4451

नोत्तरेदनुपस्पृश्य नाप्सु रेतः स
मुत्सृजेत् इति कौर्मे १५ अध्या
यः ॥ वामः काये ब्रह्म
णोपि मांस मद्यादि भुक्तये ।
कृतो मया मोहनाय चार्वाकादि
प्रवर्तकः इतिकालिकापुराणे
१२ अध्यायः ॥
वामः पुं हरः कामदेवः ॥
पयोधरः इतिमेदिनी ॥
वामदृक् श स्त्री नारी इतिरा
जनिर्घंटः
वामदेवः पुं शिवः इत्यमरः ॥
वामनः पुं दक्षिणदिग्गजः कृ
सः इत्यमरः अंकोष्ठवृक्षः हरिः
इतिमेदिनी ।विष्णोः पंचामाव
तारः तस्य प्रादुर्भावो यथा ।
सदाशिवउवाच शक्रादस्य स
तो यज्ञे विरोचन सुतो बलिः ।
तस्यपुत्रो महा बाहु र्वलि र्वेषा
नरप्रभः सत्य धर्म विरो श्रेष्ठः
सत्यशीसी जितेंद्रियः । हरेः ।
प्रियतमो भक्तो नित्य धर्मरतास्तु
चिः सजित्वा सकलान् देवान्संद्रा
श्च समरुद्गणान् त्रिलोकान्स्व
वेशं स्थाप्य राज्यं चक्रे महाबलः
इंद्रादि त्रिदशास्तस्य किंकराः
समुपस्थिताः असुरान्स्व सुर ।

पतिं दृष्ट्वा तस्य पितार्दितः
कश्यपो भार्यया सार्द्धं तपस्त
पे हरिं प्रति आदित्या सह
धर्मात्मा पयोव्रत समन्वितः
अर्चयामास देवेशं पद्मनाभंज
मनया विभुः इति मंत्रं समुच्चार्य
हर्षी वैमुक्तिमंडपे विश्राममथायाद्वनं

निष्पापः शापवर्जितः संप्राप्य
वासवं विश्वो विश्वतीर्थेषु सर्वतः
कार्या यात्रा प्रयत्नेन महापुण्य
समृद्धये नवम्यां पंचदश्यां च कु
ल स्तंभ समर्चये दुःख रुद्रापि
शाचत्वेन भवेदस्य पूजनात् कृत्वा
पर्वसिमा यात्राः कर्तव्यास्तीर्थवा
सिभिः पर्वस्वपि विशेषेण का
र्या यात्राश्च सर्वतः नवस्थं दिव
सं कुर्यात्विना यात्रां कचित्कती
यात्राद्वयं प्रयत्नेन कर्त्तव्यं प्रतिवा
सवं आदौ स्वर्गतरंगिण्यां स्नात्वा
विश्वेशितुर्भवं यस्य वंध्यं दिनं गा
तं काश्यां निवसतः सतः निरा
शाः पितर स्तस्य तस्मिन्नेव दिने भ
वन् स दृष्टः कालसर्पेण सदैव
स्त्वनाकृष्टं सभूष स्तत्र दिव
से विश्वेशो यन्न नेक्षितः सर्वती
र्थेषु सस्नौ स सर्वयात्राश्च यथात्म च
मणिकर्ण्यां स्त्रशः स्नातो यो वि
श्वेशं निरैक्षत सन्ततं सततं पुनः स
मं सर्ने सतं पुनः पुनः दृष्ट्वापि वि
श्वेश्वरो नित्यं स्नात्वा च मणिक
र्णिका व्यासउवाच सततं कोट
भिर्भ्र कृत्वा काशीमाहात्म्य मुत्तमं
नरो न निरयं याति कृत्वाप्याघ
सहस्रकं इति काशीखंडे १०
अध्यायः

वाराणसेयः त्रि वाराणसीजातः
वाराणसी शब्दात् ढेय प्रत्ययेन
निष्पन्नः ॥
वारासनं क्ली जलाधारः तत्प
र्यायः वाः सदनं २ इति त्रि
काण्डशेषः ॥
वाराहः पुं महापिण्डीतकवृक्षः
इति राजनिर्घण्टः वराह एव वा
राहः तत्संबन्धिनि त्रि ॥
वाराहकर्णी स्त्री अश्वगन्धा इति
राजनिर्घण्टः ॥
वाराहपत्री स्त्री अश्वगन्धा इति
राजनिर्घण्टः ॥
वाराहाङ्गी स्त्री दन्तीवृक्षः इति
भावप्रकाशः ॥
वाराही स्त्री ब्रह्माण्यादिसप्तमात
कान्तर्गतमातृकाविशेषः यथा
वराहरूपधारी च वराहोपमउच्यते
वाराहजननी चाथ वाराही वर
वाहना इति देवीपुराणे देवीनि
रुक्ताध्यायः ४५ योगिनीविशे
षः यथा दुर्गा चंडेश्वरी चंडी
वाराही कार्त्तिकी तथा हरसि
द्धा तथा काली इंद्राणी वैष्णवी
तथा भद्रकाली विशालाक्षी भैर
वी कामरूपिणी एताः सर्वाश्च
योगिन्यो भंगारैः स्नापयन्तु ते तीर्थे

विशेषः यथा वाराही यमुना गंगा करतोया सरस्वती कावेरी चन्द्रभागा च सिंधु भैरव सागराः पंचस्नान विधानाय सान्निध्यमि ह वल्प्य इति बृहन्नंदिकेश्वर पुराणोक्त दुर्गापूजा पद्धतिः वराहदेवस्य शक्तिः यथा यत्त वाराह मतुलं रूपं या बिभ्रती हरेः शक्तिः साप्यायेयौ तत्र वाराही बिभ्रती तनुं इति चंडी अपिच वाराह रूपिणी देवी। दंष्ट्राहृत वसुंधरा शुभदास्तु प्रभा शुभा वाराही तां नमा म्यहं इति बृहन्नंदिकेश्वर पुराणोक्त दुर्गापूजापद्धति ॥ वराहक्रांता चामात्ल इतिख्या तः तत्पर्यायः विष्वक्सेनप्रिया २ गृष्टिः ३ वदरा ४ इत्यमरः रक्षिः ५ इति भरतः शूकरी ६ क्रोडकन्या ७ विष्वक्सेनकांता ८ वराही ९ कौमारी १० त्रिनेत्रा ११ ब्रह्मपुत्री १२ क्रोडी १३ कन्या १४ गृष्टिका १५ माधवेष्टा १६ शूक रकंदः १७ क्रोडः १८ वनवासी १९ कुष्ठनाशनः २० वला २१ अमृत तः २२ महावीर्यः २३ महौषधं २४ शम्बरकंदः २५ वराहकंदः २६ वीरः २७ ब्राह्मीकंदः २८ सूकंर कः २९ वृद्धिदः ३० व्याधिहन्ता ३१ अस्याः गुणाः तिक्तत्वं कटुत्वं विष पित्त कफ कुष्ठ मेह कृमि नाशित्वं वृष्यत्वं बलत्वं रसाय नत्वंच इति राजनिर्घंटः अ नूपे वाराहीकंद एवान्यै चर्मका रालुको मतः अनूपेस भवेद्दे शे वाराह इव लोमवान् ॥ इतिभावप्रकाशः ॥ प्रयामा पत्नी इतिराजनिर्घंटः ॥ मे दिनीमते पवर्गीय वकारादि रयंशब्दः ॥

वारि क्ली जलं इत्यमरः क्ली वेरं इति हेमचन्द्रः दिग्विशेषे तस्य निषेधविधौ यथा। ई शाने चापि पूर्वस्मिन्नग्निमेव तथोत्तरे शिबिरस्य जलं भद्र मन्यत्राशुभ मेवच इति ब्रह्म वैवर्ते श्रीकृष्णजन्मखंडे १०२ अ ध्यायः जलक्रीडायां वर्णनीया नि यथा जलकेलौ सखः लो भचक्र हंसापसर्पणं पद्मज्ञानि पयोविंदु इत्यागा भूषणाच्युतिः इति कविकल्पलतायां १ स्तव के ३ कुसुमं ॥

वारिः स्त्री वाक् सरस्वती गज

बंधनी हस्तिबंधनभूमिः व दिः कपर्दीति भाषा इतिमे दिनी कारहेम चंद्रौ ॥

वारिकंटकः पुं शृंगाटकः इति जटाधरः त्रिकांडशेषः॥

वारिकर्णिका स्त्री रवमूली पाना भाषा इतिशब्दरत्नावली ॥

वारिकर्बुरः पुं इल्लिशमत्स्यः । इति त्रिकांडशेषः ॥

वारिकुब्जकः पुं शृंगाटकः इ तिशब्दरत्नावली ॥

वारिकुब्जकः पुं शृंगाटकः इति त्रिकांडशेषः ॥

वारिक्रमिः पुं जलौका । इति त्रिकांडशेषः वारिचत्वरः पुं कुंभिका

वारिचरः पुं मत्स्यः । इतिध नंजयः जलचरजंतुमात्रंच

वारिचामरं क्ली शैवालः इति त्रिकांडशेषः

वारिजं क्ली द्रोणीलवणं गौ रसुवर्णं पद्मं लवंगं इति राजनिर्घंटः॥

वारिजः पुं शंखः इतिहेम चंद्रः शंबुकः इतिशब्दमाला

वारितस्करः पुं मेघः इतिशब्द माला सूर्यः यथा स्वरूपधारि णी चेना मानिनाय निजाश्रमं सैवा भार्या प्रीतिमती भास्करो वारितस्करः इति मार्कंडेयपुरा णं ॥

वारित्रा स्त्री छत्रं इति त्रिकांड शेषः ॥

वारिदं क्ली वाला इतिशब्दरत्ना वली ॥

वारिदः पुं मेघः मुस्तकः इत्य मरः ॥

वारिधिः पुं समुद्रः इतिशब्द रत्नावली ॥

वारिनाथः पुं वरुणः समुद्रः मेघः केचित शब्दरत्नावली ॥ (वारिनिधिः पुं समुद्रः

वारिपथिकः त्रि जलपथगामी वारिपथं गच्छतीत्यर्थे ष्ठिकप्र त्ययेन निष्पन्नः ॥

वारिपर्णी स्त्री कुंभिका इत्यमरः अस्या गुणाः वारिपर्णी हि माक्षिका लघ्वी स्वाद्वी सरापटु दोषत्रयकरी रूक्षा शोणितज्वरा शोषकृत् इति राजवल्लभः ॥

वारिपालिका स्त्री रवमूलिका इतिशब्दमाला ॥

वारिप्रवाहः पुं निर्झरः इति
शब्दमाला ॥
वारिमष्णी स्त्री वारिपर्णी इ
इतिशब्दमाला ॥
वरिवदरा स्त्री प्राचीनामलकं
इति त्रिकांडशेषः ॥
वारिवालकं क्ली ह्रीवेरं इति
हारावली ॥
वारि भवं क्ली स्रोतोंजनं इति
राजनिर्घंटः ॥
वारिमसिः पुं मेघः इति त्रि
कांडशेषः
वारिमुक्च पुं मेघः इतिशब्द
रत्नावली ॥
वारिमूली स्त्री वारिपर्णी इति
शब्दरत्नावली ॥
वारिरथः पुं भेलकः । इति
त्रिकांडशेषः ॥
वारिराशिः पुं समुद्रः इति
त्रिकांडशेषः ॥
वारिरुहं क्ली कमलं इति रा
जनिर्घंटः जलजाते त्रि ॥
वारिलोमान् पुं वरुणः इतिज
टाधरः ॥
वारिवदनं क्ली प्राचीनामलकं
इतित्रिकांडशेषः ॥
वारिवरं क्ली करमर्दकं इति
जटाधरः ॥
वारिवल्लभा स्त्री विदारी इति
राजनिर्घंटः ॥
वारिवासः पुं शौंडिकः इति
हेमचंद्रः ॥
वारिवाहः पुं मेघः ॥ मुस्ता
इत्यमरः ॥
वारिवाहनः पुं मेघः इति श
ब्दरत्नावली ॥
वारिशः पुं विष्णु इतित्रिकां
डशेषः ॥
वारिसंभवं क्ली लवंगं सौवी
रांजनं उशीरं इति राज
निर्घंटः ॥
वारिसंभवः पुं यावनालशर्करः
इतिराजनिर्घंटः ॥
वारी स्त्री गजबंधिनी कलसी
इतिधरणिः ॥
वारीटः पुं हस्ती इतिशब्द
माला ॥
वारीशः पुं समुद्रः इति हे
मचंद्रः ॥
वारुः पुं विजयकुंजरः इति
हारावली ॥
वारुटः पुं रथिः श्वेतशाख्या
त्रिकांडशेषः
वारुणं क्ली जलं इति राज

4487

निर्घंटः वरुणसम्बंधिनि त्रि य
था पश्चिमे पुष्पदंतंच वारुणंच
प्रशस्यते उत्तरेण तु भल्लाटं सौ
मंच शुभदं भवेत् ॥ उदुम्बर
स्तथा याम्ये वारुणे पिप्पलः शु
भः स्नतश्चोत्तरतो धन्यो विपरी
तास्त्वसिद्धये इति मात्स्ये २२९
अध्यायः ॥
वारुणकर्म क्ली जलाशयखनना
दि तस्य शुभाशुभ कालादि यं
था यमउवाच सुदिने शुभनक्ष
त्रे चंद्रतारा बलै युते स हितस्तु
भवेयत्र काले तस्मिन्नृपिः स्मृ
तः स्पृष्टौ तु कृते कर्तुः संपूर्ण
स्तस्मिनारम्भः कर्कटे पुत्रलाभस्तु
सौख्यं तु मकरे भवेत् मीने
यशोर्थ लाभस्तु कुंभे च सुवज़र
कं वृषेच मिथुने वृद्धि वृश्चिके
निर्जलं भवेत् पितृतस्तिस्तु कं
न्यायां तुलायां सस्य संपत्तिः ।
सिंहे मेषे धनं नाशं जलस्य।
कुर्वीत द्विज तथा चैतेषु लग्नेषु
वारुणं कर्म नोदिशेत् इतिव
क्लि पुराणे वारुणारामप्रति
ष्ठानामाध्यायः ॥
वारुणिः पुं अगस्त्यमुनिः इ
ति त्रिकांडशेषः ॥
वारुणी स्त्री सुरा पश्चिमदिक्
इत्यमरः शतभिषानक्षत्रं ।
इति हेमचंद्रः गंडदूर्वा इति
मेदिनी इंद्रवारुणी दूर्वा ।
इति राजनिर्घंटः शतभिषान
क्षत्रयुक्तचैत्रकृष्णत्रयोदशी यथा
स्कंदपुराणे वारुणेन समायुक्तो
मधौ कृष्णा त्रयोदशी गंगायां
यदि लभ्येत सूर्यग्रहशतैः स
मा वारुणे शतभिषा शनि
वारसमायुक्ता सा महावारुणीस्मृ
ता गंगायां यदि लभ्येत कोटि
सूर्य ग्रहैः समा शुभयोग स
मायुक्ता शनौ शतभिषा यदि म
हा महेति विख्याता त्रिकोटि कु
लमुद्धरेत् अत्रसंज्ञाविधेः सार्थ
कत्वाय निमित्तत्वेन मासपत्नाति
थ्युल्लेखानंतरं महावारुणीमहा
महावारुणपदोल्लेखनीये नतैचै
त्रेमासि कृष्णपक्षे त्रयोदश्यांति
थौ महावारुण्यां महामहावारु
ण्यां यथा यथे प्रयोज्य नचात्र
स्नानं कुर्वंति या नार्यः कुंभदेशत
भिषां गते सप्तजन्म भवेयुस्ता
दुर्भगा विधवा ध्रुवं इति त्र
योदश्यां तृतीयायां दशम्यां
च विशेषतः शूद्र विट्क्षत्रि

याः स्नानं नारेषु कथंचन इति भवे
जावालि वचनाभ्यां स्त्री शूद्रा
दीनां च स्नान निषेध इति वाच्यं
भोगाय क्रियते यत्तु स्नानं याद
यादृच्छिकं नरैः तन्निषिद्धं दश
म्यादौ नित्य नैमित्तिकेन तु ॥
इति हेमाद्रि धृत वचनेन राग
प्राप्तस्नान एव निषेधात्तत्रे
पि तथा कल्पनात् अत्र अयोग
रूपं पूर्णायां पूर्वाह्णेतरकाले
नक्षत्रादिसत्वे परदिने पूर्वाह्णे
तिथि नक्षत्र लाभेपि पूर्वदिने
एव स्नानं रात्रावपि वारुण्यादि
षु गंगायां स्नानं दिवा रात्रौ च
संध्यायां गंगायां च प्रसंगतः ।
स्नात्वाश्वमेधजं पुण्यं दरेप्युद्धृत
तज्जलैः इति ब्रह्मांडपुराण
सामान्यतः श्रुतिप्रसवात् इति ।
तिथ्यादितत्वं वरुण प्रेरि
त वृंदावनस्थ कदंबतरुकोट
रनिःसृत बलदेव पीत वारुणी
यथा पराशर उवाच वने विच
रतस्तस्य सह गोपै महात्मनः मा
नुषच्छद्मरूपस्य शेषस्य धरणी
धृतः निष्पादितोरुकार्यस्य का
र्येणोर्वी विचारिणः उपभोगार्थ
मत्यर्थं वरुणः प्राह वारुणीं
अभीष्टा सर्वदा यस्य मदिरे त्वं
महौजसः अनंतस्योपभोगाय तस्य
गच्छ मुदे शुभे इत्युक्ता वारुणी
तेन सन्निधान मथाकरोत् ।
वृंदावन वनोत्पन्न कदम्बतरुको
टरे विचरन् बलदेवोपि मदिराम
युत्तमं । आघ्राय मदिरात
र्ष मवाप्याथ पुरातनं ततः कद
म्बात्सहसा मद्यधारां स लांगली
पतंतीं वीक्ष्य मैत्रेय प्रययौ परमां मु
दं ॥
पपौ च गोप गोपीभिः समवेतो
मुदान्वितः उपगीयमानो ललितं
गीत वाद्य विशारदैः ॥
इति विष्णुपुराणे ५ अंशे २५
अध्यायः ॥
वारुणीवल्लभः पुं वरुणः इति
शब्दमाला ॥
वारुंडः पुं फणिनां राजा इति
मेदिनी तन्मते पवर्गी यादिः ।
किंतु वृत्तौ उणादि प्रत्यय निष्प
न्नत्वात् अंतस्थादौ लिखितः ॥
वारुंडः पुं क्ली नौसेकपात्रं ॥
नेत्रमलं कर्णमलं इति मेदिनी
वारुंडी स्त्री द्वारपिंडी । इति
मेदिनी ॥
वारेंद्री स्त्री देशविशेषः इति

शब्दरत्नावली यथा प्राच्यां मा
गध शोणौ च वारेंद्री गौडरा
ढकाः वर्द्धमान तमोलिप्त प्रा
ग्ज्योतिषोदयाद्रयः इति ज्यो
तिस्तत्वं अधुना राजशाहीना
मक देशैकदेशः ॥
वार्णिकः त्रि लेखकः इति श
ब्दमाला ॥
वार्चः पुं हंसः वारि चरती
त्यर्थे ड प्रत्ययेन निष्पन्नः इति
मुग्धबोधव्याकरणं ॥
वार्त्तं क्ली असारं आरोग्यं ।
इत्यमरः ॥
वार्त्तः त्रि निरामयः इत्यमरः ॥
वृत्तिशाली इत्यजयपालः ॥
वार्त्तकः पुं पक्षिविशेषः वटेर
इति भाषा यथा वार्त्तको वा
र्त्तक श्चित्र स्तत्तोऽन्या वर्त्तका
स्मृता वर्त्तकोऽग्निकरः शीतोज्वर
दोषत्रयापहः सुरुच्यः शुक्र
दो बल्यो वर्त्तकाल्पगुणा ततः
इति भावप्रकाशः ॥
वार्त्ता स्त्री दुर्गा यथा पश्चा
द्विपालनाद्देवी कृषिकर्मांतका
रणात् वर्त्तनाहारणाद्वापि वा
र्त्ता सा एव गीयते इति देवीपु
राणे ४५ अध्यायः वृत्तिः ज
इत्यमरः उदंतः वार्त्तिकगणः
कृष्यादि इति मेदिनी ॥
वार्त्तकः पुं वार्त्ताकुः इति त्रि
कांडशेषः वार्त्तकपत्नी इति
भावप्रकाशः ॥
वार्त्तकीनं पुं वार्त्ताकुः इत्यम
रटीकायां भरतः ॥
वार्त्ताकी स्त्री बृहती इति भा
वप्रकाशः वार्त्ताकुः इत्यमरः
वार्त्ताकुः स्त्री स्वनामख्यात
फलवृक्षः वाङ्गण इति भाषा
तत्पर्यायः हिंगुली २ सिंही ३
भंटाकी ४ दुःप्रधर्षिणी ५ वा
र्त्ताकी ६ वार्त्ता ७ वार्त्तिंगणः ८
वार्त्ताकः ९ शाकविल्वः १० राजकु
ष्मांडः ११ इति जटाधरः वार्त्तिकः १२
वार्त्तिगमः १३ वृन्ताकः १४ वेगणः १५
अंगणः १६ इति शब्दरत्नावली
कंटवृन्ताकी १७ कंटालुः १८ कं
टपत्रिका १९ निद्रालुः २० मांस
फला २१ वृन्ताकी २२ महोटि
का २३ चित्रफला २४ कंटकि
नी २५ महती २६ कुटफला २७
मिश्रवर्णफला २८ नीलफला २९
रक्तफला ३० शाकश्रेष्ठा ३१ वृत्त
फला ३२ नृपप्रियफला ३३
अस्या गुणाः कटुत्वं रुच्यत्वं मधुर
त्वं पित्तनाशित्वं ।

बलपुष्टिकारित्वं दुर्जरत्वं गुरु
त्वं वातेषु निंदितत्वंच इति
राजनिर्घंटः अपिच अग्निप्रदा
मारुतनाशिनीच शुक्रप्रदाशो
णितवर्द्धिनीच हृल्लासकासारु
चिनाशिनीच वार्त्ताकुरेषा गुणा
स्समुक्तास्सा बाला कफवात
घ्नी पक्कास्सक्षारपित्तला सदाफ
ला त्रिदोषघ्नी रक्तपित्तप्रसाद
नी अंगारपक्का वार्त्ताकुः किंचि
पित्तकरीमता कफमेदोऽनि
लहरा सदालघुतरा परा इतिरा
जवल्लभः अन्यच्च वृंताकं स्वादु
तीक्ष्णोष्णं कटुपाकमपित्तलं ज्व
रवातबलासघ्नं दीपनं शुक्रलंल
घु तद्बालंकफपित्तघ्नं वृद्धंपित्त
करं गुरु वृंताकं पित्तलं किंचि
दंगारेपरिपाचितं कफमेदोऽनि
लामघ्नं मत्यंतं लघु दीपनं तदे
व हिगुरु स्निग्धं सतैलं लवणा
न्वितं अपरं श्वेतवृंताकं कुक्कु
टांडसमं भवेत् तदर्शःसुवि
शेषेणहितं हीनेच पूर्वतः इ
तिभावप्रकाशः ॥
वार्त्ताकुः पुं वार्त्ताकी इति त्रि
कांडशेषः ॥
वार्त्तायनः पुं प्रहेलकः तत्

पर्यायः हैरिकः २ गूढपुरुषः ३
प्रणिधिः ४ यथार्हवर्णः ५ अव
सर्पः ६ मंत्रविशत् ७ चरः ८ स्पशः
चारः ९ इतिहेमचंद्रः ॥
वार्त्तावहः पुं धान्यतंडुलादेर्वार्त्तां
वहतियः पसारी इति भाषा
तत्पर्यायः वैवधिकः २ इत्यमर
भरतौ ॥
वार्त्तिकः पुं प्रहेलिकः चरः ।
इति त्रिकांडशेषः वैश्यः ॥
वर्त्तिकपक्षी इति राजनिर्घंटः ॥
वार्त्ताकी इति शब्दरत्नावली ॥
वार्त्तिकं क्ली उक्तानुक्तदुरुक्तार्थ
व्यक्तीकारकग्रंथः यथा उक्तानु
क्तदुरुक्तार्थचिंताकारितु वार्त्तिकं
इतिहेमचंद्रः ॥
वार्त्तिका स्त्री पक्षिविशेषः बटेर
इति भाषा तत्पर्यायः विस्तलि
की २ इतिहारावली ॥
वार्त्रघ्नः पुं अर्जुनः इति त्रिकां
डशेषः जयंतः इंद्रसंबंधिनि
त्रि ॥
वार्दरं क्ली कृष्णलाबीजं दक्षि
णावर्त्तशंखः काकचिंचा तारती
इतिमेदिनी कृमिजं ॥ जलं
आम्रबीजं इति विश्वः ॥
वार्दलं क्ली दुर्दिनं इति मेदिनी

तन्मते पवर्गीयादिः ॥
वार्दलः पुं मेलानंदा सान्न
मस्याधारः इति मेदिनी ॥
वार्द्धकं क्ली वृद्धसंघातः वृद्धस्य
भावः वृद्धस्यकर्म इति मेदिनी
वार्द्धकं क्ली वृद्धावस्था तत्पर्या
यः वार्द्धकं २ वृद्धत्वं ३ स्थाविरं
इति जटाधरः ॥
वार्द्धिः पुं समुद्रः इति त्रिकां
डशेषः ॥
वार्द्धिभवं क्ली द्रोणीलवणं इति
राजनिर्घंटः
वार्द्धुषिः पुं वृद्ध्याजीवः इत्यमरः
वार्द्धुषिकः पुं वृद्धिजीवी लभ्य
भुक् व्याजखोर इति सूदखोर
इतिचभाषा तत्पर्यायः कुसीद
कः २ वृद्ध्याजीवः ३ वार्द्धुषिः
४ इत्यमरः तस्य लक्षणं य
था समर्घं धान्यमादाय महार्घं
यः प्रयच्छति सवै वार्द्धुषिकोना
महव्य कव्य वर्हिष्कृतः इतिस्मृ
तिः तस्य वृद्धिग्रहणनियमो य
थामनुः अशीतिभागं गृह्णी
यान्मासाद्वार्द्धुषिकः शतात् द्वि
कंशतं वा गृह्णीयात्सतां धर्म
मनुस्मरन् द्विकं शतंच गृह्णा
नोनभवत्यर्थकिल्बिषी शतका

अशीतिभागं विंशतिः पणाः ।
द्विकं पुराणद्वयं पर्वस्थितं निय
ममतिक्रम्य अनापदि स्वयमन्य
द्वारा वा सर्वलोभेन यो व्यवह
तितस्यैव प्रायश्चित्तं आपदितस्य
यं करणे नियमातिक्रमे च न
दोषः इतिप्रायश्चित्तविवेकः इत्या
ह्निकतत्वं ॥
वार्द्धुष्यं क्ली धान्यवर्द्धनं इति
त्रिकांडशेषः ॥
वार्द्धेयं क्ली द्रोणीलवणं इति
राजनिर्घंटः ॥
वार्द्ध्री स्त्री चर्मरज्जुः इत्य
मरटीकायां रायमुकुटः ॥
वार्ह्नीनसः पुं गेंडकः गेंडाइ
ति भाषा यथा वार्ह्नीनसस्त्वे
कचरो गणोत्साहश्च गेंडकः
इति त्रिकांडशेषः ॥
वार्ह्नीणसः पुं पशुविशेषः य
थाविस्तवं त्रिपिबंतीर्णं श्वेतवृ
द्धमजापतिं वार्ध्रीणसः प्रोच्य
ते ऽसौ हव्ये कव्ये च सत्कृतः
पक्षिविशेषः यथा । नील
ग्रीवो रक्तशीर्षः कृष्णपादःसि
तच्छदः वार्ध्रीणसः स्यात्पक्षी
शोभम विप्रो इतिप्रियः तेषा
वलिदान फलं यथा रोहि

तस्यव मत्स्यस्य मांसे वार्ध्री
णसस्य च तृप्तिमाप्नोति वर्षा।
णां शतानि शैणिमत्स्यैया म
हिषाणां च खड्गानां रुधिरैः शत
वार्षिकीं तृप्तिमाप्नोति परमां।
शार्दूल रुधिरे स्तथा इतिका
लिकापुराणे ८८ अध्यायः ॥
तन्मांसेन पितृ तृप्ति र्यथा वा
र्ध्रीणसामिषं लोहं कालशाकं
तथा मधु डुहित्रामिष मत्स्यञ्च य
द्दत्तं तत्कुलोद्भवैः अनंततां प्रय
च्छति तृप्तिं गौरीसुत स्तथा
पितॄणां नात्र संदेहो गयाश्राद्धं
च पुत्रक इति मार्कंडेयपुराणे
श्राद्धकल्पाध्यायः त्रिविधं त्रि
दिवस्थानां शेतं वृद्धमजापतिं
वार्ध्रीणसं तत्तं प्राडूर्यात्रिकाः श्रा
द्धकर्मणि वक्रपादो रक्तशिरा
रक्तचंचु विहंगमः कृष्णो वर्णेन
च तथा पत्नी वार्ध्रीणसो मतः
लोहं रक्तच्छागः रोहितं खंग।
मित्याड् स्थल्यं इहित लिताः
कपिलाया घृतं चैव रोहितमि
निचोच्चाते गौरीसुतः दशवर्षा
ख्यानः इति तट्टीका ॥
वार्भटः पुं कुंभीरः इति त्रि
कांडशेषः ॥

वार्मनं क्ली वर्मसमूहः इत्यमर
टीका सारसुंदरी ॥
वार्मिणं क्ली वर्मिसमूहः इत्य
मरटीकायां स्वामी ॥
वार्मुकं च पुं मेघः इति शब्दरत्ना
वली ॥
वार्युद्भवं क्ली पद्मं इति पत्ने
नयः नलेज त्रि ॥
वार्य्यं त्रि वारिसम्बंधि वारिश
ब्दात्स्य प्रत्ययेन निष्पन्नं ॥
वारणीयं त्रि वारणयोग्यं ।
वृञ्धातोः र्ण्यंतादनीयप्रत्ययेन
निष्पन्नं ॥
वाराशिः पुं समुद्रः । इति
पुराणं ॥
वार्वटः पुं वहित्रं। इति त्रिका
ण्डशेषः ॥
वार्वणा स्त्री नीलीमक्षिका इति
शब्दरत्नावली ॥
वार्षकं क्ली सप्तद्वीपात्मकपृथिवी
दशभागांतर्गतभागविशेषः यथा
दशधा विभजन्तेव मकरोत्पृथि
वीमिमां इक्ष्वाकु ज्येष्ठदायादो म
ध्यदेशमवाप्तवान् ॥
कोष्ठवे वार्षकं तेन संपाहृष्टिर्व
भूव ह इति वह्निपुराणे सागरो
पाख्यानाध्यायः ॥

वार्षभाणवी स्त्री वृषभानुकन्या
श्रीराधा यथा यथा परात्परः
कृष्ण स्तथेयं वार्षभाणवी इति
पाद्मोत्तरखंडे ९० अध्यायः ॥
वार्षिकं क्ली त्रायमाणा इतिमे
दिनी ॥
वार्षिकः त्रि वर्षभवः वात्सरि
कः इति मेदिनी वर्षाकालोद्भ
वश्च वार्षिकी स्त्री त्रायमाणा
इति राजनिर्घंटः वर्षकर्त्तव्यश्चादि
यथा शरत्काले महापूजा क्रिय
ते याच वार्षिकी तस्यां ममैत
न्माहात्म्यं पठितव्यं समाहि
तैः इति मार्कंडेयपुराणोयपुरा
णं वार्षिला स्त्री करका इति श
ब्दचंद्रिका ॥
वार्षुकः त्रि वर्षणशीलः वृष
धातोरुकञ् प्रत्ययेन निष्पन्नो वर्षु
कः ततः स्वार्थे ष्य प्रत्ययः ॥
वार्हतं क्ली वृहतीफलं इत्य
मरः ॥
वार्हद्रथः पुं जरासंधः इतिश
ब्दरत्नावली वृहद्रथराजसम्बंधि
नि त्रि वार्हद्रथिः पुं जरासंधः।
इति त्रिकांडशेषः ॥
वार्हस्पतं त्रि वृहस्पतिसम्बंधि।
वृहस्पतेरिदं इत्यर्थे ष्य प्रत्ययेन
निष्पन्नं ॥
वार्हस्पत्यः पुं नास्तिकः यथा
स्याद्वादवाद्यार्हतः स्याच्छून्यवादी
च सौगतः नैयायिक स्त्वक्षपादो
योगः सांख्यस्तु कापिलः वै
शेषिकः स्यादौलूक्यो वार्हस्पत्य
स्तु नास्तिकः चार्वाको लोकायति
कश्चैते षडपि तार्किकाः इति
हेमचंद्रः नीतिशास्त्रे क्ली इति
केचित् वृहस्पतिसम्बंधिनि त्रि ॥
वार्ह्यं क्ली वनं इति हेमचंद्रः
वृक्षसम्बंधिनि त्रि यथा वार्ह
वित्तप्रदं लिंगं स्फाटिकं सर्व
कामदं इति तिथ्यादितत्वं ॥
वार्ह्ली स्त्री स्त्रीविशेषः इति
महाभारतं ॥
वालकः पुं क्ली पारिहार्य्यः
अंगुरीयके त्रि इति मेदिनी ॥
अस्यार्थांतराणि पवर्गीय वाका
रादौ द्रष्टव्यानि ॥
वालवः पुं ववाद्येकादशकर
णांतर्गतद्वितीयकरणः तत्रजात
फलं कार्यस्य कर्त्ता स्वजनस्य
भक्तिसेना प्रणेता कुलशीलयु
क्तः उदारबुद्धि र्बलवान् मनुष्य
श्चेद्वालवाख्ये जननं हि यस्य इ
कोष्ठी प्रदीपः ॥

वाल्कं त्रि वल्कसंबंधिवस्त्रं क्षौ
मादि इत्यमरः ॥
वाल्कलं त्रि वल्कलनिर्मितं व
ल्कलस्येदं इत्यर्थेस प्रत्ययेननि
ष्पन्नंवाल्कली स्त्री मदिरा इतित्रि
कांडशेषः ॥
वाल्मिकिः पुं वाल्मीकमुनिः इ
तिद्विरूपकोषः ॥
वाल्मीकः पुं रामायणकर्त्ता
मुनिः तत्पर्यायः प्राचेतसः २वा
ल्मीकिः ३ कविज्येष्ठः ४ ऋशीव
शः ६ वल्मीकः ७ इतित्रिकांडशे
षः कविः ८ आद्यकविः ९ इ
तिजटाधरः ॥
वाल्मीकिः पुं भृगुवंशीयमुनि
विशेषः इति त्रिकांडशेषः ।
यथा रावणांतकरो राजा रघू
णांवंशवर्द्धनः वाल्मीकिर्यस्य
चरितं चक्रे भार्गवसत्तमः इति
मात्स्ये १२ अध्यायः ॥
वावदूकः त्रि अतिशयवचन
शीलः तत्पर्यायः वाचोयुक्तिप
टुः २ वाग्मी ३ वक्ता ४ इत्यमरः
वचक्नुः ५ सुवचाः ६ प्रवाकः ७
इतिजटाधरः ॥
वावयः पुं तुलसीविशेषः कृ
ष्णवाबुइ इति भाषा इतिशब्द।

चंद्रिका ॥
वावुटः पुं वहित्रं इति शब्द
रत्नावली ॥
वावृत य ङ ङ संभक्तौ वरणे
इति कविकल्पद्रुमः य ङ वावृ
त्यते उवावर्तिता वावृत्वा संभ
क्तिःसेवनं इतिदुर्गादासः ॥
वावृत्तः त्रि कृतवरणः इत्यमरः
ततो वावृत्यमाना सावित्रि भट्टिः
वाश ऋ ङ य शब्दे इति कवि
कल्पद्रुमः शब्द इह तिरश्चामेव
तिरश्चां वाशितं रुत मित्यम
रात् य ङ वाश्यते पक्षी ऋ अ
ववाशत् उद्वाश्यमानःपितरं स
राम मिति भट्टौ अनेकार्थत्वा
दाह्वानार्थः वासितंसुरभीकृते
स्यात्नमात्रे खगाराव वासितंव
स्त्रवेष्टिते इति विश्वप्रकाशदे
न्मातोयमपीति इति दुर्गादासः
वाशा स्त्री वासकः इति शब्द
रत्नावली ॥
वाशिः पुं अग्निः । इत्युणादि
कोषः ॥
वाशिका स्त्री वासकः इतिश
ब्दरत्नावली ॥
वाशितं क्ली पशुपक्ष्यादीनांश
ब्दः इत्यमरः ॥

वाशितः त्रि सुरभीकृतः । इत्य
मरटीकायां स्वामी ॥
वाशिता स्त्री स्त्रीमात्रं करिणी
इत्यमरः ॥
वाशिष्ठः त्रि वशिष्ठसम्बंधी वशि
ष्ठस्येदं इत्यर्थेस प्रत्ययेननिष्पन्नः
वाशिष्ठी स्त्री गोमतीनदी इति
हेमचंद्रः ॥
वाश्रा स्त्री रात्रिः इत्युणादि
कोषः ॥
वाश्रं क्ली मंदिरं चतुष्पथः इ
तिमेदिनी ॥
वाश्रः पुं दिवसः इति मेदिनी
वाष्पः पुं ऊष्मा लोहः । इति
मेदिनी अश्रु इत्यमरः ॥
वाष्पकः पुं मारिषः नटिवाष्पा
क इति भाषा यथा मारिषोवा
ष्पको मार्षः स्मृतो रक्तश्च सस्मृतः
मारिषो मधुरः शीतो विष्टंभीपि
त्तनुद्गुरुः वात श्लेष्मकरोरक्तपित्त
उद्दिषमाग्निजित् । रक्त
मार्षो गुरु नीति सक्षारो मधुरः
मरः श्लेष्मलः कटुकः पाकेस्व
ल्पदोष उदीरितः इति भाव
प्रकाशः ॥
वाष्पका स्त्री हिंगुपत्री इतिश
ब्द रत्नावली ॥

वाष्पिका स्त्री हिंगुपत्री तत्प
र्यायः कारवी २ पृथ्वी ३ क
वरी ४ पृथुः ५ इत्यमरः त
वपत्री ६ वाष्पीका ७ कर्वरी ८
इति तट्टीका ॥
वाष्पी स्त्री वाष्पिका इतिश
ब्दरत्नावली ॥
वाष्पीका स्त्री हिंगुपत्री इति
राजनिर्घंटः वाष्पनी इतिख्या
तस्य अस्यगुणाः कटुत्वं ती
क्ष्णत्वं उष्णत्वं कृमि श्लेष्मना
शित्वंच इति राजवल्लभः
वास तक उपसेवायां इति
कविकल्पद्रुमः उपसेवातगुणा
न्तराधानं अववासहस्तं चंदनः
इति दुर्गादासः ॥
वासः पुं गृहं इत्यमरः वस्त्रे
इति तट्टीका अवस्थाने इति
हेमचंद्रः वासकः इति शब्द
रत्नावली सुगंधिः इति वो
सपालर्यदर्शनात् स्थानविशे
षे वासस्य कर्त्तव्याकर्त्तव्यत्वंयथा
देवयात्रवाद वेदादे तातताना
पि कार्याणांत गतागतिं क्रो
धेचैवाभिवादे वा वेद चापि
वलावलं शिष्यस्याशिष्यहेत्
हिं नस्तत्य अन्नषता तस्मा

संकीर्णाह्वेतेषु वासो मम न रोच
तेषुं सो ये नाभिनंदंति हृत्तेना·
भिजनेन चैव तेषुच वसेत्वा
त्तः श्रेयार्थी पापबुद्धिषु ॥
येत्वेव मभिजानंति हृत्तेनापि
जनेनच तेषु साधुषु वस्तव्यं
सवासः श्रय उच्यते इतिमात्स्ये
२८ अध्यायः ॥ अपिच ।
धार्मिके राहृते ग्रामे नव्याधि
बहुले भृशं न शूद्रराज्येनिव
सेत्न पाषंडजनै र्वृते हिम
वद्विन्ध्ययो र्मध्यं पूर्वे पश्चिम
योः शुभं मुक्ता समुद्रयो र्देशं
नान्यत्रनिवसे द्विजः अर्द्धक्रोशा
न्नदीकूलं वर्जयित्वा द्विजोत्तमः
नान्यत्र निवसेत्पुण्ये नांत्यजग्रा
मसन्निधौ न संवसेच्च पतितैर्नच
डालै र्न पुक्कशैः न मूर्खैर्ना
वलिप्तैश्च नान्त्यै र्नान्त्यावसा
यिभिः इति कौर्मे उपरिभा
गे १५ अध्यायः ॥
वासः स्त्री वस्त्रं इत्यमरः प
त्रकं इति राजनिर्घंटः ॥
वासकः पुं वृत्तविशेषः वा
कस इति भाषा तत्पर्यायः वे
द्यमाता २ सिंही ३ वासिका ४ वृ
षः ५ अटरूषः ६ सिंहास्यः ७ वाजि

दंतकः ८ इत्यमरः वाशा ९ वा
शिका १० वृषाः ११ अटरुषः १२
वाशाकः १३ इति तट्टीका ॥
वासा १४ वासः १५ वाजी १६ वे
द्यसिंही १७ मातृसिंही १८ इति
शब्दरत्नावली वासका १९ ॥
सिंहपर्णी २० इतिजटाधरः ॥
सिंहिका २१ भिषङ्माता २२ वसा
दनी २३ सिंहमुखी २४ कंठीर २५
वीकर्णी २६ वाजिदंती २७ ना
सा २८ पंचमुखी २९ सिंहपत्री ३०
मृगेंद्राणी ३१ । अस्यगुणाः ति
क्तत्वं कटुत्वं । शीतत्वं ।
कास रक्तपित्त कामलाकफ वै
कल्य ज्वर श्वास क्षय नाशित्वंच
तस्यपुष्पगुणाः ॥ कटुपाकित्वं ति
क्तत्वं कास क्षयहरत्वंच इतिरा
जनिर्घंटः अपिच ।
वासको वासिको वासा भिषङ्
माताच सिंहिका सिंहास्यो वा·
जिदंतःस्यादाटरूषो ऽटरूषकः
आटरूषो नाम्रो सिंहपर्णश्चसस्मृ
तः वासको वासकृत्स्वर्यः कफ
पित्तास्र नाशनः तिक्तस्तुवरको
हृद्यो लघुः शीत स्तृड्विनाशकृत्
स कास ज्वर छर्दि मेहकुष्ठक्ष·
यापहः इति भावप्रकाशः ॥

4457

नानांगविशेषः । यथा ।
मनोहरो ऽथ कंदर्पश्चारु नंदन
एवच चत्वारो वासकाः प्रो
क्ताः शंकरेण स्वयं पुरा केच
च्चिन्मते नामान्यपि पृथक् वि
नोदो वरदश्चैव नंदः कुमुदएव
च चत्वारो वासकाः प्रोक्ता गीत
वाद्य विशारदैः इति संगीत·
दामोदरः ॥
वासकर्णी स्त्री यज्ञशाला इति
शब्दरत्नावली ॥
वासकसज्जा स्त्री स्वीयादिनायि
काभेदः तस्या लक्षणं यथा
अद्यमे प्रियवासर इत्यं निश्चित्य
यास्वरत सामग्री सज्जीकरोति सा
वासकसज्जा वासको वासरः ।
अस्या श्चेष्टा मनोरथ सखीपरि
हास दूतीप्रश्नसामग्रीविधानमार्ग
विलोकनादयः मुग्धा वासकस
ज्जा यथा हारं गुम्फति हारकांति
रुचिरं गृह्णाति कांचीलतां दीपं
स्नपति किंतु तत्र कुरुते स्नेहं
नदत्ते पुनः आलीनामिति वास
कस्वरजनी कामानुरूपाः क्रियाः
साविस्मेरमुखी नवोढ सुमुखी·
कुरात्स्यमहोत्सते मध्या वासक
सज्जा यथा शिल्पं दर्शयितुं क

रोति कुतुकात्कल्हार हारस्रजं
चित्र प्रेक्षणकैतवेन किमपिद्वा
रं समुद्वीक्षते गच्छत्यामभरणांतरं
सहचरी भूषाजिगीषा मिषा·
दित्थं पद्मदृशः प्रतीत्य चरितं
स्मेराननो ऽभूत्स्मरः प्रौढावास
कसज्जा यथा कृतं वपुषिभू
षणं चिकुरयोरणी भूषिता कृ
ताशयनसन्निधौ कनककुट्टिका सं
भृतिः अकारि हरिणी दृशाभ
वनमेत्य देहविधा स्फुरत्कनकके
तकी कुसुमकांतिभि र्दीदिनं म
नोरथश्च यथा आवेशा रंगयो
हृदये भूयो विरह पल्लवः अद्य
तेच स्मितस्फीतं तस्मादस्यो
बीक्षणं परकीया वासकसज्जा
यथा श्वश्रूं स्वापयितुं छले
नच तिरोधत्ते प्रदीपांकुरान् धत्ते
सोपकपोत पोत निनदैः सा
केतिकं चेष्टितं श्वासत्यार्श्चवि
वर्तितांग ललितं लोलत्कपो
लघुति क्वापि क्वापि करांबुजं
प्रियप्रिया तत्सांतिके न्यस्यति ॥
इति रसमंजरी ॥
वासका स्त्री वासकवृक्षः इति
जटाधरः ॥
वासगृह क्ली गर्भागारं इत्य

मरः द्वे गृहमध्यभागे शयन
गृहे च गृहांतर्गृहे इत्येके निर्वा
तगृहांतरके इवागारं गर्भागारं
। वासाय गृहं वासगृहं वा
वेश्मादि चात्र इति भरतः॥
वासतः पुं गर्दभः इतिशब्दर
त्नावली ॥
वासतेयी स्त्री रात्रिः इति त्रि
कांडशेषः ॥
वासनं क्ली धूपनं वारिधानी॥
वस्त्रं इति मेदिनी वासः इति
शब्दरत्नावली ज्ञानं इति धर
णिः निक्षेपाधारः यथा ।
याज्ञवल्क्यः ग्रामियिसीमोपनिक्षे
प जड़ बाल धनै विना तथा
पनिधि राजस्त्री श्रोत्रियाणां ध
नैरिह उपनिक्षेपस्तु वासनस्थं
मनाख्याय समुद्रं यद्विधीयते ।
इति नारदोक्तः वासनं निक्षे
पाधारभूतं सम्पुटादिकं समुद्रं
ग्रंथ्यादियुतं इति व्यवहारतत्वे
वसनसम्बन्धिनि त्रि ॥
वासना स्त्री प्रत्याशा ज्ञानं इ
ति मेदिनी स्मृति हेतुः तत्प
र्यायः संस्कारः २ भावना ३
इतिजटाधरः देहात्मबुद्धिजन्य
मिथ्या संस्कारः इति न्यायशा
स्त्र

दुर्गा यथा वसन्त्यद्दष्टा सर्वेषु भूते
ष्वंतर्हितायच. धातुर्वस निवा
सेति वासना तेन सा स्मृता ॥
इतिदेवीपुराणे ४५ अध्यायः॥
वासंतः पुं उष्ट्रः इति मेदिनी ॥
कोकिलः इति राजनिर्घंटः ॥
मलयवायुः मुद्गः इति त्रिकांड
शेषः कृष्णमुद्गः इति हेमचंद्रः
मदनवृक्षः इति शब्दमाला ॥
अवहिते त्रि इति मेदिनी ॥
वासंतकं त्रि वसंतसंबंधि । वस
न्तमपद मित्यर्थे काण्ठगत्येन निष्प
न्नं ॥
वासंतिकः त्रि विदूषकः यथा
वासंतिकः केलिकिलो वैहासि
को विदूषकः इति हेमचंद्रः॥
वासंती स्त्री माधवी यूथी इति
मेदिनी पाटला इति विश्वः॥
कामोत्सवः तत्पर्यायः चैत्रावली
२ मधूत्सवः ३ सुवसंतः ४
कामममहः ५ कर्दनी ६ इति त्रिकां
डशेषः गणिकारी पुष्पलताविशे
विशेषः तत्पर्यायः १ प्रहसंती
२ वसंतजा ३ माधवी ४ महाजातिः
५ प्रीतिमहा ६ मधुबहुला ७ वसंत
दूती ८ अस्या गुणाः शिशिरत्वं
हृद्यत्वं सुरभित्वं श्रमहारित्वं ।

धम्मिल्लामोदित्वं मंदमदोन्मादन
दायित्वंच इति राजनिर्घंटः नव
मल्लिका नेवारि इति हिन्दी भा
षा यथा नेपाली कथिता तद्गुणैः
सप्तला नवमालिका वासंती शी
तलालध्वी तिक्ता दोषत्रयापहजित्
इति भावप्रकाशः अथ वासंती दु
र्गापूजा प्रमाणं तत्र भविष्यपुरा
णं मीनराशिस्थिते सूर्ये शुक्लप
क्षेनराधिप सप्तमीं दशमीं यावत्
जयेदम्बिकां सदा भविष्योत्तरे ।
चैत्रे मासि सिते पक्षे सप्तम्यादि
दिनत्रये पूजयेद्विधिवद्दुर्गां दश
मांच विसर्जयेत् काल कौमुद्यां ।
जाबालिः चैत्रे मासि सिते पक्षे
सप्तम्यादि दिनत्रये पूजयेद्विधि
वद्देवीं लवंगकुसुमै स्तथा नाना
विधैश्च बलिभि र्मत्स्यामै र्दीपव
र्तिनैः विचित्राभरणैः पार्श्वे पट्टव
स्त्रादिभि स्तथा एवं यः कुरुते
पूजां वर्षे वर्षे विधानतः कुसि
तान्लभते कामान्पुत्र पौत्रादिकान्नृ
प इति अत्र भविष्यपुराणे
निरुपपद मासशब्द संकेतात्
भविष्यपुराण वचने मीनराशि
स्थित इति मीनस्य स्वारस्य चांद्र
मासीय तिथिपरं मौरस्वारस्य ।

त्वे कदाचित् सप्तम्यादितिथित्र
याला भावहर्षे तत्कृत्य लोपः
स्यात् नचेष्टापत्तिः भविष्यपुरा
णे सदापदोपादानजाबालिवच
ने वर्षे वर्षे इत्युपादानाच्च नि
त्यत्वं प्रतिपादितं कालविवेके
एवं जाबालिशेषवचन परार्द्धे.
पुत्रादिरूप फलश्रवणात्काम्य
च तत्तश्च काम्यतया पूजनेक्रि
ते प्रसंगान्नित्यसिद्धिः सिताष्ट
म्यातचैत्रस्य पुष्पे स्तत्कालसंभ
वैः अशोकै रपि यः कुर्यान्मंत्रे
णानेन पूजनं नतस्यजायते शो
को रोगो वाप्यथ दुर्गतिः इति
कालिकापुराण वचनात्केवला
ष्टमीकल्प उक्तः चैत्रमास मधिकृ
त्य नवम्यां पूजयेद्देवीं महिषासुर
मर्दिनीं कुंकुमागुरु कस्तूरीधू
पान्नध्वज तर्पणैः दमनै र्मरुव
कैश्च विजयाख्य पदं लभेत् इत्य
नेनकेवल नवमी कल्प उक्तः
अवश्यात्तशारदीय पूजाप्रकरणो
क्ता ग्राह्या विशेष स्तत्र बोधन
प्रक्रिया नास्ति बोधिताया बोधना
संभवात् इतिप्राकृतं होमादिकं
च पूर्ववज्ज्ञेय मिति दिक् इति दु
र्गोत्सवविवेकः अपिच श्री

नारायणउवाच पुरा स्वर्गतोगो
लोके कृष्णेन परमात्मना । सं
पूज्यमधुमासे च प्रीतेन रासमंड
ले मधुकैटभयो युद्धे द्वितीये
विष्णुना पुरा तत्रैव काले सा
दुर्गा ब्रह्मणा प्राणसंकटे इति
ब्रह्मवैवर्त्ते प्रकृतिखंडे ६३ अ
ध्यायः ॥
वासयोगः पुं चूर्णं इत्यमरः
हे आविर इति ख्याते परस्परा
होदे इत्यन्ये चूर्णंपते प्रेर्यन्ते
चूर्णानि चूर्णं प्रेरणे अल्ल् वा
सेस्वरभीकरणे मुज्यन्ते उपयु
ज्यंते इति वृत्ति वासयोगः इ
ति तट्टीकायां भरतः तत्पर्यायः
गंधचूर्णं २ पटवासं ३ चूर्णकं
४ इतिशब्दरत्नावली ॥
वासवः पुं क्ली दिवसः इत्यम
रः नागप्रभेदे पुं इति मेदिनी
वासवः पुं इंद्रः इत्यमरः ॥
वासवी स्त्री व्यासमाता यथा।
व्यासस्याम्बा सत्यवती वासवीग
न्धकालिका योजनगंधा दासे
यीशालंकायनजीवसूः इतिहेम
चंद्रः ॥
वाससज्जा स्त्री नायिकाभेदः ।
यथा खंडितोत्कंठितालब्धात

या प्रोषितभर्तृका । कलहांतरिता
वाससज्जा स्वाधीनभर्तृका ॥
अभिसारिकाष्टौ ता वंधकोपं
फुल्लासती इति जटाधरः ॥
अस्याः विवरणं वासकसज्जा शब्दे
द्रष्टव्यं ॥
वासा स्त्री वासकः इति शब्द
रत्नावली ॥
वासागारं क्ली वासगृहं तत्प
र्यायः भोगगृहं २ कल्पाटः ३
पल्याटः ४ निष्कुटः ५ इति त्रिकां
डशेषः ॥
वासिः पुं कुठारभेदः वाइस इति
भाषा इत्युणादिकोषः ॥
वासिका स्त्री वासकः इति शब्द
रत्नावली ॥
वासितं क्ली रुतं इति मेदिनी
ज्ञानमात्रं इति हेमचंद्रः ॥
खगरवः इति विश्वः ॥
वासितः त्रि सुरभीकृतः तत्पर्या
यः भावितः २ इत्यमरः ॥
हे सुगंधिपुष्पादिवासितद्रव्ये भा
व्यते प्राप्यते भावितं भुकङ्प्राप्तौ
कर्मणिक्तः । वासं सौरभं करो
ति इति ण्यंतात्कर्मणिक्ते वासिते
। इति तट्टीकायां भरतः ।
जलादेर्वासितः । इति

शब्दरत्नावली ख्यातः वस्त्र
वेष्टितः इति धरणिः ॥
वासिता स्त्री स्त्रीमात्रं करि
णी इत्यमरः ॥
वासिनी स्त्री श्वेतझिंटी इति
शब्दचंद्रिका ॥
वासिष्ठं क्ली रुधिरं इति हेम
चंद्रः ॥
वासिष्ठं त्रि वसिष्ठकृतयोगशा
स्त्रादि वसिष्ठेन कृत मित्यर्थे
ऽण्प्रत्ययेन निष्पन्नं वसिष्ठसंबं
धिचवासी स्त्री तक्षणी वाइस इ
तिख्यातास्त्रं इति त्रिकांडशेषः ।
वासुः पुं नारायणः इतित्रिकां
डशेषः श्रीनिवासोऽप्यजोवासुः
इति जटाधरश्च विश्वरूपः ॥
पुनर्वसुः इत्युणादिकोषः ॥
वासुकिः पुं अहिपतिः तत्प
र्यायः सर्पराजः २ इत्यमरः ॥
वासुकेयः ३ इति शब्दरत्नाव
ली तस्योत्पत्तिर्यथा सरसाज
त्रिरे सर्पास्तेषां राजा तु तक्ष
कः वासुकिश्चैव नागानां नाग
णाः क्रोधवशाधिकाः इति व
ह्निपुराणे काश्यपीय वंशः ॥
वासुकेयः पुं वासुकिः इति शब्द
रत्नावली ॥

वासुकेयस्वसा स्त्री मनसादेवी
इत्यमरः ॥
वासुदेवः पुं श्रीकृष्णः इत्यमरः
तत्पर्यायः वासुदेवभूः २ इति
हेमचंद्रः सखाः ३ सुभद्रः ४
वासुभद्रः ५ षड्गुणजित् ६ व
ड्डिंडः ७ पृश्निशृंगः पृश्नि
भद्रः ९ गदाग्रजः १० मार्जः ११
बभ्रुः १२ लोहिताक्षः १३ परमा
र्तवगकः १४ इतिशब्दमाला अ
स्य कृष्णशब्दे द्रष्टव्यं श्रीकृष्णश
रीरस्य नित्यत्वं यथा श्रीसनत्कु
मारउवाच भद्रंवो मुनयः शाश्व
तपसःफलमीप्सितं कृष्णस्यकुश
लप्रश्नेशिववीजस्य निष्फलं साम्प्रतं
कुशलंवस्त्वदर्शनं परमात्मनः भ
क्तानुरोधाद्देहस्य परस्य प्रकृतेर
पि निर्गुणस्य निरीहस्य सर्वदी
नमस्तेजसः भारावतारणायैवचा
विर्भूतस्य साम्प्रतं श्रीकृष्णउवाच
शरीरधारिणा त्वापि कुशलम
भीप्सितं तत्कथं कुशलं प्रश्न
मपि विघ्न विद्यते सनत्कुमा
रउवाच शरीरे प्राकृते नाथ स
न्तेच शुभाशुभे नित्यदेहे क्षेम
वीजेशिव प्रश्नमनर्थकं श्रीभग
वानुवाच यो यो विग्रहधारीच

स च प्राकृतिकः स्मृतः देहो न वि
द्यते विप्रतां नित्यां प्रकृतिं विना
सनत्कुमार उवाच एकाविंह
द्भवा देहा स्ते च प्राकृतिकाः स्मृ
ताः कथं प्रकृतिनाद्यस्य बीज
स प्राकृतं वपुः सर्वबीजस्य स
र्वादि रेकोऽस्य भगवान्स्वयं
सर्वेषा मवताराणां प्रधानं बी
जमव्ययं हरि त्वा वदति वे
दाश्च नित्यं नित्यं सनातनं ज्यो
तिःस्वरूपं परमं परमात्मानमीश्व
रं मायया सगुणं चैव मायेशं नि
र्गुणं परं प्रवदंति च वेदाग्र
स्तथा वेदविदः प्रभो श्रीकृष्ण उ
वाच साधितवासुदेवोहं भक्त
वीर्याश्रितं वपुः कथं न प्राकृतो
विप्र प्रिवप्रश्नमभीप्सितं सनत्कु
मार उवाच वासः सर्वनिवासश्च वि
श्वानि यस्य लोमसु तस्य देवः परं
ब्रह्म वासुदेव इतीरितः वासुदे
वेति तन्नाम वेदेषु च चतुर्ष्वपि पु
राणेष्वितिहासेषु यात्रादिषु च कृष्ण
दत्तवीर्याश्रितो देहः कृतो वेद
निरूपितः साक्षिणो मनयश्च
त्रयर्मः सर्वत्र पवहि साक्षिणा
ममवेदाश्च रवि चंद्रौ च सांप्रतं
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखं
डे

८१ अध्यायः तस्य नाम व्युत्पत्तिः
सर्वत्रासौ समस्तं च वसत्यत्रेति
वैयतः ततः स वासुदेवेति वि
द्वद्भिः परिपठ्यते ॥ इति
विष्णुपुराणे १ अंशे २ अध्यायः
अपि च सर्वाणि तत्र भूतानि वस
न्ति परमात्मनि भूतेषु अपि च स
र्वात्मा वासुदेवस्ततः स्मृतः खांडि
क्यजनकायाह पृष्टः केशिध्वजः पु
रा नामव्याख्या मनंतस्य वासुदे
वस्य तत्त्वतः भूतेषु वसते सोंऽतर्व
सत्यत्र चैतानि यत् धाता विधा
ता जगतो वासुदेवस्ततः प्रभुः
इति तत्रैव ६ अंशे ५ अध्यायः
अस्य अंग प्रत्यंग मंत्रा यथा वी
जेन वासुदेवस्य पूर्वेव प्रतिपादि
तं तदंग मंत्रं राजेंद्र द्वादशाक्षर
मुच्यते ॐ नमो भगवते वासुदेवाय
वे पदे अंगमंत्रं तथैव तस्य वासुदे
वस्य कीर्तितं अस्य प्रत्यंग रूपेण
द्विषिवासन सत्तकं तस्य मंत्रं नर
श्रेष्ठ शंभुना भाषितं शृणु ॥
ॐ नमो विष्णवे पूर्वं पदं तस्य
प्रकीर्तितं पदंत सुरपतये चतु
र्थ्यंतं महाबलं ॥ स्वाहांतं सद
यासक्तं प्रत्यंग वैस्नवं मतं ।
मंत्रद्वयस्य यो वेद बीजं प्रत्येग म

न्त्रकं स पृथा देवकामस्तत्र
सभूयोऽभिज्ञायते सर्वतत्त्वज्ञ
रतस्वाकांक्षमो ग्राह्याः प्रसन्नने
त्रिषु मंत्रेषु च तुष्टो विशेषं शृ
णु भूपते रूपन्तु बीजमंत्रस्य
प्रथमं शृणु भूपते पूर्णचंद्रोप
मः शुक्लः शिरोजोपरिस्थितः च
तुर्भुजः पीतवासा हि सिंहासनेवीतरे
ह्यस्य तु दक्षिणोर्द्ध गदा यत्ने तद
धो विकचाम्बुजं वामोर्द्ध चक्रम
स्य यत्नेऽधः शंखमेव च श्रीव
त्सवक्षाः सततं कौस्तुभं हृदि वा
तं यत्ने कते द्वयो वामे लक्ष्मी
र्वाणाश्रितं दक्षिणे कोषगं ख
ड्गं नंदकं सशरासनं शीर्षे किरी
टं सघोतं कर्णयोः कुंडलद्वयं श्री
जानुलम्बिनीं चित्रां स्वर्णमालां
गलस्थितां दधानं दक्षिणे देवी
श्रियं पार्श्वे तु बिभ्रतं सरस्वतीं
वामपार्श्वे चिंतयेद्वरदं हरिं ।
मंत्रस्य बीजरूपन्तु कथितं तवपा
र्थिव द्वादशाक्षरमंत्रस्य रूपम
न्यच्छृणुष्व मे नीलोत्पलदलश्यामं
तं पीतवस्त्रं चतुर्भुजं ॥ दक्षिणे
हेस्थितं पद्मं गदां चाथः प्रचोदये
त् वामेथ शंखं सतलं मूर्द्ध्नि शं
खं च बिभ्रतं चिंतयेद्वरदं देवं

सर्वं मन्त्रस्य पूर्ववत् अष्टादशा
क्षरस्यास्य प्रत्यंगस्य च विस्तरं शृ
णु राजन्नवहितो दारिद्र्य भयभंज
नं पूर्णां सदृशं कामं शुक्लवस्त्रं वि
चिंतयेत् करे विचिंतयेद्वामे पी
यूषापूरितं वरं दध्यन्नं खेटस्यु
क्त दक्षिणे स्वर्णभाजनं पद्मासन
गतं देवं चंद्रमंडलमध्यगं शुक्ल
वस्त्रधरं देवं प्रमाणाद्वामने स
दा ईषद्धाससमायुक्तं त्रिलोकेश
त्रिविक्रमं चिंतयेद्वरदं देवं स
र्वकामफलप्रदं इति कालिका
पुराणे ८२ अध्यायः तस्योत्
पत्तिः यथा ततस्तु दशमे मासि
विधौ ब्रह्मर्क्षे संगते अष्टम्याम
र्द्धरात्रे च तस्यां जातो जनार्दनः
इंदीवरदलश्यामः पद्मपत्रायते
क्षणः चतुर्भुजः सुंदरांगो दिव्या
भरणभूषितः श्रीवत्सकौस्तुभो
रस्को वनमाला विभूषितः वसु
देवस्य भार्यायां सो वासुदेवः सना
तनः इति पाद्मोत्तरखंडे ८० अ
ध्यायः तस्य चतुर्धा मूर्तिः यथा
एकांशेन जगत्कृत्स्नं व्याप्य ना
रायणः स्थितः चतुर्द्धावस्थितो
व्यापी सगुणो निर्गुणोऽपि वा एका
भगवतो मूर्तिः ज्ञानरूपा शिवाम

लावासुदेवाभिधाना गुणातीता·
सुनिष्कला द्वितीया कालसंज्ञा
न्या तामसी शेषसंज्ञिता निहं·
ति सकलांश्चान्ते वैष्णवी परमा
तनुः सत्त्वोद्रिक्ता तृतीयान्या·
प्रद्युम्नेति च संज्ञिता। जगत्
स्थापयते सर्वं सा विष्णुप्रकृति
र्ध्रुवा चतुर्थी वासुदेवस्य मूर्त्ति
र्ब्राह्मी सुसंज्ञिता राजसी चा
निरुद्धाख्या प्राद्युम्नी सृष्टिकारि·
का यः स्वपित्यखिलं हत्वा प्रद्युम्ने
न सह प्रभुः नारायणाख्यो ब्रह्मा
सौ प्रजासर्गकरो हि सः या
सा नारायणतनुः प्रद्युम्नाख्या
मुनीश्वराः तया संमोहयेद्विश्वं स
देवासुरमानुषं सैव सर्व
जगत्सूतिः प्रकृतिः परिकीर्त्ति
ता वासुदेवो ह्यनन्तात्मा केव
लो निर्गुणो हरिः प्रधानं पुरुषः
काल स्तत्त्वत्रयमनुत्तमं वा
सुदेवात्मकं नित्यमेतद्विज्ञा
य मुच्यते एकं चेदं चतुष्पाद
चतुर्द्धा पुनरच्युतः बिभेद वासु
देवोऽसौ प्रद्युम्नो हरि रव्ययः
इति कूर्मपुराणे ४८ अध्यायः
देवासुदेवप्रियंकरी स्त्री शताव
री इति राजनिर्घंटः श्रीकृष्णप्रि
य

कारिणीच॥
वासुपूज्यः पुं जिनविशेषः इ
ति हेमचंद्रः॥
वासुभद्रः पुं श्रीकृष्णः इति श
ब्दमाला॥
वासुरा स्त्री स्त्रीमात्रं कारिणी
रात्रिः भूमिः इति हेमचंद्रः
वासूः स्त्री नाट्योक्तौ बाला इ
त्यमरः॥
वासौकः सं क्ली वासगृहं यथा
गर्भागारेऽपवरको वासौकः
शयनास्पदः इति हेमचंद्रः॥
वास्तवं क्ली यथार्थभूतं यथा
धर्मः प्रोज्झितकैतवोऽत्र पर
मो निर्मत्सराणां सतां वेद्यं वास्त
वमत्र वस्तु शिवदं तापत्रयो
न्मूलनं इत्यादि श्रीभागवते प्र
थमस्कंधे १ अध्यायः वास्तवं
परमार्थभूतं वस्तु यद्वा वास्तव
शब्देन वस्तुनोऽंशो जीवः वस्तु
नः शक्ति मायाच वस्तुनः कार्यं ज
गच्च तत्सर्वं वस्त्वेव नततः पृथक्
इति तट्टीकायां श्रीधरस्वामी॥
वास्तविकं त्रि परमार्थभूतं वस्तु
वास्तवमेव इत्यर्थे वास्तव श
ब्दात् स्विक प्रत्ययेन निष्पन्नं॥
वास्तवीया स्त्री रात्रिः इति

त्रिकांडशेषः किंतु वास्तवा उ
षा इति नामद्वयमिति साधुपाठः
वास्तव्यः त्रि वासकर्त्ता यथा।
वसे स्तव्यत्कर्त्तरि णिच्च वसतीति
वास्तव्यः इति सिद्धांतकौमुदी॥
वासयोग्यश्च॥ वस्तो पुं॥
वास्तु क्ली वास्तुकशाकं इति रा
जनिर्घंटः॥
वास्तु पुं क्ली गृहकरणयोग्य
भूमिः तत्पर्यायः वेश्मभूः २ इस्म
मवः पोतः ३ वाटी ४ इति जटा
धरः वाटिका ५ गृहपोतकः ६
इति शब्दरत्नावली॥ वास्तु
करण प्रमाणादि यथा श्रीहरि
रुवाच वास्तु संक्षेपतो वक्ष्ये गृ
हादौ विघ्ननाशनं ईशान को
णादारभ्य ह्येकाशीतिपदे यजेत्
ईशाने च शिवः पादौ नैरृतेऽग्न्य
निले करौ आवासवास्तुवेश्मादौ
पुरे ग्रामे वणिक्पथे प्रासादा
राम दुर्गेषु देवालय मठेषुच द्वा
त्रिंशत्तु सुरान्बाह्ये तदंतश्च त्रयोद
श ईशश्चैवाथ पर्जन्यो जयंतः कु
लिशायुधः
सूर्यः सत्यो भृशश्चैव आकाशो
वायुरेवच पूषाच वितथश्चैव·
गृहक्षते यमावुभौ गंधर्वो भृंग·

राजश्च मृगः पितृगणा स्तथा दौ
वारिकोऽथ सुग्रीवः पुष्पदंतो ग
णाधिपः असुरः शेष पापाव
रोगोऽहि मुख्य एवच भल्लाटः
सोम सर्पोच अदितिश्च दिति
स्तथा बहि र्द्वात्रिंशदेते तु त
दंत श्रृणुः प्रणु ईशानादिच
तुष्कोण संस्थितान्पूजयेद्बुधः आ
पश्चैवाथ सावित्रो जयो रुद्रस्त
थैवच मध्ये नवपदो ब्रह्मा त
स्याष्टौ च समीपगान् देवानेको
नरानेतान् पूर्वादो नामतः शृणु
आर्यमा सविता चैव विवस्वान्वि
बुधाधिपः मित्रोथ राजयक्ष्मा च त
था पृथ्वीधरः क्रमात् अष्टम आप
वत्सश्च परितो ब्रह्मणः स्मृताः ई
शानकोणादारभ्य ऊर्द्ध्वगो वंश
उच्यते आग्नेयकोणादारभ्य वंशो
भवति दुर्द्धरः अदितिं हिमवंत
ञ्च जयंतञ्च इदं द्वयं नादिका
कारिका नाम शल्कान्यथ वर्गा पु
नः वास्तुदेवान्पूजयित्वा गृहप्रा
साद कुर्वीत स्त्रोतः पुरतः कार्यं
दिक्षणाग्न्यां महानसं नृप नि
र्गमणे येन पूर्वतः मंत्रमंडपं॥
गंधपुष्पगृहं कार्यं मैशान्यां प
पट्टसंयुतं भांडागारंच कौबेर्यां

गोष्ठागारंच वायवे उदगाश्र
यंच वारुणां वातायन समन्वि
तं समित्कुशेन्धनस्थान मायुधा
नांच नैर्ऋते अभ्यागतालयं र
म्यंशय्यासन सपादुकं तोयाग्नि
दीप मद्भृत्ये युक्तं दक्षिणतो भ
वेत् गृहान्तराणि सर्वाणि सजलैः
कदलीगृहैः पञ्चवर्णैश्च कुसुमै
कुसुमैः शोभितानि प्रकल्पयेत्
प्राकारंतद्बहि र्दद्यात्पंच हस्तप्र
माणतः एवंविधाश्रमंकुर्याद्वने
श्रोपवने पुते चतुःषष्ठिपदो वा
स्तुः प्रसादादौ सुपूजितः मध्ये चतु
ष्पदो ब्रह्मा द्विपदा स्तद्यमादयः
कोणे चैवाथ पत्साद्या स्तथा दे
वाः प्रकीर्तिता तेभ्योप्युभयतःसा
र्द्धा अन्येपि द्विपदाः सुराः ॥
चतुःषष्ठिपदे देवा इत्येवं परि
कीर्तिताः चरकीच विदारीचपू
तना पापराक्षसी ईशानाद्यास्त
था बाह्ये देवाद्या हेतुकादयः।
हेतुक स्त्रिपुरान्तश्च अग्नि वैताल
को यमः अग्नि जिह्वः कालक
स्तकराली ह्येकपादकः ईशान्या
भीमरूपस्तु पाताले प्रेतनायकः
आकाशे गन्धमाली स्यात्तत्रपा
लो स्तथा यजेत् विस्ताराभिहतं

दीर्घं राशिहारंतु कारयेत् वसुभि
र्भागमुद्धित्य शेषांकादाय नाद्
गोत्र पुन र्गुणित मष्टाभि र्हरेत
भागंत भाजयेत् यच्छेषं तद्भवे
द्दत्तं भागे हृत्य व्ययं भवेत् ॥
ऋक्षं चतुर्गुणं कृत्वा नवभिर्भाग
हारितं शेष संज्ञं विजानीयाद्देवत
स मतं यथा अष्टाभि र्गुणितंपि
ण्डं षष्टिभि र्भाग हारितं ॥ य
च्छेषंतु भवेज्जीवं मरणं भूत हा
रितं वास्तुकोष्ठे गृहं कुर्यात् न
पृष्ठे मानवः सदा वामपार्श्वेन स्व
पिति नात्र कार्या विचारणा सिंह
कन्या तुलायांच द्वारं कुर्य्याद्यान
रं पक्कंच वृश्चिकादौ स्मात्पूर्वद
क्षिणा पश्चिमं द्वारं दीर्घाद्वैविस्ता
रं द्वाराणिपृष्ठो स्सुतानिच । सु
तास्य प्रेष्यनीचत्वं स्थाने स्तुत भू
षणं पुत्रहीनेत रोद्रेण दीर्घेन्द्र द
क्षिणे तथा वह्नेऽवंपश्चात्र द्वेहि
पुत्रलाभ स्तत्सिद्धे धनं स्त्रपी
डाद मर्थञ्च रोगदं जले स्तपभी
ति र्ज्ञातापत्या अनपत्यंच वैरिदं मर्थ
दं वार्थदं वार्थहान्येव रोगदं पुत्र
स्तुदं द्वाराणुत्तर संज्ञानि पूर्वद्वा
राणि वच्म्यहं अग्निभीति र्वेडक
न्या धन सम्मान कोपदं राजग्र

कोपदं सर्वे कलतो द्वार मीरितं
ईशानादौ भवेत्सर्वे माग्नेयादौ
तुदाक्षिणे नैर्ऋत्यादौ पश्चिमे
स्माद्वायव्यादौ तु चोत्तरे ।
अष्टभागे कृते भागे द्वाराणांच
फलाफलं अश्वत्थ स्तत्रप्रयोयाः
पूर्वादौ स्याडुम्बरः स्ततस शोभ
नः प्रोक्तः ईशाने चैव शाल्मलिः
पूजितो विघ्नहारी स्यात्प्रासादस्सगृह
सच इत्यादि गारुडे वास्तुमाने
लक्षणं ४६ अध्यायः प्रासाद लक्ष
णाञ्च प्रासादशब्दे द्रष्टव्यं अपिच
अस्थय कृत्स्नः प्रासाद भवनादी
नां निवेशं विस्तरात्स्य कुर्यात्के
न विधानेन कश्च वास्तुकदाह्र
तः स्रुतउवाच भृगु रत्रिर्वशिष्ठ
श्च विश्वकर्मा यम स्तथा नारदो
नग्नजिच्चैव विशालाक्षः पुरंदरः ब्र
ह्मा कुमारो नंदीशः शौनकोग
र्ग एवच वासुदेवो ऽनिरुद्धश्च त
था शुक्र बृहस्पती ॥ अष्टाद
शैते विख्याता वास्तुशास्त्रोपदेश
काः संक्षेपेणोपदिष्टं यन्मन ।
वेमत्स्यरूपिणा तदिदानीं प्रव
क्ष्यामि वास्तुशास्त्र मनुत्तमं पु
रान्धकवधे घोरे घोररूपस्य शूलि
नः ललाटस्वेदसलिल मपतद्भुवि

भीषणं करालवदनं तस्मात्समुद्भू
तं समुद्धूतं सप्तद्वीपां ग्रसमानमि
वाकाशं सप्तद्वीपां वसुंधरां ततो
ऽन्धकानां रुधिर मपिवत्पतितं
क्षितौ तेन तत्समरेसर्वे पतितं
यन्महीतले तथापि तृप्तिमगम
त्तद्भूतं क्षुधया यदा ॥ तदा
त्रिविक्रम पुरत स्तप अक्रे सुदारु
णं क्षुधाविष्टंतु तद्भूत माहर्तुं ज
गतां त्रयं ततःकालेन संतुष्टोभै
रव स्तस्य चाददात् वरं दृणी
ष्व भद्रं ते यदभीष्टं भवानघ तमु
वाच ततो भूतं त्रैलोक्य ग्रसन
क्षमं भवामि देवदेवेश तथेत्यु
क्तंच शूलिना तत स्तत्त्रिदिवंसर्वं
भूमण्डल मशेषतः स्वदेहेनांतरीक्ष
च वन्धानं प्रापतद्भुवि भीतभी
तै स्ततो देवै र्ब्रह्मणा वाथशू
लिना दानवासुर वेदाभि रवष्ट
ब्धं समंततः येन यत्रैव चाक्रान्त
स तत्रैवाभवत्तनः । निवासात्स
र्वदेवानां वास्तु रित्यभिधीयते ॥
अवष्टब्धेन तेनापि विज्ञप्ताः सर्वे
देवताः प्रसीदध्वं सुराः सर्वेयु
ष्माभि र्निश्चलीकृतः स्थास्यामि
किं यदाहार मवष्टब्ध मधोमुखं
ततो ब्रह्मादिभिः प्रोक्तं वास्तु

मध्ये तयो वलिः आहारो वै
सुदेवांते नूनमस्मिन् भविष्यति
वास्तूपशमनो यत्र स्तवाहारो भ
विष्यति एव मुक्तस्ततो ह्यष्टः स
वास्तुरभवत्तदा वास्तु यत्नः स्म
तस्मात्ततः प्रभृति शांतये ॥
इति मात्स्ये वास्तुभूतोद्भवोनाम ।
२२९ अध्यायः सूत उवाच ॥
अथातः संप्रवक्ष्यामि गृहकाल
विनिर्णयं ॥ यथा कालं शुभं ज्ञात्वा
सदा भवनमारभेत् चैत्रे व्याधिम
वाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धन रत्नानि ज्येष्ठे मृत्युं त
थैव च आषाढे भृत्यरत्नानि पशु
वर्ज्जमवाप्नुयात् श्रावणे भृत्यला
भं च हानिं भाद्रपदे तथा पत्नी
नाशोऽश्वयुजे विन्द्यात्कार्तिके ध
न धान्यकं मार्गशीर्षे तथा
भक्तं पुष्ये तस्करतो भयं लाभं च
बहुशो विद्यादग्निं माघे विनिर्दि
शेत् फाल्गुने काञ्चनं पुत्रा निति
कालबलं स्मृतं अश्विनी रोहि
णी मूल मुत्तरात्रय मैन्द्रं स्वा
ती हस्तानुराधा च गृहारंभे प्रश
स्यते आदित्य भौम वर्ज्जन्तु सर्वेवा
राः शुभावहाः वज्र व्याघात शूले
षु व्यतीपातातिगंडयोः विष्कंभ

गंडपरिघ वर्ज्ज योगेषु कारयेत्
श्वेते मैत्रेय माहेन्द्रे गान्धर्वेऽभिजि
द्रोहिणे ॥ तथा वैराजसावि
त्रे मुहूर्ते गृहमारभेत् ॥
चंद्रादित्यबलं तथा लग्नं शुभ नि
रीक्षितं स्तंभोच्छ्रायादि कर्तव्य म
न्यत्र परिवर्ज्जयेत् प्रासादेष्वेवमेव
स्यात्कूप वापीषु चैव हि ॥
एवं भूमिं परीक्षेत पश्चाद्वास्तु
प्रकल्पयेत् श्वेता रक्ता तथा पीता
कृष्णा चैवानुपूर्वशः विप्रादेः प्रश
स्ता भूमिरतः कार्यः परीक्षणं ।
विप्राणां मधुरा स्वादा कषायात
त्रियस्य च कषाय कटुका तदुद्देशप
शूद्रेषु प्रशस्यते रत्निमात्रे तवे गर्त्ते
त्वनुलिप्ते तु सर्वतः घृत माम
शरावस्थं कृत्वा वर्त्तिचतुष्टयं ज्वल
येत् भूपरीक्षार्थं पूर्वं तत्सर्वदि
क्षु वै दीप्तं पूर्वादि गृह्णीयाद्व
र्णानां मनुपूर्वशः वास्तुः सामूहि
को नाम दीप्यते सर्वतस्तु यः
शुभदः सर्ववर्णानां प्रासादेषु गृहेषु
च रत्निमात्रं मथो गर्त्ते परीक्षणा
त्खनेत् अधिके श्रेय माप्नोति
न्यूने हानिः समे समं हलकृष्टे
ऽथवा देशे सर्ववीजानि वापयेत्
त्रि पंच सप्तरात्रेण यत्र रोहंति ।

तास्वपि ज्येष्ठोत्तमा कनिष्ठा भूर्व
र्जनीयतरा मता पंचगव्यौषधिज
लैः परीतिं ताश्च सेचयेत् ए
काशीतिपदं कृत्वा रेखाभिः कन
केन तु पश्चात्पिष्टेनचालिप्य
सूत्रेणालोड्य सर्वतः दशपूर्वा
यता रेखा दशाचैवोत्तरायताः
सर्वा वास्तुविभागेषु विज्ञेया
नवका नव एकाशीतिपदे कृ
त्वा वास्तुवित्सर्ववास्तुषु पदस्था
न्पूजयेद्देवा न्त्रिंशत्पञ्चदशैव तु ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्या ।
अंतस्त्रयोदश नामतस्तान्प्रव
क्ष्यामि स्थानानि च निबोधत ।
ईशानकोणादिषु तान् पूजयेद्ध
विषा नरः शिखी चैवाथ पर्ज
न्योज्जयंतः कुलिशायुधः सूर्यसत्यो
भृशश्चैव आकाशो वायुरेव च
पूषा च वितथश्चैव गृहक्षत य
माबुभौ गंधर्वो भृंगराजश्च मृगः
पितृगणा स्तथा दौवारिकोऽथ
सुग्रीवः पुष्पदंतो जलाधिपः अ
सुरः शोष पापौ च रोगोऽहि र्मुख्यए
व च भल्लाटः सोम सर्पौ च अदि
तिश्च दितिस्तथा वहिर्द्वात्रिंश
देते तु तदंतश्चतुरः शृणु ईशा
नादि चतुष्कोणे संस्थितान्पूजये

यथा आप श्चैवाथ सावित्रो ज
यो भद्र स्तथैव च मध्ये नवपदो
ब्रह्मा तस्याष्टौ च समीपगान् सा
ध्याने कांतरान्विद्यात्पूर्वाद्यान्नाम
तः शृणु अर्यमा सविता चैव
विवस्वान्विबुधाधिपः मित्रोऽथ
राजयक्ष्मा च तथा पृथ्वीधरः
स्मृतः अष्टम स्त्वापवत्सस्तु
परितो ब्रह्मणः स्मृताः आपश्चै
वापवत्सश्च पर्जन्योऽग्नि र्दितिः
स्तथा पदिकानां च वर्गोय मेवं
कोनेष्वशेषतः तन्मध्ये तु वहिर्विंश
द्विपदा स्ते तु सर्वतः अर्यमा च
विवस्वांश्च मित्रः पृथ्वीधर स्तथा
ब्रह्मणः परितो दिक्षु त्रिपदा
स्ते तु सर्वतः वंशानिदानीं वक्ष्या
मि ऋजूनपि पृथक्पृथक् वायु
यावत्तथा रोगात्पितृभ्यः शिखि
नं पुनः मुख्याद्भृश मथो शोषा
द्वितथं यावदेवतु सुग्रीवाददितिं
यावत्स्मृतः पर्जन्यमितश्च एते वंशाः
समाख्याताः क्वचिज्जेय एव च ए
तेषां यस्तु सम्पातः पदं मध्यं स
मंततः मर्म चैतत्समाख्यातं त्रिशू
लं कोणगं च यत् स्तंभन्यासेषु
वर्ज्यानि तुलाविधिषु सर्वदा की
लोच्छिष्टोपघातानि वर्जयेद्यत्

तो नरः सर्वत्रवास्तु निर्दिष्टैःपि
त्र वैश्वानरायतःमूर्द्धन्यग्निःसमा
विष्टो मुखे चापः समाश्रितःश्चष्टी
धरोऽर्यमा चैवतयो स्तावद्रपि
श्रितो वत्सःस्यालेचापवत्सः स्तन
नीयःसदाबुधैः नेत्रयो र्दितिपर्ज
न्यो श्रोत्रेऽदिति जयंतकौ सर्पेन्द्रा
वंशसंस्थौच रमनीयौ प्रयत्नतः
सत्य रोगादय स्तद्वद्वाह्वोः पंच
च पंच च रुद्रश्च राजयक्ष्माचवा
महस्ते समाश्रितो सावित्रःसवि
ता तद्वद्धस्तंदक्षिणमाश्रितो वि
वस्वानथ मित्रश्च जठरे संव्यवस्थि
तो पूषाच पाप यक्ष्माच हस्तयो
र्मणिबंधने तथैवासुर शोषोचवा
मपार्श्वसमाश्रितो पार्श्वेव दक्षि
णेतद्वद्वितथःसाद्वृहत्क्षतः ऊर्वो
र्यमाम्बुपो ज्ञेयो जान्वो गंधर्व
पुष्पकौ जंघया भृङ्ग सुग्रीवौ
स्फिक्स्थौदौवारिकौ मृगः जय
शक्रौ तथामेढ्रे पादयोःपितर
स्तथा मध्येनवपदो ब्रह्मा हृद
येस्तत्र पूजने चतःषष्टिपदोवा
स्तुःप्रासादे बृहद्गणस्मृतः ब्रह्मा
चतुष्पद स्तत्र कोणस्थईपदास्त
तः बहिःकोणेत्वष्टौ तथाष्टा
श्रोभय संस्थिताः विंशति द्विप
दा श्चैषां चतः षष्टिपद

स्मृताः गर्भद्वारसमे तर्कभूमिः स्नाय
गे यत्र जायते शाल्यंतपनयेत्तत्र
प्रासादे भवनेऽपिवा सशाल्यं भय
दं तस्मादशाल्यं शुभदायकं ।
हीनाधिकांगभावां स्तु सर्वथातु
विवर्जयेत् नगर ग्राम देशेषु स
र्वे मेवं प्रकल्पयेत् चतःशालंत्रि
शालंतु द्विशालं चैकशालकं
नामत स्तानि वक्ष्यामि स्वरूपाद्दि
क्तोत्तमाः इतिमात्स्ये पंचाशीति
पदवास्तु निर्णयोनाम १२७ अध्या
यः सूतउवाच चतःशालंप्रवक्ष्या
मि स्वरूपान्नामत स्तथा चतःशा
लं हय द्वारे रलिन्दैः सर्वतोमुखं
नाम्ना तत्सर्वतोभद्रं शुभदेव नृपा
लये पश्चिमद्वारहीनंतन्नंद्यावर्तं
प्रचक्षते ॥ दक्षिणद्वारहीनं
वर्द्धमान मुदाहृतं पूर्वद्वारवि
हीनन्तत्स्वस्तिकं नामविश्रुतं ॥
रुचकं चोत्तरद्वारविहीनं तत्प्रच
क्षते सौम्यशाला विहीनत्तु त्रिशालं
धन्यकंच तत् क्षेमवृद्धिकरं नृणां
बहुपुत्र फलप्रदं शालया पूर्व
या हीनं सुक्षेत्र मिति विश्रुतं
॥ धन्यं यशस्य मायुष्यं शो
क मोह विनाशनं चुल्लीतथा
म्यया हीनं विशालं शालयात

यत् कुलक्षयकरं नृणांसर्वव्याधि
भयावहं हीनं पश्चिमया यत्तु
पक्षघ्नंनाम तत्पुनः मित्र बंधु
सुतान् हन्ति तथा सर्व भयावहं।
याम्या पराभ्यां शालाभ्यां धन
धान्य फलप्रदं क्षेम वृद्धिकरंनृ
णां तथा पुत्रफलप्रदं । यमं
सूर्यंच विज्ञेयं पश्चिमोत्तर शाल
कं राजाग्निभयदं नृणां कुलक्षय
करंचतत् उदकपूर्वेतु शालेद्वे
दंडाख्ये यत्र तद्भवेत् ॥ अका
लमृत्युभयदं परचक्रभयावहं प
माख्ये याम्य पूर्वाभ्यां शालाभ्यां
यद्विशालकं तन्मृत्युभयदं नृणां
पराभव भयावहं चुल्ली पूर्वा प
राभ्यांतु सा भवेत् मृत्युसूचनी॥
वध बंधाय शास्त्राणा मनेकधं
प्रकारकं काच कुलं याम्याभ्यांशा
लाभ्यां भयदं नृणां सिद्धार्थ व
र्जेवर्ज्यानि द्विशालानिसदा बुधैः
अथातः संप्रवक्ष्यामि भवनं पृथि
वीपतेः पंचप्रकारं तत्प्रोक्तमुत्त
मादि विभेदतः । अष्टोत्तरंहस्त
शतं विस्तारेश्चोत्तमो मतः ।
चतुर्ष्वन्येषु विस्तारो हीयतेचाष्ट
भिः करैः चतुर्थांशाधिकं दैर्घ्यं
पंचस्वपि निगद्यते युवराजस्य

वक्ष्यामि तथा भवन पंचकं षड्भिः
षड्भिःस्तथाशीति हीयते तत्रविस्त
रात् अंशेन चाधिकं दैर्घ्यं पंच
स्वपि निगद्यते ॥ सेनापतेः प्र
वक्ष्यामि सदा भवनपंचकं चतुः
षष्टिस्तु विस्तारात्षड्भिःषड्भिस्तु ही
यते पंचस्वेतेषु दैर्घ्यंच षड्भागेना
धिकं भवेत् मंत्रिणा मथवक्ष्या
मि तथा भवन पंचकं चतु
श्चतुर्भिं हीनास्यात्करषष्टिःप्रवि
स्तरे अष्टांशेनाधिकं दैर्घ्यं पंचस्व
पि निगद्यते सामंतामात्य लो
कानां वक्ष्ये भवन पंचकं ।
चत्वारिंशत्तथाष्टौच चतुर्भिर्हीयते
क्रमात् चतुर्थांशाधिकं दैर्घ्यं पं
चस्वेतेषु शस्यते । शिल्पिनां
कंचुकीनांच वेश्यानांमथ पंचकं
अष्टाविंशत्कराणांतु द्विहीनां वि
स्तरेण तत् द्विगुणं दैर्घ्य मेवोक्तं
मध्यमेष्वेव मेवतु दूतकर्मान्तिका
दीनां वक्ष्ये भवन पंचकं चतु
र्थांशाधिकं दैर्घ्यं विस्तारो द्वाद
शैव तु अर्द्धार्द्ध करहानिःस्यात्
विस्तारात्पंचसु क्रमात् देवज्ञ
गुरुवैद्यानां सभास्तार पुरोधसां ॥
तेषा मपि प्रवक्ष्यामि सदा भवन
पंचकं चत्वारिंशाद्व विस्ताराचतु

भिर्हीयते क्रमात् पंचस्वेतेषु है
र्ध्यंच षड्भागेनाधिकं भवेत् ॥
चतुर्वर्णस्य वक्ष्यामि सामान्येन गृ
हपंचकं द्वात्रिंशकं कराणांतच
त भिर्हीयते क्रमात् षाषोडशा
दिति परं नृन संत्यावसायिनां
दशांशेनाष्टभागेन त्रिभागेनाथ
पादिकं अधिकं दैर्घ्य मित्याहु
र्ब्राह्मणादेः प्रशस्यते सेनापतेर्न्
पस्यापि गृहस्येवोत्तरेण तु ।
नृपवासगृहं कार्यं भाण्डागारं
तथैवच सेनापते र्गृहस्यापिचा
तुर्वर्णस्य चांतरं वासकोष गृहं
कार्यं राजपुत्रेषु सर्वदा अंतरप्र
भवाणांच स्वपितं दूर मिष्यते ।
तथ हस्त शाला दर्वाकरादिते व
नवासिनां सेनापते र्नृपस्याधिसम
न्या सहितेन्विते चतुर्दश हस्ते
व्यासे शाला न्यासः प्रकीर्तितः
पंचत्रिंशाहुते तस्मिन् आनिन्दःस
मुदाहृतः तथाषट्त्रिंशहस्तात्त
सभागुल समन्वितः विपस्यागृह
तीषपत्ता न दैर्घ्यं परतो भवेत् ।
दशांगुलाधिका तहन्त्यमियसवि
धीयते पंचत्रिंशत्करा वैश्यपेऽगुला
नि त्रयोदश । तावतकरे
स्तु शूद्रस्य युता पंचदशांगुलैः

शालायास्तु त्रिभागेण यस्याग्रे
वीथिका भवेत् सोस्मीशं नाम
तद्वास्तु पश्चाद्धायोछ्रय भवेत्
पार्श्वयो वीथिका यत्र सावष्टम्भ
न्तडच्यते समंताद्वीथिका यत्र स
स्थितंतदिहाच्यते शुभदंसर्वमेतत्सा
ह्रातुर्वर्णपिचतुर्विधं । विस्तरा
त्षोडशो भागः स्तथा हस्त च
तुष्टयं प्रथमो भूमिकोछ्राय उप
रिष्टात्प्रहीयते द्वादशांशेनसर्वास
भूमिकास्तु तथोछ्रयः ॥ प
क्वेष्टके भवेद्भित्तिः षोडशांशेना
विस्ताराणात् दानेवन विकल्पःस्यात्
तथा मृन्मय भित्तिके गर्भमानेन
मानेन सर्वं वास्तुषु शस्यते गृह
वासस्य पंचाशदष्टादशाभि रङ्गुलैः
संयुतो द्वार निष्कंभो द्विगुणोश्रा
छ्रयो भवेत् द्वारशाखास्तु वाहुल्य
मुछ्रायं करसम्मितैः अंगुलैः सर्व
वास्तूनां पृथुत्वं शस्यते बुधैः ॥
उदुम्बरोत्तरांगेव तदर्द्धं प्रवि
स्तरैः इतिमात्स्यवास्तुविद्यासागर
ह मान निर्णय नाम २२८ अध्यायः
सूतउवाच अथातः संप्रवक्ष्यामि
स्तम्भमान विनिर्णयं कृत्वा स्व
भवनोछ्रायं सदा सप्तगुणं बुधः
अशीत्यंशं पृथुत्वं स्यादग्रे नव

गुणोः सह रुचक श्चतुरस्रः स्याद
ष्टांशो वज्र उच्यते । द्विवज्रः षो
डशास्त्रस्तु द्वादशास्त्रः प्रलीनकः म
ध्यप्रदेशे यःस्तंभो वृत्तो वृत्त इति
स्मृतः एते पंच महास्तंभाः प्रश
स्ताः सर्ववास्तुषु पद्मवल्ली लताका
र्या पत्रदर्शन रूपिता स्तम्भसनव
मांशेन पद्मकुंभोतराणिच ।
स्तम्भतुल्या तुला प्रोक्ता हीना स्या
पतुला ततः त्रिभागेणाह सर्वत्रैव
त्वर्भागेण वा पुनः हीनं हीनंचत
र्थांशानथा सर्वास्वभूमिषु ॥ वास
गेहानि सर्वेषां प्रवेशे दक्षिणेन
तु द्वाराणि च प्रवक्ष्यामि प्रशस्ता
नीह तानि तु पूर्वेणेन्द्रं जयंतंचद्वा
रं सर्वत्र शस्यते याम्यंच वितथंचै
व दक्षिणेन विदु र्बुधाः ॥ प
श्चिमे पुष्पदंतंच वारुणंच प्रशस्य
ते उत्तरेण तु भल्लाटं सौम्यंचशुभ
दं भवेत् तथा वास्तुषु सर्वत्रैवं
द्वारस्य वर्जये द्वारेतरत्यया विद्धे
भवेत्सर्वकुलक्षयः ॥
तरुणा दोष वाहुल्यं शोकः पंके
न जायते अपस्मारो भवेन्नूनंकूपवे
धेन सर्वदा व्यथा प्रस्रवणेनस्या
त्कीलेनाग्नि भय भवेत् ॥
विनाशो देवताविद्धे स्तम्भेन स्त्री

कृतो भवेत् गृहभर्त्तु विनाशः
स्यात्तरदेण च गृहे कृते अमे
ध्या वस्करे विद्धे गृहिणी बंध
नस्तवेत् तथा शास्त्रभयं विद्यात्
मजस्यगृहेण तु उछ्राय द्विगुणा
भूमिस्तस्का वेधो न विद्यते स्वयमु
द्धाटिते द्वारे उन्मादो गृहमेधिनां
स्वयंच पिहिते विद्यात्कुलनाशं
विचक्षणः मानाधिके राजभयं नी
चे तस्करतो भयं द्वारोपरि चय
द्वारं तदंतक मुखं स्मृतं आध्वा
नेमध्यदेशे तु अधिको यस्य विस्त
रः वज्रं तु शकटं मध्ये सद्योभ
र्तृविनाशनं तथान्यपीडितं द्वारं ब
हुदोषकरं स्तंभवेत् मूलद्वारं तथा
न्यन्नाधिकं शोभनं भवेत् कुंभ
श्रीपर्णी वल्लीभि र्मूलद्वारं तु शो
भयेत् पूजयेद्वापि तन्नित्यं बलि
नाचाक्षतोदकैः ॥ भवनस्य वटः
पूर्वे स्त्रिभागे सार्वकालिकः उदुम्ब
रस्तथा याम्ये वारुणे पिप्पलःशु
भः लक्ष श्चोत्तरतो धन्यो विपरी
तस्त्वसिद्धये कंटकीक्षीरवृक्षश्च
आसन्नः सफलो द्रुमः भयेहा
निप्रजाहानिं कुर्वन्ति क्रमशःस
दा नच्छिन्द्याद्यदि तानन्यानन्तरे
स्थापयेत् शुभान् पुन्नागाशोक

बकुलश्शमी तिलक चंपकान्
दाडिमीपिप्पली द्राक्षा तथाकुसु
ममंडपं जम्बीर पूगपनस द्रुमकेत
कीभिर्जाती सरोज शतपत्रिकम-
ल्लिकाभिः यन्नारिकेल कदलीद
ले पाटलाभिर्युक्तं तदत्र भवनं श्रि
य मातनोति इति मात्स्ये वास्तुवि
द्यायां वेधपरिवर्जनो नाम २५४ अ
ध्यायः सूत उवाच उदगादिप्लवं
वास्तु समानशिरसं तथा परी
क्ष्य परीक्ष्य एवं वक्तुर्यास्तंभोच्छ्र
यं विचक्षणाः नदेवधूर्त सचिव च
त्वराणांसमीपतः कारयेद्भवनं प्रा
ज्ञो दुःख शोकभयं यतः तस्य
वेशो प्रवातस्तस्मात्स्नान्नगोऽयतः शुभः
पृष्ठतः पृष्ठ मंगल्यं सव्यावर्त्तः प्र
शस्यते अप्रसव्यो विनाशाय दक्षि-
णे शीर्षकस्तथा सर्वकामफला
न्नृणां संपूर्णो नाम वामतः पदंप्र
वेशो मालोक्य यत्नेन गृह मारभे
त् अथ सम्वत्सरे पूर्णे मुहूर्त्ते शुभ
लक्षणे रत्नोपरि शिलां कृत्वा स
र्वबीजसमन्विताः चतुर्भिर्ब्राह्म
णैस्तंभं कृत्वालंकारसंस्थितं शु
क्लाम्बरधरः शिल्पी सहितो वेद
पारगैः स्थापितं विन्यसेत्तत्हस्त
दैर्घ्यपिसमन्वितः नानाक्षतफला
पेतं

वस्त्रतांबुल संयुतं ब्रह्म घोषेण वा
द्येन गीत मंगल निःस्वनैः ॥ पा
यसं भोजयेद्विप्रान्होमन्त्र मधुसर्पि
षा वास्तोस्पते प्रतिजानीहि मंत्रेण
नेन सर्वदा सूत्रपाते तथाकार्य्य मे
वं स्तम्भोदये पुनः । द्वारवंशोच्छ्र
ये तद्वत्प्रवेश समये तथा ॥
वास्तु प्रशमने तद्वत् वास्तु यज्ञस्तु
पंचधा ईशाने सूत्रपातः स्यादाग्नेये
स्तंभरोपणं प्रदक्षिणांच कुर्वीत
वास्तोः पदविलेखनं ।
तर्जनी मध्यमा चैव तथांगुष्ठस्तु द
क्षिणे प्रवाल रत्न कनकं फल पि
ष्टकतोदकं सर्ववास्तु विभागेषु श
स्तस्य दविलेखने न भस्माङ्गारकाष्ठे
न न शस्त्र नखचर्मभिः नव सा
स्त्रिकपालेन कृविद्धास्तु प्रलेखये
त् पति विलेखितं कुर्याद्दुःखशोका
भयादिकं यदा गृह प्रवेशः स्याच्छिल्पी
तत्रोपलेखयेत् ॥ स्तंभ
सूत्रादिके तद्वच्छुभाच्छुभ फलोद
यं आदित्याभिमुखं रौति शकुनः
परुषं यदि तत्कालं स्पर्शेद्गात्र
हृस्तः समात्मनः । वास्त्वंगे
तद्विजानीयान्नरस्यान्तं भयप्रदं शकु
नानंतरं यत्र हस्तस्य स्थापदं भवेत् त
दंग संभवं विद्यात्तत्र ॥

शल्यं विचक्षणाः प्रसार्यमाणे सूत्रे
तु श्वगोमायुः विलंघिते । तच्छल्यं
विजानीयात्खरशब्दे च भैरवे ॥
यदीशांतेऽथ दिग्भागे मधुरं रौति
वायसः धनं तत्र विजानीयाद्दंगे
वास्वाम्यपिष्ठिते सूत्रच्छेदे भवेन्मृ
त्युर्व्याधिः कीले तथा शुभे अंगारे
षु तथोन्मादं कपालेषु च संभ्रमं ।
कम्बुशल्ये च जानीयाच्छिल्पस्त्रीषु
वास्तुवित् गृहभर्त्तुर्गृहस्यापि वि
नाशः शिल्पि संभ्रमे ॥ स्तंभ
स्थाने च्युते कुंभे शिरोरोगं वि
निर्दिशेत् कुम्भापहारे सर्वस्य कु
लस्यापि क्षयो भवेत् ॥ मृतं
स्थानच्युते कुंभे भग्ने वधं विदु
र्बुधाः करसंख्या विनाशे तु
नाशं गृहपते र्विदुः बीजौषधि-
हीने तु भूतेभ्यो भय मादिशेत्
प्राग्दक्षिणेन क्षिमस्य स्तंभे छिद्रे
विवेशयेत् ततः प्रदक्षिणेनास्य
न्यसेत्स्तंभं विचक्षणाः । यस्मात्
यकुवे नृणां यानि तान्यप्रदक्षिणा
स्ता कुर्वीत यत्नेन स्तंभोपद्रव-
नाशिनी तथा फलवती शाखा
इत्यमरः ॥
विकर्मकृत् त्रि निषिद्धकर्म
कारी यथा नस्तासी त्पतिःको
यो नकार्कक कुशीलवो न श्री
ज्ञियोन लिंगस्थो नसंगेभ्यो वि
निर्गतः नाभ्यर्थीनो न वक्तव्योन
द्रष्टर्न विकर्मकृत् नेहस्तो न शिष्यु
नैकोनांस्तो न विकलेंद्रियः इति
मानवे ८ अध्याये ६६ श्लोकः
विकर्मकृत् निषिद्धकर्मकारी इति
कुल्लूकभट्टः ॥
विकर्मस्थः त्रि निषिद्धकृत् यथा
पाषंडिनो विकर्मस्थान् वैडाल
व्रतिकान् शठान् हैतुकान् व
कवृत्तींश्च वाङ्मात्रेणापि नार्च
ये इति विष्णुपुराणे ३ अंशे
अध्यायः ॥ १८
विकर्षः पुं बाणः इति त्रिकां
डशेषः ॥
विकर्षणं क्ली आकर्षणं वि
पूर्वकृषधातो र्ल्युट् प्रत्ययेन निष्प
न्नं विकलः त्रि विकलः इतिज
टाधरः स्वभावहीनः इतिभरतः
विकलपाणिकः पुं स्वभावहीन
पाणियुक्तः यथा कुणि विकल
पाणिकः इति हलायुधः
विकला स्त्री रजोहीना इतिश
ब्दरत्नावली ॥
विकलांगः त्रि स्वभावतोमूनां
गः तत्पर्यायः अपोगंडः २
इत्यमरः पोगंडः ३ अंगहीनकः
इतिशब्दरत्नावली ॥
विकली स्त्री रजोहीना इतिश
ब्दरत्नावली ॥
विकल्पः पु भ्रांतिः कल्पनं इति

मेदिनी विविधकल्पः । स च
द्विविधः व्यवस्थितः ऐच्छिकश्च
सेप्याकांक्षा विवरे युक्तः तथा
च भविष्य स्मृतिशास्त्रे विकल्प।
स्त्वाकांक्षापूरणे सति इच्छावि
कल्पेऽष्टदोषाः यथा प्रमाणत्वाप्र
माणत्व परित्याग प्रकल्पना प्रत्यु
ज्जीवन हानिभ्यां प्रत्येक मष्टदोष
ता व्रीहिभि र्यजेत यवै र्यजे
त इति श्रूयते । तत्र व्रीहि
प्रयोगे प्रतीतयवप्रामाण्य प
रित्यागः अप्रतीत यवाप्रामा।
ण्य परिकल्पनं इदंतु पूर्वस्मात्
प्रयोगांतरे यवे उपादीयमानेप
रित्यक्त यव प्रामाण्याज्जीवनं स्वी
कृत यवाप्रामाण्य हानि रितिच
त्वारो दोषाः एवंव्रीहावपिचत्वारः
इत्यष्टौ दोषा इच्छाविकल्पे तथा
चोक्तं एव मेवाष्ट दोषापि यद्व्री
हि यव वाक्ययोः विकल्प आ
श्रित स्तत्र गति रन्या न विद्यते
इति एकार्थतया विविधं कल्प्यते
इति विकल्पः तस्मादष्टदोषभिया
उपोध्म हे तिथी ३ ॥
तत्र न इच्छाविकल्पः किंतुव्य
वस्थितविकल्पः इत्येकादशीत
त्वे विकस्वरः त्रि विकासी इत्यमर भरतः वि
टीकायां रायमुकुटः मांसरो(कषा स्त्री मंजिष्ठा।
हिणी इति राजनिर्घंटः ॥
विकश्वरः त्रि विकस्वरः इत्यम
रटीकायां भरतः ॥
विकसः पुं चंद्रः इति त्रिकांड
शेषः ॥
विकसा स्त्री मंजिष्ठा इत्यमरः
विकसितं त्रि दलानामन्योन्य
विश्लेषः तत्पर्यायः उज्जृंभितं
२ उज्जृम्भं ३ स्मितं ४ उन्मिषि
तं ५ विनिद्रं ६ उन्निद्रं ७ उन्मी
लितं ८ विजृंभितं ९ उद्बुद्धं १०
उद्भिदुरं ११ भिन्नं १२ उद्भिन्नं १३
हसितं १४ विकस्वरं १५ विकचं १९
व्याकोषं १७ फुल्लं १८ संफुल्लं १९
स्फुटं २० उदितं २१ दलितं २२
दीर्णं २३ स्फुटितं २४ उत्फुल्लं २५
प्रफुल्लं २६ इति राजनिर्घंटः
विकस्वरः त्रि विकासशीलः
तत्पर्यायः विकासी २ इत्यमरः
विकसति कसगतौ इत्यस्मात्
थायाय भास कसेति वरे वि
कस्वरः ।

विकासः स्फुटने यथा विकास इति र
त्नांते धरणि ईषोशये रंजग
त्ताशयोषिता मुदा रमंते कल
भाविकस्वरैः प्रगीयते सिहग
ऐरोग्य योषिता मुदा रमंते कल
भाविकस्वरैः इति माघयमके
पि रेतस्वाब्वे कषवषे मूर्द्धन्या
त इत्यस्य रूपमिति केचित्
इति तट्टीकायां भरतः ॥
विकस्वरा स्त्री रक्तपुनर्नवा इ
ति राजनिर्घंटः ॥
विकारः पुं प्रकृतेरन्यथाभा
वः तत्पर्यायः परिणामः २ वि
कृतिः ३ विक्रिया ४ इत्यमरः
विकृता ५ इति भरतः केचित्तु स
र्वत्रयं प्रकृतिरसजन्यविकारे
यथा काष्ठस्य विकारो भस्मा
स्तिपिंडस्य घट इति परद्वयं वि
कारमात्रे यथा मुखस्य विक
तिः क्रोधरक्तता काष्ठस्य भस्म
व इति भरतः रोगः इतिमेदि
नी विकालः पुं देवपित्रादिक
र्मणि विरुद्धकालः वेकाल इ
ति भाषा तत्पर्यायः सायः २ दि
नांतः ३ सायाह्नः ४ सायं ५ इति
शब्दरत्नावली उत्सवः ६ विका
लकः

७ इति त्रिकांडशेषः
विकालकः पुं विकालः इति त्रि
कांडशेषः ॥
कालिका स्त्री मानरंभा ताम्री
तारी इति भाषा इति त्रिकां
डशेषः ॥
विकाशः पुं रहः प्रकाशः इत्य
मरटीकायां भरतः विकाशोविज
ने स्फुटे इत्यजयः
विकाशने स्त्री विकाशः विस्
र्वकाश्यड् दीप्तौ इत्यस्मात् अनट्
प्रत्ययेन निष्पन्नं ॥
विकाशिन् त्रि विकासशीलः इ
त्यमरटीकायां [illegible] रायमुकुटः
विकाशिन् त्रि विकासशीलः इत्य
मरटीकायां भरतः ॥
विकासिन् त्रि विकस्वरः इत्यमरः
क्षुपः इति त्रिकांडशेषः श्राद्ध
कालीन विघ्नोत्सारणार्थं क्षेपणी
यतंडुलादिः यथा फडिति सम
जमान विकिरानादाय अपसर्पंत
ते भूता ये भूता भुवि संस्थिताः
ये भूता विघ्नकर्त्तार स्ते नश्यंतु
शिवाज्ञया इति विकिरेत् यथा
लाज चंदन सिद्धार्थ भस्म दूर्वाऊ
शक्षताः विकिरा इति संदिष्टाः

सर्व विघ्नोच्चनाशकाः इति तंत्र
सारः अग्निदग्धादीनां पिंडदानं
यथा असंस्कृत प्रमीतानां यो
गिनां कुलयोषितां । उच्छिष्टं
भागधेयंस्याद्दर्भेषु विकिरश्चयः
अपिच पितृनिर्वापरहितं यत्
श्राद्धं विधीयते स्वधावाचनला
पोत्र विकिरस्तु नलुप्यते इति
श्राद्धतत्वं ॥
विकीरणं स्त्री विक्षेपणं विहिं
सनं विज्ञानं इति कृपात्वर्थदर्शी
नात् ॥
विकीरणः पुं अर्कवृक्षः इत्यम
रः ॥
विकीर्णः त्रि विक्षिप्तः छोड्यात
इति भाषा यथा अथ सा पुनरे
व विकला वसुधालिंगन धूसर
स्तनी विललाप विकीर्णमूर्द्धजा
स मदुःखामिव ऊर्व्वली स्थली इ
ति कुमारसंभवे ४ सर्गः ॥
विकीर्णरोमन् स्त्री स्थौणेयं इति
राजनिर्घंटः ॥
विकीर्णसंज्ञं स्त्री स्थौणेयं इति
राजनिर्घंटः ॥
विकुर्वाणः त्रि हर्षमाणः इ
त्यमरः ॥
विकृतः पुं चडः इत्यमरादि ।

कोषः ॥
विकुक्षिः पुं इक्ष्वाकुराजपुत्रः
यथा वैवस्वतमनो रासीदिक्ष्वा
कुः पृथिवीपतिः तस्य पुत्रशते
वासीद्विकुक्षि र्ज्येष्ठ उच्यते ॥
सोऽयोध्याधिपति वीर स्तस्य
पंचदश स्मृताः इति वह्निपुरा
णे सगरोपाख्यान नामाध्यायः
विकूणिका स्त्री नासिका इति
हेमचंद्रः ॥
विकृतं त्रि वीभत्सं रोगितं
असंस्कृतं इति मेदिनी ॥
विकृतं स्त्री विकारः तस्य लक्ष
णं यथा स्त्री मानेर्ष्यादिभिर्य
न्नोच्यते स्वविवक्षितं व्यज्यते चे
ष्टयैवेदं विकृतं तद्विदु र्बुधाः
इत्युज्वलनीलमणिः प्रभवादिष
ष्टि संवत्सरांतर्गत चतुर्विशव
र्षंयथा भविष्यपुराणे भैरववुवा
च सर्व्वाः प्रजाः प्रपीड्यंते व्याधि
रोगकश्च जायते शिरो वत्सो
ऽत्र रोगाश्च पापादि विकृते
जनाः इति ज्योतिस्तत्वं ॥
विकृतिः स्त्री विकारः इत्यमरः
विकृति र्डिम्ब रागयो रिति वि
श्वः ॥
विकृती स्त्री रोगः डिम्बः वि

कारः मघादि इति हेमचं
द्रः ॥
विकृष्टः त्रि विशेषेणाकर्षितः
आकृष्टः विपूर्व कृषधातोःक्त
प्रत्ययेन निष्पन्नः ॥
विकेशी स्त्री पटवर्त्तिः केशव
र्जिता इति धरणिः महीरूप
शिवस्य पत्नी यथा सूर्यो जलं
मही वह्नि र्वायुराकाशमेव
च दीक्षितो ब्राह्मणः सोम इ
त्येतास्तनवः क्रमात् सुवर्चला
तथैवोषा विकेशी चापराशि
वा स्वाहादिशास्तथादीक्षा रोहि
णीच यथाक्रमं सूर्यादीनामि
माः पत्न्योरुद्रायैर्नामभिःसह इ
ति मार्कंडेयपुराणे रुद्रसर्गः
विकोकः पुं वृकासुरपुत्रः स
च कल्किदेवेन हतः यथा का
ल्किः कोकविकोकाभ्यां गदापा
णिर्युयोपतिः युयुधे विष्णुना वि
स्तुर्लोकानां जनयन् भयं वृका
सुरस्य पुत्रौ तौ नमारो शकुनेर्हरिः
तयोः कल्किः संयुयुधे मधुकैट
भयोर्यथा तयो गदाप्रहारेण
चूर्णितांगस्य भूपतेः कराच्च्युतो
ऽपतद्भूमौ हृष्ट्वोच्चु स्मिरे जनाः
ततः पुनःकृपा विष्णु र्जाजिस्य
र्महाभुजः नंदकेन शिर स्तस्य
विकोकस्याछिनत्प्रभुः इतिकल्कि
पुराणे २१ अध्यायः ॥
विकोषः त्रि कोषरहितः नि
ष्कोषः इतिपुराणं ॥
विक्कः पुं करिशावकः इति
त्रिकांडशेषः ॥
विक्रमः पुं विष्णुः यथा ईश्वरो
विक्रमी धन्वी मेधावी विक्रमः
इति विष्णुसहस्रनामस्तोत्रं ॥
शौर्यातिशयः तत्पर्यायः ।
अतिशक्तिता २ इत्यमरभरतौ
क्रांतिमात्रं इति मेदिनी ॥
विक्रमादित्यराजा यथा धन्वंत
रि क्षपणकामरसिंह शंकु वेताल
भट्ट घटकर्पर कालिदासाः ख्या
तो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचि र्नव विक्रम
स्य इति नवरत्नश्लोकः चरणः
शक्तिः इति राजनिर्घंटः प्रभ
वादिषष्टिसंवत्सरान्तर्गत चतुर्द
शवर्षं यथा जायते सर्वशस्या
निमेदिनी निरुपद्रवा लवनं म
धुगव्यंच महार्घ्यं विक्रमे प्रिये
इति ज्योतिस्तत्वं ॥
विक्रमादित्यः पुं स्वनामख्यातो
राजा सच उज्जयनीदेशाधिपस्यो

455

तिः सम्वत्कर्त्ताच । तत्पर्यायः ।
साहसांकः २ शकारिः ३ इति
जटाधरः अस्य विवरणं द्वात्रिं
शत्पुत्तलिका कथायां द्रष्टव्य
विक्रमार्कः पुं विक्रमादित्यः ।
इतिकेचित् ॥
विक्रमीन् पुं सिंहः इति राज।
निर्घंटः विष्णुः यथा । ईश्वरो
विक्रमी धन्वी मेधावी विक्रमः
क्रमः इति महाभारते शांतिपर्व
णि तस्य सहस्रनामस्तोत्रं अति
शक्तिविशिष्टे त्रि ॥
विक्रयः पुं विक्रयणक्रिया वे
चा इति भाषा तत्पर्यायः विप
नः १ इत्यमरः विपणनं २ पणा
नं ३ इतिशब्दरत्नावली व्यवहार
पणाया ४ इति जटाधरः अस्य
विहिताविहित नत्वानि यथा
यस्मादि शाकाग्नि क्रतास्य सर्वा ने
ष्टःक्रये विक्रयणे प्रशस्ताः पो ।
स्ताग्निविशो शान्तर्विट वाताः क्रेय
हिताविक्रयणे निषिद्धाः इतिज्यो
तिःसारसंग्रहः ॥ क्रय विक्रय
निर्णयो यथा मूल्यं दास्यामीति
कृत्वा ग्रहणादपि क्रय सिद्धिः त
थाच विवादचिंतामणौ कात्या
यनः पण्यं गृहीत्वा यो मूल्यम्
अदेत्त अतत्रयस्योपरिष्टात्त
त्तुं वृद्धिमाप्नुयात् अत एव
बृहस्पतिः गृहक्षेत्रादिकं क्री
त्वा तुल्यमूल्याक्षरान्वितं पत्रं
कारयेत यत्र क्रयलेख्यं तदु
च्यते क्रयविक्रये समय विशे
षाभ्यंतरे पश्चात्तापात सिद्धिः य
था मनुः क्रीत्वा विक्रीय वाकिं
चिद्यस्येहानुशयो भवेत् सोन्तर्द
शाहे तद्द्रव्यं दद्याच्चैवाददीतवा
एतद्याज्ञवल्क्योक्तेतरपरं यथा
याज्ञवल्क्यः दशैकपंचसप्ताह
मासत्र्यहार्द्धमासिकं वीजायो वा
ह्य रत्नस्त्री दोह्य पुंसां परीक्षणं
बृहस्पतिः अमीवांकार्षण दो
षस्तु यदि संजायते क्वचित् वि
क्रेताप्रतिदेयन्तत्क्रेता मूल्यमवा
प्नुयात् अतस्तद्द्रव्य परीक्षणका
ला कात्यायनः अविज्ञातन्तुयत्क्री
ते दुष्टं पश्चाद्विभावितं क्रीतं
तत्स्वामिने देयं पण्यं काले
ऽन्यथा नतु कालेऽप्युक्त
परीक्षा कालाभ्यंतरे परीक्षितं
तद्बृहस्पतिः परीक्षेत स्वयं पण्यं
अन्येषाञ्च प्रदर्शयेत् परीक्षि
तं बहुमतं गृहीत्वा न पुनस्त्य
जेत् अत्र विशेषयति नारदः

क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्य
ते क्रयी विक्रेतुः प्रतिदेयं तत्त
स्मिन्नेवाह्न्यविक्षतं द्वितीयेऽ
ह्नि दद्त् क्रेता मूल्यात्त्रिंशां
शमाहरेत् द्विगुणन्तु तृतीये
ह्निपरतः क्रेतुरेव तत् आहरे
द्द्यात् विक्रेत इति शेषः द्वि
गुणं त्रिंशांशस्य याज्ञवल्क्यः राज
दैवोपघातेन पण्ये दोष उपा
गते हानि विक्रेतुरेवासौ या
चितस्याप्रयच्छतः नारदः उप
हन्येत वा पण्यं दह्येतापह्नि
येत वा विक्रेतुरेवासोऽनर्थो वि
क्रीयासंप्रयच्छतः दीयमाने
न्यक्सातिक्रीतं पण्यन्तु यः क्रयी
स एव तस्य भवेद्दोषो विक्रेतुर्योऽ
प्रयच्छतः इति प्रायश्चित्ततत्त्वे
अपि च न्यासं कृत्वा पश्चादपि
कृत्वा वाधिं करोति च विक्रयं
वा क्रिया तत्र पश्चिमा वलवत
रा न्यासं कृत्वा आधिं करोति
आधिं कृत्वा वा विक्रयं करोति
विक्रयपदं स्वत्वध्वंसहेतुत्वाद्दा
नं लक्षयति तत्र पराक्रिया सि
द्धेरस्यार्थः एवंच विक्रेतुर्दोषो मे
हणादिना आध्यनुद्धारे विक्रयदा
ने तत्कर्तृकस्य स्वत्वजननात्तत्र
तत्क्रेतु

प्रतिग्रहीतृभ्यां साध्युद्धारः कार्यः
इति तत्रच नच स्थावरस्य सम
स्तस्य गोत्र साधारणस्यच नैकः
कुर्यात्क्रयं दानं परस्परं मतं वि
ना विभक्ता अविभक्ता वा सपि
ण्डाः स्थावरे समाः एको ह्यनीशः
सर्वत्र दानाधमन विक्रये इति व्या
सवचनाभ्यामेकस्य दान वंधक
विक्रयाधिकारः इति वाच्यं यथे
ष्टविनियोगार्हत्वरूपस्य स्वत्वस्य
द्रव्यान्तरे इवात्राप्यविशेषात्वचने
च स्वामित्वेन हृष्ट पुरुष गोच
र विक्रयादिना कुटुम्ब विरोधादध
र्मज्ञापनार्थं निषेधरूपं नतु विक
याद्य निष्पत्त्यर्थ मिति दायभागः
एवंच स्थावरे विक्रयो नास्ति कुर्या
दाधिमनुज्ञया इति स्थावरस्य के
वल विक्रय प्रतिषेधात् एवं भूमि
यः प्रतिगृह्णाति इत्यादि वचने दान
प्रशंसा दर्शनाच्च विक्रयेपि कर्त
व्ये सहिरण्य मुदकं दत्वा दानरूपे
णास्थावर विक्रय इति विज्ञाने
श्वरः वस्तुतस्तु स्थावर विक्रयनि
षेधो अविभक्त स्थावर विषयः त
त्रापि यदि विक्रयं विना अवस्थिति
र्न भवति तदा विक्रयः कर्त्तव्यः एवं
एवं पुरुषार्जित नष्टोद्धारे विशेषयति
मिताक्षरा

र्यां स्थावरं द्विपदंचैव यद्यपि
स्वयमर्जितं असंभूय सुतान्सर्वा
न्न दानं नच विक्रय इत्यादि अस्या
पवाद माह एकोपि स्थावरे कु
र्याद्दानाधमन विक्रयं आपत्का
ले कुटुम्बार्थे धर्मार्थेच विशेषतः
इति दायतत्त्वे द्रव्यविशेष वि
क्रय निषेधो यथा स्मृतिः विक्री
णन्मद्य मांसानि ह्यभक्षस्य च भ
क्षणं कुर्वन्नगम्यागमनं शूद्रः प
तति तत्क्षणात् कपिलाक्षीर पा
नेन ब्राह्मणी गमनेनच वेदाक्ष
र विचारेण शूद्रश्चाण्डालतां व्र
जेत् कालिकापुराणे विक्रयं स
र्ववस्तूनां कुर्वन्शूद्रो न दोषभाक्
मधु चर्म सुरां लाक्षां त्यक्त्वा मां
सं च पंचमं मनुः सद्यः पत
ति मांसेन लाक्षया लवणेन च
त्र्यहेण शूद्री भवति ब्राह्मणः क्षी
रविक्रयात् अशक्तो भेषजस्या
र्थे यष्टुहेतोस्तथैव च यद्यवश्यं
तु विक्रेया स्तिला धान्येन तत्समा
इत्याह्निकतत्त्वे गवां विक्रयका
रीच गवि लोमानि यानिच तावद्व
र्ष सहस्राणि गवां गोष्ठे कृमिर्भ
वेत् इति यमवचनं गोवधोऽया
ज्यसंयाज्य पारदार्यात्मविक्रयाः त

डागाराम दाराणां अपत्यस्यच वि
क्रयः भृताध्ययनादानमपण्या
नांच विक्रयः इत्यादि मानवे 11
अध्याये उपपातकमध्यगणितं
विक्रयणं स्त्री विक्रयः यथा
यमादि शकाग्नि कृत्तिका पूर्वा
नैऋताः क्रये विक्रयणे प्रशस्ताः
पौष्णाग्नि चित्रा शत विष्णु वातात्क्र
ये हिता विक्रयणे निषिद्धाः इति
ज्योतिःसारसंग्रहः ॥
विक्रयिकः पुं विक्रेता ॥ इत्य
मरः ॥
विक्रयीन् त्रि विक्रयकर्त्ता इति
शब्दरत्नावली ॥
विक्रान्त स्त्री वैक्रान्तमणिः इति
राजनिर्घण्टः ॥
विक्रान्तः पुं शूरः इत्यमरः ॥
सिंहः इति राजनिर्घण्टः ॥
विक्रान्तिः स्त्री अश्वगतिः तस्य
याः प्लायितं २ इति त्रिकां
डशेषः विक्रमश्च ॥
विक्रायिकः पुं विक्रेता इति हे
मचन्द्रः ॥
विक्रिया स्त्री विकारः इत्यमरः ॥
विक्रीतः त्रि कृतविक्रयः यथा
वृहस्पतिः नाधिकं स्त्रीव कुरुते
तद्धनं ज्ञातिभिः स्वकं ग्रहत

त्यक्त्वा विक्रीतं कृत्वा संलभते
धन्वी इति प्रायश्चित्ततत्त्वं ॥
विक्रुष्टं त्रि निष्ठुरं इति हेमच
न्द्रः ॥
विक्रेता त्रि विक्रयकर्ता त
त्पर्यायः विक्रयिकः २ इत्यमरः
विक्रयी ३ इति शब्दरत्नावली ॥
विक्रायिकः ४ इति हेमचंद्रः ॥
विक्रेयं त्रि विक्रययोग्यद्रव्यं
तत्पर्यायाः पणितव्यं २ पण्यं
३ इत्यमरः विक्रययोग्यायोग्या
नि यथा इदन्तु वृत्तिवैकल्यात्त्य
जतो धर्मनैपुणं विट्पण्यमुद्धृ
तोद्धारं विक्रेयं वित्तवर्द्धनं ॥
सर्वान्रसानपोहेत कृतान्नंचतिलैः
सह अश्मनो लवणंचैवपशवो
येच मानुषाः ॥ सर्वंचतान्त
वं रक्तं शाणक्षौमाविकानिच
अपि चेत्स्युररक्तानि फलमूले
तथौषधीः ॥ अपः शस्त्रं वि
षं मांसं सोमं गंधांश्च स
र्वशः क्षीरं क्षौद्रं दधि घृतं तै
लं मधु गुडं कुशान् आरण्यां
श्च पशून्सर्वान्दंष्ट्रिणश्चवयांसि
च मद्यं नीलिंच लाक्षांच सर्वां
श्चैकशफांस्तथा ॥
काम मुत्पाद्य कृष्यांतु स्वयमेव

कृषीवलः विक्रीणीत तिलाञ्छु
द्धान् धर्मार्थ मचिरस्थितान् इ
ति मानवे १० अध्यायः ॥
विक्लवः त्रि विकलः इत्यमरः
विक्लिन्नः त्रि जरसाजीर्णः शीर्णः
आर्द्रः इति मेदिनी ॥
विख त्रि गतनासिकः इतिभर
तद्विरूपकोषः ॥
विखनाः पुं ब्रह्मा यथा न ख
लु गोपिकानंदनो भवान् अखिल
देहिनां अंतरात्महृक् विखनसा
र्थितो विश्वगुप्तये सख उदेयिवा
न्सात्वतां कुले इति श्रीभागव
ते १० स्कंधे ३१ अध्यायः ॥
विखुः त्रि गतनासिकः इति भ
रतद्विरूपकोषः ॥
विखुरः पुं राक्षसः इति त्रिको
ण्डशेषः चौरः इति संक्षिप्तसा
रोणादिवृत्तिः ॥
ख्यः त्रि गतनासिकः । इति
केचित् ॥
विख्यातः त्रि ख्यातिमापन्नः ।
विपूर्व ख्याधातोः क्त प्रत्ययेन
निष्पन्नः ॥
विख्यातिः स्त्री प्रसिद्धिः ख्या
ति विपूर्वख्याधातोः क्ति प्रत्ययेन
निष्पन्ना ॥

विख्यापनं क्ली व्याख्यानं विपूर्व
ख्यांत ख्या धातो ल्युट् प्रत्ययेन
निष्पन्नं ॥
विख्रः } त्रि अनासिकः इतिहे
विख्रुः मचंद्रः छिन्ननासिकः इ
ति शब्दरत्नावली ॥
विगणनं क्ली ऋणमुक्तिः इ
ति त्रिकांडशेषः ॥
विगतः त्रि प्रभारहितः तत्पर्या
यः निष्प्रभः २ अरोकः ३ ।
इत्यमरः वीतः ४ इति रुद्रः ॥
विशेषेणगतः इति हेमचंद्रः ॥
विगतश्री ~~कंस इति चक्रवीसेक~~
कः त्रि श्रीरहितः विगताश्रीर्य
स्य इति बहुव्रीहौ क प्रत्यये
न निष्पन्नः ॥
विगतार्त्तवा स्त्री पंचपंचाशदब्दे
भ्य ऊर्द्ध्वं निवृत्तरजस्का तत्पर्या
यः निष्कली २ निष्कला ३ निष्क
ली ४ निष्फला ५ विकली ६ वि
कला ७ इति शब्दरत्नावली विग
मः पुं नाशः यथा एकदेहिनो वे
दांतिनस्तु यद्यप्यनवच्छिन्नस्य ब्र
ह्मणो विश्वरूपता तद्दशायाम
पि विगम एव कैवल्यं विदेहिनस्तु
ज्ञानेहमयं परमात्मनि जीवात्मनो
लयो मोक्षः जीवात्मपरमात्मनोरभेद

पि उपाधिविशे
ष विशिष्टस्यात्मनो जीवरूपतया
तस्यौपाधिकः परमात्मभेदः ।
इति भेदकोपाधि विगम एवजी
वस्य परमात्मनि लयः यथा घ
टाकाशस्य घटविगम एवमहदा
काशे तस्य लयः लिंगशरीराव
च्छिन्नस्यैवात्मनो जीवभाव इति
लिंगशरीर नाश एव पर्यवसि
तो मोक्षः इति भक्तिवादः ॥
विगंधकः पुं इंगुदीवृक्षः इति
राजनिर्घंटः ॥
विगंधिका स्त्री हपुषा इति
राजनिर्घंटः
विगर्हणं } क्ली निन्दनं भर्त्सनं
विगर्हणा } इति विपूर्व ण्यंत गर्ह
धातो रणाट् प्रत्ययेन अन्प्रत्ययेनच
निष्पन्नं ॥
विगर्हितः त्रि निंदितः निषिद्धः
इति विपूर्व गर्ह धातोः क्त प्र
त्ययेन निष्पन्नः ॥
विगलितः त्रि स्खलितः यथा
विगलित वसनं परिहृत रसनं घ
टय जघन मपिधानं किसलय
शयने पंकजनयने निधिमिव ह
र्षनिधाने इति गीतगोविन्दे ५
सर्गः
विगाढः त्रि स्नातः अवगाहितः

विपूर्व गाह धातोः क्त प्रत्यये-
न निष्पन्नः ॥
विगानं क्ली निन्दा । इतिहेम
चंद्रः ॥
विगाहमानः त्रि विलोडनक-
र्त्ता अवगाहनकर्त्ता विपूर्वगाह
धातोः शान प्रत्ययेन निष्पन्नः ।
विगुणः पुं गुणवैपरीत्यविशिष्टः
यथा यथा मनो ममाचष्टे नेयं
माता यथा मम विगुणेष्वपि पु
त्रेषु न माता विगुणा भवेत्
इति मार्कण्डेयपुराणे वैवस्वतम
न्वन्तराध्यायः ॥
विगूढः त्रि गर्हितः गुप्तः इति
मेदिनी ॥
विग्रः त्रि गतनासिकः इत्यमरः
विग्रहः पुं शरीरं युद्धं ॥
विस्तारः इत्यमरः विभागः ।
इति मेदिनी वाक्यभेदः सत्र
समासवाक्यं तत्पर्यायः विस्तरः
२ इत्यमरः देवविग्रहकरणादि
प्रमाणं श्रीमूर्तिशब्दे द्रष्टव्यं ॥
विग्रहः पुं क्ली युद्धं इत्यमरः
विग्रहावरं क्ली पृष्ठं इतिशब्द
चंद्रिका ॥
विघटिका स्त्री पलं इतिराज
निर्घण्टः

विघट्टितं त्रि विशेषेण चालितं
विपूर्व घट्ट धातोः क्त प्रत्ययेन
निष्पन्नं ॥
विघसं क्ली शिक्थकं इतिरा
जनिर्घण्टः ॥
विघसः पुं भोजनशेषः इत्यम
रः देवपितृतिथि गुर्वादिभुक्त
क्तस्य शेषं इति भरतः ॥
आहारः इति शब्दरत्नावली ॥
विघातः पुं क्ली व्याघातः आ
घातः यथा हृषि वैषे तद्विघा
तेऽवग्राहावग्रहौ समौ इत्यमरः
विघाती न् त्रि निवारकः घातकः
विघात शब्दादिन् प्रत्ययेन विपू
र्व हन धातोर्ग्रहादित्वाणिन्प्रत्ययेन
वा निष्पन्नः ॥
विघ्नः पुं व्याघातः तत्पर्यायः
अन्तरायः २ प्रत्यूहः ३ इत्यमरः
कुम्भपाकफला । इति शब्दचं
द्रिका शेषार्थे अमरे अविघ्न इति
पाठः ॥
विघ्नकारी न् त्रि घोरदर्शनः वि
घाती इति मेदिनी ॥
विघ्ननायकः पुं गणेशः इतिश
ब्दरत्नावली ॥
विघ्ननाशकः पुं गणेशः इति
विघ्ननाशनः शब्दरत्नावली ॥

विघ्नराजः पुं गणेशः इत्यमरः ॥
विघ्नविनायकः पुं गणेशः इति
काशीखण्डः ॥
विघ्नहारी न् पुं गणेशः इति त्रि
काण्डशेषः विघ्ननाशके त्रि ॥
विघ्नितः त्रि जातविघ्नः विघ्नमस्य
जातं इत्यर्थे विघ्नशब्दादितच् प्रत्यये
न निष्पन्नः ॥
विघ्नेशः पुं गणेशः । इति शब्द
रत्नावली ॥
विघ्नेशवाहनः पुं महामूषकः ।
इति राजनिर्घण्टः ॥
विघ्नेशानकान्ता स्त्री श्वेतदूर्वा ।
इति राजनिर्घण्टः ॥
विङ्कः पुं अश्वखुरः इति त्रिका
ण्डशेषः ॥
विच इर् लि य गे न पृथक्करणे
इति कविकल्पद्रुमः इर अविचत्
अवैक्षीत् लि य वेवेक्ति वेविक्ते
मूर्द्धन्यादितः पृथक्करणादित्यर्थः वि
न इति जातो यः सएव वाला
पि पठति कस्यचिदनुरोधात् तेः
न निजाविवेकेण विनस्य वृत्तोवि
जयहरणे नैवास्य ग्रहणात्तेवर्गे-
णः यन विनक्ति विङ्क्ते वि
विनक्ति दिवः स्वान् । इति
पृथक्करोमीत्यर्थः श्री वेक्ता ।

इति दुर्गादासः ॥
विचकिलः पुं मल्लीप्रभेदः म
दनकवृक्षः इति मेदिनी ॥
विचयनं क्ली मार्गणं इत्यमरः
विचर्चिका स्त्री रोगविशेषः वि
कच इति भाषा तत्पर्यायः ।
कच्छूः २ पाम ३ पामा ४ इत्यमरः
अपिच कच्छूः कच्छूः पाम पामा
पादरोगे विचर्चिका इति शब्द
रत्नावली तदौषधं यथा कर
वीरं भृङ्गराजं लवणोऽथ कर्क
टं चतुर्गुणेन मूत्रेण पचेत्तैलं हरे
त्ततः पामां विचर्चिकां कुष्ठ मस्य
णाहि व्रणानि वै इति गारुडे १८०
अध्यायः अमृता मरीचं त्रिवृ
तं कुष्ठं हरितालं मनःशिलादेव
दारु हरिद्रे कुष्ठं मांसीच चं
दनं विशाला करवीरंच अर्कक्षी
रं सक्तुफलं । एषांच कार्षिको
भागो विषस्यार्द्धं पलं भवेत् ॥
प्रस्थं कटुकतैलस्य गोमूत्रे चतुर्गुणे
पचेत् मृत्पात्रे लोहपात्रे वा शनै
र्मृद्वग्निना पचेत् ॥ पामा
विचर्चिका चैव दद्रु विस्फोटका
नि च अभ्यङ्गेन प्रणश्यन्ति कोम
लत्वं च जायते प्रसूतान्यपि स्त्रिया
णितैलेनानेन म्रक्षयेत् । चिरोत्थि

तमपि चिरं विवर्णं तत्क्षण
द्भवेत् इति गारुडे १६८ अध्या
यः ॥ स्वल्पकुष्ठविशेषः यथा
एककुष्ठमस्तं पूर्वं गजचर्म त
तः स्मृतं । ततश्चर्मदलं प्रोक्तं तत
श्चापि विचर्चिका विपादिकाभि
धा सैवपामा कच्छुस्ततः पुरा त
तो दद्रुश्च विस्फोटः किटिभं त
तः परं ततश्चालसकं प्रोक्तं श्वेता
रुश्च ततः परं रक्तकुष्ठानि चैता
नि कथितानि भिषग्वरैः सक
ण्डूः पिडका श्यावा बहुस्रावा वि
चर्चिका पिडका लदपिडकादा
स्ते तक्कवरा रुजा जान्वो सैया
विचर्चिका पादे विपादिका स्मे
यास्थान भेदा द्विचर्चिका दास्य
ते विदार्यंते केचिद्विचर्चिकातो
विपादिको भिन्नमाहुः इति भा
वप्रकाशः ॥
विचलः त्रि अस्थिरः विपूर्व चल
धातो रच्प्रत्ययेन निष्पन्नः ॥
विचलितः त्रि स्खलितः पतितः
विपूर्व चलधातोः क्त प्रत्ययेन
निष्पन्नः ॥
विचक्षणः पुं पंडितः इत्यमरः
निपुणे त्रि इति राजनिर्घंटः ।
विचक्षणा स्त्री नागदंती इतिराज
निर्घंटः ॥
विचक्षुः[स] त्रि विमनाः इति त्रिकां
शेषः विगतचक्षुषि त्रि ॥
विचारः पुं तत्वनिर्णयः इतिव्य
वहारतत्वं संदिग्धे वस्तुनि प्र
माणेन तत्व परीक्षा इति गोयी
चंद्रः प्रमाणै रर्थ परीक्षणं विम
र्शमात्र मिति केचित् इति भरतः
तत्पर्यायः तर्कः २ निर्णयः ३ उं
जा ४ चर्चा ५ इति त्रिकांडशेषः ॥
संख्या ६ विचारणा ७ इत्यमरः
चर्चनं ८ संख्यानं ९ इति तट्टीका
विचारणं १० वितर्कः ११ ऊहः १२
स्पूहः १३ ऊहः १४ वितर्कणं १५
इति शब्दरत्नावली प्रणिधानं १६
समाधानं १७ इति जटाधरः विचा
रणं क्ली विचारः इति शब्दरत्ना
वली ॥
विचारणा स्त्री विचारः इत्यमरः
मीमांसाशास्त्रं इति हेम चंद्रः ॥
विचारणीयं त्रि विचार्यं विपूर्वकं
त चरधातो रनीय प्रत्ययेन नि
ष्पन्नं शास्त्रं इति हेम चंद्रः ॥
विचारितः त्रि कृत विचारः त
त्पर्यायः विन्नः २ वित्तः ३ इत्यम
रः ॥
विचार्यं त्रि विचारितव्यं विचार

णीयं विपूर्व चर धातो र्ण्यंता
त्य प्रत्ययेन निष्पन्नं ॥
विचालं त्रि अभ्यंतरं अंतरालं
इति हेमचंद्रः ॥
विचिः पुं स्त्री वीची तरंगः
इत्यमरटीकायां भरतः ॥
विचिकित्सा स्त्री सन्देहः इत्य
मरः ॥
विचित्रं क्ली कर्बुरवर्णः इतिश
ब्दरत्नावली तद्वति त्रि आश्च
र्यं यथा विचित्र मिद माख्यातं
भगवन्भवता मम देव्याश्चरित
माहात्म्यं रक्तबीजवधाश्रितं ॥
इति देवीमाहात्म्ये ॥
विचित्रकः पुं भूर्जवृक्षः इति
राजनिर्घंटः ॥
विचित्रदेहः पुं मेघः इतिशब्द
चंद्रिका ॥ आश्चर्यशरीरे नाना
वर्णदेहे च त्रि ॥
विचित्रवीर्यः पुं चंद्रवंशीयराज
विशेषः स च शांतनो र्दासकन्या
या जातः तस्य क्षेत्रे सत्यवत्या ।
तया व्यासो धृतराष्ट्रं पांडुंच ज
नयामास इति श्रीभागवतम् ।
तं विचित्रवीर्यसूः स्त्री सत्यवती
इति शब्दरत्नावली ॥
विचित्रा स्त्री मृगेर्वारुः । इति
राजनिर्घंटः ॥
विचित्रांगः पुं मयूरः इतिशब्दर
त्नावली व्याघ्रः इति शब्द चंद्रि
का आश्चर्यशरीरे त्रि ।
विची स्त्री तरंगः इति द्विरूप
कोषः ॥
विचेताः[स] त्रि विगतचित्तः तत्प
र्यायः दुर्मनाः २ अंतर्मनाः ३
विमनाः ४ इति हेमचंद्रः ॥
विचेष्टितः त्रि विगतः ईहितः ।
इति मेदिन्यां चेष्टित शब्दार्थे द
र्शनात् ॥
विछ क त्विषि इतिकविकल्पद्रु
मः कविछयति त्विषि दीप्तो इति
दुर्गादासः ॥
विछ श गतौ इति कविकल्पद्रु
मः विछायति विछायते आय
न्तत्वाद्भयमिति वोपदेवः पक्षे
विछति शविछती विछंती इति
दुर्गादासः ॥
विच्छेदकः पुं ईश्वरसप्तप्रभेदः
इत्यमरः विशिष्ट छदोऽभि
प्रायोऽत्र विच्छन्दकः किंवा वि
शिष्टच्छंदा निर्मितो विच्छेदकः
पृषोदरादिति कः एवं लक्षणम
पर्यस्तसंकेतेन यथा उपवेशु परि
यद्रेहं तद्विच्छेदक संज्ञकं भरतः

विच्छर्दकः पुं विच्छंदकः इत्य
मरटीकायां रायमुकुटः ॥
विच्छायं क्ली पक्षिणांच्छाया।
इत्यमरः समासे षष्ठ्यंतात्परा छा
याक्लीवे स्यात् साचेत् बहूनांस
म्बंधिनी स्यात् स्वयमुदाहरति।
वीनां पक्षिणां छाया विच्छायं
इत्यमरटीकायां भरतः छायार
हिते त्रि ॥
विच्छायः पुं मणिः इतियात्तव
गैच्छाया शब्द टीकायां भरतः
विच्छित्तिः स्त्री अंगरागः वि
च्छेदः हारभेदः इति मेदिनी॥
छेदः विनाशः इति त्रिकांडशे
षः अंगहारः गेहावधिः॥
इति हेमचंद्रः आकल्पकल्पनाल्पा
पि विच्छित्तिःकान्तिपोषकृत् इ
त्युज्ज्वलनीलमणिः ॥
विच्छिन्नः त्रि समालब्धः विभ
क्तः इति मेदिनी कुटिलः इति
हेमचंद्रः ॥
विच्छेदः पुं वियोगः विरहः
भेदः यथा कालःकरोतिकल
नं स च भेदाकरो तिच सर्वं
कालकृतं मात भेदं संमीलनं
रहा इति ब्रह्मवैवर्त्ते श्रीकृ
ष्णजन्मखंडे ९० अध्यायः अपिच
कांतायाः कांतविच्छेदो मरणाद
तिरिच्यते इतिब्रह्मवैवर्त्ते गण
पति खंडः ॥
विच्युतः त्रि विगतः विपूर्वच्यु
धातोःक्त प्रत्ययेन निष्पन्नः वि
च्युतिरितः विपूर्व च्युत धातोः
क्त प्रत्ययेन निष्पन्नः ॥
विच्युतिः स्त्री वियोगः यथा
सोपि वैश्य स्ततो ज्ञानं वव्रेनि
र्विण्ण मानसः ममेत्यह मिति
प्राज्ञः संग विच्युति कारकं॥
इति मार्कंडेयपुराणे देवीमाहा
त्म्ये ॥
विछ इर ति न ओ वेके इति
कविकल्पद्रुमः वेक इति विचि
र्लियौ न पृथक्त्वे इत्यस्यवृत्ति
रूपं इर अविजत् अवेक्षीत्।
ति न वेवेक्ति वेविक्तेपूर्वोत्त
रितः पृथक्स्यादित्यर्थः ओ वे
क्ता इति दुर्गादासः ॥
विज ईय ओ भीकंपे। इति
कविकल्पद्रुमः ईओ विग्न धवि
नक्ति इतिदुर्गादासः ॥
विज उ ई श ओ भीकंपे इति
कविकल्पद्रुमः उ श विजते ई
ओविग्न हावर्धो। इतिदुर्गादासः
विजनः त्रि निर्जनः तत्पर्यायः

456

विविक्तः १ छन्नः २ निःशलाः
कः ४ रहः ५ उपांशु ६ इत्यमरः
विजननं क्ली प्रसवः इतिहेमचं
द्रः विजपिलं क्ली पंकः यथापि
च्छलंस्यात्विजपिलं पंक प्रादोः
निषद्वरः इतिरत्नाकरः ॥
विजन्मा त्रि जारजः विरुद्धज
न्मविशिष्टः इति लोकप्रसिद्धः
विजयः पुं जयः इत्यमरः ॥
अर्जुनः इतिमेदिनी ॥ दुला
हत्पिता जिनवल्लदेवः ॥ विमा
नः इति हेमचंद्रः ॥ यमः इति
शब्दचंद्रिका कल्किपुत्रः यथा
ततः कल्किस्य पद्मायां जयोवि
जयपवच होपज्ञोजननयामास
लोकख्यातो महाबलो इति श्री
कल्किपुराणे ३ अध्यायः भैर
ववंशीयकल्पराजपुत्रः सकाः
शीराजः खांडववनकर्ताच यः
था स्मृते ह्यभवन्कल्पःसुतःस
स्यपुरिंडिमः विरूपस्याभवद्रा
पूर्गाधे मिंत्रोऽभवन्सुतः तेषां
कल्पोऽभवद्राजा कल्पात्त विज
योऽभवत् यो विजित्य क्षितिं स
र्वांपार्थिवान्भूरितेज शक्रस्यानु
मते चक्रे खांडवं शतयोजनं।
यत्सव्यसाची हाददत्पांडुपुत्रः।
प्रतापवान् अवहन् परमांपी
तिं ज्वलनस्य महात्मनः इति
कालिकाखंडे भैरववंशानुकी
र्त्तने ९ अध्यायः विष्णुचरवि
शेषः यथा विष्णुचरा श्चंडप्र
चंड जय विजयादयः इतिपुंलिं
गसंग्रहे भरतः ॥
विजयकुंजरः पुं राजवाह्यहस्ती
त्रिकांडशेषः ॥
विजयछन्दः पुं पंचशतमौक्तिक
हारः इति हेमचंद्रः ॥
विजयनंदनः पुं इक्ष्वाकुवंशज
राजविशेषः तत्पर्यायः जयः२
इति हेमचंद्रः ॥
विजयमर्दलः पुं ढक्का जयढ
क्क इति भाषा इति त्रिकांडशेषः
विजया स्त्री तिथिविशेषः सा
विजयादशमीतिख्याता तल्लक्ष
दुर्गाशब्देद्रष्टव्यं उमासखी इति
मेदिनी सात्वगौतमकन्या यथा
ता मागता सती दृष्ट्वा जयामे
का मुवाच ह किमर्थं विजया
नागाज्जयंतीचापराजिता सादे
व्याविचनं श्रुत्वा उवाच परमेश्व
रीगता निमंत्रिताःसर्वा सावे मा
तामहस्यताः सर्वापित्रा गौतमेन
माता चाप्यनुराधया । इति

वामनपुराणे ४ अध्यायः कालि
कापुराणे ७ अध्यायेप्येवं ॥
विश्वामित्रोपास्ति तद्विद्याविशेषः
यथा विद्या मथैनं विजयां जयां
च रक्षोगणं क्षिप्तुमविक्षतात्मा
अध्यापिपद्गाधिसुतो यथावन्नि
घातयिष्यन् युधि यातुधानान् ।
इति भट्टिः ॥ दुर्गा इति हेमचं
द्रः तथाच विजित्य पद्मनामानं
दैत्यराजं महाबलं विजया तेन
सा देवी लोके चैवापराजिता ॥
इति देवीपुराणे ४५ अध्यायः ॥
यमभार्य्या हरीतकी इति जटा
धरः वचा इति रत्नमाला जयन्ती
शेफालिका मंजिष्ठा शमीभेदः
अग्निमन्थः ॥ इति राज
निर्घण्टः मादकद्रव्यविशेषः भां
इति सिद्धि इति च भाषा । त
त्पर्य्यायः त्रैलोक्यविजया २ भङ्गा
३ इन्द्राशनं ४ जया ५ इति शब्दच
न्द्रिका वीरपत्रा ६ गञ्जा ७ च
पला ८ अजया ९ आनन्दा १० ह
र्षिणी ११ अस्या गुणाः कटुत्वं ।
कषायत्वं उष्णत्वं तिक्तत्वं वात
कफापहत्वं संग्राहित्वं वाक्प्रद
त्वं बल्यत्वं मेधाकारित्वं श्रेष्ठदी
पनत्वञ्च इति राजनिर्घण्टः अ

पिच भङ्गा मातुलानी मादिनी
विजया जया भङ्गा कफघ्नी
तिक्ताग्राहिणी पाचनी लघुः ती
क्ष्णोष्णा पित्तला मोह मद वाग्व
ह्नि वर्द्धिनी इति भावप्रकाशः
अन्यच्च शक्राशनं तीक्ष्णोष्णं
मोहकुष्ठनाशनं बल मेधाग्नि
कृत् श्लेष्मदोषहारि रसायनं जाता
मन्दर मन्थनाज्जलनिधौ पीयूषरू
पापुरा त्रैलोक्ये विजयप्रदेति वि
जया श्रीदेवराजप्रिया । लोका
नां हितकाम्यया क्षितितले प्राप्ता
नरैः कामदा सर्वातङ्कविनाशहर्ष
जननी यैः सेविता सर्वदा ॥
इति राजवल्लभः ॥ अष्टमहा
द्वादश्यन्तर्गतद्वादशीविशेषः य
था अथ विजयाव्रतं ब्रह्मपुरा
णे यदा तु शुक्लद्वादश्यां नक्ष
त्रं श्रवणं भवेत् तदा सा तु म
हापुण्या द्वादशी विजया स्मृता
तस्यां स्नातः सर्वतीर्थे स्नातो भव
ति मानवः संपूज्य वर्षे पूजायाः
सकलं फलमश्नुते एकजप्यात्
सहस्रस्य जप्यस्याप्नोति सत्फलं दानं
सहस्रगुणितं तथा वै विप्रभो
जने होम स्तथोपवासश्च सहस्र
गुणितो भवेत् अथ व्रतविधिः

आदौ गुरुं नमस्कृत्य ततः संक
ल्पमाचरेत् शरशार्ङ्गधरं देवं सौ
वर्णं रचयेन्नरः संकल्पमन्त्रः द्वा
दश्यामहं निराहारः स्थित्वाऽऽरमपरे
ऽहनि भोक्ष्ये त्रिविक्रमानन्त शर
णं मे भवाच्युत सोपवीतन्तु क
लसं पूर्ववत्स्थापयेद्व्रती पात्रन्त
दुपरि न्यसेत्ताम्रं वैणवमेव वा
तत्र प्रवेश्य संस्नाप्य देवं वि
शाद चन्दने आलिप्य शुभ्रं व
सनं दद्याद्धृतं च पादुके वाम
देवायेति शिवः श्रीधरायेति वै
मुखं कृष्णायेति च कण्ठं वै वक्षः
श्रीपतये इति शस्त्रास्त्रधारिणे
बाहू कैस्तेच व्यापकाय वै करौ
पद्मनाभायोदरं मेढ्रं त्रैलोक्य जनना
यच जघने चार्च्चयेद्दिशां सर्वाधिप
तये इति सर्वात्मने इति पदा
वेव मङ्गानि पूजयेत् शङ्खचक्र
गदा पद्म शार्ङ्ग शर विभूषिते
ब्रह्मणोर्घ्यं मया दत्तं शार्ङ्गपा·
णे नमोऽस्तु ते इत्यर्घ्यं पूर्ववत्कृत्वा
धूपदीपौ समर्प्य च घृतपक्वप्रधा
नानि नैवेद्यानि निवेदयेत् ॥
ताम्बूलादीनि दत्त्वाथ कृत्वा जा
गरणं निशि प्रातः स्नात्वार्च्चयित्वे·
शपुष्पाञ्जलिमथार्च्चयेत् नमस्तेऽस्तु

गोविन्द बुध श्रवण संज्ञक अ
घौघं नाशं कृत्वा सर्वसौख्यप्रदो
भव इति प्रार्थ्य ततः सर्वं दत्वा
चार्घ्यं प्रतोष्य द्विजान् विप्रान्
भोजयित्वा स्वयं पारणं माच
रेत् भाद्रे मासि बुधस्याक्रियदि
सा हि जया व्रते तदा सर्वव्रते
भ्योऽस्य माहात्म्यमतिरिच्यते ॥
इति श्रीहरिभक्तिविलासे १३
विलासः ॥

विजयासप्तमी स्त्री रविवारे शुक्ल
पक्षीयासप्तमी यथा शुक्लपक्षस्य
सप्तम्यां सूर्यवारो यदा भवेत् ॥
सप्तमी विजया नाम तत्र दत्तं म
हाफलं इति तिथ्यादितत्त्वं ॥

अथ विजयोत्सव विधिः रथमा
रोप्य देवेशं सर्वालङ्कारशोभितं
साक्षितूणधनुर्वाणपाणिन
नक्तंचरान्तकं सलीलया जगत्त्रात
माविर्भूतं रघूद्वहं राजोपचारैः
श्रीराम शमीवृक्षतलं नयेत्
सीताकान्ते शमीयुक्तं भक्तानाम्
भयंकरं अर्च्चयित्वा शमीवृक्षमर्च
येद्द्विज मानवे ॥ तत्र मन्त्रः
शमी शमयते पापं शमी लोहित
कण्टका धारिण्यर्जुनबाणानां
रामस्य प्रियवादिनी करिष्यमाण

या यात्रा यथा काले सुखं मया
तत्र निर्विघ्नं कर्त्तव्यं भव श्रीरा
मपूजिता गृहीत्वा सात्वता माई
शमी मूलगतं सद्यं गीत वादि
त्रनिर्घोषैः स्नातो देवं गृहं नयेत्
कैश्चिद्धस्ते स्तत्र भाव्यं कैश्चिद्धा
यच वानरैः कैश्चिद्राज मुखे
भाव्यं कोशलेन्द्रस्य तुष्टये ॥
निर्जिता राक्षसा दैत्या वैरिणो
जगतीतले रामराज्यं रामराज्यं
रामराज्य मितिब्रुवन् ॥ आ
नीय स्थापयेद्देवं निजसिंहास
नेसुखं ततो नीराज्य देवेशं प्र
णमेद्दंड वद्भुवि महाप्रसादव
स्त्रादि धारयेद्वैष्णवैः सह इति
श्रीविष्णुधर्म्मोक्तानुसारेण चले
त्ययं विधिः श्रीम विजयोत्स
वस्योत्सवकृत्सतां सीतादृष्टे
ति हनुमद्वाक्यं श्रुत्वा करोत्प्र
भुः विजयं वानरैः सार्द्धं वासवे
ऽस्मिन् शमीतलात् इतिश्रीह
रिभक्तिविलासे १५ विलासः ॥
विजयिनं त्रि विजितं इत्यम
रटीकायां रायमुकुटः ॥
विजयीन त्रि जययुक्तः यथा
वज्रपंजर नामेदं यो रामक
वचंपठेत् सचिरायुःसुखी वि
जयी भवेत् इति तन्त्रसारः ॥
विजरः त्रि जरारहितः विगताज
रायस्येति बहुव्रीहिसमासनिष्पन्नः
विजलं त्रि विजितं इति हेमचं
द्रः निर्जलंच ॥
विजल्पः पुं वाक्यविशेषः यथा
व्यक्तयासूयया गूढ मान मुद्रान्त
रालया अघद्विषिकटाक्षोक्ति र्विज
ल्पो विदुषां मतः इत्युज्ज्वल नी
लमणिः ॥
विजातः त्रि विजन्मा इति लोक
प्रसिद्धः ॥
विजाता स्त्री जातापत्या यथा।
विजाताच प्रजाताच जातापत्या
प्रसूतिका इति हेमचंद्रः
विजातीयः त्रि विभिन्नधर्म्माक्रान्तः
यथा प्रायश्चित्ताद्विजातीयान्नाद
क्याप विनाशनं इति प्रायश्चि
त्ततत्वे विशेषजातिविशिष्टः
यथा प्रवाहोनादिमानेषनं विजा
तेक शक्तिमान् । तत्वेष
न्वेवता भाव्य मन्वय व्यतिरेकयोः
पथकार्य कारण प्रवाहो नादि
मान् अनादिः विजातीयेषु राणा
दिषु एकशक्तिमान्न प्रवाहः
अन्वयव्यतिरेकयो स्तत्र निषत
त्वेनियतत्वात्व निर्वाहो यत्न्वेवताभावं

यन्तःकरणीयः वैजात्यमितिभा
वः वह्निसामान्यं प्रति विजा
तीयोत्पस्पर्शवत्तेज एव कारणं
इति हरिदासीयकुसुमांजलिटी
का विजिगीषुः त्रि जयेच्छुः इति
सिद्धांतकौमुदी ॥
विजिगीषा स्त्री स्वोदरपूरणाश
क्ति निमित्तकनिंदात्यागेच्छा इत्य
मरटीकायां रमानाथः व्यवहा
रः कश्चित्प्रकर्षः इति तत्रैवभ
रतः विजयेच्छाच ॥
विजिगीषा विवर्जितः त्रि केवल
मुदराधीनः तत्पर्यायः । आघूनः
औदरिकः २ इत्यमरः ॥
विजिगीषा व्यवहारः कश्चित्प्रक
र्षो वा तेन विवर्जितो विहीनोः
यः केवल मुदराधीनः तत्र ह्यावि
मो वर्त्तते इत्यर्थः । विगीषा जे
तुमिच्छायां व्यवहार प्रकर्षयोः ।
इति मेदिनी तत्र स्वोदर पूरणा
शक्ति निमित्तक निन्दात्यागेच्छा
विजिगीषा तया रहितः इत्यमि
तिरमानाथः इति तट्टीकायां भ
रतः ॥
विजिगीषुः त्रि जयेच्छाशीलः य
था जेतु मेषणशीलश्च विजिगी
षुरिति स्मृतः इति शब्दमाला ॥
विजितः त्रि पराजितः यथा
पथ्याशिनां शीलवतां नराणां
सहृतिभाजां विजितेन्द्रियाणां
एवं विधाना मिदमायुरत्र चिंत्यं
सदा हृद्गुमुनिप्रवादः इति मल
मासतत्वं ॥
विजिता स्त्री पुं पृथक् भीतः क
म्पितः इति विजधात्वर्थदर्शनात्
विजितिः स्त्री विजयः यथा ।
तिति विजिति स्थिति विहिति
व्रतरतयः परगतयः उरु रुरु
धुर्गुरु डुधुडु धुंधि ऊरवः स्व म
रिऊले इति दंडी ॥
विजिनं त्रि विजिलं इत्यमरटी
कायां रायमुकुटः ॥
विजिलं त्रि पिच्छिलव्यंजनादि ।
तत्पर्यायः पिच्छिलं २ । इत्यम
रः विजयिनं ३ विजिनं ४ ।
विज्जलं ५ उज्जलं ६ लालसीकं ७
इति वाच स्पतिः विजिविलं ८
विजलं ९ इति हेमचंद्रः पाक
सूपरसासक्ते व्यंजने तु भवेत्
त्रयं तैलपाक स्तत्संस्कारे प्रयत्न
मुपसंस्कृतं पिच्छिलं लालसी
कंच विजिनं विजिलंच तत् ।
इति शब्दरत्नावली ॥
विजिविलं त्रि विजिलं इति॰

हेमचंद्रः ॥
विजिह्मः त्रि वक्रः कुटिलः इ
तिकेचित् ॥
विज्जुलः पुं शाल्मलीकंदः इति
राजनिर्घंटः ॥
विजृंभणं क्ली जृम्भणं विकस
नं इति केचित् ॥
विजृम्भितं क्ली चेष्टा इति मेदि
नी विजृंभितः त्रि विकस्वरः इति
मेदिनी जृम्भायुक्तश्च ॥
विज्जनं त्रि विजिलं इत्यमरटी
कायां रायमुकुटः ॥
विज्जलं क्ली बाणं यथा पत्र
वाहो विकर्षोऽथ तीरं विज्जलशा
यके लोहनालश्च नाराचः प्र
सरः काण्डगोचरः इति त्रिकाण्ड
शेषः विजिलं इति हेमचंद्रः ॥
विजिलं क्ली विजिलं इतिशाब्द
रत्नावली ॥
विज्जुलं क्ली त्वचं इति राज
निर्घंटः ॥
विज्जुलिका स्त्री जतुका इतिरा
जनिर्घंटः ॥
विज्ञः त्रि प्रवीणः इत्यमरः ॥
अस्य पर्यायाः निपुणशब्दे द्रष्टव्याः
पंडितः इति राजनिर्घंटः ॥

विज्ञबुद्धिः स्त्री जटामांसी इतिश
ब्दचंद्रिका ॥
विज्ञातः त्रि ख्यातः इत्यमरः ॥
विज्ञानं क्ली ज्ञानं कर्म । इति
मेदिनी कार्मणं इति हेमचं
द्रः मोक्षे धी ज्ञान मन्यत्र विज्ञा
नं शिल्पशास्त्रयोः इत्यमरः
विशेषेण सामान्येन चावबोधो
मोक्षो मुक्तिः शिल्पं चित्रादि शा
स्त्रं व्याकरणादि मोक्षे शिल्पे
शास्त्रे च या धीः सा ज्ञानं विज्ञा
नं चोच्यते यथा विशेष प्रवृत्तिः
अन्यत्र घट पटादौ याधीः सापि
ज्ञानं विज्ञानं चोच्यते ।
या सामान्य प्रवृत्तिः मोक्षेधी
र्ज्ञानं विज्ञानं च यथा ज्ञानान्मुक्ति
रिति मायाचिता च विज्ञानं तुष्टा
स्मद्धिं प्रयच्छति इति अन्यत्र य
था ज्ञान मस्ति समस्तस्य जंतो
र्विषय गोचरे इति घटत्व प्रका
रकज्ञान मिति ये केचित्प्राणि
नो लोके सर्वे विज्ञानिनो मता
इति ब्रह्मणो नित्य विज्ञानानंद रू
व्याकरणज्ञानं घटपटविज्ञान मि
त्यत्वात् इति एवं विज्ञानं
मादिकं प्रयुज्यते एव तद्विगमे
गरुत्मदादि शब्दवत्तारुन्मत

4567

शाङ्गादि गरुडे पत्तिमात्रे चव
र्तते मोक्ष इति निमित्त सप्तमी
मोक्ष निमित्तं शिल्पशास्त्रयोर्धी
र्ज्ञान मुच्यते तन्निमित्ततोऽन्या
निमित्तं यातयो धीः सा विज्ञान
मिति केचित् मोक्ष विषया मो
क्षफला धी र्ज्ञानं अन्यधीर्विज्ञा
नं क्वाप्यत्र इत्याह शिल्पशास्त्र
योरिति केचित् अवबोध इत्यध्या
हृत्य मोक्ष विषयेऽवबोधो धी
र्ज्ञानं अन्यत्र घटपटादि विज्ञानं
शिल्पशास्त्र विषये विज्ञान मि
ति केचित् जानाते स्यात् ज्ञानं
विविधं विरूपं वा ज्ञानं विज्ञानं।
इत्यमर टीकायां भरतः ॥
तत्र ब्राह्मणस्य लक्षण विशेषः
यथा क्षमा दयाच विज्ञानं सत्यंचै
व दमः शमः अध्यात्म नित्यता
ज्ञान मेतद्ब्राह्मणस्य लक्षणं ज्ञान
विज्ञानयो र्लक्षणं यथा चतुर्दशा
नां विद्यानां धारणं हि यथार्थ
तः विज्ञान मितरं विद्याधेन धर्मो
विवर्द्धते । अधीत्य विधिवद्वि
द्या मर्थं चैवोपलभ्यते । धर्म
कार्यान्निवृत्तश्चेत् तद्विज्ञान मि
ष्यते यथा स देवो भगवान्
विद्यते यत्र विद्यते सात्ता देवमरा

महादेव स्तज्ज्ञान मिति कीर्ति
तं इति कौर्मे उपरिभागे ४
अध्यायः ॥
विज्ञानपादः पुं वेदव्यासः ।
इति केचित्
विज्ञानमयकोषः पुं ज्ञानेंद्रियैः
सहिता बुद्धिः इति वेदांतसा
रः ॥
विज्ञानमातृकः पुं बुद्धः इतिहेम
चंद्रः ॥
विज्ञानिकः त्रि ज्ञानविशिष्टः ।
विज्ञः इति वैज्ञानिक शब्दटीका
यां भरतः ॥
विज्ञापनं क्ली बोधनं जानान
इति भाषा विपूर्व ज्यंत ज्ञाधातो
रनट प्रत्ययेन निष्पन्नं ॥
विज्ञाप्तिः स्त्री विज्ञापनं विपूर्व
ज्यंत ज्ञा धातोः क्ति प्रत्ययेन नि
ष्पन्ना ॥
विज्ञेयं त्रि विज्ञातव्यं विज्ञानी
यं विपूर्व ज्ञाधातो यः प्रत्ययेन
निष्पन्नं ॥
विंज्झामरं क्ली चक्षुः शुक्लक्षेत्रं ।
इति केचित् ॥
विंजोली स्त्री पंक्तिः इति त्रि
कांडशेषः ॥
विट आक्रोशे स्वने इति कवि

कल्पद्रुमः वेटति आक्रोशः केचिन्न पठ्यते स्वनः शब्दः इति दुर्गादासः ॥

विटः पुं षिड्गः इत्यमरः कामुकानुचरः धूर्तः इति भरतः ॥ कामतंत्रकलाकोविदः इतिरसमंजरी पर्वतविशेषः लवणभेदः खदिरविशेषः मूषिकः इतिमेदिनी नारंगवृक्षः । इति शब्दमाला ॥

विटंकः पुं क्ली कपोतपालिका पायरारखोप इति भाषा इत्यमरः द्वे सौधादिषु प्रांतेकाष्ठादिरचितेगृहपक्षिस्थाने कपोतान् पालयतीति कपोतपाली कास्यण इति षाष्ठार्थेकः कपोतइत्युपलक्षणं पक्षिमात्र पालिकेति बोध्यं वीन्पक्षिणःष्टंकयतिबध्नाति विटंकं टकिकव न्धेधातिशाखेण टंकयत्येनेतिवा अस्त्व न वा इति भरतः ॥

विटंककः पुं क्ली विटंकः इति शब्दरत्नावली ॥

विटपः पुं क्ली शाखोपल्लवसमुदायः तत्पर्यायः विस्तारः २ इत्यमरः स्तम्बः इति मेदिनी ॥ शाखा पल्लवः इति शब्दरत्ना । वली शुक्रवृत्तणांतरं यथा विटपंत महावीज मंतरामुष्कवंक्षणं इतिहेमचंद्रः ॥

विटपः पुं विटाधिपः पारदारिकश्रेष्ठः इति मेदिनी ॥ आदित्यपत्रः इति राजनिर्घंटः ॥

विटपी पुं वृक्षः इत्यमरः ॥ वटः इति राजनिर्घंटः ॥

विटप्रियः पुं मुद्गरवृक्षः इति राजनिर्घंटः ॥

विटमाक्षिकः पुं धातुविशेषः तत्पर्यायः ताप्यः २ नदीजः ३ कामारिः ४ ताराः ५ इतिहेमचंद्रः ॥

विटलवणं क्ली विड्लवणं इति केचित् ॥

विटिः स्त्री पीतचंदनं इतिशब्दमाला ॥

विट् शा पुं वैश्यः मनुजः इत्यमरः प्रवेशः इति विश्वः ॥

विट् ष स्त्री विष्ठा इत्यमरः कन्या इति विट्पति शब्द दर्शनात् ॥

विड्कारिका स्त्री पक्षिविशेषः । तत्पर्यायः ऊणापी २ गोरटी ३ गोकिराटिका ४ इति भूरिप्रयोगः विड्मारिका ५ इतिहारावली ॥ ॥

4569

विड्खदिरः पुं विष्ठावद्दुर्गन्धखदिरः गयावावला इति भाषा तत्पर्यायः अरिमेदः २ इत्यमरः हरिमेदः ३ असिमेदः ४ इतिशब्दरत्नावली दरिमेदः ५ कालस्कंधः ६ अरिमेदकः ७ अस्य गुणाः कषायत्वं उष्णत्वं मुखदंतगदास्र कंडू विष श्लेष्मकृमि कुष्ठव्रण ग्रह नाशित्वंच इति भावप्रकाशः राजनिर्घंटोक्तगुणपर्यायौ अरिमेद शब्दे द्रष्टव्यो

विड्चरः पुं ग्रामसूकरः इत्यमरः ॥

विड्पतिः पुं जामाता । इति जटाधरः ॥

विड्सारिका स्त्री पक्षिविशेषः गुयासालिक इति भाषा इति जटाधरः ॥

विठरः पुं वाग्मी इति संक्षिप्तसारोणादिवृत्तिः ॥

विड आक्रोशे इति कविकल्पद्रुमः वेडति शब्दं वली इतिदुर्गादासः ॥

विडं क्ली लवणविशेषः विट्लवण इति भाषा यथा पाक्यविडे च कृतके द्वयं इत्यमरः द्वे समुद्रतीरासन्नभवा लवणमृत्तिका पाचयित्वा निष्पादिते लवणे विड्लवणे इति केचित् कृतके कृत्रिमे पाक्य विड्लवणयो भेदे ऽपि कृतकत्वात् पक्य मिति स्वामी पच्यते इति पाक्यं ऋ पच अषो पाके हलस्योसा रिति ण्यात्व जोर्घितीतिकः पाकेन निष्पादित मिति स्मो वा वेडति भिनत्ति विडं क्रिशकृषि इत्यडःत्वात्कः इतिभरतः तत्पर्यायः विड्गंधं २
काललवणं ३ विड्लवणं ४ इतिरत्नमाला द्राविडकं ५ खंडं ६
कृतकं ७ क्षारं ८ आसुरं ९ सुपाक्यं १० खंडलवणं ११ धूर्तं १२ कृत्रिमकं १३ अस्य गुणाः उष्णत्वं दीपनत्वं रुच्यत्वं वाताजीर्णशूल गुल्म मेह नाशित्वंच इति राजनिर्घंटः अपिच विडं सक्षार मूर्द्धाधः कफ वातानुलोमने ऊर्द्धं कफ मधोवातं संचारयेदितर्थः दीपनं लघु तीक्ष्णोष्णं सूक्ष्मं रुच्यं व्यवायिच विबंधानाहविष्टंभहृद्गौरव शूलनुत् इति भावप्रकाशः अन्यच्च विडलवणमल्पकोदि वक्रे वेल विबद्धंतं मलवातामविष्टम्भ शूलाटोपविवन्धनुत् इति राजवल्लभः ॥

विडंगं पुं क्ली स्वनामख्यातौष
धं तत्पर्यायः वेल्लं २ अमोघा
३ चित्रतंडुला ४ तंडुलः ५ क्रिमि
घ्नः ६ इत्यमरः रसायनः ७ पाव
कः ८ भस्मकं ९ इति जटाधरः
वेल्लः १० मोघा ११ तंडुलः १२
इतिशब्दरत्नावली जंतुघ्नं १३
केवलं १४ इति रत्नमाला विडं
गा १५ कृमिहा १६ चित्रा १७ तडु
ला १८ तंडुलीयका १९ वातारि
तंडुला २० जंतुघ्नी २१ मृगगामि
नी २२ केराली २३ गह्वरा २४
कापाली २५ वराहः २६ चित्र
बीजा २७ जंतुहंत्री २८ अस्यगुणाः
कटुत्वं उष्णत्वं लघुत्वं वातक
फार्त्यग्निमांद्यारुचि भ्रांति कृमि
दोषविविनाशित्वंच इति राज
निर्घंटः रूक्षतिक्तत्वं क्रिमि विष
नाशित्वंच इति राजवल्लभः विडं
गं कटुतीक्ष्णोष्णं रूक्षं वह्निकरं
लघु शूलाध्मानोदर श्लेष्म क्रि
मि वातविबंधनुत् इति भावप्र
काशः ॥
विडंगः त्रि अभिज्ञः । इति
मेदिनी ॥
विडम्बनं क्ली स्त्री अनुकरणं य
था

नवेदकश्चिद्भगवंश्चिकीर्षितं त
वेहमानस्य नृणां विडम्बनं न
यस्य कश्चिद्दयितोस्ति कर्हिचि
द्द्वेष्यश्च यस्मिन्विषमा मतिर्न्नृ
णां इति श्रीभागवते १ स्कंधे
८ अध्यायः प्रतारणं यथा जन्म
कर्मच विश्वात्मनजस्याकर्तुरात्मनः
तिर्यङ्नृषिषु यादःसु तदत्य
न्तविडंबनं इति तत्रैव ॥
विडम्बितं त्रि कृतविडम्बना त
त्पर्यायः वात्तः २ आकुलः ३
दुर्गतः ४ इति शब्दमाला ॥
विडारकः पुं विडालः इतिशब्द
रत्नावली ॥
विडालः पुं नेत्रपिंडः इति मेदि
नी नेत्रौषधविशेषः इति भाव
प्रकाशः स्वनामख्यातपशुः वि
ल्ली इति हिन्दीभाषा तत्पर्यायः
ओतुः २ मार्जारः ३ वृषदंशकः ४
आखुभुक् ५ इत्यमरः बिलालः
६ बिलालः ७ इति तट्टीका दी
प्ताक्षः ८ नक्तंचारी ९ जाहकः १०
विडारकः ११ इति शब्दरत्नावली
त्रिशंकुः १२ निकायः १३ मेना
दः १४ सूचकः १५ इतिजटाधरः
मूषिकारातिः १६ शालावृकः १७
मायावी १८ दीप्तलोचनः १९

इतिराजनिर्घंटः ॥
विडालकं क्ली हरितालं इति
हेमचंद्रः ॥
विडालकः पुं विडालः नेत्रबहि
र्लग्नऔषधविशेषः यथा अथ
विडालकविधिः विडालकोवहि
र्लेपोनेत्रे पक्ष्मविवर्जिते तस्य
मात्रा परिज्ञेया मुखालेपविधान
वत् मुखालेपो यथा अंगुलस्य
चतुर्थांशो मुखलेपः कनिष्ठिकः
मध्यमस्तु त्रिभागः स्यादुत्तमोऽर्द्धां
गुलो भवेत् स्थितिकालोपितं
स्योक्तो यावल्कल्को न शुष्यति ।
तेनापि गुणहीनः स्यात्तथा ह
दूषयति त्वचं स यथा । यष्टी
गैरिकसिन्धूत्थ दार्वी तार्क्ष्यैःस
माशकैः जलपिष्टैर्वहिर्लेपः
सर्वनेत्रामयापहः तार्क्ष्यं रसांज
नं रसांजनेन वालेयः पथ्याथ
विल्वदले अपि वचा हरिद्रा वि
श्वैर्वा तथा नागर गैरिकैः इति
भावप्रकाशः ॥
विडालपदः पुं तोलकद्वयपरि
माणं यथा तोलौ द्वौ पिचु २
रक्षश्च स्वर्णं कडवग्रहः विडा
लपदकर्षौ च पाणीतल मुष्टय
श्च इतिशब्दमाला मार्जारचरणे
क्ली

विडालपदकं क्ली कर्षपरिमाणं
इतिवैद्यकपरिभाषा ॥
विडाली स्त्री विदारी इतिराज
निर्घंटः ॥
विडीनं क्ली खगगतिविशेषः
यथा डीनं प्रडीनं उड्डीनं संडी
नं परिडीनकं विडीन मवडीन
ञ्च निडीनं डीनडीनकं गतागत
प्रगतित संपताद्याश्च पत्त्रिणां
तिगभेदा पतिगद्वे कूलायो
नीड मस्त्रियां इतिजटाधरः
विडुलः पुं वेतसवृक्षः इतिहे
मचंद्रः ॥
विडोजाः स इंद्रः इत्यमरः ॥
विडौजाः स पुं इंद्रः इति भर
तीयद्विरूपकोषः ॥
विड्श पुं वेष्टनः यथा विड्वि
ड् विशो विशः इति मुग्धबोध
व्याकरणं ॥
विड्ष स्त्री विष्ठा इति विड्
गंधादिशब्द दर्शनात् ॥
विड्गंधं क्ली विड्लवणं इ
तिरत्नमाला ॥
विड्जः त्रि विष्ठाजातः विषपू
र्वक जन धातो ड प्रत्यये
नेनिष्पन्नः ॥
विड्लवणं क्ली विडं विट्ल

ण। इतिभाषा इतिरत्नमाला ॥
विड्वराहः पुं ग्राम्यसूकरः इ
तिजटाधरः ॥
वितंसः पुं वीतंसं मृगपक्षि
णां बंधनोपकरणं इत्यमरटी
कायां भरतः ॥
वितंडा स्त्री स्वपक्षस्थापनापर
पक्षखंडनः इत्यमर भरतौ ॥
कच्छीशाकः शिलाकृयः कस्वी
री इति मेदिनी दर्वी इतिहा
रावली ॥
विततं त्रि विस्तृतं वीणादि
वाद्यं इत्यमरे ततशब्दार्थदर्श
नात् वितत्तिः स्त्री विस्तारः विपू
र्वे तनधातोः क्ति प्रत्ययेन निष्प
न्ना वितथं त्रि मिथ्या इत्यमरः
वितथ्य त्रि असत्यं वितथश
ब्दात्स्वार्थेस्य प्रत्ययेन निष्पन्नं।
वितद्रुः स्त्री नदीविशेषः सात
पंजाबाख्ये देशे वर्त्तते इत्युणा
दिकोषः ॥
वितरणं क्ली दानं इत्यमरः ॥
वितर्कः पुं ऊहः संशयः इति
मेदिनी ज्ञानसूचकः इति शब्द
रत्नावली आहो उताहो किमु
तकिंकिमु उत एते षट् वि
कल्पवितर्कार्थे यथा स्यादि शब्दो

कुकथुः इति अहो कुत्सादि च
विकल्पे विस्मयेप्यहो इति रुद्रः
किमुक्तं तं उतकुत्सादि चका
रात् उताहोस्वित् आहोस्विदि
ति च यथा भारते उताहोस्वि
द्रुवेझाजा नलः परपुरंजयः इति
आहोस्विन्मुखे मिति भारवौ इति
भरतः ॥
वितर्कणं क्ली वितर्कः इतिश
ब्दरत्नावली ॥
वितर्द्दी स्त्री वेदिका इति शब्द
रत्नावली ॥
वितर्द्दिः स्त्री वेदिका इत्यमरः
वितर्द्दिका स्त्री वेदिका इतिश
ब्दरत्नावली ॥
वितर्द्धी स्त्री वेदिका इत्यमरटी
कायां भरतः ॥
वितलं क्ली पातालभेदः यथा
अतलेवितलेचैव वितलेच गभस्ति
मत् तलं सुतलं पातालेपाताला
दि ह सप्त वै ॥ इति
शब्दरत्नावली ॥
वितस्तिः पुं स्त्री विस्तृतसकनि
ष्ठांगुष्ठः बित्ता इति भाषा तत्पर्या
यः द्वादशांगुलः २ । इत्यम
रः ॥
वितानं क्ली वृत्तिविशेषः इति

मेदिनी अवसरः इति विश्वः
वितानः पुं क्ली क्रतुः विस्तारः
उल्लोचः चाँदोया इति भाषा
इत्यमरः अस्य पर्याय अंदात
तपशब्दे द्रष्टव्यः ॥
वितानः त्रि तुच्छः मंदः इत्य
मरः शून्यः इति धरणी ॥
वितानकः पुं क्ली चंद्रातपः।
इति शब्दमाला ॥
वितानकः पुं माङ्गलः इति
राजनिर्घंटः ॥
वितानमूलकं क्ली उशीरं इति
राजनिर्घंटः
वितुन्नं क्ली सुनिषण्णकं इत्यम
रः शैवालकं इति मेदिनी॥
वितुन्नकं क्ली धान्यकं तुत्थं।
[illegible] इत्यमरः ॥
वितुन्नकः पुं तामलकी इत्य
मरः ॥
वितुन्ना स्त्री भूम्यामलकी इ
तिवितुन्निका ति राजनिर्घंटः
वित्त त क त्यागे इति कविक
ल्पद्रुमः वित्तयति वित्तापयति
इति दुर्गादासः ॥
वित्तं क्ली धनं इत्यमरः ॥
वित्तः त्रि विचारितः विज्ञातः
इत्यमरः लब्धः इति टीका।

यां रामाश्रमः ॥
वित्तदः त्रि धनदाता वित्तंददा
ति यदृत्यर्थे उ प्रत्ययेन निष्पन्नः
वित्तिः स्त्री विचारः लाभः स
म्भावना इति मेदिनी ज्ञानं ।
इति हेमचंद्रः ॥
वित्तेशः पुं कुवेरः यथा त्वं
ब्रह्मा हरिहर संज्ञित स्त्वमिन्द्रो
वित्तेशः पितृपतिरंबुपः समीरः
सोमोऽग्निः गगणं महीधरादिरूपः
किं स्तव्य सकलतर स्वरूपधा
म्नः इतिमार्कंडेयपुराणे अदिति
कृत सूर्यस्तवः ॥
वित्रस्तः त्रि त्रासयुक्तः विपूर्वत्रस
धातोः क्त प्रत्ययेन निष्पन्नः ॥
वित्रासः पुं भयं विपूर्वत्रसधातो
र्भावे घ ञ प्रत्ययेन निष्पन्नः
वित्सनः पुं वृषभः इति शब्दचं
द्रिका ॥
विथ ऋ ङ याचे इति कवि
कल्पद्रुमः वेथते इति दुर्गादासः
विथुरः पुं चोरः राक्षसः ।
इत्युणादिकोषः ॥
विथ्या स्त्री गोजिह्वा इति शब्द
चंद्रिका ॥
विद ङ क म चेतनाख्यान वास
वादे इति कविकल्पद्रुमः चेत

नाज्ञानं वादः स्थैर्य कउ॰ वेद
यते शास्त्रं धीरः जानातीत्यर्थः
वेदयते स्वार्थं लोकः आख्याती
त्यर्थः वेदयते तीर्थे साधुर्वसती
त्यर्थः वेदयते हृत्तः स्थिरः स्या
दित्यर्थः न वेदयति वेदयते।
केचित्तु वादं न पठंति चेतना
स्थाने वेदनेति पठित्वा वेदयते
हृद्वः व्यथते इत्यर्थः इत्युदाहरंति
अस्माच्च परस्मैपद ममम्यमाना
जिता सयत्नेन निवेदयिष्यत इति
निवेदनं करोतीत्यर्थेञ्नो समाख्य
ते इतिदुर्गादासः ॥
विद लृ प्रा प ञो लाभे इति
कविकल्पद्रुमः लृ अविदत् पश
ञविंदति विंदते ञो वेत्ता इति
दुर्गादासः ॥
विद रु॰ यो मीमांसे इतिकवि॰
कल्पद्रुमः मीमांसो विचारणं ।
रु॰ यविते शास्त्रं धीरः ञो वेत्ता
इतिदुर्गादासः ॥
विद य ञो रु॰ भावे इतिकवि
कल्पद्रुमः भावः सत्ता स चेहवि
द्यमानतैव यरु॰ विद्यते विस्तुः
ञो वेत्ता इति दुर्गादासः ॥
विद ल मतौ इति कविकल्पद्रुमः
ल वेत्ति इतिदुर्गादासः ॥

विदग्धः त्रि नागरः इतित्रिकां
डशेषः निपुणः इति राज
निर्घंटः पंडितः इति शब्द
रत्नावली ॥
विदग्धता स्त्री विदग्धत्वे विद
ग्धस्यभाव इत्यर्थे प्रत्ययेननिष्प
न्नाविदग्धा स्त्री परकीयांतर्गत
नायिकाभेदः यथा गुप्ताविदग्धा
लक्षिता कुलटा अनुशयाना मुदि
ताप्रभृतीनां परकीयाया भेदा
न्तर्भावः अस्यालक्षणं वाक्चा
ग्रालयुक्तत्वं साच द्विविधावा
ग्विदग्धाक्रियाविदग्धाच प्रथ
मा यथा निबिडतम तमालमति
वल्ली विचकिलराजि विराजितो
पकंठे पथिकसमुचित स्वाद्य
तीव्रे सवितरितत्र सरित्तटे निवा
सः द्वितीयायथा दासाय भवन
नाथे वदरीमपनेतु मादिशति
हेमंते हरिणाक्षी पयसि कुठारं
विनिक्षिपति इतिरसमंजरी ॥
विदः पुं पंडितः विदधातोः क
र्तरिक प्रत्ययेन निष्पन्नः ॥
विदंशः पुं अवदंशः इति राज
निर्घंटः ॥
विदध्यः पुं योगी कृती । इति
मेदिनी ॥

विदन्त त्रि पंडितः विदधातोश
तृ प्रत्ययेन निष्पन्नः ॥
विदरं स्त्री विस्फारकं फणी
मनसा इति भाषा इतिशब्दचंद्रि॰
का विदरः पुं विदरणं फाटन॰
इतिचेदरण इतिच भाषा तत्पर्या
यः स्फुटनं १ भिदा २ इत्यमरः।
दारणं ३ विदारणं ४ इतिशब्द
रत्नावली ॥
विदर्भः पुं स्त्री कुंडिननगरं ।
इति हेमचंद्रः सत वंगदेशस्यद
क्षिणपश्चिमे वर्त्तते अधुना वड
नागपुर इतिख्यातः ॥ अथ
भीम सुतावलोकनैः सफलं कर्त्त
मह स्तदेव सः क्षिति मंडल मंड
नायितं नगरं कुंडिन मंडजो य
यौ इति पूर्व नैषधे २ सर्गः ॥
विदर्भजा स्त्री अगस्त्यपत्नी त
त्पर्यायः कौशीतकी १ लोपामु
द्रा २ इति त्रिकांडशेषः दम
यन्ती यथा धृत लांछन गोमया.
चलं विधु मालेपन पांडुरं वि॰
धिः भ्रमयत्युचितं विदर्भजाननं॰
नीराजन वर्द्धमानकं इतिपूर्वनैष
धे २ सर्गः रुक्मिणीच ॥
विदर्भराजः पुं विदर्भदेशाधि
पतिः तस्य नामांतरं भीमराजः

यथा स्मरो पतयोपि भक्षणांनस
प्रभु विदर्भराजं तनुजा मयाचत
त्यजंत्यसून्शर्मच मानिनो वरंत्य
जंति न त्वेक मयाचित व्रतं ।
इति पूर्व नैषधे १ सर्गः सजय
त्यरिसार्थ सार्थकीकृत नामा किल
भीमभूपतिः यमवाप्य विदर्भभूः
प्रभुः हसति द्यामपि शक्र भर्त्तृ
कां इति पूर्व नैषधे २ सर्गः
विदर्भसुभ्रूः स्त्री दमयती यथा
विदर्भसुभ्रूः स्तन तंगतामये त्व
दानिवापश्रपदलं तपस्यतः फला
नि भूतस्य ययानयोगुतान्सदा
द्विमे दोहद धुपिनि द्रुमे इतिपूर्व
नैषधे १ सर्गः ॥
विदर्भाधिपतिः पुं कुंडिनपतिः
सच भीष्मकराजः रुक्मिणीपि
ताच यथा तं ये विदर्भाधिपतिः
समभ्येत्याभिवाद्यच निवेशयामा
स मुदा कल्पितान्य निवेशने ।
इति श्रीभागवतीय दशमस्कंधे ५२
अध्यायः अपिच राजा सकुंडिन
पतिः पुत्र स्नेह वशानुगः ।
शिशुपालाय स्वां कन्या दास्यन्
कर्माण्यकारयत् इति तत्रैव ॥
विदलं स्त्री द्विधाकृतकलाया
दिदालि इति भाषा स्वर्णादेः

वयवः दाडिमकल्कः वंशादिकृ
तपात्रविशेषः इति क्लीवलिंग
संग्रहे अमर भरतौ ॥
विरलः पुं रक्तकाचनः । इति
शब्दरत्नावली पिष्टकः । इति·
शब्दचंद्रिका ॥
विदला स्त्री त्रिवृत् इति राज
निर्घंटः पत्रशून्या यथा विशी·
र्णांविदला कृत्वा स्थूला द्विधा·
कृता कृमिदष्टा च दीर्घा च समि
धो नैवकारयेत् इति तंत्र ॥
विदा स्त्री ज्ञाने बुद्धिः इतिमे
दिनी ॥
विदायः पुं गमनानुमतिः यथा
त्वया वा चंपकवनं गच्छवाति
इसुंदरि त्वया ग्रहंच यास्यामि
विशिष्टं कार्यं मस्ति मे विदायं
देहि संप्रीत्या त्वां मां प्राणव
ल्लभे इति ब्रह्मवैवर्ते जन्मखंडे
श्रीराधां प्रति श्रीकृष्णवाक्यं ॥
विदारः पुं जलोच्छ्वासः ॥ विदा
रणं इति मेदिनी युद्धं इति हे
मचंद्रः ॥
विदारकं क्ली वज्रक्षारं । इति·
राजनिर्घंटः ॥ ।
विदारकः पुं जलमध्यस्थितवृक्ष
शिलादिः तत्पर्यायः कूपकः २

इत्यमरः जलवंधकः ॥ इतिश
ब्दरत्नावली शुष्कनद्यादौ जला
वस्थानार्थं गर्तः इति सर्वधरः ॥
अतएव कूपा इव कूपकाः उ
त्सिताश्च कूपा इतिवा विदारय
न्तीति विदारकाः जलांतर्गतास्त
रुशिलादयोऽज्ञानाल्लोकादि वि
दारकाः कूपकाः इति सांकः
वृक्षस्तत्र इति भरतः ॥
विदारणं क्ली विदलनं भेदः ।
इति मेदिनी मारणं इतिशब्द
रत्नावली ॥
विदारणः पुं स्त्री युद्धं इतिमे
दिनी ॥
विदारणः पुं कर्णिकारवृक्षः इति
शब्दचंद्रिका ॥
विदारिका स्त्री शालपर्णी इति
शब्दरत्नावली ॥
विदारिणी स्त्री काश्मरी इतिरा
जनिर्घंटः ॥
विदारी स्त्री शालपर्णी । इति
मेदिनी भूमिकूष्मांडः । तत्प
र्यायः क्षीरशुक्ला २ इक्षुगंधा ३
क्रोष्ट्री ४ इत्यमरः विदारिका ५
स्वादुकंदा ६ सिता ७ शुक्ला ८
शृगालिका ९ वृष्यकंदा १० विडाली
११ वृष्यवल्लिका १२ भूकूष्मांडी १३

स्वादुलता १४ गजेष्टा १५ वारिव
ल्लभा १६ गंधफला १७ अस्या
गुणाः मधुरत्वं शीतलत्वं गुरुत्वं·
स्निग्धत्वं अस्र पित्तनाशित्वं ।
कफकारित्वं पुष्टि बलवीर्यवि
वर्द्धनत्वंच इति राजनिर्घंटः ॥
विदारी वात पित्तघ्नी वृष्या बल्या
रसायनी इति राजवल्लभः ॥
अष्टादश प्रकार कंठरोगांतर्गत
रोगविशेषः यथा अथ विदारी
माह सदाह तोदं श्वयथु स्ताम्र
मन्तर्गले इति वीर्णमांसं पि
त्तेन विद्याद्वदने विदारी पार्श्ववि
शेषात्सत येन शेते ॥ पा
र्श्वे विशेषात्स्व येन शेते ।
स पुरुषो येन पार्श्वेन विशेषा·
द्वाहुल्येन शेते तस्मिन्पार्श्वे सा
विदारी भवति इत्यर्थः इति भा
वप्रकाशः अस्याश्चिकित्सादिरो
हिण्गेशब्दे द्रष्टव्यं ॥
विदारी त्रि विदारणकर्त्ता विपू
र्वहृ धातोः कर्त्तरि णिन् प्रत्यये
न निष्पन्नः ॥
विदारीगंधा स्त्री शालपर्णी इ·
त्यमरः ॥
विदारुः पुं कृकचपादः कृक
लासः इति हारावली ॥

विदारि क्ली दाहजनकद्रव्ये अ
स्यगुणो पित्त मस्रकारित्वं इति
राजवल्लभः ॥
विदिक् श स्त्री दिशोर्मध्ये अ
ग्निनिर्ऋति वायु ईशानकोणाच
तुष्टयं तत्पर्यायः अपदिशा २ इत्य
मरः प्रदिक् इति जटाधरः ॥
विदिशं ४ इति शब्दरत्नावली
कोणः ५ राजनिर्घंटः ॥
विदिक्चंगः पुं हरिद्रांगपक्षी ।
इति शब्दचंद्रिका ॥
विदितं त्रि अवगतं इत्यमरः ॥
अर्थितं इति मेदिनी उपगमः
इति शब्दरत्नावली ॥
विदितः पुं कविः इति जटा
धरः ॥
विदिथः पुं पंडितः योगी ।
इतिशब्दरत्नावली हस्तात्तरमेदि
नीच मुद्रांकितमेदिन्या हेमचंद्रे
चविदथ इति पाठः ॥
विदीर्णः त्रि कृतविदारणः चेरा
इति भाषा यथा पितरकुक्षुः
श्राद्धानि नोऽपिबुभुजे प्रसभंत
नूजे दंतानि तीर्थे समये प्यपि
वत्तिलाभु तस्योदरान्नरव विदीर्ण
वपाद्य आर्च्छत्तस्मै नमो नृहरये
ऽखिल धर्मगोप्त्रे ॥ इति श्रीम

गवते ७ स्कंधे ८ अध्यायः अपि
च अदीपे त्तिपती समस्तजगती
सस्लोक शोकाम्बुधौ गाधासंभ्र
तकाञ्जल मसौ चुक्रे तथा क्र
न्दनं येन सन्दनेनेमि निर्मित
महासीमंत दंभादिदं हा सर्व
सहयापि निर्भर मध्यहरादिदीर्णा
भुवा इत्युज्वलनीलमणिः ॥
विडः पुं गजकुंभद्वयमध्यभागः
इत्यमरः जानंति इतिक्रियाप
दं ॥
विडरः पुं नागरः धीरः कौ
रवाणां मंत्री इति मेदिनी ॥
ज्ञातरिति इत्यमरः ॥
विडुरोत्पत्ति यथा हेतेः प्रज
सवे भ्रातर्मीयोक्तो वादरायः
णः धृतराष्ट्रंच पांडुंच विडरं
चाप्यजीजनत इतिश्रीभागव
ते ९ स्कंधे २२ अध्यायः ॥
विडलः पुं वेतसः अम्बुवेतसः
इत्यमरः गंधरसः इतिरत्नमा
ला ॥
विडुषी स्त्री पंडितास्त्री इतिमु
ग्धबोधव्याकरणं ॥
विडुष्मती त्रि पंडितवती यथा
घो वीचमातिनिव पन्नगपुरी प्रो
घादिनेवाभवघनेकेन विडुष्मती

वसुमती मुखेन संख्यावती ।
इति वोपदेवप्रसंशा ॥
विहूः पुं विडः गजकुम्भयोर्मध्य
मरटीका ॥
विहूरं त्रि अतिहूरस्थदेशादिय
था मासानष्टौ तव जलधरोत्कं
ठया मुक्तकंठः सारंगोऽसोयुग
पातमिव यामिनायातिकृष्ठात
आम्भां तावन्नव जलकणाभा
जनत्वे विहूरे वर्षारंभ प्रथमसम
ये दारुणो वज्रपातः इति चात
काष्टकं ॥
विहूरगः त्रि अतिहूरगंता विहू
रेगच्छतीत्यर्थेड प्रत्ययेन निष्पन्नः
विहूरजं क्ली विहूरदेशाजरत्ने वै
हूर्यमणिः अति हूरजाते त्रि ॥
इति केचित् ॥
विहूरथः पुं राजविशेषः यथा
मनोक्त दत्तपुत्रस्य द्वादशास्याल
ज्ञान्यरण्ड देववानुपदेवश्च देवश्रे
ष्ठो विहूरथः मित्रवान्मित्रदेवश्चमि
त्रविन्दश्च वीर्यवान् ।
मित्रवाहः सवर्चाश्च दत्तपुत्र म
नोःस्तुताः इति गारुडे ८७॥
अध्यायः ॥
विहूरभूमिः स्त्री विहूरदेशः यत्र
वैहूर्यमणि रुत्पद्यते यथा ।

तया इहित्रा स्ततरांसविशीस्फुरन
प्रभामंडलया चकासे विहूरभूमि
र्निर्नवमेघ शाद्दुभिन्नया रत्नश
लाकयेव इतिकुमारसंभवः ।
विहूराद्रिः पुं विहूरदेशस्थपर्वतः
इति जटाधरः ॥
विहूषकः त्रि कामुकः तत्पर्या
यः षिङ्गः १व्यालीकः २ पहम
नः ३ कामकेलिः ४ पीठकेलिः ५
पीठमर्दः ६ भविलः ७ छिडरः ८
विटः ९ इति त्रिकांडशेषः चा
टुवटुः १० वासन्तिकः ११ केलि
किलः १२ वैहासिकः १३ प्रहासी
१४ प्रीतिदः १५ इति हेमचंद्रः ॥
परनिन्दाकरः इति मेदिनी ॥
तत्पर्यायः । खलः २ खनकः ३
अभीकः ४ क्रूरः ५ खवकः ६ कं
टकः ७ नागः ८ मलिनास्यः ९
परद्वेषी १० इतिशब्दमाला । चतु
र्धानायकोतर्गतनायकविशेषः
तस्य लक्षणं यथा अंगादि वैकृ
तैर्हास्यकारी विहूषकः अस्यो
दाहरणं यथा अंगादि वैकृतैर्
हास्यकारी विहूषकः अस्योदाहृ
तीयनीरजमुखीशायनोपकंठस्थ
ठितोस्मि ऊचकंचुक मोचनाय अ
आंतरेकुरुकारि विहूषकेणमात
तन लहणा ऊकुरुट कंठनोदः र
समंजरी

विहूषणं क्ली विशेषेणहूषणं
विपूर्वे ध्यंत दुषधातो रनट्प
त्ययेन निष्पन्नं ॥
विदेशः पुं परदेशः देशांत
रः यथा अशोचकालाभ्यंतरे
विदेशस्थाशौचश्रवणे शेषा
हैः शुद्धिः इति शुद्धितत्वं अन्य
च्चकोतिभारः समर्थानां किंहूरं
व्यवसायिनां कोविदेशः सवि
द्यानां कःपरः प्रियवादिनां ।
इति चाणक्यं अन्यतद्देशान
रशहे द्रष्टव्यं ॥
विदेहः पुं जनकान्वयभूमिपः
कायशून्येत्रि इति मेदिनी ॥
निमि राजस्य विदेहत्व कारणं
यथा असमाप्ते तेता यज्ञे वशि
ष्ट आगमद्दिवः तंदृष्ट्वा कुपितः
प्राह प्रत्याख्यातोस्मि पार्थिव ॥
यस्मात्तस्मात्त्वपेयं त्वं विदेह
स्त्वं भविष्यसि इति वह्निपुरा
णाहृयंवशसमासाध्यायः ॥
विदेहा स्त्री मिथिला इति हेम
चंद्रः ॥
विद्धः त्रि छिद्रितः इत्यमरः ॥
विद्धः सहशः वाधितः इति
मेदिनी ताडितः इत्यजयपा
लः ॥

विद्धकर्णः पुं विद्धकर्णी इ
तिभरतद्विरूपकोषः ॥
विद्धकर्णा स्त्री विद्धकर्णी इ
ति भरतद्विरूपकोषः ॥
विद्धकर्णिका स्त्री विद्धकर्णी
इतिशब्दरत्नावली ॥
विद्धकर्णी स्त्री लताविशेषः आ
कनादि इति भाषा तत्पर्यायः
पाठा २ अम्बष्ठा ३ स्थापनी ४
श्रेयसी ५ रसा ६ एकाष्ठीला ७
पापचेली ८ प्राचीना ९ वनति
क्तिका १० इत्यमरः आविद्धकर्णी
११ अविद्धकर्णी १२ इति तट्टीका
आविद्धकर्णिका १३ विद्धक
र्णिका १४ इति शब्दरत्नावली।
अस्याः पाठाशब्दे द्रष्टव्यं ॥
विद्यमानः त्रि वर्त्तमानः इतिस
स्मावृटीकायां भरतः ॥
विद्या स्त्री दुर्गा इति शब्दर
त्नावली गणिकारिका इति श
ब्दचन्द्रिका ज्ञानं तत्तु मोक्षधीः
इति जटाधरः परमात्मम पुरु
षार्थ साधनीभूता विद्या ब्रह्म
ज्ञानरूपा इति नागोजीभट्टः मन्त्रः
यथा शारदायां श्रोतेविद्यास्तनय
याः स्त्रीमर्द्दिनि ठद्वयं अष्टा
क्षरी समाख्याता विद्यामहिषम
र्द्दिनी विद्यासारे प्रणवाद्यां ज
पेद्विद्यां मायाद्यां वा जपेत्सुधीः
महिषमर्द्दिनीमन्त्रः दशाक्षरी स
माख्याता विद्या त्रिभुवनेश्वरी।
प्रणवेच तथा माया भवेद्विद्या
पुनर्दश कामं प्रणव मित्येकेम
वेद्विद्या पुन र्दश दुर्गामन्त्रः वा
ग्वीजाद्या यदा विद्या वागीशत्व
प्रदायिनी कामाद्याच यदा वि
द्या सर्वकाम प्रदायिनी तारमा
यादिका विद्या भोग मोक्षकदा
यिनी यद्बीजाद्या भवेद्विद्यातद्वी
जेनेगकल्पना मन्त्राणांमन्त्रः।
इति तन्त्रसारः शास्त्रं तत्तु अष्टा
दशविधं यथा शिक्षा १ कल्पः २
व्याकरणं ३ निरुक्तं ४ ज्योतिषं ५
छन्दः ६ ऋग्वेदः ७ यजुर्वेदः ८ सा
मवेदः ९ अथर्ववेदः १० मीमां
सा ११ न्यायः १२ धर्मशास्त्रं १३
पुराणं १४ आयुर्वेदः १५ अर्थशा
र्थशास्त्रं १८ यथा विष्णुपुराणं।
अंगानि वेदाश्चत्वारो मीमांसा
न्याय विस्तरः धर्मशास्त्रं पुराणं
च विद्याह्येताश्चतुर्दश आयुर्वेदो
धनुर्वेदो गांधर्वश्चेति ते त्रयः
अर्थशास्त्रं चतुर्थंच विद्याह्यष्टा
दशैवताः ॥ इति

प्रायश्चित्ततत्वं ॥ नीचार
पुत्तमा विद्या ग्राह्या यथाश्र
द्दधानः शुभां विद्या माददीता
वरादपि अन्त्यादपि परं धर्मं स्त्री
रत्नं दुष्कुलादपि इति मानवे २
अध्याय विद्या प्रशंसा यथा
ये वाल भावान्न पठन्ति विद्या
मेयौवनस्था अथना प्रदाराः ते
शोचनीया इह जीवलोके मनु
ष्यरूपेण मृगा श्चरंति भोजने
भोजनं विना नकुर्योक्षासेवकः
सहस्रमपि विद्यार्थे व्रजेतारुड
वेगवान् येवालभावान्न पठंति
विद्यां कामातुरा यौवनष्टचित्ताः
ते वृद्धकाले भूषमानाः संदह्य
मानाः शिशिरे यथाब्जाः ॥
माता वैरी पिता शत्रु र्वालो येन
न पाठितः सभा मध्ये न शोभं
ते हंस मध्ये वको यथा विद्या
नामनरूप रूप मधिकं प्रछन्न
मंतर्द्धनं विद्या साधुजनप्रिया शुचि
करी विद्या गुरू देवता विद्याभो
ग्य यशः कुलोन्नतिकरी विद्यो
गुरूणां गुरुः विद्या वंधुजनार्तिना
शनकरी विद्या परं देवता विद्या
भाग्य यशः कुलोन्नतिकरी विद्या
विहीनः पशुः इदेह चाप्यन्तरे दुःखं
तमं चैव न इष्यते अशेषं हरणीयं
च विद्या न क्रियते।
पदैः इति गारुडे ११ । ११५
अध्याये ॥ अथ विद्या दान
फलं मत्स्य देव्या गदरे नित्यं
विद्यादानं प्रवर्त्तयेत् सम्भवेत्स
र्वलोकानां मूल्यः प्रजापद
व्रजेत् विद्यादाने प्रवक्ष्यामि ये
नत्वप्ष्यति मानवः लिख्यते दीयते
येन विधिना तं शृणुष्वनः सि
द्धांतमोक्षशास्त्राणि वेदान्तस्वगा
दि साधकान् तदंगानीति हासा
नि देयाधर्मं विवृद्धये गारुडंवा
लतंच भूततन्त्राणि भैरवं शास्त्रा
णि पठना द्दानात् मानवः फल
दान्यपि ज्योतिषं वैद्यशास्त्राणि
कल काव्यं स्वभावतः दानाद्
रोगमाप्नोति गंधर्वे लभते पदं
विद्याभ्यो वर्त्तते लोको धर्माध
र्मेहृदये तस्माद्विद्या सदादेया
दृष्टा दृष्ट फलार्थिभिः महीदा
नेच गोदाने हेमवस्त्रतिलाजलं
धान्यदीपान्नदानेच महादानानि
दानस्य इदान्न क्षीयते दानं दीप
दानं नराधिप विद्यादिहि मवाप्नो
ति दीयमानापि नित्यशः पको
द्धारेणभूदाने दत्तं भवति भूमि
प नहित हिद्यते भूय देह पाता
दनंतरं ॥
विद्यादानंनतहल्स प्रकथा दशाधा

भवेत् शतधा कोटिधा गच्छेदि
हामुत्र च पारग राज्ञा तस्कर
दानानि क्षीयन्ते विद्याकेनापि
क्षीयते विद्या दानात्परं दानं न
भूतं न भविष्यति विद्या दानेन
दानानि महान्ति तस्मात् बुद्धिमान्
विद्याप्रवर्त्तनं यत्र सदमना
मयं शृणुवन्नुत्पद्यते भक्ति र्भ
क्त्या गुरुमुपासते स च विद्याम
मान् वक्ति विद्या युक्त्या शितान्ते
प विद्याविवेकबोधेन शुभाशु
भ विचारणं विद्यते सर्वकामा
प्ति स्तस्माद्विद्यापरा मता विद्या
दानात्परं दानं न भूतं न भविष्यति
येन दत्तेन चाप्नोति शिवं परम
कारणं विद्या विचारतत्त्वज्ञाना
न्तः सन्मार्गगामिनः भुञ्जतेऽपि
हि भोगानि गच्छन्ति परमां गति
म्प्रजा अपियां प्राप्य क्रीडन्तेश्च
ह रात्रयैः सा विद्या केन मीयेत
यस्याः कोऽन्यः समोऽपि न ज्वरेणा
कुञ्जरं हन्ति शार्दुलेण तरङ्गमं म
क्षिकाः पदमात्रस्य विषस्य विष
मा गतिः ॥
एवं विधं विधिं वत्स विद्या मन्त्रप्र
भावतः श्रीयते तस्ति तं शुभि
स्तस्माद्विद्यापरात्परा न हि वि

या कुलं जाति रूपं पौरुष पा
त्रतां वशं ते सर्वलोकानां पवि
ता उपकारिका भूते गरीयसा वि
शुक्ला दृष्टा वा सह पन्नगैः वि
द्या उत्थापयन्त्वस्मात् अंत्यजस्यापि
ह्यास्थिता सर्वेषामेव वृद्धानां वि
द्यावृद्धो हि मान्यता वयोवृद्धो हि
शूद्राणां विप्राणां धनवान्यतः
तद्विद्यागुणा वीर्येण विप्राणां
शास्त्रपारगः विद्वं वधु वैयश्च
व तथा विद्या युध्यान्तरं सृजनी
यानि सर्वेषां विद्या तेषां ग
रीयसी गुरुशुश्रूषया विद्या पु
ष्कलेन धनेन वा विद्यया लभ्यते
विद्या च तुर्थो नोपलभ्यते यः कृ
त्वा तमहीं दद्यात्मेरुतुल्यं च का
ञ्चनं स यदत्नायतः एकेन तस्मो
पदिशोत्किंचित् एवं विधो महा
भाग विद्याया रूपवर्णितः संसे
पात्रं च विस्तारात्तस्य दानफलं
शृणु श्रीताडीपत्रजे संचे समे
पत्र सुसंचिते विचित्रकं विपार्श्वे
व चर्मणा सवटी कृते रक्तेन च
च्छक्रूलेन सूर्द्धानावहितेन च दृढ
सूत्रबन्धेन एवं विधं कृते नच
यस्त्रद्वादश साहस्त्री संहितामुप
लेखयेत् ददाति चाभियुक्ताय स याति

परमां गतिं पूर्वोत्तर प्लवे दे
शे सर्वबाधा विवर्जिते गोमये
नशुभेनैव कुर्यान्मण्डलकं बुधः।
चतुर्हस्त प्रमाणेन शुभं च चतु
रस्रकं तस्य मध्ये लिखेत्पद्मं सितर
क्त रत्नादिभिः सर्वतः कमलैः पुष्पै
र्भूषयेत्सर्वतो दिशं वितानं दापये
न्मूर्ध्नि शुभचित्र विचित्रितं पा
श्वतः सितवस्त्रे स्तु सम्यक्शो
भां प्रकल्पयेत् कुंडके रुद्रचंदैश्च
दर्पणैः श्यामरै स्तथा घंटा किं
किणिशब्दैश्च सर्वत्र उपकल्पये
त् तस्य मध्ये न्यसेद्यंत्रं नागदंत
मयं शुभं अथः कश्चिन्निवद्धं तु पा
र्श्वतो हरि दंतिभिः शोभितं दृढ
बंधेन वद्धं सूत्रेण बुद्धिमान् तस्यो
र्द्ध विन्यसेद्देव्याः पुस्तकं लिखितं
शुभं अलेख्य मपि तत्रैव पूजये
द्विधिनाततः निरुदके स्तथापु।
ष्पैः कृमि कीट विवर्जितैः चंदनेन
सदा तत्र भस्मनाचारुरूपनयत् धू
पं च गुग्गुलं देयं तु रक्षागुरु मि
श्रितं दीपमाला तथा चाग्रे नैवेद्यं
विधं पुनः खाद्यं पेयान्वितं ले
ह्यं चोष्यं चापि निवेदयेत् ।
पूजयेद्दिग्पिपालां स्तु लोकपा
लान्यथाक्रमं कन्याः क्षिपन्नुमं

पूज्याः मातरः कल्पयेच्च ताः पुस्त
कं देव देवीश्च विप्राणां दक्षिणां
तथा स्वशक्त्या चैव दातव्यान्यं
पौराश्च पूजयेत् तथा संस्तये
हस्तलेखकं धर्म भागकं छेद
लक्षणा तत्त्वज्ञं सत्कवि मधुरेस्व
रं प्राणञ्च स्मरते ग्रन्थ श्रेष्ठ पुस्त
कलेखकं नातिसंततत विछिन्ने
नं श्लक्ष्णेन च कर्कशैः नेदिना
गरकैर्वर्णै लेखयेच्छिव पुस्तकं
प्रारंभे पंच श्लोकानि पुनः शान्ति
तु कारयेत् रात्रौ जागरणं कु
र्यात्सर्वोपेतं प्रकल्पयेत् नट चा
रणा नर्तैश्च देवाः कथन संभवैः
प्रत्यूषे पूजयेल्लोकां स्ततः सर्वं वि
सर्जयेत् एकांते सुमनस्केन वि
शुद्धेन दिने दिने निष्पाद्य विधि
नानेन स्वर्त्ते च शुभवासरे ततः
पूर्वोक्त विधिना पुनः स्नो प्रक
ल्पयेत् तथा विद्या विमानं तु स
मं पंच त्रिभूमिकं वि चित्र वस्त्र
शोभाद्यं शुभ लक्षण लक्षितं।
कारयेत्सर्वतोभद्रं किंकिणी व
रकान्वितं दर्पणैः रुद्रचंद्रमघंटा
चामरं मंडितं तस्मिन्नुपसमुत्थि
पम्सगन्धं चंदनागुरुं तुरुष्कं गुग्गु
लुं वत्स शर्करा मधुमिश्रितं सर्वं

वत्सजयेत्सर्वान् कन्यासौ द्विज
पौरवान् तद्यातं पुस्तकं वस्त्रेवि
न्यसेद्द्विपि प्रजितं एवं कृत्वात
द्याचिन्त्या मातरः प्रीयतां मम य
स्यैव पुस्तकं तच्छास्त्रं पुस्ते प्रति
विकल्पयेत् तथा तपस्विनः शि
ष्याः सर्व शास्त्रार्थपारगाः शि
वव्रत धरामुख्या विष्णुधर्मपराय
णाः महता संघेन रथस्य वाद्य
वाहनैः प्रधाने वापि तत्रैव य
स्य देवस्याग्रस्थाने सामान्यमपि व
तीर्थेषु मातरो भवनेषु च तत्र
स्मिन् तथा कृत्वा देवेनस्तु
तिना समर्पयेत्पुराणस्य मात
रः प्रीयतां मम सदाध्ययनयुक्ता
य विद्यादानरताय च विद्यासं
ग्रह पुस्तकाय सर्वशास्त्रकृताश्रम
तेनैव वर्त्तते यस्तु तस्मै विनि
वेदयेत् नमाद्वितीय वैशाखिंस
ध्यायी वाचयेत्तथा तेन तोयेन दा
तारं मूर्ध्नि समभिषिंचयेत् वरेन्द्रे
तु ततः शङ्खमुच्चार्य जगत त्वथा
एवं कृते महाशान्ति देशस्य नगरं
स्य च अनेन विधिना यत्र सर्ववा
था शान्तिश्च अनेन विधिना यस्तु
विद्यादानं प्रयच्छति स भवेत्सर्व
लोकानां दर्शनाद्दनाशनः स्त्रो
पि गच्छते

स्थानं ब्रह्म विष्णु नमस्कृते स
मस्त वांपरान् वंशानात्मनः सर्व
एव च उद्धृत्य पाप कलिलाद्धि
स्तुलोके महीयते यावत्तस्य च
संख्यान मक्षराणि विधीयते ता
वत्स विष्णुलोकेषु क्रीडते विवि
धैः सुखैः तदाशिति समायातादि
व्याभक्तिरतो भवेत्समस्त भोग
संपन्ने विद्वान्स जायते कुले वि
द्यादान प्रभावेन योगशास्त्रं द
देद्यदि आत्मविज्ञानरूपेण यः
प्रयच्छति मानवः अश्वमेधस्य फल
माप्नोति सत्यं सत्यं न संशयः ह्रि
या वानेन विधिना विद्या दानफ
लं लभेत् भर्त्तव्योत्तमया दत्त विध
वावातमुद्दिशन् विद्यार्थिने सदा
देयं वस्त्रं सभ्यंग भोजनं छत्रि
का उदकं दीपं यस्मात्तेन विना
नहि लेखनी घटनं तीक्ष्णा मसिप
त्रं तु लेखनी दत्वात्तु लभते वत्स
विद्यादान मनुत्तमं पुस्तकानाक्षराणि
दत्वा तत्प्रमाणं सुशोभनं विद्या
दानमवाप्नोति स्वर्गं तथा बुद्धि
मान् पञ्चकामासनं चैव दत्वासन
मथापि वा विद्याधराणां शीलाय
दत्तं भवति राज्यदं अञ्जनं नेत्रपा
दानादत्ते विद्यापरायणां भूमिं दस्ते त

त्रेतंत स्वर्गराज्य फलप्रदाय
सप्तभूम्यां स्थितो नित्यं विद्यादाने
प्रवर्त्तते तस्यापि भवते स्वर्गं तत्र
प्रभावान्नराधिप तस्मात्सर्वं प्र
यत्नेन विद्या देया सदा नरैः इ
ह कीर्त्तिमवाप्नोति मृतो याति प
रां गतिं इति देवीपुराणे विद्या
दान महाभाग्य फलाध्यायः ॥
अपि च दशवापी समा कन्या भू
मिदानं च तत्समं भूमिदानाद्
शगुणं विद्यादानं विशिष्यते य
थाम्बराणां सर्वेषां रामस्य परमे
श्वरः तथैव सर्वदानानां विद्या
दानं तु देहिनां राजसूय सहस्र
स्य सम्यगिष्टस्य यत्फलं तत्फलं
लभते विप्रो विद्यादानेन शाश्व
तान् सर्वशास्त्र समापूर्णं सर्वर
त्नोपशोभितां विप्राय वेदविदु
षे महीं दत्वा प्राप्यते ॥ यत्फ
लं लभते विप्रो विद्यादानेन तत्फ
लं कपिलानां सहस्राणां सम्प्रदा
नेन यत्फलं लभते विप्रो विद्या
दानेन तत्फलं कपिलानां सहस्र
णां सम्प्रदानेन यत्फलं तत्फलं स
मवाप्नोति पुस्तकस्य प्रदानतः
यावन्न पातकं तेन कृतं जन्मश
तैरपि तत्सर्वं नाशयत्याशु विद्या
दानेन भो द्विज धर्मोपदेशं यः
कुर्यात्साक्षं ज्ञात्वा तु वैभवे ॥

कृत्स्नां पृथिवीं यो दद्यात्तुभ
योस्तत्समं फलं विद्यादानात्प
रं दानं न भूतं न भविष्यति ये
न दत्तेन चाप्नोति शिवं परमका
रणं विद्या च श्रूयते लोकेस
र्वे धर्म प्रदायिका तस्माद्विद्या स
दा देया पंडितैः धार्मिकैर्द्विजैः
आत्मविद्या प्रदातारो ये भव
न्ति सदा जने न पुनस्तेपि निरयं
प्रविशन्ति सुनिश्चयं विप्राय पुस्त
कं दत्वा धर्मशास्त्रस्य च द्विज पु
राणस्य च यो दद्यात्स देवत्वमवा
प्नुयात् शास्त्रं दृष्ट्वा जगत्सर्वं स
फलं च शुभाशुभं तस्माच्छास्त्रं
प्रयत्नेन दद्याद्विप्राय कार्त्तिके
वेदविद्यां च यो दद्यात्स्वर्गे कल्प
त्रयं वसेत् आत्मविद्यां च यो दद्या
त्स्वर्गे कल्पत्रयं वसेत् ॥
आत्मविद्यां च यो दद्यात्तस्य सं
ख्यान विद्यते त्रीणि तुल्यप्रदा
नानि त्रीणि तुल्यफलानि च शा
स्त्रं कामदुघा धेनुः पृथिवी चैव शा
श्वती यत्किंचित्कार्त्तिके दत्तं वि
ष्णुमुद्दिश्य मानवैः तदक्षयं च ल
भते त्वन्नदानाद्विशेषतः इह लो
के बहून् भोगान् भुक्त्वा याति त
च्छिवालयं इति पाद्मोत्तरखण्डे ॥७
अध्यायः ॥ अथ विद्यारंभादि
नादि विष्णुधर्मोत्तरे सप्तमे

पंचमे वर्षे ग्रप्रसुप्ते जनार्द्दने।
षष्ठीप्रतिपदंचैव वर्जयित्वा तथा
ष्टमीं रिक्तां पंचदशींचैव सौरि
भौम दिनं तथा एवं सुनिश्चि
तेकाले विद्यारंभन्तु कारये पू
जयित्वा हरिंलक्ष्मीं देवींवापिस
रस्वतीं स्वविद्या सूत्रकारांश्चस्वां
च विद्यां विशेषः नमस्ते वज्र
पाय विश्वे परमात्मने स्वाहे‧
त्यनेन हरिं त्रिः पूजयेत् भद्रका
ल्यैनमो नित्यं सरस्वत्यै नमोनमः
वेद वेदांत वेदांग विद्या स्था
नेभ्य एवच स्वाहेति व्रह्मपुरा
णीयेनच त्रिः पूजयेत् लिखन
विधिमाह नंदिपुराणे शुभे नं
त्त्र दिवसे शुभ वारे दिनग्रहे
लेखयेत्सन्त्यदेवेशान् हरब्रह्म
जनार्द्दनान् पूर्वदिग्वदनोभूत्वा
लिपिज्ञे लेखकोत्तमः निवेश्य
हस्त वाकोष्ठ मसीपत्रावधारणं
शास्त्रपुराणाच शीर्षोपेतान्स्तुसं
स्थानान् समश्रेणीगतान्समान्
ग्रक्षरान् विलिखेद्यस्तु लेखकः
सपरास्मृतः नाधीयीत त्रनधूते
मन्तः रुधिरेवच स्तुते गात्रात्पु
रीषाच्चपरीत्तते रुधिरस्त्वं वि
नाशाशेषाजन मात्रेपि दीपिका
यां। तत्र

चर शिव मूलाषोडशवे नहू पौष
शाशिश्च हरिवोधे शुक्र जीवा
र्कवारे उदिभवति च जीवे केन्द्र
कोणे शुभे सौम्ये रपवनदिन वर्जेपा
ठयेत्पंचमेद्दे मदन पारिजाते
विद्यारंभे गुरुः श्रेष्ठो मध्यमोभृ
गु भास्करौ मरणं शनि भौमा
भ्यामविद्या बुधसोमयोविद्यारंभः
सूर गुरु सित जेषुभीष्टार्थ‧
दायी कृतेष्वायु स्थिरमपि करो
त्यत्र मान् मध्यमोऽत्र नीहारां
शोभवति जडता पंचता भूमि
जेत्रेतस्य केऽपीड हृहितः गु
र्वर्केन्दु शुक्रेच विद्यारंभः प्रश
स्ते बृहस्पतिः प्राङ्मुखो गुरु
रासीनो वरुणाभिमुखं शिष्य प्र
ध्यापयेन्न प्रथमं हिनाशीभिः प्र
पूजितं कर्मपुराणं स्वाध्यायस्य
त्रयो भेदा वाचिकोपांशु मानसाः
शिवधर्मे संस्कृतैः प्राकृतैर्वाक्यै
र्यः शिष्य समनुरूपतः। देशभा
षाद्युपायैश्च वोधयेत्स गुरुःस्मृ
तः आदिः ग्रंथ करणादिः ॥
नंदिपुराणे प्रशस्त शब्द संयोगे
ज्योयतिविरामणं विरामणांत
ः छायासूनावपि च
मुनयः कीर्तयंतेवम्
घाः खेटराशेगौरैलेये:

हिनपाठ समाप्तिं ॥ समासे‧
वाचकाभीष्टं कुर्यादेव विचक्ष‧
णः सुकृते सुश्रुते भूयादस्तुवा
त्वा मुनिसदा लोकः प्रवर्त्ततां
धर्मे राजा चास्तु सदा जयी धर्म
वान्धनसंपन्नो गुरु श्चास्तु निराम
यः इति प्रोच्य यथायातं गंतव्यंच
विभाविनैः शिष्यैः परस्परंशास्त्र
चिंतनीयं विचक्षणैः कथावस्तु
प्रसंगेन नानाव्याख्यानसंभवैः
युक्तिभिश्च स्वरेष्वाव्यं विधिके श्चा
पिस्वयं कृतैः एवं दिने दिनेव्या
ख्यं श्रृणुयान्नियतो नरः ॥विष्णु
पुराणे पुत्रे स्थापिता येच ते
पतंति सुभोजने सुतउवाच।
प्रागल्भ्यहीनस्य नरस्य विद्याशास्त्र
यथा कापुरुषस्य हस्ते न हनिमु
त्पादयते शरीरे ग्रंथस्य हराइ
दर्शनीयाः ॥ लिंगपुराणे।
यो गुरुं पूजयेन्नित्यं तस्य विद्या
प्रसीदति तत्प्रसादेन यस्मात्स
प्राप्नुते सर्वसंपदः ॥ हर्वासाः।
संध्यायां गर्जिते मेघे शास्त्रचिंता
करोतियः चत्वारि तस्य नश्यंति
चायु विद्या यशोवलं ॥अपी
तस्यार्थिने दान मावश्यकं तथा
वक्रूतिः योधीत्यार्थिभ्यो विद्यां

नप्रयच्छेत्स कार्यहा स्यात्प्रत्यवा
हारं माघुराणुयात् इति तद्दानेन च
अध्यापनेन व्याख्यया विलिख्य
धारणेनच संभवतीत्यतो धीमद्भि
र्निर्वयः क्रियते तथाच विष्णुपुरा
णे प्राणिनामुपकाराय यदेवेह
परत्र च कर्मणा मनसा वाचा त
देव मतिमान्भजेत् वृहस्पति रपि
अज्ञानतिमिरापेतान्सन्देह पटला‧
वितान् निरामयान्यः कुरुते शा
स्त्राञ्जन शलाकया ॥ इह की
र्तिं राजपूजां लभते सद्गतिंचसः
षाण्मासिके तु समये भ्रांतिः संज्ञा
येत यतः धात्राक्षराणि सृष्टानि
पत्रारूढान्यतः पुरा। उपदेष्टा
मताच लोके तत्सफला स्मृतो
एवंच एकलव्येनानुपदेष्टापि द्रो
णाचार्यो गुरुः कृतः अतोग्रंथ
कर्त्तैः स्मृतरो गुरुत्वं यथा महा
भारते अरण्ये मनुसंप्राप्य कृत्वा
द्रोणं महीमयं तस्मिन्नाचार्यवृत्तिंच
परमा मास्थितस्तदा इष्वस्त्रे यो
गमातस्थे परनिश्चय मागतः ॥
शंखलिखितौ न वेद मनधीत्य
न्यां विद्यामधीयीतान्यत्र वेदांगस्मृ
तिभ्यः अंगानिच शिक्षा कल्पोव्या
करणं छंदो ज्योतिष मेवच ॥

विद्यादेवी स्त्री जिनषोडशदेव्य
न्तर्गतदेवीविशेषः इति हेम
चंद्रः सरती च ॥
विद्याधनं क्ली विद्ययार्जितध
नं य विद्याधन स्मृह कात्यायनः
उपस्ते तु यल्लब्धं विद्यया पण
पूर्वकं विद्याधनन्तु तद्विद्यात् वि
भागेन वियोजयेत् शिष्यादार्वि
ज्यतः प्रश्नात्संदिग्धप्रश्ननिर्णया
त् स्वज्ञानसंशनाद्वादाल्लब्धं प्रा
ध्ययनात् यत् विद्याधनन्तु त
स्माऊ विभागेन प्रयोजयेत् शि
ल्पेष्वपि हि धर्मोऽयं मूल्यात्य
ल्पाधिकं भवेत् परं निरस्य यल्ल
ब्धं विद्यया द्यूत पूर्वकं ।
विद्याधनन्तु तद्विद्यात् न वि
भाज्यं वृहस्पतिः ॥ यदि भवा
न् भद्र श्रुतस्मृति तदा भवत
एवमेवैतद्देय मिति पणित्वा यत्रा
प्यन्यासं निर्जीर्य लभते तन्न वि
भाज्यं शिष्याध्यापितात् यात्वि
ज्यतः यजमानाद्दक्षिणाया लब्धं
धनं न प्रतिग्रहलब्धं वेतनत्वेन
लाभस्य तथा यत्किंचि द्विद्याभ
न्ने निर्जीर्णोऽपहितं यदिकश्चि
त्तिर्तितावाद्ददाति । त
था यो हि सस्मिन्यास्तार्थे प्रस्तावे
संशयमपनयति तस्मै धन मिदं
दास्यामीत्युपस्थितस्य संशय मपनी
य लब्धं तथा वादिनो वादसंदेहे
न्याय कुशलार्थ मागतयोः सम
क्ष निरूपणेन यल्लब्धं षष्ठी शा
दिकं तथा शास्त्रादि प्रकृष्ट ता
नं संभावयत् प्रतिग्रहादिना लब्धं
तथा शास्त्रज्ञान विवादे प्रश्नज्ञापि
यत्र ऊर्ध्व चिदस्पोम ज्ञान विवादेनि
र्जित्य यल्लब्धं तथैकस्मिन् देये
बहूना मुपप्लवे येन प्रश्नस्तात्य
ल्लब्धं तथा शिष्यादि विद्यया वि
नकर स्वर्णाकारादिभि र्यल्लब्धं
तथा द्यूतेनापि परं निर्जित्य
यल्लब्धं तत्सर्व मविभाज्य मिति
देः । तस्माद्याकया
चिद्विद्यया लब्ध मनेकसंव
तत्तेतदेषा मिति प्रदर्शनार्थतत्का
त्यायनेन विस्तारित मिति दाय
भागः नारदः कुटुम्बं बिभृया
द्भ्रात यो विद्या मधिगच्छतः भाग
विद्याधनात्तस्मात्स लभेताश्रुतोऽ
पि सन् बिभृयादित्येक वचननि
र्देशात्र बहवः यदि विद्या मस
स्तो भ्रातः कुटुम्ब मपरो भ्राता
म्बधनव्यय शरीरायासाभ्या मवर्द्ध
यति तदा तद्विद्यार्जितधने तस्या
पिकारः प्रकृतो मूर्वः कल्पतरु

4591

मितात्तरा दीपकलिकास्तु कात्या
यनः परभक्तोपयोगेन वि
द्याप्राप्तान्यतस्तु या तया लब्धं
धनं यत्तु विद्यालब्धं तदुच्यते अ
न्यतः पितृ मातृ कुल व्यतिरि
क्तात् अत्र विशेषयति सएव ना
विद्यानांतु वेद्येन देयं विद्याधनं
क्वचित् समविद्याधिकानान्तु दे
यं वेद्येनतद्धनं तत्रान्वित विद्या
पदभ्याभ्या संबध्यते तेन सम
विद्याधिक विद्यानां भागोन त
स्त्र विद्यावैद्ययोर्वेद्येन विदुषा
पुन विशेषयति कुले विनीत
विद्यानां भ्रातृणां पितृतोऽपि वा
शौर्यप्राप्तं तु यद्वित्तं विभाज्यं त
द्बृहस्पतिः कुले स्वकुलेपि
तामह पितृव्यादिभ्यः पितृ त
एव वा शिक्षित विद्यानां भ्रातृ
णां यद्विद्या शौर्य प्राप्तं धनं
तद्विभजनीय मिति कल्पतरुर
त्नाकरौ इति दायतत्त्व ॥
विद्याधरः पुं देवयोनिविशेषः
इत्यमरः विद्या मंत्रादिके य
इति पचादित्वात् । पुष्पदंता
दिः कामरूपी खेचरः इतिभर
तः तस्यात्पत्त्यादि यथा नैकेषं
त्वगणे धीमं त्रैलोक्य मपरो
गणैः तेषा मुत्पादितात्योत्य
महागंधर्वनायकाः उत्पादिताः
पुन स्ते यै विक्रान्ता युद्धदुर्म
दाः विद्याधरेभ्यस्त स्तेतु खेचराः
कामचारिणः हिरण्यरोमा कपि
लः सुलोमा माधव स्तथा इंद्र
केतुश्च पिंगाक्षो नारश्चैव महाब
लः गणा इत्येव मादिस्तु दे
वास्मे वैरस्तोचने शिवाच स
मना श्रावनाभ्यामपि च विश्र
वाः पुनश्चोत्पादयामास विद्या
सौमनस गणं पते श्रीमतो त्रि
यं लोके विद्याधरगणो हि
भिः पण्डोऽनेकानिजातानि दा
वराणां चारिणां लोकेस्मिन्त
राणां स्थानि मंत्रविद्या विद्या
धराणां विद्याधरा स्तथामपि वि
द्यावन्त समन्विताः इति वाह्नि पु
राणे काश्यपीय वंशः षोडशदन्ति
वंशान्तर्गत चरमवंशः तस्य लक्षणं
यथा नार्या कुचयुगं धृत्वा करा
भ्यां ताडयेत्स नः कामयेन्निर्भरं
कामी वंधो विद्याधरो मतः इति
रतिमंजरी विद्यावान्ने त्रि विद्या
विशिष्टः विद्याशब्दात्वतु प्रत्यये
न निष्पन्नः विद्युज्ज्वाला स्त्री कलि
कारी वृक्षः इति राजनिर्घंटः तदि

ल्पभाचविद्युज्जिह्वः पुं राक्षसवि
शेषः यथा अग्निकेतुश्च दुर्द्धर्षो
रश्मिकेतुश्च वीर्य्यवान् विद्युज्जि
ह्वो द्विजिह्वश्च सूर्य्यशत्रुश्च रा
क्षसः इति रामायणे उत्तरकां
डे ५ सर्गः ॥
विद्यु स्त्री संध्या इति मेदिनी
विद्योतते या तत्पर्य्यायः ।
शम्पा २ शतह्रदा ३ ह्रादि
नी ४ ऐरावती ५ क्षणप्रभा ६
तडित् ७ सौदामिनी ८ चंचला
९ इत्यमरः चपा ११ सौदाम्नी
१२ चिलमीलिका १३ सम्पाः १४
अचिरप्रभा १५ सौदामनी १६
अस्थिरा १७ मेघप्रभा १८ अश
निः १९ इति शब्दरत्नावली
चंचला २० अचिररोचिः २१ राधा
२२ नीलांजना २३ इति जटाध
रः साचत्रिविधा यथा अरिष्ट
नेमिपत्नीनां मघपानीह घोर
पा वहुपुत्रस्य विद्युतः स्मृतास्ता
विद्युतः स्मृता इति विष्णुपुरा
णे १ अंशे १५ अध्यायः चलंक्षा
विद्युतस्त्व वाताय कपिलावि
द्युदातपाय हिलोहिता पीता
वर्षाय विज्ञेया दुर्भिक्षायासि
ता भवेत् इति ज्योतिःशास्त्रे भवि
हाः इति

तद्दीका ॥
विद्युतः त्रि निष्प्रभः इति मेदि
नी विद्युत्केशः पुं राक्षसविशे
षः यथा सकालभगिनीकन्या
भयांनाम महाभया उदावह द
मेयात्मा स्वयमेव महामतिः सु
तस्यां जनयामास हेती राक्षसपुं
गवः पुत्रंपुत्रवतां श्रेष्ठो विद्यु
त्केशमिति श्रुतं इति रामायणे
उत्तरकांडे ४ सर्गः ॥
विद्युत्प्रियं क्ली कांस्यं इति
हेमचंद्रः ॥
विद्युत्वान् ते त्रि विद्युद्विशिष्टः
विद्युल्लहतात मत्स्येन निष्प्र
भः विद्युन्माला स्त्री अष्टाक्षरपा
दच्छंदोविशेषः यथा मोमो
गो गो विद्युन्माला वासो वल्लीवि
द्युन्माला वर्हश्रेणी शाक्रश्चापः
यस्मिन्माला तापोच्छित्यै गोम
ध्यस्थः कृष्णांभोदः इति छंदो
मंजरी अपिच सर्वे वर्णा दीर्घा
यस्यां विश्रामः स्याद्वेदैर्वेदैः विद्
द्वद्देवीभिर्वाणी व्याख्याता सा
विद्युन्माला इति श्रुतबोधः ॥
विद्युन्माली ने पुं राक्षसविशेषः
यथा विद्युन्मालीनामकश्चिद्रा
क्षसो माहेश्वरः तस्मै रुद्रेणासौ वर्णां

4593

विमानं दत्तं ततोऽर्कस्य पृष्ठ
तो भ्रमन् विमानं दीप्त्या रात्रिं
विलोपितवान् ततोऽर्केण
निजतेजसा द्रावयित्वा तद्वि
मानं पातितं तद्दृष्ट्वा कुपिते रुद्रे
भयादर्कः पराद्रवत्ततो रुद्रस्य कृ
२ पया दृष्टो दृश्यमानः पतन् वा
राणस्यां पतितो लोलार्क नाम्ना
विख्यातः इति श्रीभागवते ६
स्कंधीय ७ अध्यायटीकायां श्री
धरस्वामी अपिच धर्मस्य पुत्रोव
लवान्सुषेण इति विश्रुतः सवि
द्युन्मालिना सार्द्धं अयुध्यत महा
कपिः इति रामायणे युद्धकांडे
४३ सर्गः ॥
विद्रं क्ली छिद्रं इति शब्दचंद्रि
का विद्रधिः पुं रोगविशेषः तत्प
र्य्यायः विद्रधिः २ हृद्व्रधिः ३ हृद
व्रणः ४ इति राजनिर्घंटः तत्र
विद्रधेः संप्राप्ति सर्वकं सामान्य
लक्षण माह त्वङ्मांसमेदां
सि प्रदुष्यास्थिसमाश्रिताः दोषाः
शोथं शनैर्घोरं जनयंत्युच्छ्रिता
भृशं महामूलं रुजावंतं वृत्तं
वाप्यथ वायतं सविद्रधिरि
तिख्यातो विज्ञेयः षड्विधश्च सः
अस्थि समाश्रिता दोषा इति व

समाणमुक्षणशोथाहृदये मे
दार्थं यतो व्रणशोथे दोषाणा
मस्थि समाश्रय नियमो नास्ति
घोरं व्रणशोथाद्दारुणं आयतं
दीर्घं षड्विधत्वं विद्रधेराह पृथ
ग्दोषैः समस्तैश्च क्षतेनाप्यसृजा
तथा षण्णामपि हि तेषांतु लक्ष
णं संप्रचक्षते तत्र वातिकस्य
लक्षणमाह कृष्णोऽरुणो वा
विषमो भृशमत्यर्थवेदनः चि
त्रोत्थानप्रपाकश्च विद्रधिर्वात
संभवः विषमो भृशं त्वरा मत्स्यः
क्षण महान् चिरोत्थान प्रपाकः
चिरो नाना विधो उत्तम प्रपाको
यस्य सः पैत्तिकमाह पक्वोदुम्बर
संकाशः श्यावो वा ज्वरदाहवान्
क्षिप्रोत्थानप्रपाकश्च विद्रधिः
पित्तसंभवः श्लैष्मिकमाह ।
शराव सदृशः पांडुः शीतस्निग्धो
ल्पवेदनः चिरोत्थानप्रपाकश्च
विद्रधिः श्लेष्मसंभवः तनुपीत
सिताश्चैषा मास्रावाः क्रमशोम
ताः सान्निपातिकमाह नानावर्ण
रुजास्रावो घाटालो विषमोम
हान् विषमं पच्यते वापि विद्र
धिः सान्निपातिकः नाना अनेक
विधावर्णाः कृष्ण रक्त पांडुरूपाः

रुजःतोद दाह कंडवादिरूपाः
स्रावाःतत्र पीत सिता पस्र वा
हालःवाटा क्षकारिकास्याति
इति वातालः अतश्छिनाच्च इ
त्यर्थः विषमःनिम्नोन्नतः विषमं
पच्यते चापिचिराचिरगंभीरोन्ना
तोर्द्धोर्द्धभेदेन विषमं यथास्थान
या पच्यते अभिघातजस्यागतेः
संप्राप्ति पूर्वकं लक्षणमाह ते
स्तैर्भावै रभिहितैस्तैर्वाःपथ्य
कारिणः ततोष्मा वायु विसृ·
तःसरक्तं पित्तं मीरयेत् ज्वरस्तृ
ष्णावदाहश्च जायते तस्य देहिनः
आगंतुवि द्रधि र्ह्येष पित्त वि
द्रधि लक्षणः ते स्तै र्भावैःक्ष
त लोष्ट पाषाणादिभि र्हतेय
था रक्तस्रावो नभवति तथा·
हते क्षतेस्ततोष्मा अत्र ततश
ब्देन हतमात्र मुच्यते तेनाभिहत
ततयो रक्तस्ववायु विसृतः अ
भिहतो अभिघातात्तेन रक्ततः
यात्कुपितेन वायुना प्रसृतः इ
येत्कोपयेत रक्तजमाह कृष्ण
स्फोटावृतःश्याव स्तीव्र दाह
रुजाज्वरः पित्तविद्रधि लिंगस्तु
रक्तवि
[illegible]
भिहतेसने कृतद्या यथवा स्तृङ्मला
दिभिस्ते यथारक्तस्रावो भवतितथाः

द्रधि रुच्यते अधिष्ठानविशेषा
ण लिंगविशेषवोधयितु माभ्यं
तरान् विद्रधीनाह आभ्यंतरानप्य
स्तान्द्धं विद्रधीन् परिचक्षते गुर्वसा
त्म विरुद्धान्न शुष्क शाकान्नभोज
नात् अतिसंवीय व्यायाम वेगाघा
तविदाहिभिः पृथक्संभूय वा दो
षाःकुपिता गुल्मरूपिणं वल्मी
कवत्समुन्नद्ध मन्तःकुर्वंति विद्र
धिं गुदेवस्तिमुखेनाभ्यां कुक्षौ
वंक्षणयो स्तथा वृक्कयोःप्लीह्नि
यकृति हृदि वा क्लोम्नि वाप्यथ ये
थोचिक्कानि जानीयात्वाह्यविद्रधि
लक्षणैः संभूयवा भिन्निलावा
समुन्नद्ध तंडनेन स्थान विशेषे
ण रूपविशेष माह गुदे वात नि
रोधस्तुवस्तौ कृच्छ्राल्पमूत्रता ना
भ्यां हिक्कातथाटोपःकुक्षौ मारु
तकोपनं कटी पृष्ठ ग्रह स्तीव्रो
वंक्षणोत्थेच विद्रधौ वृक्कयोः ।
पार्श्वसंकोचःप्लीह्नःश्वासनिरोध
नं सर्वांग प्रग्रह स्तीव्रो हृदिका
सश्चजायते श्वासो यकृति हिक्का
च क्लोम्नि पिपीयते पयः स्वावमा
र्गमाह नाभेरुपरिविज्ञेःपक्वायांस्त
द्धे भिन्ने स्तथः अधः स्रुतेषु जी
वेच्च स्रुतेषूर्द्धं न जीवपति नाभेरु

परिजा उक्कादि जाताः यांतिसर्वे
तिऊर्द्ध्वमुखात् इतरे वस्त्यादिनाः
अधः गुदात् नाभिज स्तत्राभ्यांमा
र्गाभ्यां तथाच हारीतः । ऊर्द्ध्व
अभिन्नेषु मुखान्तराणं प्रवर्तते
स्रवसहितो हि स्रयः अधःअभि
न्नेषु तु पायु मार्गोह्याभ्यां प्रहृत्ति
स्त्विह नाभिजेषु ॥ साध्यत्वादि
कमाह अथःस्रुतेषु जीवेत्तस्रुते
षूर्द्धं नजीवति हृन्नाभिवस्तिप·
र्याये तेषु भिन्नेषु वाह्यतः जी
वेत्कदाचित्पुरुषो नेतरेषुकदाच
न हृन्नाभि वस्ति पर्याये स्तीह
क्लोमादिजातेषु वाह्यतःपार्श्व
घयापारेण भिन्नेषु पुरुषःकदा
चित् जीवेत् इतरेषु हृन्नाभि व·
स्तिजेषु तथाभिन्नेषु नजीवेत हृ
दानांमर्मत्वा त[illegible]
अतएव भोजः अप्साध्यामर्मजोन्ते
यःपक्वोऽपक्वश्च विद्रधिः सन्निपा
तोत्थितोप्येवं पक्वएव हिवल्लिजः
हृज्ज्ञोनाभेरयोजश्च साध्या मर्मस
मीपतः अपक्वश्चेव पक्वश्च साध्यो
नोपद्रवान्वितः अध्मानं बद्धवि
ण्मूत्रं छर्दिर्हिक्का तृषान्वितं रु
जा श्वासस्मायुक्तं विद्रधिर्नाशये
न्नरं ॥
वाह्यावि द्रधीनां साध्यासाध्यत्वमा
ह

साध्या विद्रधयः पंच वितर्ज्यः
सान्निपातिकः आमंपक्वं विदग्ध
त्वंतेषां शोथवदादिशेत् शोथ
वत्स्वमाणा व्रणशोथवत् ॥
अथ विद्रधे श्चिकित्सा जलौका
पातनं शस्तं सर्वेस्मिन्नपि विद्र
धौमृदु विरेको लघ्वन्नं स्वेदःपि
त्तोत्तरे विना अपक्व विद्रधौयु
ज्याद्व्रणशोथवदोषधं वातघ्न
मूलकल्के वीवसा तैल घृता
न्वितैः सुखोष्णोवहलो लेपःप्र·
योज्योवातविद्रधौ यव गोधूमसु
द्गैश्च पिष्टैराज्येन लेपयेत् विली
यते क्षणेनैव ह्यविपक्वस्तु विद्र
धिः पैत्तिकं विद्रधिं वैद्यः प्रदिह्या
त्सर्पिषाप्लुतैः पयस्योशीर मधुक
चंदनैर्द्रग्यपेषितै पयसानेकार्थं
त्वात् अत्रक्षीरकाकोली ग्राह्या
स्यात् तस्याऽलाभे अश्वगंधाग्रा
ह्या पंचवल्कल कल्केन घृत मि
श्रेण लेपयेत् पिबेद्वा त्रिफला
क्वाथं त्रिवृत्कल्कोत्तसंयुतं इ
ष्टिका सिकता लोहकीहैः गोसकृ
ता सह मूत्रैःसुखोष्णै र्लेपनस्व
दयेत् श्लेष्म विद्रधिं दशमूली
कषायेण सस्नेहेन घृतेनच शो
धं व्रणं वा कोष्णेन सशूले
परिषेचयेत् पित्त विद्रधिवत्तु

वी: क्रिया निरवशेषतः विद्रधौ
ऊशलःऊर्ध्वाद्ध्यांगत निम्निः
योरकचंदन मंजिष्ठा निशामधु
क गेरिकैः क्षीरेण विद्रधौ ले
पोरध्यांगत निम्निके कुस्माण्ड
जीविशाला च यामार्गवफलं त
था पीतं हते निरन्मास्त्रु विद्रधिं
कोष्ठ संभवान् यामार्गवफलं को
धातकीफलं स्वतवर्षाभवा मूलं
मूलं वरुणकस्य च जलेन क्वथि
तं पीत मंत विद्रधि ज्वरं नाय:
डी त्रिफला निम्ब कुटका मधुकं
समं त्रिवृत पटोल मूलाभ्यां चत्वा
रो शाः स्युः क्वाथक मसूराद्ध्रिः
स्त्रषान्द्रयात् पय क्वाथा हृता
जयेत् विद्रधी गुल्मवीसर्पदाह
मोह ज्वरापहः तृष्णा मूर्च्छा छर्दि ह
द्रोग पित्तास्तक् कुष्ठ कामलाः
वाग्भटात् शिग्रुमूलं जले धौ
तं पिष्टं वस्त्रेण गालयेत् तद्
संमधुना पीत्वा हंत्यन्तर्विद्रधिः
न्न: शोभांजनक निर्यूहो हिं
गु सैन्धव संयुतः हंत्यन्तर्विद्र
धिं जंतोः प्रातः प्रात निषेवितः
निर्यूहः क्वाथः इति विद्रध्यधि
कारः इति भावप्रकाशः ॥
विद्रधिनाशनः पुं शोभांजनवृ
क्षः इति त्रिकाण्डशेषः ॥

विद्रवः पुं पलायनं इत्यमरः ॥
द्रुति इति मेदिनी निरा इति
शब्दरत्नावली द्रवणं ।
इति केचित् ॥
विद्रावः पुं विद्रवः विपूर्व द्रुधा
तो र्घञ् प्रत्ययेन निष्पन्नः ॥
विद्रावितं त्रि पलायितं यथा वि
द्राविते भूतगणे ज्वरस्तु त्रिशिरा
भ्ययात् इति श्रीभागवते वाणयु
द्धं विद्रुतः त्रि पातद्रवीभावद्रु
तादिः तत्पर्यायः विलीनः १ द्रु
तः २ इत्यमरः पलायितश्च ॥
विद्रुमः पुं प्रवालः रत्नवृक्षः
इति मेदिनी किशलयः इत्यम
रपालः ॥
विद्रुमलता स्त्री नलीनामगंध
द्रव्य इत्यमरः ॥
विद्रुमलतिका स्त्री नलिकाइ
ति राजनिर्घण्टः ॥
विद्वत्कल्पः त्रि ईषदूनो विद्वान्
मुग्धबोधव्याकरणं ॥
विद्वत्तमः त्रि अयमेषामतिश
येन विद्वान् इति व्याकरणं ॥
विद्वत्तरः त्रि अयमनयोरतिश
येन विद्वान् इति व्याकरणं ॥
विद्वद्देशीयः त्रि विद्वत्कल्पः
इति व्याकरणं ॥

विद्वद्देश्यः त्रि विद्वत्कल्पः इति
मुग्धबोधव्याकरणं ॥
विद्वान्[सं] त्रि आत्मवित् प्राज्ञः
पंडितः इति मेदिनी ॥
विद्विषः पुं शत्रुः विद्वेषके त्रि
विपूर्वक द्विषधातोः क प्रत्ययेन
निष्पन्नः ॥
विद्वेषः पुं वैरता तत्पर्यायः ।
वैरं १ विरोधः २ इत्यमरः ॥
अनुशयः ४ द्वेषः ५ समभ्याशः
६ वैरहं ७ इति जटाधरः द्वेषणः
८ इति शब्दरत्नावली ॥
विद्वेषकः त्रि विद्वेष्टी द्वेषकर्त्ता ।
विरोधकः वैरी विद्वेष्टीति वि
पूर्व द्विषधातो णक प्रत्ययेन
निष्पन्नः ॥
विद्वेषणं क्ली विद्वेषः विपूर्व
द्विषधातो ल्युट् प्रत्ययेन निष्प
न्नं अभिचारकर्मविशेषः तस्य वि
हितदिनादि यथा सूर्योदयं समा
रभ्य घटिकादशकं क्रमात् ऋ
तवः सर्वसंताया अहोरात्रे दि
ने दिने वसंत ग्रीष्म वर्षाश्च शर
द्धेमंत शैशिराः हेमंतः शांति
के प्रोक्तो वसंतो वश्य कर्मणि
शिशिरः स्तंभने ज्ञेयो विद्वेषे
ग्रीष्म ईरितः पौर्णमासी मंद।

भानु युक्ता विद्वेषकर्मणि व
र्षपर्ववाक्ति मध्याह्ने विद्वेषोच्चा
टने तथा शांति पुष्टी दिनस्या
ते संध्याकाले च मारणं ऊर्ध्वा
स्तंभनं कार्यं इर्यंत वृश्चिको
दये द्वेषोच्चाटादिकं कर्म कुली
रेवातलोदये भूलोदय नियम
माह जलेशान्तिविधौ शस्त वश्य
वह्नि रुदीरितः स्तंभने पृथिवी
शस्ता विद्वेषे व्योम कीर्त्तितं
दिङ्नियममाह याम्ये रक्षसि वि
द्वेषं शांतिं वारुणा वायवे
तत्र नियममाह विद्वेषोच्चाट
नं वह्नि वायुयोगेच कारयेत्
अथ विद्वेषणं वक्ष्ये मित्रा वि
द्वेषणं रिपोः करणीयं महेशा
नि यदुक्तं मालिनी मते अन्योन्य
युद्धसंरंभ हर्षितो समरे युतो त
दीय नादरोद्दीन धूलि मादाय
साधकः धूलिना तेन विद्वेष स्ना
ऊनादपि जायते परस्परं विपो
वैरं मित्रेण सह निश्चितं ।
महिषाश्व पुरीषाभ्यां गोमूत्रेण
समालिखेत् यस्य नाम तयोः
प्रीतिं विद्वेषंच परस्परं रक्तेन
महिषाश्वेन श्मशाने वस्त्रके
लिखेत् यस्यनाम भवेत्तस्यकाक

पत्रेण लेखितं वेष्टयेद्द्विज ।
चाण्डाल केशै रेकतरै स्तत
गर्त्ते ग्रामशरावेन पितृकानन
मध्यतः षट्कोणचक्रमध्येतु
विधो नाम समन्वितं मंत्रराजं
प्रवक्ष्यामि महाभैरव संज्ञकं ।
ॐनमो महाभैरवाय रुद्ररूपाय
श्मशानवासिने अमुकामुकयो
र्विद्वेषं कुरु कुरु स्फुरु स्फुरु हुँ हुँ
फट् एतन्मंत्रं लिखितव्यं विद्वेषो
जायते ध्रुवं ॥ इति षट्कर्म
दीपिका ॥
विद्वेषणी स्त्री स्त्री विशेषः य
था विद्वेषणीत्व या कन्या भ्रकु
टीकुटिलानना तस्य हो तनयावा
स्तामयकारप्रकाशकौ इतिमा
र्कंडेयपुराणे दुःसहसंप्रोत्पत्तिः ॥
विद्वेषी त्रि विद्वेषविशिष्टः वैरी
विद्वेष शब्दा दस्त्यर्थे इन्प्रत्ययेन
निष्पन्नः ॥
विध श विधो इति कविकल्प
द्रुमः विधि विधानं शा विधति
वेधा जगत् अनेकार्थत्वाच्छिद्रक
रणेऽप्ययं विधित छिद्रितो वि
द्धेंकृत्यमरः कर्णवेधः । इति
दुर्गादासः ॥
विधः पुं विधानं हस्त्यन्नं ॥

प्रकारः वेधनं ऋद्धिः इति भरत
धृत रभसाजयो ॥
विधवनं क्ली कम्पनं विपूर्वधू
धातो र्भावे अनट् प्रत्ययेन नि
ष्पन्नं ॥
विधवा स्त्री मृतभर्तृका । तत्प
र्यायः विश्वस्ता २ इत्यमरः ॥
जालिका ३ रंडा ४ यतिनी ५ यतिः
६ इति शब्दरत्नावली ॥ तस्याः
कर्त्तव्याकर्त्तव्यानि यथा विष्णुः
मृते भर्त्तरि ब्रह्मचर्यं तदन्वारोह
णं वा इति ब्रह्मचर्यं मैथुन वर्जनं
ताम्बूलादि वर्जनंच यथा प्रचेताः
ताम्बूलाभ्यंजनं चैव कांस्यपात्रेच
भोजनं यतिश्च ब्रह्मचारी च विध
वा च विवर्जयेत् ॥
अभ्यंजनं आयुर्वेदोक्तं पारिभा
षिकं स्मृतिः एकाहारः सदाका
र्यो न द्वितीयः कदाचन ।
पर्य्यंकशायिनी नारी विधवा पा
तयेत्पतिं गंधद्रव्यस्य संभोगो नै
व कार्यस्तयापुनः तर्पणंप्रत्यहं
कार्यं भर्तुःकुश तिलोदकैः ॥
पतेस्तु तर्पणं पुत्र पौत्राद्यभाव
इति मदन पारिजातः ॥
वैशाखे कार्त्तिके माघे विशेष
नियमंचरेत् स्नानं दानं तीर्थ

यात्रांविष्णो र्नामग्रहं मुहुः इ
तिमृहितत्वे अपिच ब्राह्मणीप
तिहीना या भवेन्निष्कामिणी स
दा एकभक्ता दिनांते सा हरिष्या
न्नरता सदा नधन्ने दिव्य वस्त्रंच
गंधद्रव्यं सुतैलकं स्रजंच चं
दनंचैव शंख सिन्दूर भूषणं ॥
त्यक्त्वा मलिनवस्त्रा सा नित्यं ना
रायणं स्मरेत् नारायणस्य सेवा
च कुरुते नित्यमेवच तन्नामोच्चा
रणं शश्वत्कुरुते नन्य भक्तितः
पुत्रवत्स्नेहंच पुरुषं सदापश्यति
धर्मतः मिष्टान्नं नच भुंक्ते
सा नकुर्याद्द्विभवं क्वचित् ।
एकादश्यां न भोक्तव्यं कृष्णजन्मा
ष्टमी दिने श्रीरामस्य नवम्यांच
शिवरात्रौ पवित्रया अघोराया
च प्रेतायां चंद्रसूर्योपरागयोः ॥
भ्रष्टद्रव्यं परित्याज्य भुंक्ते परमे
वच ताम्बूलं विधवा स्त्रीणांच
यतीनां ब्रह्मचारिणां ॥ संन्यासिनां
च गोमांसं मसूरं वस्त्रं न कृतं
रक्तशाकं मत्स्यंच जम्बीरपर्णं
मेवच अलाबुर्वर्त्तुला कारावर्ज
नीयाच नैरपि पर्य्यंकशायिनी
नारी विधवा पातयेत्पतिं ॥
यान मारोहणं कृत्वा विधवानर

कं व्रजेत् नकुर्यात्केश संस्का
रं गात्र संस्कारमेवच केशवेणी
जटारूपं तत्तीरं तीर्थकं विना
तैलाभ्यंगं न कुर्वीत नहि पश्य
ति दर्पणं मुखंच परपुंसाचया
त्रां स्वंस महोत्सवं नर्तकं गायने
चैव सुवेशं पुरुषं शुभं ॥
इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्मख
ण्डे ८३ अध्यायः ॥
विधा स्त्री विधिः प्रकारः समृ
द्धिः ऋद्धिः गजान्नं वेतनं ।
इति मेदिनी शब्दरत्नावल्यौ ॥
कर्म इति हेमचन्द्रः वेधनं ।
इति त्रिकाण्डशेषः ॥
विधाः[स] पुं ब्रह्मा इत्युणादिकोषः
विधाता[स्] पुं ब्रह्मा इत्यमरः
कामदेवः इति मेदिनी ॥ मदि
रा इतिराजनिर्घण्टः भृगुमुनिः
पुत्रः तस्यभार्या मेरुकन्यानिय
तिः तस्यपुत्रःप्राणः तस्यसुतः
वेदशिराः कविश्च । इति
श्रीभागवतमतं ॥ विधातु
र्विचित्रगति र्यथा कंस उवाच
तृणेन पर्वतं हन्ति शक्तो धाता
च दैवतः कीटेन सिंह शार्दूलं
मशकेन गजं तथा शिशुनाच
महावीरं महांतं क्षुद्रजंतुभिः ॥

शृषिकेण च मार्जारं मंसुकेनभु
जंगमं एवं नमेन जनकं भ
त्तेणैव च भक्तकं वह्निना च
जलं नष्टं वह्नि ष्क लणेनच
पीताःसप्तसमुद्राश्च द्विजेनैकेन
जन्मना धात गेति विचित्राव
इयेया भुवनत्रये इति ब्रह्मवैव
र्त्ते श्रीकृष्णजन्मखंडे ७ अध्यायः
अपिच भक्तवन उवाच ।
सर्वथोहि विधिवशो नमेसाध्यो
ब्रह्माधिप प्रजापति योगक
तोजन्मदातारमेवच काकस्य
त्तीकन्यावा वरःकोवा समायनः
कर्मानुरूपफलदःसर्वेषांकारणं
विधिः भवितव्यं कृतं कर्म तद
मोघं श्रुतौ श्रुतं अन्यथा निष्फ
ले सर्व मनीशस्योद्यमो यथा ।
वृषभानुप्रिया धात्रा लिखिताचे
त्सुता मम पुरा भूतेव कोवाहंके
नोत्पन्न निवार्यते । इति ब्रह्मवै
वर्त्ते श्रीकृष्णजन्मखंडे ९ अध्या
यः अन्यच्च त्यागे दोषःकामुकी
नां शापभाक्पापभाकरही ।
ब्रह्माजगद्विधातापि नविरक्तःक
लत्रवान् त्यागे दोष स्त्वकदाचि
नास्माकं त्यक्त योषितं अपरंच
। स्वांतर्ह्रः देिन डः

स्वायंभुवो यःप्रशापति निश्चितं
तेषां पं खंडितुं शक्तो न विधा
ता जगत्प्रभुः इति ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखंडे ६ अध्यायः
असो जगतां पति र्यथा । द्वौ
धाताच विधाताच पौराणौ ज
गतां पती द्वौ शास्तारौ त्रिलो
केस्मिन्धर्माधर्मौ प्रकीर्तितौ ॥
इति वह्नि पुराणे गणभेदनामा
ध्यायः ॥
विधात्रभूः पुं नारदमुनिः इति
त्रिकांडशेषः ॥
विधात्रायुः सं पुं नारदमुनिः इति
त्रिकांडशेषः सूर्यशोभा यथावेश
दानो विधात्रायु र्दिष्यवस्त्रोदिवा
करः इति शब्दचंद्रिका ॥
ब्रह्मणोवयः तद्यथा चतुर्दश
मन्वन्तरैः ब्रह्मणः एकं दिनं भव
ति तन्मनुष्यमानेनैकः कल्प स्त्रिं
शत्कल्पै ब्रह्मणः एको मासो भ
वति एतादृशै र्द्वादशमासै र्ब्रह्म
णः सम्वत्सरो भवति एवं वर्षश
तं ब्रह्मणः आयुः तत्र पंचाशत्वर्षा
ण्यतीताः एकपंचाशदारंभेऽधुना
श्वेतवाराहकल्पः अत्र मन्वन्तरा
णि व्यतीतानि षट् अधुना वैवस्व
तमन्वंतरं वर्तते इतिश्रीभागवतमतं

विधात्री स्त्री पिप्पली इतिश
ब्दचंद्रिका विधानकर्त्री यथाग
तास्तनां वारु प्रकर कृत कां
ची परिलसंतितम्बां दिवस्थांवि
भुवन विधात्री त्रिनयनां श्रम ।
प्रानस्य तस्येशवहृदिमहाका
ल स्वरतप्रभुकां त्वां ध्यायन् ज
नति जडचेता अपि कविः इति
तंत्रसारे कर्पूरादिस्तोत्रे ॥
विधानं क्ली विधिः इतिजटा
धरः करणं इति नानार्थविधि
शब्दटीकायां भरतः कविकल्पलः
इति हारावली ॥
विधानकं क्ली व्यथा इतिश
ब्दरत्नावली ॥
विधायकः त्रि विधानकर्त्ता पुंवि
ङितः इतिशब्दरत्नावली विधा
यकः त्रि विधानकर्त्ता विधित्सा
पकः विपूर्वं धा ञ धातोर्णक
प्रत्ययेन निष्पन्नः ॥
विधायीनं त्रि विधानकर्त्री विपू
र्वक धाञ धातोर्णिन् प्रत्ययेन
निष्पन्नः विधावं क्ली कंपनं
विपूर्वधूधातो र्घञ्प्रत्ययेन नि
ष्पन्नं विधिः पुं ब्रह्मा भाग्यक्र
मः विधानं इत्यमरः कालः
इति मेदिनी विधिवाक्यं ।

प्रकारः नियोगः इति हेमचं
द्रः विष्णुः इति हलायुधः ॥
कर्म इति त्रिकांडशेषः गजा
नं इतिजटाधरः वैद्यः इति
राजनिर्घंटः यागोपदेशकग्रंथः
इति भरतधृतकोषः षड्विध
सूत्रलक्षणांतर्गतलक्षणविशे
षः यथा संज्ञाच परिभाषाच वि
धि नियमएवच अतिदेशोऽधि
कारश्च षड्विधं सूत्रलक्षणं अप्रा
प्तप्रापको विधिः सतु द्विविधः
वर्णोत्पादनरूपोऽभावरूपश्च व
र्णोत्पादनरूपो यथा सरूर्णे चे इ
त्यादिः अभावरूपो द्विविधः ना
शोनिषधरूपश्च नाशविधि र्यथा
लोपोऽस्या मादौ वित्यादि नि
षेध विधि र्यथा नाजोऽन्न इत्या
दि सामान्य प्राप्तस्य विशेषावधा
रणं नियमविधिः यथा रंजे
विःस्यपि इत्यादि अन्यधर्मस्यान्य
त्रारोपणं मतिदेशविधिः यथा
स्वविक् इत्यादि पूर्वसूत्रस्थित
पदस्य परसूत्रेषूपस्थिति रधिका
रविधिः सतु त्रिविधः सिंहावलो
कितवश्च मंडूकप्लुति रेवच
गंगास्रोत इतिख्याता अधिका
रास्त्रयो मताः सिंहावलोकितो

यथा वावगोर्दाते इत्यस्माद्दांते
इति पदस्य अकारागितंतेष्ठपास्थि
तिः मंडूकप्लुति यथा दाभिस
ड़े ङ्सीत्यस्मात् अत इतिपदस्य·
आक्षिम भवि इत्यत्रोपस्थितिः ग
गाश्रोतो यथा लेः सि डे जस्
इत्यस्माद्धे रिति पदस्य तद्धित
पर्यंतेषूपस्थिति रिति एवंच ।
कार्यी कार्यं निमित्तंच विधिः
सूत्रमुदाहृतं कदाचित्कार्यिका
र्याभ्यां क्वचित्कार्यस्यकार्यागदि
तो बुधैः क्रियते यत्र तत्कार्य
मादेश प्रत्ययागमं यस्मात्स्वरूप
दे यस्मिन्नन्निमित्तं द्विधामतं मा
कात्तायांत सर्वेषां मनद्वृत्तिः पर
भवेत् इति ॥ एवंचवहिरंग
विधिभ्यःस्यादन्तरंग विधि र्वली
प्रत्ययाश्रित कार्यंतुवहिरंगमु
दाहृतं। प्रकृत्याश्रितकार्यस्या·
दंतरंग मिति ध्रुवं प्रकृतेःपूर्वपूर्वं
स्यादंतरंगतरं तथा सावकाशवि
धिभ्यःस्याद्वलीनिरवकाशकः क
स्य विद्धिन कार्यस्यप्रथमे परत
स्तथा ॥
संभवेद्विषयो यस्य सभवेत्सावः
काशकः ।
आदौ हि विषयो यस्य परतो न
हि संभवेत् सपंडितगणो हुक्तो
विधि निरवकाशकः तथा सामा
न्यकार्येभ्यो विशेषकविधि र्वली
वहवो विषयो यस्य ससामान्यवि
धिर्भवेत् स्वल्पःस्याद्विषयो यस्यस
विशेषविधि र्मतः आगमादेशयो
र्मध्ये वलीयानागमो विधिःप्रकृ
तिं प्रत्ययंचापि यो न हंति स
आगमः आदेश उपघातो यः प्र
कृते प्रत्ययस्य वा । सकलेभ्यो
विधिभ्यःस्याद्वली लोपविधि स्तथा
लोप स्वरादेशयोस्तु स्वरादेशा
विधि र्वली । इति मुग्धवोध
व्याकरण टीकायां दुर्गादासः ॥
अथविधिभेदाः तत्र कश्चिदुत्पत्ति
विधिः सतु स्वतःफलहेतु क्रि
यायां कथमित्याकांक्षायां विधाय
कः । यथा ।
इडो यजति इत्यादि कश्चित्प्रयो
गविधिः सतु यावदंग युक्त
क्रियावोधकः यथा ।
यावदंग युक्तं यजेत विलक्ष
ण स्वर्गकाम इत्यादिकश्चिद्गु
ण फलविधिः ।
सतु आकांक्षा निवृत्तो अधिक
फलाय प्रायकर्मणि गुणावि
धिः । यथा । गोदो

4603

हेनापः प्रणयेत्पशुकाम इत्या
दिः प्रधान विधिश्च द्विविधः उ
त्पत्तिर्नियोगश्चेति तत्रोत्पत्ति
स्तु धर्मस्वरूपवोधकः यथा·
आग्नेयाष्टाकपालो अमावास्या
यां पौर्णमास्यां चाच्युतो भवति
इत्यादि नियोगश्च स्वर्गकांक्षधि
कारि वोधकः यथा स्वर्गकामो
यजेतइत्यादि अंगविधिस्तु काल
देशकर्त्रादि वोधकतया अनिय
तएव प्रधानांगविधयोर्विधेया·
प्राप्ति प्राप्तिभ्यां त्रैविध्यं तत्रप्र·
प्राप्तितो द्वैविध्य तत्राप्यप्राप्तताप्रा
प्तौ अपूर्वविधिः पक्षतोऽप्राप्तौ
नियमविधिः विधेय तत्प्राप्तिप
तयोः प्राप्तौ परिसंख्याविधिः ।
अतएवोक्तं विधिरत्यंत मप्राप्तौ
नियमःपाक्षिके सति तत्रचान्य
त्रच प्राप्तौ परिसंख्या विधीय
ते तत्रप्रधानस्य विधिभेदो य
था अहरहः संध्यामुपासीतइ
त्यादि रपूर्वविधिः अत्र विधेय
स्य संध्यादेः शास्त्रतो रागतो
न्यायतो वाक्कचिदप्यप्राप्तेः तथा
ऋतौ भार्यामुपेयात् इत्यादि निय
मविधिः विधेयस्य भार्याभिगम
नस्य रागतःप्राप्तावपि रागाभावात्प
क्ष

तोऽप्राप्तेः यथा प्राप्तितंमांसं
भुंजीत इत्यादिः परिसंख्याविधिः
विधेयस्य[1] तत्प्राप्तिपक्षणस्यच
रागतः प्राप्तेः अंगस्य विधिभे
दो यथा शारदीयपूजाया महम्या
मुपवसेत् इत्यादिरपूर्वविधिः
अत्र विधेयस्योपवासस्य एतद्
म शास्त्रतोरागतो न्यायतो
वाक्कचिदप्राप्तेः तथा श्राद्धे भुं
जीत पितृसेवितमित्यादि निय
मविधिः विधेयस्यश्राद्धशेष भो
जनस्य रागतःप्राप्तावपि रागा
भावात्पक्षतोऽप्राप्तेः तथा हविः
श्राद्धे प्रातरामंत्रितान्विप्रान् इ
त्यादिः परिसंख्याविधिः अत्रविधे
यस्य प्रात र्नियमंत्रणस्य तत्प्रा
प्तिपक्षस्य पूर्वदिन सायंनिमंत्र
णस्यच पार्वणवन्न्यायतःप्राप्ते
रिति स्मृते रुदाहरणं इतिधर्म
दीपिका न्यायमते विधि र्यथा
प्रवृत्तिः कृति रेवात्र साचेच्छातो
यतश्चसा तज्ज्ञानं विषय स्तस्य
विधि स्तज्ज्ञापकोऽथवा विधिजन्म
ज्ञानात्प्रवृत्ति र्दृश्यते सा इच्छा
तः चिकीर्षातः चिकीर्षाच कृति
साध्यत्वेष्टसाधनत्वज्ञानात् तज्ज्ञा
नस्य ॥

[1] ॰प्रोक्षित मांसभक्षणस्य

विषयः कार्य्यत्वं इष्टसाधनत्वंच
विधिरिति प्राचीनमतं स्वयमत
माह तज्ज्ञापकोऽस्य चेति इष्टसा
धनत्वावगमापक आमाभिप्रायो
विधि प्रत्ययार्थः इति हरिदासी
यकुसुमांजलिः ॥ अपिच आ
श्रयत्व सम्बंधेन प्रत्ययोपस्था
पितेष्टसाधनत्वान्वितस्वार्थपर
पदघटित वाक्यत्वं विधित्वमी
मांसकमते इष्ट साधनत्वेष्ट
तिसाध्यत्वेच पृथक् विध्ययोः
इति गदाधर भट्टाचार्य्यकृतवि
धिस्वरूपः विधिर्दर्शिने पुं सदसः
इत्यमरः विधिर्देशकः पुं सदसः
इति शब्दरत्नावली ॥
विधिवत् अव्य यथाविधि विधानं
सारेण यथा लोघयुक्तत्वंभा
र्य्यां विधिवत्पाणिगृहीतां ।
इति कालिकापुराणे ४९ अध्या
यः अपिच संध्या मुपास्य वि
धिवत् बिल्वपत्राणुपार्ज्जयेत् ।
इति शिवरात्रिव्रतकथा ॥ अ
नघ्न पूजये दुक्तं बिल्वकर्केल
देवस्यालकं शिवं व्रतोपवासे
विधिवत् श्रद्धयाच विमत्सरः
इति मत्स्यपुराणे योगमाहा
त्म्ये ७९ अध्यायः । अपरंच

इति नक्षत्र पुरुष व्रतोक्ता वि
धिवत्स्वयं सर्व्वान्कामानवाप्नोति
विष्णुलोके महीयते ॥ इति
तत्रैव ५८ अध्यायः ॥
विधुः पुं चंद्रः विष्णुः कर्पूरः ।
इति मेदिनी ॥ ब्रह्मा इतिश
ब्दरत्नावली ॥ राक्षसः । इति
विश्वः आयुधः वायुः इति सं
क्षिप्तसारोणादिवृत्तिः ॥
चंद्रस्य द्वादशावस्था तत्फला
दिश्च यथा चंद्रस्य द्वादशावस्था
भवंति मेषाद्या अपि त्रिषु
त्रिषुच स्त्तेषु अश्विन्यादि व
राभ्यर्द्धं प्रवासस्थं पुन नैष्टम
तावस्थं जयावर्द्धं हास्यावस्थं
तावस्थं क्रीडावस्थं ज्वरास्थितं भु
क्तावस्थं स्वस्थावस्थं द्वादशाव
स्था भवेत् प्रवासे हानिस्तथाश्र
यशोहानी रतिःस्याद्वै प्रोक्तो
भोगोज्वरः कंपः सुस्थावस्थाक्र
मात्फलं जन्मस्थाः कुरुते हानि
द्वितीये नास्ति निर्वृतिः तृतीये
राजसमाने चतुर्थे कलहागमे
पंचमे धान्यागमः षष्ठे रतिःस्त्रीच
सप्तमे अष्टमे प्राणसन्देहो नवमे
क्लेशसंचयः दशमे कार्य्यनिष्प
त्तिः फलं मेकादशे जयः द्वादशेन

शशांकेन स्रस्त रेव नसंशयः
इति गारुडे अध्यायः ॥
चंद्रस्य क्षय वृद्धि कारणं य
था ब्रह्मोवाच काराचानुमती
चैवद्विविधा पूर्णिमा मता सिनी
वाली कुहूश्चैव अमावास्या द्विधे
वत अमा नाम रवे रश्मिश्चंद्र
लोके प्रतिष्ठिता यस्मात्सोमोव
सत्यस्या ममावासी ततःस्मृता
पूर्व्वोदित कलाभिन्न पौर्णमास्या
निशाकरे पूर्णिमानुमती ज्ञेया
पंचास्तमित भास्करे यस्मात्ताम
नुमन्यते देवताः पितृभिः सह त
स्मादनुमती नाम पूर्णिमा प्रथ
मास्मृता यदा चास्तमिते सूर्य्ये
पूर्णाचंद्रस्य चोद्गमः युगपत्सात
दा रागस्तदानुमति पूर्णिमा ।
राकांता मनुमन्यते देवताः पि
तृभिस्सह रंजनाच्चैव चंद्रस्य रा
केति कवयोऽब्रुवन् सिनीवाली
प्रमाणन्तु क्षीणशेषो निशाक
रः अमावास्यां विशत्यर्कं सि
नीवाली ततःस्मृता कुहेति को
किलेनोक्तो यः कालस्तु समा
प्यते तत्काल संज्ञा त्वेषा वै अ
मावास्या कुहूःस्मृता अनुमता
शेवाः कार्या सिनीवाल्याः कुहू
स्विना पतासा विरलः कालः कु
मा

चेति कुहूः स्मृता कलाः षोडश
सोमस्य शुक्ले वर्द्धयते रविः अ
मृतेनामृतं कृष्णे पीयते देवतैः
क्रमात् प्रथमां पिवेत वह्निर्द्वि
तीयां पवनः कलां विश्वेदेवा स्तृ
तीयांतु चतुर्थीन्तु प्रजापतिः पं
चमीं वरुणश्चापि षष्ठींपिवति
वासवः सप्तमीं ऋषयो दिव्या
वसवोष्टौ तथा ष्टमीं नवमीं कृ
ष्णपक्षस्य पिवतींद्रः कलामपि
दशमीं मरुतश्चापि रुद्रा एका
दशीं कलां द्वादशींतु कलां वि
ष्णु धनदश्च त्रयोदशीं चतुर्द्दशीं
पशुपतिः कलांपिवति नित्यशः
ततः पंचदशीं चैव पिवंतिपित
रः कलां कलावशिष्टा निष्पी
तः प्रविष्टः सूर्य्यमंडले अमा
या विशते रश्मौ अमावाशी
ततःस्मृता पूर्व्वाह्ने विशतेचा
र्कं मध्याह्ने तु वनस्पति अ
पराह्ने विशत्यप्सु स्वयोनि वा
रिसंभवः आपः प्रविष्टः सोम
स्य शेषया कलयेकया तृण
गुल्म लतावृक्षान्निष्पादयति
चौषधीः तमोषधिस्थितं गावश्च
रन्त्यापः पिवंतिच तद्गावोनुगतेगो
भ्यः क्षीरत्व मुपगच्छति क्षीरी
दमस्मृत भूत्वा मंत्रपूतं द्विजात

यः स्वाहाकार वषट्कारै र्नक्तं
स्मारुतयः क्रमात् ऊत मग्निश्छे
दाय पुनः सोमं विवर्द्धयेत् एवं
संक्षीयते सोमः क्षीणश्चाप्यायते
पुनः तस्मात्सूर्यः शशांकस्य त
य वृद्धीविधेर्विभुः इति देवीपुरा
णे चंद्र क्षय वृद्धिः ब्रह्मोवाच।
यदयं वदते लोको बालिशा
त्वान्महामते तत्स्तं संप्रवक्ष्यामि
चंद्रसूर्योपरागिके यदि सम्यग
ग्रस्तस्तेनो शशि दिवाकरः
तत्कथं नोदरस्थेन राहुनेभ
क्षसात्कृतः अथवा राहुणाक्र
म्य शत्रुवक्त्रे प्रवेशितः तत्कथं
दशनैस्तीक्ष्णै शतधा न विदं
डितः विमुक्तश्च पुनर्दृष्ट स्तथैव
वा खंडमंडलः न चास्यापहृतं ते
जो नस्थानादपसर्पितः यदि वा
ह्येष निष्यातः कथं दीप्ततरोऽभ
वत् तस्मान्नैतेजसा शशी राहोर्व
क्त्रं गमिष्यति मत्यार्थ सर्वदेवा
नां सोमः सृष्टः स्वयंभुवा तमस्य
मस्तदेवा पिस सृष्टे सूर्ये तेजसा
पिबन्त्यमृतमयं देवा पितरश्चास्व
पास्तते । त्रयंत्रिंशात्तथैव
त्रयस्त्रिंशत्तथैवच । त्र
यश्च त्रिसहस्त्राश्च देवाः सोमंपि
बंति ये राहो ह्यमृतमापय ।

पुरा सृष्टं स्वयंभुवा तस्मात्तद्रा
हुरागत्य पातु मिच्छति पर्वसु
उद्धृत्य पार्थिवीच्छायां मशकाकृ
तिर्मामयः पातुमिच्छन्ततस्त्री
दु माच्छादयति [illegible] च्छा
यया शुक्ले च चंद्र मभ्येति कृ
ष्णे पर्वणि भास्करं स्वयं मंडले
संस्थितं चंद्रमेव जिघांसति तस्मा
त्पिबति तेनाहु स्तनु मस्याभि
नाशयन् अविहिंसन्यथापश्चापि
बति भ्रमरो मधु चंद्रस्य ममृतं
तद्वत्स्मे राहुद्दू स्मृते चंद्रका
लो मणि र्यद्वद् दिने सरते त
णान्तरेऽपि नदीयते तेजसा
नैव मुच्यते यथा सूर्यमणिः स
पाडुमास पावके शुभ नभवस्मा
द्वीनोऽपि तेजसा नैव मुच्यते ॥
एवं चंद्रश्च सूर्यश्च छादितावपि
राहुना स्वतेजसा नमुच्यते नाग
हीनो वभवत पार्वे स्वयं चचंद्रस्म
माणिक्य कलशाकृतिः सोमो दे
वन संयोगाच्छाया योगाद्धि पा
र्थिवात् राहोश्च वरलब्धादेव
तेदृश्यते शशी स्वहोर काले सं
प्राप्ते वस्तद्दृष्टु च गो यथा ॥
स्वागादेव तरेन्नीरं तथेंदुः
तरते स्वत पितेव सूर्यो देवानां
सोमो मातेव लस्यते ॥

460

यथा मातुः स्तनं पीत्वा जीवंते
सर्वे जन्तवः पीत्वामृतं तथा सो
मात्स्पंते सर्वदेवताः सेमृतस
र्वयोगेषु तथायं तरते शशी
तत्तरंते यथाभाग मुपजीवंति
देवताः तस्मिन्काले समभ्येति
राहुरप्यवकर्षति सर्वे मर्हेति भा
गं च पादे पाराईमेवच श्याक्रम्य
पार्थिवी छाया यावती चंद्र मं
डले स्मृतः सभागो राहोस्तु देव
भागास्तु शेषकाः स्मृंविधा
य देवानां राहोः पर्वगतस्यच वे
श्री नतस्य मायाति तेजसा नैव
मुच्यते तिथि भागाश्च यावतः
पुनस्य वर्द्धमाणतः सर्वच्छाया
स्थितः कालस्तावानेव प्रकीर्ति
तः अतो राहु भुजः सोमः सोमा
द्वृहि दिवाकरः पर्वकाले स्थि
ति स्त्वेवं विपरीताः पुनः अनः
अतश्छादयते राहुरभ्रवच्छपि
भास्करो राहुरभ्रकं संस्थानः सो
मम्याच्छाय तिष्ठति उद्धृत्य पा
र्थिवीं छायां भ्रममेव इवा
त्थितः चंद्रस्य यत्वस्तश्च राहु
णा भास्करस्यच नाम्रावखडिते
तस्यैके वस्ते व्यामलीकृतं कर्दमे
न यथा वस्त्र शुक्लमप्युपहन्यते
एकोद्देशेषु सर्वथा राहुणा चंद्रमा

स्तथा
मस्तानिते तदेवेह पुनः शुक्ल
तरं भवेत् राहुमुक्तं भवेत्तद्व
न्निर्मलं चंद्रमंडलं राहुनाच्छा
दितो वापि दृष्ट्वा चंद्र दिवाक
रो विप्राः शांतिपरा भूत्वा पुन
राप्याययंतिते एवं न गृह्यते स
र्पेश्चंद्रमास्तत्र गृह्यते अनुपा
स्तेन पश्यंति मानुषा मांसच
क्षुषः जगत्संमोहनं चैतद्ग्रह
णं चंद्रसूर्ययो इत्याद्ये देवीपु
राणे ग्रहणविकल्पः विचारे
वपि ज्ञायन्तकारणानि राजय
स्मादिकारणात्वेच कालिकापु
राणे २० २१ अध्याययो र्द्दष्टव्यं
विधुतः त्रि स्मृतः इत्यमरः
कंपितश्च ॥
विधूतिः स्त्री कम्पने विधूर्व
धूपातोः क्तिप्रत्ययेन निष्प
न्नाविधुननं स्त्री कम्पने इति
जटाधरः ॥
विधुन्तुदः पुं राहुः इत्यमरः
विधुपंजरः पुं खड्गः इतिशब्द
माला ॥
विधुप्रिया स्त्री चंद्रपत्नी यथा
दाक्षायण्या विधुप्रिया इति
कोन्तरं ॥
विधुरं क्ली प्रविश्लेषः इत्यमरः

वैकल्यं इति त्रिकाण्डशेषः ॥
विधुरः त्रि विकलः इतिमेदि
नी विधुरा स्त्री रसाला इतिमे
दिनी विधुवनं क्ली कंपने इत्य
मरः विधूतं त्रि कम्पितं त्यक्तं
इति हेमचंद्रः ॥
विधूतिः स्त्री कंपनं विपूर्वधू
धातोः क्ति प्रत्ययेन निष्पन्ना
विधूननं क्ली कम्पनं तत्पर्या
यः विधुवनं २ इत्यमरः विधूव
नं ३ इति शब्दरत्नावली ॥
विधूनित त्रि कंपित विपूर्व
धूनतधूधातोः क्त प्रत्ययेन निष्प
न्नं विधृतं क्ली विशेषेणाधृतं
यथा अयथावकृष्य विण्मूत्रे
लोष्टकाष्ठतृणादिना उद्धृत्य
वासा अन्निधेहृत्वं विधृतमेह
नः इत्याह्निकतत्त्वे ॥
विधेयः त्रि विधातुं शक्यः वा
काश्यः तत्पर्यायः विनयग्राही
२ वचनेस्थितः ३ आश्रवः ४
इत्यमरः विधिजन्यबोधविष
यः यथा यजुर्वाधमनुक्त्वात
न विधेयमुदीरयेत न ह्यलब्धा
स्पदं किंचित्कुत्रचित्प्रतितिष्ठ
ति इत्येकादशीतत्त्वे अपि च प्र
माणान्तरासन्निहितं कर्म प्रथम
बुद्धौ न विधेयी भवति शास्त्रेस्य
तस्य कर्मणा उपस्थिति रित्यपादे
ये विधेय कर्मणि एजादो श्रुवि
तत्काल जीविनः कर्माधिकारात्
प्रमांतर लभ्यत्वेनाविधेयत्वात्प्र
ष्यादिश्रुणः इति तिथ्यादित
त्वे ॥
विधेयता स्त्री विधेयत्वं विधिज
न्यबोधविषयत्वं यथा यथाजस्य
थादिषु पापस्य निषिद्धतयोपग्र
क्तं ब्राह्मणादि ज्ञाने हेतुत्वं त
थागंगास्नानादिषु पुण्यस्य विधे
यता वच्छेदक मगादि ज्ञाने हेतु
त्वं इति प्रायश्चित्ततत्त्वे ॥
विध्वंसः पुं विनाशः यथा इ
ति रोगाः नुतापः शास्त्रानासी
त्रिभिश्च विध्वंसः कपिले प्रोच्य
गतस्त्व स्वेच्छध्वंसोऽयडभिंत्तं ॥
इतिथ्यादितत्त्वे ॥
विनतः त्रि प्रणतः भुग्नः शि
क्षितः इति मेदिनी ॥
विनता स्त्री गरुडमाता पिट
काभेदः इति मेदिनी ॥
विनतासूनुः पुं गरुडः इतिहे
मचंद्रः गरुडस्य ॥
विनदः पुं विल्पाकहृत्तः छाति
पात् इति ख्यातः इति शब्द
चंद्रिका ॥

4669

विनशकं क्ली नेमैगरकुष्ठं इति
राजनिर्घंटः ॥
विनयंत्रि वणिक् तिमः नि
भृतः विजितेंद्रियः इत्यजय
पालः ॥
विनयः पुं शिक्षा प्रणतिः ।
इति मेदिनी अपि च विनयश्चसे
शा वृद्धांश्च नित्यं सेवेत विप्रा
न्वेदविदः शुचीन् तेभ्यो हि
शिक्षेत विनयं विनीतात्मा हि
नित्यशः समग्रां वशगां कु
र्यात्पृथिवीं नात्र संशयः । ब
हवोऽविनयाद्भ्रष्टा राजानः स
परिच्छदाः वनस्था अपि राज्या
नि विनयात्प्रतिपेदिरे । इति
मत्स्यपुराणे ९८ अध्यायः ॥
दंडः यथा यत्तु पूर्वमाक्षारयेद्य
स्तु नियतं स्यात्स दोषभाक् ।
पश्चाद्यः सोप्यसत्कारी पूर्वेतु
विनयो गुरुः इति नारदवच
नं तत्सवीपेक्षया परस्पापिक
वाक्पारुष्योत्पादकस्यापि स्वल्प
दंड विधायकं युगपत्संप्रवर्त
ने अधिक दंडाभाव मारस्य
वपारुष्ये साहसे चैव युगपत्सं
प्रवर्तयोः विशेष श्चेन्न लभ्ये
त विनयः स्यात्सम स्तयोः विनया
दंडः इतिव्यवहारतत्त्वं ॥
विनयग्राही ने त्रि वचनेस्थितः
इत्यमरः ॥
विनयस्थः त्रि आज्ञाकारी त
त्पर्यायः विधेयः २ आश्रवः ३ ४
वचनेस्थितः ४ वश्यः ५ प्रणेयः
इति हेमचंद्रः ॥
विनया स्त्री वासालकः इति
मेदिनी ॥
विनशनं क्ली कुरुक्षेत्रं तद्धु
हस्तिनापा उत्तरपश्चिमे वर्तते
इति त्रिकांडशेषः विनाशश्च
विनष्टः त्रि नाशप्राप्तः क्षेत्रवि
शिष्टः यथा शिखी विनष्टाउ
रुषो ननष्टः इति विशेषव्या
प्ति टीकायां मथुरानाथः पति
तः यथा नारदः विनष्टे वाप्यषा
रणे पितर्युपरतस्पृहे विनष्टेप
तिते इति दायभागः ॥
विनष्टिः स्त्री विनाशः इति वि
पूर्वनश धातोः भावे क्ति प्रत्यये
नतिष्पन्ना इति सिद्धांतकौमुदी
विनसः त्रि गतनासिकः तत्प
र्यायः विग्रः २ विखुः ३ विना
सकः ४ इति जटाधरः
विनाय वर्जनं तत्पर्यायः
पृथक् २ अंतरेण ३ ऋते ४

ह्रिरुक् ५ नाना ६ इत्यमरः ॥
विनाकृते त्रि यकं इति त्रि
कांडशेषः ॥
विनायकः पुं बुद्धः गणेशः
इत्यमरः गरुडः विघ्नः गुरुः
इतिमेदिनी विनायकुवाणां
यथा गाङ्गेयो विश्ववश्चैव हो
विज्ञेयो विनायको इतिवह्नि
पुराणे गणभेद नामाध्यायः
विनायकस्योत्पत्ति यथा प्रजा
पाल उवाच कथं गणपतेर्ज
न्ममूर्त्तिमत्त्वं सत्तम एतन्मे सं
शयं छिंधि इतिकष्टं व्यवस्थिते
महातपा उवाच पूर्वं देवगणाः
सर्वे ऋषयश्च तपोधनाः कार्या
रंभे यथा प्राप्ताः सिद्धिं तेचनस
प्रायः सन्मार्गावस्थितु यथा
सिध्यते विघ्नतः क्रियाः असत्
कारिषु सर्वेषु तद्देव सविघ्न
तः ततो देवाःसपितरश्चिन्तया
मास तेजसा असत्कार्येषु विघ्ना
र्थे सर्वं एवाभ्यमंत्रयन् ततस्ते
षां तदा मंत्रं कुर्वतां त्रिदिवौक
सां बभूव बुद्धि गमने रुद्रं प्रति
महात्मने ते तत्र रुद्रमासाद्य कै
लास निलयं गुरुं ऊचुःसर्विन
यसर्वप्रणिपात पुरःसरं देवा

ऊचुः देव देव महादेव शूल
पाणे त्रिलोचन विघ्नार्य मवि
शिष्टानां उत्पादयितु मर्हसि ए
वमुक्त स्तदा देवे र्भवः परमया
मुदा उमा निरीक्षयामास तत्र
चानिमिषेण हि देवानां सन्निधौ
तस्य पश्यतो मा महात्मनः चिन्ता
भूद्योम्नि मूर्त्तेभ्यो दृश्यते केन हे
तुना पृथिव्या विद्यते मूर्त्ति रपां
मूर्त्ति स्तथैवच तेजसःश्वसनस्य
पिमूर्त्ति रेषा न दृश्यते आका
शस्य कथं नेति मत्वा देवो जहा
सच ज्ञान शक्तिः गगनादृष्टा य
दृष्टंव्योम्नि शंभुना पश्चोक्तं ब्रह्म
णाः पूर्वं शरीरेषु शरीरिणां यश्चा
पि हसितं तेन देवेन परमेष्ठि
ना एतत्कार्यं चतस्केषा पृथिव्या
दि चतुर्ष्वपि मूर्त्तिमानति तेजस्वी
हसतः परमेष्ठिनः प्रदीप्तास्योमहा
दीप्तः कुमारो भासयन् दिशो पर
मेष्ठिगुणैः युक्तः साक्षात् रुद्र इवा
परः उत्पन्न मात्रो देवानां याषि
तःसप्तमोह्यन् कांत्या दीप्यात
याप्ता मूर्त्त्या रूपेणाच महात्मवान्
तद्दृष्ट्वापरमं रूपं कुमारस्यमहा
त्मनः उमानिमिषनेत्राभ्यां तम
पश्यत भामिनी तद्दृष्ट्वा कुपितोदेव

स्त्रीत्रकोप समन्वितः मत्वाङ्
मारव्रूपंतु शोभनं मोहनं दृशां
ततः शशापतं देवो गणेशंपर
मेश्वरः कुमार गजवक्त्र स्त्वं प्रल
म्बजठर स्तथा भविष्यति तथा
सर्पैरुपवीतगति श्रौवं एवं शशा
पतं देव स्त्रीत्रकोपसमन्वितः ध
नत्यारीर मुत्थाय ततो देवोरु
षान्वितः यथा यथासोसशरी
रमाधुन्वेनोति देवत्रिशिरोवाह
पाणिः तथा तथा चांगरुहाद्
कासजलं सितोसंस्यपतंस्तथान्ये
विनायका नेकमुखा गजास्यास्त
माल नीलांजनसन्निकाशाः ऊनं
स्तु रुद्रे विविधास्तहस्ता स्ततस्त
देवा मनसाकुलेन किमेतदित्य
द्भुत कर्मकारी क्षोभः करोत्सपति
स महद्यु कार्यंत्सुराणां कृत मेतदि
दं भवेत्रथेतंपरितं कृतस्तत् दि
वौकसां चितयतां तथात्र विना
यकैः स्तां सपिता बभूव चतुर्मुख
श्चापतिमा विमान मारुह्य देवा
त्यसिदंजगाद धन्यास्तु देवास्तव
नायकेन त्रिलोचनेनाद्भुत रूपिणा
च अनुग्रहीताः परमेश्वरेण सुर
द्विषां विघ्नकृतो नतोव इत्येव मु
क्त्वा प्रपितामह स्ताडवाच देवास्ति
शिरोवालस्त्या

णिं यस्ते विभो वक्त्रसमुद्भवःप्र
मुर्विनायको नाम वसंतिमेऽनुगा
भवंत्वया साम्यवरेणावाम्यरेत्वया
चतुर्भुत शरीरचारी आकाशमे
तद्रूपा व्यवस्थितं त्वया चैकोव
दंताने प्रयान्तः प्रभु भवत्पतिमा
त्वपाणिना इमान्हिचात्ते स्तवतां
शुदेहि इत्येव मुक्त्वापितामे पिता
मेरु त्रिलोचन श्चालभते जगाद
विनायको विघ्नकरो गजास्योग
णेशनामा त भवस्य पुत्रः एते
चसर्वे त्वपयांत भृत्या विनायकाः
क्रूरदृशः प्रचंडाः उच्छ्रय दानादि
विवृद्धदेहाः कार्येषु सिद्धिं प्रति
पादयंतः भवांश्च वेदेषु तथाम
खेषु कार्येषु चान्येषु महानुभावा
त् अग्रेषु पूजां लभतेन्यथाच वि
नाशयिष्यस्यसु कार्यसिद्धि इत्ये
वमुक्तो परमेश्वरेण सुरैः समं कां
चनकुंभ संस्थैः जलै स्तथा साव
भिषिक्त गात्रो वराज राजेंद्र विना
यकानां दृष्ट्वाभिषिच्यमानं तदेवा
स्तगणानाथं कं स्तुष्टवुःप्रयताः
सर्वे त्रिशूलास्तस्य सन्निधौ देवा
ऊचुः नमस्ते गजवक्त्राय नम
स्ते गणनायक नमस्तेस्तुनमस्ते
चेउविक्रम नमोस्तुते विघ्नक र्त्रेन

नमस्तेसर्पमेखल नमस्तेरुद्रवेश्मो
त्पपत्नेवे जठराग्नि सर्वस्वनम
स्कारादविघ्नं ऊरु सर्वदा पर्वतेन्द्र
स्तादेवै महात्मा गणनायकःअ
भिषिक्तस्तु रुद्रेण सोमस्यापत्य
तांगतः पतन्वृत्यर्थ्या संपन्ने गण
धृतस्यपार्थिव यत स्तोत्रेय मह
ती तिथीनां परमातिथिः एत
त्सां यस्तिलान्मकस्या भुक्त्वागण
पतिं न्टप याराधयति तस्याशु
तुष्यते नात्रसंशयः यश्चैतत्प
ठते स्तोत्रं यश्चैतत्स्मरणउपाठे
या तस्यविघ्नानजायंते नपापं
सर्वथान्टप इत्यादि वाराहेवि
नायकोत्पत्ति नामाध्यायः विना
यकस्य नामाष्टकस्तोत्रं यथा।
श्रीविष्णुरुवाच गणेश मेकदं
त हेरम्ब विघ्ननायक लम्बोदर
स्पैककर्णगजवक्त्रं गुहाग्रजं ना
मामाष्टकार्थपुत्रस्य श्रृणु मत्तो
हरप्रिये स्तोत्राणां सारभूतंच
सर्वविघ्नहरंपरं ज्ञानार्थवाचको
गश्च णश्च निर्वाणवाचकः त
योरीशं परंब्रह्म गणेशं प्रणमा
म्यहं १ एकशब्दःप्रधानार्थोदन्त
श्च बलवाचकः बलंप्रधानं सर्व
स्मादेकदंतं नमाम्यहं २ दीनार्थवा
चको हेश्च

रम्बः पालनवाचकः परिपालक
तंदीनानां हेरम्बं प्रणमाम्यहं
३ विपत्तिवाचको विघ्नो नायकः
खंडनार्थकः विपत्खंडनकारंतं
नमामि विघ्ननायकं ४ विष्णुदत्तै
श्च नैवेद्यै यस्य लम्बोदरं पुरा
पित्रा दत्तैश्च विविधै वंदे लम्बो
दरंचतं ५ सर्पकर्णौ च तत्क
र्णौ विघ्नवारणकारणौ संपत्
स्फालनरूपौ च सूर्पकर्णं नमाम्य
हं ६ विष्णुप्रसादं पुष्पंच यन्मूर्ध्नि
मुनिदत्तकं तद्गजेन्द्रवक्त्रयुक्तं गज
वक्त्रंनमाम्यहं ७ गुहस्याग्रेच जा
तोयमाविर्भूतो हरागृहे वंदेग
हाग्रजं देवं सर्व देवाग्रपूजितं
८ एतन्नामाष्टकं दुर्गे नामार्थै
संयुतं परं पुत्रस्य पश्यवेदेच त
तदा कोपं वृथा कुरु एतन्नामा
ष्टकं स्तोत्रं नामार्थैः संयुतं शुभे
त्रिसंध्यंयः पठेन्नित्यं सुखी स
र्वतो जयी ततो विघ्नाःपलायंते
वैनतेयाद्यथोरगाः गणेश्वर प्रसा
देन महाज्ञानी भवेद्ध्रुवं ॥ पु
त्रार्थी लभते पुत्रं भार्यार्थी विपु
लां स्त्रियं महाजडःकवीन्द्रश्च वि
द्यावांश्च भवेद्ध्रुवं इति ब्रह्मवैव
र्ते गणपति खंडे ४४ अध्यायः

अस्यकवचं यथा नारदउवा
च संसार मोचनस्यास्य कवचस्य
प्रजापतिः ऋषिश्छंदश्चबृहती
देवोलंबोदरःस्वयं धर्मार्थकाम
मोक्षेषु विनियोगःप्रकीर्तितः
सर्वेषांकवचानांच सारभूतमि
दं मुने ॐ गां गं श्रीं गणेशाय
स्वाहा मेपातु मस्तकं द्वात्रिंश
दक्षरो मंत्रो ललाटं मे सदावतु
ॐ ह्रीं क्लीं श्रीं गमितिचसततं
पातुलोचनं तालुकांपातु विघ्ने
शः सततं धरणीतले ॐ ह्रीं श्रीं
क्लीं मिति सततंपातु नासिकां
ॐ गौं गं शूर्पकर्णाय स्वाहापातु
धरे मम दन्ताश्च तालुकां जिह्वां
पातुमेषोडशाक्षरः ॐ श्रीं लम्बो
दरायेतिस्वाहा गंडंसदावतु ॐ गं
गं गजाननायेति स्वाहास्कंधंसदा
वतु श्रीं क्लीं ह्रीमिति कंकालं
पातुवक्षःस्थलंच गं पाणिपा
दौसदा पातु सर्वांगं विघ्ननिघ्न
त् प्राच्यांलम्बोदरःपातु आग्नेय्यां
विघ्ननायकः दक्षिणे पातु विघ्नेः
शो नैरृत्यांतु गजाननः पश्चिमे
पार्वतीपुत्रो वायव्यां शंकरात्म
जः कृष्णस्यांश श्चोत्तरे तु परिपूर्ण
तमस्यच ऐशान्यामेकदन्तश्च।

हेरम्बःपातु चोर्द्ध्वतः गणाधि
पोऽप्यधःपातु सर्वपूज्यश्च सर्व
तः स्वप्ने जागरणे चैव पातुमेयो
गिनांगुरुः इति ते कथितंवत्स
सर्वमंत्रौघ विग्रहं संसार मोह
नं नाम कवचं परमाद्भुतं श्री
कृष्णेन पुरा दत्तं गोलोके रास
मंडले वृन्दावने विनीताय मह्यं
दिनकरात्मज मयादत्तंच तुभ्यं
च यस्मै कस्मै नदास्यसि परंव
रंसर्वपूज्यं सर्वसंकट तारणं गु
रुमभ्यर्च्य विधिवत्कवचं धारये
त्तुयः कंठे वा दक्षिणे बाहौसो
पि विष्णुर्नसंशयः अश्वमेधसह
स्राणिराजसूय शतानिच ग्रहेंद्र
कवचस्यास्य कलां नार्हंतिषोड
शीं इदंकवच मज्ञात्वा योभजेच्छं
करात्मजं शतलक्षप्रजप्तोपिन
मंत्रःसिद्धिदायकः इतिब्रह्मवै
वर्ते गणपतिखंडे गणेशाक
वचं नाम ४३ अध्यायः अथवि
नायक शांति याज्ञवल्क्यउ
वाच विनायकोपसृष्टस्यल
क्षणानि निबोधत स्वप्नेव
गाहतेऽत्यर्थं जलं मुंडांश्चप
श्यति विमना विफलारंभःस
सीदत्यनिमित्ततः राजा राज्यकु

मारीव पतिं पुत्रं च गर्विनी नामुया
स्नपनं तस्य पुरोहिते विधिपूर्वकं
गौरसर्षप कल्केन सस्नेनोत्सादित
स्य च सर्वौषधैः सर्वगंधै विलिप्तशि
रस्तया भद्रासनोपविष्टस्य स्वस्ति
वाच्य द्विजाञ्शुभान् मृत्तिका रोच
नां गंधान् गुग्गुलं चाप्सु निक्षिपेत्
याः स्ता एककर्णोऽस्थितभिः कलशै
कृतात् चर्मण्यानडुहे रक्ते स्थाप्य भ
द्रासनं तथा सहस्राक्षं शतधार
ऋषिभिः पावनं कृतं तेन त्वाम
भिषिंचामि पावमान्यः पुनंतु ते
भगं ते वरुणो राजा भगं सूर्यो बृ
हस्पतिः भगमिन्द्रश्च वायुश्च
भगं सप्तर्षयो ददुः यत्ते केशेषु
सौभाग्यं सीमंते यच्च मूर्द्धनि ल
लाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु
ते सदा स्नातस्य सार्षपं तैलं स्रुवे
णौदुम्बरेण जुहुयान्मूर्द्धनि
कुशान्सव्येन परिगृह्य च मित
श्च संमितश्च संमिते श्रेवतथा
शालकटंकटाः कूष्माण्डो राजपुत्र
श्चेत्यंते स्वाहासमन्वितैः दद्या
च्चतुष्पथे शूर्पे कृत्वा नानाशीर्षे
सर्वदिशाः कृताकृता लड्डुकांश्चप
लेलाहनमेव च पुष्पं विचित्रं स्रग
पिंच सुरांच त्रिविधामपि मूलकं
पूरिका

पूपा स्तथैवेंडरिकाः अन्नं दधि
पायसमदेव गुडपिष्टं समोदकं एता
न्सर्वानुपाहृत्य मूर्ध्नि कृत्वा ततः शिवः
अंबिका मुपतिष्ठेद्द्यादर्घ्यं कृतां
जलिः दूर्वा सर्षप पुष्पाणां पूर्णमञ्ज
लिं ततः कृतयत्ने चैव आर्यायैर
घिकोसती रूपं देहि यशो देहि भ
गं भवति देहि मे ॥ पुत्रा
न्देहि श्रियं देहि सर्वकामांश्च देहि
मे ब्राह्मणा भोजयेत्पश्चात्पूजां च
स्वानुलेपनैः ॥ वस्त्रयुग्मं गु
रो दद्याद्दासेभ्यः शकोस्तथा ।
श्रेयः कर्म फलं विघ्नस्यार्चे
न रतः स्तथा ॥ इति गारुडे
अध्यायः ॥ अथ गणेशमं
त्राः पंचांतको गकारः ध्यानं त
गणेश शाहे इष्टव्य अस्य पुरश्च
रणं चतुर्लक्षजपः ॥
अथ महागणपतिमंत्राः निवृत्तेश्री
क्लिं स्वरसंभवि विघ्नवीजानि प्रथमं वदे
त् डें.ते गणपतिपश्चात्वरवर
दं पदं उक्त्वा सर्वजनं मे वशम्
आनय ठठद्वयं अष्टाविंशत्यक्षरो
यं नागाधिपमंत्रो विदितः ॥ भू
वीजमादौ स्मृतिस्थं मांसमो वि
इयुक्तं भूवीजमीरितं स्मृति पंकारः
ंकेशशिपरं वीजं गणपते
विंडः पंचांतः

मांसं तकारः अस्य ध्यानं न
वरत्न मये द्वीपे स्मरेदिक्षुरसा
म्बुधौ तद्वीचि धौत पर्यंतेमर
मारुतसेविते मंदार पारिजाता
दिकल्पवृक्ष लताकुले उद्भूतर
त्नच्छायाभिररुणीकृत भूतले
उद्यद्दिनकरेड्यास्मुच्छ्रायित दि
गंतरं तस्य मध्ये पारिजातेनरंर
त्नमयंस्मरेत् ऋतुभिः सेविते
षड्भिरनिशं प्रीति वर्द्धने तस्या
धस्तान्महापीठे रचिते मातृका
म्बुजे षट्कोणांत त्रिकोणस्थं
महागणपतिं स्मरेत् हस्तीन्द्रा
नन मिंदुचूडमरुणच्छायं त्रिने
त्रं रसादाश्लिष्टं प्रियया सपद्म
करया स्वांगस्थया संततं ।
वीजापूर गदा धनु स्त्रिशिखयु
क्चक्राब्जपाशोत्पलं व्रीह्यग्रस्ववि
षाणगंडकलशान् हस्ते वहंतं
भजे गंडपाणिगलद्दान पूरलो
लसमानसान् द्विरेफान्कर्णना
ताभ्यां वारयंतं मुहुर्मुहुः कराग्र
धृतमाणिक्यकुंभवक्त्र विनिःसृ
तैः रत्नवर्षैः प्रीणयंतं साधकं
मदविह्वलं माणिक्यमुकुटांगदे
रत्नाभरणभूषिते अस्य पुरश्च
रणं चतुर्लक्षजपः अपिच शक्तिरु
द्र निजं वीजं महागणपतिं वदेत्
डेन्तमग्निवधू

शक्तो मंत्रोयं द्वादशाक्षरः अस्य
ध्यानं मुक्तागौरं मदगजमुखं चं
द्रचूडं त्रिनेत्रं हस्तैः स्वीयैर्दधतम
रविंदाक्षमालारत्नकुंभं अंकुस्था
याः सरसिजरुचे स्तद्भुजालं विपा
तो देव्या योनौ विनिहित करं
रत्नमौलिं भजामि अस्य पुरश्च
रणं लक्षजपः मंत्रांतरं शक्ति
रुद्रं निजं वीजं वश्यमानयद्व
द्वयं तारादौ मनुराख्यातो रु
द्र संख्यासरान्वितः अस्य ध्यानं
हस्तैर्विभ्रत मिक्षुदंड वरदौ पा
शांकुशौ पुष्कर स्पृष्टस्वप्रमदा
वरांग मनयाश्लिष्टे ध्वजाग्रस्
शा शपामांस्पाविधुनानया त्रि
नयनं चंद्रार्द्धचूडं जवारक्तं हस्ति
मुखं स्मरामि सततं भोगार्थिना
लं विभे अस्य पुरश्चरणं लक्ष
यजपः ॥ अथ हेरंबमंत्रः स
चडकार भृष्टो गकारः सवि
डःप्रणवादि नमोंत अक्षरत्वरः
विवेधे पंचांतको विदुमुक्तो वा
मकर्णविभूषितः तारादि हृद
यांतोयं हेरंबमनुरीरितः चत
वर्गात्मको दुर्गाचतुर्वर्गफल
प्रदः अस्य ध्यानं मुक्ता कांचननी
ल कुंदघुसृण च्छायै स्त्रिनेत्रान्वि
तैनागास्यैर्हरिवाहनं शशिधरं हे

रम्य मर्कप्रभं हस्ते दान मभीतिमो
दकरदान् टंकं शिरोत्तलिकांमा
लांगुष्टं मंकुशं त्रिशिखकं दोर्भि
र्दधानं भजे अस्य पुरश्चरणं त्रि
लक्षसंख्यकजपः ॥ मंत्रो
न्तरं गौतमप्रसादनायहस्त
तथाच विवंधे सम्बर्तको नेत्रयु
तः पार्श्वे वज्रासने स्थितः ।
प्रसादनाय हृन्मंत्रः स्वबीजाद्योर
शास्तरः अस्यध्यानं पाशांकु
शौ कल्पलतां विषाणं दधत्स्व
शुंडाहित बीजपूरः रक्तस्त्रिनेत्र
स्तरुणेंदु मौलि र्हारोज्वलो ह
स्तिमुखोऽवतान्नः अस्यपुरश्च
रणं लक्षजपः ॥ अथ हरि
द्रागणेश मंत्रः पंचांतको धरा
संस्थो बिन्दुभूषितमस्तकः प
कारो महामंत्रः सर्वकामफ
लप्रदः ध्यानंतु हरिद्राभं चतुर्वा
हुं हारिद्रवसनं विभुं पाशांकुश
धरं देवं मोदकं दंतमेव च ।
अस्य पुरश्चरणं चतुर्लक्षजपः
इति तंत्रसारः ॥
विनायिका स्त्री गरुडपत्नी इ
तिशब्दमाला ॥
विनाहेडा स्त्री विपर्णिकाइ
तिराजनिर्घंटः ॥

विनाशः पुं विनष्टः तत्पर्यायः
अदर्शनं २ इत्यमरः छुच्छुंदर इ
यथा पक्षाचोरतमा संध्यालोक
छुच्छुंटकली विभो इति श्रीभा
गवते इतिश्रीधरस्वामी ॥
विनाशकः त्रि विनाशकर्त्ता वि
पूर्वक नशधातो र्णक प्रत्यये
नतिष्पन्नः ॥
विनाशीन त्रि विनाशकरशीलः
विपूर्व नश धातो र्णिनप्रत्ययेन
निष्पन्नः ॥
विनाशोन्मुखं त्रि पक्वे इत्यमरः
नाशोद्यतश्च ॥
विनासकः त्रि गतनासिकः इ
तिजटाधरः ॥
विनाहः पुं कूपाननपिधानकः
इतिशब्दरत्नावली ॥
विनिद्रः त्रि उन्मीलितः इति
शब्दमाला निद्रारहितश्च ॥
विनिद्रत्वं क्ली प्रबोधः इतिहे
मचंद्रः निद्रारहितत्वंच ॥
विनिपातः पुं निपातः देवा
दिव्यसनं इति मेदिनी अव
मानः इति हेमचंद्रः ॥
विनिमयः पुं परिदानं प्रति
दानं इति शब्दरत्नावली बंधकः

4617

इति शब्दमाला यथा विक्रये
र्गां विनिमये दत्वा गोमांसखा
दके अतं चाद्रायणंऊर्ध्वं हृयेसा
त्वाद्व्यथी भवेत् इतिप्रायश्चित्त
तत्वधृत गोभिलवचनं ॥
विनियोगः पुं फलेअर्पणं इति
हेमचंद्रः विनियोजनं यथा ।
अनेनेदंत्व कर्तव्यं विनियोगः प्र
कीर्तितः इत्याह्निकतत्वं ॥
विनियोजितः त्रि विनियुक्तः वि
निपूर्व ण्यंत युज धातोःक्तप्र
त्ययेन निष्पन्नः ॥
विनिर्धूतः त्रि दूरवस्थयाचालि
तः यथा ततो देवा विनिर्धू
ता भ्रष्टराज्याः पराजिताः हृता
धिकाराखिदशा स्ताभ्यां सर्वे
निराकृताः इतिमार्कंडेये देवीमा
हात्म्ये विनिर्भयः पुं साध्यगण
विशेषः यथा मनो मंता तथा
प्राणो नृपोयानश्च वीर्यवान् ।
विनिर्भयो नयश्चैव हंसो नाराय
णोवृषः प्रभुश्चेति समाख्याताः
साध्याः द्वादश पौर्विकाः इतिव
ह्निपुराणे काश्यपीयवंशः भ
यरहितश्च विनिवृत्तः त्रि समाप्तः
निष्पन्नः विनिपूर्वक वृतधा
तोःक्त प्रत्ययेन निष्पन्नः ॥

विनिस्तृतः त्रि निस्तृतिविशिष्टः
स्तांतः निरस्तः विनि पूर्वक स्तृ
तधातोः क्त प्रत्ययेन निष्पन्नः
विनिहतः त्रि विनष्टः विनिपू
र्वक हनधातोः क्तप्रत्ययेन निष्पन्न
विनिक्षिप्तः त्रि विनिक्षेपाश्रयः
परिक्षिप्तः विनि पूर्वक क्षिपधा
तोःक्त प्रत्ययेन निष्पन्नः ॥
विनीतः त्रि विनयान्वितः वि
नयः शास्त्रतः संस्कारः इंद्रियदमो
वा तत्पर्यायः निभृतः २ प्रश्रि
तः ३ इत्यमरभरतौ जितेंद्रियः
अपनीतः हृतः निभृतः इतिमे
दिनीकार हेमचंद्रौ क्षिप्तः ।
इत्यजयपालः कृतदंडः । इति
स्मृतिः ॥
विनीतः पुं सद्वहाश्वः तत्पर्या
यः साधुवाही २ इत्यमरः
सुष्टुवाहनशीलकः २ इतिशब्द
रत्नावली वणिक् इति मेदिनी
दमनकवृक्षः शिक्षितवृषभादिः
इति राजनिर्घंटः ॥
विनीतकं पुं क्ली वैनीतकं पर
म्पराबाहनं इत्यमर टीकायां
रायमुकुटः ॥
विनीयः पुं कल्कः इति मुग्ध
बोधव्याकरणं पापं इति सिद्धां

तकौमुदी ॥
विनेता[२] पुं देशकः राजा
इति मेदिनी ॥
विनेयः त्रि नेतव्यः विपूर्वनी
धातो र्यः प्रत्ययेन निष्पन्नः ॥
विनोदः पुं कौतहलं इतिह
लायुधः क्रीडा इति भूरिप्रयो
गः आलिंगनविशेषः ।
तल्लक्षणं यथा नायको नायि-
काया दक्षिणपादं वामपादस्था
स्तमध्यदेशे स्वदक्षिणपादं वाम
पादस्था नायिका मध्यदेशे नि
धायवक्षसि वक्षः ओष्ठे ओष्ठं द-
त्वायदाश्लिषति तत् इतिकाम
शास्त्रे रागभेदविशेषः यथा
धीर्घे श्रयोरागतस्ताः प्रसवे हीप्र
तिष्ठितो विनोद एष हाराणि
त्रिंशत्को पुहयं भवेत इति पुंकि
कल्पतरुः द्वादशोत्तरशतान्वसे
तेषां लक्षणा मुनतः स्तनंदःसर्व
तो भद्रो भवेन्नान्दीमुखस्तथा
विनोदश्च विलासश्च विजयो-
विमलस्तथा रंगःकेलि मेघो
वीरोद्वाशोत भक्तीर्तिताः इति
भविष्यांतरपुराणे ॥
विन्दुः पुं जलकणा तत्पर्यायः
पृषत् २ पृषत ३ विप्रुट् ४ ।

इत्यमरः पृषंति ५ विप्रुट् ६
इति तट्टीका दंतक्षतविशेषः
भ्रुवोर्मध्य ञ्रूपकार्थमक्रूतिः ।
इति मेदिनी ज्ञानशीलः इति
शहरत्नावली अनुस्वारः यथा
विन्दु हिवेड मात्रो वर्णो क्रमा
ञ्जवीसंत्रो स्तः इति मुग्धबोधव्या
करणं अपिच शिवो वह्निमना
यूको तमास्ति विंड भूषितः
पकान्तरो महामंत्रः श्रीसूर्यस्यप्र
कीर्तितः इति सूर्यकवचे ॥
विन्दुत्पत्ति यथा सच्चिदानंद-
विभवात्मकलात्परमेश्वरात् ।
आसीच्छक्ति स्ततो नादो नादा
द्विन्दुसमुद्भवः इति सारदातिल
के १ पटलः अपिच आसीद्विन्द
स्ततो नादो नादाच्छक्तिः सम
द्रवा नादरूपा महेशानी चिद्रु
पा परमाकला नादाद्देव सम
त्पन्नो अर्द्धविन्दुर्भुजंगीकुल
कुंडली इति कुब्जिकातंत्रे १ प
टलः विन्दुर्नादो वीजमितित
स्य भेदाःसमीरिताः ।
विंडः शिवात्मको वीजशक्ति
र्नादस्तयो र्मिथः ॥ समवा
यःसमाख्यातःसर्वागम विशारदेः
इति सारदातिलकः अन्यत्र

4619

विंडः शिवात्मक स्तत्र वीजं श
क्त्यात्मकं स्मृतं तयो र्योगे भवे
न्नादस्ताभ्योन्नाता स्त्रिशक्तयः
इति क्रियासारः ॥
विंडः त्रिः ज्ञाता इत्यमरः ॥
दाता इत्यजयपालः वेदितव्यः
इति शहरत्नावली ॥
विंडचित्रकः पुं मृगभेदः इ
ति शहरत्नावली ॥
विन्दुजालं क्ली हस्तिशुंडोप
रिविचित्रविंडसमूहः इति हेम
चंद्रः ॥
विंडजालकं क्ली गजस्यमुखो
परिस्था विंडसमूहः तत्पर्यायः
पद्मकं २ इत्यमरः ॥ पद्मं ३
अत एव पद्मी हस्तीतिभरतः
विन्दुतंत्रः पुं अक्षः इति हारा
वली तुरंगकः यथा विंड
तंत्रः पुमान्सारिफलकेचतुरं
गके इति पवर्गी यवादौ मे
दिनी ॥
विन्दुपत्रः पुं भूर्जवृक्षः इति
रत्नमाला ॥
विंडरेखकः पुं पक्षिभेदः ।
इति शहचंद्रिका ॥
विंडसरः सं क्ली सरोवरविशेषः
यथा अभ्युत्तरेण कैलासंशिवं

सर्वौषधिं गिरिं गौरंतु पर्वत
श्रेष्ठं हरितालमयं प्रति ॥ हि
रण्य शृंगः सुमहान् दिव्योषधि
मयो गिरिः तस्य पादे महद्दिव्यं
सरः कांचनसन्निभं रम्यं विंडस
रो नाम यत्र राजा भगीरथः ग
गार्थे स तु राजर्षि रुवास बहु
लाःसमाः दिव्यं यास्यंति मे पूर्वे
गंगातोय परिप्लुताः तत्र त्रि
पथगा देवी प्रथमंतु प्रतिष्ठि
ता सोमपादात्प्रसृता सा सप्तधा
प्रतिपद्यते यूपा मणिमया स्तत्र
चितयश्च हिरण्मयाः तत्रेष्ट्वाक्र
तुभिः सिद्धः शक्रः सुरगणैःसह
दिव्यच्छायापथ स्तत्र नक्षत्राणां
तमंडलं दृश्यते भास्वरो रात्रौ
देवी त्रिपथगा तु सा अंतरीक्षं
दिवंचैव भावयित्वा भुवंगता
भवस्य लोके पतिता संरुद्धा
योग मायया तस्या ये विन्द
वः केचित्क्रुद्धायाः पतिता
भुवि कृतस्तु तै र्विन्दुसरास्त
तो विंडसरः स्मृतं इति मात्स्ये १२१
अध्यायः ॥
विष्कपर्णी स्त्री ज्वरापहा वेल
गुटा इति भाषा इति शह
चंद्रिका ॥

विन्ध्यसः पुं चंद्रः इति त्रिकाण्ड
शेषः ॥
विन्ध्यः पुं पर्वतविशेषः इत्य
मरः व्याधः इति मेदिनी ॥
विन्ध्यपर्वतस्य निम्नशृंगकारणं
यथा नारद उवाच किमर्थमेष
ड्रिं भगवानगस्त्य स्तं निम्नशृंगं
कृतवान्महर्षिः कस्मै कृते केन
चकारणेन तत्त्वदस्वाखिलस्य
महते पुलस्त्य उवाच पुराहि वि
ध्येन दिवाकरस्य गति र्निरुद्धा
गगनेचरस्य रविस्ततः कुम्भभ
वं समेत्य होमावसाने वचनं बभा
षे समागतो हं च द्विजयं मत्वा
कुरुष्व मय्युद्धरणं मुनींद्र ददस्व
दानं मम यन्मनीषितं चरामि ये
न दिवि स्वनिर्वृतः इत्थं दिवा
करवचो गुणसंगयोगि श्रुत्वा।
तदा कलसजो वचनं बभाषे दा
नं ददामि तव यन्मनसा त्वभीष्टं
नार्थी प्रयाति विमुखो मम क
श्चिदेव श्रुत्वा वचोऽमृतमयं क
लसोद्भवस्य प्राह प्रभुः करपुटं
प्रणिधाय मूर्द्धि ।
एषोद्य मे गिरिवरः प्ररुणद्धि
मार्गं विन्ध्यस्य निम्नकरणे भगवा
न्यतस्व इति रविवचनादुवाच
कुंभजन्मा कृत मिति तदिमया
रि

नीच शृंगं तव किरणा जितो
भविष्यतीति महीध्रो ममहि श
रणसमागतस्य का व्यथा ते इ
त्येवमुक्त्वा कलसोद्भवस्तु सूर्यं च
संस्तूय विनम्य भक्त्या जगाम सं
त्यज्य हि दंडकं हि विन्ध्याचलं हि
द्रुतमेव महर्षिः गत्वा वचः प्राह
मुनि महीध्रं यास्ये महातीर्थवरं
सुपुण्यं वृद्धोप्यशक्तश्च तवाधि
रोढुं तस्माद्भवान्नीचतरोस्तु सद्यः
इत्येवमुक्तो मुनिसत्तमेन स
नीचशृंग स्त्वभवन्महीध्रः स
माक्रमच्चापि महर्षिमुख्यः प्रो
ल्लंघ्य विन्ध्यं द्विजआह शैलं
यावन्न भूयो निज माव्रजामि म
हाश्रमं धौतवपुः सुतीर्थात्
तथा न तावद्भ्विह वर्द्धितव्यं न
चेत्स्वपिष्यह सवत्तया ते ॥
इत्येवमुक्त्वा भगवान्जगाम दि
ग्दक्षिणां यामी सहसांतरीक्षं आक्र
म्य तस्थौ सहि तां तदाशां का
ले व्रजाम्यत्र यदा मुनींद्र तथा
श्रमस्यान्तरं हि कृत्वा संशुद्ध जा
म्बूनदतोरणांते तत्राप्य निःक्षि
प्य विदर्भ पुत्रीं स्वमाश्रमं सौम्य
मुपाजगाम ऋतावृतौ कार्यपरो
ह्यागत्यो तिष्ठ तदा स्वाश्रममा
वसत्सः शेषंच कालं सहि दंडकस्य प

4621

त्रयामित कांतिमान्मुनिः वि
न्ध्योपि दृष्ट्वा गगने महाश्रमं है
हिंन यास्येव भयान्महर्षेः नासौ
निवृत्तो ऽभिमतिं विधाय मस्तं।
स्थितो नीचतराग्रशृंगः पर्वत
राजेन महाचलेन्द्रः सनीचशृंगो
हि कृतो महर्षे तस्याद्य शृंगे
मुनिसंस्तुता साऽदुर्गा स्थिताऽरा
तवधासनार्थं देवाश्च सिद्धाश्च
महोरगाश्च विद्याधरा भूताः
गणाश्च सर्वे सर्वाप्सरोभिः सुरि
तादिवानिशं कात्यायनी तस्थु
रपेतशोकाः इतिवामनपुरा
णो देवीमाहात्म्ये १८ अध्यायः
आर्यावर्त्तः पुण्यभूमि र्मध्यं विं
ध्य हिमागयोः इत्यमरः विंध्य
स्य पश्चिमे भागे मत्स्यभुक्ति
तो भवेत् इति प्राचीनाः ।
विन्ध्यकूटः पुं अगस्त्यमुनिः इ
ति त्रिकाण्डशेषः ॥
विन्ध्यवासी पुं व्याडिमुनिः इ
ति हेमचन्द्रः ।
विन्ध्यवासिनी स्त्री दुर्गा यथा
सहस्राक्षोपितोत्सवस्य विन्ध्ये वे
गाज्जगाम ह तत्र गत्वा तयो
वाच तिष्ठस्वात्र महावने हूय
मानास्तदा नाम्नाख्याता विन्ध्य
वासि

नी तत्र स्थाप्य हरि र्देवी रत्ना
सिंहं च वाहनं भवामरारिहन्त्री
ति ह्युक्त्वा स्वर्गमुपयात् इति
वामने ५१ अध्यायः ॥ अन्यच्च
विन्ध्येऽवतीर्य देवार्थे हतो द्वौ
यो महाभटः अद्यापि तत्र सा
वासो तेनसा विन्ध्यवासिनी ॥
इतिदेवीपुराणे ४५ अध्यायः ॥
विंध्यस्थः पुं व्याडिमुनिः इति
जटाधरः ॥
विन्ध्या स्त्री लवलीवृक्षः इति मे
दिनी त्रुटिः एलाचि इति भाषा
इति हेमचंद्रः ॥
विन्ध्यावली स्त्री बाणराजमा
ता इति पुराणं ॥
विन्ध्यावली पुत्रः पुं बाणराजः
इति जटाधरः । त्रिकाण्डशेषः
विन्नः त्रि विचारितः प्राप्तः ।
इत्यमरः विन्ध्यावलीसुतः पुं बा
णराजः इतिजटाधरः ॥
स्नातः स्थितः ।
इति विश्वः ॥ ॥
विमलः त्रि कृतविन्यासः य
थासद्भावा गुणाग्रसिता सुकृति
नां सत्कर्मणां ज्ञापिका सत्त्वामा
न्य विशेष निस विलिता भाव
प्रकर्षोज्ज्वल विभो र्वसामि वि

ष्णनाथकृतिना सिद्धान्तमुक्ताव
ली विमस्तामनसो मुदं वितनु
तां सद्युक्तिरेषा चिरं इति सिद्धा
न्तमुक्तावली विप्पाकः पुं विट्
वृक्षः छातियान् इति भाषा शब्द
चंद्रिका ॥
विन्यासः पुं स्थापनं रचनं ।
यथा ज्ञानार्णवे वैसवे त
पकैकवर्णमुच्चार्य मूलाधारा
च्छिरोऽन्तकं नमोन्त मितिवि
न्यासश्चांतरः परिकीर्त्तितः अ
पि चौमाद्यैन्तो नमोन्तोवास
विन्दुविष्ट वर्जितः पंचाशद्व
र्णो विन्यासः क्रमाद्युक्तो मनीषि
भिः इतिभट्टः इति तन्त्रसारः
अन्यच्च रदेषु मणिविन्यासोवि
ज्ञेयो नच हेउवन् विष्णुहीर
कन्यासो विधेयः सतोपरि ते
न सर्वाणि नश्यन्ति अभिधानि
महीभुजो इतियुक्तिकल्पतरुः
किंच तया कविलया किंवा
तया वनितयाच किं पदवि
न्यासमात्रेण यया नापहृतंम
नः इत्युद्भटः ।विपक्षेपे।
इति कविकल्पद्रुमः कर्त्तेपय
ति इतिदुर्गादासः ॥
विपंचिका स्त्री वीणा शब्द
रत्नावली ॥
विपञ्ची स्त्री वीणा इत्यमरः
केलिः इति मेदिनी ॥
विपणः पुं विक्रयः इत्यमरः वि
पणिः पुं स्त्री पण्यविक्रयशा
ला इति हलायुधः हट्टः इत्यमे
विक्रयार्थं प्रसारित नानाद्रव्या
यावणिग्वीथ्यां वाणियाविथी
इतिबाजार इतिचख्यातयामि
ति केचित् हट्टमंडपः इतिके
चित् हट्टमध्यस्थपण्यविक्रय
वीथी इतिकेचित् इति भरतः
तत्पर्यायः पण्यवीथिका २ इ
मरः आपणः ३ पण्यवीथी ४
पण्य ५ इति रभसः निषद्या
वणिक्पथं ७ इत्यमरदत्तः ॥
विपनं ८ वीपी ९ इतिकोषः
निषद्या विपणिः पण्यवीथि
कापणिः स्मृता पण्यविक्रय
शालायां भवेदेतच्चतुष्टयं इति
शब्दरत्नावली विपणिः पण्य
वीथ्यांच भवेदापण पण्ययोः
इति मेदिनी ॥
विपणी पुं वणिक् इतिज
टाधरः ॥
विपणी स्त्री हट्टः इतिहिर
एकोषः ॥

विपत्तिः स्त्री आपत् । विपत्
इत्यमरः यातना । इति मेदि
नी यथा भृगुरुवाच अनंतसवे
श्वरश्रेष्ठ मार्कण्डे वचनं शृणु न
कारोद्दिनी तिसो विपत्तोच करा
वनः संपत्तिर्वा विपत्तिर्वा नश्वरा
स्वमरूपिणी सर्वेषकर्माधनाच
स्वयंकर्त्ता तपो ऽपि इति ब्रह्म
वैवर्त्ते प्रकृतिखंडे ३४ अध्यायः
विनाशः यथा यस्मिन्राशिगते
भानौ विपत्तिं यांति मानवाः ।
तेषांतत्रैव कर्त्तव्या पिंडदानोदक
क्रिया इति मलमासतत्त्वं ॥
विपथः पुं निन्दितपथः तत्प
र्यायः व्यध्वः २ दुरध्वः ३ कदध्वा
४ कापथः ५ इत्यमरः कुपथः
६ असत्पथः ७ कुत्सितवर्त्म ८
इतिशब्दरत्नावली ॥
विपत् } स्त्री विपत्तिः इत्यमरः
विपद् }
विपदा स्त्री विपत् इत्यमरटी
कायां रायमुकुटः
विपन्नः त्रि विपदाक्रान्तः इति
मेदिनी नष्टः इति शब्दरत्नाव
ली ॥
विपन्नः पुं सर्पः इति मेदिनी
विपरीतः त्रि विपर्ययः उलटा
इति भाषा तत्पर्यायः प्रति
सव्यः २ प्रतिकूलः ३ अपसव्यः
४ अपष्ठुः ५ विलोमकः ६ इति
जटाधरः प्रसव्यं ७ पराचीनं
८ प्रतीपं ९ इति शब्दरत्नाव
ली षोडशावन्धागत दशम
बंधः यथा पादमेकं सुरोकृ
त्वा द्वितीयं कटिसंस्थिते ।
नारीषु रमते कामी विपरीत
स्तु बंधकः इति रतिमंजरी अ
पिच पादमेकं सुरोहत्वा द्वि
तीयं स्कंधसंस्थिते कामिन्याः
कामयेत् कामी बंधः स्याद्विपरी
तकः इति स्मरदीपिका ॥
विपरीता स्त्री कामुकी इति
धनंजयः ॥
विपर्णकः पुं पलाशवृक्षः
इतिशब्दचन्द्रिका ॥
विपर्य्ययः पुं व्यतिक्रमः त
त्पर्यायः व्यत्यासः २ विपर्यासः
३ व्यत्ययः ४ इत्यमरः विप
र्यायः ५ इति भरतः ॥
विपर्य्यायः पुं विपरीतमयनं
अन्यस्यान्यरूपग्रहणं इतिभर
तः विपर्याये कृते नास्ति न
कुले रेउ पितृयोः इति कुला
चार्यकामिका ॥

विपर्यासः पुं विपरीतमासः, अ
न्ने विपर्ययः इत्यमरः ॥
विपक्वं त्रि शोधनीयं विपूर्व
पूधातो यं प्रत्ययेन निष्पन्नं ॥
विपश्यी न पुं बुद्धभेदः इतिहेम
चंद्रः ॥
विपश्चित् त्रि पंडितः इत्यमरः
विपक्षः पुं शत्रुः इत्यमरः ॥
विपाकः पुं पचनं स्वेदः कर्म
णो विसदृक्फलं इतिमेदिनी
परिणामः दुर्गतिः स्वादः इति
हेमचंद्रः जातिः आयुः भो
गः इति कुसुमांजलिः ॥
जाठरेणाग्निना योगाद्यदुदे
तिरसांतरं रसानांपरिणामांते
सविपाक इति स्मृतः इतिसु
श्रुतः अपिच मिष्टः कट्वम्लमधु
रमम्लोऽम्लंपच्यते रसः कटुति
क्त कषायाणां पाकःस्यात्प्राय
शः कटुः तथाच वाग्भटः त्रि
धा रसानांपाकःस्यात्स्वादुरम्ल
कटुकात्मकः प्रायःपदेनबोधितः
स्वादुः गुरुविपाकः शिवाकषा
या मधुपाका शुंठीकटुक मधु
रपाके स्वादिः अथ विपाकानां
गुणा श्लेष्मकृन्मधुरःपाको वात
पित्तहरो मतः अम्लस्तु कुरुते पित्तं
वात

श्लेष्मगदापहः कटुः करोतिप
वनं कफं पित्तंच नाशयेत् ।
विशेष एष रसतो विपाकानांनि
दर्शितः इतिभावप्रकाशः ॥
विपाट् श स्त्री विपाशानदी । इत्य
मरः ॥
विपाठः पुं बाणः इति त्रिकांड
शेषः ॥
विपादिका स्त्री पादस्फोटः इत्य
मरः प्रहेलिका । इति शब्दमा
ला वैपादिकंपाणिपादेस्फुटनं ती
व्रवेदनं कंडूमद्भिःसरागैश्च गंडैर
लसकं चितं ॥ विपादिका
वातश्लेष्मोद्भवा । इतिमाधवक
रः ॥ अयं कुष्ठरोगः ॥
विपाशा स्त्री नदीविशेषः । इत्य
मरः पुत्रशोकादेव गते पाशैव
द्ध्वा प्रविष्टं वशिष्ठं पाशच्छेदात
विपाशि तवती विमुक्तपाशंकृत
वतीति विपाशान्नि कस्मादे रि
ति पाशं विमोचयति इत्यर्थेनिः
पचादित्वादन् आपापर्वं क्विपि वि
पाट् इति तट्टीकायां भरतः ॥
तस्या जलगुणा शतद्रू विपाशा
पुत्रः सिन्धुनद्याः सुशीतं लघुस्वा
दु सर्वामयघ्नं जलं निर्मलं दीपनं
पाचनंच प्रदत्ते बलं बुद्धि मेधा

4625

युयंच इति राजनिर्घंटः पाप
वर्जिते त्रि इति धरणिः ॥
विपिनं क्ली वनं इत्यमरः ॥
विपुलः त्रि वृहत् इत्यमरः
अगाधे इति मेदिनी
विपुलः पुं मेरुपश्चिमभूधरः
इति मेदिनी सुमेरुः हिमा
चलः इति धरणिः
विपुलरसः पुं इक्षुः इतिके
वित् विपुला स्त्री पृथिवी आ
र्याच्छंदभेदः इतिहेमचंद्रः अ
स्या लक्षणादि यथा पथ्यावि
पुलाचपलामुखचपलाजघन
चपलाच गीत्युपगीत्युद्गीतय
आर्यागीतिश्चनवधार्या संलंघ्य
गणत्रयमादिमं सकलयो द्वयो
र्भवति पादः यस्यास्तांपिंगल
नागा विपुलामिति समाख्या
ति भुंसाकालिकालव्यालहता
नां नान्यपरहतिस्त्वापि वीर्यं
विपुला भुवि चेत्स्यात्तो विद्या
द्य मंत्रकला इतिछंदोमंजरी
विपुलास्रवा स्त्री गृहकन्या
राजनिर्घंटः
विप्रयः पुं मुंजः इतिमुग्ध
बोधव्याकरणं यथा बूमानाव
स्कलेमुंडे विप्रयैः कृतेमेखला
ला

मा मेजन् पिंड्या भी दंदिनीम
जिनास्तरा इति भट्टिः ॥
विप्रः पुं ब्राह्मणः इत्यमरः
विशेषेण प्राति पूरयति षट्
कर्माणि विप्रः प्राल पूर्तौ इत्य
स्मात् र प्रत्ययः किम्वा उप्यन्ते
धर्मवीजं मत्र इति वपे नोस्त्री
ति रेनिपातनादृत्वं इतिभ
रतः तस्यलक्षणं यथा जन्म
नाब्राह्मणो ज्ञेयः संस्कारैर्द्विज
उच्यते विद्ययायाति विप्रत्वंत्रि
भिःश्रोत्रिय लक्षणं इतिप्रा
यश्चित्तविवेकः अश्वत्थः इति
राजनिर्घंटः ।
विप्रकारः पुं अपकारः तस्य
पर्यायः विकारः २ इत्यमरः ॥
खलीकारः इतिस्वामी तिर
स्कारः इति हेमचंद्रः ॥
विप्रकाष्ठं क्ली तलवृत्तः इ
तिराजनिर्घंटः ॥
विप्रकृतः त्रि तिरस्कृतः त
त्पर्यायः निकृतः २ इतिहेम
चंद्रः ॥
विप्रकृतिः स्त्री विप्रकारः वि
प्र पूर्वेक कृधातो क्ति प्रत्ययेन
निष्पन्ना ॥
विप्रकृष्टः त्रि दूरः इतिहलायुधः

यः यत्र विरोधे उक्ति र्वच
नंविरोधोक्तिः इति भरतः
अनर्थकवाक्यं इति हेमचंद्रः
विप्रलोभी न पुं किंकिरातवृ
क्षः इति राजनिर्घंटः ॥
विप्रश्निका स्त्री दैवज्ञा इत्यम
रः विप्रियः पुं अपराधः तत्प
र्यायः मंतुः २ व्यलीकं ३ आ
गः ४ इति हेमचंद्रः अप्रिये त्रि
विप्रुट् ष स्त्री बिन्दुः इत्यमरः
वेदपाठे विप्रुषो मुखनिर्गत
जलबिन्दवो ब्रह्मबिंदव उच्यन्ते
तेऽशुद्धाः यथा मक्षिकाविप्रु
षच्छायागौरश्वः सूर्यरश्मयः
रजोभूर्वायुरग्निश्च स्पर्शमे
ध्यानि निर्दिशेत् इति आह्निक
धर्मतत्त्ववचने आचमनकालेषु
मुखनिर्गता विप्रुषो न उच्छिष्टज
निकाः यथा नोच्छिष्टं कुर्वन्ते
मुख्या विप्रुषोऽङ्गं नयन्ति याः दंत
वद्दंतलग्नेषु जिह्वास्पर्शेऽशु
चिर्भवेत् इति कौर्मे उपविभा
गे १२ अध्यायः ॥
विप्रोषितः त्रि प्रवासितः वि
प्र पूर्वक वसधातोः क्त प्रत्य
येन सिद्धः ॥ विप्लवः
पुं परचक्रादिभयं । इति
भरतः राष्ट्रोपद्रवः । इति

तारसुंदरी तत्पर्यायः डिम्बः
२ डमरः ३ इत्यमरः असकल
हः इति स्वामी ॥
विस्रावः पुं अश्वस्नुतगतिः
विपूर्व स्रु धातो र्घञ प्रत्यये
न निष्पन्नः ॥
विप्लुट् ष स्त्री विप्रुट् बिंदुः इत्य
मरटीकायां रामाश्रमः ॥
विप्लुतः त्रि व्यसनार्त्तः तत्पर्या
यः पंचभद्रः २ व्यसनी ३ इति
हेमचंद्रः ॥
विफलः त्रि निरर्थकं तत्पर्या
यः मोघं २ वृथा ३ इतिजटाध
रः विफला स्त्री केतकी इति
राजनिर्घंटः ॥
विबधः पुं पर्याहारः मार्गः ।
इत्यमरः परित आह्रियतेऽसौ
पर्याहारो धान्यतंडुलादिः मा
र्गः पंथाः तौ विबधौ वीवधौच
विगतौ वधोऽस्मादिति विबधो
वधो हननं गमनं मैथुनंच वि
वधः निपातनात्साधु वेदीर्घत्वे
वीवधश्च इति भरतः भारः
इति विश्वमेदिन्यौ ॥
विबंधः पुं आनाहरोगः इत्य
मरः अथ तस्य चिकित्सा तत्
कारणं कार्यत्वात् उदावर्त्तरो

4629

क्रियां आनाहे ऽपिच कुर्वीत
विशेषु आस्थीयते त्रिवृत्ता
ला हरीतक्यो हिंगवः पंचभा
गिकाः गुडेन तुल्या वटिकाः
दंत्यानाह मुत्रने वर्त्तिस्त्रिकटु
सैंधव सर्षप गृहधूम कुष्ठ मद
नफलैः मधुनि गुडेवा पक्वैर्वि
हिता ङ्गुष्ठ परिमाणा वर्त्ति
र्यं उष्णफला शनैः प्रणिहि
ता गुदे छन्नात्मके आनाहोदाव
र्त्तौ शमयति जठरं तथा गुल्मं
त्रिकटु कान्त्या वर्त्तिः इतिभाव
प्रकाशः ॥
विबाधा स्त्री विहेठनं इति त्रिकां
डशेषः । विविधः त्रि नानाप्रका
रं यथा सपक्वरावनं गत्वा हत्वाच
विविधान्मृगान् मांसभारं वहन्
गेहं स्वकीयं येन मुग्धतः इतिशि
वरात्रिव्रतकथा ॥
विबुधः पुं देवः इत्यमरः ॥
पंडितः इति मेदिनी चंद्रः ।
इति हलायुधः ॥
विबुधानः पुं आचार्यः पंडितः
देवः इति संक्षिप्तसारोणादिवृ
त्तिः ॥
विबोधः पुं अनवधानता इ
तिकेचित् प्रबोधश्च ॥

विबोधनं क्ली प्रबोधनं यथा
तथैव योगनिद्रांता मेकाग्र
हृदयस्थितः विबोधनार्थाय
हरेर्हरि नेत्रकृतालया इति देवी
माहात्म्यं ॥
विभक्तः त्रि प्राप्तविभागः वि
भिन्नः पृथक् यथा वृहस्पतिः
पित्रा सह विभक्ता ये सापत्न्या
वा सहोदराः जघन्यजाश्च येते
षां पितृभागहरा स्तु ते अनीशाः
पूर्वजः पित्र्ये भ्रातृभागे विभक्त
जः विभक्तजो विभागानंतरं ग
र्भाधानेन जातः ॥ अपिच
व्यासः भ्रातृणामजीवतोः पित्रोः
सहवासो विधीयते तदभावे वि
भक्तानां धर्मस्तेषां विवर्द्धते ॥
विभक्तानां स्वमात्रयने वैदि
ककर्मकरणानन्मात्र धर्मत्वेन
तद्वृद्धिरित्यर्थः विभक्ता अवि
भक्ता वा सपिंडाः स्थावरे समाः
एको ह्यनीशः सर्वत्र दानाधमन
विक्रये अपिच दानग्रहण प
श्वन्न गृहक्षेत्र परिग्रहाः विभ
क्तानां पृथक्ज्ञेयाः पाकधर्मागम
व्ययाः साक्षित्वं प्रातिभाव्यं
च दानं ग्रहणमेवच विभ
क्ता भ्रातरः कुर्युर्नाविभक्ताः प
रस्परं ॥ येषां

मेताः क्रियालोके प्रवर्त्तन्ते स
स्त्वयतः विभक्तानवगच्छेयुर्ते
ष्व मप्यन्तरेण तान् इतिनार
द वचनात् तथा ब्राह्मणम
घ्यदस्मयोः पितुःपुत्रस्यचैवहि
प्रातिभाव्यमृणं साक्ष्यमविभ
क्तेनतस्मृतं इति याज्ञवल्क्यव
चने तथा विभक्तो यः पुनः पि
त्रा भ्रात्रा चैकत्र संस्थितः पित
व्येणापि वा प्रीत्या सत संसृष्ट उ
च्यते इतिबृहस्पतिवचने येषा
मेव हि पितृभ्रातृपितृव्यादीना
पितृ पितामहोपार्ज्जितद्रव्येण
विभक्तत्वमुक्तं तैः संभवति त
एव विभक्ताः सन्तः परस्परमी
सा पूर्व्वकृत विभागध्वंसेनय
त्नवधनेनत्समयनेपन्नमयने
युक्तमयते तत्रापि इत्येकस्मिं
कार्ये पक्रमरद्विगुणतयो स्थि
ताः संसृष्टाः तत्त्वेनेव गुणानां धन
संसर्गे मात्रेण नापि विभक्ताः
नाधीति सर्व्वेकाधिसंधानं विना
तथा वेधुना सविभक्तानां भो
गोनैव प्रज्ञापयेत् इतिकात्या
यनवचनं तथा ब्राह्मणामवि
भक्तानामेको धर्मःप्रवर्त्तते वि
भागेसति धर्म्मोपि भवेत्तेषां पृ
थक्पृथक् तथा ब्राह्मणामवि

विभक्तानां यमुत्थानं भवेत्सह
नतत्र भागं विषमं पिता दद्या
त्कथंचन इतिमनुवचनं तथा
कात्यायनः अविभक्ते मृते पुत्र
तत्सुतं रिक्थभागिनं उर्व्वीतजी
वनं येनलब्धंनैव पितामहात्
लभेतांशं सपिण्डेच पितृव्यात्तस्य
वाप्नुयात् । तथा ।
विभ्रः पितृविभक्ता विभागानंत
रोः पन्नस्य विभागं दद्युः ॥
अपिच अविभक्त विभक्तानां कु
ल्यानामवसतां सह भूयो दायवि
भागः स्यादाचतुर्थादिति स्थितिः
इतिकात्यायन वचने अविभक्ता
नां सहवसतां संसृष्टानां वा पुन
र्विभागो भ्रातृ तत्सुत तत्सुत
पर्य्यन्त मेव तत्सुतसुतसुतयोर्न्निव
र्त्तते इति यथा अविभक्तेस्था
वरे यत्सर्व्वेषामेव तद्भवेत् वि
भक्ते स्थावरे प्राप्ते नान्यत्सर्व्वैः
कदाचन इति यमवचनं पता
नि वचनादीनि दायतत्त्व धृता
नि अपिच अविभक्ता वा कुर्युः
श्राद्ध मेदैविके मथाग्नितथा
मन्त्राधिकारः पृथक् विना ॥
इतिश्राद्धतत्त्वे ॥ अन्यच्च वर
वःसर्व्वदा पुत्राः पितुरेकत्रवासिनः

4631

सर्व्वेषांतु मतं कृत्वा ज्येष्ठेनैव
तुयत्कृतं द्रव्येण चाविभक्तेन
सर्व्वैरेवकृतं भवेत् । इति
शुद्धितत्त्वं ॥
विभक्तजः पुं विभागानन्तरंग
र्भाधानेन जातः यथा बृहस
तिः पित्रा सह विभक्ता येषा
पत्यावा सहोदराः जघन्यजा
श्च ये तेषां पितृभागहरास्तुते
अनीशाः सर्व्वजाः पित्र्ये भ्रातृभा
गे विभक्तजः यथा धने तथर्णे
पि भुक्ता शौचोदकक्रियाः इ
तिदायतत्त्वं ॥
विभक्तिः स्त्री विभागः स्यादिः
स्यादिश्च यथा संख्यात्वया
प सामान्यैः शक्तिमात्र्यमयत्त
यः साविभक्ति द्विधा प्रोक्तास्पु
तिङ् चेति प्रभेदतः संख्या
त्वावान्तर जात्यवच्छिन्न शक्तिः
मान्यः प्रत्ययः साविभक्तिः सु
प्तिङ् इतिभेदाद्द्विविधा इतिश
ब्दशक्तिप्रकाशिका ॥
विभजनीयं त्रि विभाज्यं विभा
गयोग्यं यथा वृहस्य प्रयो
जनार्हं पुस्तकादि तन्मूर्ध्वा
दिभिः सह पैतामहिमपि नवि
भजनीयं इतिदायतत्त्वं भजनाः
र्हे वि

सर्व्वे भजयातो वर्णीय प्रत्यये
ननिष्पन्नं ॥॥
विभवः पुं धनं मोक्षः पे
र्य्ये इति मेदिनी प्रभवादि
षष्टिसंवत्सरान्तर्गत द्वितीयव
र्षे यथा भविष्यपुराणे भैरव
उवाच सुभिक्षं क्षेम मारोग्य
सर्व्वे व्याधि विवर्जिताः प्रशा
न्तामानवा स्तत्र वड़शस्या वसु
न्धरा हृष्टा स्तुष्टा जनाः सर्व्वे
विभवे चैवरानने इतिज्योतिस्त
त्त्वं विभा स्त्री किरणः इतिहे
मचन्द्रः प्रकाशः शोभा इति
राजनिर्घण्टः ॥
विभाकरः पुं सूर्य्यः अर्कवृक्षः
चित्रकवृक्षः इत्यमरः अग्निः
इति मेदिनी ॥
विभागः पुं भागः अंशपर्य्या
यः अंशशब्दं द्रष्टव्यः अस्यल
क्षणं यथा एकदेशोपात्तस्य
वस्तुनो हिरण्यादेरन्यत्र स्वत्व
स्य विनिगमनाप्रमाणाभावे
न वैशेषिक व्यवहारानर्हत
या अव्यवस्थितस्य गुटिकापा
तादिना व्यञ्जनं विभागः वि
शेषेण भजनं स्वत्वज्ञापनं वावि
भागः इतिदायभागः अपिच
विभागोऽर्थस्य ॥

पितृस्य पुत्रे यत्र प्रकल्पते
दायभाग इति प्रोक्तं तद्विवाद
पदं बुधैः इति नारदवचने पु
त्रस्वामिस्वत्वोपरमे सम्बन्धावि
शेषात्स्वत्वोपेतानां सर्वधन प्रसृ
तस्य स्वत्वस्य गुटिकापातादिना
प्रादेशिक स्वत्वव्यवस्थापनं वि·
भागः अपि च कात्यायनः जीव
द्विभागेतु पितानैकं पुत्रं विशेष
येत् निर्भाजयेन्नैवैकमक·
स्मात्कारणं विना उक्तकारणं
प्यसे तु नारदः प्राथितः ऽपि
तस्यैव विषयासक्तचेतनः अय
था शास्त्रकारीचनविभागेऽपि
ता प्रभुः निवृत्तरजस्काया मेव
मातरि पितामहधन विभाग
माह बृहस्पतिः पित्रो रभावे भ्रा
तृणां विभागः संप्रदर्शितः मा
तुः निवृत्ते रजसि जीवतोऽपिश
स्यते अन्यत्र याज्ञवल्क्यः विभा
गञ्चेत्पिता कुर्यादिच्छया विभजे
त्सुतान् ज्येष्ठं वा श्रेष्ठभागेन सर्वे
वा स्युः समांशिनः अपि च देव
लः अविभक्तविभक्तानां कुल्या
नां वसतां सहैकया दायविभा
गः स्याच्चतुर्थादिति स्थितिः वि
भुः पितृविभक्ता विभागानन्तरो
त्पन्नस्य विभा

गं दद्युरिति गोत्र भाग विभा
गार्थं संदेहे समुपस्थिते गोत्र
जैः स्वापरिज्ञाने कुले साक्षि
मद्देति इति प्रोक्तवचने इतिहा
यतत्वं सामान्य धर्मावच्छिन्ना
नामेव वस्तूनां परस्पर विरुद्ध
द्वाप्य धर्म प्रकारेण प्रतिपाद
नेहि विभागः इति श्राद्धविवेक
टीकायां श्रीकृष्णतर्कालंकारः
न्यायमते चतुर्विंशति गुणान्त
र्गत गुणविशेषः स त्रिविधः य
था शक्षारेतु द्वितीयः स्याद्विभागो
ऽपि त्रिधा भवेत् एककर्मोद्भवस्त्वा
द्यो द्वय कर्मोद्भवः परः विभा
गज स्तृतीयः स्यात्तृतीयोऽपि द्वि
धाभवेत् हेतुमात्र विभागोत्थ
हेत्वहेतु विभागजः इति भाषा
परिच्छेदः विभक्त प्रत्ययकार
णं विभागं निरूपयति विभाग
इति एककर्मेति उदाहरणं तु श्ये
नशैल विभागादिकं पूर्ववद्बोध्यं
तृतीयो विभागजः कारणविभा
गजन्यश्चेति आद्य स्तावत्तत्र कपा
लकर्म ततः कपालद्वयविभाग
स्ततो द्रव्यारम्भकसंयोगनाशस्त
तो द्रव्यनाशः ततस्तेन एककपाल
विभागजन्यः कारणाकारणविः

विभागेन सकर्मणः कपालस्य
देशान्तर विभागो जन्यते ततउ
त्तरदेश संयोगः ततः कर्मनाश
इति नच तेन कर्मणैव कथं दे
शान्तरविभागो नजन्यते इतिवा
च्यं एकस्य कर्मणः आरम्भक
संयोग प्रतिद्वंद्वि विभागजनक
त्वविरोधात् अन्यथा विकसत्क
मलकुड्मल भंग प्रसंगात्तस्माद्य
दीदं अनारंभकसंयोगप्रतिद्वंद्वि
विभागं जनयेत्तदा आरंभकसं·
योगप्रतिद्वंद्विनमपि विभागं जनयेत्
नचकर्मणा विभागेनैव द्रव्यनाश
स्सर्वं कुतो देशांतरविभागो नज
न्यते इति वाच्यं आरंभक संयो
गप्रतिद्वंद्वि विभागवतो अवय
वस्य सति द्रव्ये देशान्तरविभागा
संभवात्पत्र हस्त क्रियया हस्तत
रु विभागः ततः शरीरेऽपि विभ
क्तप्रत्ययो भवति तत्र च शरीरत
रु विभागे हस्त क्रिया नकारणं
व्यधिकरणत्वात्शरीरे तु क्रिया
नु कारणं व्यधिकरणत्वान्नास्ति
अवयविकर्मणो यावदवयवक
र्म नियतत्वात् अतस्तत्रकारणा
कारण विभागेन कायकार्यवि
भागो जन्यते इति अत एववि
भागो गुणांतरं

अन्यथा शरीरे विभक्ताविभक्त
प्रत्ययोनस्यात् अतः संयोग·
नाशेन विभागो नान्यथासिद्धो
भवति इति सिद्धांतमुक्तावली
विभाज्यं त्रि विभजनीयं विभा
गार्हं यथा कुले विनीत विद्या
नां भ्रातृणां पितृतोऽपि वा ।
शौर्यप्राप्तंतु यद्वित्तं विभाज्यं
तद्बृहस्पतिः पित्र्येऽपि हि धर्मा
ऽयं मूल्याद्यद्वाप्यधिकं भवेत् प
रं निरस्य यल्लब्धं विद्यया द्यूतश्
चैवं विद्याधनंतु तद्विद्यान्नवि
भाज्यं बृहस्पतिः तथा शौर्य
भार्याधने चोभे यच्च विद्याधनं
भवेत् त्रीण्येतान्यविभाज्यानि प्र
सादो यश्च पैत्रकः इति दा
यतत्वं ॥
विभाण्डकः पुं मुनिविशेषः स
तु ऋष्यशृंगपिता इतिरामायणं
विभाण्डी स्त्री आवर्तकीलता
इति राजनिर्घंटः ॥
विभातं क्ली प्रत्यूषः इतिशब्द
रत्नावली ॥
विभावः पुं परिचयः रसस्यो
दीपनादिः इति मेदिनी त
ल्लक्षणादि यथा विभावेनानु
भावेनव्यक्तः संचारिणा तथाऽर
सता

मेति रत्यादिः स्थायी भावः स
चेतसां विभावादयो वर्त्तंते ।
विभावादीनां यथा संख्यं का
रणकार्यं सहकारित्वे कथं
त्रयाणामपि रसोद्बोधे कारण
त्व मिष्यते कारणकार्यसं
चारि रूपा अपिहि लोकतः र
सोद्बोधे विभावाद्याः कारणमे
व ते मताः सद्भावाश्च विभावा
दे र्द्वयो रेकस्य वा भवेत् कटि
त्यन्यं समाक्षेपे तदा दोषो नवि
द्यते विभावादिपरामर्श विष
यत्वात्सचेतसां परानन्दमयत्वे
न संवेद्यत्वादपि स्फुटं अथ
केतेविभावानुभाव व्यभिचारि
ण इत्यपेक्षायां विभाव माह र
त्याद्युद्बोधका लोके विभावाः
काव्यनाट्ययोः येहि लोके रामा
दिगत रति हासादीनां उद्बोधका
रणानि सीतादय स्तएवकाव्य
नाट्येच निवेशिताः सन्तो विभा
व्यन्ते आस्वादाङ्कुर प्रादुर्भाव
योग्याः क्रियन्ते सामाजिकरत्या
दिभावा एभि रिति विभावा उ
च्यंते आलम्बनोद्दीपनाख्यौ त
स्यभेदावुभौ स्मृतौ इति सा
हित्यदर्पणः ॥

विभावनं क्ली १ अलंकारविशेषः
विभावना स्त्री स च विनाकारणं
उपनिबद्ध्यमानोपि कार्योदयरूपः
यथा विभावना विनाहेतुं का
र्योत्पत्ति र्यदुच्यते उक्तानुक्त
निमित्तत्वाद्द्विधा सा परिचिन्त्य
ते उक्ता यथा अनायासकृशं म
ध्यमशंकातरले दृशौ अभूषणं
मनोहारि वपु र्वयसि सुभ्रुवः
अनुक्ता यथा सपद्य जीर्णि जय
ति जगंति कुसुमायुधः हरता
पि तनुं यस्य शम्भुना न हृतं ब
लं इति साहित्यदर्पणः ॥
विभावरी स्त्री रात्रिः इत्यमरः
हरिद्रा कुट्टनी वक्रयोषित् ॥
विवादवल्लमेड्री इति मेदिनी
मोगद्वयनिरतेञ्जी इति शब्दरत्ना
वली मेदावृक्षः इति रत्नमाला
विभावसुः पुं सूर्यः अर्कवृक्षः
अग्निः चित्रकवृक्षः इत्यमरः
चंद्रः हारभेदः इति हेम चं
द्रः
विभावितः त्रि विचिंतितः वि
शेषेण उत्पादितः विशेषेणज्ञा
पितः विमिश्रयितः इतिण्यंत
भूधातोःक्त प्रत्ययेन निष्पन्नः
विभाषा स्त्री विकल्पः यथा द्वयो

र्विभाषयो र्मध्ये विधि र्नित्यः
इतिमुग्धबोधव्याकरणं ॥
विभिन्नः त्रि विभक्तः विदीर्णः
यथा गदा परशु खड्गैश्च चक्रोत्त
मर शायकैः विभिन्ने वेदना या
हि त्वयया सापि निर्जिता इति
हाससमुच्चयः ॥
विभीतकः त्रि वृक्षविशेषः बहे
डा इति भाषा तत्पर्यायः ।
अक्षः २ तुषः ३ कर्षफलः ४
भूतवासः ५ कलिद्रुमः ६ इत्यमरः
कलिवृक्षः ७ संवर्त्तः ८ इतिर
त्नमाला तैलफलः ९ भूतावा
सः १० संवर्त्तकः ११ वासंतः १२ क
लिवृक्षः १३ बहेडुकः १४ हार्यः १५
विषघ्नः १६ अनिलघ्नः १७ कासघ्नः
१८ अस्यगुणाः कटुत्वं तिक्तत्वं ।
कषायत्वं उष्णत्वं कफापहत्वं ।
चक्षुष्यत्वं पलितघ्नत्वं । वि
पाके मधुरत्वंच तन्मज्जगुणाः
तृष्णा छर्दी कफ वातहरत्वं ल
घुत्वं मधुरत्वं मदकारित्वंच ॥
तत्तैलगुणाः स्वादुत्वं हिमत्वं
केश्यत्वं गुरुत्वं पित्तानिला
र्त्तिनाशित्वंच इति राजनिर्घंटः
अपिच अथ विभीतकनामा
नि गुणाश्च विभीतक स्त्रि

लिंगः स्यादक्षः कर्षफल स्तुषः क
लिद्रुमो भूतवास स्तथा कलियु
गालयः विभीतकं स्वादुपाकं क
षायंकफ पित्तनुत् उष्णवीर्यं
हिमस्पर्शभेदनं कासनाशनं रू
क्षं नेत्रहितं केश्यं कृमि वैस्वर्य
नाशनं विभीतमज्जा तृट् छर्दि
कफ वातहरो लघुः कषायो म
दकृच्चाथ धात्री मज्जापि तद्गुणः
इतिभावप्रकाशः अन्यच्च विभी
तं भेदि तीक्ष्णोष्णं वैस्वर्य्य क्रिमि
नाशनं चक्षुष्यं स्वादुपाकंच कषा
यंकफ पित्तजित् इति राजवल्लभः
अस्य कलिद्रुमत्वकारणं यथा
पुलस्त्य उवाच ततो गतेषु देवे
षु ब्रह्मलोकं प्रति द्विज त्रै
लोक्यं पालयामास बलि र्धर्मा
न्वितः सदा कलि स्तदा धर्मयु
तं जगद्दृष्ट्वा कृते यथा ब्रह्मण
शरणं भेजे स्वभावस्य निषेधना
त् प्रणिपत्य तमाहाथ तिष्ठोत्व
ब्रह्माणमीश्वरं मम स्वभावो बलि
ना नाशितो देवसत्तम तमाह भ
गवान्योगी स्वभावो जगतोपि हि
नकेवलं हि भवतो ह्यत स्तेन व
लीयसा पर्य्यस्य तिष्ठ देवेंद्रं
वरुणंच समागतं भास्करोपि हि

दीनत्वं प्रयातो हि बलाहतेः ।
इत्येव मुक्तो देवेन ब्रह्मणा क
लिरव्ययः दीनान्दृष्ट्वा च शाका
द्वीन्विभीतकवनं गतः इति वा
मने २२ अध्यायः ॥
विभीषणः पुं रावणभ्राताइ
तिरामायणं नलत्सणं इति·
राजनिर्घंटः भयानके त्रि ॥
विभीषिका स्त्री भयप्रदर्शनं
यथा कृत्वा शस्त्र विभीषिकां
कतिपय ग्रामेषु दीनाः प्रजाः
मग्नांतो विरजल्पितै नृपहताः
तोणीभुजस्ते खिन्नः विद्वांसो
ऽपि क्वपरं त्रिजगतां सर्गस्थि
ति व्यापदामीशास्तत्परिचर्य
या नगणितोपेये नारायण·
णः इति शान्तिशतकं ॥
विभुः पुं प्रभुः सर्वगतः श
ङ्करः ब्रह्मा इति मेदिनी ॥
भृत्यः इति त्रिकांडशेषः ॥
विष्णुः इति शब्दमाला व्यापकः
नित्य सर्वेन्द्र इति हेमचंद्रः ॥
दृढः इत्यजयपालः ॥
विभुः त्रि सर्वमूर्त्तमे योगीपरम
महत्त्ववान् सत्त आत्मादिः य
था आत्मेंद्रियाद्यदिष्ठाता करणा
द्दिसकर्त्तकं विभुर्ब्रह्मादिगणाबो

बुद्धिस्तु द्विविधा मता इति भा
षापरिच्छेद विभू रिति विभुत्वे
परममहत्त्ववत्त्वं इति सिद्धांत
मुक्तावली कालखात्म दिशां
सर्वगतत्वं परमं महत्त इति भा
षापरिच्छेदः ॥
विभूतिः स्त्री अनिमादिकम
ष्टप्रधानैश्वर्यः भूतिः ऐश्वर्यं इ
त्यमरः शिवधृतभस्म अस्य
शिवस्य अनिमादि अष्टप्रकारं
वैभवं विभूत्यादि पदत्रयवाच्यं
केचित्तु विभूति भूति रिति द्व
ये शम्भुधृत भस्मानि अणिमा
घष्टकेतु ऐश्वर्यं मित्याहुः विभ
वस्तन यो विभूतिः क्तिः भवतेः
क्तिः भूतिः विग्रहण मन्मापस
र्ग निरासार्थं ईश्वर गुण पैश्वर्यं
भावे ष्यः अनिमादिलघिमादि
लघिमा प्राप्तिः प्राकाम्यं महिमा
तथा इशित्वं वशित्वं तथा
कामावशायिता इति अणुत्व म
णिमा येन सूक्ष्मो भूत्वा विचरति
लघुत्वे लघिमा येन वायुरिव ल
घुतरो भवति प्राप्ति रभीप्सित
प्रापणं प्राकाम्य मिच्छानविघा
तः महिमा महत्त्वं येनचत्तदेश
भुवनान्यस्मादेव वर्त्तंते ईशित्वं प्रभुता

येन स्थावर जंगमादि भूतान्या
देशकारीणि भवंति वशित्वं स्वा
तंत्र्य येन स्वतंत्र स्वरति कामेन
इच्छया अवशायितुं स्थातुं शील
मस्य कामावशायी प्रीडा गृहादि
त्वाऽस्मिन्तस्य भावः कामावशायि
ता सर्वानंदस्तु अनेकार्थत्वाद्वा
न्तानां स्मृति विहतिष्ठत्यर्थः ।
अवशायी दंस मध्य इत्याह ।
इति भरतः ॥ अपिच श्रीभ
गवानुवाच परात्परतरं तत्वपरं·
ब्रह्मैक मव्ययं नित्यानंद स्वयंज्यो
ति रहयं तमसः परं ॥
ऐश्वर्यं तस्य यन्नित्यं विभूतिरि
ति गीयते इति कौर्मे १ ।
अध्यायः
विभूतिद्वादशी स्त्री व्रतविशेषः ।
यथा नंदिकेश्वर उवाच । श्रृणु
नारद वक्ष्यामि विष्णो व्रतमनुत्त·
मं विभूतिद्वादशीनाम सर्वपाप
निसूदनं कार्त्तिके चैव वैशाखेमा
र्गशीर्षेथ फाल्गुणे । आषाढेवा
दशम्यांतु शुक्लायां लघुभुक्नरः
कृत्वा सायंतनीं संध्यां गृह्णी
यान्नियमं बुधः । एकाद
श्यां निराहारः समभ्यर्च्य जनार्द
नं ॥ द्वादश्यां विधिसंयु
क्तः करिष्ये भोजनं

विभो तदविघ्नेन मे यातु सा
फल्यं मधुसूदन ततः प्रभाते चो
त्थाय कृतस्नानजपः शुचिः पू
जयेत्पुंडरीकाक्षं शुक्लमाल्या
नुलेपनैः विभूतिदाय नमः पादा
वशोकायच जानुनी नमः शि
वायेत्युरूच विश्वमूर्त्तये नमःकटिं
कंदर्पाय नमो मेढ्रं मादित्यायन
मः करो दामोदरायेत्युदरं वासु
देवायचस्तनौ माधवायेति हृदयं
कंठमुत्कंठिने नमः श्रीधरायमु
खं केशान्केशवायेति नारद
पृष्ठं शार्ङ्गधरायेति श्रवणौ वरदाय
भवे स्वनाम्ना शंख चक्रासि गदा
परशुपाणयः सर्वात्मने शिरोब्र
ह्मणेनम इत्यभिपूजयेत् मत्स्यमु
त्पलसंयुक्तं हेमं कृत्वा तु शक्ति
तः उदकुंभसमायुक्तं मग्रतः स्था
पयेद्विभो गुडपात्रं तिलैर्युक्तं
सितवस्त्राभिवेष्टितं रात्रौ जाग
रणं कुर्यादितिहासकथादिना
प्रभातायांच शर्वर्यां ब्राह्मणाय
कुटुम्बिने सकांचनोत्पलं देवं
सोदकुम्भं निवेदयेत् यथानमु
च्यसे विष्णो सदा सर्वविभूति
भिः तथा मामुद्धराशेषदुःखसं
सारसागरात् दशावतारूपाणि

प्रतिमासं क्रमान्मुने दत्तात्रेयं
ततो धामसमुत्सेन समन्वि
तं दद्यादेवं समा यावत्पाषं
डानभिवर्जयेत् समाप्येवंय
थाशक्त्या द्वादश द्वादशीनरः
संवत्सरांते लवणपर्वतेन सम
न्वितं शय्यां दद्यात्मुनिश्रेष्ठ
गुरवे दम्भसंयुतां ग्रामंच शक्ति
मान्दद्यात्तेन साभरणान्वितं गुरुं
संपूज्य विधिवत्वस्त्रालंकारभू
षणैः अन्यानपि यथाशक्त्या
भोजयित्वा द्विजोत्तमान् तर्पये
द्वस्त्र गोदानैरन्यत्र धनसंचया
त् अल्पवित्तो यथाशक्त्या स्तो
कं स्तोकं समाचरेत् यस्मा
दस्याति निम्नः पुरुषो भक्तिमा
न्माधवे प्रति पुष्पार्चनविधानेन
सकुर्याद्वत्सरद्वयं अनेन विधि
नायस्तु विभूतिद्वादशी व्रतं।।
कुर्यात्सपाप निर्मुक्तः पितृणा
न्तारयेच्छतं जन्ममोषात्तसाह
स्रं न शोकफलभाग्भवेत् नच
व्याधि र्भवेत्तस्य नदारिद्र्यनबंध
नं वैश्ववोथ शैवो वा भवेज्जन्म
निजन्मनि यावद्युग सहस्राणां
शतमष्टोत्तरं भवेत् तावत्स्वर्गे
वसेद्राजन्भूपतिश्च पुनर्भवेत्।
मात्स्ये ८२ अध्यायः

विभूषणं क्ली आभरणं इत्यमरः
विभूषा स्त्री शोभा इति हेम
चंद्रः आभरणंच ।।
विभूषितः त्रि अलंकृतः यथा
विशुद्धरत्नौघविभूषितांगी शिला
तले हेममये सरस्ये । सुवाप
विष्ट मदनागगणाशानं नगात्मजा
कं गिरिराजपुत्री इति स्का
न्दे नीलकंठस्तोत्रे ।।
विभृतं त्रि पृतः पुष्टः विप
र्वभृधातोः क्त प्रत्ययेन निष्पन्नः
विभ्रत् त्रि विभर्तियः धारणपो
षणकर्ता यथा चतुर्दशं नारसि
हं बिभ्रदेतत्संदमूर्जितं । ददार
करजैरूरावेरकां कटकृद्यथा।।
श्रीभागवते १ स्कंधे ३ अध्या
यः अपिच तरुणं सकलमि
न्दो बिभ्रती शुभ्रकांतिः इत्यादि
तंत्रसारे सरस्वतीध्याने ।।
विभ्रमः पुं हावभेदः सत स्त्रीणां
शृंगारभावजक्रियाविशेषः इत्य
मरः मदरागहर्षजनितविपर्य
सो विभ्रमः यथा अस्य निमित्त
मानसाद्यन्यायान्यत्र गमनं मिथ्या
रव्यकथा मारिण्य सख्या सह
लपन मद्ये हसित कोपैषुष्पा
रोगो याइत्रा सहसैव तमरि ।

4639

त्यागः वस्त्राभरण माल्यानामस
कारणतः खेडने माननेच य
डुक्त क्रोधः स्मितंच कुसुमाभ
रणादियाञा तदर्जनेच सहसे
व विमंडनेच आलिप्य कांतव
चनं लपने सखीभि र्निष्कार
णोत्थितगते वद विभ्रमं तत्
इति चित्तमनवस्थाने शृंगारा
द्विभ्रमो भवेद्विपर्ययञ्च तथान्यत्र
विभ्रम त्वरया काले भूषास्था
नविपर्ययः यथा कृत्वायाते
बहिः कांतमसमापित भूषस्थि
नविपर्ययः यथा कृत्वायातेब
हिः कांतमसमया भाले ञ्जनं
दृशोर्लाक्षा कपोले तिलकः कृ
तः इति योषितां यौवनजो वि
कारो विभ्रमः इत्येके विभ्रांति
र्विभ्रमः वभ्र इति भरतः अपि
च वल्लभ प्राप्तिवेलायां मदनावे
शसंभ्रमात् विभ्रमो हारमाल्या
दि भूषास्थानविपर्ययः इत्युज्व
लमणिः भ्रांतिः इति मेदिनी
शोभा संशयः इति हेमचंद्र शब्द
रत्नावली विभ्रमा स्त्री वार्द्धक्ये
शब्दरत्नावली ।।
विभ्राट् ने } त्रि अलंकारादिना
विभ्राड् } दीप्तशीलः तत्पर्यायः
भ्रा

द्विसुः २ रोचिसुः ३ इत्यमरः
विभ्रांतः त्रि विभ्रमयुक्तः विप्र
र्वभ्रमधातोः क्तः प्रत्ययेन निष्प
न्नः विभ्रांतिः स्त्री विभ्रमः इति
विभ्रमशब्दटीकायां भरतः वि
मतः त्रि विरुद्धमतिविशिष्टः
विपूर्व मन धातोः क्त प्रत्ययेन
निष्पन्नः ।।
विमनस्कः त्रि विमनाः विनि
गृहीतं मनोऽस्येति बहुव्रीह्य
र्थे कप्रत्ययेन निष्पन्नः ।।
विमनाः स त्रि चिंतादिव्याकुल
चित्तः तत्पर्यायः दुर्मनाः २
अंतर्मनाः ३ इत्यमरः दुःविम
मानसः ४ इतिशब्दरत्नावली
विमयः पुं विनिमयः इतिहेम
चंद्रः ।।
विमर्दः पुं कालंकतद्वत्तःका
लकास्विंदिया इतिभाषा इति
रत्नमाला विमर्दने इति शब्द
रत्नावली ।।
विमर्दकः पुं चक्रमर्दः इति
राजनिर्घंटः ।।
विमर्दनं क्ली कुंकुमादिमर्द
नपर्यायः परिमलः २ इत्यम
विमर्दः ३ इतिशब्दरत्नाव
ली विशेषण मर्दनेच ।।

विमर्द्दोत्थः पुं मर्द्दनाज्जातस्तु
गंधादिः यथा अथ गंधेऽपि
मलो विमर्द्दोत्थे मनोहरे हृ
द्गामी मनोहारी गंध आमो
दइरितः इतिशब्दरत्नावली
विमर्शनं क्ली परामर्शः वित
र्कः यथा वितर्कःस्यादूहनं यत्न
परामर्शो विमर्शनं अध्याहार
स्तर्कऊहोःस्यात्मगुणं हृष·
णं इतिहेमचंद्रः ॥
विमर्षः पुं विचारणा इतिज
टाधरः ॥
विमलं क्ली तारहेमद्दिधाकृ
तं तन्नपरसविशेषः तत्पर्या
यः निर्मलं २ स्वच्छं ३ अमलं
४ स्वच्छधातुकं ५ अस्यगुणाः
कटुत्वं तिक्तत्वं त्वग्दोषव्रण
नाशित्वं रसवीर्यादोषत्वंच दे
धे भिन्नवीर्यकत्वंच राजनिर्घं
टः विमलः पुं अर्हन् इतिहे
मचंद्रः ॥
विमलं त्रि निर्मलं तत्पर्यायः
वीध्रं २ इत्यमरः प्रसन्नं ३
इतिशब्दरत्नावली चारुः ३
तिजटैव ॥
विमलदानं क्ली नित्यनैमित्ति
ककाम्यदानं ईश्वरप्रीणनार्थ
दानंच

यथा नित्यं नैमित्तिकं काम्यंवि
मलं दान मीरितं अहन्यहनि
यत्किंचिद्दीयतेऽनुपकारिणे।
अनुद्दिश्यफलं तस्माद्ब्राह्मणा
य तु नित्यकं यत्तुपापोपशां
त्यैच दीयते विदुषां करे।
नैमित्तिकं तदुद्दिष्टं दानं सद्भि
रनुष्ठितं अपत्य विजयैश्वर्य
स्वर्गार्थं यत्प्रदीयते दानं तत्
काम्यमाख्यातं ऋषिभि र्धर्मवि
त्तकैः चेतसा सत्वयुक्तेन दानं
तद्विमलं स्मृतं इति गारुडे ५१
अध्यायः ॥
विमलमणिः पुं स्फटिकः इति
राजनिर्घंटः ॥
विमला स्त्री सप्तला चामार
कषा इति भाषा इत्यमरः भूमि
भेदः इति मेदिनी देवीभेदः
यथा सूर्याख्यविमला कार्याऽ
द्ध हारेन्दु वर्चसा मुक्तास्रस्तन
धारीच कमंडलुकरा वरा नाना
स्तनसमारूढा स्वतमाल्याम्बर
प्रिया इपि क्षीरोदनाहारा कृष्
२ मदचर्चिता सितपंकज होमे
न राष्ट्राणु न्देपवर्द्धिनी इतिमहि
वीपुराणे सप्तसप्तरदेवता द्वितीय
विंशतिकाविधिः अन्यच्च पूजयेत्

कर्णिकामध्ये वामदेवेन तु ना
विमला नायिका तस्य वामदे
वस्यकीर्त्तिता इति कालिकापु
राणे ६२ अध्यायः ॥ अपरंच।
उत्कले नाभिदेशेच विरजाक्षे
त्र उच्यते विमला सा महादेवीज
गन्नाथस्तु भैरवः इति तंत्रचूडा
मन्नौ ५१ पीठेनिर्णयः ॥
विमलात्मकः त्रि निर्मलः इ
त्यमरविमलार्थकः)त्यमरटी· रा
यमुकुटः विमलाद्रिः पुं शत्रुंज
यपर्वतः इति हेमचंद्रः ॥
विमांसः पुं अशुद्धमांसं तत्तु
कुक्कुरादिमांसं इति केचित् ॥
विमाता स्त्री मातृसपत्नी स
त्याऽइतिभाषा साकुनीयसपिन·
मस्य यथा स्मृति मातुःपितुः
कनीयांसं नन मेत्यसमाधिकः
नमस्कुर्यान्गुरोः पत्नी भ्रातृजा
यां विमातरं स्वतत्र्यंसारे सि
यो नमस्य ज्येष्ठास्त्र वयसा पशु
देवताः यतः सर्ववयसा नास्ति
योद्धा अतः कनिष्ठा अपिन
मस्याः इति मलमासतत्वे वि
मातृ रजो निवृत्तावपि पितामह
ह धन विभाग कर्त्तव्यत्वे यथा
बृहस्पतिः पितृ रभावे भातृणां
विभागः

संप्रदर्शितः मातृ र्निवृत्ते रजसि
सिनीवतोऽपि शास्यते पुत्रस्य
मातृपदे विमातृ पर मपिपुत्र
न्तरोत्पत्ति संभावना तोऽत्यात्
इतिदायतत्वे अस्या अनेपि·
त्वे यथा सोदरभ्रातृभि विभा
गेक्रियमाणे मातृ पुत्रसमांशो
दातव्यः समांशाहारिणी माता
इति वचनान्मातृपरस्य जननी
परत्वात्तत्सपत्नीमातृपरत्व मपि
सकृच्छ्रुतस्य मुख्य गौणात्वानु
पपत्तेः इतिदायभागः ॥
विमातृजः पुं मातृसपत्नीपुत्रः
तत्पर्यायः वैमात्रेयः २ इत्य
मरः वैमात्रेयः ३ इत्यमरः ३
इतिजटाधरः ॥
विमानः पुं क्ली देवरथः त
त्पर्यायः व्योमयानं इत्यमरः
सार्वभौमगृहं घोटकः ॥ या
नमात्रे इति मेदिनी ॥
विमार्गः पुं समार्जनी कुप
थः विसृष्टे स्रजधातो घञ्प्र
त्ययेन निष्पन्नः ॥
विमुक्तः त्रि विशेषेण मुक्तः
यथा येऽन्येऽरविन्दाक्ष विमुक्त
मानिनस्त्वय्यस्तभावादविशुद्ध
बुद्धयः आरुह्य कृच्छ्रेण परंप

रं ततःपतन्त्यधो नाहत युस्म
दंत्रयः इतिश्रीभागवते ९स्कं
ध अध्यायः मक्तः विपूर्वमुच
धातोःक्त प्रत्ययेन निष्पन्नः॥
विमुक्तिः स्त्री विमोचनं मोक्षः
यथा पितृन्नमस्ये दिवि येच
मूर्त्ताः स्वधाभुजः काम्यफला
भिसंधौ प्रदानशक्ताः सकले।
प्सितानां विमुक्तिदायेऽनभि
संहितेषु इति प्रायश्चित्ततत्वे
विमुखः त्रि वहिर्मुखः विरतः
यथा स्वागमैःकल्पितैस्त्वंद्विज
नान् मद्विमुखान्कुरु मांचगो
पय येनस्यात्सृष्टि रेषोत्तरो
त्तरा इति पाद्मोत्तरखंडे पि
रंशति विम्बवाक्यं॥
विमुद्रः त्रि प्रफुल्लः इतिहेम
चंद्रः मुद्रारहितश्च॥
विमोचनं क्ली दूरीकरणं
विमुक्तिः विपूर्वमुचधातोरन
ट् प्रत्ययेन निष्पन्नं॥
विमोहनं क्ली वैचित्तीकरणं
विपूर्वं मुहधातो रनट् प्रत्यये
न निष्पन्नं॥
विमोहितः त्रि मोहयुक्तः मुग्धः
यथा तावत्पतिवेलाम्भसो म
हामाया विमोहितो उक्तवैतौ
वरोस्मत्तो व्रियता मिति केशवं
इति देवीमाहात्म्यं॥
विमोक्षणं क्ली विमोचनं परि
त्यजनं यथा येधर्मकामार्थमु
क्ति कामा भजंत इष्टां गति
मात्मु वक्ति किंचाशिषो रात्य
पिदेहमव्ययं करोतु मेऽदभ्रदयो
विमोक्षणं इति श्रीभागवते ८
अध्यायः॥
विम्बं क्ली प्रतिविम्बं कमंडलुः
इति मेदिनीसारोणादिवृत्तिः
विम्बिकाफलं तेलाकुचा इति
भाषा इति मेदिनी। ओष्ठस्य
पर्यायः तुंडिकेरी २ रक्तफला
३ विम्बिका ४ पीलुपर्णी ५ इ
त्यमरः ओष्ठी ६ विम्बी ७ इति
रत्नमाला विम्बा ८ विम्बकं ९
विम्बजा १० इतिशब्दरत्नावली
अस्य गुणाः पित्तकफछर्दिस्र
गाहदाहास्र कुष्ठनाशित्वं इति
राजवल्लभः अपिच विम्बीरक्त
फलातुम्बी तुंडिकेरीच विम्बि
का ओष्ठोपमफला प्रोक्ता पी
लुपर्णीचकथ्यते विम्बीफलं
स्वादुशीतं गुरुपित्तास्रवातजि
त् स्तम्भनं लेखनं रुच्यं विबंधा
ध्मानकारकं॥ इति भावप्रकाशः

विम्बः पुं क्ली सूर्यचंद्रमंडलं
इत्यमरः॥
विम्बः पुं कृकलासः इतिमे
दिनी विम्बकं क्ली चंद्रसूर्यमंड
लं विम्बिकाफलं इति शब्दरत्ना
वली विम्बजा स्त्री विम्बिका इ
तिशब्दरत्नावली॥
विम्बटः पुं सर्षपः। इतिशब्द
चंद्रिका॥
विम्बा स्त्री विम्बिका इतिश
ब्दरत्नावली॥
विम्बिका स्त्री विम्बं इत्यमरः
चंद्रसूर्यमंडलं इतिशब्दरत्नाव
ली विम्बी स्त्री विम्बिका इति
शब्दरत्नावली॥
विम्बुः स्त्री गुवाकः इति केचि
त् विम्बोष्ठः त्रि विम्बाविवलो
ष्ठौ यस्य विम्बिष्ठः इतिसुपद्मव्या
करणं वियच्चारी नेत्रु वि
लुः इतिशब्दमाला आकाशगा
मिनि त्रि वियत्क्ली आकाशं
इत्यमरः वियद्गंगा स्त्री स्वर्गगंगा
इत्यमरः॥
वियद्भूतिः स्त्री अंधकारः इति
त्रिकांडशेषः॥
वियन्मणिः पुं सूर्यः इतिहा
रावली॥
वियमः पुं संयमः इत्यमरः
दुःखं इतिस्वामी॥
वियातः त्रि निर्लज्जः इत्यमरः
वियामः पुं संयमः इत्यमरः
वियुक्तः त्रि वियोगविशिष्टः
विपूर्वं युज धातोः क्त प्रत्यये
न निष्पन्नः॥
वियोगः पुं विच्छेदः तत्पर्यायः
विप्रलंभः २ विप्रयोगः ३
विरहः ४ इति हेमचंद्रः॥
वियोगभाक् न त्रि विच्छेदयु
क्तः यथा वियोग भाजापिनृ
पस्य पश्यता देव सात्तादृक्तता
प्युमाननं पिकेन रोषारुणाच
क्षुषा मुहुःकुहूतास्यत चं
द्रवैरिणी इति नैषधः॥
वियोगी न पुं चक्रवाकः इति
शब्दचंद्रिका वियोगयुक्ते त्रि
वियोजितः त्रि वियोगप्रापितः
विपूर्वंण्यंत युज धातोःक्त प्र
त्ययेन निष्पन्नः॥
विरक्तः त्रि विरागयुक्तः अन
नुरक्तः यथा ज्ञाननिष्ठो विर
क्तोवा मद्भक्तो वानपेक्षकः स
लिंगानाश्रमां स्त्यक्त्वा चरेदवि
धिगोचरः इति श्रीभागवते ११
स्कंधे १९ अध्यायः॥

विरक्ता स्त्री दुर्भगा इति त्रि-
काण्डशेषः अनुरक्ता यथा यो
चिंतयामि सततं मयि सा विर
क्तासा चान्य मिच्छति जनं सज
नोन्यसक्तः इत्याद्युद्भटः ॥
विरक्तिः स्त्री विरागः यथा
देहो गुरु र्मम विरक्तिविवेक
हेतु र्विभ्रत्स्मसत्व निधनं सततार्त्त्य
दर्कं तत्वान्यनेन विमृशामि
यथा तथापि पारक्य मित्यव
सितो विचराम्यसंग इति श्रीभा
गवते ११ स्कंधे ९ अध्यायः ॥
विस्रं क्ली कंकुष्ठं इति राज
निर्घंटः ॥
विरचितः त्रि विशेषेण रचि
तः निर्मितः यथा एषश्रील
हनुमता विरचिते श्रीमन्महा-
नाटके वीरश्रीयुतरामचंद्रच
रिते प्रस्तुते विक्रमैः इत्यादि
महानाटके विरजस्तमाः सपुं
सत्वगुणविशिष्टः तत्पर्यायः द्व
यातिगः २ इत्यमरः विगते रज
स्तमसी येषां ते रजस्तमोगुण
शून्याः सत्वैकनिष्ठाः सात्विका
तत्वज्ञाणो जीवन्मुक्ताख्यासाद
यो द्वयातिगा उच्यन्ते द्वयं द्वैतंप्र
तिक्रम्य गच्छति डः इति भरतः

विरजाः स स्त्री विगतार्त्तवा इति
जटाधरः ॥
विरजा स्त्री कपित्थानी इत्यत्र
इतिरत्नमाला दूर्वा इतिहारा
वली ययातिमाता यथा उश
नाः पितृकन्यायां विरजायां महा
बलाः यति र्ययातिः संयाति
रायातिः पंचमो ध्रुवः तेषां य
यातिः पंचानां महाबल पराक्र
मः इति कौर्म्मे २० अध्यायः
श्रीकृष्णसखी सा राधाभया
त्प्रक्रमणात् सती सरि दुपाभ
वत् तस्याः सप्तपुत्राः सप्तसमु
द्रा अभवन् यथा एकदा राधि
कासार्द्धं गोलोके श्रीहरिः स्वयं
विजहार महारण्ये निर्जने रास
मंडले कृत्वा विहारं श्रीकृष्णस्ता
मदृष्ट्वा विहाय च गोपिकां
विरजां मन्यां शृंगारार्थं जगा
म ह दृष्ट्वा च श्रीहरिं स्वर्णवि
जहार तया सह तयासक्तं श्री
हरिं चरत्नमंडपसंस्थितं दृष्ट्वाच
राधिकान्याश्च चकुस्ताश्च निवे
दनं जगाम सहसा देवी तत्रत
मंडपमुने द्वारे नियुक्तं ददर्श द्वा
रपालं मनोहरं तमुवाच रुषा
देवी रक्तपंकजलोचना हरगच्छ

4645

दूरं रतिलम्पट किंकर कीट
श्रीमन्मरां कांतं द्रक्ष्यामि तत्प्र
भो रहः श्रुत्वा कोलाहलं शब्द
गोपिकानां हरिः स्वयं ज्ञात्वाच
कोपितां राधां मेंतर्धानं चका
र ह विरजा राधिकाशब्दात् प्रान
धानं हरे रपि दृष्ट्वा राधाभया
त्सा स्नेहो प्राणांश्च योगतः स
यत्याज सरिद्रूपं तच्छरीरं बभूव
ह व्याप्येव वर्तुलाकारं तया
गोलोकमेवच कोटियोजन वि
स्तीर्णमाप्ये तिनिम्न मेवच दै
र्घ्यदशगुणेचारुनानारत्नकरेण
दं राधारतिस्थलं गत्वा न ददर्श
हरिं पुने विरजांच सरित् रूपाहे
द्रागे हेज्जगाम सा श्रीकृष्णो विरजां
दृष्ट्वा सरिद्रूपां प्रियां संतीरुदौरु
रोद विरजातीरे नीरमनोहरे त
या विनाहं सुभगे कथं जीवामि
सुंदरि तत्प्रियावियोगात्देवी त्वं भवस्व
ह्रीस्तती सति पुरातने शरीरे तस
रिद्रूप मतत्स्वति जलाड्त्याय
चागच्छ विधाय तत्र नूतने अ
जगाम हरे रंगे सा तादृशावेव सुं
दरी परिपूर्णते मायानाशेच परि
ती चक्षुवत्त्वषा तां च रूपवतीं ह
दृष्ट्वा प्रेम्नोद्रेकां जगत्पतिः चका
रालिं

ने तस्याः चुचुम्ब च कृष्णस्तः
नानाप्रकार शृंगार विपरीता
दिकं प्रभुः रहसि प्रेयसीं प्राप्य
चकार च पुनः पुनः विरजा सा
रजोयुक्ता धृत्वा वीर्यं समोघकं
सद्यो बभूव तत्रैव धन्या गर्भव
ती सती तस्यां तत्र सप्तवासी
ना सार्द्धं पुत्रैश्च सप्तभिः एक
दा हरिणा सार्द्धं वृन्दारण्ये
निर्जने विजहार पुनः साध्वी
शृंगारासक्त मानसा पतासि
द्धे तेरे तत्र मातुः क्रोडं जगाम
ह कनिष्ठ पुत्र स्तस्याश्च भ्रात
भिः पीडितो भिया भीतस्तत्र
ये दृष्ट्वा तत्साजातो कृपानिधिः
क्रोडे चकार बालं सा कृष्णो रा
धागृहे ययौ प्रबोध्य बालं सा
साधीन ददर्श तत्रिकं प्रियं वि
लाप भृशं तत्र शृंगारात्मनस्मा
न सा शशाप सप्तनं कोपात्लव
णोदो भविष्यति शशाप स
र्वान्बालांश्च यात मूढा रसातलं
श्रुत्वा विवरणं सर्वे अनगमु पारे
णीतले सप्तद्वीपे समुद्राश्च सप्त
तस्य विभागशः कनिष्ठादू
र्द्ध्वपर्यन्तं द्विगुणं द्विगुणं मने
लवणेक्षु सुरा सर्पि दधिदुग्ध
जलार्णवाः पतयश्च जले शृष्ट्वा
शस्याप्येवं भविष्यति ब्रह्मवैवर्त्ते

श्रीकृष्णजन्मखण्डे २१७ अध्यायो जग
न्नाथक्षेत्रं यथा उत्कले नाभिदे
शंच विरजाक्षेत्रमुच्यते विम
ला सा महादेवी जगन्नाथस्तु
भैरवः इति तन्त्रचूडामणौ ५१
पीठनिर्णयः तत्र मुण्डनोपवासौ
न कर्त्तव्यौ यथा स्कान्दे मुण्डनञ्चो
पवासश्च सर्वतीर्थेष्वयं विधिः
वर्जयित्वा गयां गङ्गां विशालां
तथा इति प्रायश्चित्ततत्त्वं ॥
विरिंचः } पुं ब्रह्मा इतिहेमचं
विरिंचिः } द्रः ॥
विरणं क्ली वीरणतृणं ।
इति शब्दरत्नावली ॥
विरतः त्रि निवृत्तः यथा मा
त वियोगे जने जातो भ्रान्तस्सा
तो निजे भवेत् विरतोऽन्तर्हि
तोदृष्टोकाद्वामणवारितः
इति मुग्धबोधव्याकरणं ॥
विरतिः स्त्री निवृत्तिः तत्पर्या
यः आरतिः २ अवरतिः ३ उप
रामः ४ इत्यमरः उपरमः ५
विरामः ६ इति भरतः ॥
विरलं क्ली दधि इति राज
निर्घण्टः ॥
विरलः त्रि अवकाशः फा
क इति भाषा तत्पर्यायः पेलवः
२
ततुः इत्यमरः ॥
विरलजानुकः त्रि वक्रजानुवि
शिष्टः तत्पर्यायः प्रज्ञुः २ प्रज्ञः
इति हेमचन्द्रः ॥
विरलद्रवा स्त्री सुसत्तायवागूः
यथा यवागू कृत्रिका आणासै
वत्कुतसिक्थका विलेपी तर
ला च स्यात्सा स्मृता विरलद्रवा
इति जटाधरः ॥
विरहः पुं विच्छेदः तत्पर्यायः
विप्रलम्भः २ विप्रयोगः ३ वियो
गः ४ इति हेमचन्द्रः विरहे
वर्णनीयानि यथा तापः निश्वा
सः चिन्ता मौनं कृशाङ्गता वत्स
र तुल्य रात्रि दैर्घ्यं जागरणं ।
प्रीतेन्ये उष्मताज्ञानं इति कवि
कल्पलता ॥
विरहिणी स्त्री भर्त्तः इतिश
ब्दमाला विच्छेदविशिष्टा नारी
यथा रतिः पुंसो विरहिणी शि
वः स्त्री विरही चिरं द्वयो द्वयो
श्च समागमे किं बभूव द्वयोस्त
त्वं इति ब्रह्मवैवर्त्ते श्रीकृष्णज
न्मखण्डे ४८ अध्यायः
विरहितः त्रि त्यक्तः विहीनः
यथा अभिभूतं चावमंतत्त्यक्त
स्वस्थानमपक्षितं हीनं विरहितं

भूत मन्त्रेष्ट विधुते अपि इ
तिजटाधरः ॥
विरही न् पुं विरहविशिष्टः वि
योगी यथा विहरति हरिरिह
सरसवसन्ते नृत्यति युवतिज
नेन समं सखि विरहि जनस्य
दुरन्ते इति जयदेवः ॥
विरागः पुं अननुरागः राग
शून्यः यथा विषयेष्वतिसंरागो
मानसो मल उच्यते तेष्वेव हि
विरागो हि नैर्मल्यं समुदाहृ
तं इति प्रायश्चित्ततत्त्वं ॥
विरागार्हः त्रि विरागयोग्यः ।
तत्पर्यायः वैरागिकः २ । इति हे
मचन्द्रः ॥
विराजः पुं विराट् यथा इडा
ग्रीवदनाद्भ्यः पशवो मलसं
भवाः शेषेभ्यो रोमसंभूता विरा
जस्त्वेनमो नमस्ते इति वामने
८३ अध्यायः
विराजमानः त्रि दीप्तिविशिष्टः
यथा जटा कटाह संभ्रमद्भ्रम
न्निलिम्पनिर्झरी विलोलवीचि
वल्लरीविराजमानमूर्द्धनि धगद्ध
गद्धगज्ज्वलल्ललाटपट्टपावके कि
शोरचन्द्रशेखरे रतिः प्रतिक्षणं
मम इतिकाशीखण्डेरावणाकृत
स्तोत्रं
विराजितः त्रि शोभितः दीप्तः
यथा अतीव निर्मलं सारसूर्य
भासं विनिन्दकं परिष्कृतं च मा
णिक्य हीरकेण विराजितं ॥
इति ब्रह्मवैवर्त्ते गणपतिखण्डे
९ अध्यायः ॥
विराट् न् पुं क्षत्रियः इत्यमरः
स्थूलशरीर समष्ट्युपहित चैत
न्ये इति वेदान्तसारः महा
विराडुत्पत्ति यथा श्रीनाराय
ण उवाच अथ डिम्बो जले ति
ष्ठन्यावद्वै ब्रह्मणो वयः ततः स
काले सहैद्विधा भूतो बभूव ह
तन्मध्ये शिशुरेकश्च शतको
टिरविप्रभः क्षणं रोरूयमा
णश्चस्तनंधयः पीडितः क्षुधा पि
तृमातृपरित्यक्तो जलमध्ये नि
राश्रयः ब्रह्माण्ड संख्यानाथो यो दद
र्शोर्द्ध्वमनाथवत् स्थूलात्स्थूल
तमः सोऽपि नाम्ना देवो महावि
राट् परमाणुर्यथा सूक्ष्मा
त्स्थूलात्तथाप्यसौ तेजसा षो
डशांशो यः कृष्णस्य परमात्मनः
आधारोऽसंख्य विश्वानां महा
न्विष्णुश्च प्राकृतः प्रत्येकं लो
मकूपेषु विश्वानि निखिलानि
च तस्यापि तेषां संख्यां च कृष्णो

वक्त्रे नहि तमः संख्या चेदृज
सामस्ति विश्वानां न कराचन
ब्रह्मविष्णु शिवादीनां तथा सं
ख्यानविद्यते प्रतिविश्वेषु संत्य
वं ब्रह्मविष्णु शिवादयः पाताला
द्ब्रह्मलोकांतं ब्रह्मांडं परिकीर्ति
तं अतऊर्ध्वंच वैकुंठो ब्रह्मांडाद्व
हि रेवच सच सत्यस्वरूपश्च शा
श्वन्नारायणो यथा अत ऊर्ध्वंच
गोलकः पंचाशत्कोटियोजना
त् नित्यसत्यस्वरूपश्च यथाहृ
स ल्लयाप्ययं सप्तद्वीप मिताम्
थ्वी सप्तसागरसंयुता ऊनपंचा
शउपद्वीपा संख्यशैलसमन्वि
ता ऊर्ध्वस्वर्गाः सप्तलोका ब्रह्म
लोकसमन्विताः पातालानिच
सप्ताधश्चैवं ब्रह्मांडमेवच ऊर्ध्वंध
राया भूर्लोकोभुवर्लोक स्ततःपरः
ततःपरश्च स्वर्लोको जनोलोक
स्ततःपरः ततःपरस्तपोलोकः
सत्यलोक स्ततःपरः ततःपरोब्र
ह्मलोक स्तप्तकांचन निर्मितः
एवं सर्वंकृत्रिमंच यराभ्यन्तर
मेवच तद्विनाशे विनाशश्च स
र्वेषामेव नारद जलबुद्बुदवत्स
र्वं विश्वसंघ मनित्यं विश्वो
वैकुंठ गोलोकौ सत्यौ शाश्वत्
हृ

त्रिमो प्रतिलोमकूपे ब्रह्मांडं
प्रत्येक मस्य निश्चितं एषांसं
ख्यानजानाति कृष्णोऽन्योऽपि
काकथा प्रत्येकं प्रतिब्रह्मांडे ब्र
ह्मविष्णु शिवादयः तिस्रःको
ट्यः सुराणांच संख्याः सर्वत्रपु
त्रक दिगीशाश्चैव दिक्पाला
नक्षत्राणिग्रहादयः भुविवर्णा
श्च चत्वारोऽप्यधो नागाश्चरा
चराः अथकालेच स विराट्ऊर्ध्वं
दृष्ट्वापुनः पुनः डिम्बांतरंचशू
न्यंच नद्वितीयंच कंचन चिंताम
वाप लघुतो रुरोदच पुनःपुनः
ज्ञानं प्राप्य तदादध्यौ कृष्णंपरम
पूरुषं ततोऽदर्श तत्रैव ब्रह्मज्यो
तिः सनातनं नवीनजलदश्यामं २
मं द्विभुजं पीतवाससं सस्मितं
मुरली हस्तंभक्तानुग्रहकारकं
जहास बालकः तुष्टो दृष्ट्वाज
नकमीश्वरं वरं तस्मै ददौ तुष्टो
वरेशः समयोचितं मत्समोज्ञा
नयुक्तश्च क्षुत्पिपासादिवर्जितः
ब्रह्मांडासंख्यनिलयो भवत्वत्
यावत्प्रति निष्कामो निर्भयश्चवर
दैषां वरदो वरः जरामृत्युरोग
शोकपीडादिवर्जितो भव इत्यु
क्त्वा चतत्कर्णे महामंत्रं षडक्षरं त्रिः

कृत्वंच प्रजजाप वेदागम वरंप
रं प्रणवादिचतुर्थ्यंतं कृष्णइत्य
क्षरद्वयं वह्निजायांतमिष्टंच स
र्वविघ्नहरं परं मंत्रं दत्वा तदा
हारं कल्पयामास स प्रभुः श्रूय
तां ब्रह्मवचः श्रुत्वा निबोध कथया
मिते प्रतिविश्वेषु यन्नैवेद्यं ददा
दाति विश्वेवजनः तन्षोडशांशं
विषयिणो विष्णोः पंचदशास्यवै
निर्गुणस्यात्मनश्चैव परिपूर्णत
मस्यच नैवेद्येनच कृष्णस्य नहि
किंचित्प्रयोजनं यद्यद्ददातितं
वेद्यं यस्मै देवाय यो जनः सच
खादति तत्सर्वं लक्ष्मी दृष्ट्याचपु
नर्भवेत् तंचमंत्रं वरं दत्वात
मुवाच पुनर्विभुः वरमन्यंकिमिष्टं
ते तन्मे ब्रूहि ददामिच कृष्णस्य
वचनं श्रुत्वात मुवाचमहावि
राट् अर्हतो बालक स्तत्रवच
नं समयोचितं श्रीमहाविराडुवा
चवरं मे त्वत्पदांभोजभ
क्ति र्वर्भवतु निश्चला संततं
यावदायु र्मेक्षणं वासविरं हि
वा त्वद्भक्तियुक्तो योवालोजीव
न्मुक्तश्च सन्ततं त्वद्भक्तिहीनो मू
र्खश्च जीवन्नपि मृतोहिसः किंत
ज्जपेन तपसा यज्ञेन पूजनेनच
कृष्णभक्तिविहीनस्य सर्वंसञ्जी
वनंवृथा

येनात्मना जीवितश्च तमेवन
हि मन्यते यावदात्मा शरीरेऽस्ति
तावत्स शक्तिसंयुतः पश्चाद्या
न्ति गते तस्मिन्स्वतंत्राश्च प्रा
कृतयः सच त्वंच महाभाग सर्वा
त्मा प्रकृतेः परः स्वेच्छामयश्च
सर्वेभ्यो ब्रह्मज्योतिः सनातनः इ
त्युक्त्वा बालक स्तत्र विरराम च
नारद उवाच कृष्णः प्रसन्नंप्र
भुं श्रुतिसुन्दरीं प्रीत्याचउवा
च सुचिरं सुस्थिरं तिष्ठ यथा
हंत्वं तथा भव ब्रह्मणोऽसं
ख्यपतेच पातस्त्रेन [illegible]
भविष्यति अंशेन प्रतिब्रह्मां
डेत्वंच स्वइद विराट् भव तन्ना
भिपद्मेभ्यश्च विश्वस्त्रष्टा भवि
ष्यति ललाटे ब्रह्मणश्चैवरु
द्राश्चैकादशैव हांशिवांशेन
भविष्यंति सृष्टिसंवारणायवै
कालाग्निरुद्र स्तेषुको विश्व
संहार कारकः पाता विश्व
श्च विषयी क्षुद्रांशेन भविष्य
ति सद्भक्तियुक्तः सततं भविष्य
सि वरेणामे ध्यानेन कमनीयं
मां नित्यं द्रक्ष्यसि निश्चितं मातरं
कमनीयांच मम वक्षःस्थलस्थि
तां यामिलोके तिष्ठ वत्सेत्युक्त्वा
सोऽन्तर्धीयते गत्वा स्वलोके
ब्रह्माणंशंकरं स उवाचेश्व

ष्टारं लक्ष्मीशश्च संहर्त्तारं च तत्
त्वएं श्रीकृष्णउवाच सृष्टिंसृष्टुंग
च्छवत्सनाभिपद्मोद्भवो भव महा
विराड्रोमकूपे क्षुद्रस्य च विधेस्त्र
एउ गच्छवत्स महादेव ब्रह्मभा
लोद्भवोद्भव अंशेन च महाभा
ग स्वयंचस्वचिरं तपः इत्युक्त्वा
जगतांनाथो विरराम विधिस्त
तः जगाम ब्रह्मा तंनत्वा शिवश्च
शिवदायकः महा विराड्रोमकू
पे ब्रह्मांडे गोलके जले बभूवच
विराट् क्षुद्रो विराडंशेन सांप्रतं
श्यामो युवा पीतवासाः शयानो
जलतल्पके ईषद्धास्यः प्रसन्नास्यो
विश्वव्यापी जनार्द्दनः तन्नाभिक
मले ब्रह्मा बभूव कमलोद्भवः संभू
य पद्मदंडेच बभ्राम युगलक्ष
नीतं जगाम दंडस्य पद्मनाभस्य
पद्मजः नाभिजस्य च पद्मस्यान्तिं
माप पितातव स्वस्थाने पुनरा
म ध्यौहृदयः पदाम्बुजं ततोद
दर्शीत्वहंतं कालेन दिव्यचक्षुषा
शयानं जलतल्पेच ब्रह्मांडे गोल
काह्वले यल्लोमकूपे ब्रह्मांडं तेच
तत्पतेरस्यैव श्रीकृष्णस्यापिपितो
लोके गोप गोपी समन्वितं तं
संभूय वंदं प्राप ततः स्वसृष्टिंचका

रसः बभूव ब्रह्मणः पुत्रा मानसाः
सनकादयः ततो रुद्राः कपाला
त्तु शिवांशेकादश स्मृताः बभूव
पाता विष्णुश्च क्षुद्रस्य वामपार्श्वतः
चतुर्भुजश्च भगवान्श्वेतद्वीपनिवा
सकृत् क्षुद्रस्य नाभिपद्मे च ब्र
ह्मा विश्वंससर्जंच स्वर्गं मर्त्यंच
पाताल्लंत्रिलोकं सचराचरं एवं
सर्वलोमकूपे विश्वं प्रत्येक मे
वच शति विश्वे क्षुद्रविराट् ब्रह्म
विष्णु शिवादयः इत्येवं कथितं
वत्स श्रीकृष्ण कीर्त्तनं परं सुखदं
मोक्षदं सारं किं भूयः श्रोतुमि
च्छसि इति ब्रह्मवैवर्त्ते प्रकृति
खंडे ३ अध्यायः स्वायंभुव मनुः
यथा गतेषु तेषु स्वसार्थं प्रजा
मावनता मिमां उपयेमे स विश्वा
त्मा शतरूपा मनिंदितां सम्बभूव
तयासार्द्धं मतिकामातुरो विभुः
स्वलज्ज्यां चक्रमे देवः कमलोदर
मंदिरे यावदब्दं शतं दिव्यं यथा
न्यः प्राकृतो जनः ततः कालेन
महता ततः पुत्रो भवन्मनुः स्वा
यंभुव इतिख्यातः सविराडिति
नः श्रुतं तद्रूप गुणा सामान्याद
धि पुरुष उच्यते वैराजा यत्र ते जा
ता बहवः शंसितव्रताः स्वायंभुवा

महाभागाः सप्त सप्त तथापरे
स्वारोचिषाद्याः सर्वे ते ब्रह्मत
ल्याः स्वरूपिणः औत्तमिप्रमुखा
स्तद्वंश्या ते सप्तमो ऽधुना ।
इतिमात्स्ये ३ अध्यायः ॥
विराटः पुं देशविशेषः इति
शब्दरत्नावली तद्देशीयराज्ञो
यथा अत्र शूरा महेष्वासा भी
मार्ज्जुन समायुधि युयुधानोवि
राटश्चद्रुपदश्च महारथः इति
श्रीभगवद्गीतायां १ अध्यायः
विराटकः पुं राजपट्टः इति
हेम चंद्रः ॥
विराटजः पुं विराटदेशीयही
रकः तत्पर्यायः राजपट्टः रा
जावर्त्तः २ इतिहेमचंद्रः वि
राट राजजाते त्रि ॥
विराणी न हस्ती इति शब्दमा
ला विराधः पुं राक्षसभेदः य
था लक्ष्मणासत तद्वाक्यं श्रुत्वा
रामं ततोब्रवीत् पिता मेभूत्स्व
पर्जन्यो माता मे च शतहृदा वि
राध इति मा मा हुः पृथिव्यास्
वैराक्षसाः ततस्तंच प्रमदा मेतौ
पलायेतां परांमुखो तच्छ्रुत्वा
राममाह्रदं लक्ष्मणः किं प्रतीत
मे इत्युक्त्वा तस्यासो वीरत्रानस्य

स्तमरस्तनुः उत्ससर्जशरंघोरं
कालदंडोपमं ततः तच्छरीरं
महाकायं भित्वा पातालमा
विशत् पपातआशु गतप्राणः
सफेनं रुधिरंवमन् ततोऽसौ
राममाह्रदं प्रांजलिर्विनयान्वि
तः तुम्बुरु नाम गंधर्वः प्रविष्टो
राक्षसो तनं अभिशापादहंद्यो
रंशप्तो वैश्रवणेनवै प्रसादयमा
नःसमया प्रावदन्मांऽपुनः पुनः
यदा दाशरथी रामो भविष्य
तिमहाबलः शापस्यान्तो भवि
ष्यते तेन रामेण संयुगे प्रसा
दान वसुकोहं गमिष्यामि स्व
मालयं इति वह्निपुराणेसूर्प
णीखाकर्णनासिकोत्कर्त्तनंना
माध्यायः विराधनं क्ली पीडा
इति शब्दरत्नावली ॥
विराधानं क्ली पीडा इतिश
ब्दरत्नावली विवाधानमिति
चपाठः विरामः पुं शेषः नि
वृत्तिः विरतिः तत्पर्यायः अव
सानः २ सातिः ३ इतिजटाधरः
मं ८ इति त्रिकांडशेषः परव
र्णाभावः इति व्याकरणं ॥
विरालः पुं बिडालः इत्यम
रटीकायां ॥

विराधः पुं शत्रुः इत्यमरः ॥
विरावीन् त्रि विरावविशिष्टः वि
रावो विद्यतेऽस्येति इन्प्रत्ययेन
निष्पन्नः ॥
विरिक्तः त्रि कृतविरेकः यथा
दुर्विरिक्तस्य नाभेस्तु स्तब्धताकु
क्षिशूलरुक् पुरीष वातसंगश्च
कंडूमंडल गौरवं । इतिभावप्र
काशः ॥
विरिंचः पुं ब्रह्मा विष्णुः शिवः
इतिशब्दरत्नावली ॥
विरिचनः पुं ब्रह्मा इति हेम
चंद्रः ॥
विरिंचिः पुं शिवः विष्णुः वि
धाता इतिशब्दरत्नावली ॥
विरिब्धः पुं स्वरः इति मुग्धबो
धव्याकरणं ॥
विरुद्धः त्रि विरोधविशिष्टः य
था विरुद्धधर्मसमवाये भूयसां
स्यात्सधर्मकत्वं इति जैमिनिसू
त्रे विरुद्धं गुरुवाक्यस्य यदत्र भा
षितं मया तत्तत्क्षंतव्यं बुधै देवरू
स्मृति तत्वबुभुत्सया स्खलिततो
प्रमादाद्यद्विरुद्धं बहुभाषितं ।
गुणलेशानुरागेण तत्क्षोभ्यं
मदर्शिभिः इति तिथ्यादित
त्वं। विरूढः त्रि अंकुरितः जातः

इति मेदिनी आरोहणविशि
ष्ट यथा संतप्त तिस्त्रणांशुरा
मपि विपो कंदल दोर्मंडलीली
लात्लत्रपुन विरूढशिरसोवीर
स्य लिप्सवरे इत्यादि मुरारिः
विरूपं क्ली पिप्पलीमूलं इति
राजनिर्घंटः ॥
विरूपः त्रि कुत्सितः कुरूपः ।
यथा विरूपान्मतनिस्तानामजु
त्ता सर्वके हि सत पुरां दान
मालाभ्या मनुग्रह उदाहृताः
इति रामतर्कवागीशः स्वार्थेके
विरूपश्च ॥
विरूपः पुं सुमनोराजपुत्रः य
था जाताः सुमनसः पुत्रा स्वयः
शूरामहाबलाः सुमतिश्च विरूप
श्च सत्यः शास्त्रार्थ पारगाः इति
कालिकापुराणे ८९ अध्यायः
विरूपा स्त्री दुरालभा इतिविषा
इति राजनिर्घंटः ॥
विरूपाक्षः पुं शिवः इत्यमरः
रुद्रभेदः इतिजटाधरः तस्य
पुरी सुमेरो नैर्ऋतकोणे वर्त्तते
यथा तथा चतुर्थे दिग्भागे नैर्ऋ
ताधिपतेः कृता नाम्ना कृष्णाव
तीनाम विरूपाक्षस्य धीमतः
इति वाराहे रुद्रगीता ॥

4653

विरूपिका स्त्री कुरूपा यथा
नाग्नयः परिविन्दंति न यजंते
न तपांसि च न च श्राद्धं कनि
ष्ठस्याच कन्या विरूपिका इ
त्युद्वाहतत्वं ॥
विरूपीन् पुं जाहकजंतुः इति
राजनिर्घंटः कुरूपविशिष्टेत्रि
विरेकः पुं मलभेदः । तत्
पर्यायः रेचनं २ रेकः ३ रेच
ना ४ विरेचनं ५ इतिशब्दरत्ना
वली प्रस्कंदनं ६ इतिरत्नमा
ला विरेचकः त्रि रेचकः मल
भेदकः जोलाव इति पारसी
भाषा विपूर्वक रिचु धातोर्ण्वुल्प्र
त्ययेन निष्पन्नः इति वैद्यकं ॥
विरेचनं क्ली विरेकः इतिशब्द
रत्नावली तत्कारकौषधं यथा
हरीतकी समगुडा मधुनासह
सेविता विरेचनकरी रुद्र भवती
ति न संशयः त्रिफला चित्रकोवि
त्रं तथा कटुकरोहिनी कुष्ठस्त
भद्रो होष उत्तमं तु विरेचनं अ
पि च त्रिफला वदरं द्राक्षा पिप्प
लीच विरेचकृत् हरीतकी सौ
वर्चलं लवणं च विरेचकृत् इ
तिगारुडे १८० १९९ अध्यायौ

अथ अथ विरेचनविधिः स्नि
ग्धस्विन्नाय वांताय दद्यात्सम्य
ग्विरेचनं अवांतस्य त्वधःसस्तो
ग्रहणीं छादयेत्कफः मंदाग्नि
गौरवं कुर्याज्जनयेद्वा प्रवाहिकां
अथवा पाचनै रामं बलासंय
विपाचयेत् अथ सदामयिकेका
ले प्राणसंकटे पित्ते विरेचनं
श्लेष्मादामोद्भूते गदे तथा उद
रेच तथाध्माने कोष्ठशुद्धौ वि
शेषतः दोषाः कदाचित्कु
प्यंति जिता लंघन पाचनैः शो
धनैः शोधिता ये तु न तेषां पुन
रुद्भवः वालो वृद्धो भृशं स्निग्धः
क्षतक्षीणो भयान्वितः श्रांत
स्तृषार्तः स्थूलश्च गर्भिणी च नव
ज्वरी अधोगारक्तपित्तीच न वि
रेच्या विजानता नवप्रसूता ना
रीच मंदाग्निश्च मदात्ययी शल्या
र्दितश्च रूक्षश्च न विरेच्या वि
जानता जीर्णज्वरी गरव्यापो
वातरक्ती भगन्दरी ॥ अर्शः
पांडूदर ग्रंथि हृद्रोगारुचिपी
डिताः योनिरोग प्रमेहार्त्तगु
ल्मप्लीह व्रणार्दिताः विद्रधि
छर्दि विस्फोट विसूची कुष्ठसं
युताः कर्णनासा शिरो वक्त्रगु

र मेहामयान्विताः स्नीह शो॰
थार्त्तिरोगार्त्ताः कृमिलाग्नला॰
र्दिताः शूलिनो मूत्रघातार्त्ताव
रेकार्त्ता नरामताः वहुपित्तोमृ
दुः प्रोक्तो वहुश्लेष्माच मध्यमः
वहुवातः क्रूर कोष्ठाड विरेच्यः
स कथ्यते स्नेहीमात्रास्तेरो कोष्ठे
मध्यकोष्ठे च मध्यमा क्रूरे तीक्ष्ण
मता इष्टे स्नेह मध्यामत्तीक्ष्णकैः
स्रुडहीता पयस्नुतैलैरपि वि॰
चिच्यते मध्यम स्त्रिवृतातिक्ता
राजवृक्षे विरिच्यते क्रूरः स्वकप
यसा हेमक्षीरी दंतीफलादिभिः
चंचुतेल मेरंडतैलं राजवृक्षः प
नवहेरा हेमक्षीरी चोक्तं दंतीफ
लं वृहद्दन्तीफलं जयपाल इ
ति प्रसिद्ध मात्रोत्तमा विरेकस्य
त्रिंशद्वेगैः कफान्तिका वेगैर्विंश
तिभिर्मध्या हीनोक्ता दशवे॰
गिका द्विपलं श्रेष्ठमाख्यातंमध्य
मंच पलंभवेत् पलार्द्धंचकषाया
णाकनीयस्तु विरेचनं कल्कमो
दकचूर्णानां कर्षमध्वाज्यलेहतः
कर्षद्वयं पलं वापि वयो रोगाद्य
पेक्षया पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षा॰
क्वाथादिभिःपिवेत् त्रिफलाक्वाथ
गोमूत्रैःपिवेत्व्योषं कफार्दितः त्रि
वृत्सैंधव सुंठीनां चूर्णं

नम्लैः पिवेन्नरः वातार्दितोवि
रेचनं त्रिफलाक्वाथेन द्विगुणि
नवा गुडं पीतं पयोभि र्वातवि
रेणाविरिच्यते शीघ्रमेव विरिच्य
त इत्यर्थः त्रिवृता कौटजं वीजं पि
प्पली विश्वभेषजं समृद्वीकार
संक्षौद्रं वर्षाकाले विरेचनं त्रि
वृद्दुरालभा मुस्त शर्करोदीच्य
चंदनं द्राक्षाम्बुना सयष्ट्याह्वं
शीतलंच घनात्यये उदीच्यं वाला
घनात्यये शरदि पिप्पली ना
गरं सिंधु श्यामा त्रिवृतयासह
लिह्यात्क्षौद्रे शिशिरे वसंतेचवि
रेचनं श्यामा कुम्भसाउ त्रिवृता
शर्करा तुल्या ग्रीष्मकाले विरेच
नं अभयामरिचंशुंठी विडंगाम
लकानिच पिप्पलीमूलं त्वकाडं
मुस्त मेवच एतानि समभागा
नि दंती तद्द्विगुणा भवेत् त्रिवृ
ताष्टगुणा ज्ञेया षड्गुणा चात्र श
र्करा मधुना मोदकान्कृत्वा कर्ष
मात्रान्प्रमाणतः एकैकंभक्षयेत्
प्रातः शीतंचानुपिवेज्जलं तावद्वि
रिच्यते जंतु र्यावदुष्णं न सेवते पा
नाहार विहारेषु भवेन्नियंत्रणाः स
दा विषमज्वर मंदाग्नि पांडुकास
भगन्दरान् । दुर्नाम॰

ऊरु यस्माशो गलगंडोदरभ्रमान्
विसर्प स्नीह मेहांश्च यस्मानेन
यन्नामयान् वातरोगं स्तथाध्मा
नंमूत्रकृच्छ्राणि चाश्मरीं पृष्ठपा
र्श्वोरु जघन जंघोदररुजं जयेत्
सततंशीलनादेषो पलितानिप्र
णाशयेत् अभयामोदका ह्येतेर
सायन वराःस्मृताः अभयामोद
कोरसायनः पीत्वा विरेचनंशी
तजलैः संसिच्य चक्षुषी सुगंधि
किंचिदाघ्राय ताम्बूलं शीलयेद्व
रं निर्वातस्था न वेगांश्च धारये
न्नशयीत च शीतांबु नस्पृशेत्
क्वापिकोष्णनीरं पिवेन्मुहुः बला
सौषध पित्तानि वायुर्वा ते यथा
व्रजेत् रेकात्तथा मलं पित्तं भेष
जं च कफो व्रजेत् दुर्विरिक्तस्य॰
नाभेस्तब्धत्वता कुक्षि शूलरु
क् पुरीष वातसंगश्च कंडूमंड
लगौरवं विदाहोऽरुचिराध्मानं
भ्रम श्छर्दिश्च जायते तंपुनःपाच
नैः स्नेहैः पक्त्वासंस्निह्य रेचयेत्
तेनास्योपद्रवा यांति दीप्ताग्निर्ल
घुता भवेत् विरेकस्यातियोगेन
मूर्च्छा भ्रंशो गुदस्यच शूलंक॰
फातियोगः स्यान्मांस धावनसन्नि
भं मेदोनिभंजलाभासं रक्तंचापिवि
रिच्यते ॥

तस्य शीताम्बुभिः सिक्त्वाशरी
रं तंडुलाम्बुभिः मधुमिश्रै स्तथा
शीतैःकारयेद्वमनं मृडु सहका
रत्वचः कल्कां दध्ना सौवीरकेण
वा पिष्टोनाभि प्रलेपेन हन्त्यती
सारमुल्वणं सौवीरन्तु यवैरामैः
पक्वैर्वा निस्तुषीकृतं सौवीरसं॰
धानं आजंक्षीरं रसंचापिवैष्कि
रं हारिणं तथा शालिभिःषष्टि
कैस्तुल्यं वस्तुरैर्वापि भोजयेत्
वर्त्तिका लाव विकिरकपिंज
लकतित्तिराः चकोर कुक्कुटाद्या
श्च विष्किराः समुदाहृताः कपि
ञ्जल इतिख्यातो लोके कपि
शांतिलिरः कुकरः कपर इति
लोके हरिणः ताम्रवर्णोमृगः
शीतैः संग्राहिभिर्द्रव्यैः कुर्यात्सं
ग्रहणं भिषक् लाघवे मनसस्तु
ष्टावनुलोमं गतेऽनिले स्वविरि
क्तंनरं ज्ञात्वा पाचनं पाययेन्निशि
इंद्रियाणांबलं बुद्धेः प्रसादो व
न्हिदीप्तता धातुस्थैर्यं वयस्थैर्यं
भवेद्रेचन सेवनात् प्रवातसे
वाशीताम्बु स्नेहाभ्यंगा मजीर्ण
तां व्यवायं मैथुनं चैवनसेवेन
विरेचितः शालि षष्टिकमुद्गा
द्यै र्यवागूं भोजयेत्कृतो जंगलात्
विष्किराणां वा रसैः शाल्यादनं

हितं हरविरोधेन ऊरंगार्धवालापुर
गमात्मकाः राजीवः पृषतश्चैवजं
वालासरभादयः इतिभावप्रका
शः विरेचनः पुं पीलुवृक्षः इ
ति राजनिर्घण्टः ॥
विरेफः पुं नदमात्रे इतिधनं
जयः रेफशून्यश्च ॥
विरेभितः त्रि शब्दितः विपू
र्वक रेभ धातोःक्त प्रत्ययेन
निष्पन्नः ॥
विरोकं क्ली छिद्रं इति त्रि
काण्डशेषः सूर्यकिरणे पुं इति
हलायुधः ॥
विरोचनः पुं सूर्यः अर्कवृक्षः
इत्यमरः प्रह्लादतनयः अग्निः
चन्द्रः इतिमेदिनी रोहितक
वृक्षः श्योनाकप्रभेदः तूतक
वृक्षः इति राजनिर्घण्टः ॥
विरोचनसुतः पुं बलिराजा
इति त्रिकाण्डशेषः ॥
विरोधः पुं शत्रुता तत्पर्यायः
वैरं २ विद्वेषः ३ इत्यमरः ॥
द्वेषः ४ द्वेषणं ५ इतिशब्दर
त्नावली अनुशयः ६ समुच्छ्र
यः ७ इति जटाधरः पर्यवस्था
८ विरोधनं ९ इतिसंक्षिप्तवर्गे
असमरः न्यायमतेसाध्यव्यापका
भावप्र

तियोगित्वं इति चिन्तामणिः ॥
साध्यासमानाधिकरणत्वं इति दी
धितिः विरोधकरणे दोषो
यथा अथपुत्रं रेवकासा ज्ञात्वा
स्नेहात्स्ववत्सलं उवाच किंचि
द्वचनं परिणाम सुखावहं अवि
रोधो भवान्यो च सर्वमंगल मंग
लं विरोधो नाशबीजंच सर्वोप
द्रव कारणं अकर्तव्यो विरोध
श्च दारुणैः तन्त्रियैः सह इति
त्वा चैषा कर्तव्या मदीयं वचनेश्च
णु इतिब्रह्मवैवर्ते गणपतिख
ण्डे ३९ अध्यायः अपिच नकुर्या
द्गुरुभिः सार्द्धं विरोधं बंधुभिस्त
था आत्मनः प्रतिकूलानि परेषां
नसमाचरेत् इतिकौर्मे उपरिभा
गे ७ अध्यायः ॥
प्रभवादिषष्टिसंवत्सरान्तर्गतत्रय
स्त्रिंशवर्षे यथा भविष्यपुराणे
भैरवउवाच विषमस्थं जगत्सर्वं
विरोधे भयसंप्लवं विकारी स
र्वतोऽपायो मम वाक्यं तु नान्यथा
इति ज्योतिस्तत्वं ॥ अ
नेकाः विपरीतार्थाः यथा श्रु
तिस्मृति विरोधेन श्रुतिरेवगरी
यसी अविरोधे सदा कार्यं स्मार्तं
वैदिकवत्सता । इतिस्मृतिः

4657

विरोधनं क्ली विरोधः इत्यमरः
विरोधिनी स्त्री विरोधकारिका
यथा विरोधं कुरुते चान्या द्वय
योःप्रीयमाणयोः बधूनां सुहृ
दांपित्रोःपुत्रैः सारणिकेश्वया ॥
विरोधिनी सा तद्वत्तां कुर्वीतव
बलिकर्मणा इति मार्कण्डेयपुरा
णोद्धः सद्वंशोत्पत्तिः ॥
विरोधी[न] पुं शत्रुः इति हला
युधः प्रभवादि षष्टि संवत्सरा
न्तर्गतत्रयोविंशवर्षे यथा भवि
ष्यपुराणे भैरवउवाच अनग्निप्र
बला लोका धान्यौषधी प्रपीडनं
जायते मानुषे कष्टं विरोधिनि न
संशयः इति ज्योतिस्तत्वे ॥
विरोधविशिष्टे त्रि ॥
विरोधोक्तिः स्त्री परवचनविरो
धिवचनं तत्पर्यायः विप्रलापः
१ विरोधवाक् २ क्रोधोक्तिः ३ प्र
लापः ५ इति शब्दरत्नावली ॥
विल षा स्तृतौ इति कविकल्प
द्रुमः स्तृति रिह आच्छादनं श
लति वस्त्रं लोकः परिदधाति
इत्यर्थः वेलिता अयं केश्चिन्न
मन्यते इति दुर्गादासः ॥
विलं क्ली छिद्रं इत्यमरः गु
हा इति मेदिनी ॥

विलः पुं उच्चैःश्रवाश्वः इति
मेदिनी वेतसः इतिशब्दचं
द्रिका ॥
बिलकारी[न] पुं मूषकः इति
राजनिर्घण्टः गर्तकारके त्रि ॥
विलग्नं क्ली मध्यः यथा मध्यो
ऽवलग्नं विलग्नं मध्यमोऽथकटः
कटिः इति हेमचन्द्रः जन्मल
ग्नं यथा गोचरे वा विलग्ने
वा येग्रहा रिष्टसूचकाः पूज
येत्तान्प्रयत्नेन पूजिताःस्युःशु
भावहाः गोचरे स्वराशपवषपपे
तया यदाकदापि विलग्ने जन्म
लग्ने इतिसंस्कारतत्वे मेषादि
लग्नमात्रे यथा शुभग्रहार्कवारे
च भक्ष तिथ्युवेषु च शुभराशि
विलग्ने च शुभं शान्तिकपौष्टिके
इतिदीपिका संलग्ने त्रि यथा वि
लग्नं नतिर्यां मध्ये त्रिषु साव
ग्नमात्रके इति मेदिनी ॥
विलज्ञः त्रि लज्जारहितः । नि
र्लज्जः यथा तनय गत दिनेश
शैशवे सौख्यभागी न भवति
फलभागी यौवने व्याधियुक्तः
जनयति सुत मेकं निर्णयेना
शयित्वा चपलमति विलज्ञःक्रू
रकर्माकुचेलः इति ज्योतिषे पं

चमस्थानेस्य रविफलं ॥
विलपनं क्ली विलापः भाषणं
विपूर्व लप धातो अनट् प्रत्य
येन निष्पन्नं ॥
विलम्बः पुं लम्बनं गौणः
यथा देवीपुराणे अकाले
प्रम वाकाले तीर्थश्राद्धेत
था नैः प्रामे देव सदा कार्यं
कर्तव्यंपितृतर्पणं पितृदानेन
प्रशस्तं पितृणांचातिदुर्लभं
विलम्बोनैव कर्तव्योनचविघ्नं
समाचरेत् इति प्रायश्चित्तत
त्वे विलम्बनं क्ली अशौचे इ
ति विलम्बित शब्दटीकायांभर
तः प्रभवादिषष्टिसंवत्सरान्तर्ग
त द्वात्रिंशवर्षे यथा भविष्ये त
स्करैः पार्थिवैश्चैव अभिभूतमिदं
जगत् अर्घो भवति सामान्योवि
लम्बेत्वभयंस्मृतम् इति ज्योतिस्त
त्वे विलम्बितं त्रि अशौचं इत्य
मरे धीधृपर्यायेः विलम्बितश
ब्ददर्शनात् मन्दत्वे क्ली यथा वि
लम्बितं द्रुतं मध्यं तत्त्वमोघोच
शंक्रमात् इत्यमरः मन्दत्व शी
घ्रत्व उभयेतरत्वयुतेषु त्रय वि
धयुक्त गमनविशेषेषु क्रमात
त्वादिनामत्रयं विलम्बितादीनांवा
नां लयानां तत्त्वादिकाः सञ्ज्ञाः।
इति मधुः साङ्के द्रुत मध्यम
नेष्वतिंप्रयोगार्थेतमध्यमां शि
ष्याणा मुपदेशार्थे विलम्बितांस
माचरेत् इति वेदव्यवस्था न्तस
गीतादौच प्रत्येक मवसरवोधा
र्थंकेव स्वरादि विलम्बनात् विल
म्बते करचरणादयः प्रत्येकं गति
विशेष प्रदर्शनायात्रेति विलम्बि
तं लविङ् स्रंसने श्रोण गत्यर्था
र्थीदिति आधारे क्तः भावे क्तः
इति मुकुटः इतिभरतः विलम्ब
गमनशीलपशुः तद्यथा द्विरद
खड्गोष्ट्र महिष गो गवय चमर
वराहाः इति राजनिर्घण्टः॥
विलम्बी[न] त्रि विलम्बविशिष्टः
विलम्बशब्दादिन्प्रत्ययेन निष्पन्नः
विलम्भः पुं अतिदानं तत्पर्यायः
अतिसर्जनं २ इत्यमरः॥
विलयः पुं प्रलयः इति शब्द
रत्नावली ॥
विलला स्त्री श्वेतवला इतिरत्न
माला ॥
विलवासः पुं नाहककंतः इति
राजनिर्घण्टः ॥
विलवासी न पुं सर्पः इति शब्द
रत्नावली ॥

4659

विलशयः पुं सर्पः इति शब्द
रत्नावली ॥
विलसत्[न] त्रि विलासयुक्तः य
था व्रजसुभ्रुवो विलसत्कलाः
प्रभवन्त्विया सुरवैरिणः इतिछं
दोमंजरी ॥
विलक्षः त्रि विस्मयान्वितः इत्य
मरः विलक्षणं क्ली हेतुशून्या
स्था निष्प्रयोजनस्थितिः यथावि
लक्षणमतेस्थाने यद्वेनिष्प्रयो
जनं इतिभागुरिः इत्यमर भरतौ
भिन्ने त्रि इतिजटाधरः ॥
विशेषलक्षणयुक्तेच ॥
विलक्षणा स्त्री शय्याविशेषः य
थामत्स्यपुराणे अशोकाद्वादशी
येक्ति शय्यां दद्याद्विलक्षणां ।
काञ्चनं पुरुषं तद्वत्फल पुष्पसम
न्वितं संपूज्य द्विजदाम्पत्यंनानाभ
रणभूषणैः वृषोत्सर्गश्चकर्तव्यो
देया च कपिलाशुभा ॥
द्विजदम्पती पूजयित्वा कांचनंप्रे
त प्रतिकृतिरूप पुरुषं फलव
स्त्रयुतं शय्यायां मारोप्य भूषित
द्विज दम्पतीभ्यां शय्यां दद्यात्
इति सुद्धितत्वं ॥
विलापः पुं अनुशोचनोक्तिः।
तत्पर्यायः परिदेवनं २ इत्य
मरः अपिच क्रंदनादौ विला
पःस्यात्परिदेवन मित्यपि ।
इतिशब्दरत्नावली विलापो
ऽःखजंवचः इत्युज्ज्वलनीलम
णिः विलालः पुं यंत्रे इतिश
ब्दचंद्रिका विडालः इत्यमरटी
विलासः पुं हावभेदः इत्यमरः
लीला इति मेदिनी ॥
स्त्रीणां विलासादयः शृंगारभा
वजाः क्रिया हावशब्देनोच्यंते
प्रियसमीपगमनेषु स्थानास
न गमने विलोकनेषु विका
रोऽकस्माच्चक्रोधस्मित चमत्का
रमुख विकूननस विलासः त
थाच योवल्लभा चानुगतो विका
रो गत्यासनस्थान विलोकनेषु
तथा स्मृतक्रोध चमत्कृतीच वि
कूननंचास्यगतं विलासः तथा
प्यत्र तात्कालिको विशेषस्तु विला
सोऽंगक्रियादिषु तात्कालिको
दयितालोकनादि भवः इतिभरतः
अपिच गतिस्थानासनादीनांमु
खनेत्रादि कर्मणां तात्कालि
कंतु वैशिष्ट्यं विलासःप्रिय
संगजं इत्युज्ज्वलनीलमणिः अ
स्यैव यद्रूपं तदभेदेन स्वरूपे
णाविराजते आकृत्यादिभिरन्या

हक्त तदेकात्म रूपकः सविला
सःस्वांश इति यत्रे भेदद्वयंपुनः
तत्रविलासः स्वरूप मन्याकारं
यत्तस्य भाति विलासतः प्राये
णात्मसमं शक्त्या स विलासोभि
धीयते परमव्योमनाथस्तु गो
विन्दस्य यथा स्मृतं परमव्योम
नाथस्य वासुदेवश्च यादृशः स्वां
शः तादृशो न्यूनशक्तिं यो व्य
नक्ति स्वांश ईरितः संकर्षण
हिर्मत्स्यादि यथा तत्तत्स्वधाम
सु इति भागवतामृतं ॥

विलासकाननं क्ली क्रीडावनं।
विलासविपिनं यथा यदीयत्नल
तो विलोक्य विपदं कलिन्दत
नया जलोद्धतगतिः विलास
विपिनं विवेश सहसा करोत्कऊ
शालेद्रुली स जगतो ॥ इति
छंदोमंजरी ॥

विलासमंदिरं क्ली क्रीडागृहं
इतिकेचित् ॥

विलासविभवानसः त्रि लुब्धः
इति जटाधरः ॥

विलासिनी स्त्री नारी इतिरा
जनिर्घण्टः वेश्या इति धनंजयः

विलासीन् पुं भोगी व्यालः
कृष्णः अग्निः चंद्रः ॥ इति
मेदिनी स्मरः हरः । इति
शब्दरत्नावली ।

विलीनः त्रि सामद्रवीभावहृतादिः
तत्पर्यायः विद्रुतः २ द्रुतः ३
इत्यमरः विश्लिष्टः विशेषेणलीनः
यथा करादस्य भ्रष्टे ननुशिख
रिणीदृश्यतिशिशो विलीनाः स्मः
स्मःसत्यं नियत मवधेयं तदखि
लैः इति वसन्तोपालम्भित विरह
तालाप जनितस्मितं विश्वदेवोज्ज
गदवतु गोवर्द्धनधरः इतिछंदो
मंजरी ॥

विलिखनं क्ली लेखनं विपूर्वक
लिख धातो ल्युट् प्रत्ययेन निष्प
न्नं

विलेपः पुं लेपः वि पूर्वकलि
प धातो घञ् प्रत्ययेन निष्पन्नः ॥

विलेपनं क्ली गात्रानुलेपनयोग्य
पिष्टं द्रव्यं वासुगंधिद्रव्यं तत्प
र्यायः गात्रानुलेपनी २ वर्त्तिः ३
वर्णकं ४ इत्यमरः द्वे गात्रानु
लेपनयोग्ये वर्त्तितविलेपने ।
वर्णकादिद्वयं चूर्णे चंदनादि वि
लेपने इतिकेचित् विलिप्यते
ऽनेन करणेऽनटि विलेपनं ।
इति तट्टीकायां भरतः तेउ
मादिलेपनं तत्पर्यायः समाल
म्भः २ इति च सं कीर्णवर्गे ॥

भ्रमरः ॥

विलेपनी स्त्री यवागूः सुवेश
स्त्री इति मेदिनी ॥

विलेपी स्त्री यवागूः इत्यम
रः अन्ने पंचगुणे साध्ये विले
पी च चतुर्गुणे मंडश्चतुर्दशगु
णे यवागूः षड्गुणेऽम्भसि इति
वैद्यकोक्तो भेद इह नादृतः इति
तट्टीकायां भरतः अस्य गुणाः
विलेपी तर्पणी लघ्वी ग्राहिणी
तृट्पापहा इति राजवल्लभः

विलेपीन् त्रि लेपनकर्त्ता विले
पयति यः इत्यर्थे णिन् प्रत्ययेन
निष्पन्नः ॥

विलेप्यः पुं यवागूः इतिशब्द
रत्नावली विलेपनी ये त्रि ॥

विलेवासीन् पुं सर्पः इति शब्द
रत्नावली ॥

विलेशयः पुं सर्पः इत्यमरः ।
मूषिकः इति जटाधरः गोधा ।
शशः शल्लकी यथा गोधा
शशा भुजंगाखुशल्लक्याद्यावि
लेशयाः विलेशया वातरा मधु
रास्सपाकयोः बृंहणा बद्धविण्मू
त्रावीर्योष्णा अपि कीर्तिताः इति
भावप्रकाशः ॥

विलोकनं क्ली स्त्री आलोकनं ।
विपूर्व लोक धातो ल्युट् प्रत्य
येन निष्पन्नं ॥

विलोकितं त्रि आलोकितं
विपूर्व लोक धातोः क्त प्रत्य
येन निष्पन्नं ॥

विलोचनं क्ली चक्षुः इतिज
टाधरः दर्शनंच ॥

विलोटकः पुं तलमीनः वा
लियामाछ इति भाषा इतिश
ब्दचंद्रिका ॥

विलोडनं क्ली मन्थनं आलो
डनं यथा राधिका दधिविलो
डनस्थिता कृष्णवेणुनिनदै
रथोद्धता यामुनं तटनिकुंज
मंजसा सा जगाम सविलासगति
खेलात् इति छंदोमंजरी ॥

विलोडितं क्ली तक्रं इतिराज
निर्घण्टः आलोडिते त्रि ॥

विलोपः पुं विशेषेण लोपः
वि पूर्व लुप धातो घञ् प्रत्य
येन निष्पन्नः ॥

विलोभः पुं विलोभनं । विशे
षलोभः वि पूर्वक लुभ धातो
र्घञ् प्रत्ययेन निष्पन्नः ॥

विलोमं क्ली अरघट्टकः इति
मेदिनी ॥

विलोमं त्रि विपरीतं तत्प

र्यायः प्रतिकूलं २ अपसव्यं
३ अपष्ठुरं ४ वामं ५ प्रसव्यं
६ प्रतीपं ७ प्रतिलोमं ८ अप
ष्ठु ९ इति हेमचंद्रः सव्यं १० वि
लोमकं ११ इतिजटाधरः
विलोमः पुं प्रतीपः सर्पः।
वरुणः कुक्कुरः इति मेदिनी
विलोमकः पुं विपरीतः इति
जटाधरः ॥
विलोमजिह्वः पुं हस्ती इति
त्रिकाण्डशेषः ॥
विलोमवर्णः पुं वर्णसंकर
जातिः इतिस्मृतिः ॥
विलामी स्त्री आमलकी इ
ति मेदिनी विलोलः त्रि चं
चलः यथा कापिविलासवि
लोल विलोचन खेलनजनितम
दोजं ध्यायति मुग्धवधूरधि
कं मधुसूदनवदनसरोजं इतिगो
विंदे १ सर्गः विल्लं क्ली आलवा
लं यथा अर्व्वद्वावदौतस्यो
न्नलं विल्लं तलेच तत हिज्जम
पालवाले स्त्वाक्ष्वादः पांसुम
ईनः इति त्रिकाण्डशेषः हिंगुः
इति शब्दचंद्रिका ॥
विल्लमूला स्त्री वाराहीकंदः
इति शब्दचंद्रिका ॥

विलस्तः स्त्री प्रस्तवदशाज्ञा यथा
सप्तपुत्रप्रसूतायांसप्तमस्तु सतव
स्करा विलस्त् ईशपुत्रासा देका
धिकात रुद्दसूः इतिशब्दरत्ना
वली बिल्वं क्ली बिल्वक्षसफ
लं इति मेदिनिः पलपरिमाणं
इति शब्दमाला
बिल्वः पुं फलवृक्षविशेषः वे
लाछ इति भाषा तत्पर्यायः
शांडिल्यः २ शैलूषः ३ मालूरः
श्रीफलः ५ इत्यमरः महाकपि
त्थः ६ गोहरीतकी ७ इतिवातः ८
अतिमंगल्यः ९ महाफलः १० इ
तिरत्नमाला शल्यः ११ हृद्यगं
धः १२ मालाढ्यः १३ कर्कटाहः १४
शैलपत्रः १५ शिवेष्टः १६ पत्रश्रेष्ठः
१७ त्रिपत्रः १८ गंधपत्रः १९ लक्ष्मी
फलः २० गंधफलः २१ दुरारुहः २२
त्रिशाखपत्रः २३ त्रिशिखः २४
शिवद्रुमः २५ सदाफलः २६
सत्यफलः २७ सुभूतिकः २८ समी
रसारः २९ अस्यफलगुणाः मधुर
त्वं हृद्यत्वं कषायत्वं गुरुत्वं पित्त
कफज्वरातिसार नाशित्वं रुचिका
रित्वं दीपनत्वंच अस्यमूलगुणाः
त्रिदोषघ्नत्वं मधुरत्वं लघुत्वं
वांतिनाशित्वंच अस्य कोमलफल

गुणाः स्निग्धत्वं गुरुत्वं संग्रा
हित्वं दीपनत्वंच अस्यपक्वफ
लगुणाः मधुरत्वं गुरुत्वं कटुत्वं
तिक्तत्वं कषायत्वं उष्णत्वं । सं
ग्राहित्वं त्रिदोषनाशित्वंच इति
राजनिर्घंटः अपिच श्रीफल
स्तुवरस्तिक्तो ग्राहीरूक्षोऽग्नि
पित्तकृत वातःश्लेष्महरो वल्योल
घुरुष्णश्च पाचनःइति भावप्रका
शः किंच बिल्वं वालं कषायो
संपाचनं वह्निदीपनं संग्राहि
तिक्तं कटुकं तीक्ष्णं वातकफा
पहं पक्वंसुगंधि मधुरं दुर्जरं
ग्राहिदोषलं फलेषु परिपक्वेषु
योगुणःसमुदाहृतः बिल्वादन्य
त्र ज्ञेयो बिल्वमामं गुणोत्तरं क
फ वातामपित्तघ्नी ग्राहिणी विल
पेषिका इतिराजवल्लभः अन्यच्च
कोष्ठिके संस्थितं बिल्व मग्निसं
दीपनं परं इतिवैद्यकं बिल्वो
त्पत्यादि यथा बिल्वादिपालनं
कुर्यात्सुभं भयद मन्यथा श्रीह
स्ताद्रोपयेत्वंच यदि स्वर्गान्नही
यते भगो लक्ष्मीश्चया येनुर्गो
रूपासा वातासही तद्गोमयभ
वो बिल्वः श्रीश्च तस्मादजायत
निराकृतिपति हृष्टा क्रोधेनमर
ता

ततः श्यामा सा उमयादेवी स
र्वभोग्या भवाधमे ततःसंश्रा
ताभाना मोक्षेवं भवतुप्रिये
प्रियत्वं सर्वलोकेपि सुरासुर
नमस्कृता माता त्वं सर्वलोका
ना भवतानांविशेषतः एवमा
त्मवशांकृत्वाशाप मोक्ष मया
चत वरं ददौचसा कामेशाप्रमो
त्सप्रदं त्वंप तीराध्यो लेमस्त्रगाके
णा सह गोभिर्धनेनच वसत्वम
यने यावत्तत्तो विस मवाप्स्यसि
प्रतिं त्वं सर्वलोकानां प्रशंसेष्ठ
महावले तस्मवत्तःस्थिता भद्रे
दृष्टा त्वं विचरिष्यसि लोकभो
ग्याच भूतित्वान्नुजेषु रूपेषुच
नजाति रूप शौर्यादिन वेषमन
शुभा मतिः भविष्यति यदा चैव
चंचला जलविंदुवत् बिल्ववृक्षः
प्रियः शंभो स्तवयोनि भवि
ष्यति सर्वपुष्योत्तमश्रेष्ठो देवा
हारो मनोरमः अच्छेद्यः सर्व
लोकानां छेदान्नाम्यः सदाप्र्णां
येच पापा दुराचाराःश्रीतरो
श्छेदकारिणः ते त्वदीच्यादिन
वके पात्यंते ब्रह्मणो दिनं स
दुःखिता भविष्यति नरो दुश्छ
लिनःसदा तत्र देशे भयं नित्यं
चिरंराजा नजीवति नचद्रव्यपतिः

कश्चिद्विल्ववृक्षस्य छेदकः क्रि
यते. यत्रविच्छेदः सपुष्प फलि
न स्तरोः अनावृष्टिभयं घोरं त
स्मिन्देशे प्रजायते इतिवह्निपुरा
णे वामनप्रादुर्भाव नामाध्यायः
मतांतरेतस्योत्पत्ति र्यथा शिवउ
वाच मातः समुद्रतनये मामाछि
न्धि स्तनंपरं यस्ते छिन्ने स्तनो
वामो जायतां पुन रेव सः श्रु
त्वातेपरमाभक्तिः पूर्णास्तेनमु
नोरथः यस्य छिन्ने स्तनोदक्षो
म हिंगो पवित्रस्त्रभे सोऽस्तुवृक्षः
स्तितोगुणोनाम्ना श्रीफल इत्य
तः मूर्तिः मांस्तवैव भक्ति वृक्षः
श्रीफल नामकः त्वत्कीर्तयेति
ता वात्स्यायवत्सेदिवाकरो स
तरु मेय वे स्तिपरमः सुप्रियो
भवेत तत्पत्रेणैव मे पूजा भविष्य
ति नचान्यथा स्वर्णपुष्पाप्रवा
लादि पुष्पाण्यन्यानिच ध्रुवं
श्रीफलछद लेशस्यकलांनार्ह
न्ति कोटिकां यथामे श्रीफ
लतरु र्यथा गंगाजलंमम त
था प्रियतमं त्वत्रि त्रिपत्रः श्री
फलछदः अस्मनः स्वतपेत्सको
सदेपोंनहृये सावि कृपालमोच
नद्वेचवृक्षः श्रीफलकोजितः इ
तिवृहद्धर्मपुराणे ए अध्यायः

देव्युवाच वैशाख शुक्लपक्षस्य तृ
तीयायां सावि त्वयं जातो वैश्री
फल तरुर्माहात्म्य तस्य कथ्यते
जाते त श्रीफल तरौ देवाःसर्वेस
वासवाः ब्रह्मा नारायणश्चापिदेव
...समागताः ददृशुःस्तिमयवि
टपं त्रिपत्रं मंडलं वृत्तं दीप्य
मानं तेजसैव शिवरूपं शिवप्रदं
प्रणेमुः स्निग्धिस्तस्य वाक्यंवक्तुःस
र्वाःस्थिताः तद्दत्तात्मा भगवानु
वाच विश्वरथायः विमरुवाच
अयं नाम्नाविल्व इति मालूरःश्री
फलस्तथा शाण्डिल्यश्चाथशैलूषः
शिवःपुण्यः शिवप्रियः देवावास
स्तीर्थपदः पापघ्नः कोमलछदःज
यो विजयनामाच विष्णु स्त्रिनयनो
वरः धूम्राक्षः शुक्लवर्णश्च संयमी
श्राद्धदेवकः इत्येक विंशतिनाम्नो
द्यथात्वेषतरुत्तमः धनुःशतंचम
मूलात्तंवयाप्र स्तीर्थ मुच्यते अथो
भूमेस्तथा तीर्थं मत स्तीर्थे अयं
सात्विकद्दे पत्रे हरो त्रयः पत्रे वामे
विधिः स्वयं अग्रे दक्षिणे पत्रेच
त्रिपत्र दल मित्युत अग्रच्छायो
च पत्रेच लंघयेन पदास्पृशेत द
र्शने लंघनाद्वायुः पदा स्पर्शान्त्रि
यं देवेत. पत्रपुष्प सहस्रस्य फल

4665

पत्र समापिच दर्शने प्रणतो
स्पर्शे स्थान समार्जने तथा पू
जने चयने दाने क्रमान्मंत्रानुदी
रयेत. विल्ववृक्ष महाभाग महे
शस्यसदा प्रियः शिवदर्शनक
ज्योतिः प्रसीदाधिसत्वास्तन नर
पतेन मंत्रेण प्रफुल्लाक्षःप्रगेशु
भं प्रपश्येत्सशिवं यशोपत्युणोऽभ
तदनंतरं ओंनमो विल्वतरवेसदा
शंकररूपिणे सफलानि ममा
गानिकुरुष्व शिवहर्षद मंत्रेण
नेन मालूर महोगः प्रणमेत्क
ती सर्वेस्त्वो मतो भक्तः समेपि
यतरः परः शिवपूजक मालूर
प्रियस्पर्शमहातरो स्पृशामित्वा
महापापसंचयान्मे मृणाशयः
देववृक्षवरश्रेष्ठ स्यानते समनो
हरे क्षौउंस्यागत्य विधुया मार्जये
तत्पश्चीद्दमं मंत्रेणानेन विल्वस
द्दशाहत्त्वस्थलेमृजेत सगोमय
जलैः मातः समये सत्व वैसवः
ओंद्रुमाय श्रीफलाय नमो दश
भि रक्तैः मंत्रेण पूजयेद्विल्वं
जपेद्भक्ति क्रमात्तथा पुणपट्ट
त महाभाग मालूर श्रीफलप्र
भो महेश पूजनार्थाय तव
पत्राणि चिनोम्यहं मंत्रेणानेन
चिनुयाद्विल्वपत्राणि भक्तितः
य

तांत द्वादशीसायं मध्याह्नभि
कालतः शाखाभंगो न कर्तव्यो
नैवारोहेत्तथा तरुं वरमारु
ह्य चिनुयात्र शाखाभजनं क्व
चित एवंविनेश्च शिवः प्रभ्यः पत्रे
रप्यत्र एवविते; षाण्मासानन्तरे
विल्वपत्रे पर्युषिते भवेत पू
ज्या पतेन वै देवाःसूर्यं लम्बोद
रो विना विल्ववृक्षवने यत्र सात
वाराणसी पुरी पंचविल्वद्रुमा
यत्र तत्र तिष्ठेत्स्वयं हरिः स
प्तविल्वद्रुमा यत्र तत्र शंभुर्मया
सह विल्ववृक्षा यत्र दश तत्रशं
भु मेया सह विल्ववृक्षा यत्रदश
तत्र शंभुर्गणैःसह पतान्युक्ता
नि तीर्थानि देवाःसर्वे मरुद्गणाः
यत्र वाप्यां सहस्रस्य कोणा रे
शानतामके जायतेश्रीफलत
रु र्न तत्र विपदः क्वचित पू
र्वस्यांस्थावदः समाद्दक्षिणे य
मभीतिहा पश्चिमे च प्रजादायी
वृक्षो विल्व उदग्रतः प्रमशाने
चनदीतीरे प्रांतरे वा वनांतरे।
विल्ववृक्षतलं प्रोक्तं सिद्धपीठं
स्थलेश्वथीः नमध्यप्रांगने वृक्षं
स्थापयेत श्रीफलाख्यकं देवा
य दिप्रजायते तदा शिववदर्च
येत. चैत्रादि चतुरो मासान्वा

भवे परमात्मने दत्तं स्याद्बिल्वप
त्रैकं तत्पवेत् समेश्वराः मध्याह्न
काले येमर्त्या विल्वं ऊर्ध्वःप्रदत्ति
णं तेःसमेरुगिरिवृः कृतपवप्रद
त्तिणं नच्छिद्यात्श्रीफलतरुंनर
हेत्काष्ठमेवच विना ब्राह्मणायत्ता
र्थं पतितोविल्वविक्रयी पञ्चवि
ल्वसमुद्भूयो यत्ते मूर्द्धिमानवः
यमाधिकारो नात्रस्याश्रतःपापो
पपातकैः विल्वपत्रे फले वीजंभू
मोपतित मीश्वरः स्वयंगृह्णाति
शिरसा वेपथं भय शंकितः चै
त्रादिचतुरो मासान्सिंचेद्बिल्वतरुं
कृती यथा स्निग्धो भवेद्वृत्तस्त
था तस्मितरोऽपिच चैत्रादि चतु
रोमासान्सदा भ्रमति शंकरः न
वीनविल्वपत्रार्थी भक्तिश्रद्धिम
नायकः हरिद्वारनगरे यत्र देवता
थो महेश्वरः तत्रासयो विल्ववृक्षः
सर्वाश्रित उदाहृतः कामरूपेका
मतरुः काश्यां शुक्लस्पष्टोदिमः
कांचीपुरे पुरःप्रोक्तःश्रीफलोः
त्यपगाप्रदः तेपि तीर्थविशेषाः
समुत्तीर्थेष्वपि सदान्वेलाः देवु
वाच एतस्मिन्नेव कालेतशंभ
रागत्य वेश्मवि ब्रह्मणाविस्मना
पत्रैः पूजितः श्रीफले रभूत् त
तः सर्वे यथा

स्थाने जगत् ऋौरायणादयः काशि
तोऽयंमया सत्वा विल्वद्रुतसि
व्यतमः श्रयं वा संप्रोक्तः शिवत
रु कथाऽप्य निचयःपवित्रःश्रो
तव्यःश्रवणारमणीयःखलु सतां
शिवे विसोभेदापहरणा उदारः
सुमनसा समेत्यःसंपासःप्रभव
ति शिवस्यापि निकटः इतिचह
हद्धर्मपुराणेविल्ववृक्षमाहात्म्य ॥
प्रथायः तत्रमते तसोसति र्येधारे
मुवाच कथ माविस्तविता विल
वृत्तो वभूव ह ज्योतीरूपे महेश
प्रार्थिता ब्रह्मादिभिः सदा ।
तत्रमेऽनुग्रहाद्धाणी सर्वेषां प्रिय
तां गता विल्वो रतिप्रिया नित्यं
सा भूत्सरस्वती सदा तादृशी
ति नैतस्यांच जायते केशवस्यच
इति चिंतापरा लक्ष्मी र्येयाश्रीशै
लमंदिरं प्राप्य मलिंग मेकांते
तप लेपेऽभिदाहत्ता तथापि
यदि नैवाभूत्कृपा मे परमेश्वरि
तदा सा वृक्षरूपेण स्थिता लिंग
प्रिया सती पत्रैःपुष्पैः फलैः
स्वीयैःपूजयामास सततं कोटि
वर्षं महादेवि ततो मेऽनुग्रहोऽ
भवत् तेनैवानुग्रहेणैव विसो
र्वक्षःस्थिताभवत् सदैव परमे

4667

शानि विश्ववक्षा सदैवहि श्र
तस्तकारणाद्देवि तद्रुपेणाह
रिप्रिया सदैव पूजयेत्संसामह
ता सा लता शिवे अतस्तं वृक्ष
माश्रित्य तिष्ठामि च दिवानिशं
सर्वतीर्थमयो देवि सर्वदेवमयः
सदा श्रीवृक्षःपरमेशानि अत
एव न संशयः तत्फलैस्तत्पत्रैर्वै
वौतत्पत्रैर्येःप्रपूजयेत् तत्काष्ठ
चंदने वापि मम भक्तःसमेप्रि
यः तत्काष्ठ चंदनं भाले योधा
रयति संभ्रमात् तत्क्षणे शिवरुद्रा
सानमेदवी मुदान्विता अतस्तत्र
त्वं देवि नधारयति कश्चन त
तत्पत्रं तत्पत्रनं वा कदापि धारये
त्वं हिविल्वमूले महेशानि प्राणा
स्त्यजति योनरः रुद्रदेहो भवेत्सत्ये
पापकोटियुतोपि सन् । इति
योगिनीतंत्रे पूर्वखंडे ५ पटलः
अपिच विल्ववृक्षे तथा देविभ
गवान्शंकरःस्वयं विल्ववृक्षत
ले स्थित्वा यदि प्राणं त्यजेन्न
धीः तत्क्षणान्मोक्षमाप्नोति किं
तस्य तीर्थकोटिभिः यत्रब्रह्मा
दयोदेवाः तिष्ठंति शाखिने
तेव विहृदत्ततले स्थाने वरिदिष्ठा
दिपरितं तदेव शंकरं तेषमक्ती

मयंसदा सर्वपीठ मयं तत्सर्व
देवमयं सदा तत्पूजयेत्माकरं
क्षेत्रं नच गंगा त्यजेत्प्रिये ॥
समीपे स्वचाविंशि विल्वहृत्तोय
दि प्रिये काशीपुरमये तत्रतत्र
प्राणांस्त्यजेद्यदि किं तस्य कोटि
तीर्थेन काशीवासेन किं प्रिये
इति पुरश्चरणोल्लासे ६ पट
लः तर्दनविधि र्येया पत्रवा
पादवा पुष्पं फलंतेषु मयोम
खे यथोत्पन्नं तथादेय विल्व
पत्राणि धोपुर्वे मातृकातंत्रे ५५
पटलः शिवउवाच शृणुदेवि
विश्ववक्ष्यामि रहस्यं गिरिजात्म
के पत्रंब्रह्ममयंदेवि अङ्कतेव
रवर्णिनि श्रीशैलशिवरेजातः
श्रीफलःश्रीनिकेतनः विल्व
प्रीतिकरश्चैव ममप्रीतिकरःस
दा ब्रह्म विष्णुशिवाःपत्रेवृन्ते
चशक्तिरूपिणी वृंतमूलेत्वव्रं
स्यान्पत्रे ब्रह्मपदे प्रिये गिरिजाप
त्रैकेकेन दत्तवा हरि मर्चयेत् के
वलं तस्य तेनेव शक्तिपूजावि
शेषतः पत्रं पुष्पं फलं तोयं
नैवेद्यं धूप दीपकं दत्त्वा यद्यत्फ
लं प्राप्तं तस्मात्कोटिगुणंभवे
त् सर्वं त्वनेना देवि गिरिजा
मेक मर्पणं केवलस्पदो हरिश्चैव

दासेहं त्वां स्वरूपतो त्वयि केव
लदं ज्ञानं धर्मं कामार्थदं प्रिये
वज्रहीन मिदं देवि प्राप्नुयाद्दा
न्छितं फलं सवज्रे म्रियेत्स्य
नं वज्रदानेन पार्वति ।
तस्माच्च साधकेन्द्रेण वज्रहीनं
प्रदापयेत् ॥ विल्वपत्रच्चा
णग्रहणानन्तर गमनफलं य
थाच्चाणं गृहीत्वा यो गच्छेत्सर्वे
सिद्धि मवाप्नुयात् ऊर्द्ध्व स्वदर्शने
रुद्रोदयः पाशुपत स्तथा पुरो
माहेश्वरी रुद्रोत्थेच शूलधा
रिणी दक्षपार्श्वेच श्रीनाथोवा
मपार्श्वे प्रजापतिः चेद्र सूर्यौ
धृतौ छत्र मदं पादौ करौ मदा
इतिज्ञानभैरवतन्त्रे शिवपार्वती
संवादे ८ पटलः ॥
विल्वपेषिका स्त्री शुष्कविल्वखं
डं वेलसुंठ इति भाषा यथा
कफवातामशूलघ्नी ग्राहिणी
विल्वपेषिका इति राजनिर्घण्टः
विवदमानः त्रि विवादकर्त्ता
विरुद्धं वदधातोः शान प्रत्य
येन निष्पन्नः ॥
विवा स्त्री हिंगुपत्री । इति
राजनिर्घण्टः ॥
विवधः पुं पर्याहारः सक्तुधान्य
तंडुलादिः मार्गः पन्थाः । इ
त्यमर भरतो ब्रीहि तण्डादेः
पर्याहरणं इति स्वामी ॥ उपरि
तोवद्ध शिक्य स्कंध वाह्यकाष्ठ
काव इति ख्यातं इतिभानुदी
क्षितः भारः इति मुकुटधृत
विश्वः ॥
विवधिकः पुं वैवधिकः इत्यमर
टीका सारसुन्दरी ॥
विवरं क्ली छिद्रं इत्यमरः ॥
दोषः इति मेदिनी ॥
विवरणं क्ली व्याख्या इतिहला
युधः ॥
विवरनालिका स्त्री वेणुः इति
त्रिकाण्डशेषः ॥
विवर्णः त्रि नीचः इत्यमरः ॥
मलिनश्च ॥
विवर्त्तः पुं समुदायः अपवर्त्तनं
नृत्यं इति विश्वः ।
विवर्त्तनं क्ली परिभ्रमणं विपूर्व
कवृतधातो रनट् प्रत्ययेन निष्प
न्नं विवशः त्रि अवशपाप्ता अरि
ष्टदुष्टधीः इति मेदिनी हे आ
सन्नमरण स्वचित लक्षणेन दृषि
त बुद्धो विरुद्धं वष्टि विवशः
मत् आसन्नमरण ख्यापक लिंग
मरिष्टं तेनदुष्टा धीर्यस्य स तथा इत्यमरः

4669

टीकायां भरतः
विवस्वती स्त्री सूर्यनगरी इ
ति मेदिनी ॥
विवस्वान् त् पुं सूर्यः अर्कवृक्षः
इत्यमरः देवता इति मेदिनी
अरुणः इति शब्दरत्नावली
वैवस्वतमनुः इत्यजयः ॥
विवृत्ता स्त्री वक्रभिक्षा सनेत
वच धातो र प्रत्ययेन निष्पन्ना।
यथा विवृत्ता वशात्कारकाणि
भवंति इति व्याकरणटीका ॥
शक्तिः यथा प्रकृत्यर्थोपि ख
त्वेनइष्टिश्यस्य विशेषणं सोत्व
या तृत्सनीतित्वाद् विवत्तां प्रपद्य
ते इत्येकादशीतत्वं ॥
विवत्तितः त्रि वक्तुमिष्टः सनं
तवचधातोः क्त प्रत्ययेन निष्पन्नः
शक्यार्थः यथा उपादेयगता
याः संख्याया विवक्षितत्व युक्त
अनुपादेयगता संख्यात विव
क्षिता इतिमाधवाचार्यः इत्ये
कादशी तत्वं ॥
विवाकः त्रि विवेचनकर्त्ता य
था अर्थिप्रत्यर्थिनो र्वचनं विरु
द्धं सभ्यैः सह विविनक्ति वि
वेचयति वा विवाकः इतिमि
ताक्षरः ।
विवादः पुं विरुद्धो वादो विवा
दः सच धन विभागादि विष
य स्त्रपादिः इति भरतः तत्प
र्यायः व्यवहारः २ इत्यमरः अ
णादिमायः ३ इतिजटाधरः
ऋणादिदाय कलहे द्वयो र्वेऊ
तस्तथा विवादो व्यवहारश्चहृदय
मेतन्निगद्यते इति शब्दरत्नावली
मात्रादिना विवादनिषेधो यथा
आक्षेपस्सर्व धर्मेत द्विरुद्धं न
चाचरेत् माता पितृतिथीस्त्रश्चैर्वि
वादं नाचरेत्गृही । इतिगा
रुडे ९६ अध्यायः ॥ अष्टाद
श विवादस्थानानि यथा तेषा
माद्यमृणादानं निःक्षेपोऽस्वामि
विक्रयः संभूयचसमुत्थानं दत्त
स्यानपकर्मच वेतनस्यैव चादा
नं संविदश्च व्यतिक्रमः क्रयवि
क्रयानुशयो विवादः स्वामिपाल
योः सीमाविवादधर्मश्च पारुष्ये
दंडवाचिके स्तेयंच साहसंचैव
स्त्रीसंग्रहणमेवच स्त्रीपुंधर्मो वि
भागश्च द्यूतमाह्वय मेवच ।
पदान्यष्टादशैतानि व्यवहारस्थि
तौ विदुः इति मनुः अस्या
र्थः स्वधनस्यान्यस्मिन्नर्पणं
रूपो निःक्षेपः अस्वामिनाच

क्रीते विक्रयः संभूयवणिगा
दीनां क्रियानुष्ठानं दत्तस्य धन
स्यापहृत्य बुद्ध्या क्रोधादिना वा
ग्रहणं कर्मकारस्य भृतेरदा
नं कृतव्यवस्थातिक्रमः क्रये
विक्रये च कृते पश्चात्ता विप्र
तिपत्तिः स्वामि पशुपालयोर्वि
वादः ग्रामादि सीमा विप्रतिप
त्तिः वाक्पारुष्यं आक्रोशनादि
दंडपारुष्यं ताडनादि स्तेयं।
निह्नवेन धनग्रहणं साहसं
प्रसह्य धनहरणादि स्त्रियाश्च
परपुरुष सम्पर्कः स्त्रीसहित
स्य पुंसो धर्मव्यवस्था पैतृका
दिधनस्य विभागः द्यूतं अक्षादि
क्रीडा आहूय पणव्यवस्थापू
र्वकं प्राणिमेषादि प्राणि योध
नं इति कुल्लूकभट्टः ॥
विवादानुगतः त्रि विवादकर्ता
यथा विवादानुगतं पृष्ट्वा सभ्य
स्तत्प्रयत्नतः विचारयति येनासौ
प्राड्विवाक स्ततःस्मृतः ॥ इति
मिताक्षरा ॥
विवादी न् त्रि विवादकर्ता यथा
अनुभावी च यः कश्चित्कुर्यात्
साक्ष्यं विवादिनां । इति व्यव
हारतत्त्वं ॥

विवाहः पुं दारपरिग्रहः तत्प
र्यायः उपयमः २ परिणयः ३
उद्वाहः ४ उपयामः ५ पाणिपी
डनं ६ इत्यमरः दारकर्म ७ कर
ग्रहः ८ इति शब्दरत्नावली पा
णिग्रहणं ९ निवेशः १० पाणिक
रणं ११ इति जटाधरः स चाष्टवि
धः यथा ब्राह्मो विवाह आहू
य दीयते शक्त्यलंकृता तज्जः पुना
त्युभयतः पुरुषानेकविंशतिं
यज्ञस्थायर्त्विजे दैव आदायार्षस्तु
गोद्वयं चतुर्दश प्रथमजः पुना
त्युत्तरजश्च षट् इत्युक्त्वा चरतां
धर्मं सहया दीयतेऽर्थिने स
कायः पावयेत्तज्जः षट्वंश्यान्
सहात्मना आसुरो द्रविणादा
नात् गान्धर्वः समयान्मिथः राक्ष
सो युद्धहरणात् पैशाचः कन्यका
छलात् इति याज्ञवल्क्यः ॥
अपि च गृहीतविद्यो गुरवे दत्वा
च गुरुदक्षिणां गार्हस्थ्यमिच्छ
न् भूपाल कुर्याद्दारपरिग्रहं ॥
वर्षैरेकगुणां भार्यामुद्वहेत्त्रि
गुणः स्वयं नातिकेशामकेशां
वा नातिकृष्णां न पिंगलां निस
र्गतोऽधिकाङ्गीं वा न्यूनाङ्गीमपि
नोद्वहेत् अविशुद्धां सरोगां वा

4671

कुलजां वातिरोगिणीं न दुष्टां
दुष्टवाचालां रोगिणीं पितृ मातृ
तः न श्मश्रुव्यंजनवतीं नैव च पु
रुषाकृतिं न घर्घरस्वरां क्षामां वा
क्यां काकस्वरां न च नानिबद्धेक्ष
णां तद्वद्वृत्ताक्षीं नोद्वहेद्बुधः य
स्याश्च रोमशे जंघे गुल्फौ चैव
तथोन्नतौ कूपौ यस्या हसन्त्याश्च
गंडयो स्तां च नोद्वहेत् । नातिरू
क्षच्छविं पाण्डुकरजां अरुणेक्षणां
आपीन हस्त पादां च न कन्यामु
द्वहेद्बुधः न वामनां नातिदीर्घां नो
द्वहेत्संहतभ्रुवं न चातिच्छिद्रदश
नां न करालमुखीं नरः ॥ पंच
मीं मातृपक्षाच्च पितृपक्षाच्च सप्त
मीं गृहस्थश्चोद्वहेत्कन्यां न्यायेन
विधिना नृप ब्राह्मो दैव स्तथैवा
र्षः प्राजापत्य स्तथासुरः गान्धर्व
राक्षसौ चान्यौ पैशाचश्चाष्टमो
ऽधमः एतेषां यस्य यो धर्मो व
र्णस्योक्तो मनीषिभिः कुर्वीत
दारहरणं तेनान्यं परिवर्जयेत्
स धर्मचारिणीं प्राप्य गार्हस्थ्यं स
हितं तया समुद्वहेद्ददात्येतत्स
म्यगूढं महाफलं इति विष्णुपुरा
णे ३ अंशे १० अध्यायः अन्यच्च
याज्ञवल्क्यउवाच शृण्वन्तु मुनयो

धर्मान्वदस्यस्य यतव्रताः गु
रवे च धनं दत्वा स्नात्वा चैतद
नुज्ञया अविप्लुतो ब्रह्मचर्यो
लक्षण्यां स्त्रियमुद्वहेत् अनन्य
पूर्विकां कान्ता मसपिण्डां यवी
यसीं अरोगिणीं भ्रातृमतीं अ
समानार्षगोत्रजां पंचमात्सप्तमा
दूर्द्ध्वं मातृतः पितृतस्तथा हि पंच
नव विख्यातात् श्रोत्रियाणां महा
कुलात् सवर्णः श्रोत्रियो विद्वा
न् वरदोषान्वितो न च ॥
यदुच्यते द्विजातीनां शूद्राद्दा
रोपसंग्रहः नैतन्मम मतं यस्मा
त्तत्रायं जायते स्वयं तिस्रो वर्णा
नुपूर्व्येण द्वे तथैका यथाक्रमं
ब्राह्मण क्षत्रिय विशां भार्या वा
शूद्रजन्मनः ब्राह्मो विवाह आहू
य दीयते शक्त्यलंकृता तज्जः
पुनात्युभयतः पुरुषानेकविंश
तिं यज्ञस्थायर्त्विजे दैव आदायार्ष
स्तु गोद्वयं चतुर्दश प्रथमजः पुना
त्युत्तरजश्च षट् इत्युक्त्वा चरतां ध
र्मं सहया दीयतेऽर्थिने सकायः
पावयेत्तज्जः षट्वंश्यानात्मना सह
आसुरो द्रविणादानात् गान्धर्वः
समयान्मिथः राक्षसो युद्धहरणा
त् पैशाचः कन्यकाछलात् चत्वा
रो ब्राह्मणस्याद्यास्तथा गान्धर्व

राक्षसो रात्त स्तथा स्मरो वैश्यपे
श्रूद्रेचान्त्यस्तु गर्हितः पाणिग्रहः
सवर्णास्त्रग्रह्णीत क्षत्रिया शरं
वैश्यपा प्रतोर मादयाह्वेनचाय
जन्मनः पिता पितामहो भ्राता
सकुल्याजननी तथा कन्याप्रदः
पूर्वनाशे प्रकृतिस्थ परः परः अ
प्रयच्छन्समाप्नोति भ्रुणहत्याः
मृताहतौ पथामभावे दातृणां
कन्याकुर्यात्स्वयंवरं सकृत्प्रदीय
ते कन्याहरं स्तां चोरदंडभाक्
श्रेष्ठांहि समन्दद्यः स्कृद्दष्टां
हि परिस्यजेत् इति गारुडे ९५
अध्यायः अपरंच यमउवाचक
न्यायेत प्रयच्छति यथाशक्त्या
स्वलंकृतां ब्रह्मदेयो हिजश्रेष्ठ
ब्रह्मलोकंब्रजंति ते कन्यादानं
तु सर्वेषां दानानां मुत्तमंस्मृ
ते महान्त्यपिसमृद्धानि गोऽजा
विक धनान्यतः स्त्रीसम्बंधे दशे
मानि कुलानि परिवर्जयेत् ह्री
न शालिष्ठ पाषंडभ्ने उद्वेगका
रिणां क्षयामय सदा वाच्यः
विविकुष्ठिकुलानिच यस्या
स्तु नभवेद्भ्राता नच विज्ञायतेपि
ता नोपयच्छेत तांप्राज्ञः पुत्रिका
धर्म शंकया चतुर्णामपिवर्णा
नांप्रेत्य चेह हितायच अष्टाविमा

समासेन स्त्री विवाहान्निबोधत
ब्राह्मो दैव स्तथा चार्षः प्राजा
पत्यस्तथासुरः गान्धर्वो राक्षस
श्चैव पैशाच श्चाष्टमोऽधमः श्रुता
ध्याचार्चयित्वा च श्रुतशीलवते स्व
यं दद्यात्कन्यां यथान्यायं ब्राह्मो
धर्मःप्रकीर्तितः १ यज्ञेतु वितत
सम्यगृत्विजे कर्म कुर्वते अलंकृत्य
तथा दानं दैवो धर्मः प्रपश्यते
२ एकं गोमिथुनं द्वे वा वराद
दाय धर्मतः कन्याप्रदानंतु विधि
वदार्षो धर्मःसउच्यते ३ सहोभौ
चरतां धर्ममिति वैवानुभाष्यतु
कन्या प्रदान मभ्यर्च्य प्राजापत्यो
विधिःस्मृतः ४ ज्ञातिभ्योद्रविणं
दत्वा कन्यायै चैवशक्तितः
कन्याप्रदानं स्वाछन्द्यादासुरो धर्म
उच्यते ५ इच्छयान्योन्य संयोगा
त्कन्यायाश्च वरस्यच गांधर्वःस
तु विज्ञेयो मिथुन्यः कामसंभवः
६ हत्वा छित्वा च भित्वाच क्रोश
न्तींरुदतींगृहात् हरणं क्रियते
यत्र राक्षसो विधि रुच्यते ७ सु
प्तांमत्तां रहःकन्या यत्र नानीयते
तथा सपापिष्ठो विवाहानां पैशा
चःप्रथितोऽष्टमः ८ पंचानांचत्र
यो धर्मा द्वावधर्मौ द्विजोत्तम ॥

4673

पैशाच श्चासुर श्चैव न कर्तव्यो
कदाचन चतुर्णामपि वर्णाना
मेषधर्मःसनातनः पृथग्वायदि
वा मिश्रा कर्तव्या नात्र संशयः
कन्यां येतुप्रयच्छंति यथाशक्त्या
स्वलंकृतां विवाहकाले संप्राप्तेय
थोक्ते सदृशे वरे क्रमात्क्रमं क्र
तु शतमनुपूर्वं लभंति ते क्रत्वा
कन्याप्रदानेन तु पितरःप्रपितामह
हाः विमुक्ताःसर्वपापेभ्यो ब्रह्म
लोकंब्रजंति ते ब्राह्मेण तु विवा
हेनयस्तु कन्यां प्रयच्छति ब्रह्मलो
कंब्रजेच्छ्रीत्रं ब्रह्माद्यैः पूजितःस
दैवेन तु विवाहेन यस्तु कन्यां
प्रयच्छति ब्रह्मलोकंब्रजेच्छ्रीत्रं
ब्रह्माद्यैःपूजितः सुरैः दैवेनतु
विवाहेन यस्तु कन्याप्रयच्छति भि
त्वा द्वारंतु स्वर्यस्य स्वर्गलोकंच ग
[illegible] च्छति गंधर्वलोक मासाद्य क्रीड
ते देववच्चिरं शुल्केन दत्वा योक
न्यां तांपश्चात्सम्यगर्चयेत् सकिन्न
रैश्चगंधर्वैः क्रीडते काल मक्षयं।
तमन्तं कारयेत्तासां प्रज्याश्च सत
तं गृहे ब्रह्मदेया विशेषेण ब्राह्म
भोज्या सदा भवेत् कन्यायांब्रह्म
देयायां सभुंजन्कल्मषमश्नुते अश्न
भुंजति यो मोहाद्भुक्त्वा सनरकं
ब्रजेत् अप्रजायांच कन्या।

येन भुंजीयात्कदाचन दौहि
त्रस्य मुखं दृष्ट्वा किमर्थं मनुः
शोचसि महासत्व समाकीर्णा
त्त्राणिते नरकादयं तीर्णस्त्वंस
वेडः स्वभ्यः परंस्वर्गमवाप्स्यसि
इत्याद्येवह्निपुराणे तडागकृत्स्य
संशानामाध्यायः विवाहकालेमि
थ्यावचने दोषाभावो यथा शार्ङ्गि
ष्ठोवाच न नर्मयुक्तं वचनं हिन
स्ति न स्त्रीषुराजन्न विवाहका
ले प्राणात्यये सर्वधनापहारे पं
चान्टतान्याहु रपातकानि इति
मात्स्ये ३१ अध्यायः विवाहेवर्ज
नीयानि यथा विवाहे स्नानवि
धौंग भूषोत्सव त्रयी रवाः देवी
संगीत तोरेता लाज मंगलवर्त्त
नं इतिकाविकल्पलतायां १ स्तव
के ३ कुसुमं अथ विवाहोक्त
दिनानि तत्राहादि शुद्धि र्यथा
प्रस्तुताधानतः शुद्धि र्विघ्नेषु
मे क्रमात् विवाहे योषितो चं
द्रार्कजा शुद्धि र्योषितोः सभ
र्तृक क्रियारंभे भर्तृ गोचर शुद्धि
तः यामोद्वाहे गर्भकृत्ये स्वशुद्ध्या
मोति तत्फलं प्रारभ्य जन्मसम
यात्पुत्रे विवाह मोजाहकेषुग
नयः शुभ मादिशति।
आधानतः प्रभृतितः सम।

वत्सरेषुप्रोक्त स्तयो नं शुभद
स्त्रिविलोमवर्षे अयुग्मे तर्भगा
नारी युग्मेचविधवा भवेत् त
स्मादुभयान्विते युग्मे विवाहेसा
पतिव्रता मासत्रयादूर्ध्वं मयुग्म
वर्षे युग्मेचमासएव मेवयावत्
विवाह शुद्धिं प्रवदंति सर्वे वात्
स्यादयो ज्योतिषि जन्ममासात्
युग्मांड्केषुप्रवते रपिजन्ममा
मासत्रयं विवहेन परमह शुद्धि
प्राङ्समस्तगनयो विषमेत
वर्षे मासत्रयादुपरितः वत्स
जन्ममासात् राजमार्तंडे मांग
ल्येषु विवाहेषु कन्यासंवरणेषु
च दशमासाः प्रशस्तेचैत्रपौ
ष विवर्जिताः कन्यासंवरणाद
लोदक विप्रो दंपत्योर्हि नवा
ष्ट राशि रहिते दारानुकूले र
वौ चंद्रे चार्के ऊनादि शुक्रवि
युते मध्येः ग्रहा पापयोः त्य
क्त्वाचव्यतिपात वैधृति दिनं वि
ष्टिञ्च रिक्तां तिथिं क्रूराहायण
चैत्र पौषरहिते लग्नांशके मानु
षे योगविशेषे दोषविशेषानाह
रत्नमालायां ऊत्पाच्छेदो ग्नी
पाते परिघे स्यात्सिद्धाविनी वैधृ
तो विधवा नारी विषदाहेति गं
डके याचाते व्याधिसंघातः प्राक्ता
तो

हर्षणे तथा मूलेच व्रणाच्छूलं
स्यात् गंडेरोगभयं तथा विष्कंभे
ऽप्यहिदंशः स्यात् वज्रके मरणं भवे
त् एतेवै दारुणाः सर्वे दशयोगाः
प्रकीर्तिताः आश्वलायनः ।
उदगयने आपूर्यमाणे पक्षे कल्या
णे नक्षत्रे चौडकर्मोपनयनगो
दान विवाहाः विवाहः सार्वकालि
क इत्येके इति आषाढे धनधा
न्यभोग रहिता नष्टप्रजा श्रावणे
वेश्या भाद्र पदे बुधे च मरणं
रोगान्विता कार्तिके पौषे प्रेत
वती वियोगवकुला चैत्रे मदोन्मा
दिनी अन्येष्वेव विवाहिता पति
रता नारी सस्पृहा भवेत् हर्षेच
हर्षेनचदक्षिणायणे तिथौच
रिक्ते शशिनि क्षयं गते राज
ग्रस्ते तथा शुद्धे पितृणांमा
णसंशये श्रुतिप्रोक्ताच या कन्या
कुले धर्मविरोधिनी अविद्धा
पिसा देया चंडालभवलेन तु अथ
नस्योनवस्यादौ मकरे याति भा
स्करः राशिं कर्कटकं प्राप्य कु
रुते दक्षिणायनं इति विष्णु
राणोक्तस्य चूडादावयनस्य परि
ग्रहः दिनमानादि बोधनस्तु सि
द्धांतादयन

नानुकूलं प्रतीक्षते श्रुतिप्रोक्ताचयाकन्याः

4679

परिग्रहः सर्वकालिक इत्यस्यावि
षयमाह भुजबलभीमे । ग्रह
शुद्धिं मद्धशुद्धिं मासायनर्तुदि
वसानां अर्वाक् दशवर्षभ्योऽम
नयः कथयंति कन्यकानां पत
त्परंत विज्ञेय मंगिरो वचनं यथा
कालात्यये च कन्यायाः काल
दोषो नविद्यते ॥ मलमासा
दिकालानां विवाहार्थे प्रयत्नतः
पुंसः प्रति सदा दोषास्तदैवा
हि वर्जिताः कृत्यचिंतामणौ ।
वापी कूप तडाग याग गमन
क्षौरप्रतिष्ठाव्रतं विद्यामंदिर कर्ण
वेधन महादानं वनं सेवनं ती
र्थस्नान विवाह देवभवनं मंत्रादि
देवेक्षणं दूरेणैव जिजीविषुः प
रिहरेदस्तं गते भार्गवे । बृ
हद्राजमार्तंडे सर्वाणि शुभकर्मा
णि कुर्यादस्तंगते सिते विवा
हं मेखलाबंधं यात्रांच परिवर्जे
येत् यात्रांचेति चकारो वचना
न्तरोक्त प्रातिष्ठिक निषिद्धकर्मा
न्तरं समुच्चिनोति बाले शुक्रे वृद्धे
शुक्रे नष्टे शुक्रे जीवनष्टे बाले
जीवे वृद्धे जीवे सिंहादित्ये गु
र्वादित्ये तथा मलिम्लुचे मासि
सराचार्ये तिचारगे वापीकूप।

तडागादि क्रियाः प्रागदितास्त्य
जेत् अतीचारं गते जीवे वक्रे
चैव बृहस्पतौ कामिनी विधवा
प्रोक्ता तस्मात्तौ परिवर्जयेत्
अतीचारं गतो जीवः पूर्वभं ने
वगच्छति समचारेपि कर्माणि
नैवतत्रैव संस्थिते देवलः बाले
वृद्धे तथैवास्ते कुरुते देसम
न्विति तदारितायं कन्याया र
स्यत्यो रेव नाशनं प्रागुक्तः
शिशु रह स्त्रितयं मितः स्यात्
अहदशाह मिति पंचदिनानि वृ
द्धः प्राकृत मेव कथितोत्रव
शिष्टगर्गे जी वक्र एत मपि वृ
द्ध शिशुर्विवर्ज्यः अनंतप्राको
राजमार्तंडः बाले वृद्धेच संध्यां
शेचवः पंच त्रि वासरान् जीवे
चभार्गवे चैव विवाहादिषु व
र्जयेत् वक्रे चैवातिचारे त्रिदश
पतिगुरौ देव मृत्ये च सोम गुर्वा
दित्ये ऽधिमासे दिवसकररिपौवा
क्रांते चैत्र पौषे विष्णौ कु
लङ्गमे वा शारदि सुरगुरौ सिंह
संस्थे मनोत्ते वर्षाकामोति चो
ष्णा स्वनियत मरणं देवकन्या
पि भर्तुः शुक्रे मधिक्रम्य राज
मार्तंडे बालेच दुर्भगा नारी वृद्धे

नष्ट प्रजा भवेत् नष्टेचस्थल
माप्नोति सर्व मेतद्गुरोवपि सिं
हेगुरो परिणीतापति मात्मान
मात्मजान्हंति क्रमशा स्त्रिषु पि
मादिषु वशिष्ठ गर्गादयः प्राहुः
गुरो हरिस्थिन विवाह माहुर्ही
रीह गर्ग प्रमुखा मुनीशाःय
दा नमाद्यी मद्यसंभुता स्यात
दा त कन्योद्वहनं वदंति प्रमेव
माहव्यः मचाक्रते परित्यज्य
यदा सिंहे गुरु भवेत् तदाहे
कन्यकाचोध्वा सभगा सुप्रिया
भवेत् हारीतः अतीचारंगते
जीवे वृषे वृश्चिक कुंभयोः ।
यज्ञा द्दाहादिकं कुर्यात मघका
लोनलुप्यते कृतचिंतामणा
अतीचारं गतेजीवे वृषवृश्चिक
कुंभयोः तत्र चोद्वाहिता कन्या
संप्राणीयात्कालद्वयं संकेत
कौमुद्यां भीमपराक्रमे यदाति
चारं सुरराजमंत्री करोति गो
मन्मथमीनसंस्थः नयाति चे
द्यद्यपि पूर्वराशिं शुभाय पा
णिग्रहणं वशिष्ठः अतीचारं
गते जीवे स्थिरस्य प्रोच संस्थिते
तत्रन लुप्यते कालोवदंत्येवं प
राशवः वापीकूपतडागादि निषि
द्ध सिंहगे गुरो मकरस्थे च नन्का
र्यं नरोषःकाल

लोपजः यत्र कन्या वृश्चिक मे
षेषु मन्मथेच कर्षे वृषे प्रतिवा
देपि कर्तव्यो विवाहादि बुधैः
सदा इत्येतदमूले हेतनिर्णये
के दीपिकायां त्रिकोण जाया
धनलाभ राशौ वक्रातिचारेणगु
रुःप्रयातः यदा तदा प्राह शुभेवि
लग्ने हिताय पाणिग्रहणं वशिष्ठः
देवीपुराणे मकरस्था यदा जीवो
वर्जयेत्पंचमासकं शेषेष्वपिच
भागेषु विवाहः शोभनो मतः
भोजराजः यो जन्ममासेक्षुरकर्म
यात्रां कर्णास्य वेधं कुरुते च मो
हात् नूनं सरोगं धनपुत्रनाशं
प्राप्नोति मूढो बध बंधनानि
जाते दिनं दूषयते वशिष्ठश्चाष्ट
च गर्गो जवनो दशाहं जन्मा
ख्यमासे किल भागुरिश्च चौरे वि
वाहे द्वे कर्णवेधे श्रीपतिस्त
मुखेप स्नाने दाने तपो होमः स
र्वमंगलस्य वर्द्धने उद्वाहे कुमारी
णां जन्मासे प्रशस्यते कृत्यचिं
तामणौ जन्ममासेच पुत्राप्ता
धनाप्त्याच धनोदये जन्मभेजन्म
राशौच कन्याहि ध्रुव संततिः
गर्गः ज्येष्ठे मासि तथामार्गे सो
दं परिणयं व्रतं । मेष

पुत्र दुहित्रोस्य यत्नतः परिवर्ज
येत् अत्र मेषत्व मादि गर्भजात
त्वं तथानेव जन्मदिवसेऽपिका
रयेत् आद्य गर्भ भव पुत्र कन्ययो
र्ज्येष्ठे मासिनच जात मंगलं अ
त्रजन्ममासादौ पुत्रमात्रस्य निषे
धः ज्येष्ठमासेत ज्येष्ठपुत्रस्येति वि
शेषः कृत्तिकास्थे रविं त्यक्त्वाज्ये
ष्ठे ज्येष्ठस्य कारयेत् ।
उत्सवेषुच सर्वेषु दिनानि दशव
र्जयेत् रेवत्युत्तर रोहिणीमृगशि
रो मूलानुराधा मघा हस्ता स्वाति
पुनौत्ति षष्ठमिथुनेष्वस्तपाणि
ग्रहः सप्ताष्टान्त्यवर्द्धिःशुभैरुडुप
तावेकादश द्वित्रिगे क्रूरैरस्वाय
षडष्टगैर्न तु भृगौ षष्ठे कुजेवा
ष्टमे ज्योति विहितनक्षत्रादधिकं
चित्राश्रवणा धनिष्ठा अश्विनी न
क्षत्रं पारस्करोक्तं यथा कुमार्याः
पाणिं गृह्णीयात् त्रिषु त्रिषूत्तरा
दिषु उत्तरफल्गुण्यादित्रयोत्तराषा
ढ़ादित्रयोत्तर भाद्रपदादित्रयेषु
नवसु नक्षत्रेष्वित्यर्थः भीमपरा
क्रमे पूर्वात्रये विशाखायां शिवा
ये भवतष्टये कृष्णा चाम्बु भवे
त्कन्या विधवातो विवर्जयेत् वि
ष्णु भाये

चिके चित्रे ज्येष्ठायां ज्वलने य
मेपमि विवाहिता कन्या भव
त्येवस्वडुःखिता एवंच पारस्क
रोक्तं यजुर्वेदि विषयमापद्वि
षय स्वावोऽयं प्राये मघा व
र्भागेनैर्ऋतस्याद्य एवच रेवत्य
न्त वतभोगे विवाहःप्राणना
शकः कर्णवेधे विवाहे चव्रतेऽपं
सवने तथा प्राशने चाद्य हरा
यां विद्धस्तं विवर्जयेत् विद्धर्ह
न्ते तिथ्य १५ अ. ६ वेदे ४ क।
देशा ९ नविंश ११ भे २७ कादशा ११
द्वादश १८ विंश २० संख्याः
दृष्टाङ्का सूर्यभुक्ताङ्काच योगा
दस् स्वदशयोगभंगाः कर्मका
लीन नक्षत्र सूर्यभुज्यमान नक्ष
त्रयोर्मेलने यदि पंचदशाद्यन्यत
म संख्या भवति तदा तकर्मयोग्य
मित्यर्थः सप्तविंशाधिकत्वे सप्त
विंशति मपहाय शेषात्कलंख
मयेक संख्यानुपपत्तेः अप
वादस्त आद्यपादे स्थिते सूर्येत
रीयांशं प्रदुष्यति द्वितीयस्थे
तृतीयन्तं विपरीत्यमतोऽन्यथा
यत्कमाह सरोदये आद्यांशेन
चतुर्थांशं चतुर्थांशेन चादिमं
द्वितीयेन तृतीयं तु तृतीयेन हि

तीयकं ग्रन्थेव खर्जूरवेधः ।
तथाच रत्नमाला एकामूर्द्ध
गतांत्रयोदश तथा तिर्यग्गताः
स्थापयेत् रेखा श्चक्रमिदं उ
धे रभिहितं खार्जूरिकं तच्चत
याचालादिन्न मूर्द्धि भंत कथितं
तत्रैक रेखास्थयोः सूर्या चंद्रम
सो र्मिथो निगदिता इकपात
एकार्गलः व्याघातादीति व्याघा
तयोग संख्यांक त्रयोदशांकं
तथाच हस्तादीनिन तथानि दे
यानीत्यर्थः अथ सप्तशलाका
वेधः दीपिकायां कृत्तिकादिव
त्वःसप्तरेखा राशेः परिभ्रमन्
ग्रहस्यैदेकरेखास्थो वेधःसप्तश
लाकजः सप्तसप्त विलिखेत्पूर्वे
त्विका स्तिर्यगूर्द्धमथ कृत्तिका
दिकं लेखयेदभिजिता समन्वि
तं चैक रेखग खगेनविध्यते वै
धपस चतुर्थशोश्रवणादो तिथि
का चतुष्कंच अभिजितस्य खेव
दे विज्ञेया रोहिणी विद्धा तिथि
का दैः यस्याः शशीसप्तशलाक
भिन्नः पापै रथवा विवाहे र
क्तांशुकेनेव तु रोदमाना श्म
शानं भूमिंप्रमदा प्रयाति अस्मा
पवादो यथा राजमार्तंडे विषय
दिग्ये

न दृतस पविणा मगस्य मांसे
प्रभदं चतादृते यथा तथाग्रापु
रुपाद एव प्रहर्षितो ऽन्योऽपदं
सुभावहं अथ पंचशलाकचक्रं
ऊर्द्ध्वं रेखा स्थिताः पंचतिर्यक्पंचत
थैवच द्वे द्वे च कोणयोरेव साभि
जित्कृत्ति कादिकं ॥
शंभुकोणे द्वितीयेत्र लेखयेत्स
वेकर्मणि अग्रे भिन्न मथो सौम्ये
तत्तच परिवर्जयेत् लत्तापातेच
ये दोष येच सप्तशलाकके ते
सर्वे प्रभवस्यत्र नाम्ना पंचशला
कके ग्रथ्यचक्रान्वये कश्चित्पाद
वेध इहेष्यते तत्क रत्नमाला
यां केश्चित्तत्रापीष्यते पादवेध
इति पंचशलाकचक्रं ॥
रत्नमालायां अस्ते द्वादश मन्मथ
प्रि रवनी सप्तस्तृतीये गुरुःष
ष्ठेचाष्टम मर्कजस्त्व पुरतो रेति
स्फुटनत्वया पश्चात्सप्तम मिन्दु
जंत्व नवमं राहुः सितःपंचमं द्वावि
ग्रंपरिहर्तुं मूर्त्तिरुडुपःसंतादृये
त्रैतरत नवपातोऽये ॥
पापात्सप्तमगः शशी यदि भवेत्
पापेन युक्तोऽथ वा यत्नात्तं प
रिवर्जयेत्मुनिमता दोषोहायंक
थ्यते यात्रायां विपदो गृहे ·

4679

सुत वधः सौरेषु रोगोद्भवोप्यु ।
द्वाहे विधवा व्रते च मरणं शूलं
चपुंस्कर्मसु ता रवि मन्द उज्ज्ञ
क्रांतं स्वर्गोकात्सप्तमं त्यजेत् ।
विवाह यात्रा चूडास्व गृहकर्म
प्रवेशने यामित्रवेधः ॥ मूल
त्रिकोण निजमंदिरगोथ युग्मं
मित्रर्क्ष सौम्यगृहगोथ तदीक्षि·
तोवा यामित्रवेध विहितान यस्य
स्य दोषान्दोषाकरः शुभमनेकवि
धं विधत्ते भोजराजः त्रिषडेद·
शैकादशगो दिनेशः सुतार्थ
सौभाग्य शुभप्रदःस्यात् वैधव्य
दाताष्टमराशिसंस्थः शेषेषु रु
ग्दुःख भयः करोति रविशुद्धिः
कन्यावत्तत्रशुद्धौ स्याद्विवाहः शु
भकृन्नृणां पश्चाद्गते विशुद्ध्या
त्व यात्रा पुष्यो त्सवादयः विवाध
रीविलासे पुंसा मर्कःस्मृतो यो·
षितो षिता मस्तद्युतिः स्वतः
पुंयोषितोः शस्तं चलमर्कशशांक
कजं गोचर शुद्धा विंडे कन्याया य
त्नतःशुभं वीक्ष्य तीग्मकिरणांचपु
सः शेषे ष्वलै रपि विवाहः ॥
द्वितीयषष्ठांकगतः प्रभाकरः त्र
योदशाहानसततःशुभप्रदः नन्नम
सप्त व्यय रंध्रग स्तथा करोति

पुंसा मपि तादृशं फलं तथा
त्रयोदशाहात्परतः ॥ त्रयो
दशादिनासर्कोदशा षट् धरणी
सुतः सार्द्धं दिनंच शीतांशु र्मा
समेकादशा तमः सौरिः पादाधि
क वर्षमासान्षष्ठो बृहस्पतिः भ
वनार्द्धं भृगुःसौम्या यावद्राशप्य
भाफलं कष्टं व्रतादिके दशुर्नत
था शेषभागगाः लग्नेलग्नेच
मे तुर्ये नवमे दशमे तथा ।
गुरु भृगुर्वा रोपञ्चौ विवाहेच
ह्ते शुभं अयमेव सततद्विक
योगः गोधूलिं त्रिविधां वदंति मु
नयो नरीविवाहादिके हेमंते शि
शिरे प्रयाति मृदुतां पिंडीकृते भा
स्करे ग्रीष्मेऽर्द्धास्तमिते वसंतसम
ये भानोगते दृश्यता सर्वेचास्त
मुपागते च नियतं प्रावृट् शरत्का
लयो लग्नं यदानास्ति विशुद्धमत्र
गोधूलिका तत्र शुभा वदंति ल
ग्ने विशुद्धे मतिवीर्ययुक्ते गोधूलि
का नैवफलं विधत्ते नास्मिन्ग्रहा
न तिथयो नच विष्टिवारा ऋ
क्षाणिनैव जनयंति कदापि वि
घ्नं । अव्याहतःसततमेवं
विवाहकाले यात्रासुचाय मुदि
तो भृगुजेन योगः ॥

मार्गे गोधूलियोगे प्रभवति॰
विधवा माघमासे तथैवपुत्रा
पुर्थनयौवनेन सहिता ज्येष्ठे
स्थिते भास्करे वैशाखेसत्वदा
प्रजा धनवती ज्येष्ठे पतेर्मानदा
आषाढे धनधान्य पुत्र बहुला
पाणिग्रहे कन्यका विवाहपट॰
ले स्पृष्टा भर्तृपितृकुलदा त
त्रवीडे सतीत्वपरेत्नग्र: ज्योति:
सारसंग्रहे विवाहे तदिवाभा॰
वे कन्यास्यात्पुत्रवर्जिता वि॰
वाहानलदग्धा सानियतेस्त्वा॰
मिद्याति नी महाभारते राज्ञोदा
नेन प्रांसेतिविना चाभयदद्वि
णां विद्यां कन्यां द्विजश्रेष्ठादी
पमन्न प्रतिश्रयं व्यासः द्विका॰
स विधवा कन्यादशेऽपिसा
द्विवाहिता शनैश्चरदिने चैवय
दारिका तिथि भवेत् तस्मिन्वि
वाहिता कन्या पतिसन्तानवर्द्धि
ता स्मृतिः धर्मार्थे काम मोक्षा॰
णां दाराः संप्राप्तिहेतवः परी॰
क्षेते प्रयत्नेन पूर्वमेव करग्र॰
हात् मनुः अव्यांगांगी सौम्य॰
नाम्नी हंस वारणगामिनी तनु
लोम केशा दशनां मृदंगीमुद्वहे
त्स्त्रियं शातातपः हंसस्वनामेघव
र्णा मधु

पिंगल लोचनां तादृशींवरयेत्
कन्यां गृहस्थः सुख मेधते ॥
भविष्ये प्रतिष्ठिततला: सम्यक
रक्ताम्भोज समन्विता: तादृशार
णा धन्या योषितो भोगवर्द्धना:
प्रतिष्ठिता भूमौ लग्न: सम स्तनो
ऽयोभागो येषां ते तथा ॥
मनुः नोद्वहेत्कपिलां कन्यां
नाधिकांगीन रोगिनीं नालोमि
कां नाति लोम्नीं नवाचालांनपिं
गलां नर्क्षवृक्ष नदी नाम्नीं ना
न्त्यपर्वतनामिकां न पक्षाहि प्रेष्य
नाम्नीं नच भीषण नामिकां ॥
प्रतिप्रसव माह मत्स्यसूक्ते गंगा
च यमुना चैव गोमतीच सरस्व
ती नदीष्वासोनाम युक्ते मालती
तुलसी अपि रेवती चाश्विनीभे
पुरोहिणी सुभद्रा भवेत् कृत्स॰
चिन्तामणौ नेत्रे यस्याः केकर
पिंगले वास्यादुःशीलापपावलो
लेक्षणा च कृपा यस्या गंडयोः
सस्मितायाः निःसंदिग्धा बंधकीं
तावदंति नेदिकेश्वर पुराणेऽपा
मा स्वकेशी तनुलोमराज्जी स
भुः सुपीला सुपति: सुदंता वे
दीविमध्या यदि पंकजाक्षा कु
लेन हीनापि विवाहनीया सुशीलता

4681

यदि पिंगलाक्षी लोम्ना समाकी
र्णासमांगयष्टि मध्ये च पुष्टायदि
राज कन्या कुलेपि योग्यानविवा
हनीया हारीतः तस्मात्कुलेन
तत्र वित्तानोपपन्नो वरयेत् न
त्तोपपन्नां नाडीनक्षत्रहीनां ॥
नाडी नक्षत्र माह स्वरोदये ।
अश्विन्यादि त्रिविक्षके सर्पाका
रं त्रिनाडिकं तत्र वेधवशाज्ज्ञेयंवि
वाहादि शुभाशुभं । त्रिनाडी
वेध नक्षत्र मश्विन्याद्यासुगोत्तरा
हस्तेन्द्र मूल वारुणस् पूर्वभाद्र
पदास्तथा याम्यःसौम्यो गुरुर्यो
निश्चित्रा मित्र जलाकयं धनि
ष्ठाचोत्तरा भद्रा मध्यनाडी व्यवस्थि
ता: कृत्तिका रोहिणी सर्पो म
घास्वाती विशाखके उत्तराश्रव
णापोस्ते पृष्ठनाडी व्यवस्थिता: ।
अश्वादि नाडी वेधर्षे षष्ठं द्वि
तीयकं क्रमात् याम्यादि तूर्य॰
तूर्यंच कृत्तिकादि द्विषट्ककं
पत्रंनिरीक्षयेदेथं कन्या मत्रेस्य
वेगुरौ पण्य श्री स्वामि मित्रेपुरे
प्रोग्रामे पुरे गृहे एकनाडीस्थ
विशानि यदि स्यु वरकन्ययोः त
दावेधं विजानीयात्सुर्वादिषुसत॰
थैवच प्रकटं यस्य जन्मर्त्तंतस्यन
क्षत्रे

तो वधः श्रणाष्टं जन्मभंयस्य
तस्यनामर्क्षतो वदेत् द्वयो जन्म
भयोर्वेधो द्वयो र्नाम भयो स्तथा
नामजन्मर्क्षयो र्वेधो नकर्तव्यंक
दाचन एकनाडी स्थिता चेत्स्यात्प
त्नेनाशाय चांगना तस्मान्नाडी
व्यधोवीक्ष्या विवाहे शुभमिच्छता
प्रांनाडा वेधतो भर्ता मध्यना
ड्या भयं तथा पृष्ठनाडी व्यधेक
कन्याम्रियते नात्र संशयः एक
नाडी स्थिता यत्र गुरुर्मंत्रश्च देवता:
तत्रद्वेषं रुजं मृत्युं क्रमेण फल
मादिशेत् प्रभुः पाणिगनामित्रं
देशो ग्रामःपुरंगृहे एकनाडीस्थि
ता भव्या अभव्या वेध वर्जिताः
प्रतिप्रसव माह ज्योतिषे एकरा
श्यादि योगेतु नाडी दोषोन
विद्यते मयथा एकराशौचद
म्पत्योः शुभंस्यात्समसप्तके ।
चतुर्थे दशमे चैव तृतीयेकाद
शेतथा समगृहाणाद्विषम सप्त
के दोषः तथाच योटके सप्तके
मेष तुले वृषभ द्वयो तथा सिंह
चेरो सदा वर्ज्या स्मृति तत्राब्रवी
च्छिवः श्रीपतिव्यवहारनिर्णये
स्वहादेकाधिप योगे ताराबलेव
श्यवाशो वा अपि नाडा ॰

रि वेधे भवति विवाहोरितार्था
य राजमार्त्तण्डे नराजयोगेग्रह
वैमित्रत्वं ननारस्तुहि र्न गणात्र
यैस्मात् न नाडीदोषो नच वर्ण
दुष्टि र्गर्गादय स्तेमुनयो वदंति
राजयोगस्त्व यकरायपादियोग
पव तत्रैव नाड्यादि प्रतिप्रसवा
त् श्रीपतिरत्नमालायां अश्विभा
जफणीद्वयेच वृषभस्त्रिषोन्दुरु
मूषिकस्त्रयाः गोक्रमशस्ततो
पि मार्जारीख्याग्रः पुनः सैरभीया
चौणी मृगकुरो कपि दृष्टास्व
द्वयं वानरः सिंहोऽस्योऽहगराट्
पशुस्य करटी योनिश्च भाना
मियं गोव्याघ्रंगजसिंह मश्वम
हिषं स्वैणंच बभ्रुरगं वैरं वानर
मेषकंच सुमहन्तद्विडालोन्दुरु
लोकानांयत्नदारतोन्यदपिचत्त्य
त्वा प्रयत्नादिदं दंपत्यो र्नृप भ
त्ययो रपिसदा वर्ज्यः शुभसार्थि
भिः मकरस्थमेते मिथुने कन्या
कलसो मृगेन्द्र मीनोच वृषभत
लेऽलि मेषो कर्कट धनुर्धीचमि
न वियो षडष्टकाविति शेषाः अ
रिषडष्टकमाह मकरः कारि कुल
रिपुणा कन्यामेषेण सह कुंभ
स्तुलया कर्किचटेवृष धनुषीवृश्चि
क मिथुने चारि वियो

यदि कन्याष्टने भर्त्ता भर्त्तः षष्ठेच
कन्यका षडष्टके विजानीयाद्दनि
तं त्रिदशै रपि पुंसो गृहात्सुत
गृहे सुतदाच कन्या धर्मे स्थि
ता सुतवती पतिवल्लभाच हिबा
दृष्टो धनगृहे धनदाच कन्या ऋ
ष्फे स्थिता धनवती पतिवल्लभा
च षडष्टकादौ तारानियममाह
भीमपराक्रमः सोहृद्ये शुभयो
र्द्वयो रपि तयो रेकाधिपत्य पिवा
तारा षष्ठ सुमित्रमित्र दहनस्ते
मार्ध संपदादि षट्काष्टे नवपं
चमे व्यय धने योगेच पुं योषि
तोः मीत्याद्युः स्याव वृद्धिप्रतिज
नकः कार्यो विवाहस्तदा गर्गः
मरणं तारा विरोधेग्रह रिपुभावे
षिवेण रोगादिनरनार्योः षट्का
ष्टके वैर मबन्धप्रभवदाप्नु व्यासः
मैत्र्यादियोगेपि षडष्टकादौ तारा
विपत्प्रत्यरि नैधनाख्याः वर्ज्याः
वर्ज्या विवाहे गुरुभार्गवोरि प्रीतिः
पराजन्मस्तु तारकाणां नत्तत्र मेकंप
रिभिन्नराशि र्नदंपती तत्र सुभंवद
मेतो विभिन्न मृत्ते यदि चैकरा
शिस्तदा विवाहः स्तुत सौख्यदायी
पकर्ता च यदा कन्या राशेपकाव

4193

यदाभवेत् धनधन्यवती नारी
साध्वी भर्तृप्रिया सदा षडष्ट
के गोमिथुनं मृदेयं कार्यसंसद्
धनंनव पंचके तु हि द्वादशाख्ये
कनकाच्च नाशे विप्रार्चनेहेमच
नाडीदोषे मरणं नाडीदोषे क
लहः षट्काष्टके विपत्ति र्वा प्र
नपत्ता त्रिकोणे हि द्वादशेच
दारिद्रं ज्ञान चिंतामणौ हस्ता
स्वाति ऋति मृगशिवः पुष्यमे
त्राश्विभामि पौष्णादित्य जगुरिह
बुधादेव संज्ञानि भानि पुर्वोक्त
स्नः शिवभ भरणी रोहिणीज्येष्ठ
राक्षसमाड मैत्र्याकय मृडुगणाह
न मेतेमुनीन्द्राः चित्राश्लेषा निर्ऋ
ति पित्र्य भे वासवे वासवर्त्ते श
क्राग्निभे वरुण दहनतेचरत्ते
गणोयं फलमाह श्रीपतिः स्वजा
तेतोत्तमा प्रीति र्मध्यमा देवमा
नुषे देवासुरे कनिष्ठाच मृत्युर्मा
नुष राक्षसे राक्षसीव यदाकन्या
मानुषस्य वरो भवेत् तदास्मत
न्हे हरस्या नियनत्व मथापिवा
राजमार्त्तण्डे यदिस्याद्राक्षसोभ
र्त्ता कन्यका मानुषी भवेत् वि
वाहेस्तखमाप्नोति वैपरीत्यं वि
वर्जयेत् मुहुर्तण्याणीवे देवा

जयंति मुहेन सर्वथा नात्रसंशय
यः रत्तसामानुषाणांच संग्रामे
निश्चया मृतिः कर्किमीनाल
योविप्राःस्तन्नाः सिंह तुलाहयाः
वैश्या मुग्माज ऊभाख्याः शू
द्राहृष मृगांगनाः सर्वाःयदि
शीयदिशः त्त्रियो नवभागभ
वेत् षडाश्रयो भवेदेष त्विक्षः
शूद्रे प्रकीर्त्तिताः वर्णश्रेष्ठाच
योनारी हीनवर्णाश्च यः पुमान्
महत्यपि कुले जाता नासौ भर्त्तु
रिरमते इति ज्योतिस्तत्वं ॥
अन्यत् उद्वाहशब्दे द्रष्टव्यं ॥
विवाहितः पुं स्त्री कृतविवा
हः यथा शनैश्चर दिने चैवय
दि रिक्ता तिथि र्भवेत् तस्मिन्वि
वाहिता कन्या पति संतानवर्द्धि
ता अपिच विष्णु भौमे त्रिकेवि
ष्टेन्म्रष्टायां न्वतने यमे पभि
विवाहिता कन्या नित्य मेवदु
दुःखिता इति ज्योतिस्तत्वं ॥
विवाह्यः पुं जामाता इतिके
चित् विवाहयोग्ये त्रि ॥
विविक्तं त्रि पवित्रं विजनं ।
इत्यमरः असम्पृक्तः विवेकी
इति मेदिनी ॥
विविक्ता स्त्री दुर्भगा इतित्रिकां

शेषः मुद्राङ्कित पुस्तके विरि
क्ता इतिपाठः ॥
विविधं त्रि नानाप्रकारं इत्य
मरः ॥
विवीतः पुं भूमिविशेषः य
था सम मेषां विवीतेपि खरो
ष्ट्रमहिषी समं विवीतः प्रचुर
तृणकाष्ठो रक्ष्यमाणः परिगृ
हीतोभूप्रदेश स्तत्र पश्वातेपी
तरक्षेत्रसमं दंड मेषांमहिष्या
दीनां विद्यात् इतिमिताक्षरा
यां स्वामिपाल विवादप्रकरणं
विवीतभर्त्ता पुं विवीतभूस्वा
मी इति मिताक्षरा ॥
विवृक्का स्त्री दुर्भगा इति भू
रिप्रयोगः ॥
विवृतं त्रि विस्तृतं इतिमेदि
नी विवृता स्त्री क्षुद्ररोगभेदः इ
ति मेदिनी ॥
विवृतास्यः पुं कुक्कुटः इति हे
मचंद्रः ॥
विवृतिः स्त्री व्याख्या विपूर्व वृ
धातोः क्ति प्रत्ययेन निष्पन्ना
विवरणं यथा शक्तिग्रहं व्याक
रणोपमान कोषाप्त वाक्याद्व्य
वहारतश्च वाक्यस्य शेषाद्विवृ
तेर्वदंति सान्निध्यतः सिद्धपदस्य
द्धाः इति मलमासतत्वं ॥
विवृत्तं त्रि चलितं यथा विवृ
त्तपार्श्वं रुचिरांगहारं समुद्व
हच्चारुनितम्बरम्यं आमन्दमन्दा
ध्वनितन्नतालं गोपांगनानृत्य
मनंदयत्तं इति भट्टिः विवृत्तं
तिर्यक्चलितं पार्श्वं यत्र इतिभरतः
विवृत्ता स्त्री क्षुद्ररोगभेदः यथा
अथविवृत्तामाह विवृत्तास्यो म
हादाहं पक्कोदुम्बरसंन्निभं वि
वृत्ता मिति तां विद्यात्पित्तोत्थं प
रिमंडलं परितः शोथवंतो
अथ तस्या श्चिकित्सा विवृ
ता मिंद्रवृतांच गर्दभी जाल
गर्दभं पैत्तिकस्य विसर्पस्य क्रिय
या साधयेद्भिषक् ॥ पाके
तु शोधयेत्तासे पक्वे मधुरभेषजैः
इति भावप्रकाशः ॥
विवृत्तिः स्त्री चक्रवद्भ्रमणं घूर्ण
नं विपूर्वं वृत धातोः क्ति प्रत्य
येन निष्पन्ना ॥
विवेकः पुं परस्परव्यावृत्तभाव
स्वस्वरूप निश्चयः प्रकृतिः पुरुष
योर्विभागेन ज्ञाने इत्यन्ये इति
भरतः तत्पर्यायः पृथगात्म
ता २ इत्यमरः विवेचनं ३
इति शब्दरत्नावली पृथग्भावः

इति धरणिः विवेको वस्तुनो
भेदः प्रकृतेः पुरुषस्य वा इति
जटाधरः जलद्रोणी विचारः।
इति मेदिनी ॥
विवेकिता स्त्री विवेकित्वं विवे
किनो भावः यथा यौवनं धनस
म्पत्तिः प्रभुत्वमविवेकिता एकै
कमप्यनर्थाय किमु तत्र चतुष्ट
यं इति हितोपदेशः ॥
विवेकी न पुं देवसेनराजपुत्रः ।
यथा देवसेनोऽपि केशिन्याज
नयामास पुत्रकान् सप्त प्राणुत्त
तान्नृप नामतः कीर्त्तितां स्तथा
सुमना वसुदानश्च जातश्च प्रव
नः कृती नीलो विवेकीत्येते वै
सर्वशास्त्रविशारदाः ॥ इतिका
लिकापुराणे भैरववंशानुकीर्त्तने
८० अध्यायः विचारकर्त्ता इति
मेदिन्यां विवेकशब्दार्थ दर्शनात्
विवेकविशिष्टे त्रि ॥
विवेचकः पुं विवेचनकर्त्ता वि
वेचयति य इत्यर्थे नक प्रत्ययेन
निष्पन्नः ॥
विवेचनं क्ली विवेकः इतिश
ब्दरत्नावली ॥
विवेचनीयः त्रि विवेच्यः विवेचि
तव्यः इति वि पूर्वं विच धातो।
रनीय प्रत्ययेन निष्पन्नः ॥
विब्रुवन् त्रि विरुद्ध वक्ता यथा
यो न भ्राता पिता वापि न पुत्रो
न नियोजितः परार्थवादी दंड्यः
स्याद्व्यवहारेषु विब्रुवन् विब्रु
वन्विरुद्धं ब्रुवन् इति व्यवहार
तत्वं ॥
विव्वोढा पुं वरः पतिः इ
ति हेमचंद्रः ॥
विव्वोकः पुं स्त्रीणांश्रृंगारभाव
जा क्रिया इत्यमरः अभिमत
वस्तु प्राप्तावपि गर्वादनादरः
सापराधस्य च संयमनं ताडनं
च विव्वोकः यदुक्तं गर्वाभिमाना
दिष्टेपि विव्वोकोऽनादरक्रिया
तथा अभिमत वस्तु प्रदानाव
पि गुरुगर्वादनादर स्तन्व्याः स्व
लति प्रियस्य हृदये संयमताड
नमयन्तु विव्वोकः इति भरतः
विव्वोक स्त्वतिगर्वेण वस्तु निष्टे
ऽप्यनादरः तन्वरा हृषवागादेर्दृ
यिता गमनादिषु इति सारसुं
दरी इष्टेपि गर्व मानाभ्यां वि
व्वोकः स्यादनादरः इत्युज्ज्वलनी
लमणिः ॥
विश ओ श प्रवेशे इति कवि
कल्पद्रुमः शा विशति ओ अवि

तत् विवेश कश्चिज्जटिलस्त
पोधनं विप्रराज्ञि परिव्रज्य कौ
निर्विशेत्यादिनात्मनेपदं विधा
नेऽपि भर्तृ रैकेति विशालीमया
दिति रघौ केवलात्मात् प्रत्यय
विधाय पश्चाडुपसर्ग योगादि
तिड्येटहृतिः निशाद इटुप
सर्गप्रतिरूपको वा यस्मादिस
मिदं सर्वं तस्य शक्त्या महात्मनः
तस्मा देवोच्यते विष्णु र्विशधा
तोः प्रवेशनादिति पुराणे विष्णु
शब्दस्य पादनात् मूर्द्धन्यान्तो
य मिति केचित्तच्चिन्त्यं तालव्या
न्तस्यैव सर्वं सम्मतत्वात् इतिदु
र्गादासः विशं क्ली मृणालं इ
त्यमरटीकायां रायमुकुटः ॥
विशकण्ठी पुं बलाका इति रा
जनिर्घण्टः ॥
विशोकः त्रि शोकरहितः वि
गतः शोको यस्य बहुव्रीहिः ॥
विशंकटः त्रि विशालः इत्य
मरः ॥
विशदः पुं श्वेतवर्णः इत्यमरः
विशदः त्रि विमलः इति हेम
चन्द्रः व्यक्तः इति मेदिनी ॥
शुक्लगुणयुक्तः इत्यमरः ॥
विशाखवा स्त्री पत्नी इतिराज

निर्घण्टः ॥
विशयः पुं संशयः यथा विष
यो विशय स्यैव पूर्वपक्ष स्तथो
त्तरं निर्णय स्थिति पञ्चाङ्गं शा
स्त्रेऽधिकरणं स्मृतं विषयो वि
चारार्हवाक्यं विशयोऽस्याय मर्थो
नवा इति संशयः इति तिथ्या
दितत्त्वे आश्रयः इति केचित्
विशयी त्रि संशयी इति विश
यशब्दार्थ दर्शनात् ॥
विशरः पुं वधः इत्यमरः ॥
विशरणं क्ली मारणं इति हे
मचन्द्रः ॥
विशल्यः त्रि शल्यरहितः यथा
सशल्यः समभाघ्राय तस्याः
परवीरहा विशल्यो विरुजः श्री
मानुदतिष्ठत् महीतलात् इति
श्रीरामायणे युद्धकाण्डे ९२ सर्गः
विशल्यकरणी स्त्री ओषधिविशे
षः यथा पूर्वन्तु कथिता योऽसौ
वीर जाम्बवता तव दक्षिणे शि
खरे जाता महौषधि मिहानय
विशल्यकरणीं नाम्ना सावर्ण्यक
रणीं तथा संजीवकरणीं वीर
सन्धानीं च महौषधीं इति रामा
यणे वाल्मीकीये युद्धकाण्डे ९२
सर्गः विशल्यकृत् पुं विशालीकृतः

4687

द्वापरमालीति ख्यातः तत्पर्यायः
अक्षोटकः २ स्वकल्कः ३ भूप
लाशः ४ इति रत्नमाला आस्फो
तः ५ आचरत् प्रियः ६ इति शब्द
चन्द्रिका विशाल्यकारिणि त्रि ॥
विशल्या स्त्री गुडूची अग्निशि
खावृक्षः दन्ती इत्यमरः त्रिपुटा
इति मेदिनी कलिकारी अज
मोदा इति राजनिर्घण्टः ॥
विशसनं क्ली मारणं इत्यमरः
विशसनः पुं खड्गः इति त्रिका
ण्डशेषः ॥
विशसितः त्रि मारितः विपू
र्वशस धातोः क्त प्रत्ययेन निष्प
न्नः इति सिद्धान्तकौमुदी ॥
विशस्तः त्रि अविनीतः धृषि
शसी वैयात्ये एतौ निपात्या अ
विनयेऽपवादितोऽस्तः धृष्टो विश
स्तः अन्यत्र धर्षितः विशसितः
इति सिद्धान्तकौमुदी ॥
विशस्ता पुं चाण्डालः इति
संक्षिप्तसारोणादिवृत्तिः ॥
विशाकरः पुं भद्रचूडः लंका
सिजू इति भाषा इति शब्दचं
द्रिका विशाखः पुं कार्त्तिकेयः
इत्यमरः धन्विनां वितस्त्यन्तरेण
पादसंस्थाने इति भरतः याचकः ते

इति मेदिनीकर हेमचन्द्रौ ७
नर्नवा इति राजनिर्घण्टः ॥
विशाखजः पुं नारंगः इति
शब्दचन्द्रिका विशाखजातेऽत्रि
विशाखलं क्ली युद्धकालेऽम
थे विन्यस्तपादद्वयं यथा वि
शालान्तरविन्यस्ते पादयुग्मे वि
शाखलं इति शब्दमाला ॥
विशाखा स्त्री कठिल्लकः इ
ति मेदिनी अश्विन्यादि सप्तविं
शति नक्षत्रान्तर्गत षोडशनक्ष
त्रं तत्पर्यायः राधा २ इत्यमरः
विशाखे द्वे पत्न्योर्मध्यगत स्त
त्रसुग्रीवः प्लवगेश्वरः विशाख
यो र्मध्यगत संपूर्ण इव चन्द्र
माः इति रामायणे अत एव
द्वित्व मुचितं किन्तु एक तारा
पेक्षया एक वचनमिष्टोक्त इ
ति भरतः तस्मादेकं तारणा
कार चक्रलक्षणं इति मुहूर्त
चिन्तामणि टीकायां वर्द्धते
विशाखाभे तस्य याति विद्यु
धाम्नमध्येन ऊर्द्धतो रस भुजाः
कलाः प्रिये ३।०।२९ इति का
लीदास कृत रात्रिलग्ननि
रूपकस्य प्रस्या अपि देव
ते शाक्रागी इयं मिश्रगणा

न्तर्गता इति ज्योतिस्तत्त्वे तत्र
जातफलं महानुबन्धो विविध क्रियायां
सुवर्णकारे ऽपि सत्य मेति य
स्य प्रसूतौ च भवेत् विशाखा स
त्वान कस्यापि भवेत् प्रसूतः इ
ति कोष्ठीप्रदीपः ॥
विशायः पुं प्रहरिकादीनां
क्रमेण शयनं यथा उपशल्पो
विशायश्च पर्याय शायनार्थ
के इत्यमर ॥
विशारणं क्ली मारणं इति
हेमचंद्रः ॥
विशारदः त्रि विद्वान् प्रग
ल्भः इत्यमरः प्रसिद्धः इति
हारावली श्रेष्ठः इत्यजयपा
लः वकुले पुं इति राजनिर्घ
टः विशारदा स्त्री तहुडुवाल
भा इति राजनिर्घंटः ॥
विशाला त्रि बृहत् इत्यमरः
विशालः पुं मृगभेदः पक्षि
भेदः इति मेदिनी नृपभेदः
वृक्षभेदः इति शब्दरत्नावली
विशालता स्त्री पार्श्वविस्तारः
ऽवस्तार इति ख्यातः तत्पर्या
यः परिणाहः २ इत्यमरः सा
मान्यविशालत्वे इति शब्दर
त्नावली विशालत्वेलगर्भः पुं
अंकोठवृक्षः

इति राजनिर्घंटः ॥
विशालत्वक् पुं सप्तपर्णः
इत्यमरः ॥
विशालपत्रः पुं कासालुः श्रीता
लः इति राजनिर्घंटः ॥
विशालफलिका स्त्री निष्पावी
इति राजनिर्घंटः ॥
विशाला स्त्री इंद्रवारुणी इत्य
मरः विशाला कफवातघ्नी मेद
ऊष्मरा सरा इति राजवल्लभः
उज्जयनी इति मेदिनी उपो
दकी महेन्द्रवारुणी इति राज
निर्घंटः तीर्थविशेषः यथा।
मुंडने चोपवासश्च सर्वतीर्थेष्वयं
विधिः वर्जयित्वा गयां गंगां वि
शालां विरजां तथा ॥ इति
प्रायश्चित्ततत्त्वं दक्षकन्या यथा
मनोरमा भानुमती विशाला
बाहुदा मथ दक्षः प्रादान्महा
देव चतस्रो ऽरिष्टनेमिने इति गा
रुडे ६ अध्यायः ॥
विशालाक्षः पुं हरः गरुडः ॥
स्थूलनेत्रे त्रि इति मेदिनी विस्तृ
इति केचित् ॥
विशालाक्षी स्त्री वरसी इति
विश्वः नागदंती इति राजनिर्घं
टः पार्वती यथा आदियामले

4689

ईश्वर उवाच शृणु मार्ये समुद्र
समायाबीजं समुद्धरेत् विशा
लाक्षी परं उंऽन्तं हृदन्तं मंत्रमुद्ध
रेत् अष्टाक्षरी महाविद्या अष्ट
सिद्धिप्रदा शिवे प्रसंगात्कथिता
विद्या त्रैलोक्ये दुर्लभा प्रिये ॥
ऋषि रस्या महेशानि सदाशि
वो महाप्रभुः पंक्तिश्च छंदः कथि
तं विशालाक्षी च देवता शक्ति
प्रणव मित्युक्तं लज्जाबीजं च बी
जकं धर्मार्थ काममोक्षेषु विनि
योगः प्रकीर्तितः अंगन्यासकर
न्यासौ यथावदभिधीयते षड्
दीर्घभाजा बीजेन प्रणवाद्येन
कल्पयेत् मूलेन व्यापकं न्यस्य
ध्यायेद्देवीं परां शिवां ध्याये
द्देवीं विशालाक्षीं तप्तजाम्बून
दप्रभां द्विभुजां मम्बिकां चंडीं
खड्गखर्परधारिणीं नानालंका
रसुभगां रक्ताम्बरधरां शुभां
सदाषोडशवर्षीयां प्रसन्नास्यां त्रि
लोचनां मुंडमालावतीं रम्यां
पीनोन्नतपयोधरां शिवोपरि
महादेवीं जटामुकुटमंडितां श
त्रुक्षयकरीं देवीं साधकाभीष्ट
दायिकां सर्वसौभाग्यजननीं महा
संपत्प्रदां स्मरेत् । एवं

ध्यात्वा महादेवी मुपचारैः प्र
जयेत् पुरश्चरणकालेन वर्ण
लक्षं जपेत्सुधीः यंत्रमध्ये समा
वाह्य प्रतिष्ठां कारयेत्ततः त्रिको
णं चाष्टपत्रं च ततो वृत्तं समालि
खेत् चतुरस्रं चतुर्द्वारं मे
वेमंडल मालिखेत् तत्रावाह्य
जेद्देवीं सर्वसौभाग्य सुन्दरीं।
विशालाक्षीं विशालाक्षीं सा यथा
विधि प्रपूजयेत् त्रिकोणान्तर्म
हादेवीं संपूज्य मातरः क्रमात्
पंकजाक्षी विरूपाक्षी रक्ताक्षी
चंद्रलोचना एकनेत्रा द्विनेत्रा
चकोटराक्षी त्रिलोचना एताः
प्रपूज्या महेशानि पत्राग्रेष्वष्टयो
गिनीः पश्चिमादि क्रमेणैव
अष्टसिद्धिस्वरूपिणीः चतुरस्रे
महादेवि लोकपालान्समर्चये
त् तद्बहिश्चैव वज्राद्यान्सजये
प्राग्यदेतवे ततो यथाशक्ति
जप्त्वा पूर्ववत्तु समाचरेत् इति
तंत्रसारः चतुःषष्टियोगिन्य
न्तर्गतयोगिनीविशेषः इति
दुर्गार्चापद्धतिः ॥
विशाली स्त्री अजमोदा इ
ति राजनिर्घंटः
विशिखः पुं शरवृत्तः इति

राजनिर्घण्टः बाणः इत्यमरः तोमरः इति मेदिनी शिखा रहिते त्रि यथा विशिखोऽनु पवीती च कृतं कर्मन तत्कृतं इति स्मृतिः ॥

विशिखा स्त्री खनित्री रथ्या नालिका इति मेदिनी ॥

विशिपं क्ली मन्दिरं इत्युणादिकोषः ॥

विशिष्टः त्रि युक्तः यथा ह स्तानक्षत्र गंगाद्वयगुणान्वय विशिष्ट दशमी विधेर्यस्मिन्न हनि तल्लाभस्तत्स्नाने इति तिथ्यादितत्त्वे स्मार्तभट्टाचार्य लिखनं विशेषेणाशिष्टश्च ॥

विशिष्टः पुं विष्णुः यथा विशिष्टः शिष्टकृच्छुचिः इति तत्सहस्रनामस्तोत्रं ॥

विशिष्टाद्वैतवादी[१] त्रि प्रकृति पुरुषयो भिन्नत्वेपि मिलितयो स्तयोर्ब्रह्मत्ववादी तस्य मते यथा पुरुष स्तदति रिक्ता प्रकृतिः किंतद्भयमितं ब्रह्म चणक द्विदलवत् इत्यं ब्रह्मण एकत्वं व्यवस्थितं चित्स्वरूपा माणस्वरूपा जीवः समस्तावि संख्यब्रह्मांशः इति माधवभाष्यादिः अद्वैतवादिमतं यथा

ब्रह्मैव सत्यं प्रपञ्चादि मिदं विश्वं ब्रह्मणि आरोपितं यथा रज्जुः रज्जुस्वरूपाज्ञानात्सर्पवत् प्रति भाति तथा ब्रह्मस्वरूपाज्ञानाद्विश्वं वस्तुवत्प्रतिभाति प्रकृति जीवश्चापि पर्यवसाने ब्रह्मैव ब्रह्मान्यत्सद्वस्तु नास्ति अत्रप्रमाणं शारीरिकसूत्रस्य शंकराचार्यकृतभाष्य तट्टीकाकल्पतरुभाष्य रत्नप्रभादि ॥

विशीर्णः त्रि शुष्कः यथा विशीर्णविदला हस्वा वक्रा स्थूला द्विधा कृताः कृमि दष्टाश्च दीर्घाश्च समिधोनैव कारयेत् इति तन्त्रसारः विशीर्णपर्णः पुं निम्ववृक्षः इति राजनिर्घण्टः ॥

विशुद्धं त्रि विशेषेण शुद्धं तत्पर्यायः उज्वलं २ विमलं ३ विशदं ४ वीध्रं ५ अवदातं ६ अनाविलं ७ शुचिः ८ इति हेमचन्द्रः निर्मलं सत्यं इत्यजयपालः षट्चक्रान्तर्गत पंचमचक्रं तन्तु कंठस्थं अकारादिषोडशस्वरयुक्त धूम्रवर्ण षोडशदलपद्मं तन्मध्ये शिव आकाशश्चास्ति यथा तद्दूर्द्ध्वे विशुद्धाख्ये दलषोडश पंकजे स्वरैश्च

षोडशैः युक्तं धूम्रवर्णैर्महत्प्रभं विशुद्धं पद्म माख्यात माकाशाख्यंमहद्भुतं इति तंत्रं ॥ अगस्त्यसंहितायां अकारादि षोडश स्वरान्सविन्दुन् षोडशदलकमले कंठमूले न्यसेत् विशुद्धेषोडश दले धूम्राभे स्वर भूषिते इति तन्त्रसारः ॥

विशुद्धिः स्त्री समः शोधनं । इति विश्वः सर्वकर्मण्युपादेया विशुद्धि श्चंद्र तारयोः इति ज्योतिषं ॥

विशृंखलः त्रि शृंखलारहितः अवद्धः विगता शृंखलायस्मेति वहुव्रीहि निष्पन्नः

विशेषः पुं प्रभेदः प्रकारः । इति जटाधरः व्यक्तिः इतिहेमचंद्रः तिलकः इतिहारावली ॥ सप्तपदार्थान्तर्गतपदार्थभेदः । यथा द्रव्यं गुणा स्तथाकर्मसामान्यं सविशेषकं । समवाय स्तथाभावः पदार्थाः सप्तकीर्त्तिताः इति भाषापरिच्छेदः ॥ विशेषंनिरूपयति अन्योनि त्यद्रव्यवृत्ति विशेषः परिकीर्त्तितः अनंतेऽवसाने वर्त्तते इ तिग्रन्थः यदपेक्षयाविशेषो

घटपटादीनां द्व्यणुकपर्यन्तानांतदवयव भेदात्परस्परभेदः परमाणूनां भेदको विशेष एवसतु स्वतएव व्यावृत्तः तेन तत्रविशेषांतरापेक्षा नास्ति इत्यर्थः इति सिद्धान्तमुक्तावलिः अलंकारप्रभेदः यथा विशेषः ख्यातमाधारं विनाप्याधेय वर्णने गते सूर्येपिदीपस्था स्तमश्छिन्दंति तत्कराः १ विशेषःसोपि यद्येकं वस्त्वनेकत्र वर्ण्यते अंतर्वहिः पुरःपश्चात्सर्वदिक्ष्वपिसैव मे २ किंचिदारंभतोऽशक्यवस्त्वंतर कृतिश्चसः त्वां पश्यता मया लब्धं कल्पवृक्ष निरीक्षणं ३ इति चन्द्रालोकः ॥

विशेषकः पुं क्ली ललाटकृत तिलकः इत्यमरः तिलवृक्षे पुं इतिराजनिर्घण्टः विशेषयितरि त्रि इति मेदिनी ॥

विशेषकच्छेद्यं क्ली चतुःषष्टिकलांतर्गतषष्ठकला इतिशैवतन्त्रं सातु तिलकेषु नाना विच्छेद रचना इति दशमस्कंधीय पंचचत्वारिंशाध्यायटीकायाम् विशेषगुणः पुं बुद्ध्या

दिषट्कं रूपादिचतुष्टयः स्ने
हः स्वाभाविकद्रवत्वं अदृष्टः
भावना शब्दः इति भाषापरि
च्छेदः विशेषविधिः पुं अस्य
विषयकविधिः यथा तथा
सामान्य कार्यभ्यो विशेषक
विधिर्बली वरवो विषयो य
स ससामान्य विधि र्भवेत्
अल्पः स्याद्विषयो यस्य सविशे
षविधि र्मतः इति दुर्गादासः
सामान्य विशेषयो र्मध्ये विशे
षविधि र्बलवान् इति स्मृतिः
विशेषणं क्ली विशेष्यधर्मः
सत्वगुणादिः यथा नीलोत्पल
मित्यादि विशिष्यते समुच्च्य
ते अनेन छात्रेण छात्रमङ्गाती
दिति भेदयति अन्यपदार्थेभ्य
यश्चक्रोति इति भेदकं नाम्ना
शिवः गोत्रेण गार्ग्यः विशेष
णं दृष्टमेव भेदयति भेदकं तु
अदृष्टमेव भेदयति इति वि
शेषणभेदकयो र्भेदः इति मु
ग्धबोधटीकायां दुर्गादासः॥
विशेषव्याप्तिः स्त्री व्याप्तिभेदः
तल्लक्षणं यथा प्रतियोगि व्य
धिकरण स्व समानाधिकर
णात्यन्ताभावाप्रतियोगित्वं इ

विशेषितं त्रि भिन्नं व्यवच्छिन्नं
इति जटाधरः॥
विशेषोक्तिः स्त्री अलंकारभेदः
तल्लक्षणोदाहरणे यथा कार्याज
नि विशेषोक्तिः सति पुष्कल का
रणे हृदि स्नेह क्षयो नाभूत्स्मर
दीपे ज्वलत्यपि इति चंद्रालो
कः॥
विशेष्यः त्रि धर्मिपदार्थः स च
द्रव्यादिः विशिष्यते यः घट प
टादिः भासमानवैशिष्ट्यानुयोगी
अस्य लक्षणं यथा भासमानवै
शिष्ट्यानुयोगित्वं अस्ति च घट इ
ति ज्ञाने घटादौ तत्तद्धि भास
मानवैशिष्ट्य घट घटत्वयोः सं
बंधस्तदनुयोगित्वस्य घटादौ
सत्वात् अनुयोगित्व मपि स्व
रूपसम्बन्धविशेषः प्रतियोगित्व
मनुयोगित्वंचातिरिक्तपदार्थ इ
त्येकदेशिनः इति कणादः
विशोकः पुं अशोकवृक्षः इति
राजनिर्घंटः शोकरहिते त्रि॥
विशोधनी स्त्री दंतीवृक्षः इति
राजनिर्घंटः॥
विशोधिनी स्त्री नागदंती इ
ति राजनिर्घंटः॥
विशोधिनीवीजं क्ली जयपालः

इति केचित्॥
विश्रः पुं दीप्तिः विच्छर्दीप्तौ इ
त्यस्मात् नङ् प्रत्ययेन निष्पन्नः
इति सिद्धांतकौमुदी गतिः इति
मुग्धबोधटीकायां दुर्गादासः॥
विश्रपणं क्ली दानं इति शब्दर
त्नावली॥
विश्रब्धः त्रि अनुद्धतः शांतः
विश्वस्तः अत्यर्थः इति हेम
चंद्रः गाढः इति मेदिनी॥
विश्रब्धनवोढा स्त्री मुग्धानव
ढाभेदः यथा स्वीया त्रिविधा मु
ग्धामध्या प्रगल्भा च तथा अंकु
रितयौवना मुग्धा सा च ज्ञातयौ
वनाज्ञातयौवना च सैव क्रमशो
लज्जाभय पराधीनरति र्नवोढा
सैव क्रमशो जातप्रश्रया विश्रब्ध
नवोढा अस्या श्चेष्टा क्रिया मनो
हरा कोपे मार्दवं नवविभूषणे
समीहा च विश्रब्धनवोढा य
था दरमुकुलित नेत्र पालि नी
वी नियमित बाहुलतोरुयुगम
वेथं करकलित ऊरुस्थलेनवो
ढा स्वपिति सदीपमुपेत्य कस
सूनः इति रसमंजरी॥
विश्रमः पुं विश्रामः इति भर
तद्विरूपकोषः॥

विश्रंभः पुं विश्वासः इत्यमरः
केलिकलहः प्रणयः इति मे
दिनी वधः इति विश्वः॥
विश्राणनं क्ली दानं इत्यमरः
विश्रांतः त्रि श्रांतिमुक्तः विप
र्वेश्रम धातोः क्त प्रत्ययेन नि
ष्पन्ना तीर्थविशेषः यथा रा
सउवाच पुरी उज्जयनी नाम त
स्यां वासो हि मे सदा कस्मिंश्चि
द्दथकालेन गतोऽहं विष्णुमंदि
रं तस्मात्र तिष्ठते विप्रा वाच
कौ वेदपारगाः विश्रांति तीर्थमा
हात्म्यं श्रावयेत्स दिने दिने
यस्य श्रावणमात्रेण मम भक्ति
र्हि स्थिता सा संज्ञाच कृता
तत्र विश्रांतेस्य मयानघ वास
देवो महाबाहु र्नगत्स्वामी ज
नार्दनः विश्रामं कुरुते तत्र ते
न विश्रांतिसंज्ञिका इति वारा
हे विश्रांतिमाहात्म्यनामाध्या
यः॥
विश्रामः पुं विरामः इतिभ
रतद्विरूपकोषः अस्य गुणाः
विश्रामो बलकृत्स्वेद श्रमजि
त्स्वास्थ्यदः शुभः इति राजव
ल्लभः॥
विश्रावः पुं अतिप्रसिद्धिः इत्य

मरः ॥
विश्रिः पुं मृत्युः इति संक्षिप्त
सारोणादिवृत्तिः ॥
विश्रुतः त्रि ख्यातः इत्यमरः
ज्ञातः संहृष्टः इति विश्वः
विश्रुतिः स्त्री विख्यातिः
वि पूर्वश्रुधातोः क्ति प्रत्यये
न निष्पन्ना विश्लेषः पु विधुरः
प्रयोगः इति मेदिनी ॥
विश्वं क्ली जगत् इति मेदिनी
शुंठी बोलं इति राजनिर्घंटः
विश्वः पुं गणदेवताविशेषः
इत्यमरः वसु सत्यौ क्रतु द
क्षौ कालः कामो धृतिः कुरुः।
पुरूरवामाद्रवाश्च विश्वेदेवाः
प्रकीर्त्तिताः इति भरतः।
इष्टिश्राद्धे क्रतु दक्षः सत्यो नां
दीमुखे वसुः नैमित्तिके का
ल कामौ काम्ये च धूरिलोचनौ
पुरूरवा माद्रवाश्च पार्वणे स
मुदाहृतौ इति स्मृतिः तेतथ
र्मोद्दक्षकन्यायां विश्वायां जा
ताः इतिमात्स्ये ५ अध्यायः
नागरः इति विश्वः स्थूलश
रीरव्यष्टुपहितचैतन्यं इति वे
दांतसारः परिमाणविशेषः
यथा गुंजा पंचवति लोलोद
शंके तद्वेत्सलं

विश्वा विंशत्पलं प्रोक्तं द्विवं
कोटिगुणं हि तत् सैव कोटि
गुणा ब्राह्मी विश्वाः शास्त्रादि
संभवाः इति ज्योतिस्तत्वं ॥
विश्वः त्रि सकलं इत्यमरः ॥
विश्वकद्रुः पुं मृगयाकुलकुक्कु
रः इत्यमरः श्वानः इति मेदिनी
विश्वकद्रुः त्रि खलः इतिमेदिनी
विश्वकर्मजा ई स्त्री सूर्यभार्या सं
विश्वकर्मसुता) ज्ञा इति शब्दरत्ना
वली विश्वकर्माने पुं सूर्यः देव
शिल्पी इत्यमरः तत्पर्यायः त्व
ष्टा २ विश्वकृत् ३ देववर्द्धकिः ४
इति हेमचंद्रः मुनिभेदः इतिमे
दिनी सप्रभावस्य वसोः पुत्रः
यथा विश्वकर्मा प्रभावस्य पुत्रः
शिल्प प्रजापतिः प्रासाद भवनो
द्यान प्रतिमा भूषणादिषु त
डागाराम कूपेषु स्मृतः सोऽमर
वर्द्धकिः इतिमात्स्ये ५ अध्यायः
अन्यच्च प्रभासस्य विद्रःपुत्रस
र्षिं नाम्ना तु देवलं विश्व
कर्मा प्रभासस्य विख्यातो देव
वर्द्धकिः इति गारुडे ६ अध्यायः
अपिच वृहस्पतेस्तु भगिनी व
रस्त्री ब्रह्मचारिणी योगसिद्धा
जगत्कृत्स्नं मसक्ता विचरत्युत

प्रभासस्य तु भार्या सा वसूनाम
ष्टमस्य तु विश्वकर्मा महाभाग
स्तस्यां जज्ञे महामतिः । कर्त्ता
शिल्पसहस्राणां त्रिदशानां च व
र्द्धकिः भूषणानां च सर्वेषां कर्त्ता
शिल्पवतां वरः यः सर्वेषां विमा
नानि देवतानां चकार ह ।
मनुष्याश्चोपजीवंति यस्य शिल्पं
महात्मनः इति विष्णुपुराणे
अंशे १५ अध्यायः अन्यच्च द्वौ
प्रोक्तौ विश्वकर्माणौ मयस्त्वष्टा
योगवित् द्वौ धाता च विधाता च
पौराणे जगतः पती इतिवह्नि
पुराणे गणभेदो नामाध्यायः।
विश्वका स्त्री गंगाचिल्ली यथा।
गंगाचिल्लीतु देवही विश्वकाजल
कुक्कुटी इति हारावली ॥
विश्वकृत् पुं विश्वकर्मा इति
हेमचंद्रः ॥
विश्वकेतुः पुं अनिरुद्धः इत्य
मरः ॥
विश्वक् व्य सर्वतः इत्यमरटी
का विश्वक्सेनः पुं विष्णुः इत्य
मरटीकायां भरतः त्रयोदशम
नुः यथा मनु भूतिः सुतस्तद्व
त्स्यौत्यो नाम भविष्यति ततस्तु
मेरुसावर्णी ब्रह्मसूनुर्मनुः स्मृतः
ऋतस्य

ऋतधामा च विश्वक्सेनो मनु
स्तथा अतीतानागता श्चैते म
नवः परिकीर्त्तिताः इतिमात्स्ये
९ अध्यायः विष्णुर्निर्माल्यधारी देवता यथा (निर्माल्य
धारी विष्णोस्तु विश्वक्सेनश्च
तुर्भुजः शंख चक्र गदापाणि
दीर्घश्मश्रुर्जटाधरः रक्तपिंग
लवर्णस्तु मितपद्मोपरिस्थि
तः पत्नीय स्वरांतेन संयुता
विडंनेंडुना कीर्तित स्तस्य मं
त्रोयं तेन तं परिपूजयेत् विस
र्जनं तथा विष्णोर्देशाग्न्याप
विकल्पयेत् इतिकालिका
पुराणे ८२ अध्यायः ॥
विश्वक्सेनाप्रिया स्त्री प्रियंगुवृक्षः
इतिकेचित् ॥
विश्वगः पुं ब्रह्मा इतिहेमचं
द्रः विश्वगंधं क्ली बोलं इतिरा
जनिर्घंटः ॥
विश्वगंधः पुं पलांडुः इतिराज
निर्घंटः ॥
विश्वगंधा स्त्री पृथिवी इतिशा
ब्दचंद्रिका ॥
विश्वगोप्ता[क्ष] पुं विष्णुः इंद्रः
इति केचित् ॥
विश्वग्रंथिः स्त्री हं सपदी इ
राजनिर्घंटः ॥

विश्वव्यापुः पुं सर्वतोगामिप
वनः अस्यगुणाः विश्वगवायुर
रणाघुष्यप्राणिणां नैकदोष
कृत् सर्वज्ञलिंगको रुताकृ
त्योत्पात पुरःसरः इति राजव
ल्लभः विश्वदृक् त्रि सर्वज्ञगामी
विश्वंप्रेवति इत्यर्थे क्विप् प्र
त्ययेन निष्पन्नः

विश्वंकरः पुं चक्षुः इति
केचित् विश्वचक्रं क्ली महादा
नविशेषः यथा मत्स्य उवाच
अथातः संप्रवक्ष्यामि महादा
नमनुत्तमं विश्वचक्रमितिख्या
तं सर्वपातकनाशनं तपनी
यस्य शुद्धस्य विश्वचक्रं तु का
रयेत् श्रेष्ठं पलसहस्रेण तद
र्द्धेन तु मध्यमं तस्यार्द्धेन क
निष्ठं स्याद्विश्वचक्रमुदाहृतं अ
न्यद्विंशत्पलादूर्द्ध्वमशक्तोपि
निवेदयेत् षोडशारं ततश्चक्रं
भ्रमिनेम्यष्टकावृतं नाभिपद्मे स्थि
तं विष्णुं योगारूढं चतुर्भुजं शं
खचक्रे च पार्श्वे तु देव्यष्टकस
मावृतं द्वितीयावरणे तद्वत्पूर्व
तो जलशायिनं अत्रिर्भृगुर्व
शिष्ठश्च ब्रह्मा काश्यप एव च
मत्स्यः कूर्मो वराहश्च नरसिंहो
थ वामनः । रामो

रामश्च रामश्च बुद्धः कल्की च ते
दश तृतीयावरणे गौरी मातृ
भिर्वसुभिर्युता चतुर्थे द्वादशादि
त्या वेदाश्चत्वार एव च पंचमे पं
च भूतानि रुद्राश्चैकादशैव तु
लोकपालाष्टकं षष्ठे दिङ्मातं
गास्तथैव च सप्तमेऽस्त्राणि सर्वा
णि मंगल्यानि च कारयेत् अन्तरा
न्तरतो देवान् विन्यसेदष्टमे पुनः
तुलापुरुषवच्छेषं समन्तात्परिक
ल्पयेत् ऋत्विङ्मण्डपसंभारभूषणा
च्छादनादिकं विश्वचक्रं ततः
कुर्यात् कृष्णाजिन तिलोपरि त
थाष्टादश धान्यानि रसाश्च लव
णादयः पूर्णकुम्भाष्टकं चैव व
स्त्राणि विविधानि च माल्येक्षुफल
रत्नानि वितानं चापि कल्पयेत्
ततो मंगलशब्देन स्नातः शुक्ला
म्बरो गृही होमाधिवासनान्ते तु
गृहीत कुसुमांजलिः इयमुच्चार
येन्मन्त्रं त्रिःकृत्वा तु प्रदक्षिणं नमो
विश्वमयायेति विश्वचक्रात्मने
नमः परमानन्दरूपी त्वं पाहिनः
पापकर्दमात् तेजोमयमिदं य
स्मात्सदा पश्यन्ति योगिनः हृदि
तत्त्रिगुणातीतं विश्वचक्रं नमा
म्यहं वासुदेवे स्थितं चक्रं चक्रमध्ये च

४६५७

माधवं अन्योन्याधाररूपेण प्र
णमामि स्थितावपि विश्वचक्र
मिदं यस्मात्सर्वपापहरं परं ॥
आयुधं चाधिवासश्च भवाद्धर
मासिनः इत्यामन्त्र्य च यो दद्याद्वि
श्वचक्रममत्सरः विमुक्तः सर्वपा
पेभ्यो विष्णुलोके महीयते ।
वैकुण्ठलोकमासाद्य चतुर्बाहुः स
नातनः सेव्यतेऽप्सरसां संघैस्ति
ष्ठेत्कल्पशतत्रयं प्रणमेद्वाथ यः
कुर्याद्विश्वचक्रं दिने दिने तस्या
युर्वर्द्धते नित्यं लक्ष्मीश्च विपुला भ
वेत् इति सकलजगत्सुराधि
वासं वितरति यस्तपनीय षोडशा
रं हरिभवनमुपागतः समस्तैः सि
द्धमधिगम्य नमस्यते शिरोभिः अ
सुदर्शनतां प्रयाति शत्रोर्मदन
सुदर्शनतां च कामिनीनां सुसुदर्श
न केशवानुरूपं कनक सुदर्शनदा
नदग्धपापः कृतगुरु दुरितानि
षोडशारं प्रवितरण प्रवराकृति
सुरादेः अभिभवन्ति भवोद्भवानि
भित्वा भवमभितो भवने भ
वानि भूयः इति मात्स्ये महादा
नानुकीर्त्तने विश्वचक्र प्रदा
निको नाम २५९ ॥
अध्यायः ॥ ॥

विश्वचक्रात्मा पुं विष्णुः य
था नमो विश्वमयायेति विश्व
चक्रात्मने नमः परमानन्दरूपि
त्वं पाहि नः पापकर्दमात् ॥
इति मात्स्ये २५९ अध्यायः ॥
विश्वजित् पुं यज्ञभेदः इति
जटाधरः ॥ न्यायविशेषः यथा
यत्र फलाश्रुते नित्यत्व मभि
हितं तत्फलाश्रुतौ विश्वजिन्न्या
यात्स्वर्गः कल्प्यते इत्येनेन वि
रुद्धमिति सचन्यायो यथा वि
श्वजिता यजेत इत्यादि श्रूयते
इत्येकादशीतत्त्वे वरुणपाशः
इति केचित् ॥
विश्वतः अव्य सर्वतः इत्यम
रटीकायां ॥
विश्वदेवः पुं गणदेवताविशे
षः इत्यमरटीका विश्वदेवौ क्र
तुदक्षौ सर्वासिद्धिषु विश्रुतौ
नित्यं नान्दीमुखश्राद्धे वसुस
त्यौ च पैतृके नवान्नालम्भने दे
वौ काम कालौ सदैव हि अ
पि कन्यागते सूर्ये श्राद्धे च ध्व
निरोचकौ पुरूरवार्द्रवाश्च
विश्वदेवौ च पार्वणे इति व
ह्निपुराणे गणभेदनामाध्यायः
विश्वदेवा स्त्री कृष्णगवेधुका

गोरखाऊलिया इति भाषा इ
तिजटाधरः नागवला अरुण
पुष्पदंडोत्पलः इतिरत्नमाला
विश्वद्र्यङ् त्रि सर्वत्रगमनक
र्त्ता विश्वक्समन्तात् अंचति
गच्छति विश्व अञ्च्-सर्वतोगा
मी मूर्द्धन्यमध्यः तालव्य मध्ये
पीत्येके इत्यमरभरतौ ॥
विश्वधारिणी स्त्री पृथिवी इ
ति केचित् ॥
विश्वनाथः पुं शिवः इतिश
ब्दरत्नावली ॥
विश्वपर्णी स्त्री भूम्यामली इ
राजनिर्घंटः ॥
विश्वपाः पुं विश्वपालनक
र्त्ता सत्व परमेश्वरः इतिमु
ग्धबोधव्याकरणं ॥
विश्वप्सा[न] पुं अग्निः चंद्रः इति
हेम चंद्रः देवः विश्वकर्मा इ
ति संक्षिप्तसारोणादिवृत्तिः
सूर्यः इतिशब्दरत्नावली॥
विश्वबोधः पुं बुद्धः इतित्रि
कांडशेषः ॥
विश्वभूः पुं बुद्धभेदः इतिहे
मचंद्रः ॥
विश्वभेषजं क्ली शुंठी इत्य
मरः विश्वभोजाः[स] पुं सर्वभक्षकवि
श्व

शब्द पूर्वक भुजधातो रौणादि
कासि प्रत्ययेन निष्पन्नः ॥
विश्वमहा स्त्री अग्निजिह्वा यथा
काली करालीच मनोजवाच स
लोहिता चैव च धूम्रवर्णा स्फुलिं
गिनी विश्वमहार्चिसोऽग्नेः सप्तैव
जिह्वाः कथिता मुनीन्द्रैः इतिश
ब्दमाला ॥
विश्वम्भवः पुं विष्णुः इंद्रः इति
मेदिनी ॥
विश्वम्भरा स्त्री पृथिवी इत्यमरः
अस्याव्युत्पत्ति यथा विश्वम्भरा
तद्धरणाद्धानतानेतद्रूपतः पृथि
वीपृथुकन्यत्वाद्विस्तृतत्वात्मरा
ने इति ब्रह्मवैवर्त्ते प्रकृतिखंडे
७ अध्यायः
विश्वयुः पुं वायुः इति केचित्
विश्वरूपः पुं विष्णुः इतिहेम
चंद्रः ॥
विश्वरूपके क्ली कृष्णागुरु इति
राजनिर्घंटः ॥
विश्वरेताः[स] पुं ब्रह्मा इतिहेमचं
द्रः ॥
विश्वरोचनः पुं नाडीचशाकः
यथा केउकंपेचुली पेच नाडीचो
विश्वरोचनः इति त्रिकांडशे
षः ॥

4699

विश्ववेदाः[स] पुं सर्वज्ञः विश्व
वेत्ति इत्यर्थे विश्वशब्द पूर्ववि
दधातो रस्प्रत्ययेन निष्पन्नः
यथा स्वस्तिन इंद्रो वृद्धश्रवाः
स्वस्तिनः पूषा विश्ववेदाः स्वस्ति
न स्तार्क्ष्योऽरिष्टनेमिः स्वस्तिनो वृ
हस्पति र्दधातु इति यजुर्वेदि
स्वस्तिवाचन मंत्रः ॥
विश्वसहा स्त्री अग्निजिह्वाविशे
षः यथा हेतिः शिखाच सप्ता
ग्नेर्जिह्वा स्ता प्रकीर्त्तिताः का
लीकराली स्वहिता धूम्रवर्णामनो
जवा स्फुलिंगिनी विश्वसहा सं
ज्ञास्तासु तदाहृताः इतिजटाध
रः विश्वसारं क्ली तंत्रविशेषः
इति प्रसिद्धं ॥
विश्वसारकं क्ली विटवृत्तः फ
णिमनसा इति भाषा इति शब्द
चंद्रिका ॥
विश्वमितः त्रि विश्वस्तः इति
मुग्धबोधव्याकरणं ॥
विश्वसृक्[न] पुं ब्रह्मा इत्यमरः
विश्वस्तः त्रि जातविश्वासः इ
तिमेदिनी नविश्वसेदविश्व
स्ते विश्वस्ते नातिविश्वसेत् वि
श्वासाद्भयमुत्पन्नं मूलादपि वि
कृन्तति इति गारुडे ११४ अध्या
यः

विश्वस्ता स्त्री विधवा इत्यमरः
विश्वस्था स्त्री शतावरी इतिरा
जनिर्घंटः ॥
विश्वा स्त्री अतिविषा इत्यम
रः शतावरी इति राजनिर्घंटः
पिप्पली इतिशब्दचंद्रिका ॥
विश्वाची स्त्री अप्सरोविशेषः
यथा उर्वशी मेनका रंभा मि
श्रकेशी अलंबुषा विश्वाचीच
घृताचीच पंचचूडा तिलोत्तमा
भानुमत्यवला वची द्वादशाप्स
रसः शुभाः इति वह्निपुराणे
गणभेद नामाध्यायः ॥
विश्वात्मा[न] पुं विष्णुः यथाज
न्मकर्मच विश्वात्मन्नजस्याकर्त्तु
रात्मनः तिर्यङ् इतिश्रीभा
गवते १ स्कंधे ८ अध्यायः
विश्वायुः[स] पुं देवता इति
सिद्धान्तकौमुदी ॥
विश्वामित्रः पुं ब्रह्मर्षिविशेषः
तत्पर्यायः गाधिजः २ इति
त्रिकांडशेषः विश्वाजयाजी ३
गाधेयः ४ कौशिक ५ इति
हेमचंद्रः गाधिभूः ६ ।
इतिशब्दरत्नावली तस्योत्प
त्ति र्यथाहतदारं सुतं स्फ
त्वा दृष्टु पुत्रस्वकं

भृगुः अथाजगाम मतिमान्
स्नुषां द्रष्टुं ननंदच दम्पतीतं
समासीनं भृगुं देवगणार्चि
तं पूजयित्वा समासीनं तस्य
त स्थौकृतांजली ततो भृगुःस्नु
षांस्वीयांसुप्रीत इदमब्रवीत्
वरंवृणीष्व दास्यामि वांछितंच
रवर्णिनि अदेयं दुष्करं वापि
यत्रते वर्त्तते स्पृहा ततःसत्य
वती पुत्रं तप आम्नायपारगंमा
तश्चवीर मतुल्यं पुत्रं वरमया
चत मचैव मस्त्विति सोव भूत्वा
ध्यान परस्तदा विश्वभावस्य म
नसा यन्नात्म्यासे समर्जसः त
स निश्वासवातात् निःसृतं चैव
हृदयं तस्मात्द्विलयं दत्वा भ
गुस्त्वा मिदमब्रवीत् चरुद्वयेर
हाणत्वं स्नुषे सत्यवतिस्वयं
स्नात्वा ऋतौस्नातो माता त
दा त्वंच कालिध्यथः आलिं
ग्याश्वत्थवृक्षं तेमातोडुम्बरना
पैवं चरुमारकं चैमंसाभो
क्ष्यति स्वत स्नातः त्वचोडुम्बरवृ
क्षंतं समालिंग्य मितं चरुंभोस
सेतेन पुत्रस्ते भविष्यति सनात
नः एवमुक्ता भृगु र्यातोयथे
च्छदं सापि संमुदं अवापमा
त्रा सहिता भर्त्ता पिताच भा
विनी अथ स्नानदिने समयमा
लिंग्य रक्तक चरुं अथात्सत्य
ती तस्या माता फलंऽ सितंच
रुं परिवर्त्तितं तं ध्यात्वा दिव्य
ध्यानो भृगु र्मुनिः अथागमत्स्नु
षां तां तु वचनंचेद मब्रवीत् वि
पर्यय स्त्वया भद्रे हृत्तो लिंगन
कर्मणि तथा चरु प्राशनेचत
त्रेदंते भविष्यति ब्राह्मणः तत्रि
याचार स्तवपुत्रो भविष्यति त्त
त्रियो ब्राह्मणाचारो मात स्तेभवि
ता सुतः इत्युक्ता भृगुणासाध्वी
तदा सत्यवती भृगुं पुनःप्रसादया
मास पौत्रामेत्त्विति ताहृशःप
त्र मत्त्विति प्रोक्ता स तेजेवान्न
देये भृगुः अथकाले सुते दीप्त
यमदग्निंच गाधिजा सुषुवे जननी
तस्या विश्वामित्रं तपोनिधिं यम
दग्निस्ततो वेदान् चतुरःप्राप्य मा
विरं प्राङ्गासहनुवेदः स्वयंतस्मि
न्महात्मनि विश्वामित्रोपि सक
लान्विदानपि तथा चिरात् धन
र्वेदं तथाकृत्स्नं विप्र श्चाभूत्तपो
धनः ज्वाज्वल्यमान स्तेजस्वी यम
दग्नि र्महातपाः देदे तपोभिःस
मुनीनत्यक्राम्यत्सूर्यवत् इतिका
लिकापुराणे ८४ अध्यायः

विश्वामित्रप्रियः पुं नारिके
लः इतिशब्दरत्नावली ॥
विश्वाराट् पुं विश्वेषु राजते
यः विश्वेषां राट् राजा इति
वा इति मुग्धबोधव्याकरणं
विश्वावसुः पुं गंधर्वभेदः नि
शिस्त्री इति मेदिनी अश्वाजो
ष्टावि वंभारी सूर्यवर्चास्तथाकृ
धुः हस्तः स्वहस्तः स्वांचैवमूर्द्धं
न्वांश्च महामनाः विश्वावसुः
कृशानुश्च गंधर्वैकादशा गणाः
इति वह्निपुराणे गणभेदना
माध्यायः विश्वासः पुं प्रत्ययः
तत्पर्यायः विस्रम्भः २ इत्यमरः
आश्वासः ३ आश्रमः ४ इति
शब्दरत्नावली लोभ प्रमाद
विश्वासैः पुरुषो नश्यति त्रिभिः
तस्माल्लोभो न कर्त्तव्यः प्रमादो
नन विश्वसेत् साध्वी यीन मदं
कुर्यात् स्त्राणी न्त्समपाश्रितः
तन्मित्रं यस्य विश्वासः पुरुषः
स जितेन्द्रियः इतिगारुडे नीति
सारे ११५ अध्यायः यस्यपावा
श्च विश्वासस्तस्य सिद्धिश्च ता
वती यतावानिति कृत्स्नस्य प्र
भावः परिमीयते इति तत्रैव
२२ अध्यायः नविश्वसेदविश्व
स्ते विश्वस्ते नातिविश्वसेत्
विश्वासाद्भय मुत्पन्नं मूलादपि
निकृंतति इतिगारुडे ११४ अ
ध्यायः नखिनांच नदीनांच
शृंगिणांशस्त्रपाणिनां विश्वा
सोनैव कर्त्तव्यः स्त्रीषु राजकुले
षुच नविश्वसेदविश्वस्ते मित्रंचा
पिन विश्वसेत् कदाचित्कुपि
तंमित्रं गुह्यदोषं प्रकाशयेत्
इति चाणक्यं ॥
विश्वासघातकः त्रि विश्वासं हृ
न्तियः विस्रम्भनाशकः यथान
भाराः पर्वता भारा न भाराःस
प्तसागराः निन्दका हि महाभा
राभारा विश्वासघातकाः इति
कर्मलोचनं ॥
विश्वेदेवाः पुं अग्निः आहुदेवः
इति सिद्धिमत्सारोणादिवृत्तिः
क्रतु र्दक्षो वसुः सत्यःकामःका
लस्तथा धृतिः रोचक श्चाद्र
वाश्चैवतथा चामे पुरूरवाः वि
श्वेदेवाभवन्त्येते दश सर्वत्रपूजि
ताः इति वह्निपुराणे गणभेद
नामाध्यायः अस्तद्विश्वशब्द
विश्वेशः शब्दे पुं शिवः
विश्वेश्वरः इतिशब्दरत्नावली
काशीस्थमहादेवः यथा सर्व

तीर्थेषु स्नातो स सर्वं यात्रां यथा
स्तच मणिकर्णितु यः स्नातो
यो विश्वेशं निरीक्षते सततं सततं
पुनः सततं सततं सततं पुनः पुनः
द्रष्टो विश्वेश्वरो नित्यं स्नात
मामणिकर्णिका इति काशी
खंडे विश्वौषधं क्ली शुण्ठी इति
राजनिर्घण्टः ॥
विष इ र लि न औ उ व्याप्तौ
इति कविकल्पद्रुमः इर अ
विषत् अविषत् लिङ् वेवे
ष्टि वेविष्टे औ वेष्टा उ वविष्ट
उभयपदीत्यमे अफलवत्कर्त्तरि
आत्मनेपदार्थो उ कारः इति दु
र्गादासः विष ग औ विप्रयोगे
इति कल्पद्रुमः गविष्णातिर्ज्ञा
नीपुञ्जादिभ्यो विष्णुकः स्यात् इ
न त्यर्थः औ अविक्तं देवं लोपयमि
ति विष्ट कृत्वतो सप्तमूतिः इ
ति दुर्गादासः ॥
विष उ सेचने इति कविक
ल्पद्रुमः उ वेषित्वा विष्ट्वा इति
दुर्गादासः ॥
विषं क्ली जलं इत्यमरः पद्म
केशरं इति नदीकायाशुक
टः बोलं वत्सनाभः सामान्य
विषं इति राजनिर्घण्टः ॥

विषः पुं क्ली विषं तत्पर्य्यायः
क्ष्वेडः २ गरलं ३ इत्यमरः ॥
आहेयं ४ अमृतं ५ गरदं ६
कालकूटं ७ कलाकुलं ८ दारदं
९ वत्सनाभिकं १० नीलं ११ गर
१२ घोरं १३ हालाहलं १४ हला
हलं १५ शृङ्गी १६ भृङ्गरं १७ इ
ति राजनिर्घण्टः जाङ्गलः १८
तीक्ष्णः १९ रसः २० रसायनं २१
गरः २२ इति जटाधरः जङ्ग
लं २३ जाङ्गुलं २४ इति शब्द
रत्नावली काकोलः २५ वत्स
नाभः २६ प्रदीपनः २७ सौल्कि
केयः २८ ब्रह्मपुत्रः २९ इति रत्न
माला तद्भेदा यथा पुंसि क्ली
बे च काकोल कालकूट हला
हलाः सौराष्ट्रिकः सौल्किकेयो
ब्रह्मपुत्रः प्रदीपनः दारदो वत्स
नाभश्च विषभेदा अमी नव
इति पातालवर्गे अमरः ॥
अपिच विषः क्ष्वेडो रसस्तीक्ष्णं
गरलोऽथ हलाहलः वत्सना
भः कालकूटो ब्रह्मपुत्रः प्रदीप
नः सौराष्ट्रिकः शौल्किकेयः
काकोलो दारदोपि च अहिच्छ
त्रो मेषशृङ्ग कुष्ठ वालूक ने
दनाः केरादको हैमवतो म

र्कटः करवीरकः सर्षपो मूल
को गौराईकः सक्तुककर्दमो ग्रं
कोलसारः कालिङ्गः शृङ्गिकोम
धुसिक्थकः इन्द्रो लाङ्गलिकोवि
स्फुलिङ्गपिङ्गल गोनमाः मुस्त
को दालवश्चेति स्थावरा विष
जातयः इति हेमचन्द्रः अथ विष
स्य नामलक्षण गुणाः विषं तु
गरलं क्ष्वेडस्तस्य भेदानुदाहरेत्
वत्सनाभः सहारिद्रः सक्तुकश्च प्र
दीपनः सौराष्ट्रिकः शृङ्गकश्च
कालकूटस्तथैव च हालाहलो
ब्रह्मपुत्रो विषभेदा अमी नव तत्र
वत्सनाभस्य स्वरूप निरूपणं ।
सिन्धुवारसदृक्पत्रो वत्सनाभ्या
कृतिस्तथा यत्पार्श्वे न तरोर्वृद्धि
र्वत्सनाभः स भाषितः अथ हारि
द्रस्य स्वरूपं हरिद्रा तुल्य मूलो
यो हारिद्रः स उदाहृतः अथ
सक्तुकस्य स्वरूपं यद्ग्रन्थिः स
क्तुकेनैव पूर्णामध्यः स सक्तुकः
अथ प्रदीपनस्य स्वरूपं प्रदीप
लोहितोयः स्याद्दीप्तिमान्दहन
प्रभः महादाहकरः पूर्वैः कथि
तः स प्रदीपनः अथ सौराष्ट्रि
कस्य स्वरूपं सुराष्ट्र विषये यः
स्यात्स सौराष्ट्रिक उच्यते ॥

अथ शृङ्गकस्य स्वरूपं ।
यस्मिन्गोशृङ्गके बद्धे दुग्धं भ
वति लोहितं स शृङ्गक इति
प्रोक्तो द्रव्यतत्त्वविशारदैः ॥
अथ कालकूटस्य स्वरूपं देवा
सुररणे देवैर्हतस्य पृथुमा
लिनः दैत्यस्य रुधिराज्जातस्त
रुरश्वत्थसन्निभः निर्यासः का
लकूटोऽस्य मुनिभिः परिकीर्त्ति
तः सोऽहिच्छत्रे शृङ्गवेरे कोङ्क
णे मलये भवेत् अथ हाला
हलस्य स्वरूपं गोस्तनाभफलो
गुच्छः तालपत्रच्छदस्तथा
तेजसा यस्य दह्यन्ते समीपस्था
द्रुमादयः किष्किन्ध्यायां हिमा
लये दक्षिणाब्धितटे देशे कोङ्क
णेपि च जायते अथ ब्रह्मपुत्रस्य
स्वरूपं वर्णतः कपिलो यः स्यात्त
था भवति सारकः ब्रह्मपुत्रः
स विज्ञेयो जायते मलयाचले
ब्राह्मणः पाण्डुरस्तेषु क्षत्रियो लो
हितः प्रभः वैश्यः पीतोऽसितः
शूद्रो विष उक्तश्चतुर्विधः रसा
यने विषं विप्रं क्षत्रियं देहपुष्ट
ये वैश्यं कुष्ठविनाशाय शूद्रं द
द्याद्वधाय हि अथ विषस्य
गुणाः विषं प्राणहरं प्रोक्तं व्य

वायिच विकासिविष माग्नेयं
वातकफहृद्योगवाहिमदावहं
मवाषि सकलकायगुणव्या
पन पूर्वक पाकागममशीलं
विकासि ओजः शोषणं पृ
र्वकं संधि बंध शिथिलीकरं
णशीलं माग्नेयं मधिकाग्नेशं
योगवाहि संसर्गे गुणग्राहकं
मदावहं तमोगुणाधिकेन बु
द्धिविध्वंसकं तदेव युक्तियुक्तं
तथागुणदायि रसायनं। योग
वाहि परंवात श्लेष्मजित्सन्नि
पातघ्नत् योगवाहि त्रिदोषघ्नं
हरणं वीर्यवर्द्धनं ये दुर्गुणा
विषेऽशुद्धे ते सुहीना विशोध
नात् तस्माद्विषं प्रयोगेषु शो
धयित्वा प्रयोजयेत् अथोप
विषाणां निरूपणं मर्कक्षीरं
स्नुहीक्षीरं तथैव कलिहारिका
करवीरोऽथ धुस्तूरः पंचोपवि
षाःस्मृताः उपविषाणोणविषाः
पयोगुणास्तत्र तत्र द्रष्टव्याः
अपिच मर्कक्षीरं स्नुहीक्षीरं ला
ङ्गली करवीरकः गुञ्जाहिफेनो धु
स्तूरः सप्तोपविषजातयः एतेषा
शोधनं विन्य गुणास्तत्र द्रष्ट
व्याः अथ विषाणां शोधनविधिः
गोमूत्रे त्रिदिनं स्थाप्य विषं तेन

विशुद्ध्यति रक्तसर्षपतैलाक्तं तथा
धार्यं च वाससि येऽगुणा गरले
प्रोक्ता स्ते स्युर्हीना विशोधनात्
तस्माद्विषं योगेषु शोधयित्वा प्र
योजयेत् इति भावप्रकाशः पूर्व
खंडः अथ विषाधिकारः तत्र
विषस्य द्वैविध्य माह स्थावरं जं
गमं चैव द्विविधं विषमुच्यते द
शाधिष्ठान माद्यन्तु द्वितीयं षो
डशाश्रयं स्थावरविषस्य दशा
धिष्ठानाह मूलं पत्रं फलं पुष्पं त्व
क्क्षीरं सार मेव च निर्यासो धातव
स्कंदः स्थावरस्याश्रया दश तद्य
था मूलविषं करवीरादि १ पत्र
विषं विषपत्रिकादि २ फलवि
षं कर्कोटकादि ३ पुष्पविषं वे
त्रादि ४ त्वक्सार निर्यास विषा
णि करंभादीनि ५।६।७ क्षीर
विषं स्नुह्यादि ८ धातुविषं हरि
तालादि ९ कन्दविषं वत्सना
भ सक्तुकादि १० जंगमविषस्य
षोडशाश्रयानाह दृष्टि निश्वा
स दंष्ट्राश्च नखस्पर्शाः सदंशाश्च
वमर्दितं गुदास्थिपित्तमूत्राणि
दशाष्टजंगमाश्रयाः तद्यथा
दृष्टि निश्वास विषादिव्याः स
र्पाः १ दंष्ट्राविषाः भौमाः सर्पाः २
दंष्ट्रा नख विषाव्याघ्रादयः ३

मूत्रपुरीषविषा गृहगोधिकादयः ४
शुक्रविषा मूषिकादयः ५ लाला
विषा उच्चिटिंगादयः ६ लालास्पर्शमू
त्रपुरीषार्त्तव शुक्र मुख संदंशाद
ष्ट्रास्पर्शावमर्दित गुद पुरीषविषा
श्चित्रशीर्षादयः ७ अस्थिविषाः स
र्पादयः ८ पित्तविषा नकुलमत्स्या
दयः ९ शूकविषा भ्रमरादयः १०
स्थावरविषाणां सामान्यानां का
र्याण्याह स्थावरन्तु ज्वरं हिक्कां द
न्तहर्षं गलग्रहं फेन छर्द्यरुचि
श्वासमूर्छाश्च कुरुते विषं आश्र
यभेदेन विशिष्टानां विषाणां का
र्याण्याह तत्र मूलविषस्य कार्यमा
ह उद्वेष्टनं मूलविषे मोहः प्रल
पनं भवेत् पत्रविषस्य कार्यमाह
जृम्भनं वेपनं श्वासो नराणां पत्रवि
षे भवेत् फलविषस्य कार्यमाह
मुष्कशोथः फलविषे दाहो द्वेषश्च
भोजने पुष्पविषस्य कार्यमाह भ
वेत् भवेत् पुष्पविषे छर्दिराध्मा
नं मूर्छनं तथा ॥
त्वक्सार निर्यास विषाणां कार्या
माह त्वक्सार निर्यास विषाणां
कार्याण्याह त्वक्सार निर्यास विषैरु
पयुक्तै भवंति हि आस्यदौर्गन्ध्य
पारुष्य शिरोरुक्कफसंस्रवाः ॥
क्षीरविष कार्यं माह । फे

नागमः क्षीरविषे विड्भेदो गुरु
जिह्वता धातुविष कार्यमाह
हृत्पीडनं धातुविषे मूर्छा दा
हश्च तालुनि प्रायेण कालघाती
नि विषाण्येतानि निर्दिशेत् ए
तानि मूलादीनि विषाणि नवका
लघातीनि कालान्तरे मारकाणि
कन्दविषस्य कार्यमाह कन्दजान्यु
ग्रवीर्याणि यान्युक्तानि त्रयोद
श सर्वाण्येतानि कुशले र्ज्ञे
यानि दशभि र्गुणैः स्थावरं ज
ङ्गमं चापि कृत्रिमं चापि यद्विषं
सद्यो निहन्ति तत्सर्वं गुणैश्चेद
शभिर्युतं तान्दशगुणानाह
रूक्षमुष्णं तथा तीक्ष्णं सूक्ष्म
माशुव्यवायि च विकाशि विश
दं चैव लघ्वपाकि च ते दश तेषु
गुणविषस्य कार्यमाह तद्रौक्ष्या
त्कोपयेद्वायुमौष्ण्यात्पित्तंस
शोणितं तैक्ष्ण्यान्मतिं मोहय
ति मर्मबन्धांश्छिनत्ति हि शरीरा
वयवान्सौक्ष्म्याद्विशेद्विकरोति
च आशुत्वादाशु तद्धन्ति व्यवाया
त्प्रकृतिं हरेत् विकाशित्वात्
पयाति दोषान्धातून्मलानपि
अतिरिच्यते वैशद्यात् दुश्चिकित्सं
च लाघवात् दुर्जरं चाविपा
कित्वात्तस्मात्क्लेशायते ।

चिरं विषलिप्त शस्त्रहतस्य
लक्षणमाह सद्यः पाकं प्रयाति
यस्य क्षतं तत्क्लेदकं पच्यते
चाप्यतीक्ष्णं कृष्णीभूतं क्लिन्न
मत्यर्थं पूति क्षतान्मांसं शीर्य
ते यस्य चापि तृष्णा तापो दाह
मूर्छे च यस्य दिग्धा विद्धं तम
नुष्य मवेक्षेत लिङ्गान्येतान्ये
व कुर्यादमित्रैर्दत्तः स्तैरेवाङ्ग
णेयस्य चापि पच्यते चाप्यभी
क्ष्णं पुनःपुनः पाकमेति ता
पोवहिस्तमता दाहोऽभ्यन्तरे
कुर्यादित्यत्र क्षतं कर्तृपदं वो
ढव्यं प्रायेण राजादीनां मन्त्रा
दौ शत्रवो विषं ददति तेषां
ज्ञानार्थं लक्षणमाह इङ्गित
ज्ञो मनुष्याणां वाक्चेष्टामुख
वैकृतैः जानीयाद्विषदातारमेभि
र्लिङ्गैश्च बुद्धिमान् न ददात्युत्त
रं पृष्टो विवक्षन्मोहमेति च
पार्थवदूसंकीर्णं भाषते चापि
मूढवत् अङ्गुलीः स्फोटयेदुर्वीं
विलिखेत्प्रहसेदपि वेपथुश्चा
स भवति त्रस्तश्चैकैकमीक्षते
विवर्णवक्त्रो ध्यामश्च नखैः किं
चिच्छिनत्ति च आलभेत मुहुर्दी
नः करेण च शिरोरुहान् नि
र्यियासु रपद्वारे

वीक्षते च पुनःपुनः वर्त्तते वि
परीतं च विषदाता विचेतनः इ
ङ्गित मभिप्राय मुचकु आकारः
मुखवैकृति मुखवैवर्ण्यादिः ए
भिर्लिङ्गैः वक्ष्यमाणैः न ददात्युत्त
रं पृष्टः स्त्रीयासक्तमेजनितव्यामो
हात् संकीर्णं अस्फुटं भयजवा
वायु जनित एवं व्याख्यापरोदा
याङ्गुलीः स्फोटयेत् प्रहसेत् प्रे
तावपि ध्यामः दग्धसमानवर्णः
आलभेत्स्पृशेत् विपरीतं यथा
स्यादेवं वर्त्तेत जंगम विषाणां
सामान्यानां कार्यमाह निद्रां तन्द्रा
क्लमं दाहं संपाकं लोमहर्षणं शो
थं चैवातिसारं च कुरुते जंगमं वि
षं जंगमेषु तीक्ष्णतरत्वेन सर्पा
नाह वात पित्तकफात्मानो भोगि
मंडलि राजिलाः यथाक्रमं समा
ख्याता द्व्यन्तरा द्वंद्वरूपिणः भोगि
नः फणिनः ते च विज्ञातिः मं
डले विविधैश्चित्राः पृथवो मन्द
गामिनः षट् ते मंडलिनो ज्ञेया ज्व
लनार्क समाविषैः स्निग्धा विवि
ध वर्णाभि स्तिर्यगूर्ध्वैश्च राजि
भिः चित्रिता इव ये भान्ति राजि
ला स्ते हि तेपि षट् ॥
एते यथाक्रमं वात पित्त कफा

त्मानः द्व्यन्तराः द्वे अंतरे भेदौ
येषां ते द्व्यंतराः यथा भोगिनो
मंडलिभ्यां जाताः इत्यादि ॥
भोगि प्रभृति कृतदंश लक्षणमे
दमाह दंष्टो भोगिकृतः कृष्णः
सर्व वात विकार कृत् पीतो मंड
लितः शोथो मृदुः पित्त विकारवा
न् राजिलोत्था भवेद्दंशः स्थिरशो
थश्च पिच्छिलः पाण्डुः स्निग्धो
ऽतिसान्द्रासृक्सर्व श्लेष्मविकार
वान् देशविशेषकालविशेषे ।
च दष्टस्यासाध्यत्वमाह ।
अश्वत्थ देवायतन श्मशान व ।
ल्मीकसंध्यासु चतुष्पथेषु याम्ये
सपित्र्ये परिवर्जनीया ऋक्षे नराम
र्मसु ये च दष्टाः याम्ये भरण्यां पि
त्र्ये मघायां दार्वी कराणां विषमा
शु हंति सर्वाणि चोग्रे द्विगुणी
भवंति उग्रे उग्रसंयोगे दार्वी
कर लक्षणमाह रथांग लांगल
च्छत्र स्वस्तिकांकुश धारिणः ज्ञेया
दार्वी कराः सर्पाः फणिनः शीघ्रगा
मिनः अपरेष्वपि विषमाशुमा
रकं भवति तानाह अजीर्णेपि
त्तातप पीडितेषु क्षीणे क्षते मेहि
बालेषु वृद्धेषु बुभुक्षितेषु क्षीणे
क्षते मेहिनि कुष्ठयुक्ते रूक्षे बले
गर्भवतीषु

चापि शस्त्रघाते यस्य न रक्तम
स्ति राज्यो लताभिश्च न संभवं
ति शीताभिरद्भिश्च न रोमहर्षो
विषाभिभूतं परिवर्जयेत्तं जिह्म
मुखं यस्य च केशशातो नासा
वसादश्च सकंठभंगः कृष्णश्च र
क्तः श्वयथुश्च दंशे हन्वोः स्थिर
त्वं च स वर्जनीयः केशशातः आ
कर्षणात् नासावसादः नासा
यानतत्वं कंठभंगः ग्रीवाधार
णाशक्तिः हन्वोः स्थिरत्वं हनु
द्वयस्तंभः अपरं च वर्त्तिर्घनी
यस्य निरेति वक्त्राद्रक्तं स्रवेदू
र्ध्वं मधश्च यस्य दंष्ट्रानिपाता
श्चतुरश्च यस्य यस्यापि वैद्यैः
परिवर्जनीयः वर्त्तिरुपरिस्थं र
क्तं स्रवेदूर्द्ध्वं मधश्च यस्य यस्य
च नासा मुख लिंग गुदादिभ्यो
रक्तं स्रवेत् अन्यत्र मत्यर्थमुप
द्रुत्वा हीनस्वरं वाप्यथवा विवर्ण
सारिष्ट मत्यर्थ मवेगिनं च जह्या
न्नरं तस्य न कर्म कुर्यात् अत्यर्थ
मुपद्रुतं वाज्वरातिसारादिभिर
तिशयेनोपद्रुतं हीनस्वरं वक्त
मक्षमं विवर्णं कृष्णवर्णं सारिष्टं
नासाभंगादियुक्तं अवेगिनं वेगो
विषवेगः लहरि इति लोके तद्र
हितं स्थावरं जंगमं विषमेवमी

णीत्वादिभिः कारणैर्दूषीवि
षसंज्ञां लभते तदाह जीर्णं विष
घ्नौषधिभिर्हतं वा दावाग्निवाता
तपशोषितमथवा स्वभावतो वा गु
णैर्विप्रहीनं विषहि दूषीविष
तामुपैति जीर्णं अतिपुराणं
विषघ्नौषधिहतं विषघ्नाभि
रोषधीभिर्वीर्यहीनीकृतं स्व
भावतो वा गुणैर्विप्रहीनं स्व
भावादेव दशानां गुणानां
मध्ये द्वित्र्यादि गुणहीनं दूषी
विषस्य कार्यमाह वीर्याल्पभा
वान्न निपातयेत्तत्कफान्वितं वर्ष
गणानुबंधि तेनाऽर्दितो भिन्नपु
रीषवर्णो विगंधवैरस्ययुतः
पिपासी मूर्छाभ्रमं गद्गदं वा
वमिंच विचेष्टमानो रतिमा
नुयाद्वा नविपातयेत्तन्मारयति
कफान्वितं कफेन मंदीकृतो·
स्मादिगुणा वर्षगणानुबंधिक
फेनाद्य मौन्यादीपत्याकाद्वि
र मास्यापि भिन्नपुरीषवर्णः
भिन्न पुरीषो द्रुतमलः भिन्नव
र्णश्च विचेष्टमानो विरुद्धो च
ष्टाऽकुर्वन्मूर्छादीन्व्याधीन्लभते
स्थान विशेषस्थितं दूषीविष
लिंगविशेषमाह आमाशयस्थे
कफवातरोगी पक्वाशयस्थे
ऽनिल पित्तरोगी भवेत्समुद्धस्त

शिरोगहरुको

विलून पक्षस्य यथा विहंगः
समुद्धस्तशिरोरुहः केशाः अंग
रुहिव रोमाणि यस्य सः एतद
पि लिंगं पक्वाशयस्थे दूषीविषे
बोद्धव्यं स्थिरं रसादिषुच तथाधा
तून्करोति धातुप्रभवान् विका
रान् तत्र दूषीविषं यथोक्तान्स्था
नेष्वपि समुद्भूतीयोक्तान् दूषी
विषस्य प्रकोप समयमाह को
पन्तु शीतानिल दुर्दिनेषु जात्वाशु
पूर्वं शृणु तस्य रूपं कुपितस्य
तस्य दूषीविषस्य पूर्वरूपमाह
निद्रा गुरुत्वंच विजृंभणांच वि
श्लेष हर्षावथवाङ्गमर्दः विश्ले
षः गात्रशैथिल्य हर्षः रोमांचः
रूपमाह ततः करोत्यन्नमदाविपा
का वरोचकं मंडल कोठजन्म
मांसक्षयं पाणिपदातिशोथं मू
र्छां तथाच्छर्दि मथातिसारं दूषी
विषं श्वास तृषा ज्वरांश्च कुर्यात्प्रवृ
द्धिं जठरस्य चापि अन्नमदः अन्ने
भुक्ते पूगफलेनेव मदः अविपा
कः अजीर्ण दूषीविषभेदेन विका
रभेद माह उन्माद मन्यज्जनयेत्तथा
न्यदानाह मन्यत्क्षपयेच्च शुक्रं।
गाद्गद्य मन्यज्जनयेच्च कुष्ठं तांस्तां
विकारांश्च बहू

4709

प्रकाशान् अन्यत् दूषीविषं तां
स्तान्विकारान् विसर्प विस्फोटा
दीन् दूषीविषस्य निरुक्तिमाह
दूषितं देश कालान्न दिवास्वप्नै
रभीक्ष्णशः यस्मात्संदूषयेद्धा
तून् तस्माद्दूषीविषं स्मृतं॥ देशः
अनूपादिः कालो दुर्दिनादिः अ
न्नं कुलत्थ तिल मसूरादि धातु
दूषकत्वाद्दूषीविषं दूषीविषस्य
साध्यत्वादिक माह साध्यमा
त्मवतः सद्यो याप्यं संवत्सरोषि
तं दूषीविषस्य साध्यत्वादिकमाह
साध्य मात्मवतः सद्यो याप्यं संव
त्सरोषितं दूषीविष मसाध्यं स्या
त्क्षीणस्याहित सेविनः कृत्रिमे
विषं द्विविधं एकं सविषं दूषी
विषसंज्ञं अपर मविषं तदेव ग
रसंज्ञं तथाच काश्यपसंहिता
यां संयोगजंच द्विविधं द्वितीयं
विषमुच्यते दूषीविषंतु सविष
मविषं गर उच्यते संयोगजं कृ
त्रिमं विषं द्वितीयं स्वाभाविका
त् तस्माद्द्विविधं तत्र दूषीविष
मभिधाय गरं दर्शयितुमाह
सौभाग्यार्थं स्त्रियः स्वेद रजो ना
नांगजान्मलान् शत्रुप्रयुक्तांश्च
गरान् प्रयच्छंत्यन्नमिश्रितान्
रकार्यमाह तैः स्यात्पांडुः कृशो
ल्पाग्निर्ज्वर श्वासोपजायते ।

मर्मप्रधमनाध्मानं हस्तयोः
शोथसंभवः जठरं ग्रहणी
रोगा यक्ष्मा गुल्मः क्षयो ज्वरः
एवंविधस्यचान्यस्य व्याधेर्लि
गंच जायते तैर्गरैः स्वेदर
जः प्रभृतिभिः ज्वरःश्वासोप
जायत इति अपाकात् मर्म
प्रधमनं मर्मव्यथा क्षयो धा
तुक्षयः लूतानां जंतुविशेषा
णामुत्पत्तिं संख्यांचाह यस्मा
ल्लूनं तृणं प्राप्ता मुनेः प्रस्वेदबि
न्दवः तेभ्यो जाता यतो लू
ता इति ख्यातास्तु षोडशः
तत्र सुश्रुतः विश्वामित्रो नृप
वरः कदाचिद्वसिष्ठमने वशि
ष्ठं कोपयामास गत्वाश्रमपदं
किल कुपितस्य मुनेस्तस्य लला
टात्स्वेदबिन्दवः अपतन्दर्शनादे
व शुष्कतालीतृणचयः स्वेदतृणा
महर्षेस्तु येनार्थं संभृतेषिव
ततो जाता स्त्विमे घोरा नाना
रूपा महाविषाः तासामष्टौ कृ
च्छ्रसाध्या वर्ज्यास्तावंत्य एव
हि तत्रत्वरा मंडला प्रभृतयो
ऽष्टौ कृच्छ्रसाध्याः सौवर्णिका प्र
भृतयोऽष्टावसाध्याः तासां सामा
न्यानां दंश लक्षणमाह ताभि
र्दष्टे दंशक्लेदः प्रवृत्तिः क्षतजं
सच ज्वरो दाहोऽतिसारस्य गदाः

सुश्रुतेपि दोषजाः पिडकावि
विधाकारा मंडलानि महांति
च शोफा महांतो मृदवो रक्ताः
श्यावाश्चलास्तथा सामान्यं
सर्वलूतानामेतद्दंशस्य लक्षणं
दंशकोथः दंशमध्ये कृतिभा
वः दंशमध्ये च यत्कृष्णं श्यावं
वा जालवताकृतं दग्धाकृतिमशी
पाकं क्लेद शोथ ज्वरान्वितं दू
षी विषाभि र्लूताभिस्तं दष्टमि
ति निर्दिशेत् सौवर्णिकादंष्ट्रा
ऽष्टावसाध्याः आसामष्टानामा
लक्षणमाह शोथः श्वेतासिता
रक्ता पीतावा पिडका ज्वरः प्रा
णांतिको भवेद्दाहः श्वासहिक्का
शिरोग्रहः आखुदूषीविषलक्ष
णमाह आदंशाच्छोणितं पां
डु मंडलानि ज्वरोऽरुचिः लो
मर्हषश्च दाहश्चाप्याखुदूषीवि
षार्दिते प्राणहरमूषक विष
कार्यमाह मूर्छा माह शोथ
वैवर्ण्य क्लेद शब्दाश्रुति ज्वराः
शिरोगुरुत्वं लालासृक्छर्दिश्चा
साध्य मूषकात् अंगशोथश्च
मूषकाकारो बोढव्य इति तथा
न्येकं कृकलासदष्टस्य लक्षणमा
ह गोधास्य कार्यं मध्य वा नाना
वर्णत्व मेव च मोहो वर्चसा
भेदो दष्टस्य कृकलासकैः वृश्चिक
विषस्य

लक्षणमाह दहत्यग्निरिवादौ
च भिनत्तीवोर्ध्वमाशु च वृश्चिक
स्य विषं याति पश्चाद्दंशेऽवतिष्ठ
ते असाध्यवृश्चिकदष्टस्य लक्ष
णमाह दष्टोऽसाध्यैस्तु सद्यो
दृग्रसनोपहतो नरः मांसैः पत
द्भिरत्यर्थं वेदनार्तो जहात्यसून्
असाध्ये वृश्चिके येषामेवानुब
न्धः हृदयादि एषु तः हृदयादिको
पद्रवहितो भवति असमर्थे वेदना
दिलक्षणान्वयः कणभदष्टस्य लक्ष
णमाह विसर्पः श्वयथुः शूलं ज्व
रः छर्दिरथापि लक्षणं कण
भे दष्टदंशश्चैवावशीर्यते कण
भः कीटविशेषः उच्चिटिंग दष्टस्य
लक्षणमाह हृष्टरोमोच्चिटिंगेन
स्तब्धलिंगो भृशार्तिमान् दष्टः
शीतोदकेनेव सिक्तान्यंगानि मन्य
ते हृष्टरोमा अधिकतरहृष्टरो
मा उच्चिटिंगः कीटाकीटविशेषः
सविषमंडूकदष्टस्य लक्षणमा
ह एकदंष्ट्रार्दितः शूनः सरुजः पी
तकः सतृट् सनिद्रः छर्दिमान्
दष्टो मंडूकैः सविषैर्भवेत् एकदं
एकदंष्ट्रार्दितः स्वभावादेकयैव दं
ष्ट्रया दष्टो भवति ॥
मत्स्यविषस्य कार्यं माह।
मत्स्यास्तु सविषाः

कण्डूः दाहं शोथं रुजं तथा
जलौको विषकार्यमाह कंडू
शोथं ज्वरं मूर्छां सविषास्तु ज
लौकसः कण्डूरिति शेषः गृ
हगोधिकाविषकार्यं लक्षणमा
ह विदाहं श्वयथुं तोदं प्रस्वेदं गृ
हगोधिकाः कण्डूरिति शेषः ॥
शतपदी विषकार्यमाह दं
त शे स्वेदं रुजं दाहं कुर्याच्छतप
दीविषं शतपदी गिजाइ इति
लोके मशक विषकार्यमाह
कंडूमान्मशकैर्दष्टः शोफवान्स्या
न्मन्दवेदनः असाध्यमशकल
क्षणमाह असाध्यकीटसदृ
शमसाध्यं मशकक्षतं असा
ध्यकीटसदृशे असाध्यैः कीटै
र्लूताभिः कृतं यत्क्षतं तत्सदृश
वेदनं मक्षिकादंशस्य लक्षण
माह सद्यः सस्राविता श्यावा दा
ह मूर्छाज्वरान्विता पिडका म
क्षिकादंशेत्तासां तु स्थगिकासु
हृत् तासामित्यादि तासां षण्णां
तोक्तानां षण्णां मक्षिकाणां मध्ये
स्थगिकानाम्नी शीघ्रं प्राणहरती
सर्पः व्याघ्रादि विषाणां कार्य
माह चतुष्पाद्भिर्द्विपाद्भिर्वा नखै
र्दन्तैश्च यत्क्षतं सूयते पच्यते तत्

स्रवते ज्वरयत्यपि चतुष्पाद्भि
र्व्याघ्रादिभिः द्विपाद्भिर्वानरमानु
षादिभिः सूयते सूनं भवति वि
षोक्तितस्य लक्षणमाह प्रसन्न
दोषं प्रकृतिस्थं धातुमन्नाभिका
मं समं मूत्रविट्कं प्रसन्नवर्णे
न्द्रिय चित्तचेष्टं वैद्योऽवगच्छेद
विषं मनुष्यं प्रसन्नदोषं प्रक
तिस्थदोषं शेषं सुगमं अथवि
षाणां चिकित्सा तत्र स्थाव
रविषस्य चिकित्सा स्थावरेण
तं नरं यत्नेन वामयेत् वमनेन
समेनास्ति यतस्तस्य कित्सितं वि
विषमत्यर्थं सुखं च तीक्ष्णं च क
थितं यतः अतः सर्वविषे युक्तः
परिषेकस्तु शीतलः ऊष्मा तै
क्ष्ण्यादि विशेषेण विषं पित्तं प्रको
पयेत् वामितं चैवयेत् माक्षी
कतेन जलेन च पाययेन्मधुस
र्पिषा विषघ्नं भेषजं कृतं भो
ज्ये मन्त्रे रसैर्दद्याश्चैवयेन्म
रिचानि च यस्य यस्य च दोषस्य
पश्येल्लिंगानि भूरिशः तस्यौ
षधैः कुर्यात् विपरीतगुणैः क्रि
याः शालयः षष्टिकाश्चैव कोर
दूषाः प्रियंगवः भोजनार्थे वि
विषार्तानां हिताः पटुष्व सेव्या
वे प्रियंगुः केगुः मूलनवाग्र

पुष्पाणिवीजंचेति शिरीषतः
गवांमूत्रेणसंपिष्टंतेषाद्विषह
रं भवेत् हषीविषार्त्ते सलिलप
मूर्द्धं चाप्यक्षशोणिते पायये
दगदं भव्यमिदं हषीविषाप
हं पिप्पली ध्यामकं मांसीलो
ध्र मेला सुवर्च्चिका मरिचंवा
लकं चैला तथा कनकगैरि
कं लोहपुष्पः कषायेः यंहषी
विषमपोहतिध्यामकंवोद्विषेत
दलाभे उशीरं देयं कनकगैरि
कंसोगाग्रोनू इति लोके प्रस्यंत
मारकं अथजंगमविषस्य विकि
त्सा अभया रोचनां कुष्ठ मर्कपुष्पं
तयोमस्लं नल वेतस मूलानि
गारले सुरसां तथा सर्कान्लिकं स
समंजिष्ठा मनंतांच शलाटरी
सृगाटकं समङ्गांच पद्मकेश
रमित्यपि कल्कीकृत्य पंचेन्स
र्पिःपयो दद्याच्चत्वर्गुणं सम्य·
क्पक्वेवतीर्णे च शीते तस्मि
न्वि निःक्षिपेत् सर्पिस्तत्स्मि
षकलोहं कृतवन्ते निधापयेत्
विषाणिहन्ति इर्याणि गरदो
ष कृतापिच सर्पाहन्ति वि
षं सर्वं गरे रूपहितां त्वचां।
योगज न्मकं कंटुमांसस्यादं
विसस्तनां नाशय

संजनाभ्यंग पान वस्तिषु योजि
तं सर्प कीटाखु लूतादि दृष्टानां
विषद्युत्परे सत्वपाशाच्छेदिच्छेत
यत्नरस्य शिफा पेया तीवेगा प
रिपेषिता श्लेकोट वंशाजाचापि
सविषघ्नी प्रयत्नतः रजनीयुग्म
पतंग मंजिष्ठा नागकेशरैः प्री
ताम्बुपिष्ट रालेपःसद्यो लूतांवि
शयेत् जीरकस्य कृतः कल्को
घृते सैन्धव संयुतः सुखोस्मामधु
ना लेपाद्वृश्चिकस्य विषं हरेत्
गंधमाघ्राय मुदित सूर्यावर्त्तरे
लसत् वृश्चिकस्य विषं हरेत्
गंधमाघ्राय मुदित सूर्यावर्त्तर
लसत् वृश्चिकेन नरो विदष्ट
एगाद्भवति निर्विषः इति विषा
धिकारः इति भावप्रकाशः पा
शिभाषिकविषा यथा न विषं वि
ष मित्याहु ब्रह्मस्वं विषमुच्यते
देवस्वंचापि यत्नेन सदा परिहरेत
तः इति कौर्म्मे उपरिभागे १५
अध्यायः अपिच दुरधीताविषंवि
द्या अजीर्णे भोजनं विषं विषंगो
ष्ठी दरिद्रस्य वृद्धस्य तरुणी विषं
विषं चंक्रमणं रात्रौ विषं राज्ञो
ऽनुकूलता विषं स्त्रियोःप्यन्यहृदो
विषं व्याधि रवीक्षितः इतिचाणक्यं

विषकंटकिनी स्त्री वन्ध्याककोर्
टकी इतिराजनिर्घण्टः
विषकन्दः पुं नीलकंदः इति
राजनिर्घण्टः ॥
विषघ्ना स्त्री गुडूची इतिशब्द
चंद्रिका ॥
विषघाती न पुं शिरीषवृक्षः इति
शब्दमाला विषनाशके त्रि ॥
विषघ्नः पुं शिरीषवृक्षः । इति
शब्दचंद्रिका यवासः विभीत
कः इतिराजनिर्घण्टः चंपकवृ
क्षः इतिजटाधरः विषनाशके
त्रि विषघ्नौषधानि यथा ।
मनुवाच रक्षोघ्नानि विषघ्नानि।
यानि धार्य्याणि भूभुजा अगदा
निसमाचक्ष्व तानि धर्मभृताम्बर
मत्स्यउवाच बिल्वाढका यवक्षा
रं पाटला वाह्लिकोषणा श्रीप·
र्णीशल्लकीयुक्ता निःक्वाथ्य मोक्ष
णंपरं सविषं प्रोक्षितं तेन स
द्यो भवति निर्विषं । यवसेंधन
पानीय वस्त्र शय्यासनोदनं ॥
कवचाभरणं छत्रं बालव्यजनवे
श्मनी शालुः पाटलातिविषागो
पी भार्गी पुनर्नवा ॥ समंगा
वृक्षमूलत्वककपित्थवृषशोणि
तं सह दंतशठन्तद्वत्प्रोक्षणं विष

नाशनं २ लाक्षा प्रियंगुमंजि
ष्ठासम मेला हरेणुका सयष्ट्या
मधुनायुक्ता बभ्रुपित्तेन कल्कि
ता निखनेद्गोविषाणस्य सप्त
रात्रंमहीतले ततःकृत्वा मणिं
हेम्नावद्धं हस्तेनधारयेत् संस्पृ
ष्टं सविषंतेन सद्यो भवति निर्वि
षं ३ मनो जलंशमीपुष्पं इद्द
र्गी चैव कर्षकाः कपित्थकुष्ठ
मंजिष्ठाः पित्तेन श्लक्ष्णकल्कि
ताः शूनो गोःकपिलायाश्च
सौम्याख्यायाःपरोऽगदः विष
जित्परमं कार्य्यं मणिरत्नंचपू
र्ववत् मूषिका जतुका वापि
हस्तेवद्धा विषापहा ४ हरेणु
मांसी मंजिष्ठा रजनी मधुका
मधु अक्षत्वक्सुरसं लाक्षाश्वपि
त्तं पूर्ववद्दुंदु वादित्राणि पता
काश्च पिष्टे रेतैःप्रलेपिताः श्रु
त्वा दृष्ट्वाथवाघ्राय सद्यो भवति
निर्विषः ५ त्र्यूषणं पंचलवणं
मंजिष्ठा रजनीद्वयं सूक्ष्मैला त्रि
वृता पत्रं विडंगमिन्द्रवारुणी म
धुकं वेतसं क्षौद्रं गोविषाणेनि
धापयेत् तस्मादुष्णाम्बुना मात्रा
प्रायुक्तं योजयेत्तथा विषंभुक्तं
जारयति निर्विषेपिन दोषकृत् ८
सक्तं सर्ज्जरसोपेतं शार्षपा प

तवान्तकैः सुवर्णास्करतभोः
ऊस्मे रत्तनसतपो वासगर
हे हंति विषं स्थावरजंगमं न
तत्र कीटाः सविषानदंडेरेसरीसृ
पाः नकृत्याकर्मणा स्तंभकृपोः
ये यत्र दृश्यते ७ कल्किनेस्य त
णतीर पलास द्रुम वल्कलैः
दूर्वैलवाल्व सरसा नाकुलीत
दुलीयकैः क्वाथः सर्वोटकार्थेष
काकमाचीयुते हृतः ८ रोचनाप
त्र नेपाली कुंकुमे तिलकान्व
हे विषे नवाध्यते स्याच्चनरे
नारीन्टपप्रियः ९ चूर्णहरिद्रा
मंजिष्ठाकिणिही कणानिम्ब
कैः दिगंतनिर्विषतामेति गात्रे
सर्व विषार्दिते ९ शिरीषस
फलं पत्रं पुष्पवद्रू मूलमेव
च गोमूत्र घृष्टोह्यगदः सर्वक
र्मकरः स्मृतः ९ एकवीर महौ
षध्यः शृणुचातः परं द्विज वंध्या
कर्कोटकी राज न्विष्णुक्रान्ता त
थोत्कटा शतमूली शतानन्दी
वला मोचा पटोलिका सोमापि
ट निषा चैव तथा दग्धरुहा च
या स्थलेकमलिनी याच विषा
ली शंखमूलिका चंडाली हस्ति
चंडाली गोचंडाली च गंधिका र
क्ता चैव महारक्ता तथा वर्हिशि
खा चया कोषातकी नक्तमाता

पियाला सुभ लक्षणा वारुणा च
तगंधाच तथा वै गंधनाकुली ॥
ईश्वरीच शिलीध्रीच सोमली वं
शा नालिका जत्र काली महा
श्वेता च मधुयष्टिका वज्रेढः
पारिभद्रश्च तथा वै सिंधुवारिका
जीवानंदा वसुमती नतनागक
टकी तालका जाल पातालाल त
था च वटपत्रिका कार्तस्वरी महा
नीली कट्टरै हंसपादिका ॥
मंडूकपर्णी वाराही द्वे तथा तंडु
लीयके सर्पाक्षी लवणा ब्राह्मी वि
श्वरूपा सुखंकरी रुजापहा वृद्धि
करी तथा शल्यापहा चया पत्रि
का रोहिणी चैव रक्तमाला महौ
षधी तथामलक वंदाकं याचवि
द्रा पटोलिका काकोली क्षीरका
कोली पीलुपर्णी तथैवच केशि
नी वृश्चिकालीच महानागा शता
वरी तथा गरुडवेगाच स्याजल
मुदिनी तथा स्थलेचोत्पलिनी याच
महाभूमिलता चया उन्मादिनी
सोमराजी सर्वरत्नानि पार्थिवेवि
शेषान्मरकतान्यत्र कीटपक्षे वि
शेषतः जीवजानाश्च मणयः
सर्वधार्या विशेषतः रक्षोघ्नाश्च
यशासाश्च कृत्या वेताल नाशनाः

विशेषान्नर नागाश्च गोलरोद्र
समुद्भवाः सर्प तित्तिरि गोमायु
वभ्रुमंडूकजाश्च ये सिंह व्याघ्र
संमाजार द्वापि वानर सम्भवाः
कपिंजलाज गोधारि महिषेभ
भवाश्च ये इत्येव मेते: सकले
रुपेतै ईथेश्च सर्वैः स्वपुरं रक्षतितं
राजा वसेत्तत्र गहंच सुभलक्षणानि
ते लक्षण संप्रयुक्ते ॥
इतिमात्स्ये २१२ अध्यायः ॥
विषघ्नी स्त्री हिलमोचिका इति
त्रिकांडशेषः ॥ इंद्रवारुणी ॥
वनवर्वरिका स्वल्पफला भूम्या
मली रक्तपुनर्णवा हरिद्रा ॥
वृश्चिकाली महाकरंजः ॥ इति
राजनिर्घंटः ॥
विषजिह्वः पुं देवताडवृक्षः इति
रत्नमला ॥
विषज्वरः पुं महिषः इति शब्द
रत्नावली विषजन्वरश्च ॥
विषंडे क्ली मृणाले इति शब्द
रत्नावली ॥
विषण्णः त्रि विषादयुक्तः यथा
इति विप्रियमाकर्ण्य गोप्योगो
विंदभाषितं विषण्णा भग्नसंक
ल्पाश्चिंता माप्तु र्दुरत्ययां इति श्री
भागवते १० स्कंधे २९ अध्यायः

विषण्णता स्त्री जडता यथा जा
ड्यं मौर्ख्यं विषादोऽवसादः सादो
विषण्णता इति हेमचंद्रः ॥
विषतिन्दुः पुं कारस्करवृक्षः
इति राजनिर्घंटः कुपीलुः इति
भावप्रकाशः ॥
विषदं क्ली पुष्पकासीसं इति
राजनिर्घंटः शुक्लवर्णे पुं इत्यम
मरटीका ॥
विषदंष्ट्रा स्त्री सर्पकंकाली ।
इति रत्नमाला ॥
विषदंतकः पुं सर्पः इति शब्द
चंद्रिका ॥
विषदर्शनमृत्युकः पुं चको
रपक्षी इति हेमचंद्रः ॥
विषद्रुमः पुं कारस्करवृक्षः इति
राजनिर्घंटः ॥
विषधरः पुं सर्पः इत्यमरः ॥
विषधर्मा स्त्री कुलत्थया आल
कुशी इति भाषा इति शब्द
चंद्रिका
विषधात्री स्त्री जरत्कारुमुनि
पत्नी इतिशब्दमाला ॥
विषनाशनः पुं शिरीषवृक्षः
इति हारावली विषनाशक त्रि
विषनाशिनी स्त्री सर्पकंका
ली इति शब्दचंद्रिका ॥

विषनुत् पुं श्योणाकवृक्षः
इतिशब्दचन्द्रिका ॥
विषपुष्पं क्ली नीलपद्मं इति
शब्दमाला विषपुष्पकपुष्पं च
विषपुष्पः पुं छर्दनवृक्षः मन
फल इति भाषा इतिरत्नमा
ला विषपुष्पकः पुं मदनवृक्षः
इति भावप्रकाशः विषपुष्पभ
क्षणजन्यरोगः इति केचित् ॥
विषभिषक् न पुं विषवैद्यः इ
ति हेमचन्द्रः ॥
विषभुजंगः पुं विषयुक्तसर्पः ।
इति केचित् ॥
विषमं त्रि असमानं यथामनुः
भ्रातॄणामविभक्तानां यद्युत्था
नं भवेत्सह न तत्र भागं विषमं
पिता दद्यात्कथंचन इति
दायतत्त्वं ॥
विषमं क्ली पद्यस्य त्रिविधवृ
त्तान्तर्गतवृत्तविशेषः यथा पद्यं
चतुष्पदी तच्च वृत्तं जातिरिति
द्विधा वृत्तमक्षरसंख्यातं जाति
र्मात्राकृता भवेत् सममर्द्धसमं
वृत्तं विषमं चेति तत्त्रिधा समं स
मचतुष्पादं भवत्यर्द्धसमं पुनः
आदिस्तृतीयवद्यस्य पादस्तु
र्यो द्वितीयवत् भिन्नचिह्नचतुष्पा
द

विषमं परिकीर्त्तितं इति छ
न्दोमञ्जर्यां प्रथमस्तवकः ॥
वर्गमूलोक्त उर्द्ध्व रेखा यथा अ
न्त्यात्तु विषमात्कृतिं द्विगुणयेन्मू
ले समे तद्धृते त्यक्त्वा लब्ध कृ
तिं त्यजेद्विषमात् लब्धं द्विनिघ्नं
न्यसेत् पङ्क्त्यां पङ्क्तिहृते स
मेऽन्य विषमात्त्यक्त्वाप्तवर्गं फले
पङ्क्त्यां तद्द्विगुणं न्यसेदिति मुहुः
पङ्क्ते र्दलं स्यात्पदं इतिलीलाव
ती ॥
विषमः पुं अयुग्मराशिः सतु
मेषः मिथुनः सिंहः तुला धनुः
कुम्भश्च यथा क्रूरोऽथ सौम्यः
पुरुषोऽङ्गनाच ओजोऽथ युग्मं वि
षमः समश्च चर स्थिर द्व्यात्मक
नामधेया मेषादयोऽमी क्रमशः
प्रदिष्टाः ॥ इति ज्योतिस्तत्त्वं
तालविशेषः । यथा ।
चतुर्विधः परिज्ञेयः स्तालः केक
णनामकः पूर्णः खण्डः समश्चैव
विषमश्चैव कथ्यते लघ्वक्षरं ग
णेनैव खण्डे बिन्दुद्वयं गुरुः
गणास्तु समे ज्ञेयः स्वगणो वि
षमे भवेत् इति संगीतदामोद
रः ।विषमच्छदः पुं सप्तच्छद
वृक्षः इत्यमरः ॥

विषमज्वरः पुं ज्वररोगविशे
षः तस्य निदानकथनपूर्व्विकां
संप्राप्तिमाह दोषोऽल्पोऽहित
संभूतो ज्वरोत्सृष्टस्य वा पुनः
धातुमन्यतमं प्राप्य करोति वि
षमज्वरं अस्यार्थः ज्वरोत्सृष्टस्य
ज्वरेण त्यक्तस्य सन्निकृष्टं लक्ष
णमाह दोषः अल्पः ज्वरमुक्तस्य
स्यापि विप्रकृष्टं हेतुमाह अ
हित माहार विहारादि तेन ।
संभूतः संप्रणीो जातः अन्यतमं
धातुं रस रक्तादिकं प्राप्य दूषयि
त्वा पुनः विषमज्वरं करोति ज्व
रोत्सृष्टस्य वेति वा शब्देनैतद्बो
ध्यते प्रथमतोऽपि विषमज्वरो
भवति यतउक्तं आरम्भाद्विष
मो यस्त्विभ्यादिकं धातुं दूषयि
त्वाके विषमज्वरंकरोतीत्यपे·
क्षायामाह संततं रसरक्तस्थः
सततं रक्तधातुगः दोषः क्रोड़
ज्वरं पुंसां सोऽन्येद्यु पिशिताश्रि
तः मेदोगत स्तृतीयेऽह्नि अस्थि
मज्जगतः पुनः कुर्य्याच्चातुर्थकं
घोर मन्तकं रोग संकरं अत
कं श्लैष्मिकं अंतकमिवमारक
त्वात् विषमज्वरस्य सामान्यल
क्षणमाह यः स्यादनियतात्

कालाच्छीतोष्णाभ्यां तथैव च वे
गत श्चापि विषमो ज्वरः सवि
षमस्मृतः यत्त्वनियतात्काला
त्स्यादित्यस्यायमर्थः यथा वा
तिको ज्वरः सप्तदिनानि पैत्ति
को दश दिनानि श्लैष्मिको द्वाद
श दिनानि दोषाणां आवल्येवा
तिक अष्टादश दिनानि पैत्ति
को विंशति दिनानि श्लैष्मिक
श्चतुर्विंशति दिनानि स्यात्तथा वि
षमज्वरो नियतं कालं व्याप्य न
स्यादित्यर्थः शीतोष्णाभ्यां शुणा
भ्यांस्यात् वेगत श्चापि विषमः
कदाचिदपि वेगवान् कदाचि
दपि शान्तवेगः विषमज्वरस्य भे
दानाह सन्ततः सततोऽन्येद्युस्तृ
तीयकचतुर्थकौ तत्र सत
तस्य लक्षण माह सप्ताहंवा
दशाहंवा द्वादशाहमथापिवा
सन्तत्या योऽविसर्गी स्यात्सततः
सनिगद्यते विकल्पा वातिका
दिभेदात् संतत्या नैरन्तर्येण
अविसर्गी अपरित्यागी ननु
शक्यानुवद्धित्वे विषमत्वमिति
विषमलक्षणं तदत्र न घटत इ
कथमयं विषमेषुपठ्यते वेदत
एव इति दोषः वृत उक्तं चरके
ण विसर्गं द्वादशे कृत्वा दिव

वसेऽप्यल्पलक्षणां दुर्लभोपश
मःकालं दीर्घमप्यनुवर्त्तते यत्त
त्खरनादः ज्वराः पंचधा प्रोक्ताः
पूर्वं सततकादयः चत्वारः सत
तेद्विस्तात्तेषां सत्ते विषमज्वरा इ
ति तद्विशेषां स्तासाभिप्रायेण
सतत लक्षणमाह अहोरात्रेस
ततको द्वौ कालावनुवर्त्तते द्वौ
कालौ अहन्येककालं रात्रावे
ककालं यतो दोषाणामह
होरात्रेऽप्येकं द्वौ द्वौ प्रकोपका
लौ यतउक्तं वाग्भटेन वेगाः
द्वौ रात्रिभुक्तानामंतमध्यादि
काः क्रमादिभि अन्येद्युष्कलक्ष
णमाह अन्येद्युष्कस्त्वहोरात्रादे
ककालं प्रवर्त्तते एककालेन दो
षायेत्तं एककालमपि द्विती
यं प्रथमकाले ह्यधेवदोषाश्रि
तेः तृतीयक चतुर्थकयोर्लक्ष
णमाह तृतीयकं तृतीयेऽह्नि
चतुर्थेऽह्नि चतुर्थकः तृतीये
ऽह्नि इत्यागमन दिने गृह्णी
त्वा यतउक्तं दिनमेकमतिक्र
म्य योभवेत्स तृतीयकः दिन
द्वयं त्वतिक्रम्य यःस्यात्स हि च
तुर्थक इति अथाह सुश्रुतः
तः कफस्थानविभागेन यथा
संख्यं करोति हि सततान्येद्युष्कत्र्याख्यचतुर्थकमले

पकान् अहोरात्रादहोरात्रात्
स्थानात्स्थानं प्रपद्यते दोष आ
माशयं प्राप्य करोति विषमज्व
रं अथ मुख्यः आमाशयोरःकं
ठशिरः संधयः पंच कफस्थाना
नि एषु तिष्ठन्दोषो यथासंख्यं स
ततादीन्करोति तथामाशयेऽपि स्थि
तो दोषः सततं करोति द्वौ कालौ
अहोरात्रे कालद्वये दोष प्रको
पात् हृदये स्थितो दोष आमा
शय मागत्य अन्येद्युष्कं करोति
एककालं नैकस्यादेकस्मिन्नेवा
होरात्रे दोषप्रकोपकालो एकस्मि
न्काले हृदये तिष्ठन्परस्मिन्ना
माशय इति कंठ स्थितो दोषो
होरात्राद्हृदय मायाति तृतीये
दिने आमाशय मागत्य स्वप्रको
पकाले तृतीयकं ज्वरं करोति
एककालं न तु द्वौ कालौ स्वभा
वात् एवं शिरःस्थितो दोषो
होरात्रात्कंठ मायाति ततः
पुनरहोरात्राद्हृदय मायाति चतु
र्थे दिने आमाशय मागत्य स्वप्र
कोपकाले चतुर्थकं ज्वरं करो
ति एककालं न तु द्वौ कालौ स्व
भावादेव ननु दोषस्यागमनक्र
मेण

4719

त्रिस्थान गमन क्रमात्कथं तृ
तीयचतुर्थदिवसयो ज्वरागमनं उ
च्यते दोषो हि प्रकोप शमये वे
गवत्तया लाघवात्तस्थानं तु वेग
दिन एवयाति यत आह दोषः
प्रकोपकाले हि वेगवत्वेन लाघ
वात् वेगवास एवायं स्वस्था
नमभिगच्छति संधिषु स्थितः प्र
लेपं करोति संधय आमाशयेऽ
पि संति तेषु स्थितः प्रलेपकं स
र्वदा करोति निवृत्तः पुन राया
ति विषमो नियते दिने स्वभावं
कारणं तत्र मन्यते मुनिपुंगवाः
स्वभावस्य कारणत्वे कफस्थान
विभाग निरपेक्षा अतुर्थकादि
विपर्यया अपि ज्वराः स्वस्वका
लेभवति अपिशोते यथा भूमि
बीजं काले प्ररोहति अपिशोते
तथा धातुर्दोषः काले प्रकु
प्यति सुश्रुतोप्याह सचापि
विषमो देह नकदाचिद्विमुंच
ति ग्लानि गौरव कार्श्येभ्यः स
यस्मान्नप्रमुच्यते वेगेतु समति
क्रांतेगतोऽयमिति लक्षते धा
तंतरस्था लीनत्वात्सौक्ष्म्यान्नैवो
पलभ्यते द्विदोषोल्वणास्तृ
तीयकस्य लक्षणमाह कफपि
त्ता

त्रिकग्राही पृष्ठाद्वात कफात्मकः
वातपित्ताद्विरोग्राही त्रिविधःस्या
त्तृतीयकः त्रिकग्राहीवेदनया
यात्रिकं गृह्णाति इत्यर्थः ननु
कफपित्तात्त्रिकग्राही वेदनया त्रि
कं व्याप्ती त्रिकस्य वात स्थानं तत्क
थं तत्रग्राही तो पित्त कफौ ऽनन्यस्था
नगत्वेन दुर्बलत्वेन दुर्बलोवेगं
कुरुते उच्यते दोषाणां स्थाननि
यमः तत्र कुपितानां तथा चस्व
तः कुपितानां द्विदोषात्त्वाशरी
रे पर्याप्तावति यत्र संगः सर्वेषामपा
ह्याप्ति तत्रोपजायते एवं अन्य
स्थानगत्वेन चतुर्थकोपि वाच्य ।
वातकोष्मकः पृष्ठात्प्रथया पृष्ठा
प्प भवति इत्यर्थः यद्वापक
मेणाधिकरणा चेति सुश्रुतेणापंच
मी कफोल्वणस्य वातोल्वनस्य च
चतुर्थकस्य लक्षणमाह चतुर्थ
को दर्शयति स्वभावं द्विविधं ज्व
रः जंघाभ्यां श्लैष्मिकः पूर्वं शिर
सोऽनिल संभवः श्लैष्मिकः श्लेष्मो
ल्वणः तथा अनिलसंभवः वातो
ल्वणः संततादीनां त्रिदोषजत्वा
त उक्तं च चरकेण प्रायसः सन्नि
पातेन पंचस्य विषमज्वराः इति
प्रायशो ग्रहणादेक दोषजाः द्वि

दोषजा अपि न भवंति इतिज्जे
ज्वरः पूर्वं प्रथमं जंघाभ्यांवाथ
याजंघे व्याप्य पश्चात्सकलंश
रीरंव्याप्नोति एव मुत्वएण वात
ज्जातः शिरसः पूर्वंव्यथया पि
रोव्याप्य सकलं शरीरं व्याप्नो
तीत्यर्थः विषमज्वर एवास्यच
तुर्थक विपर्ययः अस्थिमज्ज
गतो दोष अतुर्थकविपर्ययः
अन्यः सन्ततादि पंचकादपर
अतुर्थकविपर्ययेपाव्योज्वरः
सोपि विषमज्वर एव सकिं
यात्तस्य इत्यपेक्षायामाह अ
स्थीत्यादि तस्य चतुर्थकवि
पर्ययस्य लक्षणमाह समध्य
ज्वरयत्यन्हौ आद्यंते च विमुंच
ति चतुर्थक विपर्यय इत्यु
पलक्षणं सततादि विपर्ययो
दो पि बोद्धव्यः यथा अहोरात्रेका
लौ मुंचति शेषं सर्वं महो
रात्रं तिष्ठतीति सतत विपर्य
यः मध्यएकं दिने ज्वरयति
आद्यावंतेच दिने मुंचति इति
तृतीयक विपर्ययः एते वि
षमज्वरा उपलक्षकाः अन्ये
ऽपि ज्वरादयोपि विषम
ज्वरा बोद्धव्याः यथा समो

वफौ प्रसक्तौ एण पित्तस्तरेरित्तः
रात्रौ प्रायो ज्वरस्तस्यादिवाहीनक
फस्तत्र प्रायो वाऽल्पेन संतता
हीनां शीतपूर्वत्वे दाह पूर्वत्वेच
हेतुमाह त्वक्स्थौ श्लेष्मानिलौ
शीत मादौ जनयतो ज्वरं तयोः
प्रशांतयोः पि मन्तर्दाहं करोति
च शीतं शीत सहितं प्रशान्तयोः
प्रशांत वेगयोः अन्तः अभ्यंतरे
करोभ्यासे तथा पित्तं त्वक्स्थम
द मतीवच तस्मिन्प्रशान्ते त्विति
शेऽकृतः शीत मंततः अन्ततः
हस्तपादादिनः शीतादि दाहादि
ज्वरयो स्त्रिदोषजत्व माह द्वावे
तौमाह शीतादी ज्वरो संसर्गजौ
स्मृतौ दाह पूर्व स्तयोः कष्टः
स्तवसाध्यतमोऽपरः संसर्गजो
सान्निपातिकौ कष्टःकष्टसाध्यः
विषमज्वर विशेषानाह विशेष
ईसे देहे श्लेष्म पित्ते व्यवस्थि
ते तेनार्द्धं शीतले देहं वा
र्द्धमुष्मं प्रजायते अत्र रसे वि द
ग्धे आहारज वसे दुष्टे देहे
श्लेष्मपित्तेच व्यवस्थिते तेन
हेतुना शीतलं कफेन उष्म
पित्तेन अर्द्धत्वं चार्द्धनारीश्वरा
कारेण नरसिंहाकारेण वा कायेऽङ्गंपरा

पित्तं श्लेष्मा चांते व्यवस्थितः
तेनोष्मत्वं शरीरस्य शीतत्वे हस्त
पादयोः अन्ते हस्त पदादौ का
श्लेष्मायदाऽत्र पित्तश्चांते व्यव
स्थितः शीतत्वं तेन गात्रेष्वाऽ
ष्मत्वं हस्त पादयोः विषमज्वर
विशेषस्य प्रलेपकस्य लक्षणमा
ह प्रलिम्पन्निव गात्राणि घर्मेण
गौरवेण च मंदज्वरविलेपी च स
शीतः स्यात्प्रलेपकः गौरवेण
उपलक्षितः मन्दज्वरविलेपी मे
दवेगश्च ज्वरस्य सदा संबंधोऽस्य
स्तीतिमन्दज्वरविलेपी अयं विष
मज्वरः तथाच सुश्रुतः प्रलेपका
ख्योविषमः प्रायः क्लेशाय शोषि
णामिति अथ विषमज्वराणांसा
मान्यचिकित्सा ज्वराश्च विषमाः सर्वे
सन्निपात समुद्भवाः अथोल्वणं
स्य दोषस्य तेषु कार्यं चिकित्सितं
विषमअथ कर्तव्य मूर्द्ध्वाधश्च
शोधनं स्निग्धोष्णै रन्नपानेश्च श
मयेद्विषमज्वरं कालिंगकः पटो
लस्य पत्रं कटुकरोहिणी पटोलं
सारिवा मुस्तं पाठा कटुक रोहि
णी निम्बः पटोलः त्रिफला मृद्वी
का मुस्तवत्सकौ किराततिक्तमम
ताचन्दनं विश्वभेषजं गुडूच्यामलक

मुस्त मद्रिश्लोक समापन्नाः क
षायाः शमयंत्याशु पंच पंचवि
धज्वरं कालिंगकः इन्द्रयवः व
त्सकः ऊटजः चंदन मत्ररक्तच
न्दनं कषायाः पंच पंचविधंसंत
त सततान्येद्युष्क तृतीय चतु
र्थरूपं महाबला मूलमहौष
धाभ्यां क्वाथो निहन्याद्विषमज्व
रं हि शीतं सकम्पंपरिदाहयुक्त
विनाशयेत्त्वहि त्रि दिनप्रयोगा
त् हृद्रास्नतानागर पुष्कराद्येःकृ
तः कषायः कफमारुतोत्तरे सश्वा
स कासारुचिपार्श्व रुग्ज्वरेसदात्रि
दोषप्रभवेपि शस्यते हृद्रादि ।
हृद्रास्नतापद्मक चंदनैर्धनैर्भूनि
म्ब पर्पट पटोल पौष्करैः तिक्ता
कालिंगपिचुमर्द वासके मंहौष
धं भार्गीवितुन्नकैः समैः शृतेपि
बेत्सर्वदिने कषायं निहंति हृज्ज्व
र मग्रशीतं सश्वासमूर्छारुचि
दाह शूलाएं तृषां वमिकासम
तीव शूलके आनाह हिक्कादि
षु सन्निपाते गलग्रहे तन्द्रिशिरो
रुहायो बृहेत्त्वद्रादि विषमज्वरे
मुस्तामलकगुडूची विश्वौषधके
टकारि क्वाथः पीतःसकणामधु
णोःसमधु विषमज्वरं हंति तिलते

न लवणगुरुकल्कोलसन
सेवितः प्रातः विषमज्वरमपह
न्ते वातव्याधीनपोऽथ्याश्च का-
लाजाजी तु सगुडा विषमज्वरा
न् कालाजाजीमगरैला इति
लोके साच किञ्चिद्दुग्धा गुडुल्या
कर्षमिता भक्ताणीया पीतोम
रीच चूर्णेन तुलसीपत्रजोर
सः द्रोणपुष्पी भवो वापिनि
हन्ति विषमज्वरान् अमृतायाः
प्रातेश्चूर्णं वासता परिशोषि
ते पृथक्षोडशभागाः सगुड
माक्षिक सर्पिषा यथाग्निभ
क्षयेदेतज्वरो हि तमिताप्तानः
नास्यकश्चिद्वैद्यापिर्नज्वराप
तितं नच नज्वरा विषमानैव
मेहनानिलयक्ष्म नचनैवग
ता रोगाः पर मेभद्ररसायने मे
धाकरं त्रिदोषघ्नं प्रयोगादस्य
बुद्धिमान् जीवेद्वर्षशतंस्वाग्रय
ध्रेवादितिजलस्था गुडूचीक
ल्कः अथान्नमाह तक्रमांसंप
योमांसं दधि मांसमथापिवा
माषमांसंच भुञ्जानोमुच्यतेवि
षमज्वरात् अग्निवेशाश्चस्मा
समंडपानाय भोजने चरण
युधाः तित्तिरा विष्किराःपथ्याः
कुक्कुटा विषमज्वरे वरणायुधा

कुक्कुटाः कुक्कुटा वनकुक्कुटाः
विष्किराः वर्तिका लाव तित्ति
र चकोरकाद्याः अपसंततादीनां
विशिष्टाचिकित्सा गायत्री कटु
कानंतासारिवाभिःश्रृतंजलं सं
ततास्येज्वरे देयं वाताद्यीनांवि
शिष्टाचिकित्सा गायत्री कटु
कानंतासारिवाभिःश्रृतंजलं
संततास्येज्वरे देयंवातादीनां
निवृत्तये वृषा द्रवन्ती परंडव
सञ्चविटपा तद्दलाभे रेतीचग्राह्या
समानगुणत्वात् पटोलेन्द्रयवा
वंतापद्मारग्वधमस्ताजले क्वथितं
तज्जलं पीतं ज्वरे संततकं जयेत्
अनंता सारिवा अरिष्टः निम्बः ज
लेवालकं द्राक्षापटोल निम्बार
ग्वधाद त्रिफला श्रृतं जलंज
नः पिबेत्क्षीरं मध्येयु ज्वरेशान्तये
शाकाकः इंद्रयवः कर्मसाधारणं
क्वाः तृतीय चतुर्थकौ भिषजा
प्रतिकर्तव्यौ विशेषोक्त चिकि
त्सितैः उशीरं चंदनं मुस्तं गुडूची
धान्यनागरं अंभसा क्वथितंपेयं
शर्करा मधुयोजितं ज्वरे तृतीय
केपुंसाम्त्वेला दारु समन्वितं अ
पामार्ग जटा कट्वालोहितैः स
मतद्भिः बद्धा वारे रवे स्तूर्णज्वरं

4723

:ज्वं तृतीयकं स्थिरा तामलकी
दारु शिवा द्रुप महौषधैः सिता
मधु युतःक्वाथ शतचर्षकरहरःपरः
स्थिराशालिपर्णी तामलकीभूधा
त्री शिवा हरीतकी वृषावासा
अगस्ति पत्रस्य रसेन नस्यंनिहन्ति
चातुर्थीकमुग्रवीर्यं शिरीष पुष्प
स्य निशाद्वयस्य कल्केन घृतान्वित
संयुतेन तन्नस्यं ज्वरस्यवेगका
लेच चिन्तयन् त्वर्यतेन्द्रयः न
सेष्टे रुद्रते वापि विषये नाशये
त्स्मृतिं सन्नते विषमंचापि हीणं
स स्वविरोत्थितं ज्वरंसभोजनैः
पथ्यैर्ज्वरघ्नैः समुपाचरेत् सतता
दि विपर्ययाणां विषमज्वराणांवि
षमज्वराणां चिकित्सा सततादी
नामिव कर्तव्या शीताभिभूते पु
रुषे कुर्यादुष्णतरोक्रियां ।
दाहाभिभूते तु विपि विदध्या
द्दाहनाशनं वाल्वादनैवेकृतेरे
गुरुभिः कम्बलादिभिः तुलवस्या
महाशीतेशीतादिज्वरिणो हरेत्
तुल्यवती तन्नाई इतिलोके ॥
तेतनाभ्यांसपीनाभ्यां पीवरोरु
नितम्बिनी युवति गाढमालिङ्ग्य
तेन शीतं प्रशाम्यति कोलारा
स्य संजातं तस्य शीते निवारिते

प्रत्क्षादं चास्य विज्ञाय पृथक्का
रयेत्तुहितं तथा दारु तथे
माने पत्रे रेरंड संभवैः शीत
लेर्याणिते देह दाहे तस्यापनो
दयेत् तालके सक्तिका चूर्णं
तैलं तत्रोभयो रपि नवमांस
चतुस्पेस्यात्मद्देयेत्कस्मकाड्वैः
तत्र सेष्ठुक भुपनैवमेगजपु
टःपचेत् शीते तद्गुणायेचूर्णं गु
आमाजं शिताधुते प्रभाते भक्त
येत्तेन याति शीतज्वरस्तये वो
निर्भवति कस्यापि कस्यापिनभ
वत्यपि एकेन दिवसेनैव शीत
ज्वरहरं परं मध्याह्नसमये पथ्यं
शिखरिणी भक्तकं च शीत
ज्वरे भूतभैरवकूर्णं एकलाजा
फलं योष त्रिफला जीरकंच
नः सविडंग सितायुक्तं चूर्णंशी
तज्वरापहं कायस्था नाकुलीति
कावयस्था श्वचारकैः सहदेवा
वचाकुष्टः शीतघ्नैः धूप लेपनैः
पनैरेवौषधैः पिष्ट लेवणा तार
संयुतेः साम्ल विपाचितं तैलम
भ्यंगाच्छीतनाशनं कायस्थाह
रितकीनाकुली रास्ना भेदस्नाग
इतिलोके वयस्था गुडूची पुराग
राजल्कः चोरकः भटिंडर तर

लाभे गादिवन सहदेवा हरस
लालारो यवक्षारः काथस्यादि
धूपं लेपनं तैलंच पदंउस त
पत्राणि लिम भूमौ निधापये
त् दाहादि ज्वरिणो देहे तानि
पत्राणि धारयेत् तेन नश्यति
दाहोऽस्य ज्वरश्चैवोपशाम्यति
दाहशांते यदा शैत्यं तच्चपुष्पा
निवारयेत् मधनवङ्ग चलज
म्माणिमेखला सरस चंदन चंद्र
विलेपना वन लतेव तरुपरिवे
ष्टयेत्यवलदाह निपीडितमंगना
चंद्रः कर्पूरः तदंग संग संजात
प्रोष्मदाहे निवारिते प्राक्कृदं
वास विलायलं स्त्री मपनयेत्स
नः स्ववर्चिका नागर कुष्ठमूर्वा
लाक्षानिशा लोहित यष्टिका
भिः सिद्धं दशगुणे तक्रपंकं
तैलंज्वरदाह समन्वितेष घट्टतक्र
तैलं रास्ना नागर कुष्ठ चंदन
निशा पद्मकं कृष्णा वचाला
ता सैंधवसारिवा मधुरसा देवदा
रोहीतकैः सोशीरामुषि फेनरो
हिष जलैस्तैलं पचेत्षड्गुणे त
क्रे तच्छमयेज्ज्वरं दाहं वरं दाहादि
प्रीतास्थिकं चंदन मत्र शोते मधु
रसामूर्वा रोहीतकः रोहिणि इति

लोके रोहिषं रोहिस इति तृ
णविशेषः जलं वालकं मद्य प
ट्टतक्र तैलं पद्मकोत्पलकल्हारम्
णाल विष पोक्षकैः कुष्ठदोशीर
मंजिष्ठा पद्मगैरिक कट्फलैः सा
रिवाद्वय लोध्राद्व हीरी खर्जूर
मस्तकैः धात्री शतावरीयुक्तैः क्वा
थे कल्के प्रयोजितैः ॥
लाक्षारस पयः शुक्ल मस्तुभिः स
ह कांजिकैः पक्वतैलं मिदं तच्चे
दाहज्वर हरं परं लाक्षारसादिः
षड्यत्कैल तल्पः पद्मकादितैलं
प्रलेपके प्रयंजीत श्लेष्मज्वरहरी
क्रिया रुद्रजटा गोशृंग विडाल
विष्ठोरगस्य निर्मोकः मदनफल
भूतकेशेषा वंशात्वगुग्गु निर्माल्यं धू
त यव मयूर चंद्र वगलक रोमा
णि सर्षपाः सवचाः ।
हिंगु गवास्थि मरीचाः समभागा
श्छागमूत्रे संपिष्टाः धूपन विधि
नाशामयंस्येते सर्वान्ज्वराभिपते
ग्रहडाकिनी पिशाच प्रेत विका
रानयं धूपः रुद्रजटा जटाधारी
भूतकेशी जटामांसी रुद्रनिर्मा
ल्य रुद्रनिर्माल्य पुष्पादि मयूरचं
द्रः मयूरपुच्छ चंद्रकं ॥ माहेश्व
रो धूपः सोमं सानुचरं देवं

4725

समातृगणा मीश्वरं एजयन्नयत्नः
शीघ्रं मुच्यते विषमज्वरात् सो
मं उमादि सहितं सानुचरं नं
द्यादिगण सहितं प्रयतः प
विद्धः विष्णुं सहस्र मूर्द्धानं चराच
रपतिं विभुं स्तवन्नाम सहस्रेण
ज्वरान्सर्वानपोहति ॥ सह
स्रमूर्द्धान मिति सहस्रशीर्षेत्यादिवे
दाभिहितं नामसहस्रेण भार
तोक्तेनेत्यर्थः ॥ ज्वरस्यापि
देवतात्वात्पूजा कार्या यतश्चा
ह विदेहः तीर्थायतन देवाग्नि
गुरुवृद्धोपसर्पणैः श्रद्धया श्
न्वेने स्वापि सहसा शाम्यति ज्वरः
तीर्थं ऋषिजुष्टं जलं आयतनं
देवाधिष्ठितं पुरुषोत्तमदेवश्रीशै
लादि ॥ निम्बपत्रं वचाक्षोष
जवानी लवणत्रयं । हारो
द्रिवज्रि रामठ त्रिनं वे क्रम
शोऽंशकाः सर्वमेकीकृतं चूर्णं
प्रत्यये भक्तयेन्नरः । एकाहि
कं द्व्याहिकंच तथा त्रिदिवसज्व
रं चातुर्थिकं महाघोर सन्ततंस
ततंद्विवा धातुस्थंच त्रिदोषोत्थ
ज्वरं हंति च मानवे निम्बादिचू
र्णं इति विषमज्वराधिकारः ॥
भावप्रकाशः ॥

विषमनयनः पुं शिवः इति
हारावली ॥
विषमेषुः पुं सर्पधारकः वादि
या इति ख्यातः तत्पर्यायः जां
गली २ इति जटाधरः ॥
विषमयं त्रि विषमादागतं
विषमरूपं इति सिद्धांतकौमुदी
विषमर्दनी स्त्री गंधनाकुली ।
विषमर्दनिका इति राजनिर्घंटः
विषमविभागः पुं असमानांशः
यथा यत्र तु भ्रातृभ्यः एव विभागा
मर्थ्यंते तत्र विषमविभागाभाव
माह मनुः भ्रातॄणा मविभक्ता
नां यद्युत्थानं भवेत्सह न तत्र भा
गं विषमं पिता दद्यात्कथंचन ।
इति दायतत्त्वं ॥
विषमस्थः त्रि असमानस्थितः
इति केचित् उपप्लवदेशस्थः यथा
नारदः असाम व्यवहारश्च हन्ता
दातोन्मत्तो व्रती विषमस्थाश्च
नासेध्या न चैतानाकारयेन्नृपः वि
षमस्थाः उपप्लवदेशस्थाः इति
व्यवहारतत्त्वं ॥
विषमशिष्टः पुं दोषविशेषः
स च अनुचितशासनरूपः मह
हैषम्यं यथा अन्नकामत एव
चोदायणा तमकृच्छ्रयो विषमशि

जांगलिकः ३ नरेंद्रः ४ कौशिकः
५ कथाप्रसंगः ६ वक्राटः ७ इति
जटाधरः व्यालग्राही ८ जांगुलिः
९ जांगलिः ९ अहितुंडिकः १०
व्यालग्राहः ११ गारुडिकः १२
इतिशब्दरत्नावली ॥
विषवैरिणी स्त्री निर्विषा इ
ति राजनिर्घंटः ॥
विषशालूकः पुं पद्मकंदः
अस्यगुणाः गुरुत्वं विष्टंभित्वं
शीतलत्वंच इति राजवल्लभः
विषशूकः पुं भ्रमरोलः इति
भूरिप्रयोगः ॥
विषशृंगी पुं भ्रमरोलः इति
हारावली ॥
विषसूचकः पुं चकोरपक्षी।
इति हेमचंद्रः विषस्कन्धा पुंभ
दूरालः इति त्रिकांडशेषः ॥
विषहन्त्री स्त्री अपराजितानि
र्विषा इति राजनिर्घंटः ॥
विषहरः त्रि गरलनाशकौषधा
दिः यथा अर्कजः मेदोऽपहर
ते रुद्र सर्ववृश्चिकजं विषं पि
प्पली नवनीतंच शृंगवेरंच सैं
धवं मरीचं दधि कुष्ठंच लेपपा
नेविषं हरेत् त्रिफलाटंकणुष
च

चंदनं घृत संयुक्तं पलत्यानाश
लेपाद्धि विषनाशो भवेद्ध्रुवं।
पारावतस्यचाक्षीणि हरिताल
मनःशिला एष योगो विषं ह
तिवैनतेय इवोरगान् सैंधवस्य
चूर्णं दधि मध्वाज्य संयुतं
वृश्चिकस्य विषं हंति लेपोऽयं
वृषभध्वज इति गारुडे १८६
अध्यायः ॥
विषहरा } स्त्री मनसादेवी इति
विषहरी } शब्दरत्नावली ॥
विषहा स्त्री देवदालीलता इति
निर्विषा इति राजनिर्घंटः ॥
विषा स्त्री अतिविषा इत्यमरः
बुद्धि इत्युणादिकोषः ॥
विषांकुरः पु शल्यास्त्रं इति
त्रिकांडशेषः ॥
विषाणं क्ली कुष्ठौषधं पशुशृं
गंहस्तिदन्तः इति हेमचंद्रः मेदिनी
कोलदंतः इति हेमचंद्रः ॥
विषाणिका स्त्री मेषशृंगी इति
रत्नमाला सातला कर्कटशृंगी
आवर्तकी इति राजनिर्घंटः ॥
विषाणी स्त्री क्षीरकाकोली अ
जशृंगी इति मेदिनी वृश्चिकाली
इतिश्री राजनिर्घंटः ॥
तिन्तिडी इति शब्दचंद्रिका ॥

विषाणी पुं हस्ती शृंगी इत्य
जयः ऋषभनामौषधं शृंगाटकः
इति राजनिर्घंटः ॥
विषादः पुं अवसादः यथा
जाड्यं मौर्ख्यं विषादोवसादः
सादो विषण्णता इति हेमचंद्रः
विषाननः पुं सर्पः इति शब्द
माला ॥
विषादनी स्त्री पलाशील
ता इति राजनिर्घंटः ॥
विषान्तकः पुं शिवः इति हेम
चंद्रः विषनाशके त्रि ॥
विषापहः पुं मुष्ककवृक्षः इति
राजनिर्घंटः ॥
विषापहः पुं मुष्ककवृक्षः इतिरा
जनिर्घंटः ॥
विषापहा स्त्री इंद्रवारुणी नि
र्विषा इति राजनिर्घंटः नाग
दमनी इति भावप्रकाशः अर्क
मूला ईश्वरमूल इति भाषा इ
तिशब्दचंद्रिका सर्पकंकालिका
इति रत्नमाला ॥
विषाभावा स्त्री निर्विषा इतिरा
जनिर्घंटः ॥
विषायुधः पुं सर्पः इति शब्द
रत्नावली विषमुक्तास्त्रे क्ली ॥
विषारः पुं सर्पः इति शब्दचंद्रि
का विषारातिः पुं कृष्णधत्तूरकः

इति राजनिर्घंटः ॥
विषारिः पुं महाचंचुशाकः।
घृतकरंजः इति राजनिर्घंटः
विषास्यः पुं सर्पः इति राजनि
र्घंटः ॥
विषास्यः पुं सर्पः इति शब्दर
त्नावली विषयुक्तमुखे त्रि ॥
विषास्या स्त्री भल्लातकः इति
शब्दचंद्रिका ॥
विषु व्य साम्यं इति विषुवत्स्था
इटीकायां भरतः नानारूपं इ
ति रामाश्रमः ॥
विषुणः पुं विषुवं यथा विषु
नानारूपं गमनं विषवत्क तदस्या
स्तीति विग्रहे अविसुमर पर
लोप आकृतसंधे रिति पामादि
सूत्रेण नः णत्वं इत्यमरटीका
यां रामाश्रमः ॥
विषुपं क्ली विषुवं इत्यमरटीका
यां भरतः ॥
विषुवं क्ली समरात्रिंदिवकालः
तत्पर्यायः विषुवत् २ इत्यम
रः विषुपं ३ विषुवत् ४ विषु
विषुवत् ५ इति शब्दरत्नावली ॥
विषुणः ६ इति रामाश्रमः ॥
विषुवः ७ इति मुकुटः तत्त
मेष तुलयोः संक्रांती यथा म
गकर्कट संक्रांती हेतदक्षिणा
यने विषुवती तुला मेषे ।

गोल मध्ये तथापराः ॥ इति
तिष्यादितत्त्वं तेन महावि
षुव जलविषुव नामभ्यांक्रमे
णाख्याते यथा विषुवाभ्यांवत
सरःस्यादिति शाङ्गविदां मतं
महाविषुव माख्यातं क्रान्तिभि
श्चेत्र विक्रितं तथा स्याज्जल
विषुवं क्रमादाश्विन विक्रितं
इति शाङ्गरत्नावली विषुवारंभ
कालो यथा मृगसंक्रान्तितःपू
पूर्वे पश्चात्तारा दिनान्तरे एकत्र
षेचतः पंच पलमान क्रमेणात
षट्षष्टिवत्सरानेक दिनस्याद्य
ते रवेः एवं ततः पंच दिनम
यनारम्भाणांक्रमात व्युत्क्रमे
णाच तद्वत्स्यादृश्याने रवेध्रुवं
कर्किसंक्रमणो तद्वदभितोद
क्षिणायने अयनांशाक्रमणो
व विषुवारंभता तथा रविसं
क्रान्तितो मेष तुलयोरक्षितःपु
नः विषुवं मीन कन्यार्द्धे त्वेका
त्तीद्दशकाद्द्वके दिनमानाथ
मीनार्द्धान्मेषार्द्धे पालिकं शतं
ततो वृषार्द्ध पर्यन्तमशीतिःप
लभाजिनी मिथुनार्द्धे चत्वरिं
शत्पलानां वर्द्धते क्रमात
कर्कटार्द्धेत षट्त्रिंशात्सिंहार्द्धे
न्तु द्वाशीतकं । कन्यार्द्धेत

द्विनवतिः क्रमात्ह्रुसति वासरे
कन्यार्द्धाद्रजनीमानं बोध्यं पूर्वे
क्रमेणहि दिने दिने भागहारा
न्मानं बोध्यं दिवानिशोः पल
मानं ३६ षष्ठा सन्कान्त मान
निर्णयः षट्षष्टि वत्सरानेवं
ततःस्यात्षोडशांशके पुनस्तद्
त्तरो त्तहत् एवं सप्तदशांशि
के इति ज्योतिस्तत्वे अयनश्च
मेष संक्रमतः पूर्वे पश्चात्तारा
दिनान्तरे प्रातिलोम्यानुलोम्यन
विषुवारम्भणं भवेत त्रयोदशा
दिने सौरे चैत्रे मास तिथ्यांश
के विषुवारंभणं तत्र समं मानं
दिवानिशोः ततः प्रतिदिने वेला
सपाद त्रिपलात्मिका वर्द्धते मे
ष विंशांश पर्यंत स्थूल मार्गतः
तथा मेषान्तपर्यंत पादोनत्रि
पलात्मिका ताहगाषाढपर्यंत
पादोनत्रिपलात्मिका ताहगाषा
ढपर्यंत पलैक प्रमिता मताततः
कर्कट विंशांशपर्यंत प्रसरे क्र
मात सपाद पलमानेन वेला
ह्रुसति निश्चितं ताहगभाद्रात
पर्यंत पादोन त्रिपलात्मिकाता
हगाश्विन शेषांते हसेत्त्र पला
त्मिका दिवामानं ३० षष्टि
त्मका रात्रेः प्रमाणकं वेशा

खादौ दिवामानं रात्रिमानंतः
तादिषु षट्षष्टिवत्सरोनेवंततः
स्यात् द्वादशांशके पुनस्तद्
त्तरो त्तहत् तत एकादशादि
के इतिसत्कृत्यमुक्तावली ॥
विषुवत् क्ली विषुवं इत्यमरः
विषोषधी स्त्री नागदंती इति
रत्नमाला ॥
विष्कंभः पुं सप्तविंशतियोगा
न्तर्गत प्रथमयोगः शुभकर्माणि
तस्य पंच दंडास्त्याज्याः यथा त
जादौ पंच विष्कंभे सप्तशूलेच
नाडिकाः गंडव्याघातयोः षट्
च नव हर्षणवज्रयोः वैधृति
व्यतिपातोचसमस्ता परिवर्जये
त् इतिसत्कृत्यमुक्तावली ॥
तत्रजात विष्कम्भयोगो यदि
जन्मकाले कार्ये स्वतंत्रो मनुज
स्तदानीं सहसत्कलत्रात्मजसौख्य
युग्मं गृहस्य निर्माण विधौ स
मर्थः इति कोष्ठीप्रदीपः ॥
विस्तारः प्रतिबंधः रूपकांग
प्रभेदः योगिनांबंधभेदः ।
इति मेदिनी वृत्तः इत्यजयः॥
अर्गला इति भरतः ॥
विष्कम्भीनं पुं अर्गला यथा
तद्विष्कंभोऽर्गलं ननां इम।

मयोः क्लौ कपाटयारणकाष्ठेऽ
र्गले ऊडुकादेउ इति ख्यातं
तत्कपाटं विष्कम्भाति रुणा
द्धि इति ग्रहादित्वासिन्द्विष्कं
भी सूईन्यवत्स्वार्थकथनमेतत्वि
ष्कंभोऽर्गल मिति मूलपाठः वि
ष्कंभोबंधननिमित्तं दंडः इतिभ
टः इति मुकुटः विष्कंभोयोग
भेदेस्याविस्तार प्रतिबंधयोः
रूपादांगप्रभेदे च इतिमेदि
निदर्शनात विष्कंभ इतिपा
ठः इतितट्टीकायां भरतः ॥
विष्कलः पुं ग्रामशूकरः
इति राजनिर्घण्टः ॥
विष्किरः पुं पक्षी इत्यमरः
विष्किरा स्तित्तिरि मयूर कुक्कु
टाद्याः लावाद्याविष्किरा वर्गः
प्रभेदा जांगलाख्यगाः लघवः
शीत मधुराःसकषाया हिता
नृणां इति राजवल्लभः ॥
अथ विष्किरगणगणाना गु
णाश्च वर्त्तका लाव विकि
र कपिंजलक तित्तिराः कुलिं
गकुक्कुटाद्याश्च विष्किराः स
मुदाहृताः विकीर्य भक्षयंत्ये
ते यस्मात्तस्माद्धि विष्किराः क
कपिंजल इतिप्राज्ञैःकथितो गो

रतित्रिरा: ऊलिंग गववैग्रा इ
ति लोके विष्किरा मधुराःशी
ताः कषायाः कटुपाकिनः ब
ला हृद्या स्त्रिदोषघ्नाः पथ्या
स्ते लघवः स्मृताः इतिभावप्र
काशः विष्टः त्रि प्रविष्टः वि
श धातोः क्त प्रत्ययेन निष्पन्नः
विष्टपं क्ली भुवने इत्यमरः
विष्टपं पिष्टपः इति तट्टीका
यां रूपद्वयं ॥
विष्टम्भः पुं प्रतिबन्धः रोग
विशेषः इति मेदिनी मत
आनाहरोगः तस्य लक्षणमा
ह आमं शकृद्वा निचितं क्रमे
ण भूयो विबद्धं विगुणानिले
न प्रवर्त्तमानं न यथास्वमेनं
विकारमानाहमुदाहरन्ति आ
मं अपक्वमाहाररसं शकृद्वा
रीषं वा क्रमेण निचितं संचितं
भूयो विगुणानिलेन दुष्टवा
युना विबद्धं व्याप्तं शोषितं वा
यथास्वं पूर्ववत्प्रवर्त्तमानं एनं
विकारं आनाहमाहुः तत्रा
मजमानाहमाह तस्मिन्भव
त्यामसमुद्भवे तु तृष्णा प्रतिश्या
य शिरोविदाहाः आमाशये
शूलमथो गुरुत्वं हृत्स्तम्भउद्गारवि
घातनेच वि

घातनं अप्रवृत्तिः शकृतश्च
पक्वमानाह स्तम्भः कटी पृष्ठ पु
रीष मूत्रे शूलोथ मूर्च्छा शकृ
तो वमिश्च श्वासश्च पक्वाश
यजे भवन्ति तथालसोक्तानि
च लक्षणानि पक्वाशयजे श
कृत्संचयजे अलसोक्तानि आ
ध्मान वातनिरोधादीनि आना
होदावर्त्तयोश्चिकित्साया सम
त्वाद्भय चिकित्सात्र लिख्यते
अथोदावर्त्तानां चिकित्सा अथो
वात निरोधोत्थे क्षुदावर्त्ते हित
मन्नं स्नेहपानं तथा स्वेदो वस्ति
येद्वानुलोमनं विड्विघात समुत्थे
तु विड्भेदन्नं तथौषधं वर्च्चप्रगा
ढस्य स्वेदो वस्ति हितो मतः
वर्त्तिः फलवर्त्तिः मूत्रावरोधजे
ते वीरवारि वचां पिवेत् इक्षु
शर्करसंचापि कषायं ककुभस्य
च दुष्पर्शा कटकारी दुरालभा
च तुल्यगुणत्वात् पर्वारुवीजं
तोयेन पिवेद्वा लवणीकृतं सि
ता मिक्षुरसं क्षीरं द्राक्षारसमथा
पिवा सर्वथैव प्रकुर्वीत मूत्रकृ
च्छ्राश्मरीविधिं जृम्भाभिघात
जे स्नेहं स्वेदं वापि प्रयोजयेत्
अत्पान पिप्रमुञ्जीत समीरणाह
रान्वितान् ।

नेत्रनीरावरोधोत्थे मुंचेदश्रु ई
र्षा जलं रूप्यात्स्वेनतस्या
ग्रेकथयेच्च कथाः प्रियाः छि
क्काभिघातजे तीक्ष्णा घ्राणनस्या
र्का दर्शनैः प्रवर्त्तयेत्तु तेसक्तं
स्नेह स्वेदौ प्रलीलयेत् तीक्ष्णम
रीच राजिकादि उद्गाररसावरो
धेतु स्नैहिकंधूम माचरेत् छर्दि
निग्रह संजाते वमनं लंघनं हि
तं विरेचनंचात्र मतंतैलेनाभ्य
ञ्जनं तथा वस्तिशुद्धिकरैः सि
द्धं चतुर्गुणजलेपयः आवारि
नाशात्क्वथितं पीतवते प्रकाम
तः रमयेयुः प्रियानार्यः शुक्रोदा
वर्त्तिनंनरं तस्याभ्यंगावगाहश्च
मदिरा चरणायुधः शालिःप
यो निरूहश्च हितं मैथुनमेव
च क्षुद्विघात समुद्भूते स्निग्ध
मुस्नं तथा लघु रुच्यं मल्पहि
तं भक्तं पुष्प सेव्यं स्त्रगोपिय
त् तृषा विघात संभूते शीतः
सर्वो विधि हितः कर्पूर शिशि
रं स्वल्पंपिवेत्तोयं शनैः शनैः
श्रमश्वासे धृते शक्तो विश्रामः
सरसोदनः निद्रावेगविघातोत्थे
पिवेत्क्षीरं सिताघृते सवाहनं स
शय्याच हिताः श्रोत्र प्रियाःकथाः
वाताद्विवेगविघातजनिता

ना मुदावर्त्तानां चिकित्सा म
भिधायत्रतादि कुपित वात
जनितस्योदावर्त्तस्य चिकित्सा
माह हिंगुमाक्षिक सिन्धुत्थैः
पिष्टै वर्त्तिर्विनिर्मिता घृताभ्य
क्ता गुदे न्यसेदुदावर्त्तविनाशि
नी फलवर्त्तिः मदनं पिप्पली
कुष्ठं वचा गौराश्च सर्षपाः गु
डक्षीर समायुक्ताफलवर्त्ति
र्विहोदिता मदनफलादिवर्त्तिः
खंडपलं त्रिवृत्तायाः कृष्णाकर्ष
द्वयो स्मर्ते माग्भोजनस्य म
धुना विडालपदकेनरो लिह्या
त् एतद्गाढ शरीरे देयं विरे
चनदावर्त्ते मधुरे नरपतियोग्य
चूर्णनाराचकं नाम्ना नाराचच्
र्णं सैन्धवं पिप्पलीमूलं त्रिवृद्द
न्तीचवित्रकं तथूर्णं गुडसंमिश्र
भक्षयेत्प्रातरुत्थितः पतक्षु
डाष्टकं नाम्नावल वर्णाग्नि
वर्द्धनं उदावर्त्त सीरू गुल्मशो
ष पाण्डामयापहं गुडाष्टकं मू
लकं शुष्कमार्द्रंच वर्षाभू पंचमू
लकं कृतमाम्लं फलं चाप्ययु
क्ता तेनघृतं पचेत् तत्पीतंश
मयेत्क्षिप्रमुदावर्त्तं सशोषतःप
चमूलकं मत्र्यृहत् शुष्कमूल
कावघृतं अथ अनाहस्य चिकि

त्सा तुल्यकाख्या कार्यत्वाड़ः
दावर्त्तहरीं क्रिया आनाहेपिच
कुर्वीत विशेषश्चाभिधीयते
विष्टस्त्रसारहरीतक्यो वतःपंच
भागिकाः गुडेन तुल्या वर्ति
का हरेत्सानाहमुल्वणां वर्त्ति
स्तिकटु सैंधव सर्षपगृहधू
म कुष्ठ मदनफलैः मधुनि
गुडेवा पक्वे निहिता स्वांगुष्ठ
परिमाणाः वर्त्तिरियं हृष्टफ
लाशनैः प्रणिहिता गुदेहि
भ्यक्ते आनाहोदावर्त्तौ शाम
यति जवरं तथा गुल्मं त्रिक
टुकाद्यावर्त्तिः इतिभावप्र
काशः विष्टंभा न त्रि विष्टम्भरो
गजनकः यथा वेदला गुरवो
भत्या विष्टंभि स्रष्ट मारुताः
इति राजवल्लभः विष्टम्भरोग
विशिष्टश्च विष्टरः पुं विटपी
दर्भमुष्टिः पीठाद्यासनं इत्यम
रः आदिनाकुशासनादिग्रहः
इतिभरतः विष्टर तलगामार
विष्टरस्तसार्द्ध हिन्य वामाव
र्त वलितायोमुख्याग्रा प्रसंख्या
त दर्भाः तथाचरत्नासंग्रहःउ
र्द्ध केशो भवेद्ब्रह्मा लम्बकेशा
स्तु विष्टरः दक्षिणावर्त्तकाब्रह्मा
वामावर्त्तस्तु विष्टरः इति छन्दोग
परिशिष्ट दर्भे

संख्यानविहिता विष्टरास्तरणे
ष्वपि एवंच पंचाशद्भिर्भवेद्
ब्रह्मा तदर्द्धेन तु विष्टरः इतिय
दि सस्तूलं तदा शाखान्तरीयं
पतेन विष्टरे पंचविंशतिसंख्या
भवदेव भट्टोक्ता निरस्ता एवंवि
ष्टर ग्रहणाहस्ताभ्या मपि पडङ्क
तदपि निरस्तं यत्रोपदिष्टपतेक
मे कर्त्त रंगन चोद्यते दक्षिणा
स्तत्र विज्ञेयः कर्मणा पारगःक
रः इति छन्दोगपरिशिष्टात् इति
संस्कारतत्त्व ॥
विष्टरश्रवाः पुं विष्णुः इत्यमरः
विष्टरा स्त्री गुंडासिनी इतिराज
निर्घंटः ॥
विष्टरूहा स्त्री स्वर्णकेतकी इ
ति राजनिर्घंटः ।विष्टारुहाउ
त्तिचक्रचिन्माठः ॥
विष्टारः पुं छंदोविशेषः यथा
विष्टारः पंक्तिच्छंदः इति षत्व
प्रकरणे दुर्गादासः ॥
विष्टिः स्त्री वेतनं विना हठाद्वा
रोहहस्तादिक्लेशः वेगार इति
ख्यातः तत्पर्यायः आज्ञः २
इत्यमरः हठादस्थतिकः क्लेशो
विजातकृपा विष्टिरितिभरतस्वा
मी हे वेतन मन्तरेण कर्म कारण
कर्म

कारिणि चेतन्ये त्रिष्ठु कर्मकरे
विशिष्टिः स्त्रिया मभ्रति कर्मणीति
रुद्रः इतिभरतः वेतनं । कर्म
इति मेदिनी भद्रा वर्षणं ।
इतिविश्वः प्रेषणं इति हेमचं
द्रः साच भद्रा ववाद्येकादशक
रणान्तर्गत सप्तम करणं ।
पंजिकायां तस्या अंके शून्यं।
यथावव वालव कौलव तैतिल
गर वनिजाःसविष्टयःसप्त शाकु
निचतुष्पन्नागाः किंस्तुघ्नश्च ध्रुवा
णि करणानि शाक्रादि तिथि
शेषाद्वांतक्रमेण स्यु रष्टाद्व्याव
वादयः पक्षदश्या श्चतुर्थ्याश्चशे
षार्द्धे शुक्लपक्षेक अष्टमी पौर्णमा
स्याश्च पूर्वार्द्धे विष्टिरीरिता कृष्ण
पक्षे तृतीयाया दशम्याश्च परार्द्धे
तः सप्तम्याश्च चतुर्दश्याः पूर्वार्द्धे
विष्टि संभवः विहाय विषयोद्रा
णि विष्टिं सर्वत्र वर्जयेत् ।
विष्टिशेषे त्रिदंडे हि पुच्छे कार्यं
जयावहं कर्मप्रकाशे नाशस्तु
पंच वदने गलक स्तथे कावेता
दशैकसहिता नियतं चतस्रः ।
नाभिः कटिः षट्च पुच्छतनाच
तिस्रो विष्टे ध्रुवं निगदितांग

विभाग पपः मुखे कार्यक्षति
र्भवति मरणं चास्य गलके धनता
निर्वक्त्रस्य कटितटे बुद्धि विलयः
कलितोभीदशो विजय मथ पुच्छे
वजगहः शरीरे भद्रायाः इत्यंगि
तिफलं इत्येवंशनयोः मन्त्र वसव
नि तिथि युग दश शिव गुणासे
व्यास्त तिथिषु पूर्वाद्याः ।४।८।११
।५।४।१०।३। आयाति विष्टि
रेषा हृष्टे शुभदा दुरस्त्वशुभदा
पूर्वाद्याः पूर्वाद्यादि दिक्षुखी
भवति इत्यर्थः ॥ पक्षेन हीना
द्विगुणा तिथिस्तु सप्तावशिष्टं
करणंक्वादि पूर्वे परे पवमर्यादि
शेषो द्विसंगुणा चेद् विवर्जिता
च किंस्तुघ्न सं करणं प्रविष्ट
मादे स्थितिये रात्रि दले सदैव उ
पांत्य शेष शाकुनिस्तु दर्शे पूर्वे
चतुष्पादपरे च नागः ॥ इंद्र
कमलज विज्ञार्यम भूप्रियः स
यमाववादेः कलिदृषफणि
मारुताः पतयः शाकुन्यादेः व
वाद्यधिपकथनं पौष्टिक स्थिर
शुभानि ववाख्ये वालवे द्विज
हिताद्यपि कर्म कौलवे प्रम
द मित्र विधानं तैतिले शुभगा
ताश्रयकर्मगरेच वीजाश्रयक

षेणानि वाणिज्यपि स्थैर्यवाणिक
क्रियाच नसिद्धिमाप्नोति कृतंच
विष्टौ विषाभिघातादिषु तन्नृसि
द्धिः मंत्रौषधानि शाकुनोचसर्पो
ष्टिकानि गोविप्र राज्य पित्र्यकर्म
वत्सयदेत् सौभाग्य दारुणाकृ
ति ध्रुव कर्मनाशे किंतद्भ्रं नास्ति
शुभपौष्टिकमंगलानि इतिज्यो
तिस्तत्वे विष्टिः त्रि कर्मकरः इ
ति मेदिनी विष्ठलं क्ली दूरस्था
नं यथा विऊ शामि परिभ्यःस्थ
लस्य पथ्यस्थलस्य सस्य यःस्था
त् विष्ठलं ऊष्ठलं शामिष्ठलंप
दिष्ठलं इतिसिद्धांतकौमुदी॥
विष्ठा स्त्री विविधप्रकारेणाद
देतिष्ठति या तत्पर्यायः उच्चारः
२ अवस्करः ३ शमलं ४ शकृ
त् ५ गूथं ६ पुरीषं ७ वर्चस्कं
८ विट् ९ इत्यमरः वर्चः १० इति
जटाधरः अमेध्यं ११ हूयं १२
कल्लं १३ मलं १४ इतिशब्दरत्ना
वली किट्टं १५ इतिकं १६ इति
राजनिर्घंटः तद्दर्शननिषेधो
यथा नवस्त्रां स्त्रिय मीक्षेत पु
रुषं वाकदाचन नच मूत्रं पुरी
षं वानच संस्पृष्टं मैथुनं जलेन
उत्सर्गनिषेधो यथा नाप्सुःक्रीडे

न्नधावेत नाप्सु विण्मूत्र माचरेत
नोच्छिष्टः संविशेन्नित्यं न नग्नः
स्नान माचरेत इति कौर्मे उप
रिभागे १५ अध्यायः ॥ त
दुत्सर्गविधानं पुरीष प्रातःकृत्य
शब्दयो द्रष्टव्यं ॥
विस्मः पु अग्निः इति शब्दमा
ला शुद्धः वसुदेवता इति धर
णी धर्मशास्त्रकर्त्ता मुनिविशेषः
यथा मन्वत्रि विष्णु हारीत याज्ञ
वल्क्योशनोऽङ्गिराः यमापस्तम्ब
सम्वर्त्ताः कात्यायन बृहस्पती परा
शर व्यास शंख लिखिता दक्षगो
तमौ शातातपो वशिष्ठश्च धर्म
शास्त्रप्रयोजकाः इतियाज्ञवल्क्य
संहिता ब्रह्मणोरूपविशेषः तस्य
ब्युत्पत्ति यथा वेवेष्टि व्याप्नोति
विश्वंयः वेषयतिसिंचति आप्या
यते विश्वमितिवा विशति वि
युनक्ति भक्तान्मायापसारणेन सं
साराहिति वाविशति सर्वभूतानि
विशंति सर्वभूतानि अत्रेतिवा
यस्माद्विश्वमिदं सर्वं तस्य शक्त्या म
हात्मनः । तस्मादेवोच्यते
विष्णु विशधातोः प्रवेशनात
इति विष्णुपुराणं॥
इत्यमरः टीकायां भरतः ॥

4737

तत्पर्यायः नारायणः २ कृष्णः
३ वैकुंठः ४ विष्टरश्रवाः ५ दामो
दरः ६ हृषीकेशः ७ केशवः ८
माधवः ९ स्वभूः १० दैत्यारिः ११
पुंडरीकाक्षः १२ गोविन्दः १३ ग
रुडध्वजः १४ पीताम्बरः १५ अच्युतः
१६ शार्ङ्गी १७ विष्वक्सेनः १८ ज
नार्दनः १९ उपेंद्रः २० इंद्रावरजः
२१ चक्रपाणिः २२ चतुर्भुजः २३ पद्म
नाभः २४ मधुरिपुः २५ वासुदेवः
२६ त्रिविक्रमः २७ देवकीनंदनः२८
शौरिः२९ श्रीपतिः ३० पुरुषोत्तमः
३१ वनमाली ३२ बलिध्वंसी ३३ कं
सारातिः ३४ अधोक्षजः ३५ विश्वं
भरः ३६ कैटभजित् ३७ विधुः
३८ श्रीवत्सलांछनः ३९ इत्यमरः
पुराणपुरुषः ४० हंसिः ४१ प्रात
धामा ४२ गदाग्रजः ४३ एकशृंगः
४४ जगन्नाथः ४५ विश्वरूपः ४६ स
नातनः ४७ मुकुंदः ४८ राहुभेदी ४९
वामनः ५० शिवकीर्तनः ५१ श्रीनि
वासः ५२ अजः ५३ वासुः ५४ इतिज
टाधरः श्रीहरिः ५५ कंसारिः ५६ नृ
हरिः ५७ विभुः ५८ मधुजित ५९ म
धुसूदनः ६० कांतः ६१ पुरुषः ६२
श्रीगर्भः ६३ श्रीकरः ६४ श्रीमान्
६५ श्रीधरः ६६ श्रीनिकेतनः ६७
श्रीकांतः ६८ श्रीशः

६९ प्रभुः ७० मुरलीधरः ७१ जग
दीशः ७२ गदाधरः ७३ नंदात्मजः ७४
नरसिंहः ७५ ईशः ७६ गोपालः
७७ नंदनंदनः ७८ नरकजित ७९
सामगर्भः ८० अजितः ८१ जिता
मित्रः ८२ सत्यधामा ८३ शशबिंदुः
८४ पुनर्वसुः ८५ आदिदेवः ८६
श्रीवराहः ८७ सहस्रवदनः ८८
त्रिपा ८९ ऊर्द्धदेवः ९० हरिः ९१ गर
भुः ९२ यादवः ९३ अरिष्टमर्दनः ९६
शतनाभि ९५ सदायोगी ९६ ध्रुवः ९७
चाणूरसूदनः ९८ हेमशंखः ९९ शा
लावली १०० कालनेमिरिपुः १०१
धेनुकारिः १०२ सोमसिंधुः १०३
विरिंचिः १०४ धरणीधरः १०५ वृ
षभो १०६ वर्द्धमानः १०७ शालाव
टः १०८ वृषांतकः १०९ मधुरेशः ११०
हारकेशः १११ रतिदेवः ११२ वृषा
कपिः ११३ इति शब्दरत्नावली
जिष्णुः ११४ दाशार्हः ११५ अब्धि
शयनः ११६ इंद्रानुजः ११७ नरा
यणः ११८ जलशायः ११९ यज्ञ
पुरुषः १२० ताक्ष्यध्वजः १२१ ग
रुविन्दुः १२२ पद्मेशाः १२३
विभुः १२४ माजः १२५ जिनः १२६
ऊर्मादकः १२७ जन्हुः १२८ बभ्रुः १२९
सत्तावर्तः १३० मुंजकेशी १३१ व
भ्रुः १३२ वेधाः १३३ प्रश्निशृंगः १३४

आत्मभूः ३५ पांडुवायनः १३८ स
वर्णाविंड १३७ श्रीवत्सः १३८ देवकी
सुतः १३९ गोपेंद्रः १८० गोवर्द्धनध
रः १८१ यदुनाथः १८२ गदाभृत् १८३
शार्ङ्गभृत् १८४ चक्रभृत् १८५ श्री
वत्सभृत् १८६ शंखभृत् १८७ श्रीस
वध्यादयो यथा मधुधेनुक चाणू
र पूतनायमलार्जुनाः कालनेमि
हयग्रीवशाकटारिष्ट कैटभाः कं
सःकेशिमुरो साल्व मैंदे द्विविदा
हुः हिरण्यकशिपुर्वाणः का
लीयो नरको बलिः शिशुपा
लश्चास्य वध्यावेनतेयस्यवाहनः
शंखोऽस्यपांचजन्योऽकः श्रीव
त्सोऽसिस्तुनंदकः गदा कौमो
दकी चापं शार्ङ्गं चक्रं सुदर्शनः
मणिःस्यमन्तको हस्ते भुजमध्ये
तु कौस्तुभः इति हेमचंद्रः त
स्यातननामानि पद्मोन्नरखंडे ॥
ग्रध्याये सहस्रनामानि च महा
भारतीय शान्तिपर्वणि द्रष्टव्या
नि अस्य मंत्रोवर्णाश्च यथास
रमाये द्वितीयेच उपास्य वा
लमेवच वासुदेवोबलःकामो
ऽनिरुद्धो यथाक्रमंप्राणवत्त
स्त्रिरूपितत् ॐसौ भूरिति म
न्त्रकाः नारायण स्तथाब्रह्मा
विस्वःसिंहो वराहराड् सिता

रुणा हरिद्रा नीलस्यामललोहि
ताः मेघाग्नि मधु पिंगाभा वर्णाना
नव नायकाः अस्यांगानि तेषां
मंत्रवर्णाश्च यथा केटं वे शा
गरुन्मानेस्याञ्जे खं वंच सुदर्शनं
खंचं कंचं गदास्त्रीरं नं मंडच
शंखकं यं टं भे हं भवेच्छ्रीश्च
गं जं वं संच पुष्टिकं धं वं सं
वनमालास्याच्छ्रीवत्सं सं दं नं भ
वेत् छंभं पं कौस्तुभः प्रोक्तश्चा
नंतो हात मेवच अस्यगानिपथा
योगं देवदेवस्य वेदृश ॥
गरुडोऽम्बुजसंकाशो गदाचेवासि
ताकृतिः पुष्टिःशिरीष पुष्पाभाल
क्ष्मीः काचनसन्निभा शंखाचेन्दुनि
भः शांखः कौस्तुभ स्त्वरुणद्युतिः
चक्रंसूर्यसहस्राभं श्रीवत्सः कुन्द
संनिभः विद्युद्रुपाणि चास्त्राणि
यानि नोक्तानि वर्णकान्ताःवन
पंचवर्णा मतामालाप्यनन्तो मेघसंनिभः
इतिगारुडे ॥ अध्यायः तस्यज
गत्पालनादि यथा रजोगुण मयं
चान्यरूपं तस्यैवधीमतः चतुर्मुखः
सभगवान्जगत्सृष्टौ प्रवर्तते ॥
सृष्टंच पाति सकलं विश्वात्मावि
तो भुवः सत्वं गुण मपाश्रित्यवि
स्वविष्णुश्वरःस्वयं अन्तकाले स्वयं

4739

देवः सर्वात्मा परमेश्वरः तमो
गुणं समाश्रित्य रुद्रः संहरतेज
गत् एकोपि सन्महादेव स्त्रि
धासौ समवस्थितः सर्गरक्षालय
गुणैर्निर्गुणोपि निरंजनः एकः
सन्सद्विधा चैव त्रिधाच वहुधा
पुनः त्रिधा विभज्य चात्मनं त्रैलो
क्येसंप्रवर्तते सृजते वीक्षते चैव
ग्रसते च विशेषतः यस्मात्सृष्ट्वा
नुगृह्णाति ग्रसते च पुनः प्रजाः
गुणात्मकत्वात्रैलोक्ये तस्मादेकः
सउच्यते अग्रे हिरण्यगर्भे सप्रादु
र्भूतः सनातनः आदित्वादादि
देवो सा वजातत्वादजःस्मृतः दे
वेषुच म हादेवो महादेव इति
स्मृतः पाति यस्मात्प्रजाः सर्वाःप्र
जापति रिति स्मृतः बृहत्वाच्च
स्मृतो ब्रह्मा परत्वात्परमेश्वरः।
वशित्वादप्यवश्यत्वादीश्वरः परि
भाषितः ऋषिः सर्वत्रगत्वेन हरिः
सर्वहरो यतः अनुत्पादात्तथात्त
पूर्वात्स्वयंभूरिति सस्मृतः ।
नराणा मयनं यस्मात्तस्मान्नाराय
णःस्मृतः हरःसंसारहरणाद्विभु
त्वाद्विष्णुरुच्यते भगवान्सर्वविज्ञा
नादवनादो मिति स्मृतः सर्वज्ञः
सर्वविज्ञानात्सर्वः सर्वमयोयतः।

शिवःस्यान्निर्मलो यस्माद्विभुःस
र्वगतो यतः तारणात्सर्वदुःखा
न्नोतारक परिगीयते वहुनात्र
किमुक्तेन सर्वं विस्नुमयं जगत्
इति कौर्मे ४ अध्यायः ॥ अ
पिच मत्स्यउवाच महाप्रलय
कालान्त एतदासीत्तमोमयं प्र
सुप्तमिव चातर्क्यमप्रज्ञातमल
क्षणं अविज्ञेय मविज्ञातं जग
त्स्यास्नु चरिस्नुच ततःस्वयंभु
रव्यक्तःप्रभवः पुण्यकर्मणां व्य
ञ्जयन्नेतदखिलं प्रादुरासीत्तमो
नुदः योऽतींद्रियःपरो व्यक्तादणु
र्ज्यायान्सनातनः नारायण इति
ख्यातः सएव स्वय मुद्बभौ स्वश
रीरादभिध्यायत्सिसृक्षु र्विविधं
जगत् अपएव ससर्जादौ तासु
वीजमवासृजत् तदेवांडंसम
भवद्धेम रूप्यमयं महत् सम्व
त्सर सहस्रेणाप्यसूर्यायुत समप्रभं
प्रविश्यांते महातेजाः स्वयमेवा
त्मसंभवः प्रभावादपि तद्व्याप्त्या
विस्नुत्व मगमत्पुनः इतिमात्स्ये २
अध्यायः अस्य तिस्रो मूर्तयो यथा
सृष्टि स्थित्यन्तकरणात्व्रह्मविस्नु
शिवात्मिकाः ससंज्ञां याति भग
वान् एक एव जनार्दनः अस्यावे

सृजते चैव विष्णुत्वे पाति निस्
शः रुद्रत्वे चैव संहर्त्ता एको देव
स्त्रिधा स्थितः स एव स्रष्टा स च
सर्गकर्त्ता स एव पाता सम्पाल्य
ते च ब्रह्माद्यवस्थाभिरशेषमू-
र्त्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः
इति वह्निपुराणे सर्गानुशास
न नामाध्यायः नारायणस्यमू
र्त्तिविशेषो यथा योऽसौ नारा
यणो देवः परात्परतरोऽव्यय तस्य
चिन्ता समुत्पन्ना सृष्टिं प्रति नरो
त्तम सृष्ट्वा चेयं महासृष्टिः पा
लनीया मयैवह कर्मकाण्डत्वम्
त्वेन कर्त्तुं नैवेह शक्यते तस्मा
न्मूर्त्तिं सृजाम्येकां ययापाल्यमिदं
जगत् एवं विचिन्त्य तत्तस्य सत्वा
भिध्यायितो रूप प्राकृष्टिजा
तं राजन्वै मूर्त्तिमत्तस्यैव भौ।
द्भूते भूते तत्र तस्मिन्देवोना
रायणः स्वयं प्रविष्टोऽतद्दर्शा
द्य त्रैलोक्ये तस्य देहतः ततः
तस्मात् भगवान्वरदानं पु
रातनं वागादीनां तत्त्वरूपधा
दाता स पुनर्वरं सर्वतः सर्वक
र्त्ता त्वं सर्वलोकनमस्कृतः त्रैलो
क्यप्रतिपालश्च भव विष्णुः सना
ततः देवानां सर्वदा कार्यकर्त्तव्यं ब्र
ह्माणस्तथा सर्वतश्च भवततव

देवनमस्तथा यः एवमुक्त्वा ततो दे
वः प्रकृतिस्थो बभूव ह विष्णु
रप्य पुनाः पूर्वां बुद्धिं सस्मार स प्र
भुः तदासेचित भगवान्योगनि
द्रां महातपाः तस्यां संस्थाप्य भगवा
न् इन्द्रियार्थोद्भवाः प्रजाः ध्यात्वा
परेण रूपेण ततः स्वाप्याप वैप्रभुः
तस्य स्वमस्य जठरान्महत्पद्मं वि
निःसृतं सप्तद्वीपवती पृथ्वी ससमु
द्रा सकानना तस्य मूलस्य विस्ता
रं पातालतलं संस्थिते कर्णिका
यां तथा मेरुस्तन्मध्ये ब्रह्मणो भवः
एवं दृष्ट्वा परं तस्य पार्श्वे स्वतस्तं
भवं शुभदे तच्छरीरस्योपायु
र्वायुसमं सृजत् अथ य विज्ञय
चेमं शङ्खरूपेण धारय ।
प्रज्ञानेच्छुद्रनाद्याय खड्गं तेजस्तु
तथाकरे कालचक्रमयं चोरश्च
क्रंतं धारयाच्युत प्रथमराजश्चा
लार्थ्यं गदां धारस्व केशव मालेयं
भूतमाला ते कण्ठे तिष्ठतु सर्वदा श्री
वत्सकौस्तुभौ चैमौ चन्द्रादित्यच्छ
लेनह मारुतस्ते गति वीरः गरु
त्मांस्तव कीर्त्तितः त्रैलोक्यगामि
नी देवी लक्ष्मी स्तेस्तु सदाप्रिया
द्वारश्रीच तिथिस्तेस्तु कामरू
पी च जायते हुताशनो भवे.

यस्तु द्वादश्यां तमाराधयाः स्वर्ग
वासीस भवतु पुमान्स्त्रीवा विशे
षतः एष विष्णुस्त्वयाख्यातो मूर्त्त
यो देव दानवाः इति पाति शा
रीराणि सृजन्नन्यानि चात्मनः यु
गे युगे सर्वेषां वेदान्ते पुरुषोत्तम्
यं नहीनबुद्ध्या वक्तव्या मनुष्यायं
कदाचन इति वाराहे परापरनि
र्णय नामाध्यायः ब्रह्म विष्णुशि
वानामेकत्वं यथा । ततो ब्रह्मा
शरीरं तत्त्रिधा चक्रे महेश्वरः ।
प्रधानेच्छावलाच्छम्भो त्रिगुणं त्रि
गुणीकृते तदूर्द्ध्वभागः संजातस्तत
वक्त्रश्चतुर्भुजः स्फटिकाभ समः
कायः शुक्लःसचेन्द्रशेखरः ईशा
स्ततो ब्रह्मकाये सृष्टिशक्तिं न्ययो
जयत् स्वयमेवाभवद्ब्रह्मा ब्रह्मरू
पेण लोकभृत् ॥ स्थितिशक्तिं
निजां मायां प्रकृत्याख्यां न्ययोजय
त् महेशो वैष्णवे काये ज्ञानश
क्तिं निजां तथा स्थितिकर्त्ताभ
वद्विष्णु रह मेव महेश्वरः सर्वश
क्ति नियोगेन सदा तदुपता मम
न्तशक्तिं तथा काये शम्भुकेस
न्ययोजयत् अन्तकर्त्ता भवच्छम्भुः
स एव परमेश्वरः अत स्त्रिषु शा
रीरेषु स्वयमेव प्रकाशते ज्ञानरूपं

परं ज्योति रणादि भगवान्प्रभुः
सृष्टि स्थित्यन्तकरणादेक एव म
हेश्वरः ब्रह्मा विष्णुः शिव श्चेति
संज्ञामाप पृथक्पृथक् अतस्त्वं
च विधाताच तथाहमपि न पृथ
क् एवं शारीरं रूपं च ज्ञानमस्मा
कमेतत् इति कालिकापुराणे १२
अध्यायः अन्यच्च गुणातीतः
स भगवान् व्यापकः पुरुषः परः
अनन्तभोगशायी च पद्मनाभि कमला
दम्भूत विष्णुश्च स च गोविन्द ई
श्वरश्च सनातनः यस्तु वेद महा
त्माने सञ्जीवन्मुक्त उच्यते इति
वामनपुराणे ४२ अध्यायः तेन
गजेन्द्रमोक्षणं यथा पुलस्त्य उ
वाच भक्तिं तस्याश्च संचिन्त्य ना
गस्यामोघदर्शनः प्रीतिमानभ
वद्विष्णुः शङ्खचक्रगदाधरः सा
न्निध्यं कल्पयामास तस्मिन्सरसि
केशवः गरुडस्थो जगन्नाथो लो
काधारस्तपोधनः ग्राहग्रस्तं ग
जेन्द्रं तं तस्माद्वै जलाशयात् उ
ज्जहाराप्रमेयात्मा तरसा मधुसूदनः
स्थलस्थं दारयामास ग्राहं चक्रे
ण माधवः मोक्षयामास नागेन्द्रं
पापेभ्यः शरणागतं सहि देवल
शापेन हूहू गन्धर्वसत्तमः ग्रा

स्तव मगामतक्रस्माद्धरं शापादिवं
गतः गजोपि विस्नुना स्पृष्टोन्जातो
दिव्यवपुःमान् इति वामनपुराणे
८८ अध्यायः अस्य मंत्र इत्यादि
येथा अस्य वसे महामंत्रान्वि
ष्णोःसर्वार्थसाधकान् यस्यसं
स्मरणान्सेतो भवाब्धे पारमा·
श्रिताः तारेनमःपदे चुपान्तेरो
दीर्घसमन्वितो पवनोनाय मं
त्रोयं प्रोक्तो वस्वक्षरःपरः ॥
अस्यपूजाप्रयोगः प्रातःकृ·
त्यादि स्नानांते कर्मकृत्वापूजा
मंडप मागम्य वेस्नवाचमनं
कुर्यात् तद्यथागोतमीये के
शवाद्यैस्त्रिभिःपीत्वा द्वाभ्यांप्र
क्षाल्येत्करौ द्वाभ्यांमोष्ठौ चसं
मृज्यद्वाभ्यां मृज्यान्मुखं ततः
एकेनहस्तं प्रक्षाल्य पादावपि
तथैककः संप्रोक्षेकेन मूर्द्धानंत
ततः संकर्षणादिभिः आस्यना
साक्षि कर्णोश्चनाभ्युरस्कभु·
जौ क्रमात् स्पृशेदेवंमवेदाचम
नंच वैस्नवान्वये एवमाचमनंकृ
त्वा साक्षान्नारायणोभवेत् केश
वादयस्तु केशवनारायणमा
धवगोविन्द विस्नुमधुसूदन त्रि
विक्रम वामन श्रीधर हृषीकेश
पद्मनाभ दामोदर संकर्षणवसु

देव प्रद्युम्नानिरुद्ध पुरुषोत्तमाधो
क्षज न्रसिंहाच्युत जनार्दन उपेन्द्र
हरि विस्नवः वाक्यन्तु प्रणवादि
केशवाय नम इत्यादि तथाच
सवर्तथी नमोन्तेश्च नामभि र्विस्
सेत्स्वधीः ततःसामान्यार्घ्यादिमा
त्रकान्ते कर्मविधाय केशवकीर्त्या
दिन्यासंकुर्यात् । अस्यऋष्यादि
न्यासः शिरसि प्रजापतये ऋषयेन
मः मुखे गायत्रीछन्दसेनमः हृदि
श्रद्धलक्ष्मीहरये देवतायैः ततःक
रांगन्यासो श्रीं अंगुष्ठाभ्यांनमः इत्या
दि श्रींहृदयाय नमइत्यादि तथाच
गोतमीये ऋषिःप्रजापतिश्छंदोगा
यत्री देवता पुनः श्रद्धलक्ष्मीहरिः
प्रोक्तः श्रींबीजेन षडङ्गकं ॥
ततो ध्यानं उद्यत्प्रद्योतनशतरुचिं
समस्तेमावदातं पार्श्वद्वंद्वेजलधिसु
तया विश्वधाम्याच पुष्टं नानारत्नो
ल्लसित विविधाकल्प मापीतवस्त्रं
विस्नुं वंदे दर कमलकौमोदकी
चक्रपाणिं ॥
एवंध्यात्वान्यसेत् यथा । अं
केशवायकीर्त्यै नमः ललाटे ।
वर्णानुक्त्वा सार्द्धचन्द्रान्स्वरान्त्वा·
दिनादि दर्शानान्त्सर्वत्र सा
नुस्वारः श्रीं नारायणाय

कान्त्यै नमो मुखे इं माधवा
य तुष्ट्यै नमो दक्षनेत्रे ईं गोविं
दाय पुष्ट्यै नमो वामनेत्रे उं
विस्नवे धृत्यै दक्षकर्णे ऊं मधु
सूदनाय शान्त्यै वामकर्णे ऋं त्रि
विक्रमाय क्रियायै दक्षनासापु
ॠं वामनाय दयायै वामनासापुटे टे लृं श्रीधराय मेधायै दक्षगं
डे। लॄं हृषीकेशाय हर्षायै वाम
गंडे एं पद्मनाभाय श्रद्धायै ओष्ठे
ऐं दामोदराय लज्जायै अधरे ।
ओं वासुदेवाय लक्ष्म्यै ऊर्द्ध्वदंतपं
क्तौ औं संकर्षणाय सरस्वत्यै अ
धो दंतपंक्तौ अं प्रद्युम्नाय प्री
त्यै मस्तके अः अनिरुद्धाय रत्यै
मुखे कं चक्रिणे जयायै खंगदि
ने दुर्गायै गं शार्ङ्गिणे प्रभायै
घं खड्गिने सत्यायै ङंशंखिनेचं।
डायै दक्षकरमूल संध्यग्रकेषु चं
हलिने वाण्यै छं मुषलिने वि·
लासिन्यै जं शूलिने विजयायै
झं पाशिने विरजायै ञं अंकुशि
ने विश्वायै वामकरमूल संध्यग्रके
षु टं मुकुन्दाय विनदायै ठं नंद
जाय सुनंदायै डं नंदिने स्मृत्यै ढं
नराय ऋद्ध्यै णं नरकजिते सम
द्ध्यै दक्षपादमूल संध्यग्रकेषु तं हर

ये शुद्ध्यै थं कृष्णाय बुद्ध्यै दं
सत्याय भुक्त्यै धं सात्वताय मत्यै
नं सौराय क्षमायै वामपादमूल
संध्यग्रकेषु पं शूराय रमायै दक्ष
पार्श्वे फं जनार्दनाय उमायै वाम
पार्श्वे बं भूधराय क्लेदिन्यै पृष्ठे
भं विश्वमूर्तये क्लिन्नायै नाभौ
मं वैकुण्ठाय वसुदायै उदरे यं त्वगा
त्मने पुरुषोत्तमाय वसुधरायैहृ
दि रं असृगात्मने बलिने परायै
दक्षांशे लं मांसात्मने बलानुजा
य परायणायै ककुदि वं मेद
आत्मने बलाय सूक्ष्मायै वामांशे
शं अस्थ्यात्मने वृषघ्नाय संध्यायै
हृदादि दक्षकरे षं मज्जात्मने
वृषाय प्रज्ञायै हृदादि वामक
रे सं शुक्रात्मने हंसाय प्रभायै
हृदादि दक्षपादे हं प्राणात्मनेव
राहाय निशायै हृदादि वामपा
दे लं जीवात्मने विमलाय अ
मोघायैहृदाद्युदरे क्षं क्रोधात्मने
नरसिंहाय विद्युतायै हृदादिमुखे
इतिन्यसेत् तथाच गोतमीये
केशवादि वर्णन्यासो न्यासमात्रे
णदेहिनां अच्युतत्वं ददात्येव स
त्यं सत्यं सत्यं नसंशयः मातृकार्णं
समुच्चार्य्य केशवा इति स्मरेत् की

यैच नमसा युक्त मित्यादिना
समाचरेत् केशवाय ततः की
र्त्यै कांत्यै नारायणायच इत्याय
गस्त्यसंहिता वचनाद्यायंक्रमः
ततकेशव कीर्त्तिभ्यांनम इति
तथा भुक्तिमुक्ति मिच्छता श्र
यं न्यासः कर्त्तव्यः श्रीबीजादि
कः यथा श्रीं श्रं केशवाय की
र्त्यै नमइत्यादि तथा चगौतमी
ये एवं प्रविन्यसेद्यासंलक्ष्मीबी
जपुटसंयुतं स्मृतिं धृतिं महाल
क्ष्मी प्राप्नोति हरितां व्रजेत् ॥
ततस्तत्वन्यास पीठन्यासकर
न्यादिन्यास विष्णुपंजरादिन्या
सान्कुर्यात् तत्वन्यासायस्तुय
स्यागौरवभिया नोक्ताः ततो
ध्यायेत् उद्यत्कोटि दिवाकरा
भ मनिशं शंखं गदां पंकजं
चक्रं बिभ्रत मिन्दिरा वसुमतीसं
शोभिपार्श्वद्वयं कोटीरांगद हा
र कुंडलधरं पीताम्बरं कौस्तुभो
दीप्तं विश्वधरं पीतास्वहु कौस्तु
लसि लसत श्रीवत्सचिह्नं भजे
एवं ध्यात्वा मानसैः संपूज्य शंख
स्थापनं कुर्यात् तत्रवैसव पात्रे
गौतमीये ताम्रपात्रंतु विप्रर्षे विशे
षतः प्रियं मतं तथैव सर्वपात्राणां
मुख्यं शांखमकीर्त्तितं तस्मात् चैवत

तथा प्रोक्तं
स्वर्णे वा राजतं तथा पंचपा
त्रं हरेः शुद्धं नान्यतत्र नियोजयेत्
नैवेद्यदाने तु तत्रैव ॥ स्वर्णे
वा ताम्रपात्रे वा रौप्यवा पंकजे
दले आगमकल्पद्रुमे हेरण्यरा
जतं कांस्यं ताम्रं मृन्मय मेववा
पालाशंपद्मीहरे पात्रं नैवेद्यकल्प
नेहुयः पुरश्चरणचंद्रिकायांसव
र्णे राजते रैत्ये इत्यादि ॥
ततः सामान्यपीठपूजानंतरं वि
मलादि शक्ति सहितपीठ मन्त्र
ते पूजां कृत्वा पुन ध्यात्वा मू
लेन कल्पित मूर्त्तावावाहनादि
पंचपुष्पांजलिदान पर्यन्त विधा
य आवरण पूजांकुर्यात् अग्न्या
दि चतुष्कोणेषु दिक्षुच ॐ क्रुद्धो
ल्काय हृदयायनमः इत्यादिना
पूजयेत् ततः केशरेषुपूर्वादि
ॐ नमः नं नमः मों नमः
नां नमः रां नमः यं नमः णां
नमः यं नमः ततो दले पूर्वादि
दिक्षु ॐ वासुदेवाय नमः एवं
संकर्षणाय प्रद्युम्नाय अनिरुद्धा
य अग्न्यादि कोणदलेषु ॐ शान्त्यैनमः
एवं श्रियै सरस्वत्यै रत्यै ततः पत्राग्रे
षु पूर्वादि ॐ चक्राय नमः एवं शं
खाय गदायै पद्माय कौस्तुभाय
मुषलाय खड्गाय वनमालायै

4795

तदहिरये ॐ गरुडाय नमः इति
णे ॐ शंखनिधये नमः वामे
ॐ पद्मनिधये नमः पश्चिमे ॐ
ध्वजाय नमः अग्निकोणे ॐ विघ्ना
य नमः नैर्ऋते ॐ आर्यायैनमः
वायु कोणे ॐ दुर्गायै नमः ईशा
ने ॐ सेनान्यैनमः एवं सर्वत्र त
दहिरिन्द्रादीन्वज्रादींश्च पूजयित्वा
धूपदीपौ दत्वा नैवेद्यं दद्यात् यथा
नैवेद्यमानीय देवताये मूलेन
पाद्यार्घ्याचमनीयं दत्वा फडिति
मंत्रेण नैवेद्यं संप्रोक्ष्य चक्रमुद्र
याभिरक्ष्ययमिति मंत्रेण दोषस
मूहं संशोष्य रमिति दोषं संद
ह्य वामकरस्योपधारामिपूर्णोऽव
मिति संदह्य वामकरस्योपधारा
भिपूर्णं वमिति मंत्रेणामृती
कृत्य मूलमंत्रं मष्टधा जपेत्
ततो व मिति धेनु मुद्रयामृती
कृत्य गंधपुष्पाभ्यां संपूज्य कृतां
जलिः सन्हरिं प्रार्थयेत् अस्य
मुखतो महः प्रसवदिति विभा
व्य स्वाहान्त मूल मुच्चार्य नैवेद्ये
जलं दद्यात् ततो मूल मुच्चार्य प
तन्नैवेद्यं अमुक देवतायै नमः
ततो नैवेद्यंहस्ताभ्यामुद्धृत्य ॐ निवे
दयामि भवते जुषाणेदं हविर्हरे
इति नैवेद्यं समर्प्य अमुक देवतायेप
तज्जलं ममृतोपस्तरणम

मसीति जले दत्वा वामहस्तेन ग्रा
समुद्रां प्रदर्श्य दक्षिणहस्तेन
प्राणादि मुद्राः प्रदर्शयेत् य
था ॐ प्राणाय स्वाहेति कनि
ष्ठानामिके अंगुष्ठेन स्पर्शयेत्
ॐ अपानाय स्वाहेति तर्जनी म
ध्यमे अंगुष्ठेनस्पर्शयेत् ॐ व्याना
उदानाय स्वाहेति तर्जनी मध्य
मानामा अंगुष्ठेन स्पर्शयेत् ॐ
उदानाय स्वाहेति तर्जनी मध्य
मानामा अंगुष्ठेन स्पर्शयेत् ॐ
समानाय स्वाहेति सर्वांगुली अंगु
ष्ठेन स्पर्शयेत् ततो अंगुष्ठाभ्या
मनामिकाग्रं स्पृशन् ॐ नमः प
राय अंतरात्मने अनिरुद्धाय नैवे
द्यं कल्पयामीति नैवेद्यमुद्रां प्रद
र्श्य मूल मुच्चार्य अमुक देवता न
र्पयामीति चतुर्दा संतर्प्य अमुक
देवतायै एतज्जल ममृतापिधान
मसीति जलं दत्वा आचमनीया
दिकं दद्यात् वैसवे तु नैवेद्य
दाने सर्वत्राय मेव विधिः ततः
सामान्य पूजा पद्धत्युक्त क्रमेण
विसर्जनान्तं कर्म समापयेत् अ
स्य पुरश्चरणं षोडशलक्षजपः
तथाच विकार लक्षं प्रजपन्मनुमे
नं समाहितः तद्दशांशं सरसिजै
र्जुहुयान्मधुराप्लुतैः इति तंत्र

सारः सत्यत्र्क विष्णुपूजा या
क्रिकतत्त्वादौ दृष्टया तस्य
नमस्कार स्तत्फलादिश्च यथा
सूतउवाच मुक्तिहेतु मनाद्यंत
मजमव्यय मव्ययं यो नमेत्स
र्वलोकस्य नमस्यो जायतेनरः
विष्णुनानेद महेतं विज्ञानं स
र्वगं प्रभुं प्रणमामि सदा भक्त्या
चेतसाहृदयालयं योऽनन्तशि
ष्टत्रेशेषस्यपशुपतीशः शुभाशु
भं तं सर्वसाक्षिणं विष्णुं नमस्ये
परमेश्वरं साक्षेनापि नमस्कार
प्रयुक्तश्चक्रपाणये संसार तृणव
र्गाण्या शुद्देननकरोद्भिः कृत्स
स्कंबलनलयरोदस्वाप्सृकृसे लो
काधिकारि पुरुषेपरमेऽप्रमेये
एकोपि चाकुरुणामाद कृतप्र
णामः स्वयंश्वपाकमपि शोधयि
तुं समर्थः प्रणाम्यदेवदेवमीन
मस्कारेण योर्चयेत् सयांगति
मवाप्नोति नतांक्रतुशतैरपि
दुर्गसंसारकांतारात्कपापारमभि
धावतां एकःकृष्णनमस्कारो य
स्ति तीरस्य देशकः आसीनोवा
शयानो वातिष्ठन्वा यत्रतत्रवा
नमोनारायणायेति मन्त्रैकश
रणो भवेत् नारायणेति शब्दो
ऽस्ति वागस्ति वशवर्तिनीतथा
पि

नरके घोरे पतंतीति किमद्भुतं
चतुर्मुखाय यदि कोटिवक्त्रो भ
वेन्नरः कोपि विशुद्धचेताः सर्व
गुणानामयुतैक देशं वदेन्न वा
देववरस्य विष्णोः व्यासाद्या मुनयः
सर्वे स्तुवन्तो मधुसूदनं मतिक्ष
याद्विवर्तन्ते न गोविन्द गुणक्ष
यवशेनापि यन्नाम्नि कीर्तिते
सर्वपातकैः पुमान्विमुच्यते सद्यः
सिंहत्रस्तै मृगै रिव सकृदुच्चारि
तं येन हरि रित्यक्षरद्वयं बद्धः
परिकर स्तेन मोक्षाय गमनंप्र
ति स्वप्नेपि नामस्मृति रादिपुंसः
क्षयं करोत्यक्षयपापराशिं प्र
त्यक्षतः किं पुन रत्र पुंसां संकी
र्तिते नाम्नि जनार्दनस्य नमः
कृष्णाच्युतानन्त वासुदेवेत्युदीरि
तं यै र्भाव भावितै र्विप्रनतेय
मपुरं यपुः शमायालंजलं वह्ने
स्तमसोभास्करोदयः शान्तिःक
ले स्त्वघौघस्य नामसंकीर्तनंहरे
रः कृतान्तकएष्वमागमनं पुनरा
याति लक्षणं कर्त्तपो वासुदेवे
ति मुक्तिबीजं मनुत्तमं गच्छ
तां दूर मध्वानं तृष्णा मूर्च्छित
चेतसां पाथेयं पुण्डरीकाक्षना
मसंकीर्तनामृतं नम इत्येव
योब्रुयाद्भक्तः श्रद्धयान्वितः त

4747

स्यात्यया भवेल्लोकः श्वपाकस्यापि
शौनक संसार सर्पदष्टस्य निर्विचेष्टैक
भेषजं कृष्णेति वैष्णवं मन्त्रं जप्त्वा मु
क्तो भवेन्नरः ॥ ध्यायन्कृते
यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चय
न् यदाप्नोति तदाप्नोति कलौ
संकीर्त्य केशवं ॥ नूनं तत्कंठ
लाल्लक मथ वाप्युपजिह्विका।
रोगाधारा नसा जिह्वा यान वक्ति
हरेर्गुणान् ऊरुस्तेनैण किंतस्य
काष्ठया वा शांतिकेन वा जिह्वा
ग्रेवर्तते यस्य हरि रित्यक्षरद्वयं ॥
विज्ञात दुष्कृत सहस्र समावृतो
पि श्रेयः परंतु परिशुद्धिमभीप्स
मानः स्वप्नान्तरेपि किल योनिभ
यं नप श्येन्नारायण स्तुतिकथाप
रमोमनुष्यः इत्यादि गारुडे नारा
यणभक्तिनमस्कार नाम २३२ अ
ध्यायः सूत उवाच असारभूतेसं
सारे सारमेकं विनिर्दिशेत् अ
सारशेष लोकस्य सारमाराध
नंहरेः दृष्यास्तरूष सूकेन यःपु
ष्पान्यप पत्रवा अर्चितं स्यात्तदा
चैव तेन सर्वं चराचरं मातृवत्प
रिरक्षन्तं सृष्टिसंहार कारकं यो
न पूजयते विष्णुं तं विद्याद्ब्रह्मघ्वा
तकं यतःप्रवृत्ति र्भूतानां येन

सर्व मिदं ततं स्वकर्मणा तमभ्य
र्च्यसिद्धिं विन्दति मानवाः नरके
पच्यते यस्तु यमेन परिभाषितः
किंत्वया नार्चितो देवः केशवः के
शिनाशनः उदकेनाप्यभावेन द्र
व्याणामर्चितःप्रभुः यो दरिद्रोस्स
केलोकं मत्वया किं नचार्चितः
नतत्करोति सा माता नपितातो
पितामहः यत्करोति हृषीके
शः संतुष्टः श्रद्धयार्चितः वर्णाश्र
माचारवता पुरुषेण परःपुमान्
विष्णुराराध्यते पंथा नान्यस्तत्तो
षकारकः नदानै र्विविधै र्दत्तै र्न
पुष्पै र्नानुलेपनैः तोष मेति म
हात्मासौ यथाभक्त्या जनार्दनः
संपदैश्वर्यमहात्म्य ज्ञान संतति
कर्मणां विमुक्तेश्चैकतालभ्यं
मूल नारायणंहरेः प्रणामे स्तु
ध्याते विष्णु रेतद्धे परमं पदं य
त्प्राप्य वा विशेषणाक स्तमर्चि
तु मर्हति इतिगारुडे पूजास्तु
तिः २३३ अध्यायः सूतउवाच
आलोक्य सर्वशास्त्राणि विचा
र्यच पुनःपुनः इदमेकं सुनिष्प
न्नं ध्येयो नारायणः सदा किंत
स्नानैः किं तीर्थैः किं तपोभिः
किमध्वरैः योनित्यं ध्यायते देवं
नारायण मनन्यधीः ॥

षष्टितीर्थसहस्राणिषष्टितीर्थ
शतानिच नारायणप्रणामस्य
कलांनार्हन्तिषोडशीं प्रायश्चित्ता
न्यशेषाणितपःकर्मात्मकानिवै
यानितेषामशेषाणां कृष्णानु
स्मरणं परं कृते पापेनुतापोवै
यस्य वै यस्य पुंसःप्रजायतेप्रा
यश्चित्तंतु तस्यैकं हरिसंस्मरणं
परं मुहूर्त्तमपियो ध्यायेन्नारा
यणमतन्द्रितः सोपि तद्गतिमा
प्नोति किंपुनस्तत्परायणः जा
ग्रत्स्वप्नसुषुप्तेषु योगयुक्तस्य यो
गिनः याकाचिन्मनसोवृत्तिः सा
भवत्यच्युताश्रयात् उत्तिष्ठन्नि
पतन्विष्णु व्रजन्वैविवसंस्तथा
भुंजात्स्वपंश्च जाग्रच्चगोविन्दं
माधवंस्मरेत् स्वेस्वे कर्मण्य
भिरतः कृत्वाचित्तं जनार्दने।
एषाशास्त्रानुसारोक्तिः किमन्यै
र्बहुभाषितैः ध्यानमेव परोध
र्म्मो ध्यानमेव परंशौचं तस्मा
द्ध्यानपरोभवेत् नास्ति विष्णोः
परं ध्येयं तपोनानशनात्प
रं तस्मात्प्रधानमत्रोक्तं वासुदे
वस्य चिन्तनं यद्दुर्लभं परंप्राप्यं
मनसोप्यगोचरं तदप्यप्रार्थि
तं ध्यातो ददाति मधुसूदनः
प्रमादात्कुर्वतां

कर्म प्रच्यवेताध्वरेषु यत् स्मरणा
देवतद्विष्णोःसंपूर्णं स्यादितिश्रु
तिः ध्यानेन सदृशं नास्ति शोध
नं पापकर्मणां आगामिदेहहे
तूनां दाहकोप्येष पावकः॥
विनिष्पन्नसमाधिस्तुमुक्तिं तत्रैव
जन्मनि प्राप्नोति योगी योगाग्नि
दग्धकर्मचयोःचिरात् यथाग्नि
रुद्धतशिखःकक्षं दहति सानिलः
तथाचित्तस्थितो विष्णु र्योगिनां
सर्वकिल्विषं यथाग्निदाहात्क
नकं मपदोषं प्रजायते संश्लिष्टं
वासुदेवेन मनुष्याणां तथामनः
गंगास्नान सहस्रेषु पुष्करस्ना
न कोटिषु यत्पापं विलयं याति
स्मृते नश्यति तद्धरौ प्राणाया
म सहस्रैस्तु यत्पापं नश्यतिध्रुवं
तत्क्षणमात्रेण तत्पापं हरे र्ध्याना
न्नश्यति एकस्मिन्नप्यतिक्रा
न्ते मुहूर्त्ते ध्यान वर्जिते दस्युभि
र्मुषितेनेव युक्तं माक्रन्दितुंभृशं
कलिप्रभावो दुष्टोक्तिः पाषंडा
नां तथोत्कयः नक्रमेवन्मनस्त
त्र यस्य चेतसि केशवः सातिथि
स्तद्दहोरात्रं सयोगःसचचंद्रमाः
लग्नंतदेव विख्यातं यत्र स्मर्य
तेहरिः साहानि स्तन्महच्छिद्रंसा
चोपनउ

मृकता यन्मुहूर्त्तं क्षणं वापिवा
सुदेवो नचिन्त्यते कलिः कृतयु
गंतस्य कलिस्तस्य कृते युगे हृ
दये यस्य गोविन्दो यस्य चेतसि
नाच्युतः यस्याग्रतस्तथा पृष्ठगच्छ
तस्तिष्ठतोपिवा गोविंदे नियतंचि
त्तं कृतकृत्यःसदैव सः वासुदेवे
मनो यस्य जपहोमार्चनादिषु।
तस्यान्तरायो मैत्रेय देवेंद्रत्वादि
कं फलं प्रसंत्यज्यच गार्हस्थ्यमत
स्यावं महत्तपः छिनत्ति वैष्णवी
माया केशवार्पित मानसः॥
तमां कुर्वन्ति कुद्देषु दया मूर्खे
षुमानवाः मुदंच धर्मशीलेषु गो
विन्दे हृदयस्थिते ध्यायेन्नाराय
णं देवंस्नानादिषु च कर्मसु प्रा
यश्चित्तं हि सर्वस्य दुष्कृतस्येति
विश्रुतं लाभस्तेषां जयस्तेषांकु
तस्तेषां पराभवः येषामिन्दीव
रश्यामो हृदयस्थो जनार्दनः॥
कीट पक्षि गणानांच हरौ संन्य
स्तचेतसा कुर्ध्वमेव गतिं मन्येकिं
पुन र्ज्ञानिनां नृणां वासुदेवत
रुच्छाया नातिशीता नघर्मदा न
रकाङ्गार शमनी सा किमर्थंनसे
व्यते नच दुर्वाससः शापो वज्रं
वापिशचीपतेः हन्तुंसमर्थोहिस
खे

हृते मधुसूदने वदत स्निग्ध
तोन्यहा सेच्छया कर्मकुर्वतः
नापयाति यदा चिंता सिद्धंमन्ये
चधारणां ध्येयःसदा सवितृमं
डलमध्यवर्त्ती नारायणःसरसि
जासनसंनिविष्टः केयूरवान्कन
क कुंडलवान्किरीटी हारीहि
रण्मयवपुर्धृतशंखचक्रः कि
मत्र बहुनोक्तेन युष्माकं मधुना
हरिं स्मरतानिशं विष्णु मशेष
दुरितापहं नहिध्यानेन सदृशंप
वित्रमिह विद्यते स्वपाकेष्वपिभुं
जानःपापे नैवात्र लिप्यते यदा
चित्ते समासक्तं जंतो र्विषयगोच
रे यदि नारायणे प्येवं को न
मुच्येत बंधनात् प्रशस्तमितमे
दं यत्सत्तामात्र मगोचरं।
वचसा मात्मसंवेद्यं तज्ज्ञानंब्र
ह्मसंज्ञितं तज्ज्ञानयाधुणाया
योगिनो यांतिमे लयं संसार
कर्मणो ध्यतेयांति निर्वीज
तां द्विजाः इति गारुडे ध्यानस्तु
तिः २२७ अध्यायः तस्यमाहा
त्म्यं यथा सूतउवाच विष्णुः
चिन्ताभवदुक्तं यंजेत नमस्त
दा तमेवेष्यति मुक्त्वेवमात्मानं
हवितत्परः तद्दानं यत्र गोविंदः

विस्रो र्धान्तेच स्ननं

सा यथा यत्र केशवः तत्कर्म
यन्नरर्थाय किमन्यै र्वहुभाषि
तैः सानिका या हरिं स्तोति
तच्चिन्तं युक्तदर्पितं तावेव के
वलो श्लाघ्यो यो तत्पूजाकरो
करो प्रणाम मीशस्य शिवः
फलं विष्णुदर्शने पापफ
लं हृषीकेशः मनःफलं तद्गु
णकर्म चिन्तनं वचस्तु गो
विन्द गुण स्तवःफलं मेरुम
न्दर मात्रोपि राशिः पापस्य क
र्मणः केशवं वैद्यमासाद्य
दोषि विनश्यति यत्किंचि
त्कुर्वते कर्म पुरुषः साध्वसाधु
वा सर्वं नारायणो न्यस्य कुर्व
न्नपि न लिप्यते तृणादि चतुरा
स्यान्तं भूतग्रामं चतुर्विधं चराच
रं जगत्सर्वं प्रसुप्तं मायया तव य
स्मिन्न्यस्तमति र्नयाति नरकं स्व
र्गोपि यच्चिन्तने विघ्नो यत्र नि
वेशितात्ममनसो ब्रह्मोपि लो
कोल्पकः मुक्तिं चेतसि तिष्ठ
तो जडधियां पुंसां ददात्यव्ययः
किंचित्रं दुरितं प्रयाति विलयं
तत्राच्युते कीर्तिते महतापाप प
रेपन येन क्रीतोऽखिलं भुवं न
स्यविस्रो प्रसादेन इहकुविष्णु
ध्याति अग्नि कार्यं जप स्नाने वि
गात डःखोदधेःपारंकुर्युर्येत्र
भवंति ते राक्षस शरणं राजापि
तैरो वालकस्यच धर्मस्य सर्वस
र्भानां सर्वस्य शरणं हरिः ॥
येनमंति जगद्योनिं वासुदेवंस
नातनं नतेभ्यो विद्यते तीर्थमधि
कं मुनि सत्तम अनर्च्चयित्व सू
जातं ऊर्यामिवाध्याय मेवच ते
सम्भक्तितः स्मृतं वा भगवद्भक्त
निषादं श्वपचं तथा हिजना
ति समं मन्य नयाति नरकं नरः
श्रादरेण यथा स्तौति धन
वं. यथैश्वर्या तथा बुद्धिश्च क
र्मा कोनमुच्यते वंधनात् यथाजा
तवेदोवह्नि देहत्याई मपीन्धनं त
थाविधःस्मृतो विस्नु योगिनांस
र्वकिल्विषं प्रदीप्तं पर्वतं यद्वत्
श्रयंति मृगादयः तद्वत्पापानि
सर्वाणि योगाभ्यासरते नरं
यस्य यावांश्च विश्वास स्तस्य सि
द्धिश्च तावती एतावानिति रूपस्य
प्रभावःपरिमीयते विद्वेषादपि
गोविन्दं दमघोषात्मजःस्मरन्
शिशुपालो गतस्तत्त्वं किं पुनस्त
त्परायणाः अयंदेवो मुनिर्वंद्यः
एष ब्रह्मा वृहस्पतिः इत्याख्या

४७५।

जायते तावद्यावन्नार्चयते हरिं ॥
इतिगारुडे विस्नुमाहात्म्ये २३५
अध्यायः तस्य पादोदकपानादि
फलं हृदि रूपं मुखे नामनैवे
द्य मुदरे हरेः पादोदकंच निर्मा
ल्यं मस्तके यस्य सोऽच्युतः ॥
नैवेद्य मन्न तुलसी विमिश्रं वि
शेषतः पादजलेन विशुद्धं योऽश्ना
ति नित्यं पुरतो मुरारेःप्राप्नोति
यज्ञायुतकोटि पुण्यं ॥ हरिं
हरति यद्दृष्टिं संगतुलसी स्तोयंच
पादोदकं नैवेद्यं कुङ्कमयुपान
दुरितं गर्वंगता संगमे इतिपा
द्मोत्तरखंडे ए अध्यायः तस्य ना
म्नां मुख्यनयो भवसि तस्माद्विष्णो
ऽसि कीर्तितः व्यसनोत्पत्ति युक्ते
षु ब्रह्मेन्द्र वरुणादिषु यस्मा
न्न व्यवसे स्थानात्तस्मात्कीर्त्यसे
ऽच्युतः ब्रह्माणमिन्द्रं रुद्रंच य
मं वरुणमेवच निगृह्य हरसे
यस्मात्तस्माद्धरि रिहोच्यसे यस्मा
न्नयसि भूतानि वपुषा यशसाथ
वा श्रियेण वपुषा देव तस्मात्त्वा
सि सनातनः यस्माद्ब्रह्मादयो
देवा मुनयश्चोग्रतेजसः नतेऽन्ते
त्वधिगच्छंति तेनानंतस्त्वमुच्यसे
न क्षीयसे न
क्षयसे कल्पकोटि शतै रपि न
स्मात्त्व मक्षरत्वाच्च विस्नुर्वेतिप्र
कीर्त्यसे विष्टरूपेच त्वया सर्वंज
गत्स्थावर जगमं जगद्धिष्टंभता
श्चैव विस्नुर्वेति प्रकीर्त्यसे विष्ट
भ्यातिष्टसे नित्यं त्रैलोक्यंसचराचरं
मयक्ष गंधर्व नरं समस्तभूत पन्नगं
व्याप्य त्वामेव विशते त्रैलोक्यंस
चराचरं तस्माद्विस्नुरिति प्रोक्तः
स्वयंमेव स्वयंभवा नारा इत्युच्य
ते ह्यापः ऋषिभि स्तत्वदर्शिभिः
अयनं तस्य तत्पूर्वं तेन नारायणः
स्मृतः युगे युगे प्रणष्टां गां वि
न्दसि गोविन्दसि तत्त्वतः गोविंदेति त
तो नाम्ना प्रोच्यसे ऋषिभि स्तथा
हृषीकाणीन्द्रियाण्याहु स्तत्त्वज्ञा
न विशारदाः ईशित्वे वर्तसे हृ
षी हृषीकेश स्तथोच्यसे वसंतित्व
यि भूतानि ब्रह्मादीनि युगक्षये त्व
वावससि भूतेषु वासुदेव स्तद
च्यसे संकर्षयसि भूतानि कल्पे
कल्पे पुनःपुनः ततःसंकर्षणः
प्रोक्तः स्तत्त्वज्ञानविशारदैः प्रद्यु
म्नेन नतिष्ठंति सदेवासुर राक्षसाः
प्रतिद्युः सर्वधर्माणां प्रद्युम्न स्तेन
चोच्यते निरोधो विद्यते यस्मा
न्नेते भूतेषुकस्यचनः अनिरुद्ध स्त

तः प्रोक्तः विश्वमेवमहर्षिभिः
इति मात्स्ये २२२ अध्यायः विष्णु
लोक गमन कारणं यथा क
र्मभोगी सकामः सान्निष्कामो
निरुपद्रवः सयाति देहं त्यक्त्वा
च पदं विष्णो निरामयं पुनरा
गमनं नास्ति तेषां निष्कामिनां
सति ये सेवंते च द्विभुजं कृष्ण
मात्मानमेवच गोलोकं ते नरा
यांति दिव्यरूप विधारिणः ये
च नारायणं भक्त्या सेवंते वचतु
र्भुजं वैकुंठं यांति ते सर्वे दिव्य
रूप विधारिणः सकामिनो वै
ष्णवाश्च गत्वा वैकुंठ मेवच
भारतं पुनरायांति तेषां जन्म
द्विजातिषु कालेन ते च निष्का
मा भवन्त्येव क्रमेणाव भक्तिंच
निर्मलां बुद्धिं तेभ्यो दास्यति
निश्चितं हरिभक्ताश्च निष्कामाः स्व
धर्म रहिता द्विजाः तेपि यांति
हरे र्लोकं क्रमाद्भक्ति बलात्
द्विजा इति ब्रह्मवैवर्त्ते प्रकृतिखं
डे २६ अध्यायः विष्णुक्रांता स्त्री
श्रवणानक्षत्रं यथा उपोष्यद्वा
दश्यां पुण्यां विष्णुर्क्षेण संयु
तां एकादश्यामुपोष्यैव नरः पा
पैः प्रमुच्यते इति तिथ्यादितत्त्वे

विष्णुकंदः पुं मूलविशेषः तत्प
र्यायः विष्णुगुप्तः २ सुपुटः ३
वज्रसंपुटः ४ जलवासः ५ हस्त
कंदः ६ दीर्घपत्रः ७ हरिप्रियः ८
अस्यगुणाः मधुरत्वं शिशिर
त्वं पित्त दाह शोफहरत्वं रुच्य
त्वं संतर्पणकारित्वंच इतिरा
जनिर्घंटः ॥
विष्णुक्रांता स्त्री अपराजिता इ
त्यमरः अपराजिताख्या अन्यात्स
पजातिः तत्पर्यायः हरिक्रांता
२ नीलपुष्पा ३ अपराजिता ४
नीलक्रांता ५ सुनीला ६ विक्रां
ता ७ छर्दिका ८ अस्यागुणाः
कटुत्वं तिक्तत्वं कफ वातामयवि
षदोषनाशित्वं शुभदत्वंच इतिरा
जनिर्घंटः ॥ मेधाकारित्वं पावनित्वं
विष्णुगुप्तः पुं वात्स्यायनमुनिः
यथा विष्णुगुप्तस्तु कौटिल्यश्चा
णक्यो द्रोमिलोंगुलः वात्स्याय
नो मंदनागः पक्षिलः स्वामि
नावपि इति त्रिकांडशेषः वि
ष्णुकंदः इति राजनिर्घंटः
विष्णुगुप्तकं क्ली चाणक्यमूलकं
इति राजनिर्घंटः ॥
विष्णुगृहं क्ली विष्णुमंदिरं अस्य

पुं इति हेमचंद्रः ॥ विष्णु
गृहकरणे फलं यथा श्रेष्ठका
ष्ठमाषुक्रं यः कुर्याद्देवं गृहं नृप
स फल सम्पत्ति वक्तुं शक्यते न
वचित् इति हरिभक्तिविलासे ११
विलासः येस्तु देवालयं विष्णोः
शुभ दारुमयं कृतं कारयेन्मृन्मयं
वापि शृणु तस्य फलं मुने ॥
अहन्यहनि योगेन यजतो यन्म
हाफलं प्राप्नोति तत्फलं विष्णो
र्यः कारयति मंदिरं कुलानांश
त मागामि समतीतं तथा शतं
कारयेद्भगवद्धाम नयत्यच्युतलोक
तां सप्तजन्मकृतं पापं स्वल्पंवाय
दि वा बहु विष्णोरालयविन्या
स प्रारंभादेव नश्यति ॥
सप्त लोकमया विष्णु र्यस्तस्य कुरु
ते गृहं प्रतिष्ठां समवाप्नोति स
नरः सप्तलौकिकीं प्रशस्तदेशे
भूभागे प्रशस्ते भवनं हरेः काय
यत्वा विलाल्लोकान्नरः प्रतिप
द्यते इष्टकानांच विन्यासो यावद
ब्दानि तिष्ठति तावद्वर्ष सहस्रा
णि तत्कर्त्ता दिवि संस्थितः ॥
चिकीर्षो रपि कृष्णस्य मंदिरं पु
ण्यकारिणः नरस्य तत्क्षणादेव
पापं जन्मशतोद्भवं ॥ येध्याय
न्ति सदा कृष्णं करिष्यामि ह
रे र्गृहं तेषां विलीयते पापं सर्व
जन्मशतोद्भवं येऽनुमोदन्ति कृष्ण
स क्रियमाणं हरे र्गृहं तेपि पा
प विनिर्मुक्ताः वैष्णवं लोकमाप्नु
युः कनिष्ठं मध्यमं श्रेष्ठं कार
यित्वा हरे र्गृहं स्वर्गंच वैष्णवं
लोकं मोक्षंच लभते क्रमात्
समतीतं भविष्यंच कुलानां
प्रयुतं नरः विलोकं नयत्या
शु कारयित्वा हरे र्गृहं इष्टा
पूर्त यत्फलं विप्रा वाजिमेधा
दिभि र्मखैः प्राप्यते तत्स्व
नेव निवेश्य भवनं हरेः ॥
येस्ताभिमुखाः शूरा गोविप्रा
र्थं रणाजिरे सतत्फलं मवा
प्नोति कारयित्वा हरे र्गृहं पक्वे
ष्ट रचितं रम्यं पंचप्रासादसंयु
तं कारयित्वा हरे र्धाम धूतपा
पो व्रजेद्दिवं लक्षेणाष्टसहस्रे
ण शतेनाष्टेन वा हरेः ।
तत्सं फलं समाख्यातं नदीष्व
वदरि द्वयोः पतितं पतमानं
तत्तथाष्टपतितं तथा समुद्धृत्य
हरे र्धाम द्विगुणं फलमाप्नुया
त् इति वह्निपुराणे वैष्णव क्रि
यायोगे धर्मानुशासन नामाध्यायः

विश्वचक्रं क्ली रत्नरेखामयच
क्रविशेषः यथा विश्वचक्रं क
रे विभ्रं सर्वेषां चक्रवर्त्तिनां भ
वत्यव्याहतो यस्य प्रभाव खिर
शेऽपि इति विश्वपुराणे १ अ
ध्या १२ अध्यायः रेखान्नवाना
कुलेरेखामय चक्रं इति तदी·
सुदर्शनचक्रंच ॥
विश्वतैलं क्ली अश्विनीकुमा
रकृतपक्वतैलविशेषः यथा
स्नानीयं विश्वतैलंच सर्वत्येन
विनिर्मितं इति ब्रह्मवैवर्त्ते गणा
पतिखंडे १३ अध्यायः अथस्व
ल्पविश्वतैलं शालपर्णी बला
गोरत्ततंडुलाः पवंरसच मू
लानि बृहत्यो पूतिकस्यच ॥
शतावरी सहचरं पचेद्दैतैः प
लोन्मितैः तैलप्रस्थं पयोदत्वा
गव्यं वाजं चतुर्गुणं अस्यतैल
स्य पक्वस्य शृणु वीर्यं मतःपरं
वातार्त्तो नर नागाश्च पीत्वा रूफ
तनुत्वचः हृत्पार्श्वे शूले वाताष्ठे
गलगंडेऽर्दितेक्षये शार्करास्य·
वि पांडुत्व कामलाद्योवभेदके
क्षीणेंद्रियेऽन्त्रवृद्धौच ज्वराजर्जे
विते हितं क्षीणमस्थनराणां
वार्धिस्थितिकरं परं पतदंगर

दं तैलं विश्वना परिकीर्त्तितं तं
डुलैः गोरत्ततंडुलः बृहत्योर्बृहती
कटकार्योः पूतिको नाटाकरंजः
सहचरो किन्टी । अत्र
क्वाथ्यान्तरा भावात् क्षीरस्य चतु
र्गुणं जलं कश्चिद्ददाति स्वरसक्षी
रसागव्यैःपाको यत्रेरितः क्वचित्
जलं चतुर्गुणं तत्र वीर्याधानार्थं
मारपेत् इति परिभाषा वचना
त् कश्चिदिति पाठात् क्वाथ्यान्त
र रहिते केवलक्षीरादि सहित
तैलादिपाके ज्ञानवान तत्सवेन पला
चंदन कुंकुमागुरु मुरा कंकोल
मांसीशटी श्रीवासच्छदग्रंथिपर्णा
शशाभ्रत् लोणीध्वजो शैरके कस्तू
रि इति पीतं जलमुस्तोरवीलवंगा
दिकं गन्ध इव्य मिदं प्रदेय माव
तेभ्यो विश्वतैलादिषु अथ बृहद्वि
श्वतैलं जलधर मस्य गंधा जीवक
र्षभको शटी काकोली क्षीरकाको
लीजीवंती मधुयष्टिका मधूरिका
देवदारु पद्मकाष्ठंच सैन्धवं मांसी
चेला त्वचं कुष्ठं रक्तचंदनं पीत
ं मंजिष्ठा मृगनाभिश्च श्वेतचंद
न कुंकुमं पर्णी कुन्दुरु खोदिश्च
ग्रंथिकंच नखी तथा पतेषां प
लिके भोगे तैलस्यापि तथाढके

शतावरी रसस्तं दुग्धचापि स
मं भवेत् विश्वतैलवरं श्रेष्ठंसर्वे
वातविकारनुत् ऊर्द्ध्ववाते स्वधो·
वाते अंगविग्रह एवच शिरोम
ध्ये शिरोमध्यगता येच मन्यास्तंभे
गलग्रहे यस्य शुष्यति चैकांगं गति
र्यस्य च विकला ये वातप्रभवा रो
गा येच पित्त समुद्भवाः सर्वांस्ता
न्नाशयत्याशु सूर्यस्तम इवोदितः
इति भैषज्यरत्नावली ॥
विश्वदेवतं त्रि विश्वापिस्रान्तदे
वविश्वदेवतं ःयदहंत सर्व देवतं
यदनुक्तं हिजोत्तमाः तेत्तयं विश्व
देवतं सर्वं वा विश्वदेवतं ।
इति मुहितत्वे विश्वधर्मोत्तरवच
नं श्रवणानत्तत्रे इति मो ति
षं ॥
विश्वदेवत्या स्त्री एकादशीति·
थिः द्वादशीतिथिः यथा एकाद
शीद्वादशी च प्रोक्ता श्रीवक्रपा
णिनः त्रयोदशीत्वनंगस्य शिव
स्योक्ताचतुर्दशी इति स्मृतिः ए
कादशी मुपोष्यैव द्वादशीमुप
पोषयेत् नचात्र विधिलोपः ।
नाके यथा व्रतो
पकरणं सर्वकार्षि
तं सर्व देवतं । १३

स्याद्भयो दैवता हरिः इति
तिथ्यादितत्वं ॥
विश्वधर्मः पुं शास्त्रविशेषः ॥
यथा ब्रह्मचारिकांडे भविष्यपुरा
णे अष्टा दशपुराणानि रामस्य
चरितं तथा विश्वधर्मादि शास्त्रा
णि शिवधर्माश्च भारते कार्णंच
पंचमो वेदो यन्महाभारतंस्मृतं
सौराश्च धर्मा राजेन्द्र मानवोक्ता
महीपते जयेति नाम एतेषां
प्रवदन्ति मनीषिणः जयत्यनेन
संसार मिति जय स्ततद्बुधैः इ
ति तिथ्यादितत्वं विद्याविशेषः य
था अवाप जप्त्वा चेट्टत्वं विश्व
धर्माख्य विद्यया सर्वास्मात् त्रि
र्निर्जित्य लोकं वसे महेश्वरं ॥
पादयो र्जानुनो रुर्वो र्हृदये हृ
द्ग्रीवोरसि मूर्द्धे शिरस्यानुपूर्वा
दोंकारादि विनिर्दिशेत् ॐ नमो
नारायणायेति विपर्ययं मथापि
वा करन्यासं ततः कुर्यात् द्वाद
शाक्षर विद्यया प्रणवादि यका
रांतमंगुल्यग्रपूर्वकं न्यसेतहृ
दये ओंकारं नकारं मूर्द्धनि
मोकारतं भ्रुवो मध्ये शिखा ने
त्रादिसद्देतः ॐ विश्वे नम इति
इमं मंत्र मुदाहरेत् आत्मानं परमं

ध्यायेच्छेष षट्शक्तिभि र्युतं म
मरत्तो ततः कूर्मोन्मत्स्यमूर्त्ति र्ज
लेवतु त्रिविक्रम स्त्वाकाशे ।
स्थले रक्षतु वामनः अटव्यां न
वसिंहस्तु रामो रक्षतु पर्व्वते
भूमौ रक्षतु वाराहो हंसो ना
रायणोऽवतु कर्मबंधाच्च को
पिलर्षी योगात् रक्षतु ॥
हयग्रीवो देवतायाः कुमारो
मकरध्वजात् नारदोऽर्चनात्
पापात् कूर्मो वै नैर्ऋतेः सदा
धन्वन्तरि रपथ्याच्च नागः क्रोध
वशात्किल यज्ञो लोकाहवः ।
कालाद्व्यासो ज्ञानाच्च रक्षतु ॥
बुद्धः पाषंड संघात् कल्किर्व्या
त्कलेः सर्वं पापान्मध्यंदिने विष्णुः
प्रातः र्नारायणोऽवतु मधुहावा
पराह्ने च सायं रक्षतु माधवः
हृषीकेशः प्रदोषेऽव्यात् प्रत्यूषेः
ऽव्यात्प्रत्यूषेऽव्याज्जनार्दनः ॥
श्रीधरोऽव्यादर्द्धरात्रे पद्मनाभो
निशांतके चक्र कौमोदकीवा
णाः घ्नंतु शत्रूंस्तान् ॥
शार्ङ्गखड्ग शत्रुघ्नाः शंखो वै ग
रुडः स्वच्छा बुद्धीन्द्रिय मनःप्रा
णान्पातु पार्षद भूषणाः शेषः
सर्वे सदापन्नः सदा सर्वत्र पातुः

मां विदिक्षु दिक्षु च सदा न
सिंहश्च रक्षतु एतद्धारयमाणश्च
यं यं पश्यति चक्षुषा । स
वशी स्याद्विपाप्माच रोगान्मुक्तो
दिवं व्रजेत् इति गारुडे २१
अध्यायः ॥
विष्णुधर्म्मोत्तरं क्ली संहिताविशे
षः तत्र प्रश्नकर्त्ता जनमेजयस्ततः
वक्तारः शौनकादि ऋषयः तत्र
१० हजारान्ता स्कन्धेषु द्रष्टव्याः
विष्णुपंजरं क्ली विष्णुकवचविशे
षः यथा प्रवक्ष्याम्यधुना ह्येतद्वै
ष्णवं पंजरं शुभं नमो नमस्ते
गोविन्द चक्रं गृह्य सुदर्शनं
प्राच्यां रक्षस्व मां विष्णो त्वामहं
शरणं गतः गदां कौमोदकीं
गृह्य पद्मनाभामितद्युते या
म्यां रक्षस्व मां विष्णो त्वामहं
शरणागतः हलमादाय सौनंदे
नमस्ते पुरुषोत्तम ॥ प्रतीच्यां
रक्ष मां विष्णो भवंतं शरणागतं
पांचजन्य तथा शोर्व्व शार्ङ्गंचा
पद्म पंकजे प्रगृह्य रक्ष मां विष्णो
आग्नेय्यां यज्ञसूकर चर्मसूर्यश
तं गृह्य खड्गं चंद्रसमं तथा
नैर्ऋत्यां मांच रक्षस्व दिव्य मू
र्त्ते नृकेशरिन् वैजयंती प्रगृह्य

त्वं श्रीवत्स कंठभूषण वायव्यां
रक्ष मां देव अश्वशीर्ष नमोऽस्तु
ते वैनतेयं समारुह्य अंतरी
क्षे जनार्दन मां त्वं रक्षाजित स
दा नमस्तेऽस्त्वपराजित विशा
लाक्षं समारुह्य रक्ष मां त्वं रसात
ले अकूपार नमस्तुभ्यं महामीन
नमोऽस्तु ते करशीर्षांघ्रि सर्वेषु
तथाष्टभुजपंजरं कृत्वा त्वं र
क्ष मां देव नमस्ते पुरुषोत्तम ।
एतदुक्तं भगवता वैष्णवं पंजरं
महत् पुरा रक्षार्थ मीशेन का
त्यायन्या द्विजोत्तम नाशयामा
स यत्रासा दानवं महिषासुरं
चामरं रक्तबीजंच तथान्यान्सु
रकंटकान् इति वामने ७
अध्यायः ॥
विष्णुपदं क्ली आकाशं इत्यमरः
क्षीरोदः इति मेदिनी ॥
पद्मं इति हेमचंद्रः विष्णोः
स्थानं यथा अपुण्य पुण्योपप
रमे क्षीणाशेषाप्ति हेतवः यत्र
गत्वा न शोचंति तद्विष्णोः परमं
पदं धर्मध्रुवाद्यास्तिष्ठंति यत्र ते
लोक साक्षिणः तत्साष्ट्यंमत्र
योगेद्धास्तद्विष्णोः परमं पदं ॥
यत्रैतदोतं प्रोतं च यद्भूतं स

चराचरं भाव्यंच विश्वं मैत्रेय
तद्विष्णोः परमं पदं दिवी
वच्चाततं वितंतं तन्महात्मनो
विवेकज्ञान दृष्टंच तद्विष्णोः
परं पदं इति विष्णु पुराणे २
अंशे ८ अध्यायः ॥
विष्णुपदी स्त्री गंगा इत्यमरः
अस्याः कारणं यथा नारदउ
कलेः पंचसहस्राब्दे समतीते
सुरेश्वरी क्व गता सा महाभा
गतन्मे व्याख्यातु मर्हसि ना
रायण उवाच गंगा सरस्वती
लक्ष्मी श्चैता स्त्रियो हरेः प्रियाः
तुलसी सहिता ब्रह्मन्चतस्रः
कीर्त्तिताः श्रुतौ नारद उवाच
बभूव साश्रुनिश्रेष्ठं गंगा नारा
यणप्रिया अहो केन प्रकारे
ण तन्मे व्याख्यातु मर्हसि
नारायण उवाच पुराबभूव
गोलोके गंगा सा द्रवरूपिणी
राधा कृष्णांगसं भूता तदंशा
स्वरूपिणी द्रवाधिष्ठात्री देवी
सा रूपेणाप्रतिमा भुवि ।
सा सकामा कृष्ण पार्श्वे समुवा
स मलज्जिता प्रफुल्लवदनार
विन्दं नव संगम लालसा मूर्च्छि
ता प्रभुरूपेण पुलकांकित वि
ग्रहा पतत्सिद्धेभरे तत्र विद्यामा

नाच राधिकागोपी विंशात्को
टि वृता कोटिचंद्रसमप्रभा ।
कोपेन रक्तपद्मास्या रक्तपङ्कज
लोचना सुचारु राग संयुक्तमो
ष्ठं कंपयती रुषा तांच दृष्ट्वास
मुत्तस्थौ कृष्णः सादर पूर्वकं उ
त्थाच गंगासस्सासंभाषांच
चकारसा कुशलंपरिपप्रच्छ
भीतातिविनयेनच ध्यानेनश
रणं यत्र श्रीकृष्ण चरणां
म्बुजे तद्धृत्पद्मस्थितो विष्णुभी
ताये चाभयं ददौ बभूवस्थि
रचित्ता सा सर्वेश्वरवेक्षणा
च ऊर्द्ध्वे सिंहासनस्थांच राधांग
गा ददर्शसा एतस्मिन्नन्तरे रा
धा जगदीशमुवाचसा कोपशा
णोष्ठा कल्याणीसस्मिता त्वत्प्
त्वाम्बुजे पश्यती सस्मितं पार्श्व
सकामा चक्रलोचना त्वचापी
मा सन्निधौ त्वसकामः सस्मितः स
दा मयि जीवति गोलोके भूता
दुर्वृत्ति रीदृशी त्वमेवेवं चदृष्ट्वेतं
वारं वारं वारंकरोषिच तस्मा
करोमि प्रेक्ष्माच स्त्रीजातिःस्वि
रथमानसा संप्रज्ञोसौ ख्रियामि
हं गोलोकात्कृष्ण लंपट अब्रह्मा
ध्यानहित भद्र भविष्यति ब्रजे
स्वं देवेव शक्ता सा राधारे
क्तपंकजलोचना गंगा वक्तुमभ्या

रेभे नम्रास्यं ललितां सती ॥
गंगा रहस्यंविज्ञाय योगेन सि
द्धयोगिनी तिरो भूय सभामध्या
त्स्वजले प्रविवेश सा राधा योगे
नविज्ञाय सर्वत्रावस्थितांच तां पा
नं कर्त्तुंसमारेभे गंडूषात्सिद्धयोगि
नी गंगा रहस्यं विज्ञाययोगेन
सिद्धयोगिनी श्रीकृष्ण चरणांभो
जंविवेश शरणं ययौ ॥
गोलोकंचैव वैकुंठं ब्रह्मलोकां
दिकं तथा ददर्श राधा सर्वत्रनैव
गंगांददर्शसा ब्रह्म विष्णु शिवा
नंत धर्मेन्द्र दिवाकराः मनवो
मुनयः सर्वे देवाः सिद्धा स्तपस्विनः
गोलोकंच समाजग्मुः शुष्ककंठो
ष्ठतालुकाः सर्वे प्रणेमु गोविन्दं
सर्वेशं प्रकृतेःपरं विज्ञाय त
दभिप्रायं तानुवाच सुरेश्वरः श्री
भगवानुवाच आगताःस्थमहाभा
गा गंगानयन कारणात् गंगाम
च्चरणांभोजे भयेन शरणं गता
राधेमां पातुमिच्छंती दृष्ट्वामोस
न्निधानतः दास्यामीमां वहिस्तु
भ्यापूयं कुरुते निर्भयां श्रीकृष्ण
स्यवचः श्रुत्वा सस्मितः कमलो
द्भवः तुष्टावसर्वेशंराधां तां राधाश्री
कृष्ण पूजितां वेधा श्चतुर्भिःसन्मुख

क्लिनशात्मकंधवः धाता चतुर्णां
वेदानामुवाच चतुराननः गंगात्व
दंगसंभूता प्रभोस्स रासमंडले शु
वयो र्द्रवरूपा सा मुग्धयोः शंक
रस्वरात् कृष्णांशा चत्व देशाच
त्वत्कन्यासदृशी प्रिया त्वन्मंत्र
ग्रहणं कृत्वा करोतु पूजनं तव
भविष्यति पतिस्तस्या वैकुंठेश
श्चतुर्भुजः ब्रह्मणो वचनं श्रुत्वा
स्वीचकारचसस्मिता वहिर्बभूव
साकृष्णपादांगुष्ठ नाखाग्रतः त
त्रैव संहृताध्याता तस्या तेषांच
मध्यतः उवास तोयाडत्याय त
द्रधिष्ठातृदेवता तत्रायं ब्रह्मणा
किंचित्स्थापितच कमंडलौ किं
चिद्दधार शिरसि चंद्रार्द्धचंद्रशेख
रः गंगा यैराधिकामंत्रं प्रददौ
कमलोद्भवः गंगा तामेवसंस्तु
त्यवैकुंठे प्रययौ सती गोलोके
चस्थिता गंगावैकुंठे शिवलो
कके ब्रह्मलोके तथान्यत्र य
त्रतत्र पुराणस्थिता तत्रैव सा ग
ता गंगा चात्तया परमात्मनः नि
र्गता विष्णुपादाब्जात्तेन विष्णुप
दी स्मृता इति श्रीब्रह्मवैवर्त्तेप्र
कृतिखंडे गंगोपाख्याने ९ अ०
वृष वृश्चिक सिंह कुंभसंक्रान्तयः

यथा भविष्य मात्स्य ज्योतिषेषु
धनु मिथुन कन्यासु मीनेच
षडशीतयः वृषवृश्चिककुंभेषु
सिंहे विष्णुपदी स्मृता अपिच
एवं चषडशीत्यादिष्वव्हकाशा
मल भमाने अर्वाक् षोडश वि
ज्ञेया नाड्यःपश्चाच्च षोडशाका
लः पुण्यार्कसंक्रान्ते र्विहद्भिःपरि
कीर्तितः इतिशातातपीये दिवा
विष्णुपदीविषये अतएव जाबालि
बृहद्वशिष्ठौ पुण्यायां विष्णुपद्यां
च प्राक्पश्चादपि षोडश तद्वस्ना
नादिफलं अयने कोटि गुणितं
लक्षं विष्णुपदीषुच षडशीतिस
हस्रं षडशीत्या मुदाहृतं इति
मिथ्यादितत्वे ॥
विष्णुपदीचक्रं श्री ज्येष्ठाशुद्धाय
णाभाद् फाल्गुनमासीय रविसं
क्रमकालीन नक्षत्रविन्यासात्मक
शुभाशुभफलज्ञापक नराकारच
क्रं यथा ऋते संक्रमणं यत्रवि
ष्णुपद्यां भवे तत्रत्र चत्वारिद
क्षिणे वोदो त्रीणि त्रीणि पदह
ये चत्वारि वामवाहौ च हृदयेपं
च तिर्दिशेत् अस्ताणं हृयं हृये यो
न्यं मूर्द्धि द्वौचैकके गुदे फलं
यथा रोगो भोग स्तथा याने

वेधनं लाभ एवच पैश्वर्य्यं राज
प्रसादश्च अपमृत्यु रिति क्रमात्
इति ज्योतिस्तत्त्वं ॥
विस्रम्भभक्तिः स्त्री भगवत्सेवा य
था सूत उवाच विस्रम्भभक्तिं प्रव
क्ष्यामि यया सर्व्वमवाप्यते यथा
भक्त्या हरिस्तुष्येत्तथा नान्येन
केनचित् महतः श्रेयसो मूलं प्रस
वः पुण्यसन्ततेः जीवितस्य फलं
स्वादु हरति स्मरणं हरेः भज
नस्यैव वै यातः सेवायां परिकी
र्त्तितः तस्मात्सेवा बुधैः प्रोक्ता
भक्तिसाधनभूयसी तेभक्ता
लोकनाथस्य नाम कर्म्मादिकी
र्त्तने मुञ्चन्त्यश्रूणि संहर्षात्तथे
च हृष्टतनूरुहाः जगद्धातुर्म
हेशस्य दिव्याख्या चरणाश्रयाः
दृढनित्यक्रियाः कृष्णे स्निग्धाय
वैष्णवास्तु ते प्रणामपूर्व्वकं ता
न्या यो वदेद्वैष्णवो द्विजः तद्
स्वजनवात्सल्यं पूजायाञ्चानुमो
दनं तत्कथाश्रवणे प्रीतिः स्व
रनेत्राङ्गविक्रिया येन सर्व्वात्म
ना विष्णौ भक्त्या भावो निवेशि
तः विप्रेभ्यश्च हरिश्च महाभा
गवतो द्विजः विशेषश्च कारणं
निर्म्मे तदन्नं दम्भवर्जितं स्वयं म

र्व्वजनैश्चैव यो विप्रं चोपजीवति।
भक्तिरष्टविधा ह्येषा यस्मिन्म्लेच्छे
ऽपि वर्त्तते सविप्रेन्द्रो मुनिः श्रीमा
न्स जातः स च पण्डितः । तस्मै
देयं ततो ग्राह्यं स च पूज्यो यथा
हरिः स्मृतः सम्भाषितो वापि पूजि
तो वा द्विजोत्तमः पुनाति भगवद्भ
क्तः स्वपचोऽपि यदृच्छया ॥
प्रपन्नाय प्रपन्नाय तवास्मीति च
यो वदेत् अभयं सर्व्वभूतेभ्यो दद्या
देतद्व्रतं हरेः मद्याजिसहस्रे
भ्यः सर्व्ववेदान्तपारगाः सर्व्ववे
दान्तवित्कोटा विष्णुभक्तो विशि
ष्यते ऐकान्तिकाश्च पुरुषा गच्छ
न्ति परमं पदं एकान्तेनासमो वि
ष्णुर्यस्मादेषां परायणः तस्मादेका
न्तिनः प्रोक्ता स्तद्भागवतचेतसः।
प्रियाणामपि सर्व्वेषां देवदेवस्य
सुप्रियः आपत्स्वपि सदा यस्य भ
क्तिरव्यभिचारिणी यामीति
विवेकानां विषयेष्वनपायिनी ।
विष्णुं संस्मरतः सा मे हृदयान्मोपस
र्पतु अन्तर्गतोऽपि वेदानां सर्व्वशा
स्त्रार्थवेद्यपि यो न सर्व्वेश्वरे भक्त
स्तं विद्यात्पुरुषाधमं ॥
नाधीतवेदशास्त्रोऽपि नकृताध्व
रसंस्तरः यो भक्तिं वहते विष्णौ

4761

तेन सर्व्वं कृतं भवेत् यज्ञानां क्र
तुमुख्यानां सर्व्वेषां पारगः अ
पि नतां याति गतिं भक्ता यां
याति मुनिसत्तम यः कश्चिद्वै
ष्णवो लोके मिथ्याचारोऽप्यनाश्र
मी पुनाति सकलान् लोकान्स
हस्रांशुरिवोदितः ये नृशंसा दु
रात्मानः पापाचाररतास्तथा
तेऽपि यान्ति परंस्थानं नारायण
परायणाः दृढा जनार्द्दने भक्ति
र्य्यैरेवाव्यभिचारिणी तदा किं
स्वर्गसुखैरेव निर्व्वाणहेतुकी
भ्राम्यतां मत्र संसारे नराणां क
र्म्मदुर्गमे हस्तावलम्बनो ह्येको
भक्तितुष्टो जनार्द्दनः नश्रृणोति
गुणान्दिव्यान्देवदेवस्य चक्रिणः
स नरो वधिरो ज्ञेयः सर्व्वधर्म्मब
हिष्कृतः नाम्नि संकीर्त्तिते विष्णो
र्यस्य पुंसो न जायते शरीरं पुल
कोद्भासि तद्भवेत् ज्ञानपापं
यस्मिन्स्मृते द्विजश्रेष्ठ मुक्तिरप्य
चिराद्भवेत् विष्णौ निविष्टमन
सां किं पुनर्वृजिनं ततः स्वपु
रुषमभिवीक्ष्य पाशहस्तं वद
ति यमः किल तस्य कर्णमू
ले परिहर मधुसूदनप्रपन्नान्प्र
भुरहमन्यनृणां न वैष्णवानां ।
अपि चेत्सुदुरा

चारो भजते मामनन्यभाक् सा
धुरेव स मन्तव्यः सम्यग्व्यवसितो
हि सः क्षिप्रं भवति धर्म्मात्मा श
श्वच्छान्तिं निगच्छति विप्रेन्द्र प्र
ति जानीहि विष्णुभक्तो न नश्यति
धर्म्मार्थैः कामैः किं तस्य मुक्ति
स्तस्य करे स्थिता समस्तजगतां
मूले यस्य भक्तिः स्थिरा हरे दैवी
ह्येषा गुणमयी हरेर्माया दुर
त्यया तमेव ये प्रपद्यन्ते माया
मेतां तरन्ति ते किं यदाराधने पुं
सामस्ति ते हरिमेधसः भक्त्यैवा
राध्यते विष्णुर्नान्यत्तत्तोषकारणं
नदानैर्विविधैर्दत्तैर्न पुष्पैर्ना
नुलेपनैः तोषमेति महात्मासौ
यथा भक्त्या जनार्द्दनः सं
सारविषवृक्षस्य द्वे फले ह्यमृतो
पमे कदाचित्केशवे भक्तिस्त
द्भक्तैर्वा समागमः पत्रेषु पु
ष्पेषु फलेषु तोये ष्वक्रीत ल
भ्येषु सदैव सत्सु भक्त्यैकल
भ्ये पुरुषे पुराणे मुक्त्यै कथं न
क्रियते प्रयत्नः आस्फोटयन्ति
पितरः प्रनृत्यन्ति पितामहाः वै
ष्णवोऽस्मत्कुले जातः स नः सन्तारयि
ष्यति अज्ञानिनः सुरवरे समधि
क्षिपन्ति ये पापिनः शिशुपालसु
योधनाद्याः

मुक्तिं गताः स्मरणमात्र विधूत
पापाः कः संशयः परमभक्तिम-
तां जनानां शरणं तं प्रपन्ना ये
ध्यानयोगविवर्जिताः तेऽपि र
स्य मतिक्रम्य यान्ति तद्वैष्णवप
दं भवोद्भव क्लेशशतावृतस्त
था पवित्रमन्निन्द्रिय वल्कलैः
पथैः नियम्यतां माधव मे मनो
ऽस्य त्वदङ्घ्रिपङ्कजे दृढभक्ति
वेधने विष्णुरेव परं ब्रह्मत्रि
भेदमिह पठ्यते वेद सिद्धान्त
मार्गेषु तं नजानन्ति मोहिताः
वसति हृदि सनातने च तस्मि
न्भवति पुमाञ्जगतोऽस्य सौम्य
रूपः क्षिति वसन मतिरम्यमा
त्मनोऽन्तः कथयति चारुतयै
वमानपतेः इति गारुडे २३१
अध्यायः ॥
विष्णुमाया स्त्री दुर्गा यथा।
नारद उवाच दुर्गा नारायणीशा
ना विष्णुमाया शिवा सती नित्या
सत्या भगवती सर्वाणी सर्वमङ्ग
ला अम्बिका वैष्णवी गौरी पार्व
ती च सनातनी नामानि कौथुमो
क्तानि शुभानि शुभदा
नि च अर्थं षोडशानाम्नाञ्च सर्वेषा
मीप्सितं वरं हृदि वेदविदांश्रेष्ठ सर्वेषा
के सर्वे

सम्मतं नारायण उवाच स्रष्टु
माया पुरा सृष्टौ विष्णुना परमा
त्मना मोहितं मायया विश्वं विष्णु
मायाच कीर्त्तिता इति ब्रह्मवैव
र्त्ते प्रकृतिखण्डे ५४ अध्यायः अपिच
ब्रह्मोवाच विष्णुमाया स्तने हृत
महामाया जगन्मयी मात्या मे
मोहकर्त्री स्यात्संध्या सा विष्णुपा
लिका तस्मादहं विष्णुमायां योग
निद्रां जगत्प्रसूं लोमिसा चा
रुरूपेण शंकरं मोहयिष्यति
भवांश्चैव स्ततामेव यजतो विश्व
रूपिणी यथा तव सता भूत्वा
दक्षजाया भविष्यति इति का
लिकापुराणे ५ अध्यायः ॥
विष्णुयशाः पुं ब्रह्मयशाः पुत्रः
सच कल्किपिता यथा नारद
उवाच अहो बलवती माया स
र्वाश्चर्यमयी शुभा पितरं मातरं
विष्णो नैव मुंचति कर्हिचित् ॥
पूर्णो नारायणो यस्य सुतः क
ल्किर्जगत्पतिः तं विहाय विष्णु
यशा मतो मुक्तिं समीप्सति ॥
विविच्येत्थं ब्रह्मसुतः प्राह ब्रह्म
यशाः सुतं विविक्ते विष्णुयशसं
ब्रह्मसंपद्विवर्द्धनं इति कल्कि
पुराणे २ अध्यायः ॥

विष्णुरथः पुं गरुडः इत्यमरः
विष्णोः स्यन्दनश्च ॥
विष्णुरातः पुं परीक्षिद्राजः।
यथा दैवेनाप्रतिघातेन शुक्ले
संस्थामुपेयुषि रातो वोऽनुग्र
हार्थाय विष्णुना प्रभविष्णुना
तस्मान्नाम्ना विष्णुरातो लोके
ख्यातिं गमिष्यति न सन्देहो
महाभाग महाभागवतोमहत्तमः
इति श्रीभागवते १ स्कंधे १२ अध्या॰
विष्णुलिंगी स्त्री वर्त्तिकापक्षी
इति त्रिकाण्डशेषः ॥
विष्णुवल्लभा स्त्री तुलसी। इति
[illegible] राजनिर्घण्टः ॥ लक्ष्मीः
यथा त्रैलोक्य पूजिते मातः क
मले विष्णुवल्लभे यथा त्वमचं
ला कृष्णे तथा भव मयि स्थि
रा इति तंत्रसारः अग्निशिखावृ
क्षः इति शब्दचंद्रिका ॥
विष्णुवाहनः पुं गरुडः इति हेम
चंद्रः ॥
विष्णुवाह्यः पुं गरुडः इति श
ब्दरत्नावली ॥
विष्फारः पुं धनुर्गुणशब्दः इत्य
मरः धनुर्गुणस्य स्वान टंकारो
विष्फारः स्फुरणेच स्फारौचले
घंच

स्यदैधावोदेति निपातः किंवा
स्फुरधातो रूपं विष्कम्भेत्यादिना
पात्विक घत्वा विस्फारो धन्वनस्त्रो
मूर्द्धनपक्ष इति भरतः ॥
विष्यः त्रि विषेण यो वध्यः
इत्यमरः ॥
विष्वः त्रि हिंस्रः इत्युणादिको
षः ॥
विष्वक् व्य परितः सर्वतः।
इत्यमरः ॥
विष्वक् विष्वं इति शब्द
रत्नावली विष्वं अंचति इत्यर्थे
त्रि लिंगं ॥
विष्वक्सेनः पुं विष्णुः इत्यमरः
विष्णोर्निर्माल्यधारी यथा ।
निर्माल्यधारी विष्णोस्तु विष्वक्से
नश्चतुर्भुजः शंख चक्र गदापा
णिर्दीर्घश्मश्रु जटाधरः रक्तपिं
गलवर्णस्तु सितपद्मापरिस्थितः
पत्तीयः स्वरान्तेन संयुतो विन्दु
नेन्दुना कीर्तितं त्वस्य मंत्रोऽ
यं तेन तं परिपूजयेत् इतिका
लिकापुराणे ८२ अध्यायः ॥
त्रयोदशमनुः यथा ततश्च मेरु
सावर्णिः ब्रह्मसूनुर्मनुः स्मृतः स
तश्च स्वतधामा च विष्वक्सेनोम
नुस्तथा इति मात्स्ये ९ अध्यायः

विश्वक्सेनप्रिया स्त्री वाराही
वामारम्यात् इति भाषा इत्य
मरः लक्ष्मीः विश्वक्सेनो विष्णु
स्तस्य प्रिया ॥
विष्वक्सेना स्त्री प्रियंगुः इत्य
मरः
विश्वाणनं क्ली भोजनं इतिज
टाधरः शब्दकरणं यथा विश्व
णाति वीणा इति मुग्धबोधव्या
करणं ॥
विश्वद्र्यङ्ने त्रि सर्वतोगामी वि
श्वगंवति इत्यमरः ॥
विषाणः पुं भक्षणं इति हे
मचंद्रः ॥
विसं क्ली मृणालं इत्यमरः ॥
विसकंठिका स्त्री बलाका इत्य
मरः ॥
विसकुसुमं क्ली कमलं इतिरा
जनिर्घंटः ॥
विसंकटः पुं सिंहः इतिशब्द
चंद्रिका इंगुदीवृक्षः इति राज
निर्घंटः ॥
विसजं क्ली पद्मं विसंमृणाले
तज्जातत्वात् ॥
विसनाभिः पुं पद्मिनी पद्मस
मूहः इति त्रिकांडशेषः ॥
विसप्रसूनं क्ली पद्मं इत्यमरः ॥

विसम्वादः पुं विप्रलंभः इत्य
मरः ॥
विसरः पुं समूहः इत्यमरः ॥
प्रसरः इति मेदिनी ॥
विसर्गः पुं दानं त्यागः मल
निर्गमः विसर्जनीयः सूर्यस्याय
नभेदः इति मेदिनी मोक्षः
इति हलायुधः विसृष्टः । इति
शब्दरत्नावली विपोषस्पृष्टिः यथा
कुरुपानुग्रहीतानां मेतेषां वास
नामयः विसर्गोऽयं समाहारो वी
जाद्दीजंचराचरं ॥
इतिश्रीभागवते विसर्जनीयस्य
पर्यायः अः सर्गो रसना वक्रोवि
सर्गश्च द्विविन्दुकः नादोर्द्धेन्दुर
र्द्धमात्रा कलाराशी सदाशिवः
अनुस्वारान्तरीयाच विष्णुमातृक
लापरा इतिवीजवर्णाभिधानं
अपिच अः कंठकोमहासेनः क
ला पूर्णामृता हरिः इच्छा भद्रा
गणेशश्चरति विघासुखी स्वांव
द्विविन्दु रसना सोमोः निरुद्धोडः
खस्वकः द्विजिकः कुंडलं वक्त्रः
सर्गः शक्तिर्निशाकरः सनुरीसु
यशाननो गणनाथो महेश्वरः इति
वीजवर्णाभिधानान्तरे ॥ अन
ख विसर्गः सर्ग माख्यातो विपहि

4765

पयमानसः अनिरुद्धो महेशा
निकालशोपि रमापिच इति
वर्णाभिधानं ॥
विसर्जनं क्ली दानं इत्यमरः
परित्यागः संप्रेषणं । इति
मेदिनी ॥
विसर्पः पुं रोगविशेषः तत्प
र्यायः ॥ विसर्पिः २ सविवाम
यः ३ इति राजनिर्घंटः तत्रवि
प्रकृष्ट निदानं संख्या निरुक्ति
चाह लवणा कट्वमादि सेवना
द्दोषकोपात्तः विसर्पः समयात्ते
यः सर्वतः परिसर्पणात् ॥
आदिशब्दाच्छरकोक्त हरितशाक
पिंडाक प्रभृतीनां ग्रहणं ॥
समयात्वे विकृणोति पृथकत्र
यस्त्रिभि श्चैको विसर्पो द्वेदशा
स्वयः वातिकः पैत्तिकश्चैवकफ
जः सान्निपातिकः चत्वार एते
वी सर्पा वक्ष्यंते द्वंद्वजा स्वयः
आग्नेयो वात पित्ताभ्यां ग्रन्थ्याख्यः
कफवातजः यस्तु कर्दमकोवा
रः सपित्त कफसंभवः ॥ वि
सर्प दोष दृष्याणि संग्रहमाह र
क्तं लसीका त्वङ्मांस दृष्यं दो
षा स्त्रयो मलाः विसर्पाणां स
मुत्पत्तौ हेतवः सप्तधातवः ॥

त्रयो मलाः वात पित्तकफाः
दोषाः दृषका इत्यर्थः अन्यथा
दोषा मला इत्यत्र पुनरुक्ति दो
षोऽगलिप्यत ॥ वातिक
स्य लक्षणमाह तत्र वातात्परीस
र्पो वातज्वर सम व्यथः शोफस्फु
रण निस्तोद भेदायामार्ति हर्ष
वान् परीसर्पो विसर्पः वात
ज्वर समव्यथः शिरो रुक्कातोद
रशूलादि युक्तः भेदः विदार
णेनेवव्यथा आयामः आकर्ष
णेनेव व्यथा पैत्तिक माह पित्ता
द्रुत गतिः पित्तज्वरलिंगोऽभिलो
हितः द्रुतगतिः शीघ्रप्रसरणशी
शीलः श्लैष्मिकमाह कफात्कंडू
युतः स्निग्धः कफज्वर समानरुक्
सान्निपातिक माह सन्निपातसमु
त्थश्च सर्वरूप समन्वितः वात
पैत्तिकस्याग्नि विसर्पाख्यस्य लक्ष
णमाह वात पित्त ज्वरछर्दि
मूर्च्छातीसार तृड् भ्रमैः अस्थि
भेदाग्निसदन तमकारोचकै र्यु
तः करोति सर्व मंगंच दीप्तांगा
रावकीर्णवत् यं यं देशं वि
सर्पश्च संसर्पति भवेत् स सः
शांतांगारासितो नीलो रक्तोवा
स्वपचीयते अग्निदग्ध इव स्फो

दैः शीघ्रगत्वाल्लुतंच सः समन्ता
त्सारी वीसर्पः स्याद्दतोतिवलस्त
तः व्यथेतांगं हरेत्संज्ञां निद्रांच
श्वासमीरयेत् हिध्मांच संगतोव
स्थामीदृशीं लभते नरः क्वचिल्ल
ब्धारतिग्रस्तो भूमिशय्यासनादि
षु चेष्टमानस्ततः क्लिष्टो मनो
देह समुद्भवां दुःप्रबोधोऽश्नुते
निद्रां सोऽग्निवीसर्प उच्यते स्फोटैः
उपचीयते इत्यन्वयः सर्मान्तसा
रीहृदयानुसारी हरेत्वीसर्पश्च
न्वयः हिध्मां हिक्कां ईरयेत् उ
त्तं श्रयेत् मनोदेहसमुद्भवां नि
द्रां मरणारूपां प्रश्नुते प्राप्नोति
वातश्लैष्मिक ग्रन्थिविसर्पमाह
कफेन रुद्धः पवनो भित्वा तं बहु
धा कफं रक्तं वाहृद्ध रक्तस्य त्व
क्शिरा स्नायुमांसगं ॥
दूषयित्वा तु दीर्घवृत्तस्थूल
खरात्मनां ग्रन्थीनां कुरुते मा
लां कृत्वा तीव्ररुग्ज्वरश्वासका
सास्य वैरस्य शोष हिक्का वमि
भ्रमैः मोह वैवर्ण्य मूर्च्छांगभंग
ग सदनै युतः इत्ययं ग्रन्थिवीस
र्पो वात श्लेष्म प्रकोपजः कफेन
स्वहेतुदुष्टेन पवनोपि स्वहेतुदु
ष्टः तेना वातश्लैष्मिकः तं कफ

वहुधा भित्वा रक्तं वा दूषयित्वा
इत्यन्वयः त्वगादिकमिति रक्तवि
शेषणं पित्त श्लैष्मिकं कर्दमाख्य
विसर्पमाह कफपित्त ज्वरस्तंभो
निद्रा तन्द्रा शिरोरुजा अंगाव
साद विक्षेप प्रलापारोचकभ्रमाः
मूर्च्छाग्नि हानि भेदोऽस्थ्नां पिपा
सेन्द्रिय गौरवं आमोपवेशनं ले
प स्रोतसांच विसर्पति ॥
प्रायेणामाशये गृह्णन्नेकदेशं
नचातिरुक् पिडकैः रवकीर्णोति
पीतलोहित पाण्डुरैः स्निग्धो सितो
मेचकाभो मलिनः शोफवान् गु
रुः गंभीरपाकः प्राज्योष्माक्लिन्नः
क्लिष्टो विदीर्य्यते पंकवच्छीर्णा
मांसस्पष्टस्नायु शिरागणः
शवगन्धिश्च वीसर्पः कर्दमाख्य
मुशन्तितं सव सर्पति एकदेश
मित्यन्वयः पिडकैः पिडकाभिः
अवकीर्णः व्याप्तः असितः कृष्णः
मेचकः कृष्णतमः प्राज्योष्मा प्रचुरो
ष्मा स्पृष्टः क्लिन्नोवदीर्यते स्पृष्टः स
न्नार्द्रो भवति विदीर्यते च पंक
वत् कर्दमवर्णोत्पन्न सः ।
शीर्णमांसः गलितमांसः अतएव
स्पष्टस्नायु शिरागणः ॥ सान्नि
पातिकमाह सन्निपात समुत्थस्त

सर्वरूप समन्वितः ॥ क्षतजंच
विसर्पमाह बाह्यहेतोः क्षतात्क्रुद्धः
सरक्तं पित्तमीरयन् । वीसर्पं
मारुतः कुर्यात्कुलत्थसदृशैश्चितः
स्फोटैः शोथ ज्वररुजादाहाढ्यं श्या
वशोणितं । बाह्यहेतोः शस्त्र
प्रहार व्यालदन्त नखाद्यभिघातहे
तोः प्रपावशोणितैः पूर्ववर्णारक्तं
उपद्रवानाह ज्वरातीसार वमथुस्त्व
ङ्मांसदारणक्लमाः अरोचक विपा
कौच विसर्पाणा मुपद्रवाः साध्यत्वा
दिक माह सिध्यंति वात कफपित्त
कृता विसर्पाः सर्वात्मक क्षतकृतश्च
न सिद्धि मेति पित्तात्मकोऽञ्जनवपुः
श्च भवेदसाध्यः कृच्छ्राश्च मर्मसु
भवंतिच सर्व एव पित्तात्मकोऽजन
वपुः पित्तजः सन्कज्जलवर्णः ।
सर्वएवासाध्या अपि ॥
अथविसर्पस्य चिकित्सा विरेक
वमनालेप सेचनास्त्र विमोक्षणैः
उपाचरेद्यथादोषं विसर्पानवि
दाहिभिः रास्ना नीलोत्पलं दारु
चंदनं मधुकं बला । घृतक्षी
रयुतो लेपो वातवीसर्प नाशनः
चंदनं मंच रक्तं यष्टी कसेरुकं
शृङ्गाटक पद्म गुन्द्रैः सशैवलैः ।

सोत्पल कर्दमैश्च वस्त्रान्तरैः
पित्त कृते विसर्पे लेपो वि
धेयः सघृतः सुशीतः त्रिफला
पद्मकोशीर समंगा करवीरकं
नलमूल मनन्ताच लेपः श्लेष्म
विसर्पघ्ना समंगानलजाल्लः वात
पित्तप्रशमन मग्नि वीसर्पणो
हिते वातश्लेष्महरं कर्मग्रंथि वी
सर्पणो हिते पित्त श्लेष्म प्रशम
ने हितं कर्दमसंज्ञके त्रिदोषजे
क्रिया कुर्यात्विसर्पे त्रिफलापद्म
शिरीषपद्मी नत चंदनैला मांसी
हरिद्राहयकुष्ठ वालैः लेपो दशा
गः सघृतः प्रयोज्यो विसर्पकुष्ठज्वर
शोथहारी नतं तगरं चंदनं मंज
रक्तयष्टी दशाङ्गोलेपः ॥
परिषेकाः प्रलेपाश्च शस्यंते प
ञ्चवल्कलैः पद्मकोशीर मधुकं
चंदनैला विसर्पघ्नो भूनिम्बसि
द्धः विसर्प दाह ज्वर शोषकं
डू विस्फोट तृष्णा वमिहृत्क
षायः कुष्ठानि यानि सर्पींषि व्र
णाधिविधिषुच विसर्पे तानियो
ज्यानि सेकालेपन भोजनैः
कसेरु सप्तच्छद लांगलीक स्नु
हीकंटकर्यानल भृंगराजैः तैलंनि

शामूत्रविषे विपकं विसर्प
विस्फोटविचर्चिकाञ्च करञ्जादि
तैलं कुष्ठमय स्फोट मसूरि-
कोक्तचिकित्सयाप्याशु हरेद्धि
सर्पान् विकारान्बुधिशोध्यथो
मान् व्रणं क्रमेणोपचरेद्यथो
क्तं इति विसर्पाधिकारः इति
भावप्रकाशः ॥
विसर्पणं क्ली प्रसरः इत्यमरः
तन्तु व्रण विदपादे विसर्पणं
इति भरतः ॥
विसर्पिः पुं विसर्पः इतिरा-
जनिर्घण्टः ॥
विसलं क्ली पल्लवः इति त्रि-
काण्डशेषः ॥
विसारः पुं मत्स्यः इत्यमरः।
विसारिणी स्त्री माषपर्णी इ-
तिराजनिर्घण्टः ॥
विसारितः त्रि प्रसारितः वि
पूर्व स्यन्तु स्थातोः क्त प्रत्यये
न निष्पन्नः विसारी त्रि प्रसर
णशीलः तत्पर्यायः विसृत्वरः
२ विसृमरः ३ प्रसारी इत्यमरः
विसिनी स्त्री पद्मिनी इत्यमरः
मृणालं इति राजनिर्घण्टः ॥
विसृतिं क्ली अनुतापः इति

जटाधरः ॥
विसृतं त्रि विस्तृतं । इत्यमरः
विसृत्वरः त्रि प्रसरणशीलः इत्य
मरः विसरणं गतिविशेषः ।
विसृत्वरो नदः विसृत्वरी नदी
विसृत्वरं तैल मित्यादि विसर
ति विसृत्वरः सृगतौ त्वरपसृजी
णिति त्वरप्रत्यय तत्पिति तन
इति भरतः ॥
विसृमरः त्रि प्रसरणशीलः इत्य
मरः ॥
विसृष्टः त्रि निक्षिप्तः इति जटा
धरः विशेषेण सृष्टश्च ॥
विस्तः पुं क्ली हेम्नोऽक्षः अशी
तिरक्तिका परिमित स्वर्णं इत्य
मरः ॥
विस्तरः पुं शब्दस्यविस्तारः इत्य
मरः वाक्यप्रपंचः विस्तारः ॥
प्रणयः इति मेदिनी पीठः
समूहः इति शब्दरत्नावली ॥
विस्तारः पुं विटपः विस्तीर्णता
तत्पर्यायः विग्रहः २ व्यासः ३
इत्यमरः स्तम्बः इति मेदिनी ॥
विस्तीर्णः त्रि विपुलं विस्तृतं
यथा विस्तीर्णो विकटं वडं वि
शालं विपुलं पृथु इति जटाधरः
विस्तीर्णपर्णी क्ली मानकं इति

4769

शब्दचन्द्रिका ॥
विस्तृतः त्रि लब्धविस्तारः त
त्पर्यायः विस्तृतं २ ततं ३ इत्य
मरः ॥
विस्पष्टः त्रि सुस्पष्टः यथा वि
स्पष्ट मद्भुत प्रान्ते स्पष्टतरपदं
तथा कलम्बर समायुक्तं रसभा
वसमन्वितं इति तिथ्यादितत्वं
विस्फारः पुं धनुर्गुणशब्दः इत्य
मरः अस्य विवरणं मूर्द्धन्यषकार
मध्य विष्कारशब्दे द्रष्टव्यं ॥
विस्फारितः त्रि प्रकाशितः च
लितः वि पूर्व ण्यन्त स्फर धातोः
क्त प्रत्ययेन निष्पन्नः ॥
विस्फुरितः त्रि स्फूर्तिविशिष्टः
चंचलः यथा रक्तरक्त कृताङ्गोच
रक्त विस्फुरितेक्षणा वेष्टितेना
गपाशेन भ्रुकुटी भीषणानने
इतिदशभुजादुर्गाध्यानेकदेशः ॥
विस्फुलिंगः पुं विषभेदः । इति
हेमचन्द्रः अग्निकणश्च ॥
विस्फोटः पु विरुद्धस्फोटकः वि
स्फोड़ा इति भाषा तत्पर्यायः।
पिटकः २ पिटका ३ पिटकं ४
इत्यमरः विटकः ५ विटका ६
विटकं ७ इतितट्टीका स्फोटकः
८ स्फोटः ९ इति राजनिर्घण्टः॥

तस्य विप्रकृष्टनिदान पूर्विका
संप्राप्तिमाह कट्वम्ल तीक्ष्णोष्ण
ल विदाहि रूक्ष क्षारै रजीर्णाध्य
शनातपैश्च तथर्तुदोषेण विप
र्ययेण कुप्यन्ति दोषा पवना
दयस्तु त्वच माश्रित्य ते रक्तमां
सास्थीनि प्रदूष्यच घोरान्कुर्व
न्ति विस्फोटान्सर्वज्वर पुरःसरा
न् रक्तदोषेण रक्त हेतुकशी
तोष्णादीनामतियोगेन रक्तवि
तोद्धार विहार वैपरीत्येन त्वच
माश्रित्य विस्फोटान्कुर्वन्तीत्यर्थः
ज्वरपूर्वः सरान् ज्वरपूर्वान् उपमा
ह अग्निदग्ध निभाःस्फोटाः सज्व
रा रक्त पित्तजाः क्वचित्सर्वत्र
वादेहे विस्फोटा इतितेस्मृताः
रक्तपित्तजाः पतेन सर्वेषु विस्फो
टेषु रक्तपित्तयोः प्रधानकारणत्वं
यथा शूलेषु वातस्य तथा वात
जुगति रपि बोद्धव्या तथाचभो
जः यदा रक्तंच पित्तंच वातेना
नुगतं त्वचि अग्निदग्धनिभास्फो
टान्कुरुतः सर्वदेहभागान् ॥
वातिकमाह शिरोरुक्शूलभू
यिष्ठ ज्वर तृट् पर्वभेदन सकृ
ष्णवर्णत्वं चेति वात विस्फोटलक्ष
णं शूल मंत्र तोदचूर्णं पैत्तिकमा
ह ज्वर दाह रुजा पाकःस्राव

रक्तासमन्वितं पीत लोहित
वर्णंच पित्त विस्फोट लक्षणं
रुजादित्रयं स्फोटेषु वात पै
त्तिक मारु वात पित्त कृतोय
स्तु तत्र स्यु तीव्रवेदनाः श्लेष्मि
क गौरवं कंडू भवेद्वात वलो
त्सजे पित्त श्लेष्मकमारु कंडूरो
दोज्वर छर्दिर्जायते कफ पैत्ति
के सान्निपातिक मारु मध्ये नि
म्नोन्नत स्फोटः कठिनः स्वल्पपा
कवान् दाग दाह तृषा मोहच्छ
र्दि मूर्च्छारुजा ज्वराः प्रलापो वे
पथु यन्द्रसोऽसाध्यश्च त्रिदोषजः
मोहो विपरीतज्ञानं मूर्च्छा सर्व
था ज्ञानशून्यता रक्तज मारु ।
वेदितव्याश्च रक्तेन पैत्तिकेनच
हेतुना गुंजा फल समा रक्ता र
क्तस्रावा विदाहि न ते सिद्धि
समायाति युद्धे योगशतै रपि
पैत्तिकेन च हेतुना पित्तस्य हे
तुना कट्वादिना रक्तस्य पित्त
स्य तुल्यत्वाच्च तेऽसाध्याः एते
चाष्टविधा वाह्या आन्तरापि भवे
दयं तस्मिन्नंत येथा तीव्रा ज्वर
मुक्ताश्चिजायते तस्मिन्वहिर्गते
स्वास्थ्यमन्तर्यानस्य वहिर्गतिः त
त्र वातिक विस्फोट क्रिया कार्या
विजानता

उपद्रवानाह तृट्श्वासमांससंको
थ दाहहिक्का मद ज्वराः विसर्प
मर्मसंरोधा स्तेषा मुक्ता उपद्रवाः
मांसस्य कोथः मांसस्य शटितत्वं
मर्मसंरोधो मर्मव्यथा तेषां विस्फो
टकानां केचिदुपद्रवाणां लक्षणा
न्तरे पठंति हिक्का श्वासोऽरुचि
स्तृष्णा स्वांगमर्दो हृदिव्यथा वि
सर्पज्वर हृल्लासा विस्फोटाना मु
पद्रवाः साध्यत्वादिक मारु एक
दोषोत्थितः साध्यः कृच्छ्रसाध्यो
द्विदोषजः सर्वरूपान्वितो घोरो ह्य
साध्यो भूर्यु पद्रवः अथ विस्फो
टस्य चिकित्सा विस्फोटे लंघनं
कार्यं वमनं पथ्य भोजनं यथा
दोष वलं वीक्ष्य प्रयुंजाच्च विरेच
नं जीर्णः शालि यवा मुद्गा मस
राश्चाढकी तथा पथ्यान्यन्नानि वि
स्फोटे हितानि मुनयो ब्रुवन्
हे पंचमूल्यौ रास्ना च दारुशीरं
दुरालभा गुडूची धान्यकं मुस्त
मेषां क्वाथं पिबेन्नरः विस्फोट
नाशयत्याशु समीरण निमित्तका
न् द्राक्षा काश्मर्य खर्जूर पटोला
रिष्ट वासकैः कटुका लाजदुस
र्भैः पैत्तिके सशितं शृतं ।
भूनिम्ब सवचा वासा त्रिफलेंद्रस

वत्सकैः पिचुमर्द पटोलाभ्यां कफ
जे मधुयुक्स्मृते ॥ किरा
ततिक्त कारिष्ट यष्ट्याह्वामृत वा
सकैः पटोल पर्पटोशीर त्रिफ
ला कोटजान्वितैः क्वथितै द्वंदजा
गत सर्व विस्फोट नाशनं वि
स्फोटव्याधिनाशाय तंडुलावुद पे
षितैः वीजैः कुटज वृक्षस्य लेपः
कार्यो विजानता ॥ छिन्ना
पटोल भूनिम्ब वासकारिष्ट पर्प
टैः खदिराब्दयुतैः क्वाथो हंति वि
स्फोटकं ज्वरं ॥ चन्दनं नाग
पुष्पंच सारिवा तंडुलीयकं शि
रीष वल्कलं जाती लेपः स्याद्दाहना
शनः उत्पलं चंदनं लोध्रमुशीरं सारि
वा द्वयं जलेन पिष्टं लेपन स्फोटदा
हार्तिनाशनं पुत्रजीवस्य मज्जानं ज
लेपिष्ट्वा प्रलेपयेत् काल स्फोटं
विषस्फोटं सद्यो हन्यात्सवेदनं ॥
कक्षाग्रंथिं गलग्रंथिं कर्णग्रंथिं च
नाशयेत् अन्यच्च स्फोटकं तांश्च
पुत्रजीवो विनाशयेत् इति वि
स्फोटकाधिकारः इति भावप्रका
अन्यच्च मरीचं त्रिवृतं कुष्ठं ह
रिताल मनःशिला देवदारु हरि
द्रे द्वे कुष्ठं मांसी च चन्दनं ॥

विशाला करवीरंच अर्कक्षीरं सकृ
मलं एषांच कार्षिको भागो विष
सार्हपलं भवेत् ॥ प्रस्थं क
टुकतैलस्य गोमूत्रेश्चतुर्गुणे पचेत्
मृत्पात्रे लौहपात्रेवा शनैः स्ने
ग्निना पचेत् पामा विचर्चिका
चैव दद्रु विस्फोटकानिच अस्य
भ्यंगेन प्रणश्यंति कोमलत्वंच जा
यते प्रस्तुतान्यपि श्वित्राणि तैले
नानेन म्रक्षयेत् चिरोत्थितमपि श्वि
त्रं विवर्णं तत्क्षणाद्भवेत् अपि
च भूनिम्ब निम्ब त्रिफला पर्पटैश्च
शृतं जलं पटोल मुस्तकाभ्यां च
वासकेनच नाशयेत् विस्फोटका
नि यक्ता निनात्र कार्या विचार
णा इतिगारुडे १९८ अध्यायः
विस्फोटकस्य स्वरूपं यथा स्फो
टाः श्यावारुणा भासा विस्फाराः
स्युस्तनुत्वचः इति भावप्रकाशः
विस्मयः पुं आश्चर्यं तत्पर्यायः
अहो २ ही २ इत्यमरः अस्मदद्भुत
शब्दे द्रष्टव्यं अद्भुतो विस्मयस्था
यिस्मयस्याविभावो गंधर्व दैव
तः पीतवर्णो वस्त्र लोकाति
गमालम्बने मतं इति भाव
रसयोः पर्यायत्वं अद्भुतस्य वि

स्मयस्याधिभावात्मकत्वात् इति
भरतः तल्लक्षणं । यथा ।
विविधेषु पदार्थेषु लोकसीमा
तिवर्त्तिषु विस्फारश्चेतसो यस्तु
स विस्मय उदाहृतः इति साहि
त्यदर्पणं दर्पः इति मेदिनी ॥
सन्देहः इति शब्दरत्नावली ॥
विस्मयान्वितः त्रि विस्मययुक्तः
आश्चर्यविशिष्टः तत्पर्यायः वि
लक्षः २ इत्यमरः ॥
विस्मापनः पुं कुहकः गंधर्व
नगरं कामदेवः इति मेदि
नी विस्मायनञ्च ॥
विस्मितः त्रि विस्मयान्वितः ।
यथा मुदापाशुपतान्दृष्ट्वा समु
त्थाय महेश्वरः सपरिष्वज्य तत्व
कं वेश्मगं महेश्वर ततस्तद
द्भुततमं दृष्ट्वा सर्वगणेश्वराः
सुविस्मिता स्तदा सर्वेः किमिदं
चिन्तयन्निति विस्मितांस्तान्गणा
णान्दृष्ट्वा शैलादिर्योगिनांवरः
प्राह प्रहस्य देवेशं शूलपाणिं
गणाधिपः विस्मितामीगणा
देव सर्वएव महेश्वर महापाशु
पतानांहि यत्त्वयालिङ्गनेकृतं
इतिवामने ९८ अध्यायः ॥
विस्मितिः स्त्री विस्मरणं विपूर्व
स्मिधातो र्भावे क्तिः प्रत्ययेननि
ष्पन्ना ॥
विस्मृतः त्रि स्मरणाविषयः त
त्पर्यायः अन्तर्गतं २ इत्यमरः ॥
विस्मृतिः स्त्री विस्मरणं विपूर्व
कस्मृधातोः क्तिः प्रत्ययेन निष्पन्ना
विस्रं क्ली आमगन्धि इत्यमरः ॥
इदं विताभूमादि गन्धे अपक्वमांस
गन्धे इत्यन्ये इति भरतः ॥
विस्रगन्धा स्त्री हपुषा इति राज
निर्घंटः ॥
विस्रगन्धिः पुं हरितालं । इति
हेमचंद्रः ॥
विस्रब्धः त्रि विश्रब्धः इतिकेचि
त् विस्रम्भः पुं विश्वासः प्रणयः
इत्यमरः प्रणयः परिचयः शृंगार
प्रार्थनावा परिचय प्रार्थनयोः
प्रणयः परिकीर्त्तितः इत्यमरमा
ला प्रणयः क्रीडापारतंत्र्यं ।
इति रमानाथः इति तट्टीकायां
भरतः केलिकलहः वधः
इति हेमचंद्रः ॥
विस्रम्भी न् त्रि विश्वासी प्रण
यी विस्रम्भ शब्दादस्त्यर्थे णिन्
प्रत्ययेन निष्पन्नः ॥
विस्रसा स्त्री जरा इत्यमरः ॥
विस्रा स्त्री हपुषा इति राजनिर्घंटः

विस्रुतः त्रि विस्रुतः विपूर्वक
स्रुधातोः क्त प्रत्ययेन निष्पन्नः ॥
विहगः पुं पक्षी इत्यमरः ॥
बाणः सूर्यः चंद्रः इति शब्द
रत्नावली ग्रहः इति धरणी
विहंगः पुं पक्षी इत्यमरः ॥
बाणः मेघः चंद्रः सूर्यः ।
इति शब्दरत्नावली ॥
विहंगमः पुं पक्षी इत्यमरः ॥
विहंगमा स्त्री भारयष्टिः वाक
इतिभाषा इति शब्दरत्नावली
विहंगराजः पुं गरुडः इति ।
हलायुधः ॥
विहंगिका स्त्री भारयष्टिः वाँक
भाषा इत्यमरः ॥
विहत् स्त्री गर्भोपघातिनी गौः
इति संक्षिप्तसारोणादिवृत्तिः ॥
विहतः त्रि विशेषेण हतः विन
ष्टः विपूर्वक हन धातोः क्त
प्रत्ययेन निष्पन्नः ॥
विहननं क्ली विघ्नः हिंसा ॥
तूलपिंजलः । इतिमेदिनी ॥
विहरः पुं वियोगः ॥ इतिह
लायुधः ॥
विहरणं क्ली विहारः विपूर्व
कहृधातो रनट् प्रत्ययेन निष्प
न्नं विहसितं क्ली मध्यमहास्यं इत्य
मरः ॥
विह्वलः त्रि व्याकुलः इत्यमरः
पंडितः इति मेदिनी विकरः
पंडे पुं इति शब्दरत्नावली ॥
विहाय सर्गः इति सिद्धांतकौ
मुद्यां सुपादिवृत्तिः ॥
विहापितं क्ली दानं इत्यमरः
विहायः स् क्ली पुं आकाशः इ
त्यमरः ॥
विहायाः स पुं पक्षी इत्यमरः ॥
विहायसं क्ली पुं आकाशः इ
त्यमरटीकायां मथुरेशः ॥
विहायसः पुं पक्षी इत्यमर
टीकायां भरतः ॥
विहायसा व्य आकाशः इत्य
मरटीकायां मथुरेशः हेमचंद्र
श्च ॥
विहारः पुं क्रीडार्थं पद्भ्यां ग
मनं तत्पर्यायः परिक्रमः
२ इत्यमरः भ्रमणं स्कंधः
लीला सुगतालयः इति
मेदिनी विन्दुरेखकपक्षी इति
शब्दचंद्रिका वैजयंतः इति
शब्दमाला ॥
विहारी न् त्रि परिक्रमी विहार
कर्त्ता विहार शब्दादस्त्यर्थे इन्
प्रत्ययेन निष्पन्नः ॥

विहितः त्रि विधेयः यथा वि
हितस्याननुष्ठानात् निन्दितस्य
च सेवनात् अनिग्रहाच्चेन्द्रियाणां
नरः पतन मृच्छति इति प्राय
श्चित्ततत्त्वं ॥
विहितिः स्त्री विधानं यथा
हिति विजिति क्षिति विहिति
व्रततयः परगतयः उरु रुरुधु
गुरु इषुधु धुपि ऊरवः स्वमरि
ऊलं इति दंडी ॥
विहीनः त्रि विशेषेण हीनः ।
यथा योषा न्यासविहीनो यः
प्रणमेद्देवि पार्वती सोऽचिरान्मृ
त्युमाप्नोति नरकंच प्रपद्यते ॥
इति तंत्रसारः त्यक्तः यथा
विहीनश्च धनै र्दारैः पुत्रैः दारा
य मेधने वन मभ्यागतो दुः
खीनिरस्त श्चाप्तबन्धुभिः इति
मार्कण्डेयपुराणे देवीमाहात्म्यं
विहृतं क्ली स्त्रीणां स्वाभावि
किदशालंकारान्तर्गतालंका
रविशेषः यथा लीला विलासो
विच्छित्ति र्विव्वोकः किलकिंचि
तं मोट्टायितं कुट्टमितं ललितं
विहृतं तथा विभ्रमश्चेत्यलंका
राः स्त्रीणां स्वाभाविका दश इति
हेमचंद्रः विहृतिः स्त्री विशेषेण
हरणं

विशेषेण बलात्कारः विपूर्वस्य
धातोः क्तिः प्रत्ययेन निष्पन्ना ॥
विहेठः पुं विहेठनं विपूर्वहेठधा
तो र्घञ्प्रत्ययेन निष्पन्नः ॥
विहेठनं क्ली हिंसा मर्दनं ॥
विडम्बनं इति मेदिनी विबाधा
इति त्रिकाण्डशेषः ॥
विह्वलः त्रि भयादिनाभिभूतः
स्वांगधारणाशक्तः तत्पर्यायः ।
विक्लवः २ इत्यमरः विलीनः ।
इति हेमचंद्रः ॥
विततः पुं विशेषेण ततः वि
पूर्वक तनधातो क्त प्रत्ययेन
निष्पन्नः ॥
विरावः पुं शब्दः इत्यमरः ॥
कासः इति स्वामि कलिंगौ इति
भरतः ॥
विक्षिप्तः त्रि त्यक्तः वि पूर्वक्षि
पधातोः क्त प्रत्ययेन निष्पन्नः विक्षी
दः पुं अर्कवृक्षः इति राजनिर्घ
टः ॥
विक्षेपः पुं प्रेरणं त्यागः ।
विक्षेपणं यथा नैरृत्या मिषु
विक्षेप मतीत्य हाधिकं भवं ।
इत्याह्निकाचारतत्त्वं अवि
द्यीय वस्तुनवलम्बनेन चित्तस्या
न्यावलम्बनं इति वेदान्तसारः

विक्षेपशक्तिः स्त्री माया शक्तिः
यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्व
शक्त्या सर्पादिक मुद्भावयति एवं
अज्ञान मपि स्वावृतात्मनि तथा
विक्षेप शक्त्या आकाशादि प्रपं
च मुद्भावयति तादृशं सामर्थ्यं
इति वेदान्तसारसुबोधिनीटीका ॥
वी ल इलवत् कांति गति व्या
प्ति क्षेप प्रजन खादने इतिक
विकल्पद्रुमः लवेति इति दुर्गादा
सः वीः पुं गमनं इत्येकाक्षर
कोषः ॥
वीकः पुं वायुः पक्षी इत्यु
णादिकोषः मनः इति संक्षि
प्तसारोणादिवृत्तिः
वीकाशः पुं रहः प्रकाशः
इत्यमरः ॥
वीङ्खा स्त्री शूकशिम्बी गतिभेदः
नर्त्तनं इति हेमचंद्रः ॥
अश्वगतिभेदः सर्पिः इति शब्द
रत्नावली ॥
वीचिः पुं स्त्री तरंगः इत्यमरः
स्वल्पतरंगः अवकाशः सुखं इ
ति मेदिनी अल्पः इति हेमचंद्रः
किरणः इति जटाधरः ॥
वीची स्त्री वीचिः इत्यमरटीका

भरतः ॥
वीचीतरंगः पुं न्यायविशेषः ।
स तु श्रोत्रे शब्दस्य उत्पत्ति का
रणरूपः यथा वीचीतरंग न्या
येन तदुत्पत्तिस्तु कीर्तिता कद
म्बगोलक न्यायादुत्पत्तिः कस्यचि
न्मते इति भाषापरिच्छेदः ननु
मृदंगाद्यवच्छेदेनोत्पन्ने शब्दे श्रो
त्रे कथ मुत्पत्तिरित्यत आह वी
चीति आद्य शब्देनैव शब्दे
न जन्यते तेन चापर स्तज्जापक
एवं क्रमेण श्रोत्रोत्पन्नो गृह्यते
इति कदम्ब इति आद्य शब्दाद्
शदिक्षु दशशब्दा उत्पद्यन्ते तैश्चान्ये दशशब्दा उत्पद्यन्ते इ
ति भावः अस्मिन्कल्पे गौरवा
युक्तं कस्यचिन्मते इति सिद्धा
न्तमुक्तावली ॥
वीजं क्ली कारणं शुक्रं इत्य
मरः अंकुरः तत्त्वाधानं इति
मेदिनी मज्जा इति राजनिर्घ
ण्टः गणितविशेषः यथा उ
त्पादकः यत्प्रवदंति बुद्धे रधिष्ठि
तं सत्पुरुषेण सांख्याः व्यक्तस्य
कृत्स्नस्य तदेक वीजं मव्यक्तमी
शं गणितं च वंदे इवं मोक्तं

सविदिर्देश
दिगवच्छिन्नो
त्पत्स्यशब्द

यक्ष मयक्ष बीजं मायःश्रश्चा
नोविना यक्ष पुरुषा लातं प्र
क्वामंदधीभि नितान्तं यस्मा
तस्माद्यक्षिवीज क्रियाच इतिभा
स्कराचार्यविरचिते सिद्धांतशिरो
मणौ बीजगणिताध्यायस्य प्र
थम द्वितीयश्लोको मंत्रः यथा
अथभुवनेश्वरीमंत्रः नकुलीशो
ऽग्निमारूढो वामनेत्रोर्द्धचंद्रवा
न् बीजं तस्याःसमाख्यातंसेवि
तंसिद्धिकांक्षिभिः नकुलीशोह
कारः अग्नी रेफः वामनेत्र मी
कारः अर्द्धचंद्रोऽनुस्वारःह्रीं ॥
अन्नपूर्णाया बीजं ह्रीं नमोभ
गवति माहेश्वरि अन्नपूर्णेस्वाहा
अथ त्रिपुरा बीजं श्रीं ह्रीं क्लीं
त्वरिता बीजं ॐ ह्रीं हुं खेच
छे क्ष स्त्रीं हुं क्षे ह्रीं फट्।
अथ नित्या बीजं ऐं क्लीं नित्य
क्लिन्ने मद द्रवे स्वाहा वज्र
प्रस्तारिण्याः ऐं ह्रीं नित्यक्लि
न्नेमदद्रवे स्वाहा अथ दुर्गावी
जं ॐ ह्रीं दुं दुर्गायै नमः महिष
मर्दिनी बीजं ॐ महिषमर्दिनि
स्वाहा जयदुर्गाबीजं ॐ दुर्गे दुर्गे
रक्षणि स्वाहा शूलिनीबीजं ज्वल
ज्वल शूलिनि दुष्टग्रह

ॐ फट् स्वाहा वागीश्वरी बीजं
वद वद वाग्वादिनि स्वाहा ॥
पारिजातसरस्वती बीजं ॐ ह्रीं
ह्सौं ॐ ह्रीं सरस्वत्यै नमः ॥
गणेश बीजं गं हेरम्ब बीजं।
ॐ गं नमः हरिद्रागणेश बीजं
ग्लं लक्ष्मी बीजं श्रीं। महा
लक्ष्मी बीजं ॐ ऐं ह्रीं श्रीं क्लीं ह्सौः
जगत्प्रसूत्यैनमः सूर्य बीजं ॐ
घृणि सूर्य आदित्य ॥ श्रीराम
बीजं रां रामाय नमः जानकी
वल्लभाय हुं स्वाहा विष्णु बीजं
ॐनमो नारायणाय श्रीकृष्ण
बीजं गोपीजन वल्लभाय स्वाहा
वासुदेवस्य ॐनमो भगवतेवा
सुदेवाय बालगोपालस्य ॐ क्लीं
कृष्णाय लक्ष्मी वासुदेवस्य।
ॐ ह्रीं ह्रीं श्रीं श्रीं लक्ष्मी वासु
देवायनमः दधिवामनस्य ॐ नमो
विष्णवे सुर पतये महाबलायस्वा
हा हयग्रीवस्य ॐ उद्गिरत्प्रणवो
द्गीथ सर्ववागीश्वरेश्वर सर्ववेदम
याचिन्त्य सर्वं बोधय बोधय ॥
नृसिंहस्य क्ष्रौं बीजं महा विष्णुं
ज्वलन्तं सर्वतोमुखं नृसिंहं भीष
णं भद्रं मृत्युं नमाम्यहं नरहरि
बीजं श्रीं ह्रीं क्ष्रौं हुं

फट् हरि हरस्य ॐ ह्रीं ह्रौं
शंकर नारायणाय नमः ह्रौं ह्रीं
ॐ वराहस्य ॐनमो भगवतेव
राहरूपाय भूर्भुवः स्वःपतये भूप
तित्वं मे देहि ददापयस्वाहा ॥
शिवस्य ह्रौं मृत्युंजयस्य। ॐ
जूं सः दक्षिणामूर्त्तिबीजं ॐ
नमो भगवते दक्षिणामूर्त्तयेमह्यं
मेधां प्रयच्छ स्वाहा चिन्ताम
णिबीजं रक्ष म्र्यूं ॐ हुं ॥
नीलकंठस्य प्रों ग्रीं ठः नमः
शिवाय चंडस्य चूं ष फट् क्षे
त्रपालस्य ॐक्षौं क्षेत्रपालायनमः
बटुकभैरवस्य ॐ ह्रीं बटुकाय
ह्रीं त्रिपुरायाः हसकलह्रीं हस
रौंः सम्पत्प्रदाभैरव्याः हसरैं।
हसकलह्रीं हसरौं कौलेश भै
रव्याः सहरैं सहकलह्रीं।
सहरौं भयविध्वंसिनीभैरव्याः
हसैं हसकलह्रीं हसौं ॥
सकलसिद्धिदा भैरव्याः सहैं
सहकलह्रीं सहौ चैतन्यभैर
व्याः सहैं सकलह्रीं।
सहरौः कामेश्वरी भैरव्याः
सहैं सकलह्रीं नित्यक्लिन्नेमद

द्रवे सहरौः षट्कूटाभैरव्याः ड
रवलकसहैं डरलकसह्रीं।
डरवलकसहौं नित्याभैरव्याः
हसकलरडैं हसकलरडीं हसक
लरडौं रुद्रभैरव्याः हसखफ्रें
हसकलह्रीं। हसौः ॥
भुवनेश्वरीभैरव्याः हसैं।
हसकलह्रीं हसौः सकलेश्व
र्योः सहैं सहकलह्रीं सहौः
त्रिपुराबालायाः ऐं क्लीं सौः
नवकूटाबालायाः ऐं क्लीं सौः
हसैं हसकलह्रीं हसौः।
हसरैं हसकलह्रीं हसरौः ॥
अन्नपूर्णा भैरव्याः ॐ ह्रीं श्रीं क्लीं
नमो भगवति माहेश्वरि अन्नपू
र्णेस्वाहा श्रीविद्यायाः कएईल
ह्रीं हसकहल ह्रीं सकल ह्रीं
छिन्नमस्तायाः श्रीं क्लीं हुं ऐं व
ज्रवैरोचनीये हुं हुं फट् स्वाहा
श्यामायाः क्रीं क्रीं क्रीं हुं हुं
ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं
क्रीं हुं हुं ह्रीं ह्रीं स्वाहा ॥
गुह्यकालिकायाः क्रीं क्रीं क्रीं
हुं हुं ह्रीं ह्रीं गुह्ये कालिके क्रीं
क्रीं क्रीं हुं हुं ह्रीं ह्रीं स्वाहा
भद्रकाल्याः क्रीं क्रीं क्रीं हुं हुं
ह्रीं ह्रीं भद्रकाल्यै क्रीं क्रीं

क्रीं हूं हूं क्रीं क्रीं स्वाहा ॥
श्मशानकालिकायाः क्रीं क्रीं क्रीं
हूं हूं ह्रीं ह्रीं श्मशानकालि क्रीं
क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ।
महाकाल्याः क्रीं क्रीं क्रीं हूं हूं
ह्रीं ह्रीं महाकालि क्रीं क्रीं क्रीं
हूं हूं ह्रीं ह्रीं स्वाहा तारा-
याः ह्रीं स्त्रीं हूं फट् चंडोग्रक
लपालेः ऐं ह्रीं हूं शिवाय फ
ट् मातंगिन्याः ॐ ह्रीं क्लीं हूं
मातंगिन्यै फट् स्वाहा उच्छिष्ट
चांडालिन्याः उच्छिष्टचांडालिनी
सुमुखीदेवी महापिशाचिनी
ह्रीं ठः ठः ठः धूमावत्याः धूं धूं
स्वाहा भद्रकाल्याः ह्रौं कालिम
हाकालि किलि किलि फट्स्वा
हा उच्छिष्टगणेशस्य ॐ हस्ति
पिशाचि लिखे स्वाहा ॥
धनदायाः धं ह्रीं श्रीं देविरति
प्रियेस्वाहा श्मशानकालिका
याः ऐं ह्रीं श्रीं क्लीं कालिके ऐं
ह्रीं श्रीं क्लीं बगलायाः ॐ ह्लीं
बगलामुखि सर्वदुष्टानां वाचं मु
खं स्तंभय जिह्वां कीलय कीलय
बुद्धिं नाशय ह्लीं ॐ स्वाहा कर्ण
पिशाच्याः ॐ कर्णपिशाचि वद
तीतानागतशब्दं ह्रीं स्वाहा ॥

मंजुघोषस्य क्रों ह्रीं श्रीं ।
तारिण्याः क्लीं स्त्रीं हूं स्स देवि ह्रीं
क्लीं ऐं सारस्वत वीजं ऐं
कात्यायन्याः ऐं ह्रीं श्रीं
चौं चंडिकायै नमः दुर्गायाः
हूं विशालाक्ष्याः ॐ ह्रीं
विशालाक्ष्यै नमः गौर्याः ।
ह्रीं गौरि रुद्रदयिते योगेश्वरि
हूं फट् स्वाहा ब्रह्माणी मंत्रः ।
ह्रीं नमो ब्रह्माणी राज्ञिते राज
पूजिते जये विजये गौरि गांधारि
त्रिभुवनवशंकरि सर्वलोकवशं
करि सर्वस्त्रीपुरुषवशंकरि सुदुष्ट
दुर्योधनावे ह्रीं स्वाहा इंद्रस्य इं
इंद्राय नमः गरुडस्य क्षिप ॐ स्वा
हा । विषहराग्निवीजं ।
खः खं वृश्चिकविषहरवीजं ॐ
सरहस्फः ॐ हि लि हि मि चिलि
हस्फः ॐ हि लि हिलि चिलि चिलि
स्फः ब्रह्मणे फुः सर्वेभ्यो देवे
भ्यस्फः मूषिकविषहरवीजं ।
ॐ गौं क्रौं ठं आगमचंद्रिकायां
ॐ गं गां ठः मूषिकनाशाय
ठः ॐ स्वरणे फुः प्रसरणे फः
विसरणे फुः एतन्मंत्रं जपन्ने
रत्नावली जलन्धरपत्नी । अ
स्या विवरणं तुलसीशब्दे द्रष्ट
व्यं केदारराजकन्या राधायोड
शनामान्तर्गतनामविशेषः ।
एतद्विवरणं वृन्दावनशब्दे द्र
ष्टव्यं ॥

वृन्दारः त्रि मनोज्ञः । इति
शब्दमाला ॥
वृन्दारकः पुं देवता इत्यमरः
मुख्यपाल यथा वृन्दारकः स्वरे
श्रेष्ठे मनोज्ञे मुख्यपालरि इति
भरतधृतव्याडिः ॥
वृन्दारकः त्रि मनोज्ञः श्रेष्ठः ।
इति मेदिनी तन्मते पवर्गीया
दिः ॥ वृन्दारको रूपिमुख्या
इत्यमरः ॥
वृन्दावनं क्ली स्वनामख्यातती
र्थं तन्नामकारणं यथा श्रीनारा
यण उवाच पुरा केदारनृपतिः
सप्तद्वीपपतिः स्वयं आसीत्सत्य
युगे ब्रह्मन्स्वयंधर्मरतः सदा ॥
सरेमे सह नारीभिः पुत्रपौ
त्रगणैः सह पुत्रानिवप्रजाः सर्वाः
पालयामास धार्मिकः कृत्वा
कृत्वा शतक्रतुं राजा लेभे त्रि
दशसमीप्सितं कृत्वा नानाविधं
पुण्यं फलकांक्षी नच स्वयं
नित्यं नैमित्तिकं सर्वं श्रीकृष्ण
प्रीति पूर्वकं । के
दार तनया राजेन्द्रेण भूतोभ
विता पुनः पुत्रेषु राज्यं सं
न्यस्य प्रिया त्रैलोक्य मोहिनी।
जैगीषव्योपदेशेन जगाम त

तस्य वनं हरे र्वैकान्तिको भ
क्तो ध्यायते संततं हरिं ।
शश्वत्स्वदर्शनं चक्रमस्ति यस्य
त्रियो मुने ॥ चिरंत
प्ता नृपश्रेष्ठो गोलोकं च जगा
म सः केदार नाम तीर्थं तत्र
जाया च बभूव ह । तत्राद्या
पि स्मृतः प्राणी सद्यो मुक्तो भ
वेद्ध्रुवं कमलांशा तस्य कन्याना
म्ना वृंदा तपस्विनी ॥ न वव्रे
सा वरं कंचिद्योग शास्त्रवि
शारदा । दत्तं दुर्वाससा तस्यै हरे
र्मंत्रं सुदुर्लभं ॥ सा विरक्ता
गृहं त्यक्त्वा जगाम तपसे वनं
षष्टिं वर्षसहस्राणि तपस्तेपे
सुनिर्जने आविर्बभूव श्रीकृष्ण
स्तस्यै भक्तवत्सलः । प्रसन्नव
दनः श्रीमान्सस्मितः पीतवाससः ।
दृष्ट्वा सा राधिकाकान्तं शांतं सु
न्दर विग्रहं मूर्छां सम्प्राप्य सा स
द्यः कामबाण प्रपीडिता ॥
सा च शीघ्रं वरं वव्रे पतिस्त्वं मे
भवेति च ओमित्युक्त्वा च सहसा
चिरं रेमे तया सह सा जगाम
च गोलोकं कृष्णेन सह कौतुका
त् राधा समा सा सौभाग्यात
गोपी श्रेष्ठा बभूव सा वृन्दा
यत्र तपस्तेपे तत्र वृंदावनं
स्मृतं वृन्दा यत्र कृता क्रीडा
तेन वा मुनिपुंगव अथान्यच्चेति
हासं च शृणुष्व वत्स उत्परं ।
येन वृन्दावनं नाम निबोध कथ
यामि ते कुशध्वजस्य कन्ये द्वे ध
र्मशास्त्र विशारदे तुलसी वेद
वत्यौ च विरक्ते भवकर्मणि ॥
तपस्तप्त्वा वेदवती प्राप नाराय
णं परं सीता जनक कन्यासा
सर्वत्र परिकीर्तिता तुलसी च
तपस्तप्त्वा वाञ्छां कृत्वा हरिं प
तिं दैवाद्दुर्वाससः शापात्प्राप्य स
ख्यायश्वरं पतिं ॥ पश्चात्स
प्राप कमलाकान्तं कांतं मनोहरं
तस्याश्च तपसः स्थानं उरितं च त
पोवनं तेन वृन्दावनं नाम प्रवद
न्ति मनीषिणः ॥
अथ वा ते प्रवक्ष्यामि परं हेत्व
न्तरं शृणु येन वृन्दावनं नाम
पुण्यक्षेत्रे च भारते राधा षो
डशनाम्नां च वृंदा नाम श्रुतौ श्रु
ते तस्याः क्रीडावनं रम्यं तेन
वृन्दावनं स्मृतं गोलोके प्रीतये
तस्याः कृष्णेन निर्मितं पुरा ।
क्रीडार्थं भुवि तन्नाम्ना वनं वृन्दा
वनं स्मृतं ॥ इति ब्रह्मवैव

र्त्ते श्रीकृष्णजन्मखंडे वृन्दावनप्र
स्तावः १७ अध्यायः ॥ अथ
वृंदावन वर्णने ईश्वर उवाच
गुह्याद्गुह्यतरं गुह्यं परमानंद
कारणं अत्यद्भुतं रहस्यानां र
हस्यं परमं परं दुर्लभानां च पर
मं दुर्लभं मोहनं परं । सर्व
शक्तिमयं देवि सर्वस्थानेषु गो
पितं सात्वतां स्थानमूर्द्धन्यं वि
ष्णो रत्यन्तवल्लभं नित्यं वृन्दाव
नं ना ब्रह्माण्डोपरि संस्थितं पू
र्णब्रह्म सुखैश्वर्यं नित्यमानंद
मव्ययं वैकुंठादि तदंशांशं स्व
यं वृन्दावनं भुवि गोलोकैश्व
र्यं यत्किंचिद्गोकुले तत्प्रकी
र्तितं वैकुंठादिवैभवं यत्द्वार
कायां प्रकाशयेत् यद्ब्रह्मप
रमैश्वर्यं नित्यं वृन्दावनाश्रयं त
स्मात्त्रैलोक्यमध्ये तु पृथ्वी धन्ये
ति विश्रुता ॥
यस्यान्माथुरकं धाम विशेषे
कांत वल्लभं स्वस्थानमधि
कं नाम यं माथुरमंडलं नि
गूढं परमं स्थानं पूर्यभ्यंतर सं
स्थितं सहस्रपत्रकमलाकारं
माथुर मंडलं विष्णुचक्रपरि
भ्रमणाद्धाम वैष्णवमद्भुतं कर्णिका
विस्तारं रहस्यं क्रममीरितं प्र
धानं द्वादशारण्यं माहात्म्यं कथि
तं क्रमात् भद्र श्रीलोह भां
डीर महा ताल खदीरकाः ब
कुलं कुमुदं काम्यं मधुवृंदावनं
तथा द्वादशैतावने संख्याः का
लिन्द्याः सप्त पश्चिमे पूर्वे पंच
वनं प्रोक्तं तत्रास्ति गुह्यमुत्त
मं महावनं गोकुलाख्यं रम्य
मधुवनं तथा पूर्वे तु पूर्व भ
द्या स्तालायाः सप्त पश्चिमे
अन्यच्चोपवनं प्रोक्तं कृष्णक्री
डा रसस्थलं कदम्ब खंडिकं
नंदनं नंदीश्वरं तथा नंदनान
दं खंडं च पालाशाशोक केत
कं सुगंधि मानसं कैलमम
तं भोजनस्थलं सुखप्रसाद
नं वत्सहरणं शेषशायिनं
श्यामप्रस्वेदपिशाम चक्रभा
नुपुरं तथा संकितं विपरं चै
व बालक्रीडं च भूषणं केसु
मखेरं वीर सुत्सकं वापिन
न्दनं शम्य मेव वने संख्या हि
शंखोपवने स्मृतं पूर्वोक्तं द्वाद
शारण्यप्रधाने वन सुत्तमं त
त्राखेर चतुर्थैव वनं च समुद्रा
स्तं नानाविध रसक्रीडा नाना

पत्र

मेगुह्याद्गुह्य तमोत्तमं वहस्या
नोरहस्यंपरत दुर्लभानांच दुर्लभं
त्रैलोक्य गोपितं देवदेवस्य
र सुपूजितं ब्रह्मादि वांछितं
स्थानं सुर सिद्धादि सेवितं ।
योगीन्द्रादि मुनीन्द्रादि सदान-
ध्यान तत्परं अप्सराभिश्चगंधर्व-
वैः नृत्य गीत निरन्तरं श्रीम
द्वृंदावनं रम्यं पूर्णानंद रसा
श्रयं भूमि श्चिन्तामणिस्तोय
ममृतं रसपूरितं वृक्षाः सुरद्रु
मा स्तत्र सुरभि वृन्द सेविताः
स्त्री लक्ष्मीः पुरुषो विष्णुस्तद्दशां
श समुद्भवः तत्र कैशोर वयसं
नित्यमानन्द विग्रहं गतिर्नी
त्य कथा गानं स्मित वक्त्रं निर
न्तरं मुद संत्तैः प्रेम पूर्णैर्वस्य
वे स्तद्दनाश्रयं ॥ पूर्णब्रह्म
सुखे मग्नं स्फुरत्तन्मूर्ति तन्मयं
प्रमत्त कोटि भृगाद्यैः कूजन्कल
मनोहरं कपोत शुकसंगीत
मुन्मत्तालि सहस्रकं । भु
जंगशत्रु नृत्याद्यंसकोलाहोद
विभ्रमं नाना वर्णैश्च कुसुमै
स्तद्रेणु परिपूरितं सुस्निग्ध-
सौरभाश्नान सुपीकृत जगत्त्र
यं मन्दमारुत संसिक्तवसंतऋ
तु

सेवितं पूर्णेन्दु नित्याभ्युदयं सूर्य
मंदांशु सेवितं ॥ अदुःखम
खविच्छेदं जरा मरण वर्जितं
अक्रोध गत मात्सर्यं अभिन्नमनहं
कृतं ॥ पूर्णानन्दामृतरसं
पूर्णानंदामृतरसे पूर्णं प्रेमसुखा
र्द्रं गुणातीतं परं धाम पूर्णप्रे
म स्वरूपकं यत्र हस्तादि पुल
कैः प्रेमानंदाश्रुवर्षितं किं पुनश्चे
तनायुक्ते विश्व भक्तैः किमुच्यते
गोविन्दांघ्रि रज स्पर्शान्नित्य वृ
न्दावनं भुवि सहस्रदल पद्मस्य
वृन्दावनं वराटकं ॥ यस्यस्य
र्शन मात्रेण पृथ्वी धन्या जगत्र
ये गुह्याद्गुह्यतमं रम्य मध्ये वृन्दा
वनस्थितं प्रस्तरं नित्यमानंदगो
विंद स्थान मव्ययं गोविन्ददेह
तोभिन्नं पूर्णब्रह्म सुखाश्रयं
मुक्ति स्तत्र यत स्पर्शात्तन्माहात्म्यं
किमुच्यते । तस्मात्सर्वात्म-
ना देवीह्रदिस्थं कुरु तद्वनं ॥
वृन्दावन विहारेषु कृष्णं कैशोर
विग्रहं अन्यारण्ये स्थानेषु बाल
पौगंड यौवनं ॥ कालि
न्दी मकरन्दोस्य कर्णिकायाः प्र
दक्षिणं नाना निर्माण गंभीरं
जलसौरभ मोहनं या नेरा ·

हृत तन्मिश्र मकरन्द धनालयं
पद्मोत्पलाद्यैः कुसुमै र्नानाव
र्णैः समुज्ज्वलं चक्रवाकादि वि
हंगै र्मंजु नाना कलस्वनैः ।
शोभमानं जलं रम्यं तरंगाति
मनोहरं तस्योभय तटीरम्याश्च
तुकांचन निर्मिता गंगाकोटी
गुणाः प्रोक्तो यत्रस्पर्श वराट
कः ॥ कर्णिकायां कोटि
गुणो यत्र क्रीडा रतो हरिः ।
कालिन्दी कर्णिका कृष्ण म
भिन्न मेक विग्रहं ॥ इति पा
द्मे पातालखंडे १ अध्यायः ॥
वृन्दावनेश्वरः पूर्णः श्रीकृष्णः यथा
यत्नवेन्दुरुवि बद्धाध्येयं ब्रह्मादि
भिः सुरैः गुणत्रय मतीतं तं
वंदे वृंदावनेश्वरं ॥ अपि
च पुरुषः प्रकृति श्चाद्यो यथा
वृन्दावनेश्वरौ । प्रकृति विकृ
तिः सर्वं विना वृन्दावनेश्वरं ।
इति पाद्मे पातालखंडे ४ अ
ध्यायः अन्यच्च यदानित्यः
स्वयं कृष्णः सच्चिदानन्द विग्र
हः षण्णां गुणानां शीलीत्व
भगवच्छब्द संज्ञितः नित्याधा
मा गुणातीतः साक्षाद्वृन्दाव
नेश्वरः असौ प्रकट लीलायां

वासुदेवो भवत्प्रभुः ॥ गो
पीनां काम पूर्णाय नित्यानां
रमणाय च गोपालानां वि
नोदाय स्वयं नंदसुतो भवत्
इति पाद्मोत्तरखंडे ८७
अध्यायः
वृन्दावनेश्वरी स्त्री राधा यथा
राघवत्वे भवत्सीता रुक्मिणी
कृष्ण जन्मनि । साक्षाल्लक्ष्मी
स्तु विज्ञेया शाकसेनैव पार्वती
वृषभानु सुता यात्र नित्यान
न्दस्वरूपिणी गांधर्विकानली
लाया श्रीरूपामा कृष्ण वल्लभा
वृन्दावनेश्वरी राधा साक्षात्क
लात्मिका परा इति पाद्मोत्त
रखंडे ८० अध्यायः ॥
वदिखः त्रि अयमनयोरेषां
वातिशायेन वृन्दारको देवो
मुख्यो वा इति मुग्धबोध
टीकायां दुर्गादासः ॥
वृन्दीयान् त्रि वृन्दिष्ठः अयम
नयो रेषां वा अतिशायेन वृ
न्दारकः इत्यर्थे ईयस प्रत्यय
निष्पन्नः इति व्याकरणं ॥
वृषा इ य तृष्णा इति काव्ये
कल्पद्रुमः ह्र अवृषात् अत
शीत असमात्वृषादित्यानिसं

उ॰ इत्यन्ये य वृश्चपतिवरं
कन्या इति दुर्गादासः ॥
वृशः पुं उन्दुरः इतिशब्द
रत्नावली वासकः इत्यमर
टीकायां वृशा स्त्री ओषधीविशे
(षः इत्यम रिकोषः) वृश्चिकः पुं शूककीटः छुया
पोका इति भाषा इत्यमरः
तत्पर्यायः शूककीटकः २
इतिशब्दरत्नावली कीटविशे
षः विछा इति भाषा तस्य
पर्यायः अलिः २ द्रोणः ३ वृ
श्चनः ४ इति राजनिर्घण्टः ॥
द्रुणः ५ इति शब्दरत्नावली
पृदाकुः ६ अरुणः ७ अली ८
इति जटाधरः ॥ वृश्चिकवि
षस्य लक्षणमाह दहत्यग्नि
वादौच भिनत्तीवोर्द्धं माशुच
वृश्चिकस्य विषं याति पश्चा
द्दंशेऽवतिष्ठते ॥ असाध्य वृ॰
श्चिक दष्टस्य लक्षणमाह
दृष्टोऽसाध्यैस्तु हृद्घ्राणरसना
पहतो नरः मांसैः पतद्भिर
त्यर्थं वेदनार्त्तो जहात्यसून्
असाध्ये वृश्चिके त्वेषा मे
वानुक्तैः हृदादिरूपरः वृ

दादि कार्य्य रहितो भवति ।
अत्यर्थं वेदनार्त्तं इत्यन्वयः ॥
अस्य चिकित्सा जीरकस्यकृतः
कल्को घृत सैन्धव संयुतः ।
सुखोष्णो मधुनालेपाद्वृश्चिकस्य
विषं हरेत् गंध माघ्राय म
र्दित सूर्य्यावर्त्त दलस्य तु वृश्चि
केन नरो विद्धःस्तत्क्षणाद्भवति नि
र्विषः इति भावप्रकाशः ॥
अथ वृश्चिक विषहर मंत्रः ओ
मरस्फः ह ओं ह्रिलि मिलिचि
लि चिलिस्फः ब्रह्मणे स्फः सर्वेभ्यो
देवेभ्यः स्फः इति तंत्रसारः ॥
मेषादि द्वादशराश्यन्तर्गताष्ट
मराशिः अस्याधिष्ठात्री देवता
वृश्चिकः विशाखा शेषपादा
नुराधाज्येष्ठा समुदायेनतद्राशि
भवति स्वचशीर्षोदयः श्वेतवर्णः
जलराशिः उत्तरादिकान्तिः ।
कफ प्रकृतिः जलचरः बहुपु
त्रः बहु स्त्री संगः विकृततनुः
विप्रवर्णश्च अस्य विशेषसंज्ञाः
सौम्यः स्त्रीगणा युग्मं समः ।
स्थिरः शुष्करः सरीसृपजातिः
ग्राम्यः तद्राशिजात जातको
भवति मोनी मन्दगतिः ।
कृपालुः ऋजुबुद्धिः नीचसंगश्च

इतिजातकादयः ॥
तत्र जातफलं वृश्चिकोदय सं
जातः शौर्य्यवानति दुष्टधीः ।
भवेद्विज्ञान संपन्नो विग्रहीसुभ
गःसुधीः इति कोष्ठीप्रदीपः ॥
ओषधीभेदः इति मेदिनी ॥
ह्रालिकः ॥ ह्रालः ।
इति संक्षिप्तसारोणादिवृत्तिः ॥
मदनवृक्षः कर्कटः ॥ गोमय
कीटः इति भरतः अग्रहाय
णमासः इति सारसुंदरी ॥
वृश्चिकप्रिया स्त्री हृतिका इति
शब्दमाला ॥
वृश्चिकर्णी स्त्री आखुकर्णी इ
तिराजनिर्घण्टः ॥
वृश्चिका स्त्री क्षुद्रक्षुपविशेषः ।
तत्पर्यायः नखपर्णी २ पिच्छि
ला ३ अलिपत्रिका ४ अस्यागु
णाः । पिच्छिलत्वं । अम्लत्वं ।
अतिसारादिदोष नाशित्वंच ।
इति राजनिर्घण्टः ॥
वृश्चिकाली स्त्री क्षुपविशेषः
बिछाटी इति भाषा तत्पर्यायः
वृश्चिपत्री २ विषघ्नी ३ ना
गदन्तिका ४ सर्पदंष्ट्रा ५ अमरा
६ काली ७ उष्ट्रधूसरपुच्छिका ८
इतिरत्नमाला ॥ विषाणी ९

नेत्ररोगहा १० उष्ट्रिका ११ अ
लिपर्णी १२ दक्षिणावर्त्तकी १३
कालिका १४ आगमावर्ता १५
देवलाङ्गुलिका १६ करभी १७
भूरिदुग्धा १८ कर्कशा १९ स्वर्ण
दा २० युग्मफला २१ सीरविषा
णिका २२ भास्वरपुष्पा २३ अ
स्यागुणाः कटुत्वं तिक्तत्वं हृ
द्रुक्शुद्धिकारित्वं रक्तपित्त वि
षधारोचकापहत्वं वल्यत्वंच ।
इतिराजनिर्घण्टः अपिच । वृ
श्चिकाली विषघ्नीच कास मा
रुतनाशिनी इतिराजवल्लभः
वृश्चिपत्री स्त्री वृश्चिकाली इ
तिरत्नमाला ॥
वृश्चीरः पुं श्वेतपुनर्नवा । इति
रत्नमाला ॥
वृष उ सेचने भजैनेशेप ।
इति कविकल्पद्रुमः उवर्षित्वा
वृष्ट्वा इति दुर्गादासः ॥
वृष क उ॰ भजेनेशेप इतिकवि
कल्पद्रुमः क उ॰ वृषयते ।
अस्य पंचमस्वरानुबंधो लेदक
अमकृतः सुधीभि र्ज्ञेयः ज्ञेन
म्यः सर्वत्र नित्येम् सास्यदापि
कत्वात् नच भाषा मनु सोपा
पाठा इति वाच्यं तर्हि अन्तक

व्याप्तौ कउ॰ वल्र वंचने वृत
क उ॰ दीप्तौ दिव क उ॰ परि
कूजने कुदि वर्द्ध वृष क उ॰
शक्ति बंधे नसक वेपःनादरे
इत्येषामष्टानामपि पंचमस्वरा
नुबंधापत्तेः वस्तुतस्तु एषां
पंचम स्वरानुबंधः प्राचीनपठि
तोऽप्यनर्थः अतएव रमानाथो
ऽपि एषां मुरस्तुबंधः सर्वपठित
धातवोऽर्थान्तरेषु चुरादयःस्व
र्थेऽन्ते पृथग्धातव इतिज्ञाप-
नार्थं इत्याह पृथग्धातव इति
जनो गर्भग्रहणं पैशुनमैश्वर्यं
इति दुर्गादासः ॥
वृषं स्त्री वर्द्ध इति शब्दमा
ला वृषः पुं पुरुषगवः षेंडा
इतिभाषा तत्पर्यायः उक्षा २
भद्रः ३ वलीवर्द्दः ४ ऋषभः ५
वृषभः ६ अनड्वान् ७ सौरभेयः
८ गौः ९ इत्यमरः ॥ शृंगी १०
ककुद्मान् ११ इति शब्दरत्नावली
शिखी १२ गंधमैथुनः १३ पुं
गवः १४ इति जटाधरः ॥
अस्य लक्षणं उत्सर्गविधिश्च
यथा मनुरुवाच भगवन्श्रोतु
मिच्छामि वृषभस्य च लक्षणं
वृषोत्सर्गविधिं चैव तथाऽप्यस्य
फलं

महत् मत्स्य उवाच । धेनुमा
दौ परीक्षेत सुशीलांलक्षणान्वि
तां अव्यंगामपरिक्लिष्टां जीववत्
त्सा मरोगिणीं स्निग्धवर्णोऽति
स्निग्धखुरः स्निग्धशृंगस्तथैव च
मनोहराकृति सौम्यां सुप्रमाणा
सुबद्धता आवर्त्ते दक्षिणावर्त्ते
मुक्ता दक्षिणतश्च सा वामा
वर्त्ते वामतश्च विस्तीर्णा जघनान्त
या मडुसंहतताम्रोष्ठी रक्तजि
ह्वा सुपूजिता अश्वपादैरस्फु
टिता रक्तजिह्वा तथा च या ॥
अस्रावाविलनेत्रा च सफेरविर
ले हैष्ठः वैदूर्य मधुवर्णाश्च
लबुद्बुद सन्निभैः ॥ रक्तस्निग्धे
श्च नयने तथा रक्तकनीनिकेः
सप्तचतुर्दश दंता च तथा वाष्टा
मतास्तुकाः षडुन्नता सपार्श्वोद्दृष्ट
श्च पंच समायताः अष्टायतशि
रो ग्रीवाधरा जन्म सुलक्षणा ॥
मनुरुवाच षडुन्नताः के भगवन्के
च पंच समायताः । आयता
श्च तथैवाष्टौ धेनूनां केश्च भाव
हाः मत्स्य उवाच उरः पृष्ठशि
रः कृतिः श्रोणी च वस्तथापि च
षडुन्नतानि धेनूनां पूजयंति वि
चक्षणाः ॥ कर्णौ नेत्र ल

लाटं च पंच भास्करनंदन समा
यतानि शस्यंते पुच्छं सास्नाच
सक्थिनी चत्वारश्च समावाजंघे
व मष्टौ मनीषिभिः शिरो ग्रीवा
यता स्वेते भूमिपाल स्वता द
श तस्याः सुते परीक्षेत वृषभं
लक्षणान्वितं उन्नत स्कंधककुद
मृजुलांगूल कम्बलं महाकटित
टस्कंधं वैदूर्यमणिलोचनं प्रवा
ल गर्भ शृंगाग्रं सुदीर्घ पृथुवाल
धिं नवाष्टदश संख्यै वो तीक्ष्णा
ग्रै दशनैः शुभैः मल्लिकाक्षश्च
मोक्तव्यो गृहेऽपि धनधान्यदः ॥
वर्णेन स्वाम्र कपिलो ब्राह्मण
स्य प्रशस्यते श्वेतो रक्तश्च कृष्ण
श्च गौरः पाटल एव च ॥ भ
द्रिन स्वाम्र पृष्ठश्च शबलः पंच
कालकः पृथुकर्णो महास्कंधः
श्लक्ष्णरोमा च यो भवेत् रक्ताक्षः
कपिलो यश्च रक्त शृंगतलो भ
वेत् श्वेतोदरः कृष्णपृष्ठो ब्राह्मण
स्य प्रशस्यते स्निग्ध रक्तेनवर्णे
न क्षत्रियस्य प्रशस्यते । कां
चनाभेन वैश्यस्य कृष्णेनाप्यंत्य
जन्मनः यस्य प्रागायते शृंगे
भुवाभिमुखे सदा सर्वेषामे
व वर्णानां सच सर्वार्थसाधकः

मार्जारपादः कपिलो धन्यः
कपिलः श्वेतो मार्जारपा
दस्तु धन्यो मणिनिभेक्षणः
करटः पिंगलश्चैव श्वेतपाद
स्तथैव च सर्वपाद शिरोग्र
श्च द्विपाद श्वेत एवच कपिं
ल निभो धन्य स्तथा तित्तिरि
सन्निभः आकर्णमूलात् श्वेत
स्तु मुखे यस्य प्रकाशते नं
दीमुखः स विज्ञेयो रक्तवर्णो
विशेषतः श्वेतं च जठरं यस्य
भवेत् पृष्ठं च गोपतेः ऋषभ
समुद्रात्तः सततं कुलवर्द्धन
मल्लिकापुष्पचित्रस्तु धन्यो
भवति पुंगवः कमले म
ण्डले चापि चित्रो भवति भाग्य
दः अतसीपुष्पवर्णस्तु तथा
धन्यतरः स्मृत एते धन्या
कीर्तयिष्यामि तेऽनेक कृष्णता
लोष्ठ दशना रूक्ष शृंगशफा
श्च ये अव्यक्तवर्णा ह्रस्वाश्च
व भस्म निभाश्च ये ध्वांक्षगृध
सवर्णाश्च तथा मूषिक सन्निभाः
कुण्ठाः काणा स्तथा खञ्जाः केक
राक्षा स्तथैव च विषम श्वेतपादा
श्च उद्भ्रांत नयना स्तथा नैते वृषाः
प्रमोक्तव्या न च धार्या स्तथा गृहे मो

क्व्यानांचयार्याणां भूयोवसा
मि लक्षणं स्वस्तिकाकार शृं
गाश्चमेवोच सदृश स्वनाः महा
प्रमाणाश्च तथा मत्तमातंगगामि
नः महोरस्का महोत्साहा महा
बल पराक्रमाः शिवः कर्णौ ल
लाटंच वालधिश्चरणा निच ने
त्रे पार्श्वेच कृष्णानि शस्यंतेच
इभोक्षिच सितान्येतानि शस्यते
कृष्णस्य तु विशेषतः भूमौ कर्ष
ति लांगूलं प्रलम्ब स्थूल वाल
धिः पुरस्तादुन्नते नीलवृषभश्च
प्रशस्यते शुक्तिध्वज पताकाभा
येषां राजी विराजते अनडुहः
स्युते धन्या वित्त सिद्धि जयाव
हाः प्रदक्षिणा निवर्तन्ते स्वयं
ये विनिवर्त्तिताः समुन्नत शिरो
ग्रीवा धन्यास्ते यूथवर्द्धनाः र
क्तशृंगाग्र नयनः श्वेतवर्णो भ
वेद्यदि सफेः प्रवालसदृशो नां
स्ति धन्यतरस्ततः एते धार्याः
प्रयत्नेन मोक्तव्या यदि वा वृ
षाः धारिता यदिवा मुक्ताः धन
धान्य विवर्द्धनाः चरणानि मु
खं पुच्छं यस्य श्वेतानि गोपतेः
लाक्षारस सवर्णश्च तंनीलमि
ति निर्दिशेत् वृष एव समाकृ

ध्यो नसधार्यो गृहे भवेत् ।
तदर्थमेवाचरति लोके गाथा
पुरातनी एष्टव्या बहवः पुत्रा
यद्येकोपि गयां व्रजेत् गौरीम्वा
मुद्वहेद्भार्यां नीलम्वा वृषमु
त्सृजेत् एवं वृषं लक्षण
संयुक्तं गृहेद्भवं क्रीत मथा
पि राजन् मुक्त्वा न शोचे
न्मरणे महात्मा मोक्ते मतिर्वाह
मनोभिधास्ये इति मात्स्ये वृष
भ लक्षणं नाम १८१ अध्यायः
जलपानार्थ मागत वृषस्य निवा
रणे दोषो यथा ।
गवां तृष्णाभिभूतानां पानार्थ
मभिधावतां अन्तरायो भवेद्य
स्तु सम्भवेद्ब्रह्मघातकः इतिक
र्मलोचने अश्वदान विधिप्र
स्यां वशिष्ठ उवाच येश्वरोत्
विप्रो वा करोति विधिना नृप
दानं सर्वगुणोपेतं तच्छृणुष्व
यथा तथा भारादि त्रिपलान्तेन
वृषं कृत्वा विधानतः युतं धेन्वा
यथा दद्याद्भक्तितो नृपसत्तम
यस्मया धेनवः प्रोक्ता वृषास्ता
वन्त एव हि स्थापनेन नियोज्याः
सः हेम य च तथा वृषाः ॥
सर्वभावान्ततो राजन् नैनपा ।

णाणि निःशेषः सर्व पापविना
शाय दीयते नृप सत्तम गोम
येन समालिप्य यव वस्त्र समा
वृते वृषं हेममयं तत्र रौप्यं वा
रत्नसंयुतं तस्य नीलमयैः शृं
गे मौक्तिकाक्षिणश्चारराः ।
ह्राविंशत्कुम्भ वस्त्राणि विद्रुमो
ष्ठौ सुनासिका मारकती विनि
र्दिष्टा कर्णौ चैवास्य को मेतो
प्ररागस्य वेपादाः खु रौप्यस्य
या स्तथा राजन्मयस्य रोमा
णि लोमवस्त्रेण कम्बले परे
तच्छत्रु मुद्दिष्टं सर्वेषामप्य
यं विधिः वृषणो स्फटिकस्या
पि लिंगे मणिः प्रकीर्तितः य
था धेनुस्तथानड्वान्सुवर्णस्य
तु कारयेत् सर्वासाफलमाप्नो
ति धेनूनां वृषभप्रदः राज्ञः स
विश्ववाहानं भक्त्या यः प्रतिपा
दयेत् वृषभस्याप्यशक्तो दित
दनन्त फलं स्मृतं निःश्वोवाप्य
व मेदिनि कृत्वा व्रत मतेद्रितः
तत्फलं समवाप्नोति स्वस्त्या
नाव्यसशयः इति वह्निपुराणे
वृषदानाध्यायः तद्दान फलं
यथा कन्यादानं वृषोत्सर्गं
तीर्थसेवां श्रुतं तथायेऽर्च

न्ति गृहस्थास्तु न ते तद्विषयो
पगाः इति तत्रैव कन्यादान
नामाध्यायः अपिच । ब्र
ह्मोवाच वृषगावौ समादाय पु
च्छेनेलक्षणान्वितौ हेमशृंगौ
शफेरौप्य सवत्सौ पूजयेन्मुने
शिवानो पूजयित्वा तत्र दिने यः
प्रयच्छति शिवभक्ताय विप्रा
य रौहिणी वाम्स्योनवा न
वियोगो भवेत्तस्य सत पत्नी
पतेः कृतः वातरंहस वैमाने
गच्छेच्छिवपुरं द्विज तच्चा
गोश्चिरं भुक्त्वा इह आगत्य जा
यते समृद्धो धनधान्याभ्यां पुत्र
मित्र समाकुलः योवारत्न स
मायुक्तं गोयुगं पूजयेन्मुने ।
प्रयच्छति शिवोमा च प्रीयतां भा
वितात्मनः स सर्वपापदुःखे
भ्यो विमुक्तः क्रीडते सदा ।
इह लोके भवेद्धन्यो देहान्ते पर
मे पदे इति देवी पुराणे गोरत्न
व्रतनामाध्यायः ॥
शिव वृष कारणं यथा श्री
कृष्ण उवाच अथ गर्वान्वितो
रुद्रो स्तु त्रिपुरं मुल्वणं मन्वी
मनसि संहर्तो सर्वेषां जगतामि
ति कोऽयं पतंगवद्दत्य इति

मत्वा ययौ रणं विहायशूलं
मदत्तं मदीयं कवचंपरं वि
दंवभूव समरे वर्षमेकंदिवा
निशं नकोपि जेतुं क शक्तो
ऽभौ ममैव समरे सदा पृथिव्यां
च रणं कृत्वा दैत्येंद्रो मायया
प्रिये ग्रस्तेंद्रं च समुत्तस्थौ पे
वा शतकोटि योजनं उत्तस्थौ
शंकरः स्तूर्णं रंतं दैत्यं जग
त्प्रभुः जघान मुष्टिना रुद्रो
दानवेंद्रं प्रकोपतः ॥ वज्र
मुष्टि प्रहारेण सद्यो मूर्च्छाम
वाप सः क्षणेन चेतनां प्राप्य
कोपाद्दानव पुंगवः शिवं स
यानमुत्तोल्य पातयामास भूत
ले तदाहं कलया प्रीत्या वृष
रूपं विधाय च सयानं शंकरं
धृत्वा विषाणाभ्यां मुरुकर्णं द
दौ तं सर्व कवचं स्व मूलं म
दिमर्दनं मया दत्तेन शूलेन
जघान त्रिपुरं हरः मामेव द
र्पहंत्रीं त्वं तुष्टावबोधितः पुनः
तत्याज शंकरो दर्पं विनवीनं
ततो विभुः ज्ञात्वानंद स्वरूपश्च
निर्लिप्तः सर्वकर्मसु ततोऽहं
स्वरूपेण वहामि तेन तं प्रिये
ममप्रियतमो नास्ति त्रैलोक्ये
शिवात्

परः इति ब्रह्मवैवर्त्ते श्रीकृष्ण
जन्मखण्डे ३९ अध्यायः ॥
मेषादि द्वादश राश्यन्तर्गत द्वि
तीयराशिः तत्पर्यायः तावुरिः
२ अस्य विशेषसंज्ञा सौम्यः ।
अंगणा शुभः समः स्थिरः ।
पुष्करः ग्रयं चतुष्पात् निशाव
ल्यः दिवा वन्यः कृत्साख्यः
दक्षिणादिक्पतिः निशाख्यः
पृष्ठोदयाख्यः अस्यापि शाडीदे
वना वृषः कृत्तिकापादत्रय रो
हिणी समुदाय मृगशिरोऽर्द्धेन
तद्राशि र्भवति सच शीतलस्व
भावः स्वरभूमिस्वामी वातप्र
कृतिः श्वेतवर्णः वैश्यजातिः म
हाशब्दकरः मध्यमस्त्रीसंगः मध्य
मसन्तानश्च एतद्राशिजात
एताद्दृश्यभवति दाता वाग्मीस
ह निर्भयः परदाराभिलाषी इति
वृहज्जातकादयः एतद्राशि
जात फले स्थिरमति सुमतिके
मनीयतां कृपालुतां हि त्वरा
मुपभोगतां वृषगतो हिमंशुर्भ
श मादिशेत्खलु कृतिनः कृति
नश्चरवलनापि तत्प्रजातफ
ले वृषलग्ने भवेज्जातो गुरुभ
क्तः प्रियस्वदः गुणी कृतीयनीलवः

भूषः सर्वजनप्रियः इति को
ष्ठीप्रदीप चत्वर्विंष पुरुषमध्ये
पुरुषविशेषः । तस्य लक्ष
णं यथा वड़गुण वरूवेषः शी
लकामो नतांगः सकल रुचिवेद
ः सत्यवादी वृषोऽयं ॥ इति
रति मंजरी ॥ एकादशमन्वन्त
रीयेन्द्रः यथा रुद्रपुत्रस्य तेषु
ज्ञात्वसंप्रिकादशास्मृत । स
वैराः सुशर्म्मा च देवानीकः पु
रूगुरुः तत्रवरा हनाघुश्च यार्द
कः पुत्रकः स्तथा विहगमाःकाम
गमा निर्माण रुचय स्तदा एके
क हिंशक स्तेषां गणा श्चेन्द्रश्च
वै वृषः दशग्रीवो विष्णु स्तस्याश्रुती
वृषी चात्तपियाति इति गारु
डे ८७ अध्यायः ॥ धर्मः ॥
शृंगी अमरपादस्य श्रेष्ठः ॥
मूषिकः शुक्रलः वाल्लस्थानभे
दः इति मेदिनी ॥ दाम्भकः
इति विश्वः श्रीकृष्णः । इतिशि
काण्डशेषः शत्रुः । इति ज
टाधरः कामः बलवान् । इ
त्यनेकार्थकोषः ऋषभनामौष
धं इति राजनिर्घण्टः ॥
वृषकर्णी स्त्री स्वदंष्ट्रा स्वदंष्ट्र
गुलंच इति भाषा ॥ इति रत्न

माला ॥
वृषगंधा स्त्री वर्तान्ती इतिरा
जनिर्घण्टः ॥
वृषचक्रं क्ली कृषिकर्मोक्तचक्रा
कारचक्रं यथा वृषचक्रे वृषाका
रं सर्वावयव संयुतं लिखि
त्वा विन्यसेद्भानि वृषनामर्क्ष पूर्व
कं श्रुत्वाति कर्णशीर्षेषु शृ
गे स्कंधे द्विकं द्विकं । त्रीणि
पृष्ठे हृयं पुच्छे ऽष्टौ पादेन्
दटवे द्विकं हलप्रवाह वीजानि
प्रारंभादि दिनर्क्षकं ।
यदयोग स्थिते तस्माद्दूसे सर्वे
शुभाशुभं श्रासे हानिः स्तवने
मे कर्णे भित्तादटने तथा
शीर्षे भूति स्तथा शृंगे सौख्यं
स्कंधे च मंगलं पृष्ठे कष्टं
शुभं पुच्छे भ्रमः पादे मर्व
हृदि चैवपादादिदं प्रोक्तं वृष
चक्रे फलं वुधैः ॥ इति
ज्योति स्तत्वं ॥
वृषणः पुं अण्डकोषः इत्यमरः
तस्य लक्षणं यथा स्थूललिंगा
दरिद्रः स्याद्देकवृषणो भ
वेत् विषमे स्त्रीचंचलो वै नृपः
स्याद्वृषणे समे प्रलम्ववृष
णोऽल्पायु निर्द्दयो मणिभि

भवेत् अपिच जलान्नपक
वृषणो वृषभाभ्याः चलःस्वि
यासमाभ्यां स्तितिपः प्रोक्तः प
लस्वेन शताह्नवान् इतिगा
रुडे ८३।८५ अध्यायो ॥
वृषणाश्वः पुं इंद्रस्यघोटकः ।
त्रिकांडशेषः ॥
वृषणवसु क्ली इन्द्रस्यधनं इति
जटाधरः ॥
वृषदंशकः पुं विडालः इत्य
मरः ॥
वृषध्वजः पुं शिवः इत्यमरः
हेरम्बः पापकर्मा इति वि
श्वः वृषघाती स्त्री नागरमु
स्ता इति राजनिर्घंटः ॥
वृषनाशनः पुं विडंगः इति
शब्दमाला ॥
वृषपतिः पुं षंडः शिवः
इति केचित् ॥
वृषपत्रिका स्त्री वस्नाली ।
इति राज निर्घंटः ॥
वृषपर्णी स्त्री आखुपर्णी
इति रत्नमाला क्षुपविशेषः।
मुषाती इतिभाषा तत्पर्यायः
दृष्याली१ चक्रोगी २ छदपी
ना ४ इति राजनिर्घंटः ॥
वृषपर्वा॰ पुं शिवः दैत्यभेदः।

भंगारुवृतः केशरुः इति
विश्वः ॥
वृषभः पुं वृषः श्रेष्ठः वैदर्भी
रीतिभेदः इति मेदिनी ॥
आदिजिनः इति हेमचंद्रः ॥
कर्णरंध्रं। वृषभया औषधं ।
इत्यणादिकोषः ॥ गो
शब्दे आतिदेशिकगोहत्याया
अलिखनात्मसंगादत्र लिख्यते।
गामाहारे प्रकुर्वंतं पिबन्तं यो
निवारयेत् । याति गोविप्र
यो मध्ये गोहत्यांच लभेत्तुसः
दंडे गोस्ताडयन्मूढो यो विप्रो
वृषवाहनः । दिने दिने गवां ह
त्यां लभते नात्र संशयः दद्याति गो
भ्य उच्छिष्टं भोजयेद्वृषवाहकं ।
भोजयेद्वृषवाहन्नस गोहत्यां लभे
द्ध्रुवं ॥ वृषलीपतियाजये
यो भुंक्तेन्नं तस्य योनरः ।
गोहत्या शतकं सोपिलभते नात्र
संशयः ॥ पादं
ददाति वह्नौ यो गांच पादेनता
डयेत् गृहे विशेद्धौताङ्घ्रिःस्ना
त्वा गोवध मालभेत् ॥
योभुंक्ते स्निग्धपादेन शेते स्नि
ग्धाङ्घ्रिरेवच सूर्योदयेच

द्विर्भोजी स गोहत्यां लभेद्ध्रुवं
अवीराचेन्नच यो भुंक्तेयोनिजी
वीच ब्राह्मणः । यस्त्रि
संध्याविहीनश्च स गोहत्यांल
भेद्ध्रुवं पितृश्च पर्वकालेच
तिथिकालेच देवताः । न
सेवते :तिथींचो हिसगोहत्यां
लभेद्ध्रुवं स्वभर्तारिचक्रमेवाभे
दबुद्धि करोतिया कटूक्त्या
ताडयेत्कांतं स गोहत्यांलभे
द्ध्रुवं ॥
गोमार्गे खननं कृत्वा ददा
ति शस्य मेवच तडागेच तद्धेदे
वास गोहत्यां लभेद्ध्रुवं ॥
प्रायश्चित्तं गोवधस्य यःकरो
ति व्यतिक्रमं अर्थलोभाद
यज्ञानाद्वा गोहत्यां लभेद्ध्रुवं
राजके दैवके यत्नाद्गोस्वामी
गां न पालयेत् । दुःखंद
दाति यो मूढो गोहत्यांलभते
ध्रुवं प्राणिनं लंघयेयोहि दे
वार्चा मनलं जले ।
नैवेद्यं पुष्प मन्नंच सगोहत्यां
लभेद्ध्रुवं ॥ शश्वन्नास्ती
ति यो वादी मिथ्यावादी प्रता
रकः देवद्वेषी गुरुद्वेषी स गो
हत्यां लभेद्ध्रुवं ॥ देवता

प्रतिमां दृष्ट्वा गुरुं वा ब्राह्मणं
सति न संभ्रमान्नमेद्योहि सगो
हत्यांलभेद्ध्रुवं ॥ नददा
त्याशिषं कोपात्प्रणताय चयो
द्विजः विद्यार्थिनेच विद्यांच
स गोहत्यांलभेद्ध्रुवं ॥
गोहत्या ब्रह्महत्याच कथिता
चातिदेशिकी यथा श्रुतंस
र्ववक्ता त्किंभूयः श्रोतुमिच्छ
सि इतिब्रह्मवैवर्त्ते प्रकृतिखं
डे २७ अध्यायः ॥
वृषभगतिः पुं शिवः इति
हारावली ॥
वृषभध्वजः पुं शिवः इतिके
चित् ॥
वृषभानुः पुं स्वरभानपुत्रः
सच राधिकापिता यथा ब्रह्मवै
र्ते वृषभानश्च ललाभ जन्म
गोकुले पद्मावत्याश्च जन्मैव
वृषभानस्य रेतसा जातिस्मरो
हरे रंशः कलापेते यथाश्र
मी ववर्द्धानुदिनं तत्र व्रजगे
हे व्रजाधिपः ॥ कलावती
कान्यकुब्जे बभूवायोनि संभ
वा जातिस्मरा महासाध्वी स
रसी कमलाकला कान्यकु
श्रेष्ठोऽपि भनंदनउरुक्रमः

सभां संप्राप योगान्ते यत्न
क्रोडे समुत्थितां कृत्वा वत्सि
राजेन्द्र स्वकान्तायै ददौ मुदा
मालावती स्तनं दत्वा तां पु
पोष प्रहर्षिता ददर्श नन्दः
पथितां गच्छंतीं च मुदान्वितः
नन्दउवाच शृणुराजेन्द्र वत्सा
सि विशेष कवचनं शुभं सम्ब
न्धंकुरु कन्याया विशिष्टेनचसा
म्प्रतं वृषभानसुतःश्रीमान्वृष
भानो व्रजाधिपः । नारायं
णांशायुएवास्त्रवरस्य सर्पदे
तः कन्या ते योनिसंभूता य
ज्ञकुंडसमुद्भवा । मैलो
क्य मोहिनी शांता कमला
शाकलावती सुचयोगप्रस्तड
रित्तस्तयोरूपा तेच कन्यका
भनन्दन उवाच सम्बन्धो हि वि
धिवशो न मे साध्यो व्रजाधि
प प्रजापति र्योगकर्त्ता जन्म
दाताहमेव च वृषभानप्रियाथा
त्रा लिखिता चेत्कुता मम पुत्रा
भूतेव कोवाहं केनान्येन निवा
र्यते रूपानुक्ता मुपादाय व्र
जश्रेष्ठो व्रजं गतः ।
गत्वा सकथयामास वृषभा
नस्य संसदि वृषभानस्य पत्नेन

नन्देनच समादरं सम्बन्धं यो
जयामास गर्गदाराच सत्वरं ॥
वृषभानोसुता शुक्लः प्राप्यतां
च कुलावंती रेमे स्वनिर्जनेरम्ये
बुबुधे न दिवानिशं ॥ त
योकन्याच कालेन राधिकासा
बभूवह देवात्श्रीदाम शापेन
श्रीकृष्णस्याज्ञया पुरा ॥ अ
योनिसम्भवा साच कृष्णप्राणा
धिका सती । इति ब्रह्मवै
वर्त्तेश्रीकृष्ण जन्मखंडे ९ अ
ध्यायः वृषभासा स्त्री अमराव
ती इति त्रिकांडशेषः ॥
वृषभासी स्त्री इन्द्रवारुणी
इतिराजनिर्घंटः वृषवत्तापि त्रि
वृषयः पुं आश्रयः इत्युणादि
कोषः ॥
वृषलः पुं गंजनः शूद्रः ॥
चंद्रगुप्तराजः वाजी । इति
मेदिनी अधार्मिकः । इति
जटाधरः ॥
वृषलात्मजः त्रि अधार्मिकः
जातः इतिकेचित् शूद्राद्भुतस्य
वृषली स्त्री पितृगेहे अविवा
हिता रजस्वला कन्या यथा
अविकाश्चपैषा पितुर्गेहे च या
कन्या रजः पश्यत्यसंस्कृता ।

4831

भ्रूणहत्या पित स्तस्याः साकन्या
वृषली स्मृता इत्युद्वाहतत्वं ॥
स्वपतिं परित्यज्य या परपति
गामिनी यथा स्ववृषं या प
रित्यज्य परवृषेवृषायते । वृ
षली सा हि विज्ञेया नशूद्रा
वृषलीभवेत् इति काशीखं
डः शूद्री च ॥
वृषलीपतिः पुं वृषलीविवा
ह कर्त्ता यथा यस्तु तां वरये
त्कन्यां ब्राह्मणो ज्ञानदुर्बलः
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृ
षलीपतिं इत्युद्वाहतत्वं ॥
यदिशूद्रां व्रजेद्विप्रो वृषलीप
ति रेव सः इति ब्रह्मवैवर्त्तपु
राणं ॥
वृषलोचनः पुं मूषिकः इति
हेम चंद्रः वृषनयेन त्रि ॥
वृषवाहनः पुं शिवः इतिके
चित् ॥
वृषशत्रुः पुं विष्णुः इति त्रि
कांडशेषः ॥
वृषस्कन्धः पुं भंगरोलः इति
शब्दमाला ॥
वृषस्यंती स्त्री कामुकी इत्यमरः
वृषेण जन्तु मिच्छती गौः ।
इति व्याकरणं तथाच लक्ष्मीं

सा वृषस्यंती महोत्तं गोविंदा
गमत् मन्मथापुष संपातवा
ध्यमानमतिःपुनः इतिभट्टिः
वृषास्त्री मूषिकपर्णी इत्यमरः
कपिकच्छुः इति हेमचंद्रः
वृषा न पुं इंद्रः कर्णः वेद
नात्तानं डःखं इति मेदिनी
वृषः चोटकः । इति हे
मचंद्रः ॥
वृषाकपायी स्त्री लक्ष्मीः गौ
रीइत्यमरः स्वाहा इति भरतः
शची इति स्वामी जीवंती
शतावरी इति मेदिनी ॥
वृषाकपिः पुं विष्णुः शिवः
अग्निः इति मेदिनी इंद्रः
इतिवृषाकपायीशब्ददर्शना
त् वृषाकरः पुं माषः इतिरा
जनिर्घंटः ॥
वृषांकः पुं शिवः साधुः भ
ल्लातकः षंडः इति मेदि
नी वृषांकजः पुं डमरुः इति
शब्दरत्नावली ॥
वृषाचनः पुं शिवः इति त्रि
कांडशेषः ॥
वृषाणकः पुं शिवः इति त्रि
कांडशेषः ॥
वृषान्तकः पुं विष्णुः इतिशब्द

रत्नावली ॥
वृषायणः पुं चटकः इति हा
रावली शिवश्च ॥
वृषाह्वयः पुं विडालः इति
हारावली ॥
वृषीनः पुं मयूरः इति शब्द
माला वृषी स्त्री व्रतिनां कु
शादिमयासनं इत्यमरः ॥
वृषोत्सर्गः पुं श्राद्धादौ वत्स
तरीचतुष्टयसहित त्रिशूलच
क्राङ्कित वृषभत्यागः तस्य वि
धि र्यथा कालविवेकधृतपु
राणं एकादशाहे प्रेतस्य
यस्य वोत्सृज्यते वृषः प्रेत
लोकं परित्यज्य स्वर्गलोकं
स गच्छति आद्यश्राद्धे त्रिप
क्षे वा षष्ठमासि च वत्सरे
वृषोत्सर्गश्च कर्तव्यो यावन्न
स्यात्सपिण्डता सपिण्डीकर
णाद्ध्वं कालो ऽन्यः शास्त्र
चोदितः यस्य प्रेतस्य तिमासा
स्तः श्रुतेः पितृभिन्नस्यापि
वृषोत्सर्गः प्रतीयते अथ वृषो
त्सर्गं व्याख्यास्यामः कार्तिक्यां
पौर्णमास्यां रेवत्यां आश्वयुजी
दशाहे गते सम्वत्सरे ऽतीते वे
ति अत्र मृत तिथिमादाय स
वत्सर

गणानां दश रुद्रदिग्विरो
धः एकादशाहः इति आद्यश्रा
द्ध इति चाशौचान्ताद्द्वितीयदिन
परं अशौचान्ताद्द्वितीयदिनपरं
अशौचान्ताद्द्वितीये ऽह्नि शाय्या
दद्याद्विलक्षणां काञ्चनं पु
रुषं तद्वत्फल वस्त्र समन्वितं
संपूज्य द्विज दाम्पत्यं नाना
भरण भूषणैः वृषोत्सर्गश्च
कर्त्तव्यो देया च कपिला शुभा
इति मत्स्यपुराणैकवाक्यत्वात्
प्रेतवृषोत्सर्गे वृद्धिश्राद्धं न
कर्त्तव्यं नार्वाक्सम्वत्सराद्वृद्धि
वृषोत्सर्गे विधीयते सपिण्डी
करणादूर्ध्वं वृद्धिश्राद्धं विधीय
ते इत्युशनसो वचनात् ॥
वृषलक्षणमाह कात्यायनः
अव्यंगो जीववत्सायाः पयस्वि
न्याः सुतो बली एकवर्णो द्वि
वर्णो वा यो वा स्याद्रक्तकस्ततः
शृङ्गाद्युन्नतो यस्तु समोवाली
च एव वा सम्यावतस्य परान्
रक्तस्तारयेद्वृषः अष्टकामुत्तश्च
एकास्ते जातः कामधेनु प्रभ
तिषु मत्स्यपुराणे चरणानि मुखं
पुच्छं यस्य श्वेतानि गोपते ला
क्षारस सवर्णश्च तं नीलमिति नि
दिशेत

4933

वृष एव स मोक्तव्यो न संधार्यो
गृहे वसन् तदर्थं मेषा चरति
लोके गाथा पुरातनी एष्टव्या
बहवः पुत्रा यद्येकोपि गयां व्र
जेत् गौरीम्वाप्युद्वहेद्भार्यां नील
म्वा वृषमुत्सृजेत् ॥ वत्स
तरीं विशेषयति अयतो लो
हिता पत्नी पार्श्वाभ्यां नीलपाण्डु
रे दृष्टतश्च भवेत्कृष्णा वृषभ
स्य च मोक्षणे वैधकर्मार्थमंड
पात वितान युक्ते हयशीर्षपं
चरात्रं नवेन चित्र वस्त्रेण विता
नं कल्पयेद्बुधः अत्र च शुक्लाम्ब
राः शुचि र्भूत्वा ब्राह्मणान्स्वस्ति
वाच्य च कीर्तयेद्भारतं चैव तथा
स्यादक्षयं हविः इति दानधर्मस्य
वृषोत्सर्ग प्रकरणीय वचनात्
अक्षय्य हविष्ककामेन स्वस्तिवाच
नान्तरं भारतनामोच्चारणं कार्यं
यदुक्तं कुरुते पापं ब्राह्मण
स्त्विन्द्रियैश्चरन् महाभारतमा
ख्याय सर्वं संध्यां विमुञ्चति ।
इत्यादि पुराणोक्त प्रात र्महाभा
रतोच्चारणवत् राढदेशी या
स्तु विराटपर्व पाठयन्ति भवि
ष्ये वृषोत्सर्गश्च द्विविधो जीव
तो वा मृतस्य च इत्युपक्रम्य अत्र

त्तां गृह्यच पुनर्गणेशं पूजये
द्दे ग्रहांश्चैव यजेत्पश्चाद्वि
सं संपूजयेन्नरः ॥
छन्दोगपरिशिष्टं । गोशाला
यां प्रणीयाग्निं संस्कृत्य व्रीहि
तण्डुलान् अग्निं पूषेन्द्रेश्वरेभ्यो
निर्वपेत् पायसं चरुं गोशा
लाया मिति प्रधानकल्पः वृष
भ इत्युपक्रम्य उत्स्रष्टव्यो वि
धानेन श्रुति स्मृति निदर्श
नात् प्राग्दक्षवने देशे मनो
ज्ञे निर्जने वने संकल्पानन्तरं
यजमान एव प्रथमं ब्रह्मव
रणादिकं कुर्यात्तत्र ब्रह्मवर
णं प्रथमतः ज्योतिष्टोमे ब्र
ह्माणं होतारं होतृधुं इत्यादिद
र्शनेन गृह्यसंग्रहे घृतेच
व्यवहारे च प्रवृत्ते यज्ञकर्मणि
यानि एषयसुदासीनाः कर्त्ता
तानि न एषपति एकः कर्मणि
युक्तः स्याद्द्वितीयस्त्वेव धारकः
तृतीयः प्रत्युपात्तश्च ततः कर्म
समाचरेत् वरणानन्तरं कुश
ण्डिकां समाप्य यथाविधिना
चरुपाकं च कृत्वा चरुहोमं कु
र्यात् ततः स्विष्टि कृद्धोममहा
व्याहृतिहोमौ कुर्य्यां ततः वृ

पसरतिणे पार्श्वे त्रिशूलं॰
कं समुल्लिखेत् वृषाङ्कसीति
सव्येऽस्य चक्राङ्क मपि दर्शयेत्
तमेन पश्चादयसा स्पृष्टो ता
वव कारयेत् अथैनं कलम
स्याभि रद्भिरेको वृषणा वा
सर्वौषधिसुगन्धीभिः स्नापये
द्वत्सिका अपि परिधाप्यास्ते
क्षौक्षे वाससी हेमपट्टके सत्य
मिथ्याद्वृषासोम सामभ्यापि
रमि न्यसेत् ततो वृषवत्सत्मी
णा मलंकारादिकं दत्वा वि
ल्व वकुल निर्मित यूपेऽप
यूपेच वद्ध्वा पवं ब्रुवान इति
मन्त्रं पठित्वा वत्सतरीच ते
ह्यसहितं वृष तेनत्स्फलका
मी अयोऽभ्याद वाकोनोत्सृज
त् ततो यूपाद्विमुच्य वत्सतरी
चतुष्टय सहितं वृष मेशा
न्यां चालयित्वा प्रार्थयेत् ।
यथा ।नत्वादेस्त्रिवयास्मा निमा
क्षामगर्भिणीच या यमोसि
वंचतस्मादन्तस्त्रलेप्रिया
स्त्विमाः चतुर्णां पोषणार्थाय
मयोत्सृष्टास्त्वयासह देवाना
पितॄणांच मनुष्याणांच पोपितः
भूतानांत्वक्षिततना त्वयासा
र्द्धं चत्रस्त्विमाः नमो ब्रह्मण्यदेवाय पित्

भूतर्षिपोषक त्वयि मुक्तेऽस्ते
या लोका मम सन्तु निरामयाः
मामेरणोऽस्तु देवोथ पैत्रोभो
तोऽथ मानुषः धर्मस्तुत्वत्स
पन्नस्य या गतिः सास्तु मेभुवा
यत्किंचिदुष्कृतं कर्म लोभ
मोहात्कृतं भवेत् तस्माद्रु
म देवश पितः स्वर्गं प्रयच्छ
ये यावंति तवलोमानि शरीरे
सम्भवंतिच तावद्वर्ष सहस्राणि
स्वर्गेवास्तु मेपितु इतिमत्स्य
पुराणोक्तं पठेत् तत आचारा
वृषपुच्छगलितादकेन ब्रह्मप
णोक्त तर्पणं कुर्यात् ततः
प्रकृतदक्षिणां कृत्वा कर्मकार
यितृभ्यो दक्षिणां दद्यात् इति
वृषोत्सर्गतत्वं ॥ अपिच ।
कार्त्तिक्यां कारयेत्सम्यक् यागं
देवीप्रिय सदा गोत्सर्गं तत्प्रकार्ये
ध्रौ नीले वा वृष मुत्सृजेत् सर्वय
ज्ञफलं ब्रह्मपामुयादविचारयन्
मनुरुवाच अश्वमेध समं प्राप
वृषोत्सर्गादवाप्नुते देवत्वं चापि
ने मासि कार्त्तिक्यां कार्त्तिकस्य वा गोविन्दा
होथवा कार्यं माध्यां वैफाल्गु
नेऽपिवा शिवामा मेग

लं वैरे तृतीयायां महाफलं ।
अश्वत्थोदुम्बरी यागं विवाहवि
धिना भवेत् सतोरणं भवे
तीर्थे उत्सर्गो गोकुलेऽपिवा ॥
वतस्तो वत्सिका भद्रा द्वे वा
स भवतोपिवा वत्स सर्वांग
संपूर्णा कन्यासा वत्सिका भ
वेत् अलंकृत्य यथाशोभ
मुत्सर्गं कारयेन्मुने विवाह
मेक वत्सीक नीलेन भवेत्तस
दा वृषणाश्वमेधस्य याग
सफलदायकं जायेरन्वहवः
पुत्रायद्येकोपि गयां व्रजेत् ·
यजेत्वा अश्वमेधेन नीलं वा
वृषमुत्सृजेत् रोहितो यस्तुव
र्णेन शंखवर्णाखुरो वृषः ला
ङ्गूलाशिरसश्चैव सवै नीलवृ
षःस्मृतः अंकित्वोत्सृज्यते पू
र्वं गां चालंकृत्य सर्वतः तप्तेन
वामत स्वस्ते याम्ये शूले समा
लिखेत् धातुना हेम तोरणा
आयसेनाथ वांकयेत् एवं
कृत्वा अवाप्नोति फलं वाजिम
धोदितं यमुद्दिश्योत्सृजेत्वत्स
स लभते विचारणात् ॥
यथा शिवामजा अर्वी हजिता
सर्वकामदा पवं देव अयं वहू

अनन्तं लभते फलं मंगला
विहितं यत्र यत्र गोरानजं
फलं सहस्र कलव स्तेनवृषो
त् सर्गादवाप्नुयात् इति देवी
पुराणे प्रजाविपिनाभाध्यायः
वृष्टिः स्त्री मेघाज्जलबिंदुपतने
तत्पर्यायः वर्षं २ अम्मरः
गोहृतं ३ पराम्हतं ४ वर्षणं
५ इति शब्दरत्नावली ॥
तत्कारणं यथा अस्तादि
त्ये यत्र भवंति सर्व खेचराः
तदाद्वृष्टिः क्रमा ज्ञेया मुख्यके
वल वासरैः इति स्वरोदयः
अपिच अवेत् परमार्थेचार्कि
मिन्द्रावृष्टि देव च सूर्याद्दिजा
यते तोये तोयात्सस्यानि शा
लिनः तेभ्योऽन्नानि कल्पान्येव
तेभ्यो जीवंति जीविनः सर्वे
ग्रस्तव नीरेच कालेतस्मात्स
मुद्रवः सर्वो मेघादयः सर्वे
विधात्रा ते निरूपिताः ।
यद्वाद्दे यो जलधरो गजस्य
सागरो महत् शास्त्राधिपोन्
पो मंत्री विधात्रा ते निरूपिताः
जलाटकानां पास्यानां तृणा
नांच निरूपितं अद्दे ३ द्वे ६
स्सैव तत्सर्वकस्पेकल्पे युगे

युगे हस्ती सम्बंहस्तीसमुद्रादा·
दाय करेण जलमीप्सितं स्या·
घनायतद्ध्याद्यानेन प्रेरितो घनः
स्थाने स्थाने वृष्टिवांश्च काले·
काले यथोचितं ईश्वरेच्छयावि
र्भूतं तूर्णं भूतं प्रतिबंधकं भू
तं भव्यं भविष्यंच महत्तरेच
मध्यमं धारा निरूपितं कर्म
केन तात निवार्यते । इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखंडे ११
अध्यायः आसन्नवृष्टिसूचका
नि यथा मयूरा स्तनयित्नूनां
घोषेण हर्षिता मुदः केकायंति
प्रतिवने सततं वृष्टि सूचकाः
मेघोत्सुकानां मधुर श्रुतं·
कानामनोहरः श्रूयते मति
मत्तानां वृष्टि सन्निधि सूचकः
गगने शक्रचापेन कृतं साम्ब्र
तमास्पदं धारासार शवे स्तापं
च्छेत्तुं प्रति यथोद्यतः ॥ इति
कालिकापुराणे ९५ अध्यायः
वृष्टिफलं यथा पतिव्रतायाः
वचनान्नोद्गच्छति दिवाकरः
सूर्योदयं विना नैव स्नानदा
नादिकाः क्रियाः नाग्नेर्विहरणं
चैव कृतभावश्च लसते नैवा
प्यायन सस्याकं विना होमेन

जायते वर्ष माप्यायिता मेघ
यंत्रभोगं यथोदितैः वृष्ट्या
दिनानुग्रहंमीमो मर्त्यान्सम्पा
दिसिद्धये निष्पादितास्त्वोषधी
शुभमस्या यज्वानः यष्टा व
यं सम्यच्छामः कामान्यज्ञादिपू
जिताः अधोहि वर्षामवयं
मर्त्यास्त्वोर्द्धं प्रवर्षिणः तोय
वर्षेणादिवयं हविर्वर्षेण मान
वाः यऽस्माकं नप्रयच्छंति नित्या
नैमित्तिकीः क्रियाः कृतभागंड
रात्मानः स्वयं येऽश्नंति लोल
पाः विनाशाय वयं तेषांतो
य सूर्याग्नि मारुतैः क्षितिंच
संदूषयामः पापाना मपकारि
णां दुष्टतोयादि दोषेण ते
षां दुष्कृत कारिणां उपसर्गाः
प्रवर्त्तते मरणाय सुदारुणाः
येचास्मान्प्रीणयित्वा तु भुंजन्ते
शेषमात्मना तेषां पुण्यान्वयं
लोकान्वितरामो महात्मनां ॥
इति मार्कण्डेयपुराणे पतिव्र
तामाहात्म्यनामाध्यायः अथ
वृष्टिजलगुणाः गगणाम्बु त्रि
दोषघ्नं गृहीतं यत्सुभाजने।
बल्यं रसायनं मेध्यं पात्रापेक्षि
च तत्परं ॥ दिव्यार्ककिरणै

र्जुष्टं स्पृष्ट मिन्दुकरैर्निशि ।
अरूक्ष मनभिष्यन्दि तत्तल्यंगांग
नाम्बुना वर्षास्तुचरति बैनःस
होरगा विषति कीर लूताम्ब।
तद्विष जुष्ट मपेयं स्वजलमग
स्त्योदयात्सर्वं कालेन पक्वं·
निर्द्दोष मगस्त्येनाविषीकृतं ।
हंसोदक मिति ख्यातं शारदं
विमलं जलं इति राजवल्ल
भः अथ तस्य भेदाः । पानी
यं मुनिभिः प्रोक्तं दिव्यं भौम
मिति द्विधा दिव्यं चतुर्विधं
प्रोक्तं धाराजं करकाभवं ॥
तौषारंच तथा हैमं तेषु धारं
गुणाधिकं तत्र धारस्य लक्ष
णं गुणाश्च धाराभिः पतितं·
तोयं गृहीतं स्फीतवाससा ।
शिलायां वसुधायां वा धौता
यां पतितं च यत् सौवर्णे रा
जते ताम्रे स्फाटिके काचनि
र्मिते भाजने मृन्मये चापिस्था
पितं धार मुच्यते ॥ धार
नीरं त्रिदोषघ्न मनिर्देश्य रसं
लघु सौम्यं रसायनं बल्यं त
र्पणं ह्लादि जीवनं पाचनं म
तिकृन्मूर्च्छा तंद्रा दाह श्रमक्ल
मान् तृष्णा हरति तत्पथ्यविशे

षात्प्रावृषि स्मृतं ॥ अथ
धारा जलस्य भेदौ धारा ज
लंच द्विविधं गांग सामुद्रभे
दतः तत्र गांग सामुद्रयो
र्लक्षणं गुणाश्च आकाशगं
गा सम्बंधि जलमादाय दिग्ग
जाः मेघै रन्तरिता वृष्टीः कुर्व
न्तीतिवचः सतां गांग माश्वयु
जेमासि प्रायो वर्षति वारिदः
सर्वथा तज्जलं देयं तथैवच
रकेवचः स्थापिते हैमने पात्रे
राजते मृन्मयेऽपिवा शाल्य
न्नेयेन संसिक्तं भवेदक्लेदि व
र्णवत् तत्तांगं सर्व दोष
घ्नं ज्ञेयं सामुद्र मन्यथा तत्तस
तावलवणं शुक्र दृष्टि बलापहं
विस्रंच दोषलं तीक्ष्णं सर्वक
र्मसु गर्हितं सामुद्रं त्वाश्विनेमा
सि गुणैः गांगवदादिशेत् य
तोऽगस्त्यस्य विमृर्षे हृद्यात्स्व
कलं जलं निर्मलं निर्विषं
स्वादुशुक्लं साददोषलं ॥
अंत पवाह फूत्कारविषवा
तेन नागानां व्योमचारिणां
वर्षासु सविषं तोयं दिव्यम
प्यास्विनं विना इति भाव
प्रकाशः ॥

वृष्टिघ्नी स्त्री भृंगपर्णिकाक्षु
जराटी पलाशच इतिभाषा इ
ति शब्दचंद्रिका वृष्टिनाशके
त्रि वृष्टिजीवनः त्रि देवमातृक
देशः इति हेम चंद्रः वृष्टि
जीवने यससः ॥
वृष्टिभूः पुं भेकः इतिहारा
वली वृष्टि भवे त्रि ॥
वृष्णिः पुं मेघः इत्यमरः ॥
यादवः इति शब्दरत्नावली
कृषः इति त्रिकाण्डशेषः ॥
वृष्णिः त्रि पाषंडः चंडः इति
शब्दरत्नावली ॥
वृष्णिगर्भः पुं श्रीकृष्णः इति
हारावली ॥
वृष्यं क्ली राजीकरं इति रा
जनिर्घंटः ॥
वृष्यः पुं माषः इति हेमचं
द्रः वृष्यः त्रि शुक्रवृद्धिकारके को
षधादिः इतिभावप्रकाशः ।
वृष्यकंदा स्त्री विदारी इति
राजनिर्घंटः ॥
वृष्यगंधा स्त्री वृद्धदारकः ।
इति शब्दरत्नावली ॥
वृष्यगंधिका स्त्री अतिबला इ
ति राजनिर्घंटः ॥
वृष्यवल्लिका स्त्री विदारी ।

इति राज निर्घंटः ॥
वृष्या स्त्री ऋद्धिनामौषधं इति
रत्नमाला शतावरी आमल
की इति राजनिर्घंटः ॥
वृह ई कि त्विषि इतिकविक
ल्पद्रुमः सप्तमस्वरी इर्हंहते
कि वृंहयति वृंहति इतिदु
र्गादासः ॥
वृह इर ध्वने अहो । इति
कविकल्पद्रुमः इर् अवृहत्
अवर्हीत् ध्वनः शब्दः अर्हि
वृंहिः इतिदुर्गादासः ॥
वृह इ ध्वने अहो सप्तमस्वरी
इ बृंहते ववृंहिरे गजपतयः
इति माघः ॥ आत्मनेपदं प्र
सादादिति वल्लभः । ध्वनय्
ति वृंहति कर्टकः वृंहितेक
रि गर्जित मित्यमरसिंहात् ।
वृंहिते करि गर्जायां शब्दमात्रे
पि कथ्यते इतिशब्दार्णवा
त् कदाचिदन्यकर्तृकोपि ।
तेन श्रीहर्षचरिते सिंह वृंहित
मिति बाणभट्ट प्रयोगः इति
दुर्गादासः ॥
वृह वृहो इति कविकल्पद्रुमः
वर्हति वृद्धि ध्वनर्हो वित्यनेने
वेट्सिरे ऽस्य पाठो

वृहो इरनुबन्ध वर्जनार्थः ।
किंत अग्रे नेवेट्सिद्धे तत्र अ
हि ग्रहणं परस्मानुबन्धार्थमेव
अयं भावः केचिन्नमन्यते ।
इति दुर्गादासः ॥
वृह श कृ उद्यमे इति कवि
कल्पद्रुमः शवृहति कृ अवर्ही
त् अवृहत् । इति दुर्गादा
सः ॥
वृह र उ वृहो इतिकविकल्प
द्रुमः र वृंहते उ वृंहते ।
इतिदुर्गादासः ॥
वृहच्चंचुः पुं महाचंचुशाकः ।
इति राजनिर्घंटः ॥
वृहच्छित्रः पुं फलपूरः इति
शब्द चंद्रिका ॥
वृहच्छल्कः पुं चिंगटमत्स्यः इ
ति जटाधरः ॥
वृहज्जीवंती स्त्री वृहज्जीवंतिका
वृक्षः तत्पर्यायः पत्रभद्रा २
प्रियंकरी ३ मधुरा ४ जीवपुष्पा
५ वृहज्जीवा ६ यशस्करी ७ अ
स्या गुणाः वृष्यवीर्यदातृत्व भूत
विद्रावणत्वं वेगाढ्यमनियाम
कत्वंच इति राज निर्घं
टः ॥
वृह ढक्काविशेषः यथा ।

वृहड्ढक्कातु भेरी स्त्री दुमा
नडन्दुभि रानकः डगडः प्रति
पत्त्र्य मानकः पटहो स्त्रियां
इति जटाधरः ॥
वृहतिका स्त्री उत्तरीयवस्त्रं
इत्यमरः वृहती इति रत्नमा
ला वृहती स्त्री वृहद्वार्ताकी
व्याकुर इति भाषा तत्पर्यायः
महती २ कांता ३ वार्ताकी ४
सिंहिका ५ कुली ६ राष्ट्रिका ७
स्थूलकंटा ८ भंटाकी ९ महो
टिका १० वकपत्री ११ कंटत
नुः १२ कंटालुः १३ कटुफला १४
गोरटी १५ वनवृन्ताकी १६ इति
राजनिर्घंटः सिंही १७ प्रस
हा १८ रक्तपाकी १९ लताहृट
तिका २० इति रत्नमाला ॥
अस्या गुणाः कटुत्वं तिक्त
त्वं उष्णत्वं वात ज्वरारोचका
मकाश श्वास हृद्रोग नाशित्वं
च इति राजनिर्घंटः अपिच
वृहती पाचनी सोष्णा ग्राहिणी
वातनाशिनी इति राजवल्ल
भः महती इत्यमरः उत्तरीय
वस्त्रे वारिधानी वाक् कंटका
री इति मेदिनी ॥
क्षेत्राभेदः सत्व नवात्तर

पादः यथा उकथाऽत्युक्था
तथा मध्या प्रतिष्ठान्या सुपूर्वि
का गायत्र्युष्णिक् अनुष्टुब्बृहृ
तीपंक्तिरेवच इत्यादि तद्भे
दानाह नवाक्षरा यथा भुजग
शिशुसृता नौमः कुंदतट नि
कटस्रोणी भुजग शिशुसृता
यासीत् हरविप दलिते नागे
व्रजजन सुखदा साभूत् अते
ष्वेवं सामप्रभृतिषु पादः ।
अतेष्वव माधुनिका पंठति
स्सान्मणि मध्यं चेद्वमाः का
लिय भोगा भोग गत स्तन्म
णिमध्यस्फीतरुचा चित्रपदा
भोनंदसुत श्रारु ननर्त सिर
मुखः सजरे भुंजग संगताते
वला तरंग रिंगिते यमुना भु
जंग संगता कथ मेव वत्सवा
दक सपलः सदैव तां हरिः ॥
इतिछंदोमंजरी ॥
बृहतीपतिः पुं बृहस्पतिः इ
ति हेमचंद्रः ॥
बृहत् त्रि महत् इत्यमरः ॥
बृहत्कः त्रि बृहत् बृहतश
ब्दात्का प्रत्ययेन निष्पन्नः ॥
बृहत्कन्दः पुं गंजनः । इति
रत्नमाला ॥

राजनिर्घंटः ॥
बृहत्कालशाकः पुं शोथजित्मः
बृहत्कालकासुन्दिया इतिभा
षा इति त्रिकांडशेषः ॥
बृहत्काशः पुं खट्टगटः खाखरा
इति भाषा इति हारावली ॥
बृहत्कुक्षिः त्रि तुंदिलः इत्य
मरः ॥
बृहत्तालः पुं हिंतालः । इति
राजनिर्घंटः ॥
बृहत्तिक्ता स्त्री पाठा इति राज
निर्घंटः ॥
बृहत्तृणः पुं वंशः इतिश
ब्दचंद्रिका ॥
बृहत्त्वक्च पुं सप्तच्छदवृक्षः ।
छातियान् इति भाषा इति
रत्नमाला ॥
बृहत्पत्रः पुं हस्तिकन्दः इति
राजनिर्घंटः ॥
बृहत्पत्रा स्त्री त्रिपर्णिका इति
राजनिर्घंटः ॥
बृहत्पाटलिः पुं धुस्तूरः इति
त्रिकांडशेषः ॥
बृहत्पादः पुं वटवृक्षः इतिश
ब्दचंद्रिका ॥
बृहत्पारेवतं क्ली महापारेवतं
इतिराजनिर्घंटः ॥

बृहत्पालीन पुं वनजीरः इतिरा
जनिर्घंटः ॥
बृहत्पीलुः पुं महापीलुः इति
राजनिर्घंटः ॥
बृहत्सुम्भी स्त्री येरावता इति
जटाधरः ॥
बृहत्फलः पुं चचेंडा । इति
राजनिर्घंटः ॥
बृहत्फला स्त्री कटुतुम्बी महे
न्द्रवारुणी कूष्मांडी ॥ महाज
म्बूः इति राजनिर्घंटः ॥
बृहद्दंगः पुं मत्तगजः । इति
शब्द चंद्रिका ॥
बृहदेलः पुं रुजाकरः काम
रांगा इति भाषा इति शब्द
चंद्रिका ॥
बृहदेला स्त्री स्थूलैला इतिरा
जनिर्घंटः ॥
बृहद्गृहः पुं कारूपदेशः सत
विन्ध्यपर्वतस्य पश्चात्तस्यालव
देशस्य निकटे वर्त्तते इति
हेमचंद्रः त्रिकांडशेषः बृहद्गुर
इतिपाठः ॥
बृहद्गोलं क्ली शीर्णवृंतं तर
मूज इति भाषा इति शब्द
चंद्रिका ॥
बृहद्दलः पुं पट्टिकालोध्रः ॥

हिंतालः इति राजनिर्घंटः
बृहद्दलं क्ली महानीलकमलं त
त्पर्यायः दलिः २ इति त्रि
कांडशेषः ॥
बृहद्दारिका स्त्री दुर्गा इति
शब्दमाला ॥
बृहद्भानुः पुं अग्निः चित्रक
वृक्षः इत्यमरः ॥
बृहद्रथः पुं इंद्रः यज्ञपात्रं
मंत्रविशेषः सामवेदांशः ॥
नदीविशेषेस्त्री इति कश्चित्
बृहद्रान पुं चक्रोलूकः इति
राजनिर्घंटः ॥
बृहद्वल्कः पुं पट्टिकालोध्रः
इति राजवल्लभः ॥
बृहद्वातः पुं अश्मरीहरः दे
धान इति भाषा इतिरत्न
बृहद्वारुणी स्त्री महेन्द्रवार
णी इति राजनिर्घंटः ॥
बृहद्बीजः पुं आम्रातकः इति
शब्द चंद्रिका ॥
बृहन्नलः पुं महापोटगलः
इति मेदिनी अर्जुनः यथा
पार्थः किरीटी गांडीवी गु
डाकेशो बृहन्नलः अर्जुनः फा
ल्गुनो जिष्णु विजयश्च ध
नंजयः सव्यसाची सुभद्रेशः पा

बृभेदी कपिध्वजः वार्त्तोद्भ्रष्टा
पिवीभत्स इति त्रिकाण्डशेषः
अपिच अर्ज्जुनः फाल्गुणः पा
र्थः सव्यसाची धनंजयः गाथा
वेधी किरीटी ऐन्द्री जिष्णुः श्वेत
हयोनरः बृहन्नलो गुडाके
शः सुभद्रेशः कपिध्वजः वी
भत्सुः कर्णजित्तस्य गाण्डीवं गा
ण्डिवं धनुः इति हेमचंद्रः ॥
बृहन्नला स्त्री अर्ज्जुनः इतिमे
दिनी द्वादशवर्षवनवासानं
तरमज्ञातवासे विराटभवनेवि
राट कन्याया नृत्यगीतादिशि
क्षार्थं स्त्रीक्लीव वेशेनार्ज्जुनो
बृहन्नलेति नाम्ना ख्यातोऽभूत
यथा अर्ज्जुन उवाच गायामि
नृत्यामाथ्य वादयामि भद्रास्मि
नृत्ये कुशलोऽस्मि गीते त्व
मुत्तराये प्रदिशस्व मां स्वयं
भवामि देव्यानदेव नर्त्तकः
इदंतु रूपं मम येन किंत
व प्रकीर्त्तयित्वा भृशं शोकव
र्द्धनं बृहन्नलां मांनरदेव वि
द्धि सुतं सुतां वा पितृ मातृ
वर्जितां विराट उवाच द
दामितेहन्त वरं बृहन्नले सु
तांच मे नर्त्तययाश्च तादृशीः

इति महाभारते विराटपर्व ॥
बृहस्पतिः पुं अंगिरसः पुत्रः ।
सर्वदेवानां गुरुः धर्मशास्त्रप्रयो
जकः नवग्रह मध्ये पंचमग्रहश्च
तत्पर्यायः सुराचार्यः २ गी
ष्पतिः ३ धिषणः ४ गुरुः ५
जीवः ६ आंगिरसः ७ वाचस्प
तिः ८ चित्रशिखण्डिजः ९
इत्यमरः उतथ्यानुजः १० गोविं
दः ११ चारुः १२ द्वादशार्चिः १३
गिरीशः १४ दिदिवः १५ पूर्व
फल्गुनीभवः १६ । इति ज
टाधरः ॥ सुरगुरुः १७ वा
कपतिः १८ वचसांपतिः १९ इ
ज्येः २० देवेज्यः २१ बृहतांप
तिः २२ इज्यः २३ वागीशः २४
वक्ताः २५ दीदिविः २६ द्वादशा
करः २७ माकन्दालयगणः २८
गीरथः २९ इति शब्दरत्नावली
सच पीतवर्णः ईशानकोण
पुरुष ब्राह्मणजाति ऋग्वेद
सत्वगुण मधुररस धनु मीन
राशि प्रधानतत्त्वत्व पुष्पराग
मणि सिन्धुदेशानां अधिपतिः
चतुरंगुलशरीरः पद्मस्थः चत
र्भुजः अक्षवर कमंडलु दंडधा
री अस्याधिदेवता ब्रह्मा प्र

4843

त्यधिदेवता इंद्रः सत्व स्व
र्गीयः अंगिरो मुनिपुत्रः माघः
काले प्रबलः शुभग्रहः देव
हस्वामी वृद्धः रक्तदृग्वक्त्रो
मी वात पित्त कफात्मकः
वाणिक्कर्मकर्त्ता अंगिरो गोत्रः
इति ग्रहयागतत्त्वादयः त
द्वार गानफले नृपेन्द्रमहीनृप
लब्धकामो विद्याविनोदीच तु
रः प्रगल्भः आचार्य्यरत्नोपमधु
रस्वभावो वारे भवेद्देवगुरो मे
नुष्यः इति कोष्ठीप्रदीपः स
च शिवस्य गुरु पुत्रः यथा महे
न्द्र उवाच कथंवा देवकार्त्तेश्च
सिद्धानां योगिनांगुरोः ।
मृत्युंजयस्य शंभोश्च गुरुपुत्रो
बृहस्पतिः ॥ ततो ज्ञा
नी महादेवः कथं शिष्यो गुरोः
पितुः ब्रह्मोवाच कथय मति
गुह्यञ्च पुराणेषु पुरन्दर इमां
पुरा प्रवृत्तिंच कथयामि निशा
मय मृतवत्सा कर्मदोषाङ्गया
अंगिरसः पुरा व्रतं चकार म
हाभाग्यस्य परमात्मनः
व्रतं पुंसवणं नाम वर्षमे
कंचकारसा समत्कुमारो भग
वान्कारयामासतां व्रतं ॥

स्वेच्छामयः परं ब्रह्म भक्ता
नुग्रहविग्रहः तदागत्य च गो
लोकात्परमात्मा कृपामयः म
ब्रतानशनक्षीणां तामुवाच कृ
पानिधिः प्रणतां साश्रुनेत्रां
चविनीतांच तया स्तुतः श्रीकृ
ष्णउवाच गृहाणेदं वृक्षफलं
ममतेजः समन्वितं भुंक्त मह
त्पुत्रस्ते भविष्यति सदेशानः
पति गुरुश्च देवानां बृहतांज्ञा
निनां वरः पुत्रेस्ते भविता सा
ध्वि महेशेण भविष्यति महेश्व
राभवेष्या हि सच महत्पुत्र
कः त्वद्गर्भे मम पुत्रोयं चिर
जीवी भविष्यति वरेण्यो वीर्य
ज श्चैव तद्वजः पालक स्तथा
विमंत्र सुतानांच गृहीतः सम
मःस्मृतः इत्युक्त्वा राधिकाना
थः स्वलोकंच ययौ पुरा श्रीकृ
ष्णवरपुत्रोयं ज्ञानी सुरगुरुः स्व
यं मृत्युंजयमहाज्ञानं शिवाय
प्रददौ पुरा दिव्यं वर्षत्रिल
क्षंच तपः कृत्वे हिमालये सुयो
गज्ञानं ममतं तेनः स्वात्मा
समेयात् स्वशक्ति विश्व मा
यांच स्वांशंच वाहनंवृषं स
शूलेच सकवचं समंत्र द्वादशा

त्वं कृपामयः स्तत स्वेनश्रीकृ
ष्णपरात्परः शिवा साचवि
ष्णुमाया शिवप्रिया । शक्ति
र्नारायणस्येयं तेन नाराय
णीस्मृता तेजःसुसर्व देवानां
साविर्भूता सनातनी जघान
दैत्यनिकरं देवेभ्यः प्रददौ प
दं कल्पान्ते दत्तकन्याच सा
मूलप्रकृतिःसती पितृ यज्ञे
त्वं त्यक्ता योगेन सिद्धयोगि
नी बभूव शैलकन्या सासा
ध्वी च भर्तृनिन्दया कालेनकृ
ष्ण तपसा शंकरं प्राप शंकरी
श्रीकृष्णो हि गुरुःशास्तेः परमा
त्मा परात्परः कृष्णस्य वरपु
त्रोयं त्वयमेव बृहस्पतिः ॥
अतो हेतोःसुरगुरुः गुरुपुत्रः
शिवस्यच इति ब्रह्मवैवर्ते प्र
कृतिखण्डे ५८ अध्यायः ॥
बृहस्पतिचक्रं क्लीं नृणाञ्च
भाग्यभङ्गानार्थं बृहस्पतिम्भवा
न्तकालीन नरस्यादि सम्भविष्य
तिनरस्त्वगुरु नराकारचक्रं य
था शीर्षे चत्वारि राज्यंजलपि
दपि करे दक्षिणे चापि सौख्यं
चैकं कंठे विभूतिं मदन शार
मितं वक्षसि प्रीति संदं पद

स्याः षट्च पीडां पुनरपि ज
ठरे वामहस्ते च स्तस्ते नेत्रे
श्रीणि प्रदद्युः सुखं मथानिज
मेवाकान्तेः संक्रमन्तीत इति
ज्योतिस्तत्त्वं ॥
वृक्ष उ. वृक्षो इति कविकल्प
द्रुमः सप्तमस्वरी ड. वृक्षे वं
कन्या इति दुर्गादासः ॥
वृक्षः पुं स्थावरयोनिविशेषः
गाछ इति भाषा तत्पर्यायः
महीरुहः २ शाखी ३ विटपी ४
पादपः ५ तरुः ६ अनोकहः ७
कुटः ८ सालः ९ पलाशी १० द्रुः
११ द्रुमः १२ अगमः १३ इत्यम
रः अगच्छः १४ विष्टरः १५
महीरुट् १६ कुचिः १७ स्थिरः १८
कारस्करः १९ नगः २० अगः २१
कुटार २२ इति शब्दरत्नावली
विटपः २३ कुजः २४ वनस्पतिः २५
अद्रिः २६ शिखरी २७ कुठः २८
इति जटाधरः कुंजः २९ क्षितिरु
हः ३० अंघ्रिपः ३१ तरुहः ३२ भू
जः ३३ महीजः ३४ धरणीरुहः ३५
क्षितिजः ३६ शालः ३७ इति
राजनिर्घण्टः ॥ तस्य षड्
जाति यथा कुरंसाद्या अग्र

बीजा मूलजा स्तूपलादयः प
र्वयोनय इक्ष्वाद्याः स्कन्दजाः स
ल्लकी मुखाः शाल्यादयोः बी
जरुहाःसंमूर्छना स्तृणादयः
स्युर्वनस्पतिकायस्य षड्ते मू
लजातयः इति हेमचन्द्रः ॥
संवेद्यापि विज्ञेया वृक्ष गो
पञ्जनवः इत्यग्निपुराणे ॥
भद्रप्रदवृक्षा यथा श्रीभगवानु
वाच स्थाश्रमे नारिकेलस्याग्र
हिणांच धनप्रदः शिविरस्य य
दीशाने सर्वं पुत्रप्रद स्तरुः स
र्वत्र मंगलादेश्च तरुराजो मनो
हरः रसालवृक्षः सर्वस्मिन्शुभे
सम्पत्प्रद स्तथा शुभप्रदश्चस
र्वत्र हरकान्तो निशामय विल्व
श्च पनसश्चैव जंबीरो वदरीत
था प्रजाप्रदश्च सर्वस्मिन्दक्षि
णे धनद स्तथा सम्पत्प्रदश्चस
र्वत्र यतो हि वर्द्धते गृही जम्बु
वृक्षश्च दाडिम्बःकदलाम्रातक
स्तथा वंधुप्रदश्च सर्वस्मिन्दक्षि
णेमित्रद स्तथा सर्वत्र शुभद"
श्चैव धन पुत्र शुभप्रदः वृक्षश्च
दीर्घवाप्ने दक्षिणे पश्चिमेतः
था ईशानेशाखदश्चैव सर्वत्रैवं
निशामय सर्वत्र चंपकः श्रेष्ठो

शुचि भद्रप्रद स्तथा अला
वुश्चापि कूष्मांडो मायाम्बुश्च
स्तकास्तकः खर्जूरी कर्कटीचा
पि शिविरेमंगलप्रदा वास्तूकः
कारविल्वश्च वार्त्ताकुश्च शुभप्र
दा लताफलंच शुभदं सर्वसर्वे
त्र लिखितं निषिद्धवृक्षा यथा
शास्त्रे कथितं कारो निषिद्धं
च निशामय वटवृक्षो निषि
द्धश्चाशिविरे नगरे पिच वटानि
षिद्धः शिविरे नित्यं चोरभय
ततः नगरेषु प्रसिद्धश्च दर्श
नात्पुण्यद स्तथा हेकारो
तिंतिडीवृक्षो यत्नात्तं परिव
र्जयेत शरेण धनहानिःस्या
न्महाहानिर्भवेद्ध्रुवं शिविरे
इति निषिद्धश्च नगरे किंचि
द्देवचनिषिद्धः प्रसिद्धश्चन
गरेषु तथाऽपरे वासा मतिनि
द्धश्च प्राज्ञस्तं परिवर्जयेत
खर्जूरश्चापरुश्चैव निषिद्धः
शिविरे तथा न निषिद्धःप्र
सिद्धश्च ग्रामेषुनगरेषु चवृ
क्षश्च चाणकादीनां धान्यंच मंग
लप्रदं ग्रामेषु नगरे चापिशि
विरे च तथैवच इक्षुवृक्षश्च
शुभदः संततं शुभदस्तथा ॥

अशोकस्य शिरीषस्य कदम्बस्य
शुभप्रदः कह्वी हरिद्राशुभदाश्च
भद्रश्चाईक स्तथा हरी तकीच
शुभदा ग्रामेषु नगरेषुच नवास्तौ
भद्रदा नित्यं तथाचामलकीध्रुवं
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखं
अ डे ९२ अध्यायः अपिच पुत्रस्य
चपुत्रत्वं पादपा इह कुर्वते य
त्नेनापिच राजेंद्र अश्वत्थारोप
णं कुरु स ते पुत्रसहस्राणांका
र्यमेकः करिष्यति धनीचास्य
त्यवृक्षेण अशोकः शोकनाश
नः प्लक्षो यज्ञप्रदः प्रोक्तो निम्ब
श्चायुप्रदः स्मृतः जम्बुकीना
कदा प्रोक्ता भार्यादा दाडिमीत
था दुम्बरोगनाशाय पला
शो ब्रह्मदस्तथा अर्कपुष्पारो
पकानां नित्यं तुष्येद्दिवाकरः
श्रीवृक्षः शंकरो देवः पाचला
यान्तु पार्वती शिंसपायामप्स
रसः कुन्दे गंधर्वसत्तमाः विभी
तके दासवृद्धि बकुलो दास्य
दस्तथा अपत्यनाशकस्तालो
बकुलः कुलवर्द्धनः बहुभार्या
नारिकेली द्राक्षः सर्वांगसुन्दरः
रतिप्रदा तथा केली केतकी स
र्वनाशिनी प्रतिष्ठा ते गमिष्याति

ये नराः सत्तरोपकाः इतिपाद्मे
सृष्टिखंडे वृक्षारोपणं नाम २८
अध्यायः अस्य रोपण फलं।
यम उवाच वृक्ष गुल्म लतावल्ली
त्वक्सारा स्तृणजातयः षडे
ते वृक्ष जातीयास्तासां रोपण फ
लं शृणु यः पुमानारोपयेद्वृक्षान्छा
या पुष्प फलोपगान्।
सर्वसत्त्वोपभोगाय स यातिप
रमांगतिं छाया पुष्पोपगास्ति
ष्टन्फल पुष्प द्रुमा स्तथा रो
पयित्वा दशांशोक्त नरोनर
कं भुजेत् देव दानव गंधर्वाः
किंनरोरग गुह्यकाः पशुपक्षि
मनुष्याश्च संश्रयंति मुदाद्रुमा
न् पुष्पैः सुरगणाः सर्वे फलैश्च
पितरः सदा छायया मेमनुष्या
स्तु पशुपक्षि मृगा स्तथा ॥
पुष्पोपगं यस्तु फलोपगं यान्यः
पादपानारोपयते मनुष्यः । स
महदेशो बहुवेषम वेद्यो लभे
दपिधान वरं स विप्रः तस्मात्तु
बहवो वृक्षा रोप्याः श्रेयोभि वा
च्छता पुत्रवत्परिपाल्याश्च ते
पुत्र धर्मतः स्मृताः किं धर्मे
विमुखे मेर्मे केवलस्यार्थ
हेतुभिः तरुपुत्रा वरं

५८४७

येन परार्थैकान्तवृत्तयः ॥ पत्र
पुष्पफल छाया मूल वल्कल दा
रुभिः परेषा मुपकुर्वंति तारयंति
पितामहान् छेत्तार मपि संश्रा
यं छायापुष्प फलादिभिः ।
पूजयन्त्येव तरवो मुनिवद्द्वेष व
र्जिताः पितरं नोपरिं संतिद्रुमा
द्रविण लोभतः तारयंति च मेस
मक सर्वसातिष्प्रदायकाः तस्मा
त्ते पुत्रवत्स्याप्याविपिवद्द्विजपुंग
व । द्विजैः पितृ मनुष्याणां म
तोप्याः स्तु यदा सदा जलस्कन्द
त्तरोपीयः प्रतिग्राहारुचि द्विजः ।
पतेत्स्वर्गान्नहीयंते येचान्ये सत्पवा
दिनः ॥ इत्याद्येवक्रिपुरा
णे तडागवृक्षप्रशंसा नामा
ध्यायः ॥
अपिच भूमिदानेन ये लोका
गोदानेन चकीर्तिताः । ते
लोकाः प्राप्यते पुंभिः पादपा
नां प्ररोहणे अश्व मेकं पिचुम
र्द मेकं न्यग्रोध मेकं दशपु
ष्पजातीः । द्वेद्वे तथादाडि
म मातुलिंगे पंचाम्रवापीनर
कं नयाति यथा सुपुत्रः कु
लमुद्धरेद्धि यथातिक्रान्तानिय
यप्रयत्नात् तथावृक्षाःफलपु

ष्प भूताः स्वं स्वामिनं नरकादुद्ध
रंति गोकर्ण उवाच इत्यना
र्थे यथा नीत मग्निहोत्रं त
दुच्यते छाया विश्राम पथिकैः
पक्षिणां निलयेनच पत्रमूल
त्वगादीश्च औषधार्थस्तु देहिनां
उपकुर्वन्ति वृक्षस पंचयज्ञः स
उच्यते गृह कृत्यानि कृष्टानि
त्तदुजंत गृहा स्तथा सत्रनिर्वर्त
नं प्रोक्तं भित्तापत्रैः समाकृता
फलंति वत्सरे मध्ये द्विवारं श्रा
वणादयः सांवत्सरं पितृमा
त रुपकारं फलैकृतं ।
एवंश्च समारोप्य एवंतत्त्ववि
दो विदुः इत्यादि वाराहपुरा
णे गोकर्ण महात्म्य नामाध्या
यः अच्छेद्य वृक्षा यथा ।
अश्वत्था वटवृक्षस्य नच्छेत्तव्यः
कदाचन न छेत्तव्या बिल्ववृक्ष
उडुम्बरस्य कदाचन कर्मणश्चै
व ये वृक्षा नच्छेत्तव्याः कदाच
न इतिच वाराहपुराणे आदि
णादीसत्सृवं नामाध्यायः ॥
वृक्षोमाता यथा पुरेषु येषु
रुद्रप्येत पादपाश्चैव रोदिताः
रुदंतो वा हसन्तो वा सर्वतो
वा वहूत्तमान् अरोगा वाविना

वाते प्रशाखा मुंचंत्यथद्रुमाः।
फले पुष्पं तथा काले दर्शे
यति द्विजायुनाः पूर्वावस्थाद
शोयेति फलं पुष्पं तथाशके
त् तीरंस्वेदं मदं रक्तं मधु
तोयंस्त्रवति च अप्रपत्यरोगाः
महसा शुष्का रोहंतिवा पुनः
उत्तिष्ठन्तीह पतिताःपतंतिच
तथोन्नताः पर्ववसामितं ब्रह्म
विपाकफल मेवच रोहनेया
पि मम्प्यति हसने देशाविभ्रम
शाखाप्रपतने कुर्यात्संग्रामे
योधपातनं बालानांमरणाकृ
र्याहालानांफलं पुष्पिता ॥
स्वराष्ट्रभेदं कुरुते फलपुः
ष्प मनन्तरं रूपं सर्वत्र गो
तीरे स्वेदे दुर्भिक्षलक्षणं ॥
वाहनापचयं मद्ये रक्तस्रयाः
ममादिर्येत मधुस्त्रवेभवेद्व्या
धिर्जलस्त्रावे न वर्षति प्ररोग
शोषणं ज्ञेयं ब्रह्मन्दुर्भिक्षलक्ष
णं शुष्केषु संप्ररोह स्त्रवी
र्यं मंत्रंच हीयते ॥ उत्थाने
पतितानांच भय भेदकरं भ
वेत् स्थानात्स्थानंत गमने दे
शभंग स्तथा दिशि ॥ ज्वल
त्स्वपि च वृक्षेषु रोदत्सुच ध

नत्रयं एतत्सृजित वृक्षेषुसर्वेश
हो विपद्यते ॥ पुष्पफले
वा विकृते राज्ञो मरणंतथादि
शेत अन्येषु देव मुक्तेषु दे
शोम्पातेषु मेदितः ॥
आच्छादयित्वाते वृक्षः गंधमा
ल्यैर्विभूषयेत वृक्षोपरि तथाच्छ
त्रं कुर्यात पापप्रशान्तये ॥
शिवमभ्यर्चयेद्देवं पशुं चास्मै
निवेदयेत मूलेभ्य इतिवहोमा
न्कृत्वा रुद्रं जपेत्तथा ॥
मध्वाज्य युक्तेन तु पायसेन सं
पूज्य विप्रा न्बहवश्च दद्यात।
गीतेन नृत्येन तथार्चनेन हे
वे हरं पापविनाशहेतोः ॥
इतिमात्स्ये ऽद्भुतशांति वृक्षोत्पा
तप्रशमनं नाम २८६ ॥
अध्यायः ॥ अथवृक्षप्रतिष्ठा
भीष्म उवाच पादपानां विधिं
ब्रह्मन् यथावद्विस्तराद्वद ।
विधिना येन कर्तव्यं पादपो
द्यापनं बुधः ये च लोकाःस्मृ
ता स्तेषां तानि चैव वदस्व मे
पुलस्त्य उवाच पादपानांविधिं
वक्ष्ये तथैवोद्यान भूमिषु त
डाग विधिवत्सर्वं समाप्तिं ज
शुद्धीना मियं शुद्धि विशिष्य
ते ३ ४ तन्नामकीर्तनंचैवगु
णानांचैव कीर्तनं भक्त्याश्री
कृष्णदेवस्य वचसः शुद्धिरिष्यते
५ तत्कथा श्रवणं चैवतस्यो
त्सव निरीक्षणं। श्रोत्रयो
र्नेत्रयो श्चैव शुद्धि सम्यगिहो
च्यते ६।७।८।९ पादोदकंचनि
र्माल्यंमालानामपि धारणं।
उच्यते शिरसः शुद्धिः प्रणत
स्यहरेःपुनः १० आघ्राणंगंध
पुष्पादे निर्माल्यस्य तपोधने
विशुद्धिःस्यादनन्तस्य घ्राणा
स्यापि विधीयते ११ १२ ॥ तत्र
पुष्पादिकं यच्चकृष्णपादयुगा

तदेव पावनं लोके तद्धि सर्वं
विशोधयेत् पूजाच पंचधाप्रो
क्ता तासां भेदान् शृणुष्व मे
अभिगमनमुपादानं योगःस्वा
ध्याय एवच इज्याःपंच प्रकारार्चाः
क्रमेण कथयामि तेतत्राभिग
मनं नाम देवता स्थानमार्जनं
उपलेपन निर्माल्यहरीकरणामे
वच उपादानंनाम गंध पुष्पा
दिचयनं यथा २
इज्या नामहि देवादेः पूजनंच
यथार्थतः ३ स्वाध्यायो मंत्र
राजस्य अर्थं संध्यानतो जपः
सूक्त स्तोत्रादि पाठश्च हरेःस
कीर्तनं तथा तन्नाम शास्त्रा
भ्यासश्च स्वाध्यायःपरिकीर्ति
तः ४ योगो नाम सुदेवस्यवात्म
ने यैव भावना ५ इति पंच
प्रकारार्चाःकथिता स्तवसुव्रते
इति पाद्मे पातालखंडे १० अ
ध्यायः अथ वैस्नवानांखाद्या
खाद्यं सायं प्रात द्विजातीनां
फलस्य भूषणं तथा विस्नु
भक्त्यावशिष्टेन दिन पापात्प्र
मुच्यते ॥ यत्रं ब्रह्मारसो
विस्नुःखादत्तन्नाम चोच्चरन्।
एवंज्ञात्वातथा भुंक्ते सो

न्नदोषै र्नलिप्यते अलाबुं
वर्तुलाकारं मसूरंच सवल्क
लं तालं कुष्माण्ड वार्ताकं न
खादेद्वैस्नवो जनः वटास्वत्था
र्कपत्रेषु कुंभी तिंदुक पत्रयोः
कोविदार कदंबेच न खादेद्वै
स्नवो नरः श्रावणे वर्जयेच्छा
कं दधि भाद्रपदे त्यजेत् दु
ग्धंच आश्विने मासि कार्तिके
चामिषंत्यजेत् उदय मद्यंच जं
बीरं यद्दिस्मा दनिवेदितं वी
जपूरंच शाकंच प्रमत्तलव
णंतथा यदि दैवाच्च भुज्यते
तदातन्नामकंस्मरेत् कलायं
कंगधान्यानि शाकंच हिल
मोचिका षष्टिका कालशा
कंच मूलकं कुसुकं तथा।
लवणे सैन्धवंभोज्यं वचाचर
थि सर्पिषी पयोदुग्धंतसारवप
नुस्माश्च हरीतकी पिप्पलीजीर
कंचैव नागरंगकतिंतिडी कद
ली लवली धात्रीफलान्यगुडमै
क्षवं अतैलपक्वं भुंजीत हविष्ये
षु प्रचक्षते इतिपाद्मे पाताल
खंडे ११ अध्यायः अथ वैस्नव
लक्षणविशेषादिः माहात्म्यम
थभक्तानां यत्कार्यं यद्वलक्ष

णं करनीयं हरे विप्रसावधा
नमनाःशृणुः हरिरेव सदा
सेव्यो नान्यो यस्य महात्मनः
लोकस्य जगदाराध्या हरिभक्तः
सउच्यते अनन्य निर्माल्यभु
नो भक्ता स्तेऽनन्य मानसाः
गोविन्दोपासकाये न निन्दे
दान्तरं विना अनन्य धिषणा
ऽनन्यहृदयोऽनन्यसेवकः के
वले हरिसेवाया सभक्तःपरि
कीर्तितः सत्वे सत्वाश्रयसत्व
गुणं सेवेत केशवं योऽनन्य
तेन मनसा सात्वतःसमुदा
हृतः सर्वदेवापरित्यज्य नित्य
भगवदाश्रयः वतत्तदीयसेवा
यां सभागवत उच्यते विहाय
काम्य कर्मादीन भजेदेकाकि
नं हरिं सत्यंसत्वगुणोपेतोभक्त्या
तं सात्वतं विदुः मुकुन्दपाद
सेवायां तन्नाम श्रवणेपिच
कीर्तनेच रतो भक्तो नाम्नःस्मा
रणात्स्मरणे हरे वंदनार्चनयो
भक्ति रतिर्दास्य सख्ययोः
रति रात्मार्पणे यस्य हृत्कान
तमसात्वतः स्मर्तव्यकीर्तनी
यश्च श्रोतव्यःसत्यएवच यस्य
कोविस्न राराध्या वैस्नवःसतु

4951

दासतः यथोत्तमोपि संभूतः
समचित्तो जितेंद्रियः हरिपादा-
श्रयो लोके विप्राः साधुरनि
न्दकः निर्वैरः सदयः शांतो
दंभाहंकार वर्जितः निरपेक्षो
मुनिर्वीतरागः साधुरिहोच्यते
लोभ मोह मदक्रोध कामा-
दिरहितः सुखी कृष्णाङ्घ्रिशर
णः साधुः सहिष्णुः समदर्शनः
यद्विष्णुपासना नित्यं विष्णुः ये
स्सथुरो भुने पूज्यो यस्यैकवि-
ष्णुः स्याद्विष्टो लोके सवैष्णवः
देवः सर्वावताराणां मत्स्यादी
नामुपासकाः नन्मेवेशास्त्रन-
त्यास्त्रे वैष्णवा स्तेन संशयः ॥
यदिष्टो रघुनाथस्तु नृसिंहो
वामनो हरिः यत्नन्मेशो वा
हादिर्वासुदेवः सवैष्णवः वि
ष्णोरुपासको दास स्तन्मेत्रे
षु स्वदाश्रयः नमाऊ वैष्णव
लोके विष्णुसेवापरायणाः सा
ध्वी यथा पतिं नारीनान्यंजा
नातिते विनाजगदीशं तथा
नन्यो यदिविष्णुर्वैष्णवः सम
चित्तो मुनिः हृतो गोविन्दस्य
शरणाश्रयः सर्वभूतदयः कामो
विवेकी साधुरुत्तमः कृष्णापि
तप्राण शरीर

बुद्धिः शांतेंद्रिय स्त्री सुतसंस
दादिः आसक्तचितः श्रवणा
दिभक्तिप्रस्यैर साधुः सततं
देयः कृष्णाश्रयः कृष्णकथानु
रक्तः कृष्णेष्टमंत्र स्मरति प्रजनी
यः कृष्णनिष्ठा ध्यानमनाश्च
नन्योयो वै स साधु मुनिवर्यका
र्यः यस्येष्ट श्रीभागवतं शास्त्रं
श्रीभागवान्हरिः भगवत्पास
मंतस्या भक्त्या भागवतस्य
सः ये कृष्ण श्रवणाग्रही ये तद
च्छिष्टभोजिनः येकृष्णोपासका
लोका दासा स्ते परिकीर्तिता
इतिपाद्मे उत्तरखंडे ५५ अध्यायः
अपिच ब्रह्मोवाच ।
अहोध्यानैरपिध्यातं देवं स्तव
हि शक्यते सत्वं वैष्णव देहेषु
तिष्ठसीत्यद्भुत महत् तृणा-
मात्र मपि स्वामिं स्तिष्टेत्वयिन
किंभवेत् सतुं वैष्णव संगेन
भ्रमसीत्यद्भुत महत् केवैष्ण
वाः कदम्भीरे किंवा तेषांच ल
क्षणं कथं तेषाञ्च तेसर्वेत
न्मकथय केशव भगवानुवाच
वैष्णवानां लक्षणानि कल्पको
टि शतै रपि सम्यग्वक्तुं नशक्य
मिसंते पान्यूतात सत्तमससारा

4957

वैष्णवाधीनो देवा वैष्णव पा
लिताः अहंच वैष्णवाधीनस्त
स्मात् श्रेष्ठश्च वैष्णवाः तृण
मात्र मपि ब्रह्मन्विरहय वैष्णवे
जने तिष्ठामिनाह मन्यत्र वै
ष्णवो मम बांधवः कामक्रोध
विहीना ये हिंसा दंभ विवर्जि
ताः लोभ मोह विहीनाश्चते
ज्ञेया वैष्णवा जनाः अमत्स
रा दयायुक्ताः सर्वभूत हिते
षिणः सत्योक्ति भाषिणश्चैव
ज्ञेया स्ते वैष्णवा जनाः पितृ
भक्ता मातृ भक्ता ज्ञातिपोष
णा तत्पराः धर्मोपदेशिनो ये
च ज्ञेया स्ते वैष्णवा जनाः स
माने येच पूज्यंति त्वांच मांच
महेश्वरं कुर्वंति सदा मतिश्च
ज्ञेया स्ते वैष्णवा जनाः वेद
विद्यानुरक्ता ये द्विजभक्तिरताः
सदा नपुंसकाः परस्त्रीषु ज्ञेया-
स्ते वैष्णवा जनाः एकादशीव्र
तं येच भक्तिभावेन कुर्वते ॥
गायंति मम नामानि ज्ञेया स्ते
वैष्णवा जनाः देवायतनकर्ता
रं तुलसीमाल्यधारिणः रु
द्राक्षधारिणो येच ज्ञेया स्ते
वैष्णवा जनाः मत्पादसलिले

येषां सिक्तानि मस्तकानिवै
मम नैवेद्य मश्नंति ज्ञेया स्ते
वैष्णवा जनाः शंख चक्रांग
पद्मे रंकितानि ममायुधैः ब्रह्म
न्येषां शरीराणि ज्ञेया स्ते वै
ष्णवा जनाः कण्ठे श्चैव श्री
येषु तुलसीपत्रं मुखेस सततं
दृश्यते येषां ज्ञेया स्ते वैष्णवा
जनाः तृणानि तुलसीमूला
यच्चिन्वंतिनरोत्तमाः सिंचंति तु
लसीं येच विज्ञेया स्तेच वैष्णवाः
तुलसीमूलमृद्भिश्च तिलकानि
नयंति ये तुलसीकाष्ठ पंकैश्च
विज्ञेया वैष्णवाजनाः गंगा
स्नानपरायेच गंगानामपराय
णाः गंगामाहात्म्यवक्तारो वि
ज्ञेया स्तेच वैष्णवाः धात्रीफले
स्तेजो येषां गलेषु कमला
सन यज्ञतिच तन्मन्त्रैर्विज्ञेया
स्तेच वैष्णवाः शालग्रामशि
ला येषां गृहे वसति सर्व
दा शास्त्रं भागवतंचैव ज्ञेया
स्ते वैष्णवा जनाः संभाजेय
ति ये नित्यं ममस्थानानि स
र्वदा दीपं यच्छंति तत्रैव ज्ञेया
वैष्णवा जनाः प्रीत्यैमन्मन्दि
रं येच कुर्वंतेहत्नं पुनः तथा

यन्नेच प्रोभाव ज्ञेया स्तेवै-
ष्णवा जनाः अभयं येच यच्छ
न्ति भीतेभ्य स्त्रानदानंच विद्या
दानंच विप्रेभ्यो ज्ञेया स्तेवैष्ण
वाजना स्त्वष्टद्वपीरितिभ्यश्च
ये यच्छन्त्यन्न मन्त्रच ऊर्द्धये
रोगिभ्यश्च ये ज्ञेया स्ते वैष्ण
वाजना आरामकारिणो येच
पिप्पलारोपिणःपिच गो
सेवां येच कुर्वन्ति ज्ञेया स्तेवैष्ण
वा जनाः अत्यन्त भक्त्यायेच्चन्न
नूपिद्यन्ते प्रकुर्वते ॥
कुर्वन्ति दीनशुश्रूषां ज्ञेया स्ते
वैष्णवा जनाः तडाग ग्रामक
न्याः कन्यादान प्रदायये ॥
सेवन्ते स्वगुरौ येच ज्ञेयास्तेवै
ष्णवा जनाः सेवन्तेश्चेष्टा भगि
नीं श्लेष्टं भ्रातरमेवच पत्नि
न्तो न कुर्वन्ति ज्ञेया स्ते वैष्ण
वाः जनाः देवस्व ब्राह्मणादव्यप
हरंच वतस्वैव यमपत्नि विष
वयेच ज्ञेयास्तेवैष्णवा जनाः
पाषण्डसंगरहिताःशिवभक्ति
परायणाः चतुर्दशाब्दवत्यता
ज्ञेयास्ते वैष्णवाजनाः ।
बहुनात्र किमुक्तेन भाषिते
न पुनःपुनः मत्सर्वो येच ·
कुर्वन्ति ज्ञेया स्ते वैष्णवाजनाः
वैष्णवेषु गुणाःसर्वे दोषले
शो न विद्यते तस्मात्सततम्भवते
व वैष्णवो भक्त्यास्मृत । समा
राधाय मोनित्य क्रियायोगैः
प्रजायते सर्वमेव शुभद्रेनेश
विष्यतिनसंशयः भूयःपूर्वे
स्थित मिव सृज्यतां सकलं जग
दस्मात्कान्तर्ये ये देव त्वमेवज
गदीश्वरः ततस्तु पूर्ववद्ब्रह्मा
सृष्टवान्सकलं जगत् क्रिया
योगैर्हरिं पूज्य जगाम परमंप
दं ये पठन्ति ममाध्यायं भक्त्या
नारायणाग्रतः सर्वपापविनि
र्मुक्ता अन्ते यान्ति हरे पदं इति
पाद्मे क्रियायोगसारे अध्या
यः कालिंग उवाच जातिस्म
रेण कथितो रहस्यः परमो
मम यम किंकरयो ये७ भूत
संवादं तं ब्रवीमि ते स्वपुरु
षमभिवीक्ष्य पाशहस्तं वदति
यमःकिल तस्य कर्णमूले परि
हर मधुसूदनप्रपन्नान् प्रभुर
हमन्यनृणां न वैष्णवानां इति
श्रीविष्णुपुराणे तृतीयेंशेसप्तम
गीते ७ अध्यायः अपिच कर्म
रूपाणि कर्माणि यतःसाधुरीः

स्वयं मन्ये नभौतिको देहोवै
ष्णवस्य जगत्त्रये इतिकल्कि·
पुराणे ३· अध्यायः ॥
वैष्णवी स्त्री विष्णुशक्तिः यथा
एषा त्रिशक्ति रुद्दिष्टा नयसि
द्धान्त गामिनी । एषा श्वेताप
रा सृष्टिःसात्विकी ब्रह्मसंस्थिता
एषैव रक्ता राजषि वैष्णवीप
रिकीर्तिता एषैव कृष्णा तम
सि रौद्री देवी प्रकीर्तिता ॥
अष्टादश तथा कोष्ठा वैष्ण·
व्या भेद उच्यते या विष्णोरा·
जसी शक्तिः पालिनी चैववैष्ण
वी इति वाराहे त्रिशक्तिमा
हात्म्य नामाध्यायः ॥ अ
पिच शंख चक्र गदाधारी वि
श्वमाता तथाविधा विश्वरूपा
शुवादेवी वैष्णवी तेन गीयते॥
इति देवीपुराणे ८५ अध्यायः
अपरंच विष्णुभक्ता विष्णुरूपा
विष्णोः शक्ति स्वरूपिणी ।
सृष्टौच विष्णुना सृष्टा वैष्णवी
तेन कीर्तिता इति ब्रह्मवैवर्ते
प्रकृतिखंडे ५७ अध्यायः ॥
दुर्गा इति शब्दरत्नावली ॥ ग
ङ्गा यथा पद्मपुराणे विष्णोः
पादप्रसूतासि वैष्णवी विष्णु
जिता पादि न स्त्वेनसस्तस्मा
दाजन्म मरणान्तिकात् इत्या
दि शाक्तिकाचारतन्त्रे स्नाना
गंगावाहन मंत्रः अमत्त्र वि
ष्णुपाद प्रसूतासि वैष्णवीना
मधारिणी सर्वत्र रत्नमानि
त्वं गंगा त्रिपथ गामिनी
इति गंगाकवचं । अपराजिता
इतिशब्दचन्द्रिका शतावरी।
इति राजनिर्घण्टः तुलसी
इति शब्द माला ॥
वैसारिणः पुं मत्स्यः इत्यम
रः ॥
वैस्रवणं क्ली नाटेश्वरस्य
हीविशयाराणां इति केचित्
वैहार्यः त्रि परिहासेन लाल
नीयः श्यालसम्बन्ध्यादिः इ
त्युञ्जनमिश्रः यथा यथावा
लेषु नारीषु वैहार्येषु तथैव
च संगरेषु निपातेषु तथाप
द्यस्नेषु च अन्तं नोक्तपूर्वं
मे तेन सत्येनत्वं व्रज ।
इति महाभारते उद्योगपर्व
वैहासिकः पुं विहासंकरोति
यः भंड इति ख्यातः तस्य
पर्यायः वासन्तिकः २ केलि
किलः ३ विदूषकः ४अहासी ५

प्रीतिदः ६ इति हेम चंद्रः॥
बोटा स्त्री दासी यथा पो·
टारोटा च चेटी च दासीवज्ञ
टहारिका इति हेमचंद्रः॥
बोडः पुं गुवाकः इति शब्द
रत्नावली जराधरे भूरिप्र
योगेच फोड इतिपाठः॥
बोड्रः पुं गोनससर्पः बोडा
इति भाषा यथा गोनासो
मंडली बोड्रः इतिभरतधृत
विक्रमादित्यः मत्स्यविशेषः
इति मेदिनी॥
बोड्री स्त्री पणचतुर्थांशः।
बुडि इति भाषा इतिमेदि
नी बोढव्यः त्रि वहनीयः वा
ह्यः वहधातो स्तव्य प्रत्ययेन
निष्पन्नः इति मुग्धबोधव्याक
रणं बोढा पुं भारिकः मू
ढः पतिनेता इति शब्दरत्नाव
ली स्रुतः इति मेदिनी अन
ड्वान् ऋषभः इति राजनि·
र्घंटः॥
बोढुः पुं मुनिविशेषः यथा
सनकश्च सनंदश्च तृतीयश्च
सनातनः कपिलश्चासुरिश्चै
ववोढुः पंचशिखस्तथा स
र्वेते ततिः मायांतमदंतेनाखु

नास्मदा इत्याह्निकाचारतत्वे॥
बोंटः पुं वृतं बोंटा इतिभाषा
इति शब्दरत्नावली॥
किंतु लिपिकरप्रमादपाठोयं।
यथा मूलग्रन्थे तथा बौंट इति
ख्याते वृन्ते प्रसवबंधने॥
बोदः त्रि आर्द्रः इति त्रिकांड
शेषः॥
बोदालः पुं मत्स्यविशेषः॥
बोयालि इति भाषा। तत्पर्या
यः सहस्रदंष्ट्रा २ पाठीनः ३ वदा
लकः ४ इति शब्दरत्ना व
ली॥
बोरकः पुं लेखकः इतित्रिकां
डशेषः॥
बोरटः पुं कुंदपुष्पं इतित्रि
कांडशेषः॥
बोरपट्टी स्त्री मंडुरा मादुरइति
भाषा इति शब्दमाला बोरो
बोरो इति भाषा अस्य गुणाः
बोरवस्तु कुथैः प्रोक्तः स्त्रिदोषस्य
प्रकोपणः मधुरश्चाम्लपाकश्च
व्रीहिः पित्तकरो गुरुः इतिरा
जवल्लभः॥
बोरुखानः पुं पाटलवर्णाश्वः
इति हेमचंद्रः॥

बोलं क्ली स्वनामख्यात वणि
कद्रव्यं तत्पर्यायः रक्तापहं २
मुंडं ३ सरसं ४ पिंडकं ५
विषं ६ निर्लोहं ७ बर्बरं ८ पिं
डं ९ सौरभं रक्तगंधकं ११ वस
गंधं १२ महागंधं १३ विश्वं
१४ शुभगंधकं १५ विश्वगं·
धं १६ गंधरसं १७ प्राणारिः
१८ अस्यगुणाः बोलंच कटु
तिक्तोष्णं कषायं रक्तदोषजित्
कफपित्तामयान्हंतिप्रदरादिरं·
जापहं इति राजनिर्घंटः॥
बोलः पुं रसगंधः इत्यमरः॥
बोलकः पुं लेखकः। इति
शब्दरत्नावली॥
बोल्लाहः पुं अश्वविशेषः।
यथा बोल्लाहस्त्वयमेवस्यात्
पांडुकेशरवालधिः इति हे
मचंद्रः
बोहित्थं क्ली यानपात्रं याहाज
इति भाषा। इति हेम चं
द्रः॥
रोहट क्ली बुद्धकृतनिरीश्वरशा
स्त्र तत्सर्वैः पाषंडकारैः खंडितं
प्रत्यवाद्यहं॥
जिनधर्मः। यथा ततोबृहस्प
तिः

शुक्रं मकरोद्वलदर्पितं गद
शांति विधानेन पौष्टिकेन
चकर्मणा गत्वाथ मोहया·
मासरजि पुत्रान् बृहस्पतिः
जिनधर्मं समास्थाय वेदबा
ह्यं सवेदवित् वेदत्रयी परिभ्र
ष्टांश्चकार धिषणाधिपः।
वेदवाह्यान् परिज्ञाय हेतुवादसम
न्वितान् जघान शक्रो वज्रेण
सर्वधर्मबहिष्कृतान् इतिमात्स्य
सोमवंशानुकीर्तने नाम २४
अध्यायः उद्दसम्वाधिनि त्रि॥
बौषट् अ देवहविर्दानमंत्रः।
तत्पर्यायः स्वाहा २ श्रौषट्
३ वषट् ४ स्वधा ५ इत्यमरः
एते पंच शब्दा देवहविर्दानेव
क्रियतेऽतो वर्तंते देवाय·
हविषो दानं देवहविर्दानं।
तत्र देवा इंद्रादयः अत्र पि
तरो देवता इति स्मृतेस्तेपि
देवाः हविर्दान इत्यनेन एते
मंत्रा इति सूचितं अग्न्येव
स्वाहायेव हविर्भुज मितिरघुः
स्वाहाव्ययं मंत्रभेदे स्त्रियांस्वा
हाग्निपोषितीति कोषांतरे।
स्वाहा इत्यादि श्रौषट् ताल·
व्यादि मूर्द्धन्य मध्ये वौषट्वषट्

हयं मूर्द्धन्य मध्यं स्वधादेन्ता
दि इंद्राय स्वाहा इत्यादि प्र
योगः इति भरतः ॥
व्यंशकः पुं पर्वतः इति त्रि
कांडशेषः ॥
व्यंसकः पुं धूर्तः इति हेमचं
द्रः ॥
व्यंसितः त्रि प्रतारितः इति
त्रिकांडशेषः ॥
व्यक्तः त्रि प्राज्ञः इत्यमरः॥
स्फुटः इति मेदिनी विष्णुः
यथा व्यक्तो वायु र्व्योमजः
इति तस्य सहस्रनामस्तोत्रे॥
व्यक्तदृष्टार्थः पुं साक्षी तत्प
र्यायः प्रत्यक्षी २। इति त्रि
कांडशेषः ॥
व्यक्तरूपः पुं विष्णुः यथा
अव्यक्तरूपो व्यक्तरूपश्च सहस्र
जिदनंतजित् इति तस्य सह
स्रनामस्तोत्रं स्पष्टरूपयुक्ते त्रि
व्यक्तिः स्त्री पृथगात्मिका इ
त्यमरः जनः इति हेमचंद्रः॥
स्पष्टताच ॥
व्यग्रः त्रि व्यासक्तः आकुलः
इत्यमरः विष्णुः यथा प्रग्रहो
निग्रहो व्यग्रो नैकशृंगो गदा
ग्रजः इति तस्य सहस्रनाम

स्तोत्रे ॥
व्यंगः पुं भेकः हीनांगः ।
इति मेदिनी मुखरोगविशेषः
तस्य लक्षणं यथा क्रोधायास
प्रकुपितो वायुः पित्तेन संयुतः
मुखमागम्य सहसा मंडलं विसृ
जत्यतः नीरुजं तनुकं श्यावं मु
खे व्यंगं तमादिशेत् इति माध
वकरः ॥
तस्य चिकित्सा वटांकुरा मसू
राश्च प्रलेपाद्व्यंग नाशनाः ।
व्यंगे मंजिष्ठया लेपः प्रशस्तोमा
धुधुकया अथवा लेपनं शाल
शशस्य रुधिरेणाच । जाती
फलस्य लेपस्तु हरेद्व्यंगंच नी
लिकां वटस्य पांडुपत्राणि मा
लती रक्तचन्दनं कुष्ठकालीयकं
लोध्रं एभि र्लेपं प्रयोजयेत् ॥
इति भावप्रकाशः ॥
व्यंग्यः त्रि व्यंजनया बोध्योऽर्थः।
यथा वाच्योऽर्थोऽभिधया बोध्यो
लक्ष्यो लक्षणया मतः । व्यं
ग्यो व्यंजनया ताः स्युः तिस्रः
शब्दस्य शक्तयः इति साहित्य
दर्पणे २ परिच्छेदः ॥
व्यच ङि व्याजे सम्वधे ॥ इति
कविकल्पद्रुमः व्याज छलः

र्ण विचंति सतं खलः छलय
ति इत्यर्थः अविचीत् विव्यच ।
इति दुर्गादासः ॥
व्यजः पुं व्यजनं विश्वे अज
धातो रल्प्रत्ययेन निष्पन्नः ॥
व्यजनं क्ली तालवृंतकं पाखा
इति भाषा इत्यमरः । अस्य
सामान्यगुणाः मूर्छा दाहतृष्णा
घर्मश्रम नाशित्वं तालव्यजन
गुणाः त्रिदोषशमनत्वं लघुत्वं
च वंशव्यजन गुणाः रूक्षत्वं ।
उष्णत्वं वायु पित्त कारित्वंच ॥
वेत्र वस्त्र मयूरपुच्छ व्यजन गुणाः
त्रिदोषनाशित्वं वालव्यजनगु
णाः तेजस्करत्वं मक्षिकादिनि
वारकत्वंच इति राजवल्लभः ॥
व्यंजकः पुं अभिनयः । इत्य
मरः हृदंगत क्रोधादि भावा
भिव्यंजके व्यनक्तीति व्यंजकः
अंज व्यक्ति गति म्रक्षणे णकः
आंगिक सात्विक वाचिकाहार्य
भेदाद्व्यंजक श्चतुर्विधः ।
अभिमुखं नीयते अर्थोऽनेन
इति अभिनयः नीञ् प्रापणे अ
च् हस्तादिभिः प्रासवातादिस्त
वन मभिनयः छंदो घाकारः
स्तबके करादि संस्थान मभिनयः त्रिषु संस्त

इत्यन्येपि इति भरतः व्यं
जनया प्रतिपादकः इतिसा
हित्यदर्पणः ॥
व्यंजनं क्ली सूपशाकादि ।
इति राजनिर्घंटः ॥ तत्पर्यायः
तेमनं २ निष्ठानं ३ इत्यमरः
अस्य गुणाः व्यंजनं शाकम
त्स्याद्यं हृद्यं वृष्यंच पुष्टिदं
इच्छया येन येनेह व्यंजनं
मत्स्य तयोश्चतद्गुणा दोषैर्वि
भावयेत् इति राजवल्लभः
व्यंजनविशेषगुणाः तत्तत्
शब्दे द्रष्टव्याः ॥
चिह्नं श्मश्रु अवयवः ॥
दिने इति मेदिनी स्त्री पुं
भेदा रसुहृदेशः सतउपस्थः
अर्द्धमात्रक सत ककारादित
कारान्तवर्णाः इति धरणिः ॥
व्यंजना स्त्री शब्दस्य वृत्तिविशे
षः तस्य लक्षणं यथा विर
तास्वभिधाद्यासु ययार्थो बो
ध्यतेपरः सा वृत्ति र्व्यंजनानाम
शब्दस्यार्थादिकस्य च शब्द
बुद्धिकर्मणां विरम्य व्यापारा
भाव इति नयेनाभिधा लक्ष
णा तात्पर्याख्यासु भिरषवृ

मर्थं वोधयित्वा उपक्षीणा
स यथान्योऽर्थो वोध्यते सा श
ब्दस्यार्थस्य प्रकृति प्रत्ययादे
श्च ह्यनिर्व्यञ्जन व्यञ्जनगमन
प्रत्यायणादि व्यपदेश विषया
व्यंजना नाम तत्र अभिधालक्ष
णा मूला शब्दस्य व्यंजना द्वि·
धा अभिधामूला माह अने·
कार्थस्य शब्दस्य संयोगाद्यैर्नि
यंत्रिते एकत्रार्थेऽन्यधीहेतु
व्यंजना साभिधाश्रया आदि
शब्दाद्विप्रयोगादयः उक्तंहि
संयोगो विप्रयोगो विप्रयोग
श्च साहचर्यं विरोधिता अ·
र्थः प्रकरणं लिंगं शब्दस्या
न्यस्य सन्निधिः सामर्थ्य माचि
तीदेशः कालो व्यक्तिः स्वराद
यः शब्दार्थस्यानवच्छेदे विशे
षस्मृति हेतवः इति सशंख
क्रो हरि रित्यत्र शंख चक्रसं
योगेन हरिशब्दो विष्णुमेवा
भिधत्ते अशंखचक्रो हरिरि
त्यत्र वियोगेन तमेव भीमार्जु
नाविति अर्जुनः पार्थः कर्णार्जु
नाविति कर्णः सूतपुत्रः स्थाणुं
वंदे भवच्छिदे इति स्थाणुः
शिवः सर्वं जानाति देव इति देवो
भवान् कुपितो मकरध्वजः इति

मकरध्वजः कामः देवः पुरारिरि
ति पुरारिः शिवः मधुना मत्तः पिक
क इति मधुर्वसंतः पातुवो दयि
ता मुख मिति मुखं सांमुख्यं भा
ति गगने चंद्रः इति चंद्रः श
शी निशि चित्र भानु रिति चित्र
भानुर्वह्निः भाति रथांग मिति न
पुंसक व्यक्त्या रथांगं चक्रं स्वरस्तु
वेद एव विशेष प्रतीति कृन्नका
व्य इति तस्य विषये नोदाहृत
इदंच केचिदसहमाना आहुः स्व·
रोपि काक्वादि रूपः काव्ये विशेष
प्रतीति कृदेव । उदात्तादि रू
पोपि मुनेः पाठोक्त दिशा शृंगारा
दि रसविशेष प्रतीति कृदेवेति
एतद्विषये उदाहरण मुचितमे
व इति तन्नत्यादि स्वराः काका
दय उदात्तादयोवा व्यंग्यरूप मेव
विशेषप्रत्यायंति न खलु प्रकृतो
क्तमनेकार्थ शब्दस्यैकार्थ नियंत्र
णात्मकं विशेष किंच यदि यत्र क्व
चिदनेकार्थ शब्दानां प्रकरणा
दि नियमाभावादनियंत्रितयोरप्य
र्थयो रनुरूप स्वर वशेनैकत्र नि
यमनं वाच्यं तदा तथाविध
स्थलेश्लेषानंगीकार प्रसंगः न
[illegible] च तथा

अतएवाहुः श्ले निरूपणप्रस्ता
वे काव्य मार्गे स्वरो न गण्यते इ
ति च नय इमलक्षपनीयानां मा
न्यानां व्याख्यानेषु कटाक्षनिक्षे
पेण आदि शब्दादेतावन्मात्र
स्तनी स्यादौ हस्तादि चेष्टादिभिः
स्तनादीनां कमल कोरकाद्याका
रत्वं एव मेकस्मिन्नर्थेऽभिधया
नियंत्रिते या शब्दस्यान्यार्थबुद्धि
हेतुः शक्तिः सा अभिधामूला व्यं
जना यथा मम तात पदानां
महापात्र चतुर्दशभाषा विला
सिनी भुजंग महाकवीश्वर श्री
चंद्रशेखर सांधि विग्रहिकाणा
दुर्गालंघित विग्रहो मनसिजं स
मीलयन् स्तेजसा प्रोद्यद्राजक
लो गृहीत गरिमा विष्वग्वृतो
भोगिभिः नक्षत्रेश कृतेक्षणो
गिरिगुरौ गाढां रुचिं धारयन्
गामाक्रम्य विभूति भूषित तनू
राजत्युमावल्लभः अत्र प्रकरणे
नाभिधया उमावल्लभ शब्दस्य उ
मानाम्नी महादेवी तद्वल्लभ भा
नुदेव नृपति रूपेऽर्थे नियंत्रिते
व्यंजनयैव गौरीवल्लभ रूपोऽ
र्थो बोध्यते एव मन्यत्र लक्षणा
मूला माह लक्षणोपास्यते यस्य

कृते तत्तु प्रयोजनं यया प्र
त्याय्यते सा स्याद्व्यंजना लक्ष·
णाश्रया गंगायां घोष इत्या
दौ जलमयाद्यर्थ बोधनादभि
धायां विरतायां तटाद्यर्थ बो
धनाच्च लक्षणायां विरतायां
यया शीतत्वपावनत्वाद्यतिशया
यादि र्वोध्यते सा लक्षणामूला
व्यंजना एवं शाब्दी व्यंजनामुक्त्वा
आर्थी व्यंजना माह वक्तृबोध्य
वाक्यानां मन्य सन्निधि वाच्ययोः
प्रस्ताव काल देशानां काको
श्चेष्टादिकस्य च वैशिष्ट्यादन्य
मर्थंया बोधयेत्सार्थ संभवा
व्यंजना इति सम्बध्यते तत्र
वक्तृवाक्य प्रस्ताव देश काल
वैशिष्ट्ये यथा मम कालो म
धुः कुपित एषच पुष्पधन्वा धी
रा वहंति रति खेदहराः समी
राः केली वनीय मपि वंजुल
कुंज मंजु र्दूरे पतिः कथय किं
करणीय मद्य अत्र एतं देशं
प्रतिशीघ्रं प्रच्छन्न कामुकस्त्व
या प्रेष्यतामिति सखीं प्रतिक
याचिद्व्योत्यते वोद्धव्य वैशिष्ट्ये
यथा निःशेषच्युत चंदनं स्त
नतटं निर्मृष्टरागोऽधरो नेत्रे·

दूर मनंगेन पुलकिता तन्वी·
नैवयं तनुः मिथ्यावादिनिदूति
बांधव जनस्याज्ञात पीडागमे·
वापीं स्नातु मितो गतासि न
पुन स्तस्याधमस्यांतिकं अत्र
तदंतिक मेव गतासीति विप
रीतलक्षणया लक्ष्यं तमवगत
मिति व्यंग्य प्रतिपाद्य दूती वै
शिष्ट्याद्बोध्यते अन्यसन्निधि
वैशिष्ट्ये यथा उअ निच्चल णि
प्फंदा भिसिनी पत्तम्मि रेहइ
वलाआ णिम्मल मरगअभा·
अण परिट्ठिआ संख सुत्ति व्व
अत्र वलाकाया निष्पंदत्वेन वि
श्वस्तत्वं तेनास्य देशस्य विजन
त्वमतः संकेतस्थान मेतदिति
कयापि सन्निहित प्रच्छन्नकामु
कं प्रत्युच्यते अत्रैव स्थान निर्ज
नत्वरूप व्यंग्यार्थ वैशिष्ट्ये प्रयो
जनं भिन्नकंठ ध्वनि धीरैः का
कुरित्यभिधीयते इत्युक्तप्रका
रायाः काको र्भेदा आकारादि
भ्यो ज्ञातव्याः ॥ एतद्वै·
शिष्ट्ये यथा गुरुपरतंत्रतया व
त दूरतरं देश मुद्यतो गंतुं ।
अलिकुल कोकिल ललिते नै
ष्यति सखि सुरभि समयेऽसौ

अत्र नैष्यतीत्यपि तर्हि एष्य
त्येव इति काक्का व्यज्यते ॥
चेष्टा वैशिष्ट्ये यथा संकेतकाल
मनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं
निमीलितं अत्र संध्या संकेत
काल इति पद्मनिमीलनादि चे
ष्टया कयाचित् द्योत्यते एवं वक्त्रा
दीनां व्यस्त समस्तानां वैशिष्ट्ये
बोद्धव्यं ॥
त्रैविध्या दियमर्थानां प्रत्येकं त्रि
विधा मता अर्थानां वाच्यलक्ष्य
व्यंग्यत्वेन त्रिरूपतया सर्वा अ
प्यनंतरोक्ता व्यंजना स्त्रिविधाः
तत्र वाच्यार्थस्य व्यंजना यथा का
लो मधु रित्यादि लक्ष्यार्थस्य य
था निःशेषच्युतचंदन मित्यादि
व्यंग्यार्थस्य यथा उअ णिच्चल
इत्यादि प्रकृति प्रत्ययादि व्यंज
कत्व प्रपंचयिष्यते शब्दबोध्यो व्य
नक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः
एकस्य व्यंजकत्वेऽर्थान्तराश्रयः
पेक्ष्यते अर्थोपि शब्दं तदेक·
स्य व्यंजकत्वेऽन्यस्य सहकारि
त्व मवश्य मंगीकरणीयं अभि
धेयस्य व्यंजकत्वे शब्दस्य सहका
रिता यतः शब्दो व्यंजकत्वेऽर्थान्तरं

4963

यादि त्रयोरप्यपि वैशिष्ट्यात्त्रि
विधो मतः शब्दोऽपि वाचक·
स्तल्लक्षको व्यंजक स्तथा अ
भिधोपाधिको वाचकः व्यंजनो
पाधिको व्यंजकः किंच तात्प
र्याख्यां वृत्तिमाहुः पदार्थान्वय
बोधने तात्पर्यार्थं तदर्थं च वाक्यं
तद्बोधकं परे ।
अभिधाया एकैक पदार्थ बो
धन विरमात् वाक्यार्थरूपस्य प
दार्थान्वयस्य बोधिका तात्पर्या ना
म वृत्ति स्तदर्थश्च तात्पर्यार्थ·
स्तद्बोधकं च वाक्य मित्यभिहि
तान्वयवादिनां मतं । इति सा
हित्यदर्पणे वाक्यस्वरूप निरूप
णो नाम द्वितीयः परिच्छेदः ॥
व्यडम्बकः पुं एरंडः इत्यमरः ॥
व्यतिकरः पुं व्यसनं ॥ व्यति
संगः इति मेदिनी ॥
व्यतिक्रमः पुं क्रमविपर्ययः
यथा सर्वत्र शास्त्रगुरौ दाता गृ
हीतापि उदङ्मुखः एष एव विधि
र्दाने विवाहे च व्यतिक्रमः ॥
इत्युद्वाह तत्वं ॥
व्यतिरिक्तः त्रि व्यतिरेकविशिष्टः
भिन्नः वि अति पूर्व रिचधा·

तोः क्त प्रत्ययेन निष्पन्नः ॥
व्यतिरेकः पुं विना अभावः
यथा यद्व्यतिरेक ज्ञाने य·
दुत्पत्ति प्रतिबंधकं तत्तन्निष्ठ
य साध्यं इति परामर्शग्रहः
अलंकारविशेषः यथा व्य
तिरेको विशेषश्चेदुपमानोप
मेययोः शैला इवोन्नताः
संत किंतु प्रकृति कोमलाः
इति चंद्रालोकः ॥
व्यतिषंगः पुं परस्परमेलनं ।
वि अति सं पूर्व सञ्ज धातो र्घ
प्रत्ययेन निष्पन्नः ॥
व्यतिहारः पुं विनिमयः यथा
परिदाने विनिमयो नैमेयः
परिवर्तने व्यतिहारः परावर्तो
वैमेयो विमयोऽपि च ॥
इति हेमचंद्रः ॥ व्यतीतः
त्रि अतीतः । गतः ।
यथा अर्द्धरात्रे व्यतीतेऽतु सं
क्रांति र्यदि भवेत । पूर्वे
द्युतादिके ऊर्ध्वं परेद्युः स्नानदा
नयोः ॥ इति तिथितत्वे भी
मपराक्रमीये ॥
व्यतीपातः पुं महोत्पातः ॥
अपयाने इति मेदिनी ॥ वि
ष्कंभादि सप्तविंशति योगांत

गेत समदर्शोयोगः तत्रसर्व
कर्म वर्जनं यथा निरंशेदिव
सः विष्टिं व्यतीपातंच वैधृतिं
केंद्र स्थापि शुभे हीनेपापाद
मपि वर्जयेत् परिघस्यत्यजे
दर्द्धं शुभकर्म ततः परं ।
गंडव्याघातयोः षट्च नवद्र
षेणवज्रयोः वैधृति व्यतीपा
तौच समस्तं परिवर्जयेत् प्र
सप्रति प्रसव मात्रभीमपरा
क्रमे नविष्कंभो नवा गंडेन
व्यतीपात वैधृती चंद्र ताराब
ले प्राप्ते दोषा गच्छंत्यसंभ
वाः नवमंगारको विष्टिः
शनैश्चर दिने तथा व्यतीपा
तो न दुष्यन्त्र यस्मार्को दति
णो स्थितः यदि विष्टि व्यती
पातो दिने वाप्यशुभं भवेत्
हन्यतेऽमृतयोगेन भास्करेण
तमो यथा इति ज्योतिस्तत्वे
तत्र जात फलं कठोरवाद
कः पिशुन स्वभावोगदातं
दो मातृहितो मनुष्यः परस्य
कार्ये कृत पक्षपातो यस्यप्र
सूतौ व्यतिपात योगः इति
कोष्ठीप्रदीपः पारिभाषा
षिकयोगविशेषः यथा ब्रह्म
त्मजः श्रवणाश्वि धनिष्ठार्द्रा
नागदेवत मस्तके यद्यमा रवि
वारेण व्यतीपातः स उच्यते ॥
तत्र गंगास्नान फलं यथा ब्र
ह्माण्डे संक्रांतिषु व्यतीव्यतीपा
ते ग्रहणे चंद्र सूर्ययो पुष्येस्ना
नात् जाह्नव्यां कुलकोटीः समु
द्धरेत् इति प्रायश्चित्ततत्वं ॥
व्यतीहारः पुं परीवर्त्तः इति
जटाधरः परस्पर मेकजाती
य क्रिया करणं । यथा केशा
केशि दंडादंडि व्यात्यादि इति
व्याकरणं ॥
व्यत्ययः पुं व्यतिक्रमः । तत्प
र्यायः व्यत्यासः २ विपर्यासः ३
विपर्यायः ४ इत्यमरः ॥
व्यत्यासः पुं विपर्ययः इत्य
मरः ॥
व्यथ यम रु॰ दुःखे चाले ॥
भये इति कविकल्पद्रुमः दुः
खं दुःखानुभवः चालः कम्प
नं य व्यथा मव्यथयति दुःख
यते लोकः दुःखं मन्न भवति
कम्पते बिभेति वेत्यर्थः के
चित् दुःख भय चलनयोरिति
पठित्वा भये चलनं भयचल
नमित्याहुः दुःखे भय चलने इति

पठित्वा दुःख भययोः स्खलनञ्च
त्याहुर् इति गोविन्दभट्टः ।
इति दुर्गादासः ॥
व्यथकः त्रि व्यथाकारी । यथा
अभ्युत्थानेव्यथकस्तस्यात्ममेश्व
गल्लवरः इति हेम चंद्रः ॥
व्यथा स्त्री दुःखं इत्यमरः ॥
व्यथितः त्रि पीडितः दुःखितः
यथा ततः प्रव्यथितो बाणेन
दुहितः कृत हृषणः त्वरितः
कन्यकागारे प्राभाऽशालीत् य
दूद्वहे इति श्रीभागवते बाणयु
द्धे ६२ अध्यायः ॥
व्यध ञो ष ताडे इति कवि
कल्पद्रुमः यविध्यति शाङ्गम्
दः ओ अव्यासीत् कश्चिद्धि।
भृंगस्यानिकारीभूत यकारस्यव्य
धे वकारो वर्गाः अन्यत्रत्वद॰
त इति मन्वानाः सनिविवत्
सभीत्याह इति दुर्गादासः ॥
व्यधः पुं वेधः इत्यमरः ॥
व्यध्वः पुं पन्तुर्गुणः । यथा ।
व्यध्वस्त्र प्रतिकायः स्याज्जीवा
ज्या भारव गुणः इति त्रिका
ण्डशेषः ॥
व्यध्वः पुं कुपथः तत्पर्यायः ।
दुरध्वः २ विपथः ३ कदध्वा ४ का
पथः ५ इत्यमरः ॥
व्यपक त्रेप इति कविकल्प
द्रुमः श्रुतस्यापात्पूर्वकः कव्याप
यति इति दुर्गादासः ॥
व्यपदेशः पुं कपटः । इति
हेमचंद्रः नाम इति त्रिकांड
शेषः यथा बाजेनात्माभिला नाकविशेषः
षोक्तिर्व्यपदेश इतीर्यते इ
त्युज्ज्वलनीलमणिः
व्यपाकृतिः स्त्री अपह्नवः
अस्वीकारः वि अप आङ् पूर्व
कृधातोः क्ति प्रत्ययेन निष्प
न्नो व्यभिचारः पुं कदाचारः भ
ष्टाचारः यथा व्यभिचारात्तु भ
र्तुः स्त्री लोके प्राप्नोति निन्द्य
तां सृगालयोनिं प्राप्नोति पाप
रोगाश्च पीड्यते ॥
इति मानवे ५ अध्यायः ॥
दोषविशेषः तस्य लक्षणं ।
साध्यतावच्छेदकावच्छिन्नप्रति
योगिताकाभाववद्वृत्तित्वं हि
व्यभिचारः इति व्यधिकरणाय
मोवच्छिन्नाभाव चिंतामणिः
तद्विविधः साधारणः १ असा
धारणः २ अनुपसंहारी ३ तत्र
विपक्षवृत्तित्वं साधारणत्वं सर्व

सपत्नव्याहृतत्व मसाधारणा-
त्वं व्याप्तिग्रहानुकूलैकधर्मोप-
संहाराभावो यत्र सैवेत्यभियुक्ता
अनुपसंहार्यः इति सव्यभिचा-
र चिन्तामणिः ॥

व्यभिचारि क्ली चतस्त्रिंशत्
कारशृंगारभावविशेषः तद्य-
था निर्वेदः १ ग्लानिः २ शंका
३ असूया ४ मदः ५ श्रमः ६
आलस्य ७ दैन्य ८ चिंता ९ मो-
हः १० स्मृतिः ११ धृतिः १२ व्री-
डा १३ चपलता १४ हर्षः १५
आवेगः १६ जडता १७ गर्वः १८
विषादः १९ औत्सुक्यं २० नि-
द्रा २१ अपस्मारः २२ सुप्तं २३
विबोधः २४ अमर्षः २५ अवहि-
त्थः २६ उग्रता २७ मतिः २८
उपलंभः २९ व्याधिः ३० उन्मा-
दः ३१ मरणं ३२ त्रासः ३३
वितर्कः ३४ इति हेमचंद्रः ॥

व्यभिचारिणी स्त्री परपुरुष-
गामिनी यथा हृताधिकारां
मलिनां पिण्डमात्रोपजीविनीं
परिभूतां अधःशय्यां वासयेद्व्य-
भिचारिणीं सोमः शौचं ददौ
तासां गंधर्वाश्च शुभां गिरं ।
पावकः सर्वभक्षित्वं मेध्या
वै योषितो ध्रुवं ॥ इति ते
स्त्रीसामान्यविषयं व्यभिचारा
दृतौ शुद्धि गर्भे त्यागो विधी-
यते गर्भभर्तृवधे तासां तथा
महति पातके इति गारुडे
१५ अध्यायः तस्याः परित्या-
गादि यथा हारीतः गर्भिणी
मधोवर्णगामिषु सवर्णगामिनी
पाप व्यसनासक्तां धनधान्य
क्षयकरीं वर्जयेत् यमः स्वव्य-
स्त्रया हिया नारी तस्या स्त्यागो
विधीयते चैव स्त्रीवधः कार्यो
नचैवांगवियोजनं बृहस्पतिः
हीनवर्णोपभुक्ताया त्याज्या व-
ध्यापि वा भवेत् विशेषयति
मितात्तरायां स्मृतिः ब्राह्मण-
क्षत्रिय विशां भार्याः शूद्रेण सं-
गताः अप्रजाता विशुद्ध्यन्ति प्रा-
यश्चित्तेन नेतराः एतत्त्वलाका
रविषये इत्युद्वाहतत्त्वं ॥
तस्याः श्राद्धकर्माणि निष्फला-
नि धनानधिकारित्वंच यथा
हरिवंशीय श्राद्धकल्पोपाख्या-
ने दानोपवास श्राद्धानि सज्ज-
तान्यपकुर्वन्ति निष्फलानि
सतीनां हि श्राद्धकानि तथा
शुभे वृहस्पतेः अपत्या शयनेभर्तुः

पालयंती व्रतेस्थिता पत्येव
दयान्नित्यं दत्त्वा मपीलभे
तच भर्तुः शयनं पालयंती
नान्यगामिनी इति दायत-
त्वं ॥

व्यभिचारी त्रि व्यभिचारवि-
शिष्टः वि अभि पूर्व चरधातो
र्णिन्प्रत्ययेन निष्पन्नः ॥

व्यय त क गतौ आये इति
कविकल्पद्रुमः व्यययति ।
इति दुर्गादासः ॥

व्यय भ्व गतौ इति कविकल्प-
द्रुमः भ्व व्ययति व्ययते । इति
दुर्गादासः ॥

व्यय क त्रुटि इति कविक-
ल्पद्रुमः अंतस्थादिरुक्तः कव्या-
ययति त्रुटि प्रेरणे इति दु-
र्गादासः ॥

व्ययं क्ली लग्नाद्द्वादशस्थानं
यथा लग्ने धने भ्रातृ बंधुपुत्र
शत्रु कलत्रकाः मरणं धर्म-
याय व्यया द्वादश राशयः ॥
इति ज्योतिस्तत्त्वं ॥

व्ययः पुं अर्थस्यापगमः वित्त-
समुत्सर्गः खर्च इति पारस्य
भाषा इति शब्दरत्नावली ॥

व्ययितः त्रि कृतव्ययः व्ययः
प्रक्षालित प्रत्ययेन व्यययातोः
कप्रत्ययेन च निष्पन्नः ॥

व्यर्थीन त्रि अपयुक्तः यथाह
विणा परिमित मपिकव्यापि
नेजन माकुलीकुरुते सीणां
चलमिव पीनस्तन जघनायाः
कुलीनायाः इत्युद्भटः ॥

व्यर्थं त्रि निरर्थके तत्पर्यायः
मोघं २ विफलं ३ । इति
जटाधरः ॥

व्यलीकं क्ली पीडार्थ्यः उत्सव-
वः गतिविपर्ययः ॥ काम-
जापराधः इति तद्दीकायां भ-
रतः यथा कृते नैव किंजाना-
ति परेणापकृते कचित् ।
कृतंच संस्मरेदेतद्दत्तस्व न
नश्यति व्यलीकेषु निवृत्तोयः
पर्येति कृतनिश्चयः । नि-
त्यंच कृतिमान्किंचित्कोपेन
चक्षिपेत् ऋतुकालेभिगच्छे-
त अपत्यार्थं स्वकांस्त्रियं देहशा
न्तु नरा भंडे ममकर्मपरायणाः
इति वाराहेयोनिगर्भमोक्ष-
ण नामाध्यायः ॥
अप्रिये अकार्ये ॥ वैलक्ष्ये
इति मेदिनी ॥ अपराधः
इति हेमचंद्रः प्रतारणा ।

इतिहलायुधः तद्वति त्रि
व्यलीकः पुं नागरः इतिमे
दिनी तत्पर्यायः षिड्गः २
षड्गजः ३ कामकेलिः ४ विट्
षकः ५ पीठकेलिः ६ पीठम
र्द्दः ७ भंगिलः ८ छिद्रवः ९ वि
टः १० इति त्रिकाण्डशेषः ॥
व्यवकलनं क्ली वियोगः हीनः
अंकस्यान्तरकरणं बाकिका
द्या इति भाषा यथा अयेबा
लेलीलावति मतिमति ब्रू
हि सहितान्दिपंच द्वात्रिंशत्त्रि
नवतिशताष्टादश दश शतो
पेतान्नेतानयुत विपुले ग्रापि
वदमे यदि वात्से युक्तिव्यव
कलनमार्गेऽसि कुशला इति
लीलावती ॥
व्यवकलितः त्रि कृतव्यवक
लनः वियोगितः हीनितः व्य
वकलने क्ली यथा अथसंक
लितव्यवकलितयोः करणसू
त्रं वृत्तार्द्धं कार्य्यं क्रमादुत्क्रम
तोथवांक योगो यथास्थान
कं मन्तरंवा इति लीलावती ॥
व्यवच्छिन्नं त्रि भिन्नं यथा
भिन्नंतु व्यवच्छिन्नं विशेषितं
इति त्रिकाण्डशेषः ॥

व्यवच्छेदः पुं बाणमुक्तिः इति
हेमचंद्रः पृथक्करणंच ॥
व्यवधा स्त्री व्यवधाने इत्यमरः
व्यवधानं क्ली आच्छादने त
त्पर्यायः तिरोधानं २ अन्तर्द्धिः
३ अपवारणं ४ छदनं ५
व्यवधा ६ अन्तर्द्धा ७ पिधानं
८ स्थगनं ९ इतिहेमचंद्रः ॥
व्यवधिः १० अपिधानं ११ इति
शब्दरत्नावली ॥
व्यवधायकः त्रि व्यवधानकर्त्ता
यथा स्वर्गकामो यजेत सप्त
दशावरा ऋद्धिकामाः सत्रमुपा
सीरन्निति वेदे कामिनांकर्त्तृत्वा
वगते स्तत्त्वपपन्ना ऋत्विग्व्या
पारान्तर्भावो नव्यवधायकः ।
इति प्रायश्चित्तविवेकः ॥
व्यवधिः पुं व्यवधाने इतिशब्द
रत्नावली ॥
व्यवसायः पुं उपजीविका ।
पेशा इति पारस्यभाषा यथा
कोऽति नाम नीतिज्ञो व्यवसा
य मित स्ततः फलं पुनस्तदेव
माद्यहिये र्मनसि स्थितं ॥
इति हितोपदेशे २ परिच्छेदः
अपिच आलस्योपहता हिरण्याः हीं
एग बुद्धि स्तासां चत

4469

र्गुणा षड्गुणो व्यवसायश्च
काम श्चाष्ट गुणाः स्मृतः इति
चाणक्ये अनुष्ठाने इत्यिव्यव
सापि शास्त्रार्थ दर्शनात् नि
श्चयः यथा व्यवसायात्मिका
बुद्धि रेकेह कुरुनन्दन । बहु
शाखा ह्यनन्ताश्च बुद्धयो ऽव्यव
सायिनां इति भगवद्गीतायां
२ अध्यायः ॥ व्यवसायात्मिके
ति इह ईश्वराराधन लक्षणे
कर्म्मयोगे व्यवसायात्मिकाप
रमेश्वर भक्त्यैव ध्रुवं तरिष्या
मीति निश्चयात्मिका एकैव
एक निष्ठैव बुद्धि र्भवति अ
व्यवसायिनां मीश्वराराधनवहि
र्मुखानां कामिनां कामनान
न्त्यादनन्ता स्तत्रापि कर्म्मफलगु
णफलत्वादि प्रकार भेदाद्बहु
शाखाश्च बुद्धयो भवति इति त
ट्टीकायां स्वामी विष्णुः यथा
व्यवसायो व्यवस्थानः संस्थानः
स्थानदो ध्रुवः इति तस्य सह
स्रनामस्तोत्रे ॥
व्यवसायी न्त्रि व्यवसायविशि
ष्टः वाणिज्यकारकः यथा को
ऽतिभारः समर्थानां किंदूरंव्यव
सायिनां को विदेशः स

विद्यानां कः परः प्रियवादिनां
इति चाणक्ये अनुष्ठाता ।
यथा अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा
ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञा
निभ्यो व्यवसायिनः इतिमा
नवे १२ अध्यायः अज्ञेभ्य इति
उभयो प्रशस्यत्वेसति अन्यत
रस्यातिशयविवक्षया श्रेष्ठते
नैष्ठिनो विधानादीयदध्य
यना अज्ञाः तेभ्यः समग्रग्रन्था
ध्येतारः श्रेष्ठाः तेभ्योऽधीतग्र
न्थधारणसमर्थाः श्रेष्ठाः तेनग्र
न्थिनः पठितविस्मृतग्रन्थाबोद्ध
व्याः । धारिभ्योऽधीतग्रन्थार्थ
ज्ञाः प्रकृष्टाः तेभ्योऽनुष्ठातारः
इति तट्टीकायां कुल्लूकभट्टः
व्यवसितः त्रि प्रतारितः इति
भूरिप्रयोगः अनुष्ठितः नि
श्चितः इति व्यवसायि व्यवसा
य शास्त्रार्थ दर्शनात् ॥
व्यवस्था स्त्री शास्त्रनिरूपितवि
धिः यथा दीर्घकाले ब्रह्मच
र्य्यं धारणंच कमण्डलोः देवरेण
सुतोत्पत्ति र्दत्तकन्या प्रदीयते
इत्यादीन्यभिधाय पत्ता

नि लोक शुभार्थ फले यादे
महात्मभिः निवर्तितानि क
र्माणि व्यवस्था पूर्वं बुधैः ॥
इत्युदाहृत्य हेमाद्रि पराशर·
भाष्ययो रादिपुराणं ॥
व्यवस्थानः पुं विस्तुः । यथा
व्यवसायो व्यवस्थानः संस्थानः
स्थानदो ध्रुवः इति तस्य सह
स्रनाम स्तोत्रे ॥ व्यवस्थितो
क्तौ यथा चातुर्वर्ण्य व्यवस्था
न यस्मिन्देशे न विद्यते । तं
म्लेच्छदेशं जानीयादार्यावर्त्त
स्ततः परं इत्यार्यावर्त शब्दो·
कायो भरतः ॥
व्यवस्थितः त्रि विधिवदेकस्मि
न्तः व्यवस्थापितः यथा अथवा
व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्क
पिध्वजः प्रवृत्ते शस्त्र संपातेध
नु रुद्यम्य पाण्डवः इति श्री·
भगवद्गीतायां १ अध्यायः ॥
व्यवहर्त्ता पुं व्यवहारकर्त्ता ।
प्राड्विवाक इति यावत् यथा
उक्ताभिधानानंतरं सभ्यानां
मर्थि प्रत्यर्थिनोः कस्य क्रिया·
स्यादिति पक्ष प्रश्नात्सभास
भाकलित्वं योगीश्वरेण या
वहारपादत्वेनानभिधानात्व्यव

हर्त्तं संबंधाभावाच्च न व्यवहा
रपादत्व मिति स्थितः इति·
मिताक्षरायां व्यवहारमातृका
कायस्यापाधिविशेषश्च ॥
व्यवहारः पुं विवादः । इत्य
मरः वृक्षभेदः न्यायः ॥
पणः स्थितिः इति मेदिनी
शब्दरत्नावल्यां ॥ अथ व्यव
हार दर्शने तत्र याज्ञवल्क्यः
स्मृत्याचार व्यपेतेन मार्गेणाध
र्षितः परैः आवेदयति चेद्राज्ञि
व्यवहार पदं हितं ॥
स्मृति सदाचार वहिर्भूतेन व
र्त्मना परै र्धर्षितः शरीरतो वा
पीडितः अश्रु राजनि निवेदयेत्तद्व्य
वहार दर्शनस्थानं वेदितव्य
मिति मैथिलाः आवेदयति
चेदित्यनेन स्वयं विवादोत्थापने
राज्ञा न कर्तव्य मिति स्पष्ट·
मिति महामहोपाध्यायाः । रा
जनीति व्यवहार प्रदर्शक पदं ।
तथा च वृहस्पतिः राजा का·
र्याणि संपश्येत् प्राड्विवाको
ऽथवा द्विजः प्राड्विवाकलक्षण
माह सएव विवादे पृच्छति प्र
श्नं प्रतिप्रश्नं तथैव च प्रियपू
र्वं प्राग्वदति प्राड्विवाकस्ततः

स्मृतः कात्यायनः । व्यवहारा
श्रितं प्रश्नं पृच्छति प्राडिति स्थि
तिः विवेचयति यस्तस्मिन्प्रा
ड्विवाक स्ततः स्मृतः अर्थिनं
प्रतिभाषा तेकीदृशी प्रत्यर्थिनं
प्रति च तवापि कीदृश मुत्तर इ
ति पृच्छतीति प्राट् प्रमाणावष्ट
म्भ युक्तेन जयं पराजयं वा वि
विनक्ति इति विवाकः प्राट्च स
विवाकश्चेति प्राड्विवाकः ॥
कात्यायनः सप्राड्विवाकः ॥
सामात्यः सब्राह्मण पुरोहितः स
यं सराजा विनयात्तेषां जयपरा
जयौ यदा कार्यवशाद्राजा नप·
श्येत्कार्य निर्णयं । तदा नियु
ञ्ज्याद्विद्वांसं ब्राह्मणं वेदपारगं
यदि विप्रो न विद्वान्स्यात्क्षत्रियं
तत्र योजयेत् वैश्यं वा धर्मशास्त्र
ज्ञं शूद्रं यत्नेन वर्जयेत् सविनी
तवेशः मनुः जातिमात्रोपजीवी
वा कामं स्याद्ब्राह्मणब्रुवः धर्मप्र
वक्ता नृपते र्न तु शूद्रः कदाचन
नाध्यापयति नाधीते सब्राह्म
णब्रुवः स्मृतः व्यासः द्विजान्
विहाय यः पश्येत् कार्याणि
वृषलैः सह तस्य प्रक्षुभ्यते रा

ष्ट्रं बलं कोषश्च नश्यति यः
शूद्रो वैसिकं धर्मं स्मार्तं वा
भाषते यदि तस्य दंडः द्वे
सहस्रे स्वर्णाणी चैव भेस्य
तु दुःशीलोपि द्विजः पूज्यो न
शूद्रो विजितेंद्रियः दुष्टां गां
कः परित्यज्य दुहेच्छीलवतीं
खरीं व्यवहारमाह कात्याय
नः विनानार्थेऽव सन्देहहर
णं हार उच्यते नानासन्देह ह
रणाद्व्यवहार इति स्थितिः ॥
नाना विवाद विषयः संशयो हि
यतोऽनेन इति व्यवहारः भाषो
त्तर क्रिया निर्णयकात्मव्यवहा
रत्वं तथाच वृहस्पतिः अज्ञान
तिमिरोपेतान्सन्देह पटलावृता
तान् निरामयान्यः कुरुते शास्त्रा
ञ्जनेन शलाकया इह कीर्तिरा
पूजा लभते सद्गतिं च सः तस्मा
त्सर्वाय सूक्ष्मा लोक कर्तव्यश्च वि
निर्णयः अतएव नारदः अनि
युक्तो वा शास्त्रज्ञो वक्तुमर्हति दै
वीं वाचं सवदति यः शास्त्रमुप
जीवति दैवी देवानुमता य
शास्त्रयोक्त विरोधे लोकव्य
वहार एवाश्रयणीयः इत्याह स

एव धर्मशास्त्रविरोधे तु युक्ति
युक्तो विधिः स्मृतः व्यवहारो
पि बलवान्धर्मस्तेनावहीयते
अवहीयते अवगम्यते हि ग
तार्थमस्माद्धेतोः । अत एव
बृहस्पतिः केवलं शास्त्रमाश्रि
त्य न कर्तव्यो विनिर्णयः यु
क्तिहीने विचारे तु धर्महानिः प्र
जायते युक्तिर्न्यायः स च लो
कव्यवहार इति व्यवहारमातृ
का अत एव कात्यायनः कु
लशीलवयोवृत्तवित्तवद्भिर
धिष्ठितं वणिग्भिः स्यात्कति
पयैः कुलवृद्धैरधिष्ठितं ।
णिग्भिः स्यात्कतिपयैः कु
लवृद्धैरधिष्ठितं सद इति शे
षः कात्यायनः सभ्येनावश्य
वक्तव्यं धर्मार्थसहितं वचः ।
शृणोति यदि नो राजा स्यात्तु स
भ्यस्तदान्यथाः सभ्यः सभायां
साधुः तथाविधानाह याज्ञ
वल्क्यः श्रुताध्ययनसंपन्नाः
कुलीनाः सत्यवादिनः राज्ञा
सभासदः कार्याः शत्रौ मित्रे च
ये समाः श्रुताध्ययनसंपन्नाः
धर्मशास्त्रज्ञाः कुलीनाः संकाशिदा
पक्षभूतमातापितृवत्पापवत्सराकोः
एवंभूताः सभासदः सभायां यथो

सीदंति उपविशंति
तथा दानमानसत्कारै राजाक
र्तव्याः तथाविधावस्थानेन भूसः
सभात्वमाह मनुः यस्मिन्देशे नि
सीदंति विप्रा वेदविदस्त्रयः
राज्ञः प्रतिकृतो विद्वान् ब्राह्म
णास्तां सभां विदुः ॥ विद्वांसं
स्तावपि सभापर्याय परिष
च्छब्दमाह स एव त्रैविद्यो हेतु
कस्तर्की नैरुक्तो धर्मपाठकः
त्रयश्चाश्रमिणः पूर्वे पर्षदेषा
दशावराः त्रैविद्यः त्रिवेदपारगः
हैतुकः सयुक्तिव्यवहारी अत एव
वासवसिष्ठः । सभासदस्ति सभ्ये
च प्रभादीप्तिःप्रकाशा तानमि
ति यावत्तयासह सातापरस्परया
दा वर्तते इति सभा कात्यायनः
दिवसस्याष्टमं भागं मुक्त्वा भाग
त्रयं तु यत् स कालो व्यवहाराणां
शास्त्रदृष्टः परः स्मृतः अष्टमयामा
र्धाद प्रहरे भागत्रये प्रहरद्वयप
र्यन्ते मनुः धर्मासनमधिष्ठाय सं
वीताङ्गः समाहितः प्रणम्य लो
कपालेभ्यः कार्यदर्शनमारभेत् म
नुनारद शंखायन हारीताः पादो
ऽधर्मस्य कर्तारं पदः साक्षिण

मृच्छति पादः सभासदः सर्वा
पादो राजानमृच्छति राजाभ
वत्यनेनास्तु मुच्यन्ते च सभासदः
एनो गच्छति कर्तारं निन्दार्हो
यत्र निन्द्यते कर्तारं वादिनं ।
राजपदं विवेचकपरं अनेनाः नि
ष्पापः अर्थित्वमाह व्यासना
दृष्टो यस्य चाभ्यधिकापीडाकार्यं
वाप्यधिकं वाप्यधिकं भवेत् त
स्यार्थिभावो दातव्यो नयः पूर्वं
न्निवेदयेत् अथैव पूर्वपक्षो भवेत्
स इति कात्यायनीये तृतीयपा
दः नयः पूर्वं निवेदयेदिति तस्मा
त्स पक्ष इति शेषः । नयः पूर्व
मिति पाठेयः प्रथमं निवेदयति
स पूर्ववादीत्यर्थः बृहस्पतिः प्र
हृष्टपूर्विकया यातावर्थि प्रत्यर्थि
नो यदा वादोवर्णानुपूर्व्येण ग्रा
ह्यः पीडां मवेक्ष्य वा यत्र द्वावेव व
दतः प्रतोमद्वाकं स्याद् इति त
त्र ब्राह्मणादि क्रमेणाधिकपी
डादर्शनेन वा वादो ग्राह्यः स्व
यं विवादाशक्तौ प्रतिनिधिमा
ह नारदः अर्थिना सन्नियुक्तो
वा प्रत्यर्थि प्रहितोऽपि वा यो
यस्यार्थे विवदते तयोर्जयपरा
जयौ ॥

तयो र्वादि प्रतिवादिनोः बृह
स्पतिरपि अत्विक्वादे नियुक्त
श्च समो सम्परिकीर्तितो ।
यत्ते स्वाम्याप्नुयात्पुण्य हानिं
वादेऽथवा जयं कात्यायनः
मनुष्यमारणे स्तेये परदाराभि
मर्षणे अभक्ष्य भक्षणे चैव
कन्याहरण दूषणे पारुष्ये कूट
करणे नृपद्रोहे तथैव च प्र
तिवादी नदातव्यः कर्त्ता तु वि
वदेत्स्वयं कुलस्त्री प्रभृतीनां प्र
तिनिधि माह व्यासः कुलस्त्री
बालकोन्मत्त जडार्तानां च वा
यवाः पूर्वपक्षोत्तरे कर्तुनियु
क्तो भर्तृके स्तथा ॥ आ
गतीरतस्य पत्तस्थितस्य दद
नीयत्व माह नारदः योन भ्राता
पिता वापिन पुत्रो ननियोजि
तः परार्थवादी दण्ड्यः स्यात्
व्यवहारेषु विब्रुवन् विब्रुवन्
विरुद्धं ब्रुवन् ॥ नारदः ।
निर्वेष्टुकामो रोगार्त्तो यियक्षु
र्व्यसने स्थितः अभियुक्तस्त
थान्येन राजकर्मोद्यत स्तथा
गवां प्रचारे गोपालाः शस्य
बंधे कृषीवलाः शिल्पिनश्चा
पितत्काले आयुधीयाश्च विग्र

हे अग्राम्यव्यवहारस्य हती दानो
न्मुखो व्रती विषमस्थाश्चनासे
ध्या नचैतान्नाकयेन्नृपः ति
वैष्टकामो विवाहप्रवृत्तः अ
मेन गदोन्मत्तेण अग्राम्यव्यव
हारः षोडशवर्षावरवयस्कः
तत्काले विवाहादिसमाप्ति
पर्यंतकाले एत विषमस्थाश्च
उपप्लवदेशस्थाश्च उत्तमर्णा
दिनानासेध्या नावधारणीयाः
एतान्याहूतवादिना निवेदि
तानिति विशेषः याज्ञवल्क्यः
अभियोगमनिस्तीर्य नैनम्प्र
त्यभियोजयेत् अभियुक्तःस
त्तुत्तरमदत्वा भाषावादिनमे
तस्याभियोगानुपमर्दकेनवि
वादान्तरेण न योजयेत् युग
पदनेकव्यवहारासंभवात्
नारदोपि पूर्ववादंपरित्यज्य
योऽन्यमालम्बते पुनः वाद
संक्रमणाज्ज्ञेयो हीनवादी स
वैनरः हीनवादीत्यनेन दंड
तोक्तानतु प्रकृतार्थहीनता
अन्यथा छलापत्ते पारुष्य
प्रतिप्रसवमाह सएव ऊर्या
त्प्रत्यभियोगस्तु कलहे साहसे
षु वाक्पारुष्यघातीप्रहारे

षुच यथा सर्व महमध्येनेनाक्रु
ष्टः शस्त्रेण हत इत्यपराधप्रा
वाय प्रत्यभियोगं कुर्यात् न
थाव बृहस्पतिः आक्रुष्टस्तु य
दाक्रोशेत्ताडितः प्रतिताडय
न् हत्वाततायिनं चैव नापराधी
भवेन्नरः एतेन वाक्पारुष्यद
ण्डपारुष्ययोः प्रकृताभियोगाव
रुद्धाभियोगेपि न दोषः ।
यत्र पूर्वमात्तारयेत्तु नियतं
स्यात्स दोषभाक् पश्चाद्यःसो
प्यसत्कारी पूर्वे तु विनयो गुरुः
इति नारदवचनं तत्सर्वापेत
या परस्पापिक वाक्पारुष्यात्पार
रुष्यापि सत्त्वदंडविधायकं ॥
युगपत्संप्रवर्त्तने अधिकदंडाभा
वमाह सएव पारुष्ये साहसे
व युगपत्संप्रवृत्तयोः ।
विशेषश्चेन्न लभ्येत विनयःस्या
त्समस्तयोः विनयोदंडः ।
एवंच दंडोऽप्य मनपराधे प्रति
कृतः पीडितत्वादिति भाषायां
प्रत्यभियोगः कार्यएव ।
प्रत्यवस्कन्दनोत्तरत्वेन युगपद
नेक व्यवहारापत्ति दोषस्याभा
वात् ॥ सभापतेः कर्त्तव्य
माह कात्यायनः । अथ

वेतनप्रतिभूर्नास्ति वादयोरपस्त
वादिनोः सरक्षितो दिनस्यांते
दद्यात्सत्यायवेतनं ॥
प्रतिभवति तत्कार्ये तदद्भवति
इति प्रतिभूर्लग्नकः । वादयोरप्य
विवादफलस्य साधित धनादिदा
नस्य दंडदानस्य चक्षमः वादिनोः
भाषादिनः उत्तरवादिनश्च ।
तथाच याज्ञवल्क्यः उभयोःप्रति
भूर्ग्राह्यःसमर्थःकार्यनिर्णये ।
प्रतिभुवस्त्वभावे च राज्ञा संज्ञपने
तयोः राज्ञा संज्ञपनं दंडत्वा
धिकरणे निर्णयस्य कार्ये यथा
दिदाने राजदंतादित्वात्कार्यशब्द
स्य पूर्वनिपातः ॥ भृत्यःतद
ज्ञो राजनियुक्तः ॥
प्रत्यर्थी यदि कश्चित्काले प्रार्थय
ते सलभेत अर्थीत कालं प्रार्थय
त् अर्थिवमेव व्याहरेत्यादिति
तेन कालो न प्रार्थनीयः ।
तदाह प्रत्यर्थी लभेत कालंश्च
क्तं सभाह मेवच । अर्थीतु
प्रार्थयन्काले तत्क्षणादेव ही
यते कश्चित्प्रत्यर्थी कालं नल
भते याज्ञवल्क्यः साहसस्तेय
पारुष्य गोभिशापात्यये स्त्रि

यां विवादयेत्सद्य एव कालो
ऽन्यत्रेच्छया स्मृतः साहसमनु
ष्य मारणं गोस्त्र दोहा अभि
शापो महापातकादिना अत्य
येद्धनाशे स्त्रियाकुलस्त्रियां
चारित्र विवादविषयप्राप्तायां
दास्यांस्वत्वविवादे वा एष्वर्थ
एव उत्तरं दापयेदिति स्मृत्यथ
णिः विशेषयति कात्याय
नः यस्मात्कार्य समारंभश्चि
रकालेन विनिश्चितः तस्माद्वल
भते काल मभियुक्तस्तु काल
भाक् अपवादमाह बृहस्पतिः
अभियोक्ताप्रगल्भत्वात् वक्तुं
नोत्सहते यदि तदा कालः
प्रदातव्यःकार्यशक्त्यनुरूप
तः अत्रापि विशेषयति व्यासः
राजदैव कृतोदोष तस्मिन्का
ले यदा भवेत् अवष्टयोग
मात्रेण नभवेत्सपराजितः ।
स कृतसमय वधोऽभियुक्तः
राजदैवकृते दोषंसाक्षिभिःप्र
तिपादयेत् जेतेन वर्त्तमान
त्व दैवो दायस्तु तद्धनं अ
वध्यतिक्रमहेतो राजदैविक
दोषस्य प्रमितो ततदतिक्राम
कोऽपराध्यति नेष्याच तदति

क्रमेण दंडो भंगीच भवती
तार्थः छद्मकाठिन्यादियुक्तो
ज्ञिन्मः तथाच हारीतः ।
छद्म माया व्याज युक्तानि
कृतिः कौटिल्य काठिन्यमण
स वैरससझाव युक्तं जैह्म
मिति युक्तयोगः ॥
अथ व्यवहारपाद निर्णयः
अत्र बृहस्पतिः पूर्वपक्षः
स्मृतःपादो द्विपादश्चोत्तरः
क्रियापाद स्तथा चान्यश्च
तुर्थो निर्णयः स्मृतः मिथ्या
कौच चतुष्पात्स्यात्स्यवस्क
न्दने तथा प्राङ्न्यायेच सवि
ज्ञेयो द्विपात्संप्रति पत्तिषु॥
यद्यपि संप्रतिपत्तावपि निर्णा
योऽस्ति तथापुनरवादिनैव
भाषार्थस्यांगीकृतत्वेन क्रि
या साध्योनभवति इति द्वि
पात्त्वोक्ता ॥ अथभाषापादः
तत्र भाषा स्वरूपमाहतुः
कात्यायन बृहस्पती प्रति
ज्ञादोषनिर्मुक्तं साध्यं सत्कार
णान्वितं निश्चितं लोकसि
द्धंच पक्षंपक्षविदो विदुः स्वल्पा
क्षरःप्रभूतार्थो निःसंदिग्धोनि
राकुलः विरोधिकारणेर्मुक्तोवि
रोधि प्रतिरोधकः यदा त्वेवंविधः

पक्षः कल्पितः पूर्ववादिना य
ह्यात्तत् पक्ष संबंधं प्रतिवादी
तदुत्तरं प्रतिज्ञा साध्याभिधा
यिका वाक् तस्या दोषः पक्ष
स्य विरुद्धार्थ पदादिभि स्पष्टं
साध्यं साधनाद्दोऽभिमतं पक्षवि
द्धः अन्यथा प्रतिज्ञा दोषेणास्या
प्यदोषःस्यात् अतएवोक्तं ।
वचनस्य प्रतिज्ञात्वं तदर्थस्यच
पक्षता अनेककारेण वक्तव्यव्यव
हारेषु वादिभिः वक्तव्य पक्ष
प्रतिज्ञे पूर्वोक्ते नारदेनापि सा
रस्व व्यवहाराणां प्रतिज्ञा समु
दाहृता तद्धानौ हीयते वादीत
रंस्ता मुत्तरो भवत् ॥
उत्तरो विजयी । यद्यप्यन्यसाध्य
ज्ञाप्य तद्विशिष्टधर्मी पक्ष इति
भेदः तथाप्यत्र वाक्यन्यायाणा
दि धर्मविशेष विशिष्टस्य पक्ष
तया धर्मिणाः धर्माणां द्वे देव
साध्यत्वात्साध्य पक्षयो रभेदाभिधा
नं उपसंहारे चपक्षस्त्विधः पक्षइति
मिताक्षरायाम् भाषा प्रतिज्ञाप
क्ष इति नार्थान्तरमित्युक्तं ।
भाषार्थं मुक्ता भाषास्वरूप
प्रपंच माह सस्पास्तत्र इतिसि
राकुलः पौर्वापर्य विपर्य

4977

सादि मूलः तत्रयुते च व्यव
हारे च प्रवृत्ते यत्तकर्मणि या
नि पक्षपत्रदासीनाःकर्त्ता तानि
नपश्यन्ति इति स्त्रसंग्रह व
चनाद्दासीनेभ्यो ज्ञात्वा शोध
येत् तच्छोधन माह बृहस्पतिः
न्यूनाधिकं पूर्वपक्षं तावद्वादीवि
शोधयेत् नदद्यादुत्तरं यावत्प्र
त्यर्थी सभ्य सन्निधौ तल्लिखन
प्रकार माह व्यासः ।
पांडुलेखेन फलके भूमौ वा
प्रथमं लिखेत् न्यूनाधिकंच
संशोध्य पश्चात्पत्रे निवेशयेत्
फलकं काष्ठादिपट्टकं ॥ का
त्यायनः पूर्वपक्षं स्वभावोक्तं
प्राड्विवाकोऽथ लेखयेत् पा
ण्डुलेखेन फलके ततःपत्रेऽभि
लेखयेत् शोधयेत्पूर्वपक्षं तु या
वन्नोत्तर दर्शनं । उत्तरेणाव
रुद्धस्य निवृत्तं शोधनं भवेत्
अन्यदुक्तं लिखेद्योन्यदर्थि प्र
त्यर्थिनो वचः । चौरवच्छास
येत्तं तु धार्मिकः पृथिवीपतिः
स्वभावोक्तं सहजमिति ।
एतच्च स्वरविशेषादिना हृदे
यं अत एव याज्ञवल्क्यः छले
निरस्य भूतेन व्यवहारान्नयेन्नृ

पः भूत मप्यनुपन्यस्तं हीय
ते व्यवहारतः भूतं तत्वार्थ
संबंधं नारदः भूतं तत्वार्थ
संबंधं प्रमादाभिहितं छलं
किंतराजा विशेषेण स्वधर्म
मभिरक्षता मनुष्यचित्त वैचित्र्या
पुरीक्षा साक्षसाक्ष्य साधवा स
र्वेषुर्थ्य विवादेषु वाक्छलेना
वसीदति पशु स्त्री भूम्यृणा
दाने शास्याप्यर्थान्न हीयते
सर्वेष्वर्थ्य विवादेषु प्रमादाभि
धानेऽपि नावसीदति अत्रोदाह
रणं पशुस्त्रीत्यादि ग्रंथविवाद
ग्रहणात्मनुष्कृत विवादेषु प्र
मादाभिधाने प्रकृतार्थादप्य
र्थो हीयत इति गम्यते यथाह
मनेन शिरसि पादेन ताडितः
इत्यभिधाय केवलं हस्तेन ता
डित इति वदन्न न केवलं
दंडः पराजीयते च तत्स्थानं
मह्य मृणं धारयसि मतन्न
णत्वनगृहीतत्वावहनकत्वा
दिति भाषाशरीरं पक्षसंज्ञ
त देशाभाषान्तरेण यथा वा
यं वक्तव्य लेख्यंवा मूल्येण
मपि यादि प्रतिवादिना दर्श
नात् अतएवाध्यापनेऽपि तथा
क्तं विस्मृपर्मेत्तिरेसस्यतेः प्राक्

ते वीक्षैयः शिष्यमनुरूपतं
देशभाषाद्युपायैश्च बोधयेत्स
गुरुःस्मृतः ॥ अथोत्तरपादः
तत्र कालमाह कात्यायनः
सद्यःकृतेषु कार्येषु सद्य ए
व विवादयेत् कालातीते
षु वा कालं दद्यात्प्रत्यर्थिने
प्रभुः वादिनोक्तस्य साध्यस्य
तीव मन्यते इति प्रत्यर्थी।
नारदः गहनत्वाद्विवादानां अ
सामर्थ्यात्स्मृतेरपि ऋणादि
षु हरेत्कालं कामं तत्त्वबुभुत्सः
या बृहस्पतिः यद्यात्वेवम्बिधः
पक्षः कल्पितः पूर्ववादिना द
द्यात्तत्पक्षसम्बन्धं प्रतिवादी त
दोत्तरं सम्बन्धं मुपपन्नं अन्यथा
अन्यवादित्वेन भंगप्रसंगः
त् अन्यवादी क्रियाद्वेषीनो
पस्थायी निरुत्तरः आहूतप्र
पलायी च हीनः पंच विधः स्मृ
तः अपलायीविपक्षेण मौन
मुत्तममभि दिनैः क्रियाद्वेषीत
म्प्लेन साक्षिभिर्वत्ता तत्त्वं
त् इतिनारदोक्तेः क्रिया लेख्या
दिका साक्षिभिः साक्षिभिः प
रानितः वादिनोक्तस्य साध्यस
प्रतीतंवदतीति प्रतिवादी उच्य
यते

निस्तीर्यते प्रकृताभियोगोऽनेन
इति उत्तरं याज्ञवल्क्यः श्रुतार्थ
स्योत्तरं लेख्यं पूर्वावेदकसन्निधौ
लेख्यमिति वाक्यसाधुपत्रस्य
उत्तरं स्वरूपं तद्दोषाश्चाह नारदः
पक्षस्य व्यापकं सारं असंदिग्ध
मनाकुलं अव्याख्यागम्यमित्येव
मुत्तरं तद्विदो विदुः ॥ मिथ्या
संप्रतिपत्तिश्च प्रत्यवस्कंदनं त
था प्राङ्न्यायश्च उत्तराः प्रोक्ता
श्चत्वारः शास्त्रवेदिभिः ॥
अभियुक्तोऽभियोगस्य यदि कु
र्यादपह्नवं मिथ्या तत्तु विजानी
यादुत्तरं व्यवहारतः पक्षस्याभा
र्थस्य व्यापकं आच्छादकं अ
भियोगप्रतिकूलमिति यावत्
अत एव पूर्वपक्षार्थसम्बंधं प्रति
पक्ष निवेदयेदित्युक्तं । न
च विप्रतिपन्नार्थ्यायार्थ्ये माया
तस्य धारयसीत्यभियुक्तस्य धार
यामीति संप्रतिपत्तेः कथमुत्त
रत्वं अभियोगप्रतिकूलत्वादि
त्वाच्यं भाषावादिनो पूर्वते
नापटुतया वाकदाचिदाषाभिवा
दादेव्ययं हीयते इति भाषावि
सर्वपर्यन्ते विप्रतिपन्नस्यापुत्तर

वादिनो भाषार्थ्ये सम्यगवग
त तच्चिषेधार्थं सम्यगुत्तरासंभ
वात् विद्वत्सभायां चास्य वचन
मत्यंतधर्मकारकं परोक्तिपरा
जयेचदृढत्वं वादिनाच वैरमि
त्यादि प्रतिसन्धत्तः संप्रतिप
त्ते रुत्तरत्वं संभवत्येव । एवं
एतेभ्य एवानिस्तारात्साध्यत्वं
नोपदिष्टस्य पक्षस्य सिद्धत्वेनो
पन्यासेन साध्यत्व निवारणात्
सिद्धसाधनेनापि वादिनः प्रत्य
वस्थानोत्तरत्वं संप्रतिपत्तेः
सिद्धिमिति सारं प्रकृतोपयोगि
अनाकुलं पूर्वापर विरोधशून्यं
अव्याख्यागम्य मध्याहारादिकं
विनैव प्रतीतं अभियोगस्य अभि
मुख्येन इत्यभियोगः सहेतुकेसा
ध्यं तस्यापह्नव मित्यर्थः उत्तरा
भावमाह कात्यायनः प्रकृतेनत्वस
म्बन्धं अव्यक्तं मतिभूरिच एवं
कदेशव्याप्यं च तच्चैवोत्तरं भवे
त् अस्त वाक्त पदव्यापि निरा
काङ्क्षः तथाकुलं व्याख्याग
म्य मसारंच नोत्तरं शस्यते बु
धैः अस्त वाक्त पदव्यापिक्षत
निरार्थं पदव्याप्त मिति ।

व्यवहारतिलके भवदेवभट्टाः
मिथ्योत्तरं भेदमाहतुः पुनर्थो
स नारदो मिथ्येतच्चाभिजाना
मि मम तत्र न सन्निधिः ।
अजातश्चास्मि तत्काले इति
मिथ्या चतुर्विधं मिथ्योत्तरमिति
शङ्खो नाभिजानामीत्यादिक
मर्थिनोऽपह्नवः तथाच कात्या
यनः श्रुत्वा भाषार्थ मन्यस्तु
यदि तं प्रतिषेधति अर्थतःशब्द
तोवापि मिथ्या तज्ज्ञेय मुत्तरं ॥
त्वमहं धारयसीति प्रतिज्ञाया
न गृहीत मिति शङ्कतः का
लविशेष गर्भायां तस्यां सत्यां
तदानाहं जात इति अर्थतः
देश कालविशेष गर्भायां तदा
तत्र नाहं मासे इत्यप्यर्थतः दे
शादिमध्या तत्कृत्यायां वानुजा
नामीत्यर्थेन एव योगपाल्येन
नार्थेत स्वत्वग्रहणं प्रतिपाद
नात् अत्र चरमद्वये ग्रहणाव
स्कंदनं मोचन ग्रहणाभाव प्रति
पादकं सापदेशमिथ्योत्तरमाह
आयं मिथ्योत्तरमात्रे बृहस्पतिः
अन्याभियोगं प्रत्यर्थी यदि तं
प्रतिपद्यते सात्त्व संप्रतिपत्तिः
साध्याहाविद्धि हदाहृता ॥

अर्थिनाभिहितो योऽर्थः प्र
त्यर्थी यदि तं तथा प्रपद्य का
रणं क्रयात्प्रत्यवस्कन्दनेदिं
तत् आचारेणावसन्नोऽपि पुन
र्लेखयते यदि साभियेयाजि
तः पूर्वं प्राङ्न्यायस्तु स उच्यते
अभियुक्तेन इत्यभियोगः प्रति
पद्यतेऽङ्गीकरोति ।
तेनाप्यर्थं तथा प्रपद्य सत्य
त्वेनाङ्गीकृत्य कारणं क्रयात्
दानादिकं प्रत्यवस्कन्दनं वायु
क्तस्य प्रतिकूलत्वेन प्रत्यवस्क
न्दनात्प्रत्यवस्कन्दन मिति ज्ञेयमु
त्तरवादिनः तेच कारणोत्तरे वि
धिं बलवत्तुल्यबलदुर्बलत्वं ।
तत्र बलवदुत्तरं यथा ।
त्वत्तः शतं गृहीत मिति सत्यं
किंतु परिशोधित मिति अत्र
उत्तरवादिन एव क्रिया निर्दि
ष्टा तथाच नारदः आधर्षेऽपूर्व
पक्षस्य यस्मिन्नर्थवशाद्भवेत्
विवादे साक्षिणस्तत्र प्रष्टव्याः
प्रतिवादिनः ॥
आधर्षं दुर्बलत्वं पूर्वपक्षस्य
। ततश्च स्थापकसाध्यस्य
धार्यमाणत्वस्य ध्वंसकारणानि
स्तदभिप्रायः प्रतिपक्षावस्के

यीतत्वादि तदुपयुक्तं कार
णोत्तरं अत एव मिथ्योत्तरात्
सभेदः तद्धि धार्यमाणत्वसा
ध्यताभाव प्रयोजक मग्रहण
रूपं न तु ध्वंसरूपं तुल्यबलका
रणोत्तरं यथा मदीयेयं भूमिः
क्रमागतत्वादिति वादुक्तेम
दीयेयं भूमिः क्रमागतत्वादि
ति प्रतिवादिना तथोत्तरमिति
तत्र पूर्ववादिनः साक्ष्युपन्यासः
तदसामर्थ्ये प्रतिवादिनः त
थाच याज्ञवल्क्यः साक्षिषूभय
तः सत्सु साक्षिणः पूर्ववादि
नः पूर्वपक्षेऽधरीभूते भवन्त्युत्त
रवादिनः दुर्बलकारणोत्तरं य
था ममेयं भूः क्रमागतत्वादिति
वादुक्ते ममेयं भूर्दशवर्षं भुज्यमा
नत्वादिति प्रत्युत्तरं तत्र धनमा
त्र प्रयुक्ते पश्यतोऽब्रुवतो हानि
र्धनस्य दशवार्षिकी ।
इति याज्ञवल्कीये वीजं किं
तु नैतद्युक्तं यतो भुज्यमाना
या भूमे र्विंशति वार्षिकी इति
भूमि मात्र विषके तत्पराहेना
योदितत्वादिति भवदेव भट्टाः
पश्यतोऽब्रुवतो हानि र्भूमेर्वि
ंशति वार्षिकी परेण भुज्य

मानाया धनस्य दशवार्षिकी
इति शूलपाणिप्रभृति पाठोपिन
याय्ये प्रमाणं ततश्चात्र क्रमा
गतत्व पूर्ववादिनः प्रमाणोप
न्यासः तथाचोक्तं गुरावभि
हिते देशे शतिवादि क्रियाभ
वेत् दुर्बले वादिनः प्रोक्तक्रि
या तुल्येपि वादिनः आचा
रेण व्यवहारेण अवसन्नोऽभि
गी लेखयते भाषा मिति यो
यः सवादी अस्मिन्नर्थे भ्याद
वेंपराजितः वाच्यः प्राङ्न्यायो हि
धार्यमाणत्व सामान्याभाव ज्ञा
पकः एतेषां संकरे विशेषमा
हतुर्व्यास हारीतौ । मिथ्यो
त्तरं कारणं च स्यातामेकत्र चे
दुभे सत्यं चापि सहानेन तत्र
ग्राह्यं किमुत्तरं मिथ्या कारण
यो र्वापि ग्राह्यं कारण मुत्तरं
मिथ्याकारणयो र्वापि ग्राह्यं का
रण मुत्तर यत्प्रभूतार्थविषयं
तत्वात्क्रियाफलं उत्तरतत्ववि
शेष मसंकीर्णं मतोऽन्यथा श
ताभियोगे शतग्रहणं मिथ्याप
चाशदेव गृहीता तास्च परिशु
द्धा इति मिथ्या कारणोपाययोस्तु
त्यरूपत्वे कारणोत्तरं ग्राह्यं आ
दौ विचारणीयं परिशोधनस्या

र्वाचीनत्वेन स्मरणार्हत्वात्
आत्मिथ्योत्तरे तत्र कारणस्यावि
रातीतस्य कष्ट प्रतिपाद्यत्वात्
एवंच शताभियोगे मिथ्यात्वाधि
त्रपाणा एव मया गृहीता स्त
त्रापि त्रिंशत्परिशुद्धा त्रिंशद्दार
यामि इति मिथ्या कारण योः
संकीर्णोत्तरेऽपि पूर्ववत्कारणो
त्तरमेव ग्राह्यं मिथ्या कारणयो
र्वापीति वापि प्राह्याभ्यां स्याद
शितत्वात्सत्योत्तरस्य स्वयं सीक
तत्वेन निर्णयानर्हत्वादिति भा
वः प्राङ्न्यायेन सह सर्वत्रैव
संकरानुपपत्ति रिति तत्रोक्तं
यदि शते मिथ्या पंचविंशतिग्र
हणं गृहीता सैव परिशुद्धास्त
त्पश्चात् मिथ्योत्तरस्य प्रचुरार्थविष
यस्य विचार उपक्रमणीयः भूयो
विरोधस्याभ्यर्हितत्वाभ्युदात्वत्ता
र्थस्य विचार इति तत्स्थार्थविष
यत्वेन यत्र क्रियायाः सारादेः
फले निर्णयः शीघ्रं भवति तदे
शेषैव प्रमाणं ग्राह्यं तथा यदि
शतग्रहणे पत्र मस्ति शतोप
कौवच पंचाशत्परिशोधनेसा
क्षिणः सदा मिथ्योत्तरे पत्रादे
तत्वे दत्ताय ग्रहणपत्रं ग्राह्यं ।

लिखितस्य साक्षिभ्यो बलव
त्त्वेन सम्प्रदः निर्णयकारित्वा
त्तस्मात्प्रतिशोधन साक्षिणः प्र
युक्ताः संकरोत्तरमप्यसंकीर्ण
मिदं यतो भिन्न मन्यथा संकी
र्णं इदं मित्यर्थः अवच्छे
दभेदेन मिथ्योत्तर संकरे सद
त्त्वमेकावच्छेदेन संकरे तत्र
सदुत्तरत्वमाह कात्यायनः प
क्षैकदेशे यत्सत्य मेकदेशे च
कारणं मिथ्या चैवैकदेशे स्या
त्संकरात्तदनुत्तरं एकदेशे ह्य
प्येकस्मिन्नेव देशे न भिन्नदे
शे यथा शते धारयाम्येव परी
शोधिते त्वदुद्दीनत्वा इति ॥

अथ क्रियापादः ।

उत्तराभिधानानन्तरं याज्ञवल्
क्यः ततोऽर्थी लेखयेत्सद्यः प्र
तिज्ञातार्थ साधकं अर्थीवादी
प्रतिवादी च स्वपक्षार्थित्वात्
तेषामधिकारे नियममाह व्या
सः प्राङ्न्याय कारणोक्तौ
तु प्रत्यर्थी साधयेत् क्रियां मि
थ्योत्तरे पूर्ववादी प्रतिपत्तौ न
सा भवेत् मिथ्योत्तरे तदुद्दीते
मयेत्यादिरूपे पूर्ववादी भाषावा
मरः ॥
व्याघ्रास्यः पुं विडालः । इति
शब्दचंद्रिका व्याघ्रमुखे क्ली॥
व्याघ्री स्त्री कंटकारी इत्यम
रः व्याघ्रपत्नीच ॥

व्याजः पुं कपटः सत्त्व अय
थार्थव्यवहारः वंचनमात्रफले
इति सर्वनेरो मयुश्च ॥ अप
देशः सकारणांतर प्रवृत्तेः
कारणांतरोद्भावने व्याजोऽत्र
स्वरूपाच्छादने यथा व्यान
व्याज मुपेत्य चिंतयसि कामि
ति व्याजोऽयमभिप्रायगोपन
फलः सर्वोक्तित्व परापकारफ
लः इत्ययथार्थव्याजयो भेदः
अन्य मुद्दिश्य अन्यप्रतिपादन
मिह व्याज इत्यर्थः यदाह अ
न्यमुद्दिश्य अन्याश्चमनुष्ठान म
पदेशः यथा जलक्रीडा मुद्दिश्य
जारावलोकनार्थं यातीति ।
इत्यमरभरतो ॥
व्याजनिन्दा स्त्री कपटकुत्सा
अलंकारविशेषः यथा निन्दा
या निन्दया व्यक्ति व्याजनिन्दे
ति गीयते इति चंद्रालोकः ॥
व्याजस्तुतिः स्त्री कपटप्रशंसा
अलंकारभेदः यथा । उक्तिर्व्या
जस्तुति र्निन्दा स्तुतिभ्यां स्तु
ति निन्दयोः इति चंद्रालोकः
व्याजोक्तिः स्त्री छलवाक्यं ॥
अलंकारविशेषः यथा व्याजो
क्ति शापहेतत्वपा यदाकार

स गोपनं इति चंद्रालोकः
व्याडः पुं सर्पः मांसभक्षक
पशुः इत्यमरः इंद्रः इति
शब्दरत्नावली वंचकः इति
रायमुकुटः ॥
व्याडायुधं क्ली व्याघ्रनखाख्य
गंधद्रव्य इत्यमरः ॥
व्याडिः पुं कोषकारमुनिवि
शेषः तत्पर्यायः विन्ध्यवासी
२ नंदिनीतनयः ३ । इतिहेम
चंद्रः विन्ध्यस्थः ४ नंदिनीसु
तः ५ इति त्रिकांडशेषः ॥
व्यात्युक्षी स्त्री रसिकानां प
रस्परं जलक्रीडनं इतिसंक्षि
प्तसारोणादिवृत्तिः तत्पर्यायः
जलक्रीडाशब्दे द्रष्टव्यः ॥
व्यादिशः पुं विष्णुः यथा अ
नंतरूपोऽनंतश्रीर्जितमन्युर्भ
यापहः चतुरस्रो गभीरात्मा
विदिशो व्यादिशो दिशः ॥
इति महाभारते तस्य सहस्र
नाम स्तोत्रं ॥
व्याधः पुं मृगहिंसकजातिः ।
शिकारी इति भाषा सतु सर्व
स्त्रि पत्न्यां क्षत्रियाज्जातः यथा
नापिताद्गोपकन्यायां सर्वस्त्री
तस्य योषिति । तत्र द्भूवः
व्याधश्च बलवान् मृगहिंस
कः इति ब्रह्मवैवर्ते ब्रह्मख
ण्डे १० अध्यायः तत्पर्यायः मृग
वधाजीवः १ मृगयुः २ लुब्धकः
३ इत्यमरः मृगावित् ५ द्रो
हाटः ६ इति जटाधरः मृ
गजीवनः ७ बलपाशनः ८
इति शब्दरत्नावली ॥ दुष्टः
मेदिनी ॥
व्याधभीतः पुं मृगः इतिश
ब्दचंद्रिका ॥
व्याधामः पुं वज्रं । इतिहे
मचंद्रः ॥
व्याधिः पुं कुष्ठे रोगः इत्यम
रः कामव्यथासंतापजन्यकृश
ता इतिरसमंजरी ॥
कुष्ठस्य निदानं यथा व्यालोक
नमनस्योत्थ क्रीडा विषय चे
ष्टितैः विरोध कृत भी हर्षवि
षादाद्यैश्च हर्षितः पुं स्त्रोत्सा
ह बलभ्रंश शोष्य विमालव
ज्वरान् सर्वाकाराग निस्तोदं
रोमहर्षं स्वस्थता कुष्ठं विष
धमस्मन्यश्च कुर्यात्संवाग मा
दरं इति गारुडे १७२ अध्या
यः अपरकुष्ठशब्दे द्रष्टव्यं ॥
अथ कुष्ठस्य चिकित्सा

वातोत्तरेषु सर्पिर्वमनं कफो
त्तरेषु कुष्ठेषु पित्तोत्तरेषु मोक्षो
रक्तस्य विरेचनं श्रेष्ठं ॥
पथ्या करंज सिद्धार्थ निशाव
ल्गुज सैंधवैः विडंग सहितैः पि
ष्टैर्लेपो मूत्रेण कुष्ठनुत् अवल्गु
जः बाकुचीति लोके । पथ्यादि
र्लेपः ॥ सोमराजी भवचूर्णं
शृंगवेर समन्वितं । उद्वर्तन
मिदं हंति कुष्ठरोगं कृतास्पदं ॥
सोमराजी बाकुचीति लोके ।
सोमराज्युद्वर्तनं ॥ रसाय
नं प्रवक्ष्यामि ब्रह्मणा यदुदा
हृतं मार्कंडेय प्रभृतिभिर्यत्प्र
युक्तं महर्षिभिः पुष्पकालेतु पु
ष्पाणि फलकाले फलानि च ।
संगृह्य पिचुमर्दस्य त्वङ्मूलानि
दलानि च द्विरंशानि समाहृ
त्य भागिकानि प्रकल्पयेत् त्रिफ
ला त्र्यूषणं ब्राह्मी स्वदंष्ट्रारुष्करा
न्वयः विडंगसार वाराही लोह
चूर्णाः स्मृताः समाः निशाद्वया
वल्गुजक व्याधिघाताः सशर्क
राः कुष्ठमिंद्रयवाः पाठा चूर्णं मे
षां तु संयुतं खदिरासन निम्बा
नां घनक्वाथेन भावयेत् सप्तधा
पंचनिम्बं तु मार्कव स्वरसेन वा त्रि
धा
शुद्धतनुर्धीमान् योजनयेत्कु
भे दिने मधुना तिक्त हविषा
खदिरासन वारिणा लेह मुख्या
म्मसा वापि कोल वृद्ध्या पलं
भवेत् जीर्णे तस्मिन्समश्नीया
त्स्निग्धं लघु हितं च यत् विच
र्चिकोदुम्बर पुंडरीक कपाल
दद्रु किटिभालसादि शतारुवि
स्फोट विसर्पमालाः कफप्रको
पं त्रिविधं किलासं भगन्दर
श्लीपद वातरक्तजडान्धनाडीव्रण
शीर्षरोगान् सर्वान् प्रमेहाश्च
दरांश्च सर्वान् दंष्ट्राविषं मूलवि
षं निहन्ति स्थूलोदरः सिंहक
शोदरः स्यात्सुश्लिष्ट संधि मेध
नोपयोगात् । सदोषरोगा
हपि ये दशाति सर्पादयो घाति
विनाश मासु जीवेच्चिरं व्याधिज
रा विमुक्तः शुभे रतिस्त्वत्स
मानकांतिः अपमर्थः निम्ब
स्य फलपुष्पत्वक् पत्रमूलानि
सर्वाणि समुदितानि द्विगुणानि
चूर्णितानि भृंगराजस्य रसेन स
प्तवारान् भावयेत् त्रिफलादीनि
पादांतानि समुदितान्येक भागा
नि चूर्णितानि खदिरासन निम्बा
नां निविड क्वाथेन भावयेत् ततः

सर्व मेकीकृत्य मध्वादिनावलि
ह्यात् पंचनिम्बकावलेहः ॥
शशिलेखा पंचपलं तावद्गिरि
जस्य गुग्गुलोर्लौहाच्चावणिका
याः त्रिफला करंज पल्लवाख्व
दिरगडूची त्रिवृन्दन्त्यः मुस्ता वि
डंगरजनी कुटज त्वक् बिल्वव
ह्नि संपाकाः पंचैरचितं वटि
का मधु घृत मिश्रा गिलेत्सा
तः गोमूत्रेण च कुष्ठं नुदन्त्य
स्वकात् मचिरेण श्चित्राणि
पांडुरोगं विषमज्वर प्रमेह
गुल्मांश्च नाशयति वलीप
लितं योगः स्वायंभुवो नाम्ना
शशिलेखा सोमराजी गिरिज
स्य शिलाजतुनः तापस्य स्वर्ण
माक्षिकस्य श्रावणिका मुंडी
ति लोके स्वायंभुवो गुग्गुलुः वि
चर्कं त्रिफला व्योष मजाजी
कारवी वचा सैन्धवातिविष
कुष्ठं चवैला यावशूकजं वि
डंगाश्मजमोदाच मुस्ता चाम
रदारुच यावंत्येतानि सर्वाणि
तावन्मात्रं तु गुग्गुलुः संक्षुभ्य
सर्पिषा सार्द्धं गुटिकां कारये
द्भिषक् । प्रातर्भोजन
काले च खादेदग्निबलं । यथा हंसषडादशकुष्ठानिह
मीन् दुष्टव्रणानि च ग्रहणय
र्शो विकभाश्च मुखामय गल
ग्रहान् गृध्रसी मस्थिभग्नं च
त्मं चापि नियच्छति व्याधिको
ष्ठगताचापि जयेद्धिस्तरिवासु
रान् एकविंशति को गुग्गुलुः
वातरक्तापि कारोलुः पुरः कैशो
रकाभिधः कुष्ठानां वात रक्ता
नां नाशयेत् परमौषधं कैशो
रको गुग्गुलुः भल्लातकं प्रस्थ
युगं छित्वा द्रोणे जले क्षिपेत्
प्रस्थद्वयं गडूच्याश्च तस्मिंतत्रो
भयि क्षिपेत् चतुर्थांशावशेषि
ते कषाय मवतारयेत् वस्त्रपू
तेकषाये च वस्त्रमाणानि नि
क्षिपेत् शरावमात्रे गोसर्पिषो
दुग्धस्याढके तथा सिताप्रस्थ
मितं दद्यात्तस्याद्धे माक्षिकं
क्षिपेत् सर्वाण्येकत्रभांडे तु पचे
त्तदग्निना शनैः । सर्वद्रव्येघ
नीभूते पावकादवतारयेत् ॥
तत्रैलप्यानि चूर्णानिक्रमाद्वि
ल्व मितामरता । वाकुची
वाष्प दण्डुम्नः पिचुमर्दो हरीतकी
धात्री रात्रिश्च मं जिष्ठा मरिचं
नागरं कणा यवानी सैंधवं

5017

मुस्तं त्वगेला नागकेशरं प
टः पत्रकं वाल मुशीरं चंदनं
तथा गोक्षुरसवरीजानि क
र्चूरो रक्तचंदनं पृथक् पलार्द्धमा
नानां चूर्णं मेषा मिह क्षिपे
त् पलमात्रः सिंदं प्रातः सम
श्रीयाज्जलेनहि नाशयेदवले
होयं कुष्ठानि निखिलान्यपि
वातरक्तानि सर्वाणि सर्वाण्य
र्शांसि सेवितः ॥ व्यायाम
मातपं वह्निं मत्स्यं मांसं दधि
स्त्रियं तैलाभ्यंगं तथाध्मानं
नरो भल्लातके भुञ्जेत् प्रसूत
भल्लातकावलेहः ॥ निम्ब
गोपारुणा कुष्ठी मायंती त्रि
फलाचनं पर्पटावल्गुजानंता
वचाखदिर चंदनं पाठा शुंठी
शाटीभार्गी वासा भूनिम्बवत्स
कं शपामेद्रवारुणी मूर्वा विडं
ग्वयवानलं हस्तिपर्णीः शताह्व
का पटोल रजनीद्वयं कणा
रवष समाक्रमवेत्रोभ्यटा
फलं मंजिष्ठा लांगली राम्नान
कमालं पुनर्नवा दंती विजय
सारश्च भृंगराज कंटकं ग्रको
ठकंच शालावटं द्विपलांशाः
पृथक्पृथक् गृह्णीयात्तानि सर्वा
णि ज लद्रोणे पचेच्छनैः अष्टमांशा
वशेषेत् कषाय मवतारयेत्
विधाय वाससा पूतं स्थापये
द्भाजने दृढे भल्लातक सहस्रा
णि त्रिसा ...णि भले ...क्षि प
चेदष्टावशेषन्तु कषाय मवता
रयेत् तद्वस्त्रेण संशोध्य द्वौ
कषायौ विमिश्रयेत् गुडस्यच
तुलां दत्वा लेहवत्साधु साधयेत्
भल्लातक सहस्राणि तत्रचूर्णी
कृतानि निःक्षिपेत् त्रिकटुः त्रि
फलामुस्त विडंगं चक्रकं तथा
चंदनं सैंधवं कुष्ठं दीप्यकं चप
लपलं सांगंध्यर्थं क्षिपेत्तत्र
चातुर्जातं पलं पृथक् महाभ
ल्लातको ह्येष महादेवेन भाषि
तः प्राणिनां हितकामाय जये
च्छीघ्रं प्रयोजितः श्वित्रं मोदु
म्बरं दद्रु मस्तजिह्वं सकाके
णं पुंडरीकं च चर्माख्यं विस्फो
टरक्तमंडले कंडू कपालकं कु
ष्ठपामानं च विपादिकां वातर
क्तं षड्शांसि पांडुरोगं व्रणाक्रि
मीन् रक्तपित्त मुदावर्तकास
श्वास भगन्दरं सदाभ्यासेन
पलितं मामवातं सक्तलं ते नि
षेव्याणात्तु कथितो विद्याधरा

रसैर्घृतैः कुरुते परमां का
न्तिंप्रदीप्तंजठरानलं प्रभुत्वा·
नेप्रयोगात्कृत्वा छिन्नातोयं प
योऽथवा भोजनेन सदात्मा
न्यगुरु मन्त्रे विशेषतः गो
पा श्वेतसाउ इति लोके य
त आहनिघण्टः सारिवा सा
रदा स्फोटागोपकन्या प्रता
निकेति तद्भाचेको गोपीषा
इष्य यत आह गोपी श्यामा
सारिवा स्यादनन्तोत्पलसारि
वा इत्यमरः गोपागना गोप
वल्ली लताफाकाष्ठसारिवा।
ति मदनपालः शुक्लगा प्रती
स्रू यवल्लुजः सोमराजी प्र·
नेता कुशलभा चन्दने श्वेते।
भार्गी प्रलाभेकंटकारीमूलं
प्रपामा हंसपादा हलिकर्णाः
हर्षिकाण दैकावक्रा इति स
माक्षः छतिवत् कुसवेडःज
लवेतसः उच्चटाफलं शारकेशु
जाफलं अटेकःकटसैरेया दी
प्यकःयवानी महाभल्लातकः
यवानी महाभल्लातकः भंजि
ष्ठात्रिफला तिक्ता वचा दारूनि
शाम्लता निम्ब श्रेष्ठा कतःका
यःसर्वकुष्ठानि नाशयेत् ल·

बृहन्मंजिष्ठादिकाथः मंजिष्ठावा
कुचीचक्रमर्दश्च पिचुमर्दकेहरी
तकीहरिद्रा धात्री वासाश
तावरीवला नागवला षष्ठी
मधुकं खरकोपिव पटोलस
लनोशीरंगुडूची रक्तचन्दनं मं
जिष्ठादिवर्यंकाथःकुष्ठानांनाश
नःपरः वातरक्तस्य संहर्ताकंडू
मंडलखंडनः मध्यममंजिष्ठादि
काथः मंजिष्ठा कुटजामृतामु
नवचा शुंठी हरिद्राद्वयं लड्डारि
ष्टपटोल कुष्ठ कटुका भार्गीवि
डंगाग्निकं मूर्वादारु कलिंगभे
गमगधा त्रायंति पाठा वरी गा
यत्रीत्रिफला किरातक महानि
म्बासनारग्वधं श्यामावल्गुजंचं
दनंवरुणाकं दंतीकशा घोटकं
वासापर्पट सारिवा प्रतिविषा
नंताविशाला मंत्र मंजिष्ठादि
रयंकषाय विधिना नित्यं पुमा
न्यःपिबेत् त्वग्दोषा ह्यचिरेणयां
तिविलयं कुष्ठानि चाष्टादश
नाशं गच्छति वातरक्त मखिल·
लेनश्यति रक्तामया वीसर्पस्त्व
चि प्रसूननलयनजा रोगाःप्रशा
म्यंतिच अरिष्टःनिम्बः कलिंगः
इंद्रयवः भंगा भृंगराः वरीशता
वरी गायत्री खदिरः असनः विजय

सारः श्यामा प्रियंगुः । चंदन
मत्रवक्रे यासे सारिवा साउे।
अनंता कुशलभा विशाला इंद्र
वारुणी इति मेलं नेत्रवाला।
बृहन्मंजिष्ठादिकाथः ॥ मरिचं
त्रिवृता मुस्ता हरिताले मनः·
शिला देवदारु हरिद्रे द्वे मांसी
कुष्ठंसचंदनं विशाला करवी
रंच क्षीरमर्कस्यमुत्रवं गोमयस्य
रसंकर्षात्प्रत्येकंकर्षं समितं॥
विषस्याई पलं देयं तैलप्रस्थमि
तं कटु पचेच्चतुर्गुणेनीरे गोमूत्रे
द्विगुणे तथा मरिचाद्यमिदं तै
लं मभ्यंगात्कुष्ठनाशनं पतस्या
भ्यंगतःश्वित्रं विवर्णं तन्त्वणाद्
वेत् तैलमेतज्जयेत्कंडूं पामां·
सिध्मं विचर्चिकां पुंडरीकंतथा
दद्रु भूस्ता नित्यसेविनां ॥
लघुमरिचाद्यं तैलं ॥ मरि
च त्रिवृता दंती क्षीरमार्कंश
कृन्मः देवदारु हरिद्रे द्वे मां
सी कुष्ठ सचंदनं विशाला क
रवीरश्च हरिताल मनःशिला
चित्रकः लांगली मुस्ता विडंग
चक्रमर्दकः शिरीषः कुटजो नि
म्ब सप्तपर्णोऽमृता स्नुही स

म्याको नक्तमालश्च खदिरोवा
कुची वचा ज्योतिष्मती चु प
लिका विषं द्विपलिकं भवेत्
आढकं कटुतैलस्य गोमूत्रंच
चतुर्गुणं मृत्पात्रे लोहपात्रेव
शनैः मृद्वग्निना पचेत् मरि
चाद्यमिदं तैलं सद्यःनिष्कि
रिणं भिषग्जनेन तैलेन मृक्षये
त्कौष्ठिकान् व्रणान् पामावि
चर्चिका दद्रु कंडू विस्फोटका
नि च वलयः पलितं छायानी
लव्यंगं तथैवच अभ्यंगेन प्र
णश्यंति सौकुमार्यंच जायते
प्रथमे वयसि हीनां यामो
नस्य प्रदीयते तासां मपिस्त्ररा
प्राप्य नश्यंतो सवलितो स्तनो
वलीवर्दस्तुरंगो वा गजोवा·
वायुपीडितः । त्रिभिरभ्यंज
नैः दर्प्यं भवेन्मारुतविक्रमः
ज्योतिष्मती मालकंगुणीतिलो
के महामरिचादितैलं तालक
सप्त पत्राणि यस्य संति पृथक्
पृथक् अभ्रकस्येव तद्ग्राह्यं हरि
तालं विलसकः पुनर्णावायाःस्व
रसे तालकं तद्धिमर्दयेत् दि
नैकं ततस्त्रिन्द्रानत्वं गमिते

सति ऊर्वीन चक्रिकां तोत
शोषयेत्समभागानपे पुनर्नवा
समस्तागतारैः स्थाली गला
वपि प्रयेच्च ततःस्तारद्वये
मीडनेन दि तारस्योपरितोद
घात्तालकस्पतु चक्रिका ॥
ततश्चाच्छादनं दत्वा मुद्राकृ
त्वा विशोषयेत् स्थाली चुल्या
निधायाग्नि ममंदं ज्वालयेद्दि
पक् निरंतर महोरात्रं पंचकं
तेन सिध्यति स्वाग शीतं सम्
त्तार्य रसोयाद्रस मुत्तमं ता
लकेश्वर नामाय मुक्तो गंजा
मितो रसः गुडूच्यादि कषाये
णागदानेनतान् विनाशयेत् ॥
अष्टादशापि ऊष्मानि वातरक्त
तयोहतं फिरंगदेशजं रोगं
दुस्तरं च व्यपोहति एतद्रस
जसेवी तु लवणाम्ल विवर्ज
येत् तथा कटुरसं वर्जिमात
पं दूरतस्त्यजेत् लवणोयः प
रिसकेन शाक्रोति कथुकेनस
तु सेव्यवसम्ब्रीयात्मधुरोपरसा
दिसः तालकेश्वरोरसः तालता
प्य शिला सतं टंकणं सिंधुसं
युतं गंधाके हिंगुलीरसता
म्बीतादिःप्रमर्दयेत मुद्दरूप ।

दितं वोफ्रा भूपरे सकलेतिरं
षट्पदं द्विपलं ताम्रं लोह भ
स्म चतष्पलं जम्बीरादि दिनं
चूर्णं त्रिशदेश विषं क्षिपेत् ।
अस्य मासद्वयं वादेन्मारिचीचूर्ण
संयुतं मधोस्पे वोकची वीजं
कर्ष त्रिसांततः परं ।
तालकेश्वरं नामायं सर्वकुष्ठ
रोगसः अर्को मारितं ताम्रं ।
द्वितीयतालकेश्वरो रसः ॥
रसावलित्ताम्र मयः पुरोःग्निः
शिलाजतु स्पाद्विष तिन्दुकस्य
ववाचतस्य गगनं करंज वीजंपृ
थग्भाग चतुष्टयेच संमर्द्यमर्व
मधुना घृतेन घृतस्य पात्रे निहि
तं मयत्नात् कर्षं भजेत्स्यद्रसं
स्य पथ्यं शाल्योदनं द्रप मधु
त्रयेंच विशीर्ण कर्णांगुलि ना
सिकोपि भवेद्दनेन स्मर तुल्य
मूर्तिः दारा परिप्याग इह प
दिष्टा तिलोदनं तत्र निवहृषू
ते ताम्रमयश्च मारितं प्रोग
ग्गुलः अग्नि स्त्रिवृक् विषति
न्दुकः ऊचिला वरा त्रिफला ।
रसादि त्रिफलांतं सर्वं तुल्यं ग
गन मभ्रकं करंजवीजंच पृथक्
चतुर्गुणं रसात् तत्रकुष्ठे वट

मूलेसति तिलोदन मेव पथ्यं
इति गलत्कुष्ठाधिकारः इतिभा
वप्रकाशः अथ सर्वव्याधिहर
कवचं हरीरुवाच । सर्व
व्याधिहरं वक्ष्येवेमवं कवचंशि
व येन रक्षा कृता शंभोःश्वेत
रक्षयतः पुरा ॥ प्रणम्यदेव
मीशान मजं नित्य मनामयं ।
देवं सर्वेश्वरं विष्णुं सर्वव्यापिन
मव्ययं वध्नाम्यहं प्रतिसरं नम
स्कृत्य जनार्दनं अमोघाप्रतिमं
सर्वं सर्वदुःखनिवारणं । विष्णु
र्मामग्रतःपातु कृष्णो रक्षतु पृ
ष्ठतः हरी मे रक्षतु शिरो हृद
यंच जनार्दनः मनो मम हृषी
केशो जिव्हां रक्षतु केशवः ।
पातु नेत्रे वासुदेवः श्रोत्रे संक
र्षणोःवतु प्रद्युम्नःपातु मेघ्राण
मनिरुद्धश्च चर्मकं वनमा
ली गलस्यांते श्रीवत्सो रक्षताम
धः पार्श्वं रक्षतु मे चक्रं वामं
दैत्यनिवारणः हरितांगतु गदा
देवी सर्वाकार निवारिणी उदरं
मुषलं पातु पृष्ठं मे पातु लांग
लं ऊरू रक्षतु मे शार्ङ्गं जंघे
रक्षतु नंदकः पार्ष्णी रक्षतुशं
खश्च पद्मो मे चरणावुभौ सर्वे

कार्यार्थ सिद्ध्यर्थं पातुमांवाह
ःसदा वराहो रक्षतु जले
विषमेषु च वामनः अटव्यांन
रसिंहश्च सर्वतःपातु केशवः
हिरण्यगर्भो भगवान् हिरण्य
मेप्रयच्छतु सांख्याचार्यस्तुक
पिलो धातुसाम्यं करोतु मे
श्वेतद्वीप निवासीच श्वेतद्वीपं
नयत्वजः सर्वान्शत्रून्सूदयतु
मधुकैटभसूदनः । विष्णुःसदा
विकिरतु किल्विषं मम विग्र
हात् हंसो मत्स्य स्तथा कूर्मः
पातुमां सर्वतो दिशं त्रिविक्र
मस्तुमे देवःसर्वान् पापान्नि
कृंततु नरनारायणौ देवौ बु
द्धिंपालयतां मम शेषो मेनि
र्मलं ज्ञानं करोत्वज्ञाननाशनं
वलरामो नाशयतु कल्मषं
यत्कृतं मया पुंड्रो दत्तात्रप
रेमा मुखं मूर्ध्नी मम प्रभुः
दत्तात्रेयः कलयतु सपुत्रपशु
बांधवं सर्वानरीन्नाशयतु रामः
परशुना मम रक्षोघ्नस्तु दाशर
थिः पातु नित्यं महाभुजः
शत्रून्मे समरे हन्याद्रामो या
दवनंदनः प्रलम्ब केशिचाणू
रपूतना कंसनाशनः कृष्णस्य

यो बालभावः स्वेकामान् प्र
यच्छत अन्धकारं तमोद्वारेषु
रूपे कृष्ण पिङ्गले पश्यामि
भयसंतमः पाशहस्त मिवांत
कं ततोऽहं पुंडरीकाक्ष मच्युतं
शरणं गतः धन्योऽहं निर्भयो
नित्यं यस्मे भगवान्हरिः।
ध्यात्वा नारायणं देव सर्वोपद्र
वनाशनं वैस्नवं कवचं बद्धा
विचरामि महीतले अप्रधृष्यो
स्मि भूतानां सर्वदेवमयोऽच्युते
स्मरणाद्देवदेवस्य विष्णोरमि
ततेजसः सिद्धि र्भवतु मेनि
त्यं यथा मंत्रमुदाहृतं योऽमां
पश्यति चक्षुर्भ्यां यांश्च पश्या
मि चक्षुषा सर्वेषां पाप दुष्टा
नां विष्णु र्बध्नाति चक्षुषा वासु
देवस्य यच्चक्रं तस्य चक्रस्य ये
त्वराः ते छिन्दंतु च पापं मेम
महिंसंतु हिंसकान् राक्षसेषु
पिशाचेषु कांतारेष्वटवीषु च
विवादे राजमार्गेषु द्यूतेषु क
लहेषु च नदीसंतरणे वाले सं
ग्रामे प्राणसंशये अग्निचौर
निपाते च सर्वग्रह निवारणे
विद्युत्सर्प विषोद्वेगे रोगेऽथ
विघ्न संकटे जप्य मेतत्तु ।

रोषितं शरीरे भयमागते ॥
अयं भगवतो मंत्रो मंत्राणां प
रमोमहान् विख्यातं कवचं गु
ह्यं सर्वपापप्रणाशनं स्वमाया
कृति निर्माण कल्पांतगहनो
महत् अनाद्यंत जगद्बीज पद्म
नाभ नमोऽस्तुते ॥ ॐ काला
य स्वाहा ॐ कालपुरुषस्वाहा।
ॐ कृष्णाय स्वाहा ॐ कृष्णपुरु
षाय स्वाहा । ॐ चंडाय स्वा
हा ॐ चंडपुरुषाय स्वाहा ।
ॐ प्रचंडाय स्वाहा । ॐ प्रचंड
पुरुषाय स्वाहा ॐ सर्वाय स्वा
हा ॐ सर्वपुरुषाय स्वाहा ॐ नमो
भुवनेशाय त्रिलोकधात्रे इलिहि
मिलिहि स्वाहा ॐ नमो अस्त्वा
भये ये ये सत्वा या पात्रचरा
वेषा दैत्य दानव यक्ष राक्षस
भूत पिशाच कूष्मांडापस्मारको
च्छादन ज्वराणां मैकाहिक द्विती
य तृतीय चातुर्थक मौहूर्तिक
दिनज्वर रात्रिज्वर संध्याज्वर सर्व
ज्वरादीनां लूता कीट कंट पूतना
भुजंग स्थावर जंगम विषादी
नामिदं शरीरं ममापथ्यं भव
तु तन्मुक रफुर प्रकटोत्कट विक
टदंष्ट्र पूर्वतो रक्ष ॐ हे हे हे हे

5023

दिनकर सहस्रकाल ममाग्रतो
जय पश्चिमेतो रक्ष ॐ निवि
निवि प्रदीप्त ज्वलन ज्वालाका
राम्रहाकपिल उत्तरतो रक्ष। ॐ
मिलि मिलि विलि विलि गारु
डि गोरि गांधारि विषमोह विष
विषमांसं मोहयत स्वाहा । द
क्षिणतो रक्षमां अनुकस्य सर्व
भूत भयोपद्रवेभ्यो रक्ष रक्ष
जय जय विजयते नहीयते वि
प्रश्रमोहं कृतवाद्यते भयरूप
य भयवाभयोऽभयं दिशत्वम
मास्त्वाह्सादन मच्युतः तद्वद
मखिलं विशंत लोकाद्युगपरि
रिवर्तं सहस्रं तथात्मनमिव
प्रविशंति कृत्स्यतो ॥ वा
सुदेवः संकर्षणः प्रद्युम्न श्चानि
रुद्धकः सर्वज्वरान्ममघ्नंतु विष्व
नारायणो हरिः इत्यादिमहाग
रुणे गारुडे सर्वव्यापिहर विष्णु
कवचं २०० अध्यायः ॥
व्याधिघातः पुं आरग्वधवृक्षः ।
इत्यमरः ॥
व्याधितः त्रि व्याधियुक्तः तत्प
र्यायः आमयावी २ विकृतः ३
अपटुः ४ आतुरः ५ अभ्यमितः
६ अभ्यान्तः ७ इत्यमरः ॥

रोगी ८ इति जटाधरः ॥
व्याधिहन्ता पुं वाराहीकन्दः
इति राजनिर्घण्टः ॥ व्याधिवा
तके त्रि ॥
व्याधूतः } त्रि कंपितः । इति
व्याधुतः } शब्दरत्नावली ॥
व्यानः पुं शरीरस्थपंचवाय्वंत
र्गतसर्वशरीरगवायुः इत्यमरः
अस्य प्राणादयः पंच वायवः श
रीरे तिष्ठंति तेच नियत स्थान
स्थाः यदाहुः हृदि प्राणो गुदे
ऽपानः समानो नाभि संस्थितः
उदानः कंठदेशे च व्यानः
सर्वशरीरगः इति एवं ते
षां पाराश्च यथा अन्न प्रवेश
ने मूत्राद्युत्सर्गोऽन्न विपाचनं
भाषणादि निमेषादि तद्व्या
पाराः क्रमादमी इति भरतः
श्रीधरस्वामि मते तत्कर्म।
व्यायने आकुंचन प्रसारणा
दि अस्मत्तु व्यानो व्यानश
यत्नेन सर्वव्यापि प्रकोपनः
महाजवन समस्थो हानोपा
दानकारणः सचाति कर्णि
योर्मध्ये कट्यां वेगुल्फयोरपि
घ्राणे गले स्फिग्देशे तिष्ठत्य
निरंतरः स्कन्दयत्यापरे वक्रे

गात्र नेत्र प्रकोपनः ॥ इति
शारदातिलकटीका॥
व्यापकः त्रि विशेषेणाप्नो-
तियः तद्दन्निष्ठात्यंताभावाप्र
तियोगी यथा साध्यस्यव्याप
यस्तु हेतो रव्यापक स्तथा
स उपाधि र्भवेत्तस्य निष्कर्षो
ऽयं प्रदर्श्यते इतिभाषापरि
च्छेदः आच्छादकः यथा
पक्षस्य व्यापकंसारमसंदिग्ध
मनाकुलं अव्याख्यागमप्रमि
तेव पूतरं तद्विदो विदुः॥
पक्षस्य भाषार्थस्य व्यापकंआ
च्छादकं अभियोगाप्रतिकूल
मिति यावत् । इतिव्यवहा
र तत्वे ॥
व्यापकन्यासः पुं शिरस्तःपा
दांतं पादतः शिरोन्ते मूल
मंत्रविन्यासः यथा आदा
वृष्यादिकः न्यासः करशुद्धि
स्ततः परं अंगुलि व्यापकः
न्यासो हृदादिन्यास एवच॥
तालत्रयंच दिग्बंधः प्राणाया
म स्ततःपरं ध्यानं पूजाजप
श्चैवसर्वतंत्रेष्वयं विधिः इति
तंत्रसारः प्रपंचस्तु न्यासशब्दे
द्रष्टव्यः॥

व्यापद् स्त्री मरण आपत् ।
विपूर्व आङ्पूर्वपद्धातोः क्वि
प्प्रत्ययेन निष्पन्ना॥
व्यापनं क्ली आच्छादनं व्या
प्तिः यथा अत्र लंघन मसंक्रम
णंच रेव स्तदा भवति यदा
तन्मास तत्पूर्वमासो स्तदगयोर
कतरपवस्थितस्य तन्मासानंत
र मेव राशयंतरसंयोगः नत्वेक
राशिस्थितस्य मासव्यापनमा
त्रं इति मलमासतत्वं ॥
व्यापन्नः त्रि मृतः । इति हेम
चंद्रः ॥
व्यापादः पुं द्रोहचिन्तनं ।
इत्यमरः॥
व्यापादनं क्ली मारणं । इति
हेमचंद्रः ॥ परानिष्टचिन्तनं ।
इत्यमरटीकायां रामाश्रमः ॥
व्यापादितः त्रि द्रोहचिन्तितः ॥
मारितः यथा एका चेद्बहुभिः
क्वापिदैवाद्व्यापादिता भवेत् ।
पादं पादंच हत्यायाश्चरेयुस्ते
पृथक् पृथक् इति प्रायश्चित्त
तत्वधृतसम्वर्त्तवचनं॥
व्यापिका स्त्री व्यापिनी यथा।
अयर्मपत्नी मिथ्या सा सर्वपूज्ये
अपूजिता यया विना जगत्कृत्स्न

मुच्छन्नं विधिनिर्मितं सत्ये
वादर्शना याचत्रेतायां सूक्ष्म
पिणी अर्द्धावयवरूपाच द्वाप
रे संहृता भिया कलौ मृता
प्रमत्ताच सर्वत्रव्यापिका भवेत्
कपटेन समंभ्राता भ्रमत्येवगृ
हे गृहे इतिब्रह्मवैवर्त्तेप्रकृति
खंडे १अध्यायः॥
व्यापारः पुं कर्म यथा स्नात्वा
ऽरण्यवियोगफलको व्यापारो
हननं स्मृतः रागाद्वेषात् प्रमा
दाद्वा स्वतः परत एव वा॥
इति प्रायश्चित्ततत्वधृत अग्नि
पुराणवचनं॥
व्यापारीन् त्रि व्यापारविशिष्टः
व्यवसायी यथा लाक्षालोहा-
दि व्यापारी रसादि विक्रयीच
यः सयाति नागवेष्टेच नागे
र्वेष्टित एवच इति ब्रह्मवैव
र्त्तपुराणं ॥
व्यापीन् त्रि विभुः यथा स्वप
नः स्ववशो व्यापी नैकात्मानेक
कर्मकृत् इति तस्य सहस्रनाम
स्तोत्रं व्यापकः आच्छादकः
यथा त्रि संध्य व्यापिनीयात
सैव शुक्ल पूर्णा सदा तिथिः
न तत्र युग्मादरणमन्यत्र हरि

वासरात् इति तिथ्यादितत्व
धृत पराशर वचनं॥
व्यापृतः पुं कर्मसचिवः यथा
नियोगी कर्मसचिव आयुक्तो
व्यापृतश्च सः इति हेमचंद्रः
व्यापारयुक्ते त्रि वि आङ्पूर्व
पृ धातोः क्त प्रत्ययेननिष्प
न्नः॥
व्याप्तं त्रि सम्पूर्णं तत्पर्यायः
पूर्णं २ आचितं ३ छन्नं ४
पूरितं ५ भरितं ६ निचितं ७
इति हेमचंद्रः ख्यातं समा
क्रांतं इति मेदिनी॥ व्यापि
तं यथा प्राप्त प्रणिहितसमे
इमत्र व्याप्त मपि पाठः ।
इत्यमरटीकायां रायमुकुटः
व्याप्तिः स्त्री व्यापनं लंभः ।
इति मेदिनी लंभस्थाने लाभ
व मिति हेमचंद्रे पाठः शि
वस्याष्टैश्वर्यान्तर्गतैश्वर्यविः
शेषः यथा अणिमा लघिमा
व्याप्तिः प्राकाम्यं महिमेशिता
वशिता कामावशायित्वं ऐश्वर्यं
मष्टधा स्मृतं इति शब्दमाला
न्यायमते साध्यवदन्यावृत्तित्वं
यथा अग्निभावस्थाने धूमस्या
वर्त्तमानत्वं । इयं

अस्य व्याप्तिः अस्या ज्ञानंप्रति
व्यभिचारज्ञानाभावः सहचार
ज्ञानंच कारणं एवंसाध्या-
भावव्यापकीभूताभाव प्रति-
योगित्वं इयं व्यतिरेकव्या-
प्तिः अस्याज्ञाने प्रतिसाध्या
भाव एवं हेत्वभावस्य सहचा
रज्ञानं व्यभिचारज्ञानाभाव
श्च कारणं तत्रप्रमाणं ।
व्याप्तिः साध्यवदन्यस्मिन्नसम्ब
न्धउदाहृतः अथवा हेतुमन्नि
ष्ठविरहाप्रतियोगिना । साध्ये
न हेतो रैकाधिकरण्यं व्याप्ति
रुच्यते व्यभिचारस्याग्रहोपिस
हचारग्रह स्तथा हेतुर्व्याप्ति
ग्रहे तर्कः क्वचिच्छङ्कानिवर्त्तकः
हेतुविषयंतु भवेद्व्याप्ति रन्वय व्यति
रेकतः अन्वयव्याप्ति रुक्तैव व्यति
रेकाद्वथोच्यते साध्याभावव्या
पकत्वं हेत्वभावस्य यद्भवेत् इ
तिभाषापरिच्छेदः ॥
व्याप्यं त्री साधनं यथा ।
व्याप्यं लिङ्गंच साधनं । इति
संकीर्णवर्गे त्रिकाण्डशेषः ऊ
होषयं इत्यमरः ॥
व्याप्यः त्रि व्याप्तिविशिष्टः ।
व्यापनीयः यथा अस्यानंते
कुलिप्ता कलनातिमिते पदि
तां ग्रैव क्षिते ऽस्माकं तदपि
मते याहि याहीति वाणी
प्रमाणं कथयति सदानंद
स्तेो वियोगो व्याप्यज्ञानाद्
नकुलभुग्व्यापकस्यापि सिद्धो
इति पदाङ्कदूतः ॥
व्यामः पुं तिर्यक्प्रसारितकरयोः
सहस्तयो र्बाह्वो रन्तरं बाँउ
इतिभाषा व्यामीयते ऽनेनव्या
मः कृञोः करभाव हेतेकर्माद्युः
इत्यमरभरतौ ॥
व्यामव्यायाम न्यग्रोधा स्तिर्य-
ग्बाहू प्रसारितौ इति हेम
चन्द्रः ॥
व्यामनं स्त्री व्यामः इति त्रि
काण्डशेषः ॥
व्यायतंत्रि व्यापृते दैर्घ्ये ॥
दृढे अतिशयः इति मेदिनी
व्यामः इतिहेमचन्द्रः ॥
महाक्रोशं करोतीति पारस्यभा
षा अस्य गुणादि यथा ।
व्यायामो हि सदा पथ्यो बलि
नां स्निग्धभोजिनां स च शी
व्यायामः पुं पौरुषः श्रमः विष
मः दुर्गसञ्चारः इति मेदिनी ॥ ५

ते वसंते च तेषां पथ्यतमः
स्मृतः सर्वेष्वृतुषु सर्वै र्हि प्र
हैरात्महितार्थिभिः शक्त्यर्द्धेनतु
कर्त्तव्यो व्यायामो हन्त्यतोऽन्य-
था कक्षौ ललाटे ग्रीवायांच
दाघर्मः प्रवर्त्तते । शक्त्यर्द्धं
तं विजानीयाद्व्यायामेष्वसमेव
च लाघवं कर्मसामर्थ्यं स्थैर्यं क्ले
शसहिष्णुता । दोषक्षयो
ऽग्निवृद्धिश्च व्यायामादुपजायते
व्यायामं कुर्वतो नित्यं विरुद्ध
मपि भोजनं । विदग्धमवि
दग्धं वा निर्दोषं परिपच्यते
नच व्यायाम सदृशं किमन्यत्
स्थौल्यापकर्षणं नच व्या
यामिनं मर्त्यं मर्दयन्त्यरयो ब
लात् नचैनं सहसाक्रम्य जरा
समधिगच्छति । व्यायामस्विन्न
गात्रस्य पद्भ्यामुद्वर्त्तितस्य च ॥
व्याधयो नोपसर्पन्ति वैनतेय-
मिवोरगाः रक्तपित्ती कृशः शो
षी कासी श्वासी क्षता तुरः ॥
भुक्तवान्स्त्रीषु च क्षीणो व्या-
यामं परिवर्जयेत् वातपित्ता
मयी बालो वृद्धोऽजीर्णीच ये
त्यजेत् अतिव्यायामतः कासो
रक्तपित्तं प्रजायते । श्रमः
क्लमः क्षय स्तृष्णा ज्वर श्छर्दि
श्चजायते इति राजवल्लभः ॥
व्यायोगः पुं दशविधरूपकान्त-
र्गतरूपकविशेषः यथा स्या
न्नाटकं प्रकरणं भाणः प्रहसनं
डिमः व्यायोगः समवकारो वि
थ्यङ्केहामृगा इति ॥ अभि
नेयप्रकाराः स भीणाः चटू सं
स्तवादिकाः इति हेमचन्द्रः
व्यालः पुं सर्पः श्वापदः इ
त्यमरः दुष्टगजः इति मेदिनी
चित्रकः व्याघ्रः इति राज
निर्घण्टः राजा ॥ इत्यमरटी
काया मथुरेशः ॥
व्यालः त्रि शठः इत्यमरः ॥
धूर्त्तः इति जटाधरः ॥
व्यालकः पुं दुष्टगजः तस्य
पर्यायः गंभीरवेदी २ अंकुशाद्
दुर्दुरः ३ चालकः ४ इति त्रि
काण्डशेषः ॥
व्यालखड्गः पुं व्यालनखः इति
राजनिर्घण्टः ॥
व्यालगन्धा स्त्री नाकुली इति
राजनिर्घण्टः ॥
व्यालग्राहः पुं व्यालग्राही ।
इत्यमरटीकायां भरतः ॥
व्यालग्राहीन् पुं भित्वार्थसर्प

ग्राही सर्पखेलकः सापुड़ि।
या इति बादिया इति च भा-
षा तत्पर्यायः अहितुंडिकः २
इत्यमरः जांगुलिः ३ जांगुलिः
४ आहितुंडिकः ५ व्यालग्राहः
ह्वः ६ गारुडिकः ७ विषवैद्यः
८ इति शब्दरत्नावली ॥
व्यालजिह्वा स्त्री महासमंगा
इति राजनिर्घंटः ॥
व्यालदंष्ट्रः पुं गोक्षुरः । इति
राजनिर्घंटः ॥
व्यालनखः पुं गंधद्रव्यविशेषः
बघनखा इति हिन्दीभाषा त
त्पर्यायः कूटस्थः २ चक्रनाम
कः ३ चक्री ४ चक्रनखः ५ अ
स्वफलः ६ व्याघ्रनखः ७ द्वीपि
नखः ८ खपुरः ९ व्यालपाणि
जः १० व्यालायुधः ११ व्यालव-
लः १२ व्यालखड्गः १३ अस्यगु
णाः तिक्तत्वं उष्णत्वं कषाय
त्वं कफवात कुष्ठ कंडू व्रणना
शित्वं वर्णत्वं सौगंध्यप्रदत्वं च
इति राजनिर्घंटः ॥
व्यालपत्रा स्त्री एर्वारुः । इति
राजनिर्घंटः ॥
व्यालबलः पुं व्यालनखः ।
इति राजनिर्घंटः ॥

व्यालमृगः पुं चित्रव्याघ्रः चि
तावाघ इति भाषा इति महा
भारते राजधर्मः ॥
व्यालम्बः पुं रक्तैरंडः इति वै
द्यकं ॥
व्यालायुधं क्ली नखीनामगंध
द्रव्यः इत्यमरटीकायां मथुरेशः
व्यालायुधः पुं व्यालनखः इति
राजनिर्घंटः ॥
व्यावक्रोशी स्त्री परस्पराक्रोश
ने इति स्त्रीलिंगसंग्रह टीकायां
भरतः ॥
व्यावभाषी स्त्री व्यावक्रोशी ।
इत्यमरटीकायां रायमुकुटः ॥
व्यावर्त्तः पुं नाभिकंटकः इति
शब्दरत्नावली तत्र व्यावर्त्तको
पिपादः ॥
व्यावहारी स्त्री परस्परहरणं
इत्यमरटीकायां भरतः ॥
व्यावहासी स्त्री परस्परहसनं।
इत्यमरटीकायां भरतः ॥
व्याहृतः त्रि हृतः यथा हृते
तु हृत व्याहृतौ इति हेमचं
द्रः आहृतश्च ॥
व्याहृतिः स्त्री खंडनं यथा
प्रतीतिः पक्षपाते तव च महिमा

वांङ्मनसयो रतव्यावृत्त्या यंच
कित मभिधत्ते श्रुतिरपि स
कस्य विषयः पदे त्वर्वाचीने प
तति न मनः कस्य न वचः इ
तिमहिम्नस्तोत्रे स्तुतिः यथा
सर्वे सपत्नव्याहृतिरेव दोषेन
विपत्नव्याहृतिरपि तस्मात्तनु
गुणत्वात् इति चिंतामणौ अ
साधारणमूले ॥
व्यासः पुं विस्तारः इत्यमरः
मानभेदः इति शब्दरत्नाव-
ली पाठकब्राह्मणः यथा।
नैयत्तकालिक कल्पतरौ भवि
ष्यपुराणे विस्पष्ट मद्रुतंशा
न्तस्पष्टाक्षरपदं तथा कलस्वर
समायुक्तं रस भाव समन्वितं
बुध्यमानः सदर्थे वै ग्रन्थार्थे
कृत्स्नशो नृप । ब्राह्मणादिषु
सर्वेषु ग्रन्थार्थं चार्पयेन्नृप य
एवंवाचयेदिहस्तविप्रो व्यास
उच्यते इति तिथ्यादितत्वं॥
गोलस्य मध्यरेखा यथा ।
व्यासे भनंदाग्नि हते विभक्ते
ख बाण सूर्यैः परिधिस्तु सू
क्ष्मः द्वाविंशतिघ्ने विहृतेथ
शैलैः स्थूलोथवा स्याद्व्यवहा
रयोग्यः

उरोदरे विष्कंभ मानं किल
यत्र सम तत्र प्रमाणं परिधेः
प्रवत्त द्वाविंशति यत्परिधि
प्रमाणं तद्व्यास संख्याच स
प्त विभिन्ना ॥ इति लीला
वती मुनिविशेषः तत्पर्या
या वेदव्यास शब्दे द्रष्टव्याः।
स च सत्यवत्यां कन्याकालेप
राशरान्मातः श्रीकृष्णस्य पंच
कलोद्भवः यथा व्यासः पुराण
सूत्रेच पप्रच्छ वाल्मिक यदा
मौनी भूतः स सस्मार त्वामेव
जगदम्बिके तदा चकार सिद्धां
तं त्वद्वरेण मुनीश्वरः सेप्राप
निर्मलं ज्ञानं भ्रमान्ध ध्वंसदी
पकं पुराणसूत्रं श्रुत्वा सव्यासः
पंचकलोद्भवः त्वां सिषेवे प्र
दध्यौच शतवर्षंच पुष्करे तदा
त्वत्तो वरं प्राप्य सत्कवीन्द्रो बभूव
ह तदा वेदविभागं च पुराणं
चकार हः इति ब्रह्मवैवर्त्ते प्रकृ
तिखंडे ४ अध्यायः तस्यजन्मा
न्तरं यथा अथ भूयो जगत्स्र
ष्टा भोः शब्देनानुवादयन् ।
सरस्वती मुच्चचार तत्रसारस्व
तो भवत् अपान्तरतमानाम
सुतो वाक्संभवः प्रभुः भूत

भव्य भविष्यज्ञः सत्यवादी दृ
ढव्रतः तमुवाच नतं मूर्द्ध्ना देवा
नामादिरव्ययः वेदाख्यानेश्रु
तिः कार्या यथा मतिमतांव
र तस्मात्कुरु यथाज्ञप्तं ममैत
द्वचनं मुने तेन भिन्नास्तदा वे
दा मनोः स्वायंभुवेऽन्तरे त
तस्तुतोष भगवान्हरिस्तेना
स्यकर्मणा तपसा च सुतप्तेनय
मेन नियमेनच मन्वन्तरेषु पुत्र
त्वमेवं मेवं प्रवर्त्तकः भविष्य
स्यचलो ब्रह्मन्नप्रधृष्यश्च नित्यशः
इति महाभारते मोक्षधर्मः ॥
अन्यच्च सुतं च जनयच्छक्तेरदृ
श्यन्ती पराशरं काली पराश
रात्यजे कृष्णद्वैपायनं मुनिं ॥
द्वैपायनादरण्यां वै शुकोप
ते गुणान्वितः इति वह्निपु
राणे प्रजापतिसर्गो नामाध्या
यः युगभेदे व्यासभेदो यथा
यस्मिन्मन्वन्तरे व्यासा ये ये
तांस्तान्निबोध मे यथावद्भे
दः शाखानां व्यासेन क्रियते म
ते अष्टाविंशतिकृत्वो वै वे
दा व्यस्ता महर्षिभिः वैवस्वते
न्तरेऽस्मिन्द्वापरेषु पुनः पु
नः वेदव्यासा व्यतीता ये अ

ष्टाविंशति सत्तमाः चतुर्धा यैः
कृतो वेदो द्वापरेषु पुनः पुनः
द्वापरे प्रथमे व्यस्ताः स्वयंवे
दाः स्वयम्भुवा द्वितीये द्वापरे चै
व वेदव्यासः प्रजापतिः ॥
तृतीये चोशना व्यासश्चतुर्थेत
बृहस्पतिः सविता पंचमे व्या
सो मृत्युः षष्ठे स्मृतः प्रभुः ॥
सप्तमेव तथैवेन्द्रो वशिष्ठश्चा
ष्टमे स्मृतः सारस्वतश्च नवमे
त्रिधामा दशमे स्मृतः एका
दशे वै त्रिवृषा भारद्वाजस्ततः
परं त्रयोदशे चान्तरीक्षो धर्मी
चापि चतुर्दशे त्र्यारुणः पंचद
शे षोडशे तु धनंजयः ।
कृतंजयः सप्तदशे ऋणज्योष्ठा
दशे स्मृतः ततो व्यासो भरद्वा
जो भरद्वाजात् गोतमः ।
गोतमादुत्तमो व्यासो हर्यात्मा
योऽभिधीयते अथ हर्यात्मनो
वेणः स्मृतो राजश्रवास्तु यः
सोम शुष्मायनस्तस्मात्तृणबिं
दुरिति स्मृतः ऋक्षोऽभूद्भार्गव
स्तस्माद्वाल्मीकि र्योऽभिधीयते
तस्मादस्मत्पिता शक्ति र्व्यास
स्तस्मादहं मुने जातुकर्णोऽ
भवन्मत्तः कृष्ण द्वैपायनस्ततः

अष्टाविंशति रित्येते वेदव्या
साः पुरातनाः ॥ एको वेद
श्चतुर्धा तु तैः कृतो द्वापरा
दिषु भविष्ये द्वापरे चापि द्रौणि
र्व्यासो भविष्यति ॥ व्यतीतेष
मम पुत्रेऽस्मिन् कृष्णद्वैपायनेषु
तो इति विष्णुपुराणे ३ अंशे
अध्यायः ॥
कूर्म्मपुराणे त्वियान् विशेषः
द्वादशे द्वापरे शततेजाः त्रयो
दशे धर्मः चतुर्दशे तरक्षुः ।
पंचदशे त्र्यारुणः अष्टादशे
ऋतंजयः एकविंशे वाजश्र
वाः द्वाविंशे शुष्मायनः त्रयो
विंशे तृणबिन्दुः । चतुर्विंशे
वाल्मीकिः पंचविंशे विष्णुः
अन्यत् विष्णुपुराणवत् ॥
व्यासकः त्रि विशेषणासक्तः
सक्तश्च यथा व्याकोषेन्दीवरा
भा कनक पलिलसत्पीतवा
साः सुहासा वैरे रुग्धेदकांत
वेल्लपित चिकुरा चारु कर्णा
वतंसा अंसव्यासक्त वेणा धृति
स्थगित जगद्भूतवीथि र्लसंती
मूर्त्ति र्गोपस्य विष्णो रवतु जग
तिनः सर्वदा हारिहारा ॥ इ
ति छंदो मंजरी ॥

व्यासंगः पुं विशेषेण आसं
गः वि आङ् पूर्व्व मन्ज धातो
र्घञ् प्रत्ययेन निष्पन्नः ॥
व्यासमाता स्त्री वेदव्यासज
ननी इति त्रिकांडशेषः त
त्पर्य्यायः सत्यवती १ वासवी २
गंधकालिका ३ योजनगंधा ४
दासेयी ५ शालंकायनजीवसूः
६ इति हेमचंद्रः ग्रन्थांतरे
शालंकायनजा इति च पाठः
काली ७ कषोदरी ८ विचि
त्रवीर्यसूः ९ चित्रांगदसूः १०
योजनगंधिका ११ इति त्रिकां
डशेषः गंधकाली १२ सत्या १३
दासनंदिनी १४ इति शब्द
रत्नावली ॥
व्यासिद्धः त्रि निषिद्धः इति
मिताक्षरा ॥
व्याहृतः त्रि विशेषेणाहृतः
व्यर्थः यथा समव्यासक्त म
नसो चेंद्रियार्थयोः सन्निक
र्षनिमित्तत्वात् ते व्यापदेशा
ज्ञानविशेषाणां व्याहृतत्वाद
हेतुः इति गोतमसूत्रे प्रत्यक्ष
परीक्षा प्रकरणं अपिच अव्या
हृताज्ञस्सर्वास यः सदोदयोऽ
नि ।   निर्जितारि

तदैत्यादिःसयदाह स्पृष्टएव
तत् इति देवीमाहात्म्यं ॥
व्याहारः पुं वाक्यं इत्यमरः॥
व्याहृतिः स्त्री व्याहारः मंत्र
विशेषः यथा ॐकारमादि
तः कृत्वा व्याहृतिस्तदनंतरं।
ततोऽधीयीत सावित्रीमेकाग्र
श्रद्धयान्वितः पुरा कल्पे समु-
त्पन्नाभूर्भुवःस्वःसनातनाः म
हाव्याहृतय स्तिस्रःसर्वाशु
भनिवर्हणाः प्रधानपुरुषः
कालोब्रह्मविष्णुमहेश्वराः सत्वं
रजस्तम स्तिस्रः क्रमाद्व्याहृत
यःस्मृताः ॐकार स्तत्परं ब्र
ह्मसावित्रीस्यात्तदक्षरं एषमं
त्रोमहाभाग सारात्सार उदाहृ
तः इति कौर्मे उपरिभागे १२
अध्यायः ॥
व्युतः त्रि स्यूतं इति भरत
द्विरूपकोषः ॥
व्युतिः स्त्री ऊतिः तंतुसंततिः
इति भरतद्विरूपकोषः ॥
व्युत्क्रमः पुं क्रमविपर्ययः।
व्यतिक्रमः तत्पर्यायः । उत्क्र
मः २ अपक्रमः ३ इति हेमच
न्द्रः ॥
व्युत्थानं क्ली स्वातंत्र्यकृत्यं।
विरोधाचरणं इति मेदिनी
प्रतिरोधने समाधिपारणे ।
इति हेमचंद्रः नृत्यभेदः ।
इतिशब्दरत्नावली विशेषे
णोत्थानंच॥
व्युत्पत्तिः स्त्री विशेषेणोत्प
त्तिः संस्कारः । इति व्युत्प
न्नशब्दार्थ दर्शनात् यथा श
क्तकालबोधनीयत्वेन शारदा
पदव्युत्पत्ते स्तत्पदे तालव्यादि
सारं ददातीति व्युत्पत्ति स्तत्का
लनिकी इतितिथ्यादितत्वं॥
शक्तिज्ञाने यथा व्यवहारादि
बाधकं विना विवरणादपि व्युत्प
त्तेः बाधकं विना स्वसाध्यसंबा
धकं यद्विशेषणं तदभावयुक्त
विशेषण सहकारेण व्युत्पत्तेः
व्युत्पत्ति संभवात्याक्तिग्रहसम्भ
वादिति यावत् इति व्याख्या
नवादस्य माथुरीटीका ॥
व्युत्पन्नः त्रि संस्कृतः । इति
हेमचंद्ररत्नावल्यौ ॥ व्युत्प
त्तियुक्तः यथा व्याकरणव्युत्प
न्नशब्दज्ञानाधीनं शास्त्रोक्तज्ञानं
तदधीनाच वैदिकक्रियातत्फ
लं स्वर्गादि इति मुग्धबोध
टीकायां दुर्गादासः ॥

5033

व्युत्पादकः त्रि व्युत्पत्तिजनकः।
यथा शब्दव्युत्पादकशास्त्रारंभेश
ष्टदेवमङ्गलं कर्तव्यं ।
इति मुग्धबोधटीकायां दुर्गादा
सः ॥
व्युष क्ली फलं दिनं प्रभाते ।
पर्युषिते । इति हेमचन्
द्रः ॥
व्युष्ट त्रि उषितः ॥ दग्धः ।
इति मेदिनी ॥
व्युष्टिः स्त्री फलं समृद्धिः । इति
मेदिनी ॥ स्तुतिः इति हेमच
न्द्रः ॥
व्यूढः त्रि विन्यस्तः ॥ संहतः।
इत्यमरः प्रथुलः । इति मे
दिनी ॥
व्यूढकंकटः त्रि सन्नद्धः इत्यम
रः ॥
व्यूढिः स्त्री विन्यासः संहतिः
प्रथुलता इति व्यूढशब्दार्थदर्श
नात् ॥
व्यूतं त्रि ऊतं तंतुसंततं ।
विपूर्व वेञ धातोःक्त प्रत्यये-
न निष्पन्नं ॥
व्यूतिः स्त्री वस्त्रादिवपनक्रिया ।
तत्पर्यायः वाणिः २ इत्यमरः।
व्युतिः ३ इति तट्टीका ॥
व्यूहः पुं समूहः निर्माणं ॥
तर्कः इति मेदिनी देहः ॥
सैन्यः इति त्रिकांडशेषः ॥
युद्धार्थसेनारचना तत्पर्यायः।
बलविन्यासः २ इत्यमरः ॥
युद्धार्थसैन्यस्य देशविशेषेविभ
ज्य दुर्लंघ्यत्व निमित्तं स्थापनं
व्यूहः ऊह वितर्के विपूर्वात्घ
ञ घञे दंडादयो भेदा विशेषा
व्यूहस्येत्यर्थात् आदिना भो
गमंडल संहतानां ग्रहः यथा
ह कामन्दकिः ।
तिर्यग्वृत्तिस्तु दंडःस्याद्भोगोऽ
न्वावृत्तिस्तु देवच मंडलसर्वतो
वृत्तिः पृथग्वृत्ति रसंहतः इति
एषां बलाग्रंच वस्त्वा भेदाः
क्रौंच चक्रादयो ग्रन्थ गौरव
भयान्नोक्ताः इति भरतः ॥
अपिच समग्रस्य तु सैन्यस्य वि
न्यासःस्थान भेदतः सव्यूह इ
ति विख्यातो युद्धेषु पृथिवी
भुजां व्यूहभेदास्तु चत्वारो दं
डो भोगोऽथमंडलं । असं
हतस्तु निर्णीता नीतिसारा
दि संमता अन्येपि प्रकृतिव्यू
हाःक्रौंच चक्रादयःक्वचित्।
तिर्यग्वृत्तिस्तु दंडःस्याद्भोगो-

न्वाहूति रेवच मंडलं सर्व
तोहूतिः श्व्यूहूति रसरतः
सैन्यानां नीतिसाराद्यो व्यूह
भेदाः समीरिताः क्रौंच च
क्रादि भेदानां लक्षणं भार
तादिषु इति शब्दरत्नावली
व्यूहने क्ली सैन्यसंस्थाने ।
विपूर्व ऊहधातो रनट् प्रत्यये
नानिष्पन्नं ॥
व्यूहपार्ष्णिः पुं व्यूहपश्चाद्भागः
तत्पर्यायः प्रत्यासारः २।
इत्यमरः प्रत्यासरः ३ । इति
तट्टीका व्यूहस्य पश्चाद्व्यूहा
न्तरं इति केचित् । इतिभ
रतः व्यूहमध्य । इति शब्द
रत्नावली ॥
व्ये ञ पे वृत्तौ ॥ इतिकवि
कल्पद्रुमः ञ व्ययति व्ययते
पे वीयात् इति दुर्गादासः
व्योकारः पुं लोहकारः ।
इत्यमरः ॥
व्योम न् क्ली आकाशः इत्यम
रः जलं भास्करस्यार्चनास्थानः
इति मेदिनी अभ्रकं । इति
राजनिर्घंटः ॥
व्योमकेशः पुं शिवः इत्यम
रः व्योमकेशी न् पुं महादेवः
गंगाधारणकाले व्योमव्यापिनः
केशा यस्य संतीति व्योमकेश
शब्दादिन् प्रत्ययेन निष्पन्नः ॥
व्योमचारिपुरं क्ली शोभपुरं ।
इति भूरिप्रयोगः ॥
व्योमचारी न् पुं देवता ॥ पक्षी
इति मेदिनी ॥ चिरजीवी ॥
द्विजातः इति विश्वः ॥
व्योमधूमः पुं मेघः । इति
त्रिकांडशेषः ॥
व्योमनासिका स्त्री भारतीपक्षी
इति त्रिकांडशेषः ॥
व्योममंजरं क्ली पताका । इति
त्रिकांडशेषः ॥
व्योममंडलं क्ली पताका । इति
शब्दरत्नावली ॥ आकाशंच ॥
व्योममुद्गरः पुं निर्घातः । इति
हारावली ॥
व्योमयानं क्ली विमानं इत्य
मरः ॥
व्योमस्थली स्त्री भूमिः इति
भूरिप्रयोगः नभस्थलंच ॥
व्योमाभः पुं बुद्धः इति त्रि
कांडशेषः ॥
व्योमोदकं क्ली दिव्योदकं ।
इति राजनिर्घंटः ॥
व्योषं क्ली त्रिकटु इत्यमरः ॥

व्रज गतौ । इति कविकल्प
द्रुमः व्रजति इति दुर्गादासः ॥
व्रज क संस्कृतौ गतौ । इति
कविकल्पद्रुमः क व्राजयति ।
विरफो तौ [illegible] तोपमो विरफोरे
फरहितोच स्यातां । इति
दुर्गादासः ॥
व्रजः पुं समूहः इत्यमरः ॥
गोष्ठं पंथाः इति मेदिनी ॥
अस्य वर्णा मथुराया अनन्तपार्श्व
वर्त्तिदेशः अस्य विवरणं यथा
मात्स्ये व्रजमंडल भूगोलंशेषना
गफणे वरे उमराख्ये महाश्रेष्ठे
सर्वेषां मध्य संस्थिते तस्योपरि
स्थितं लोकं सर्वस्थानं महावले
कृष्णलीला विहारार्थं सुसुस्थान
विराजितं चतुरष्टक कोशेन प
रिपूर्णं विराजितं । अस्य प्रदक्षि
णीकुर्वन् यत्र याम्य सुखं लभेत्
दानवी वासतो लोको विष्णुलोक
मवाप्नुयात् ।
आवासास्त्रियते चेत् पुनर्जन्म न
विद्यते पुण्य लक्षणं तद्बा
कृतेऽस्मिन्व्रजमंडले । कृष्ण
न निर्मिता स्तीर्थाः सार्द्धद्वय स
हस्रकाः तत्रादौ वनो ।
पवन अतिवनाधिवनान्यष्टच
त्वारिंशत् तानि चतुरष्टक्रो
शपरिमाणं स्थितानि चतुर्भा
गशोऽभ्यंतरे स्थितानि क्रमश
आह । पाद्मे वनानि द्वादशान्या
ऽ यमुनोत्तर दक्षिणे महाव
नं महाश्रेष्ठं १ द्वयं काम्यवनं
शुभं २ कोकिलाख्यतृतीयंच
३ तुर्यंतालवनं तथा ४ पंच
उमराख्यंच ५ षष्ठ भांडीरसंज्ञ
कं ६ नाम्ना छत्रवनं श्रेष्ठंसप्त
मे परिकीर्त्तितं ७ अष्टमं खदि
रं प्रोक्त ८ नवमं लोहजं वनं
नाम्ना भद्रवनं श्रेष्ठं दशमंच
उच्यते ९ एकादशं समाख्या
तं बहुलावनसंज्ञकं ११ नाम्नावि
ल्ववनं श्रेष्ठं द्वादशं कामनाम
दं १२ इति द्वादशसंज्ञानिवना
नि शुभदानिच इति द्वादशव
नानि अथ द्वादशोपवनान्या
ह वाराहे आदौ ब्रह्मवननाम
द्वितीं त्वप्सरावनं २ तृतीयं
विकलं नाम ३ कदम्बाख्यचतु
र्थकं ४ नाम्ना स्वर्णवनं श्रेष्ठंप
च मे परिकीर्त्तितं ५ सुरभीवन
नामानं षष्ठ माल्लादवद्दनं ६
श्रेष्ठं प्रेमवनं नाम सप्तमं शुभदं

न्तराणां ७ मधुरवमानान मष्ट
मेप्रविकीर्त्तिते ८ मालेगीत
वनं श्रेष्ठं नवमं मानवर्द्धनं
९ । शेषशायिवनं श्रेष्ठंदश
मं पापनाशनं १० ॥ एका
दशं समाख्यातं नारदाख्यं
शुभोदितं ११ द्वादशं परमा
नंद वनं सर्व्वार्थदायकं १२
इति द्वादशसंज्ञानि वनान्यु
पवनानि च इति द्वादशोप
वनानि अथ द्वादशप्रतिव
नानि भविष्ये आदौ रंकवनं
श्रेष्ठं पुरसंज्ञाविराजितं १ ।
वार्त्तावनं द्वितीयंच २ करहा·
(ख्य)तृतीयकं ३ चतुर्थं कामा
नामानं वनं कामप्रदं नृणां
४ वनमंजन नामानं पंचमं·
शीघ्रप्रदं ५ नाम्ना कर्णावनं
श्रेष्ठं षष्ठं स्मरवरप्रदं ६ कृ·
ष्णक्षिपणकं नाम वनं सप्त·
मं मीरितं ७ नंदप्रेक्षणकृ··
ष्णाख्यं वनंनंदन मष्टमं ८
वनमिंद्रवनंनाम नवमं कृष्ण
पूजितं ९ शिक्षावनं शुभमोक्ष
दृशमंनंद भाषितं १० चंद्राव·
लीवनंश्रेष्ठ मेकादश मुदाहृ
तं ११ नाम्ना लोहवनं श्रेष्ठंद्वाद
शं

शुभदं नृणां १२ इति प्रतिव
नान्याहु मार्गे वामे च दक्षिणे
इति द्वादशसंज्ञा स्ते देवावास
फलप्रदाः । इति द्वादश प्रति
वनानि ॥ अथ द्वादशाधिवना
नि विष्णुपुराणे । मथुरा प्रथ
नाम १ राधाकुंड द्वितीयकं २
नंद ग्रामं तृतीयंच ३ गड्डस्थानंच
तुर्थकं ४ ॥ पंचमं ललिता
ग्रामं ५ वृषभानुपुरंच षष्ठं
६ सप्तमं गोकुलं स्थानं ७ अष्ट
मं बलदेवकं ८ गोवर्द्धनवनं श्रे
ष्ठं नवमं कामनाप्रदं ९ ।
वनं जावबटं नाम दशमं परि
कीर्त्तितं १० मुख्यं वृन्दावनं श्रे
ष्ठमेकादशं प्रकीर्त्तितं ११ ।
संकेतवटकं स्थानं वनं द्वादशं
कीर्त्तितं १२ ॥ इति द्वादशसं
ज्ञानि वनान्यधिवनानिच वना
मनामधिपाः प्रोक्ता व्रजमंडलम
ध्यगाः एषां नैव विलोकेन वन
यात्राच निष्फला एषांच दर्श
नेनैव वनयात्रा शुभप्रदा ॥ श्री
दो लीला यदा पयपहनयात्रा
तत स्मरेत् सर्व्वान्कामानवाप्नो
ति विष्णुलोक मवाप्नुयात् ॥
सर्व्वत्रविजयीभूयाद्वनयात्रा प्रभा

5037

वतः इति व्रजभक्तिविलासे १
अध्यायः ॥
व्रजं क्ली व्रजनं गमनं । व्रज
गतौ इत्यस्मात्वप्रत्ययेन निष्पन्नं
इति सिद्धांतकौमुदी ॥
व्रजकः पुं तपस्वी ॥ इति शब्द
रत्नावली ॥
व्रजकिशोरः पुं श्रीकृष्णः सप्त
द्वादशाधिवनांतर्गत ललिता·
ग्रामाधिवनाधिपो देवः ॥ अथ
ललिताग्रामाधिप व्रजकिशोर
मंत्रः यथा श्रीथरोपनियदि ।
ॐ श्रीं ललिताग्रामाधिवनाधि
पतये व्रजकिशोराय नमः ।
इत्येकविंशत्यक्षरो व्रजकिशोर
मंत्रः अनेन मंत्रेणाप्राणायामः
अस्य मंत्रस्य विभाण्डकऋषि र्व्र
जकिशोरो देवतागायत्रीछंदः
मम सकल पापक्षय द्वारा गोपा
ल कृष्ण दर्शनार्थे विनियोगः
शिरसि विभाण्डकऋषये नमः
हृदि व्रजकिशोराय नमः अन्ते
हृदि गायत्रीछन्दसे नमः ॥
अथ ध्यानं ।
ललितास्वपुते कृष्णं सेवेस्त्व स·
विभिश्चितं ध्यायेद्विंशति रूप
स्यमहाराम कृतोत्सवं इतिध्या

नायथा शक्ति जपं कृत्वा ग
ह्यातीत्यादिना जपं समर्पयेत्
इति ललिताग्रामाधिप व्रजकि
शोरमंत्रः इति व्रजभक्तिवि
लासे १ अध्यायः ॥
व्रजनाथः पुं श्रीकृष्णः इति
पुराणं ॥
व्रजभूः पुं केलिकदम्बः इति
शब्दचंद्रिका व्रजभूमौ स्त्री ॥
व्रजजाते त्रि ॥
व्रजमंडले क्ली व्रजभूमि यथा
मात्स्ये । व्रजमंडल भूगोलेषो
घनाभाफणा वरे कृष्णलाख्यम
महाश्रेष्ठं सर्वेषां मध्यसंस्थि
ते इति व्रजभक्तिविलासे १
अध्यायः ॥
व्रजमोहनः पुं श्रीकृष्णः इति
पुराणं ॥
व्रजवरः पुं श्रीकृष्णः सप्तद्वा
दशाधिवनांतर्गत जावबटाधि
वनाधिपो देवः अथ जावबटा
धिवनाधिप व्रजवरमंत्रः गो
तमीये बटाहृदिः समंतान्तुस
थेने वन माश्रिते तमेवाधिव
नोद्यानवटसेवा परायणं ॥
तस्मिन्मध्ये बटे श्रेष्ठं कृष्णकी
डा वरप्रदं बटाहृदिवनं त्ता

तन्मध्ये चैव वटं स्मृतं वटं
वृक्षे स्थितं तत्र वटसंज्ञविधी
यते वटज्ञावानुसारेणावटति
क्षाणि दर्शयेत् वटस्थानति
गं ॐ ठः जों वटाधिवनाधि
धिपतये व्रजवराय नमः इत्ये
कोन विंशत्यक्षरो ज्ञाववटाधि
पतये व्रजवराय नमः इत्ये
कोन विंशत्यक्षरो ज्ञाववटाधि
वनाधिप व्रजवरमन्त्रः अने
नमन्त्रेण प्राणायामः अस्यमं
त्रस्य वाल्मीक ऋषि र्ज्ञाववटा
धिवनाधिपो व्रजवरो देवता
पंक्ति श्छन्दः मम सकल सौ
भाग्यसंपत्फल प्राप्त्यर्थे जपे
विनियोगः न्यासं पूर्ववत् ॥
अथ ध्यानं नाभा मृगाङ्कभूषा
ढ्यं राधाकृष्णं मनोहरं ध्या
येद्युगल मूर्त्तिं वनयात्रावृ
त्ते इति ध्यात्वा यथाशक्ति
जपं कृत्वा गुह्यातीत्यादिनाज
पं समर्पयेत् इति ज्ञाववटाधिव
नाधिप व्रजवरमन्त्रः इति व्रजभ
क्तिविलासे ५ अध्यायः व्रजवल्ल
भः पुं श्रीकृष्णः इति पुराणं ॥
व्रजाङ्गना स्त्री गोपी यथा विना
महेशस्य विलंभवानिलैः म
हृदयः पंचशरागमुद्दिरन् ।

व्रजाङ्गनानामपि गानशालि
नां नराय मानं महर्षिः पुना
तवः इतिच्छन्दोमञ्जरी ॥
व्रज्या स्त्री पर्यटने निर्गीयोः
प्रयाणे गमने इत्यमरः ॥
वर्गः इति मेदिनी रेगः ।
इति धरणिः ॥
व्रण शब्दे इति कविकल्पद्रुमः
व्रणति इति दुर्गादासः ॥
व्रण तक अंगचूर्णे । इतिक
विकल्पद्रुमः अंगचूर्णः अंगभे
दः व्रणयति गात्रं वाणेन भटः
इति दुर्गादासः ॥
व्रणः पुं क्ली ततं तत्पर्यायः
ईर्मं २ अरुः ३ । इत्यमरः ॥
ईर्मः ४ इति तट्टीका अथ व्र
णाधिकारः व्रणो द्विधा परि
ज्ञेयो दोषजागन्तुभेदतः ।
दोषजो दुष्टदोषैः स्यादन्यः शास्त्रा
दि संभवः ॥ तत्र वा
तिकस्य लक्षणमाह स्तब्धः क
ठिन संस्पर्शो मंदस्रावो महा
रुजः तुद्यते स्फुटति श्यावो व्र
णो मारुतसंभवः लब्धः अ
चलः पैत्तिक माह ।
तृष्णा मोह ज्वर क्लेद दाह दुः
खावदारणैः व्रणं पित्तकृतं

विद्यात्स्रावे र्गन्धैश्च पूतिकैः ॥
क्लेद आर्द्रता इत्यवं यथारूपं ।
अवदारणं व्रणे विदारणवत्
पीडा श्लैष्मिकमाह । बहुपि
च्छो गुरुः स्निग्ध स्तिमितो मंदवे
दनः पाण्डुवर्णोऽल्पसंक्लेदश्चिर
पाकी कफव्रणः बहुपिच्छः बहु
पिच्छिलः अल्पसंक्लेद ईषदा
र्द्रः योपि रे ह्वन्द्वजसान्निपातिक
माह रक्तो रक्तस्रुती रक्ताद्दि वि
ज्ञः स्यात्तदन्वयः तदन्वयः हि
त्रिदोषलिंग माह जिह्वातला
भोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्प
वेदनः सुव्यवस्थो निरास्रावः शु
द्धव्रण इति स्मृतः जिह्वातला
भः तलशब्देन स्वरूपार्थः तेन
जिह्वावद्रूपः सुव्यवस्थः उत्थ
नत्व रहितः दुष्टव्रण लिंगमा
ह पूति पूयाति दुष्टासृक्स्रावु
त्संगी चिरस्थितिः दुष्टव्रणोति
गंधादिः शुद्ध लिंग विपर्ययः
उत्संगी कोटरवान् अभिगंधा
दिः आदिशब्देन स्राव वेदना
विवर्णत्वादयः संगृह्यन्ते ॥
संरोह व्रणस्य लिंगमाह क
पोतवर्णा प्रतिमा यस्यान्तालोर
व

र्जिताः स्थिराश्च पिडकावन्तो
रोहन्तीति तमादिशेत् कपो
तवर्ण प्रतिमाः पाण्डुधूसराः स्थि
राः विदीर्णताबर्हिता पिडका
वन्तः संरोहणार्थी ये मांसाङ्कु
रा स्तदुक्ताः सद्रूप लिंगमाह
रूढवर्त्मान मग्रन्थि मशून
मरुजं व्रणं त्वक् सवर्णं सम
तलं सम्यग्रूढं विनिर्दिशेत् रू
ढवर्त्मानं संरूढ स्रावमार्गम्
मतलं अनिम्न सुखसाध्यत्वा
दिकमाह त्वङ्मांसजः सुखे दे
शे तरुणस्यानुपद्रवः धीम
तोऽभिनवः काले सुखे साध्यः
सुखव्रणः सुखे देशे मर्मादि
ते अनुपद्रवः ज्वर तृष्णा श्वास
कासारोचकादि रहितः धीमतः
पथ्यसेविनः सुखे काले हेमंत
शिशिरे च गणे वसन्ते रभि
हीनः कृच्छ्रो व्रणः स्वतः स
र्वैर्विहीनो विज्ञेय स्त्वसाध्यो
निरुपक्रमः एभि स्त्वङ्मांसज
त्वादिभिः निरूपम क्रमः अनु
पक्रान्तः चिरमुपचित इतिया
वत् वसामेदोस्थि मज्जान्त सम्ब
न्धेनच यःस्रवेत् आगन्तुजोव्र
णः सिद्धेन सिद्धे दोषसंभवः स

स्त्वंगमत्स्वकाभ्यंतरं स्नेहः
कुक्षिनाभिस्तनुष्टानो शोषि·
णां मधुमेहिनां व्रणाः प्र
सिद्ध माह दृश्यंते वात रक्तर्घ
वहिः शीतश्च ये व्रणाः दृश्य
न्ते वहि रक्तर्घे भवत्यतश्च·
शीतलाः प्राणा मांसक्षयश्वास
कासारोचक पीडिताः प्रवृद्ध
य रुधिरं व्रणा ये चापिमर्म·
सु क्रियाभिःसम्यगारब्धानसि
ध्यंतिच ये व्रणाः चिकित्सैनैव
तान्वैद्यः संरक्षनात्मनो यशः
मद्याशर्वाज्य समनाः पय चेद
नचेपकं सगंधा दिव्यगंधाश्च
मुमूर्षूणां व्रणाःस्मृताः मर्मस
पायु नाभि हृदयादिषु समं·
गाःजातिः दिव्यगंधाःपाविजा
तादिगंधाः अथागंव्रणास्त्रवि
दान माह नानाधाराश्रवैः श
रै नाना स्थान निपातितैः भ
वंति नानाकृतयो व्रणां स्तां·
स्तान्निबोध मे नानाधारा सुवा
ति येषां तैःशरैः अर्द्धचंद्रस्व
र्भल्ल कुंत शूल धारादिभिः
नानाकृतयःषडाकृतयः ताश्चा
कृतीराह छिन्नंभिन्नं तथाविद्ध

ततं पिच्चित मेवच घृष्ट माहुः
स्तथा षष्ट तेषांवक्ष्यामि लक्षणा
तत्र छिन्नस्य लक्षणा माह ।
तिर्यक्छिन्न ऋजु र्वापि योव्रणा
स्त्वायतो भवेत् गात्रस्य पातनं
तद्धि छिन्न मित्यभिधीयते ॥
यो व्रणाः तिर्यक्छिन्नः खड्गादि
कृते तिर्यक्छेदकृतः ऋजु र्वा
पि अथ वा खड्गादि कृतो रक्तो
व्रणाः आयतः दीर्घः आयत इ
तितिर्यक्छिन्नस्य ऋजोश्च विशे
षणं गात्रस्य पातनं गात्रस्यैक
देशस्य छेदेन पृथक्करणं वा·
छिन्न मित्यभिधीयते ॥ भिन्न
माह शक्ति कुंताद्य खड्गाग्र विषा
णै राशयो हतः यत्किंचित्प्रस
वेत्तद्धि भिन्न मित्यभिधीयते आ
शयः कोष्ठः कोष्ठभेदस्य लक्षणा
माह स्थानान्य माग्निपक्वानांमूत्रस्य
रुधिरस्यच हृदुंडुकः फुःफुसश्च
कोष्ठइत्यभिधीयते तस्मिन्भिन्ने र
क्तपूर्णो ज्वरो दाहश्च जायते ।
मूत्रमार्ग गुदास्येभ्य रक्तं घ्राणाच्च
गच्छति मूर्च्छा श्वास तृषाध्मान
मभक्त छंद एव च विण्मूत्र·
वातसंगश्च स्वेदस्रावोक्षि रक्तता

5041

लोहगंधित्व मास्यस्य गात्रदौ
र्गंध्य मेवच हृदिशूलं पार्श्व
योश्च विशेषश्चाभिधीयते ॥
तस्मिन्कोष्ठ भिन्ने शाक्ष्यादिभिः
रक्तपूर्णो कोष्ठ तस्मादंगाभिन्ना
न्त्वुतेन रक्तेन पूर्णोवाज्वरादयो
जायंते ॥
आमाशये पक्वाशये चरक्त
पूर्णो लक्षणा भेदमाह आमा·
शयस्थे रुधिरेरुधिरं छर्दये
त्यपि आध्मानमतिमात्रंच शूले
च भृशदारुणं पक्वाशयगते
रक्ते रुजा गौरवमेवच अधः
काये विशेषेणशीतताच भवे
दिह रुजा शूलं गौरवंपक्वाश
ये अधःकायेनाभे रधोदेश विशे
षेण गौरव मित्यन्वयः शीत
ताच भवेदिह इह नाभे रधोदे·
शे शीततावस्यात् सावया
पित्तभावात् विद्धमाह सूक्ष्मा·
स्यशस्त्राभिहतं यद् गत्वाशयं
विना तत्तदितं निर्गतं वा तद्वि
द्ध मिति निर्दिशेत् आशये
विनाकोष्ठं विना उत्तरितं श्रनि
र्गतशल्यं निर्गते वानिर्गतशल्यं
तंवा सघास्यस्य व्रणस्य लक्ष
णमा पयारे सशोभ्यं पिटकायुत

च्च शुक्र मेढ्रः शोणित वारूने
च स्फुरकृते बुद्बुद तुल्य मांसे
व्रणोसशल्ये सरुजं वदंति शुक्र
मेढ्रः शोणितवारूने यदा यदा
शल्यंचलति तदा तदा रुधिरंच
इति उद्धृतं उत्थितशल्यं कोष्ठ
स्थितस्य शल्यस्य लक्षणा माह
त्वचाः तीत्वपिशितानि भित्वाकु
पुरिहाय वा कोष्ठं प्रतिष्ठितेश
ल्ये ऊष्मोत्क्रान्तपदवान् त्वचः
समापि प्रतिक्रम्य उत्क्रान्तपद
वान् आरोपानाहो व्रणोविना
च्छुरीष दर्शनंच ॥ असाध्य
स कोष्ठस्य रक्तस्य पुरीषस्यलक्ष
णा माह कोष्ठान्त्रलोहितंपाण्डु
शीत पाद कराननं । शी
तोच्छ्वासं रक्तनेत्र मानद्धंच वि
वर्जयेत् आनद्ध आनाहरते ॥
तत माह नाभिच्छिन्नंनातिभि
न्न मुभयो लक्षणान्वितं ।
विषमं व्रणा मंगे यत्तत्तत्परि
कीर्तितं नातिच्छिन्नं नातिदीर्घ
चाते नातिभिन्नं नातिगंभीरंचा
ते उभयो छिन्नभिन्नयोः ।
विषमं व्रणा मंगे यत्पदुणा
मंगवैषम्यकरं पिच्चित माह
प्रहार पीडनाभ्यांत यदंगं दृ

पृथुतां गतं सास्थि तत्पिच्चितं वि
याड्डक मज्ज परिप्लुतं ॥ प्र
हारो मुद्गरादिना ॥ पीडनं क
पाटादिना पृथुतां चिपिटतां ॥
घृष्ट माह घर्षणादपि यात·
द्वा यदङ्गं विगतत्वचं । उष्म
स्रावान्वितं तत्र घृष्ट मित्यभि·
धीयते घर्षणात्कर्कशेष्टिका
पाषाणाभिघातादिभिः ॥ मांस
शिरा स्नायु सन्ध्यस्थि मर्म्मसु तत्
तेषु सामान्य लक्षणं माह भ्रम·
प्रलापः पतनं प्रमोहो विचेष्ट·
नं ग्लानि रौष्ण्यमथ स्रस्ताङ्ग
ता मूर्च्छनं मूर्द्धवात स्तीव्रा रुजो
वातकृताश्च ता स्ताः मांसोद·
काभं रुधिरं च गच्छेत्सर्वेन्द्रिया·
र्थोपरम स्तथैव च दशार्द्धसं·
ख्येषु विक्षतेषु सामान्यतो
मर्म्मसुलिङ्ग मुक्तं पतनं भूमौ ।
विचेष्टनं क्रियाहे चेष्टनं हस्तपा
दादि प्रक्षेपणादिकं मूर्च्छनं
इन्द्रियमोहः प्रमोहो मनोमोह
माह: तीव्रा रुजो वातकृताश्च
ता स्ताः देहपतानकादयः ।
रुधिरं च गच्छेत्मेदरक्तभगरा
स्य प्राणेभ्यः स्रवेत ।
सर्वेन्द्रियार्थोपरमः इन्द्रियाणां

कार्यनाशः ॥ अथ मर्म्म शिरा
स्नायु सन्ध्यस्थि विद्धानां पृथग्
लक्षण माह सेन्द्रगोप प्रतिमं
प्रभूतं रक्तं स्रवेत्क्षतयजश्च वा
युः करोति रोगान्विविधान्य
थोक्तान् शिरासु विद्धास्व
था क्षतासु सेन्द्रगोपो वार्षिको
स्थित कीटविशेषः । बी·
रबहूटी इति लोके सिद्धं । प्र
भूतं बहु रोगान् शिरोभिता
पाथवास्यकादीन् विद्धासु श
रादिना क्षतासु खड्गादिना ॥
कौब्ज्य शरीरावयवावसादः क्रि
यास्व शक्ति स्तमुला रुजाश्च ।
चिराद्व्रणो रोहति यस्य चापि तं
स्नायुविद्धं पुरुषं वदन्ति कौ
ब्ज्य विदूषाङ्गस्य वक्रता तमुला
महती शोथाभिवृद्धि स्तमुला
रुजश्च बलक्षयः स्रवेत पर्वशो
थः क्षतेषु सर्पिश्चेलावृतेषु सा
स्थिकर्म्मोपरमश्च लिङ्गं सर्व
तएव शोथः सर्व्वसन्धीन् व्याप्य
शोथः उपरमः नाशः घोरा
रुजा यस्य निशादिनेषु सर्वा
वस्थासु नैवैति शान्ति भिषग्भि
पश्चिहिदिनाथसूत्र स्त मस्थि
विद्धपुरुषं वदन्ति सर्वास्ववस्थासु श

यनासनादिकात् विदितार्थस
ञ्ज्ञः स्थानशल्यतन्त्रं ॥ अथ मर्म्म
शिरादि विद्ध लिङ्गानि पृथगा·
भिधाय मर्म्म शिरादीनां विद्धानां
पृथक्लिङ्गाभ्यतिदेशनाह यथा
स्वमेतानि विभावयेच्च लिङ्गानि
मर्म्मस्वपि ताडितेषु यथा स्वंशि
रादीनां विद्धानां यतानि लिङ्गा
नि पृथगुक्तानि लिङ्गानि चक्रा
रात्मस प्रलापादीनि च मर्म्मस्वपि
शरादिषु ताडितेषु विद्धेषु विभा
वयेत् जानीयात् ॥ सर्व्वव्र
णाना मुपद्रवानाह विसर्पः प·
क्षाघातश्च शिरास्तम्भोऽपतानकः
मोहोन्मादौ व्रणे पीडा ज्वर स्तृ
ष्णा हनुग्रहः कासश्छर्दि रती
सारो हिक्का श्वासः सवेपथुः ।
षोडशोपद्रवाः प्रोक्ता व्रणानां
व्रणचिन्तकैः ॥ अथाग्नि
दग्धस्य निदान माह तत्राग्नि र्हि
विधो ज्ञेयः स्नेह स्त्रवस्तु सेवा
श्रि वस्तेस्नेह स्तप्तं तैलादि स्त्र
वं लोहादि कथ्यते अग्निदग्ध
चतुर्विधमाह अग्निदग्धं चतु
र्द्धा स्यात्स्पृष्टं दुर्दग्ध मेवच ।
सम्यग्दग्धं तथातीव दग्धंचपरी
र्त्तितं तेषां लक्षण माह ।

यद्विवर्ण मभिप्लुष्टं तत्स्पृष्ट म
भिधीयते तीव्रदाहो यथावेता
यत्र स्फोटा भवन्ति हि चिरेणा
ते प्रशाम्यन्ति तद्दुर्दग्धमुदाहृ
तं ताम्रवर्ण मगंभीरं दाहपी
डा समन्वितं सुसंस्थितं च कथि
तं सम्यग्दग्धं भिषग्वरैः त्वङ्मांसं
यत्र दग्धं स्यादतिदग्धे वपुष स्तथा
शिरा स्नाय्वस्थि सन्धीनां तेवं तत्
तिदग्धके असर्थं वेदना दाहो
ज्वर स्तन्मूर्च्छया सह स्याद्व्रण
स्तु चिराद्रोहे रूढो याति विव
र्णतां अथ व्रणस्य चिकित्सा
आदौ शोथहरो लेप स्ततस्तु
परिषेचनं विस्रावन मस्त्रमो
क्षस्ततः स्यादुपनाहनं पा
चनं भेदनं पश्चात्पीडनं शोध
नं तथा रोपणं वर्णकरणं
व्रणस्यैते क्रमाः स्मृताः ॥
क्रमाश्चिकित्साः सप्तकेषु व्र
णस्य षष्टिरूप क्रमा लिखि
ताः सन्ति ते सर्वेऽत्र विस्तरभ
यान्न लिखिताः तत्रादौ शोथ
हरं लेपमाह यथा प्रज्वलिते
वेश्मन्यम्भसा परिषेचनं क्षिप्रं
प्रशामयत्यग्नि मेव मालेपनं रु
जं बीज प्ररूढा हिंसा देव

दारु महौषधं रास्नाग्निमंथो॰
लेपोयं वात शोथ विनाशनः
मधुकं चंदनं दूर्वा नल मूल
न्तु पद्मकं उशीरं वालकंप
द्मलेपोयं पित्त शोथहा न्य
ग्रोधोडुम्बराश्वत्थ प्लक्ष वेतस
वल्कलैः ससर्पिष्कैःप्रदेहःस्या
च्छोथे पित्त समुद्भवे ॥ आ
गंतजे रक्तजेव लेप पथोभि
पूजितः अजगंधाजशृंगी च
मंजिष्ठा सरल स्तथा पैकेकि
काश्वगंधाच लेपोयं श्लेष्मशो
थहा अजशृंगी मेढाशृंगी प
कैकिका प्रपाम निसोतः क्ष॰
स्माधराणापिप्पाके शिग्रुत्व॰
किशुकता शिवा मूत्रपिष्टःस॰
हिताय प्रलेपःश्लेष्म शोथहा न रा
त्रौ लेपनंदद्याद्दत्तंच पतितं तथा
न च पर्युषितं शुष्यमानं तथैव
धारयेत् दत्ते दत्ते मेव पुन नं
दद्यात् पतितं दीयमानं यद्
गात् पतितं पर्युषितं लेपनं॰
द्रव्यकल्कीकृते यत्पर्युषितं ॥
नमसा पिहितो शुष्मा रोमकू
पमुखे स्थितः विना लेपेन नि
र्याति रात्रौ नालेपयेदतः रा
त्रावपि प्रलेपस्तु विधातव्योवि
वत्तरैः अपाकि शोथे गंभीरे
रक्तपित्त समुद्भवे ॥ अथ
परिषेचन माह यथाम्बुभिः सिच्य
मानः शांति मग्नि र्हि गच्छति
दोषाग्नि रेवं सहसा परिषेकात्
शाम्यति तथथा वातघ्नौषधनिः
क्वाथे स्नेहे मांसरसे शृतैः अम्लैः
संसेचयेत्साध्यंवातिके कांजिके
नतु पित्तरक्ताभिघातोत्थ शोथे
सिंचेत्तु शीतलैः क्षीराज्य मधु वि
ट्टेक्षुरसैः पित्तहरैः शृतैः कफ
घ्नौषध निष्क्वाथे रशीतैः परि
षेचयेत् तैल क्षाराम्बु मूत्रैश्च
शोथे श्लेष्म समुद्भवे अथवि
म्लापन माह रुजतः काठिनस्या
